Sāyaṇācārya's

Ṛk Samhitā bhāṣyam
(Third Aṣṭaka)

83
―
1 ✓

ऋक्संहिताभाष्यम्
(तृतीयाष्टकम्)

This MS. was written in the year
1607 Saka = 1685 A.D.

श्री ऋ संहिता भाष्य विद्यारण्यकृत [illegible]।

॥श्रीमहागणाधिपतयेनमः॥ ॥हरिः ॐ ॥वागीशाद्याःसुमनसःसर्वार्थानामुपक्रमे॥यंनत्वाकृतकृत्याःस्युस्तंनमामिगजाननं॥१॥

यस्यनिश्वसितंवेदायोवेदेभ्योऽखिलंजगत्॥निर्ममेतमहंवंदेविद्यातीर्थमहेश्वरं॥१॥सोमस्येत्यनुवाकेद्वादशसूक्तानितत्रप्रयआरुरित्येका
दशर्चंसप्तमंसूक्तं।मंडलद्रष्टाविश्वामित्रऋषिः।अनुक्तत्वात्त्रिष्टुप्छंदलोदिपरिभाषया।अग्निर्देवताप्रातरनुवाकाश्विनस्तोत्रयोःसूक्तेनयस्य
प्रत्यग्निरुषसइतित्रीणीतिविनियोगःउक्तः।तत्रेदंतृतीयंसूक्तं।तस्मिन्नियमृक्प्रथमा॥ ॥प्रयआरुःशितिपृष्ठस्यधासेरामातराविविशुःसप्तवा
णीः।परिक्षितापितरासंचरेतेप्रसर्स्रातेदीर्घमायुःप्रयक्षे॥१॥शितिपृष्ठस्यधासेः।सर्वस्यधारयितुःअग्नेयेरश्मयःप्रारुःप्रकर्षेणगच्छंतिरश्म
यःमातरामातरौद्यावापृथिव्योआविविशुःसर्वतःप्रविष्टाः।सप्तसर्पणस्वभावाःवाणीःवननीयानदीश्चाविविशुः।परिक्षितापरितोवर्तमानेपितरापि
तरौतेनाग्निनासंचरेतेसम्यक्कृत्यव्यवहरतः।तथाप्रयक्षे।प्रकर्षेणयष्टुंदीर्घमायुः।अग्निश्चिरंजीवनंप्रभूतमन्नंवाप्रसर्स्रातिप्रसरयतःसंपादयेतइ
त्यर्थः।यद्वाद्यावापृथिव्योप्रयक्षेप्रकर्षेणसततंयष्टुंयजमानस्यदीर्घमायुः।संप्रपादयतः।प्रनिपातत्वेनाद्युदात्तः।तस्यछंदसिव्यवहिताश्चेतिआरु
रित्यनेनसंबंधः।आरुः।ऋगतौ।लिट्उसिरूपं।यद्वृत्तयोगादनिघातः।प्रत्ययस्वरः।शितिपृष्ठस्यपृष्ठशब्दस्थस्थप्रत्ययांतोंतोदात्तउक्तः।शितेर्नित्या रांभ ॥१॥
बहुव्रीहावभसदित्युत्तरपदप्रकृतिस्वरत्वं।धासेः।डुधाञ्धारणपोषणयोः।धेट्पानेवातस्मात्कर्तरिउणादिकसिप्रत्ययस्वरः।मातरा।नप्तृनेष्टृ
त्वष्टृहोतृपोतृपितृजामातृ[illegible]इति।तृजंत[illegible]निपातनादंतोदात्तः।ऋतोङीतिगुणः।सुपांसुलुगितिसुपोडादेशः।विविशुः।विशप्रवेशने।लि
टिअसंयोगाल्लिट्कित्[illegible]तो।सप्तसृप्यशूभ्यांतुट्चेति।सर्पेर्विधीयमानःकनिन्तुडागमश्च।बाहुलकादेतस्यापिभवति।

ऋकारस्याकारस्य नित्यत्वात्पितृव्यत्ययेनांतोदात्तत्वं [illegible] अभिक्षिता [illegible] निवासः गत्या। गम्ऌ इति क्विप्। पित्वानुगागमः। प्रादिसमासः। कृदुत्तरपदप्रकृतिस्वरत्वं।
सुपां सुलुगिति सुपो डादेशः। चरेते। चर गतिभक्षणयोः। संपूर्वाच्चरतेः समस्तृतीयायुक्तादित्यात्मनेपदं। सस्वर्ति। स्वृ गतौ। अपरं तर्भावितण्यर्थः। रेफछो
दसः। इदूदेदिति प्रगृह्यसंज्ञा। निघातः। इण् गतौ। उस नित्यनुवृत्तौ एतेर्णिच्च इत्युसिन्। णित्वाद्वृद्धिः। नित्वादाद्युदात्तः। अयक्षे। यज देवपूजासंगतिकरणदानेषु।
त्यस्मात्तुमर्थे से प्रत्ययः। प्रादिसमासः। कृदुत्तरपदप्रकृतिस्वरत्वं। कृन्मेजंत इत्यव्ययसंज्ञायां अव्ययादाप्सुप इति सुपो लुक्॥ ॥ अथ द्वितीया॥ दि
वक्षसो धेनवो वृष्णो अश्वा देवीरा तस्थौ मधुमद्वहंती॥ ऋतस्य त्वा सदसि क्षेमयंतं पर्येका चरति वर्तनिं गौः॥ ॥ वृष्णः कामानां वर्षितुरग्नेरश्वाः।
वाहनरूपा रोहिता दिवक्षसः दिवं व्याप्यवर्तमानाः धेनवः अग्नेः प्रीणयित्र्यः भवंति। सोऽयमग्निः मधुमत् माधुर्योपेतमुदकं वहंती देवी द्योतनशीला
नदी रात्रिस्तस्थौ। आतिष्ठति। प्राप्नोतीत्यर्थः। गोशब्दो माध्यमिकवाची माध्यमिकीं वाचमिति नैरुक्ता इत्यभिधानादेका गौः का विद्युदविधवाक् ऋतस्यो
दकस्य सदसि स्थाने अंतरिक्षे क्षेमयंतं क्षेममावासमिच्छंतं वर्तनिं कालं प्रवर्तयतः त्वां हे अग्ने त्वां परितरति सेवते। दिवक्षसः। अक्षू व्याप्तौ। दिवं व्याप्नु
वंतीति दिवक्षसः वक्षरो धेरो धात्वर्थौ थयं धातुरत्र व्याप्तौ वर्तते दिवं वक्षंति व्याप्नुवंति असुन् नित्यसुन्प्रत्ययः। लोपो व्योर्वलीति वलोपः। कृदुत्तरपदप्रकृ
तिस्वरत्वं। धेनवः। धेट इत्यनुवृत्तौ। धेट इच्चेति नुप्रत्ययः। इकारस्य गुणः। प्रत्ययस्वरः। वृष्णः। वृष सेचने। कनिन्युवृषितक्षिराजीत्यादिना कनिन्। कित्वाद्गुणा
भावः। नित्वादाद्युदात्तः। अश्वाः। अशू व्याप्तौ। अशिप्रुषिलटिकणीत्यादिना क्वन्। नित्वादाद्युदात्तः। तस्थौ। ष्ठा गतिनिवृत्तौ। छंदसि लुङ्लङ्लिट इति वर्तमा
ने लिट्। आत औ णल इत्यौकारः। निघातः। मदि इत्यनुवृत्तौ फलिपाटिनमिमनिजनीनामित्यादिना मनेरुप्रत्ययः। तत्संनियोगेन कारस्य धकारः। नित्वात्

घृतानः। त्वायुषमञ्छन्दस्यन्ह्लीयेकवचनांतस्यात्वमावितित्वा मादेशः। अनुदात्तश्च। क्षेमयंतं। क्षिनिवासगत्योः। अर्तिस्तुसुहुसृधृक्षीत्यादिनाम
न्। क्षेममावासमात्मन इच्छंतं। सुप आत्मनः क्यजिति क्यच्। क्यचि चेतीत्वं। अकृत्सार्वधातुकयोर्दीर्घ इति दीर्घत्वं च। न छंदस्यपुत्रस्येति प्रतिषिध्य
ते। क्यचश्चित्वादंतोदात्तः। तदंतान्छतृप्रत्ययः। शप्। शपः पित्वादनुदात्तत्वं। शतुश्च लसार्वधातुकस्वरेण तयोः क्यचा सह एकादेशे कृते एकादेश उदात्तेनो
दात्त इत्येकादेश उदात्तः। आसीम् सुप्त्वादनुदात्तः। उदात्तादनुदात्तस्य स्वरितत्वं। इण गतौ। इण्भाकापाकेत्यादिना क्नन्। तदंतात्पूनिस्वरः। वर्त्तनिं वृत्
वर्त्तने। अंतर्भावितण्यर्थः। हृतेश्च त्यनिः। गुपः। व्यत्ययेनांतोदात्तत्वं। गोः। गम्लृ गतौ। गमेर्डो इति डोप्रत्ययः। डित्वाट्टिलोपः। गोतो णित् सुपो णित्वाद्वृद्धिः। प्रत्ययस्व
रः॥ ॥ अथ तृतीया॥ ॥ आसीमरोहत्सुयमा भवंतीः पतिश्चिकित्वान्रयिविद्रयीणां॥ प्रनीलपृष्ठो अतसस्य धासेस्ता अवासयत्पुरुधप्रतीकः॥ ॥ रयी
णां रयिवित् धनानां मध्ये विशिष्टधनस्य लंभयिता चिकित्वान्। ज्ञानवान् पतिः। अश्वानां पतिरग्निः सीं सर्वतः सुयमाः सुखेन नियंतुं शक्या भवंतीय
दाडवा अरोहत्। आरोहयत्तिस्मन्। नीलपृष्ठः पुरुधप्रतीकः बहुधा विक्षिप्तांगः सोग्निः अतसस्य सततगमनस्य धासेः। पोषणार्थं ता अश्वाः प्रवासयत्तप
कर्षेण वासयत्तिस्मि। निवासेन श्रमेपनीते सति वा गमने पोषयितुं शक्यमित्यर्थः। सीं चादिरुदात्त इत्यनुदात्तः। अरोहत्। रुह प्रादुर्भावे। लङ्रूपं नि
घात। सुयमाः। यम उपरमे। अस्मात् खल्वर्थे ईषद्दुःसुषु इति खल्। कृदुत्तरपदप्रकृतिस्वरत्वं। पतिः। पा रक्षणे। पातेर्डतिः। डित्वाट्टिलोपः। प्रत्ययस्व
रः। चिकित्वान्। कित ज्ञाने। क्वसोरूपं। रयिवित्। विद्लृ लाभे। क्विप्। रयीणां। नामन्यतरस्यामिति विभक्तेरुदात्तत्वं। नीलपृष्ठः। नीलशब्दो वृषादित्वादाद्यु
दात्तः। बहुव्रीहौ पूर्वपदस्वरत्वं। अतसस्य। अत सातत्यगमने इत्यस्मादत्यविचमितमिरभिपनिपतिभ्य इति असच्। चित्स्वरः। अवासयत्। वस नि

वासेहेतुमतीति णिच्। ण्वुल्तृचौ। ण्वुल्‌ इति लुडागमः। तिङ्ङतिङ इति निघातः। पुरुधप्रतीकः। पुरुधा इदं हसंख्यावाची। संख्याया विधार्थे धेति विधाप्र
त्ययः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। हस्वश्छांदसः॥ अथ चतुर्थी॥ महित्वा ऊर्जयंती रजुर्यस्तूयमानं वहतो वहंति॥ ध्वंगेभिर्दिद्युता
नः सधस्थ एकामिव रोदसी आ विवेश॥ ऊर्जयंतीः ऊर्जं बलं बलिनं कुर्वत्यः। वहतः वहनपदानद्यः महिमाहांतं त्वाष्ट्रं त्वष्टुः स्तूयमानं लोका
नां स्तंभनं धारणमिच्छंतमग्निं वहंति धारयंति। अपांसधस्थे पां समीपे अंगेभिः स्वयवैर्दिद्युतानः दीप्यमानः सन्‌ अग्निः रोदसी द्यावापृथिव्यौ आविवेश
प्रविवेश्य वा नू रोदस्योर्दृष्टांतः। एकामिव यथा पुमानेकां स्त्रियं प्रविशति तद्वत्। त्वाष्ट्रं। त्वष्टुरपत्यमित्यार्थे तस्यापत्यसण्। प्रत्ययस्वरः। स्तूयमानं
स्तंभृ स्तंभनं तमिच्छंतं। सुप आत्मनः क्यच्। अकृत्सार्वधातुकयोर्दीर्घ इति दीर्घः। न दंता छंदस्यत्ययेन चाशानच्‌ कर्तृकां शंतत्वादानेमुक्। शानचोल सार्वधातु
कस्वरेणानुदात्तत्वे कृते क्यचंता धातुस्वरः शिष्यते अंगेभिः बहुलं छंदसीति भिस एसादेशाभावः। बहुवचने झल्येदित्येत्वं। दिद्युतानः। द्युत दीप्तौ।
छंदसि लिट्। तस्य शान आदेशः। द्विर्वचने हलादिःशेषे कृते द्युत्यस्याभ्यासस्य द्युतिस्वाप्योः संप्रसारणं घेति पूर्वरूपत्वं। चित्वादंतोदात्तः। एकामिवाद्
वेनविभक्त्यलोपः। पूर्वपदप्रकृतिस्वरत्वं चेति वचनात्पूर्वपदप्रकृतिस्वरः। विवेश। विषप्रवेषन इत्यस्मात्लिट् रूपं। निघातः॥ अथ पंचमी॥ जा
नंति वृष्णो अरुषस्य शेवमुत ब्रध्नस्य शासने रणंति॥ दिवोरुचः सुरुचो रोचमाना इळा येषां गण्या माहिना गीः॥ वृष्णः कामानां वर्षितुः। अरुष
स्यरुषा हिंसकाः। तद्रहितस्य शत्रुरहितस्येन रोचमानस्येत्यर्थः। तथाविधस्याग्नेः शेवं श्रेयं विषयं सुखं जना जानंति। उत अपि च जानं तस्मै ब्रध्न
स्य महतो ग्नेः शासने आज्ञायां सर्वे जना रणंति रमंते। यथा च मंत्रः। अस्य शासुरुभयासः सचंते हविष्मंत उशिजो ये च मर्त्ता इति। अपि च येषां मनु

ष्यालां अग्निविषयां महिमानं महतीं इळा गीः स्तुतिरूपा वाक् गल्या गणनीया उच्यते। दिवो रुचः द्युलोकस्य रोचकाः सुरुचः शोभनरोचना देदीप्यमाना भजंति।
जानंति। ज्ञा अवबोधने। क्र्यादिर्व्यस्य ज्ञाजनोर्जा इति जादेशः प्रत्ययस्वरः। अरुषस्य रिष हिंसार्थाः। रोषंतीति रुषा हिंसा उगुपधज्ञेति कः। न संति रुषा यस्यासावरु-
षः। नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। शेवं। शीङ् स्वप्ने। इण्शीभ्यां वन्निति वन् नित्स्वरः। शासने। शासु अनुशिष्टौ। अस्माद्भावे ल्युट्। लितीति प्रत्ययात्पूर्व-
स्योदात्तत्वं। रणंति। निघातः। दिवो रुचः। रुच दीप्तौ। अस्मात्क्विप्। तत्पुरुषे कृति बहुलमिति षष्ठ्या अलुक्। कृदुत्तरपदप्रकृतिस्वरत्वं। सुरुचः। बहुव्रीहौ नञ्-
सुभ्यामित्युत्तरपदांतोदात्तत्वं। इळा। ईल स्तुतौ। ह्रस्वश्छांदसः। यथावाकुशाद्दृष्टवंतत्वान्मित्वादनुदात्तत्वे धातुस्वरः। गल्या। गण संख्याने। स्वार्थण्यंतादा-
वादयत्। यतोनाव इत्याद्युदात्तत्वं। माहिना। महेरिनण् चेति इनण्। णित्वादुपधावृद्धिः। व्यत्ययेनाद्युदात्तः। गीः। गॄ शब्दे। अस्मात्क्विप्। ऋत इद्धातोरिति इत्त्वं। र्वोरुप-
धाया दीर्घः। प्रातिपदिकस्वरः॥ ॥ इति तृतीयस्य प्रथमे प्रथमो वर्गः॥ ॥ तस्मिन्वर्गे सूक्ते षष्ठी॥ ॥ उतो पितृभ्यां प्रविदानु घोषं महो महद्भ्यामनयंत शूषं॥
उक्षा ह यत्र परि धानमक्तोरनु स्वं धाम जरितुर्ववक्ष॥ ॥ उतो अपि च महो महः। रक्षां महतो महद्भ्यां पृथिवीभ्यां प्रविदा प्रवेदामन अनुघोष अनुध्वसमाप्यां शू-
षं सुखं शूषं सुखमिति सुखनामसु पाठात्। तत्सुखं यजमानो अग्निमानयंत। अग्निं प्रापितवंत। सोऽग्निर्यत्र यजमानेषु उक्षा स्वेष्टत्वादनेनोदकस्या सेक्ता अक्तो-
रक्तुः शब्दो रात्रिवाची। शर्वरी अक्तुरिति रात्रिनामसु पाठात्। आज्यते सिच्यते नीहारेण जगदस्यामिति व्युत्पत्तेश्च तस्याः रात्रेः परिधानं परितो धारकं स्वमात्मी-
यं धाम तेजः जरितुः स्तोतुः स्तुतिश्रवणार्थं अनुववक्ष ह समीपवहसानि षलु संनिहितं करोतीत्यर्थः। उतो ऊँ इति प्रगृह्यसंज्ञा एव। सा दित्वादंतोदात्तः। घोषं।
घुष शब्दे। अस्मात्कर्मणि घञ्। लघूपधगुणः। ञित्स्वरः। महः। अकारतकारयोर्लोपः छांदसः। ऋहन्महतो रूपसंख्यानामिति विभक्तेरुदात्तत्वं। अनयंत। णी-

रामं ॥२॥

वैश्वामित्रं। अत्रैवमनुक्रमणिका। सखायो नव बृहत्यंतं त्रिष्टुबंतमिति। अंत्या त्रिष्टुप्। शिष्टा अष्टौ बृहत्यः। प्रातरनुवाके आश्विनशस्त्रे च बार्हते छं
दसि अस्य सूक्तस्य विनियोगः। अथैतस्या इति षंडे सूत्रितं। सखायस्त्वा यमग्निरग्न आयाहीति तस्मिन्सूक्ते प्रथमा॥ सखायस्त्वा ववृमहे देवं
मर्तास ऊतये। अपांनपातं सुभगं सुदीदितिं सुप्रतूर्तिमनेहसं॥ विश्वामित्रस्तौति। हे सखायः सोमआज्यादि हविः प्रदानेनोपकरत्वान्मित्रा
णि मर्तासो मनुष्या ऋत्विजो वयं अपांनपातं अपां नप्तारं सुभगं शोभनधनयुक्तं सुदीदितिं शोभनदीप्तिं सुप्रतूर्तिं शोभनप्रतरणं कर्मानुष्ठातृभिः सुखेन गंत
व्यं अनेहसं उपद्रवरहितं एतादृशं त्वां ऊतये रक्षणाय ववृमहे वृणीमहे। सखायः सख्याप्रकथने। समानेख्यश्चोदात्त इति समान उपपद इत्यनुवृत्तौ।
ख्याने रिः। तङित्वादिलोपः। तस्मिन्नियोगेनयोर्लोपः। समानछंदस्य मूर्धतिसभावः। उपपदस्योदात्तत्वं। णित्यनुवृत्तौ सख्युरसंबुद्धाविति णिद्भावः। वृ
ध्यायोदेशो आद्युदात्तः। ववृमहे। वृङ् संभक्तौ। छंदसि लुङ्लङ्लिट इति वर्तमाने लिट्। क्रादित्वादिड्भावः। निघातः। ऊतये। अव रक्षण इत्यस्य उदात्त इत्यनु
वृत्तौ ऊतीयूती इत्यादिना क्तिन्नंतत्वे निपातेनार्द्धतोदात्तः। अपां। ऊडिदमिति विभक्तेरुदात्तत्वं। सुभगं। आद्युदात्तं द्व्यच्छंदसीत्युत्तरपदाद्युदात्तत्वं। सुप्रतूर्ति
कृत्यादयश्चेत्युत्तरपदाद्युदात्तत्वं॥ अथ द्वितीया॥ कायमानो वना त्वं यन्मातॄरजगन्नपः। न तत्ते अग्ने प्रमृषे निवर्तनं यद्दूरे सन्निहाभवः॥ हे अ
ग्ने वना काननानि कायमानः कामयमानः त्वं यस्मात्कारणात् निहविये मातृभूता अपः अजगन् अगमः गतवानग्निः। अस्मप्रविष्टत्वो शांतो वर्तसे।
तत्तस्मात्तेन वनिवर्तनं निवर्तनं तत्रैष वर्तनं। तेन च विनाशो लक्ष्यते स विनाशोऽस्मान प्रमृषे न प्रमृष्यते न सह्यते। कुत इत्यत आह। यद्यस्मात्कारणात् दूरे सन्
अदृश्यतया वर्तमानस्त्वं इह अस्मात्संबंधिमात्मेस्वरूपे शुष्ककाष्ठेषु अभवः मंथनात्क्षणमात्रेणास्माकं समीपे भवसि। तस्मात्तव दूरतो वर्तमानमस्माभिर्न

त॰सं॰भा॰१ रोचते। अस्मिन्नर्थे यास्कः। कायमानः चायमानः कायमान इति वा वना नित्यं तन्मातॄरपो गमः उपशाम्यन् तत्र अग्ने प्रमृष्यसे निवर्तनं दूरे यस्मिन्निह भ
वसि अयमान इति। कायमानः। कमु कांतौ। कमेर्लट्। लटः शानच्। मकारलोपश्छांदसः। अजगन्। गम्लृ गतौ। इत्यस्य लङि बहुलं छंदसीति शपो लुक्।
हलङ्यादिना सिलोपः। मो नो धातोरिति मकारस्य। यद्वृत्तयोगादनिघातः। अडागमस्वरः। प्रमृषे। मृष तितिक्षायां। व्यत्ययेन कर्मणि प्रत्ययः। लोपस्त आ
त्मनेपदेष्विति तलोपः। धातुस्वरः। अभवः। छंदसि लुङ्लङ्लिटः इति लङर्थे लङ्। यद्योगादनिघातः॥ ॥ अथ तृतीया॥ ॥ अति तृष्टं ववक्षिथाथैव सुम
ना असि। प्रप्रान्ये यंति पर्यन्य आसते येषां सख्ये असि श्रितः॥ ॥ हे अग्ने तृष्टं स्तोतुरस्मदभिलाषं तदुचितफलप्रदानेन सफलं कर्तुं अति वव
क्षिथ। अतिशयेन वोढुं इच्छति। अथैव। अथापि त्वं सुमना असि। संतुष्टमनस्को वर्त्तसे किंच। येषां षोडशानामृत्विजां सख्ये मैत्र्ये श्रुतोसि। वर्त्तसे ते
षां मध्ये अन्ये अध्वर्युप्रभृतयो द्वादशर्त्विजः। प्रयंति प्रकर्षेण होतुं गच्छंति। अन्ये तु होतृप्रभृतयश्चत्वारः पर्यासते। परितः आसीना वर्त्तंते। ववक्षिथ।
वह प्रापणे इत्यस्य थलि रूपं। अभ्यासस्य सतीत्वाभावश्छांदसः। तदंतद्वर्त्तमाने लिट्। थल्। आर्द्धधातुकस्येड्वलादेरिति इट्। कास्प्रत्ययादामित्यो
न्न भवति मंत्रत्वात्। निघातः। प्रप्र। प्रसमुपोदः इति द्विर्वचनं। यंति इण् गतौ। इत्यस्य लटि रूपं। प्रोपाभ्यां समर्थाभ्यामित्यन्यशब्दयोगात् पूर्वस्य निघाता राम
भावः। आसते। आस उपवेशने अनुदात्तत्वान्निघातः। असि। अस भुवि तासस्त्योर्लोप इति सकारलोपः। यद्वृत्तयोगान्न निहन्यते॥ ॥ अथ चतुर्थी॥ ॥ १०
ईयिवांसमति स्रिधः शश्वतीरति सश्चतः। अन्वीमविंदन्निचिरासो अद्रुहोऽप्सु सिंहमिव श्रितं॥ ॥ हे अग्ने अद्रुहः अद्रोग्धारः निचिरासः नितरां चि
रासः चिरंतनाः विश्वेदेवाः स्रिधः शोषकान् शत्रून् बलेन अति[illegible]स्या ईयिवांसं गच्छंतं शश्वतीर्बह्वीः सश्चतः संगतिकारिणीः सेनाः अति अतिक्रम्य वा

छंतं अप्सु श्रितं तिरोहितं अतएव सिंहमिव गुहाश्रि[illegible]मिव ईमेनं त्वां अन्वविंदन् । अनुगम्य अलभंत । ईयिवांसं । ईणगतावित्यस्य क्वसौ उ
पेयिवाननाश्वाननूचानश्चेति निपातितः । प्रत्ययस्वरः । स्रिधः । स्रिधेः क्षयार्थस्य शोषणार्थस्य वा क्विपि क्विप् । धातुस्वरः । अप्स्वतीः । अप्स्वागतौ ।
नकारस्य व्यत्ययेन वकारः । लटः शत्रादेशः । प्रत्ययस्वरः । अविंदन् । विद्लृ लाभे इत्यस्य लङि रूपं । निविशासः । नितरां विशः । अज्जसेरसुगित्यसुक् । समा
सस्वरः । अदुहः । दुह जिघांसायां । संपदादित्वाद्भावे क्विप् । बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । श्रितं । श्रिञ् सेवायामित्यस्य श्र्युकः किति
इट्प्रतिषेधः । प्रत्ययस्वरः ॥ ॥ अथ पंचमी ॥ ॥ ससृवांसमिव त्मनाग्निमित्था तिरोहितं । ऐनं नयन्मातरिश्वा परावतो देवेभ्यो मथितं परि ॥ ॥ मातरि
श्वा वायुः इत्था इत्थं त्मना स्वेच्छया अप्सु प्रवेशात् तिरोहितं निलीनं परि परितः मथितं मथनेन निष्पादितं । एनमग्निं देवेभ्यः तादर्थ्ये चतुर्थी । देवार्थं परावतः
दूरदेशात् । आनयत् । आनीतवान् । तत्र दृष्टांतः । ससृवांसमिव स्वच्छंदेन ससृवांसं सरंतं गच्छंतं पुत्रं पिता बलादानयतीति तद्वत् । ससृवांसमिव । सृगतौ
इत्यस्माल्लिटः तस्य क्वसुः । इवेन विभक्त्यलोपः इत्युक्तत्वात् प्रत्ययस्वरः । त्मना । आत्मशब्दस्य मंत्रेष्वाङ्यादेरात्मन इत्याकारलोपः । इत्था । थाहेतौ च
छंदसीति व्यत्ययेन थाप्रत्ययः । प्रत्ययस्वरः । एनं । अन्वादेशे द्वितीयाटौस्स्वेन इत्येनादेशः । अनुदात्तत्वं । आनयत् । णीञ् प्रापणे इत्यस्य लङि रूपं । अ
डभावश्छांदसः । मातरिश्वा । मातर्यंतरिक्षे श्वसितीति । श्वसन्नुक्षक्षन्नित्यादिना निपातितः ॥ ॥ इति तृतीयस्य प्रथमे पंचमो वर्गः ॥ ॥ अथ षष्ठी ॥ ॥
तं त्वा मर्ता अगृभ्णत देवेभ्यो हव्यवाहन । विश्वान्यद्यज्ञाँ अभिपासि मानुष तव क्रत्वा यविष्ठ्य ॥ ॥ हव्यवाहन हव्यानां वोढः । हे अग्ने मर्ताः मनुष्याः अध्व
र्युप्रभृतयः तं त्वा दृशमप्सु तिरोहितं त्वां देवेभ्यः यष्टव्यदेवतार्थं अगृभ्णत अगृह्णत । मानुष मनुष्याणां हितकारिन् यविष्ठ्य युवतम हे अग्ने तव क्रत्वा

तवकर्मणामाहात्म्येनविश्वान्सर्वान्अस्माभिःक्रियमाणान्यज्ञान्पत्यस्मात्कारणात्अभिपासिसर्वतःपालयसि।तस्मात्त्वांअगृभ्णनेतिपूर्वेणान्वयः।
ऋ·सं·भा·१ अगृभ्णतः।गृहउपादाने।क्र्यादित्वात्श्ना।ग्रहिज्यावयीतिसंप्रसारणं।हृग्रहोर्भश्छंदसीतिहकारस्यनकारः।तिङ्ङतिङइतिनिघातः।हव्यवाहनं।व
हप्रापणइतिधातोर्ञ्युट्।हव्येनंतःपादमितिञ्युट्।उपधावृद्धिः।युवोरनादेशः।ञ्णित्यादिर्नित्यमित्याद्युदात्तत्वं।विश्वान्।विशप्रवेशनेइ
त्यस्मात्।अशिप्रुषिलटिकणिखटिविशिभ्यःक्वनितिक्वन्।कित्त्वाद्गुणाभावः।नित्त्वादाद्युदात्तत्वं।अभिपासि।पारक्षणे।अस्यधातोरक्षणार्थत्वान्नपि
बादेशः।यद्वृत्तयोगादनिघातः।धातुस्वरः।कृत्वादयश्छंदसिविकल्प्यंतइति।अत्रनादेशाभावः।प्रत्ययस्वरः।यविष्ठ्य।युवशब्दादतिशायनेतमबि
ष्ठनौ।स्थूलदूरयुवेतियणादिपरंलुप्यते।पूर्वस्यचगुणः।यवादित्वात्स्वार्थिकोयत्प्रत्ययः॥३॥अथसप्तमी॥ तद्भद्रंतवदंसनापाकायचिच्छदयति।
त्वांयदग्नेपशवःसमासतेसमिद्धमपिशर्वरे॥ ॥हेअग्नेतवसंबंधितदिदंभद्रंशोभनंदंसना।अग्निहोत्रादिकंकर्मपाकायचित्।चिदप्यर्थे।पाका
येतिकर्मणिचतुर्थी।पाकोर्भकः।तद्वदल्पमपियजमानंदंसना।स्वफलप्रदानेनपूजयतिपशुपुत्रादिभिःपरिवृतंकरोतीत्यर्थः।छदयतिशब्दोर्चतिक
र्मछंदयतिछदयतीति।तन्नामसुपाठात्।यद्वापाकशब्दःप्रशस्यं।किंवेपाकःवामइतिप्रशस्यनामसुपठितत्वात्।तद्भद्रंप्रशस्यंयजमानंअभिमते राम
फलप्रदानेनपूजयतीत्यर्थः।यस्मात्कारणात्अपिशर्वरेशर्वरीमुखेअग्निविहरणकालएवसमिधंदीप्यमानंत्वांपशवोद्विपदाश्चतुष्पदाश्चोभयेप ११
शवःसमासतेसम्यगासतेपर्युपासतइत्यर्थः।तदिदंपश्वादिलक्षणंयजमानायप्रयच्छतीत्यर्थः।भद्रं।भदिकल्याणे।इत्यस्माद्धातोरुपरिकप्रत्ययेनि
पातनादंतोदात्तत्वं।पाकाय।पारक्षणे।इत्यस्मादिणभीकापाशल्यादिनाकन्।पातिरक्ष्यतेराजादिनेतिपाकः।नित्त्वादाद्युदात्तः।छदयति।छदअपाकरणे।

स्वार्थेणिच । अदंतत्वात् ... आभावेन निघातः ... अदादित्वाच्छपो लुक् । अनकारांतत्वात् । कस्यादादेशः । यद्योगादनिघातः ॥ तिङ्
ङोदात्तवतीति गतेर्निघातः धातुस्वरः ॥ अथ ... ॥ आ जुहोता स्वध्वरं शीरं पावकशोचिषं । आशुं दूतमजिरं प्रत्नमीड्यं श्रुष्टी देवं सपर्यत ॥ ऋत्वि
जं यजमानः प्रेरयति । हे ऋत्विजः पावकशोचिषं ... शोधकदीप्तिं शीरं कोष्ठे ओषधीषु अनुशायिनं स्वध्वरं शोभनयज्ञोपेतमिममग्निमाजुहोत । आहुतिभि
रासमंतात् पूरयत । अपि च । आशुं कर्मणि व्याप्तं दूतं आजुह्वानकारित्वेन देवानां दूतं अजिरं क्षिप्रं प्रत्नं पुरातनं ईड्यं स्तोतव्यं देवं द्योतमानमिममग्निं श्रुष्टी
सपर्यत । श्रुष्टी क्षिप्रनामेति यास्कः । क्षिप्रं पूजयत । जुहोत । हु दानादनयोः । अस्माद्धातोर्लोट् । जुहोत्यादिभ्यः श्लुरिति शपः श्लुः । श्लौ इति द्विवचनं । लोटो
लङ्वदिति लङ्वद्भावेन तस्थस्थमिपामिति तस्य तादेशः । हुश्छंदसि ... तस्य तप्तनप्तनथनाश्चेति तस्य तनबादेशः । पित्वाद्गुणः । निया ॥

राम
१२

॥अथ तृतीया॥॥ स घा यस्ते ददाशति समिधा जातवेदसे॥ सो अग्ने धत्ते सुवीर्यं स पुष्यति॥ ॥ हे अग्ने यो न्यजमानः जातवेदसे जातप्रज्ञाय ते तुभ्यं
समिंधनकारिणा आज्यपुरोडाशादिहवींषि ददाशति ददाति। स घ। स खलु। वीर्यं शोभनसामर्थ्योपेतं पुत्रं धत्ते धारयति। अपि च। स सः स एव पुष्य
ति पशुपुत्रादिभिः समृद्धो भवति। घ। चादयोनुदात्ता इत्यनुदात्तः। ददाशति। दाशृ दान इत्यस्माल्लटः कर्तरि शप्। द्विर्वचनं छांदसं। यद्वृत्तयोगादनि
घातः। अभ्यस्तानामादिरित्युदात्तः। समिधा। इंधी दीप्तौ। अस्मात्क्विबिति क्विप्। उपधालोपः। सुपां सुलुगिति शसो डादेशः। कृदुत्तरपदप्रकृतिस्वर
त्वं। जातवेदसे बहुव्रीहौ प्रकृत्या पूर्वपदं प्रकृतिस्वरत्वं। सुवीर्यं। वीरवीर्यौ चेत्युत्तरपदाद्युदात्तत्वं। पुष्यति पुष पुष्टौ। अस्मात्श्यन्। ङेलाकुणाभा
वः। निघातः॥॥ अथ चतुर्थी॥॥ स केतुरध्वराणामग्निर्देवेभिरागमत्॥ अंजानः सप्तहोतृभिर्हविष्मते॥ ॥ अध्वराणां यज्ञानां केतुः प्रज्ञापकः
सोग्निः सप्तसप्ताभिर्होतृभिर्वषट्कर्तृभिः। अंजानः सोमाज्याहुतिभिरंज्यमानः सः नः हविष्मते यजमानार्थं देवेभिः यष्टव्यदेवेभिः यष्टव्यदेवैः स
ह आगमत्। आगच्छतु। गमत। लोड छंदसि। लुङ् लङ् लिट इति लुङ्। लृदित्वादङ्। बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः। निघातः। अंजानः। अंजू
व्यक्तिम्लक्षणगतिषु। व्यत्ययेन कर्मणि शानच्। त्विनादित्वादंतोदात्तत्वं। हविष्मते। जुहोतेरर्त्तिस्तुहुवीत्यादिना इसिप्रत्ययांतो हविःशब्द आद्युदात्तः। स्वरविधौ
व्यंजनमविद्यमानवदिति परिभाषया नाष्भ्रयुणात्। मतुप उदात्तत्वाभावः। इति प्रत्ययस्वरः॥ ॥ अथ पंचमी॥॥ प्र होत्रे पूर्व्यं वचोग्नये भरता बृहत्॥
विपां ज्योतींषि बिभ्रते न वेधसे॥॥ यजमानो होत्रादीन्प्रति ब्रूते हे होत्रादयः विपा विप्राणां मेधाविनां अध्वर्यादीनां ज्योतींषि सत्कर्मानुष्ठानसंपद्यानि
तेजांसि बिभ्रते निमित्तं तथा कुर्वाणाय वेधसे जगतो विधात्रे होत्रे देवानामाह्वात्रे अग्नये बृहन्महत् पूर्व्यं पूर्वैः पुरातनं च वचः स्तोत्रशास्त्रादिकं वाक्यं प्रभ

रतसंपादनेत्ययं पादपूरणः। अन्वयाभावात्। अक्षावेधसेन। यथावेधाः जगद्विधाता परमेश्वरपरमेश्वरः। आदित्यादीनि ज्योतींषि करोति क्विष्ट् इति। प्र
ब्रह्मस्य छंदसि हिता श्रुतिभरेतेत्यनेन संबंधः। पूर्व्यं पूर्वैः कृतमित्यर्थः। पूर्वैः कृतमिनयौ चेति प्रत्ययः। भसंज्ञकत्वादवात्मलोपः। प्रत्ययः स्वरः। भरता भृ
भरणे भौवादिकः। निघातः। वृहत्। वर्तमाने पृषद्वृहद् इति निपातनादंतोदात्तः॥ ॥इति तिलनीयस्य प्रथमे सप्तमो वर्गः॥ ॥तस्मिन्सूक्ते षष्ठी॥ ॥अग्निं
वर्धंतु नो गिरो यतो जायत उक्थ्यः॥ महे वाजाय द्रविणाय दर्शतः॥ ॥योयमग्निः यतः याभिः स्तुतिरूपाभिर्गीर्भिः उक्थ्यो जायते। उक्थशब्दः प्रशस्य
वाची। अनभिशस्यः उक्थ्य इति तत्रामस्तुपाठात्। अतिशयेन स्तुत्यो भवतीत्यर्थः। योयमग्निः महे महते वाजाय अन्नाय द्रविणाय धनाय च दर्शतः द
र्शनीयो भवति। तमिममग्निं नो गिरः अस्माकं स्तुतिरूपास्तावाचः वर्धंतु वर्धयंतु पूजयंत्वित्यर्थः। वर्धंतु वृध वर्धने। अस्मात् लोट्। लघूपधगुणः। छं
दस्युभयथेति हेरार्धधातुकत्वात् णिलोपः। अंतादेशः। एरुरित्याकारः। निघातः। उक्थः वच परिभाषणे। अस्मात् पातॄतुदिवचिरिचीत्यादिना थक्। कि
त्वात् वचिस्वपीत्यादिना संप्रसारणं। उक्थशास्त्रं तेन स्तुत्यत्वेन तत्र भव उक्थ्यः। भवे छंदसीति यत्। हे अग्ने यजिष्ठः। यष्टृतम त्वं अध्वरे यज्ञे देवय
ते देवानामात्मन इच्छतीति क्यच्। यस्येति लोपः। तित्स्वरितमिति स्वरितः। दर्शतः भृमृदृशियजीति अतच् प्रत्ययः। चित्वादंतोदात्तः॥ ॥अथ सप्तमी॥ ॥अग्ने यजि
ष्ठो अध्वरे देवान्देवयते यज॥ होता मंद्रो विराजस्यति स्निधः॥ ॥हे अग्ने यजिष्ठः। यष्टृतम त्वं अध्वरे यज्ञे देवयते देवानात्मन इच्छते यजमानाय दे
वान्यज। तेदर्थं यष्टव्यानग्न्यादीन्पूजय। किं च। होता देवानामाह्वाता मंद्रः यजमानस्य मदयिता मत्वं स्निधः क्षपयितॄन् शत्रून् अतिक्रम्य विराजसि विशेषेण
शोभसे। यजिष्ठः तुश्छंदसीति इष्ठन्। तुरिष्ठेमेयस्स्विति तृलोपः। नित्वादाद्युदात्तः। देवयते। क्यच्। चः। शित्वादंतोदात्तत्वं। आपः पित्वादनुदात्तत्वं। शतुश्च लस

र्वधातुकस्वरेण तयोः क्य चासहेकादेशएकदेश꠰ [illegible] इति। अंतोदात्तत्वं देवयत्। शङ्कृतनः शतुरनुमङ् निविभक्तेरुदात्तत्वं। यजाय
जादेवपूजासंगतिकरणदानेषु। अस्मालोट्। शिप्। शप्लु। शिपोहिरादेशः। अतो हेरिति हेर्लुक्। निघातः। राजसि। राजदीप्तौ निघातः॥ ॥अयाष्ट
मी॥ ॥ सनःपावकदीदिहि द्युमदस्मे सुवीर्यं॥ भवास्तोतृभ्यो अंतमः स्वस्तये॥ ॥ सनस्तु पावक अस्म त्संबंधिनः पापस्य शोधक हे अग्ने स पूर्वमं
त्रे प्रतिपादित सत्वं द्युमत् कांतियुक्तं सुवीर्यं शोभनवीर्यपितं च यथा भवति। तथा अस्मे अस्मदर्थं त्वं दिदीहि। दीप्यस्व। किंच स्तोतृभ्यः षष्ठ्यर्थे चतु
र्थी च स्तोतृभ्यः स्तुतिकारिणां होत्रादीनां स्वस्तये अविनाशाय क्षेमाय अंतमः अंतिकतमः तेषामतिशयेन समीपवर्त्तसि — व। पावक। पूञ्
पवने। अस्मात्तात्। ण्वुल्। णित्वाद् वृद्धिः वोरकादेशः। आमंत्रितत्वात् सार्वधातुकमनुदात्तत्वं। दिदीहि। दिवु क्रीडादौ। अस्माद्धेः। तुजादीनामित्यभ्यस्य
दीर्घत्वं। संज्ञापूर्वको विधिरनित्य इति अभ्यासस्य गुणाभावः। बहुलं छंदसीति यङ्लुक्। लोडादेशः। वर्करीतं परस्मैपदं दृष्टव्यं चनाद्यपो लुक्।
शेपो हिरादेशः। हेरपित्वाद्गुणः। निघातः। द्युमत्। दिवउदित्युकारः। ह्रस्वनुड्भ्यामिति मतुपदात्तत्वं। सुवीर्यं वीरवीर्यो चेत्युत्तरपदाद्युदात्तत्वं।
अंतमः। अंतोऽस्यास्तीत्यंतिकः। अंतइति वनादिति वन्। अंतिशायने तमबिति तमप्। तमे तदेस्येति तादिलोपः। नित्वादाद्युदात्तः।
स्वस्तये। प्रातिपदिकस्वरः॥ ॥ अथ नवमी॥ ॥ तं त्वा विप्रा विपन्यवो जागृवांसः समिंधते॥ हव्यवाहममर्त्यं सहोवृधं॥ ॥ हे अग्ने विप्राः स्तुतीनां
प्रेरकाः जागृवांसः अग्निहोत्रकर्मणि अप्रमत्ततया प्रबुद्धा विपन्यवः। विपन्यूशाब्दो मेधाविनमा चष्टे। विपश्चिता विपन्यु रिति तन्नामसु पाठात्। वि
पन्यवो मेधाविनः स्तोतारः हव्यवाहं हव्यानां वोढारं अमर्त्यं मरणधर्मरहितं। सहोवृधं सहसा मथनरूपेण बलेन वर्धमानं तादृशं त्वा समिंधते।

तृती॰ सं॰ भा॰ १

सोमाज्याहुतिभिः संमृग्दीपयंति विप्राः दुवप् बीजसंताने। अस्माद्धातोः कृञ्ज्वद्र्डागमावच्चविप्रेति रप्रत्यये वयोर्निपातनत्वादाद्युदात्तत्वं। विपन्यवः

विविधं पनं स्तुतिं यातीति विपन्युः। मृगय्वादयश्चेति कुन्। अकारलोपश्छांदसः। प्रत्ययस्वरः। जागृवांसः। जागृ निद्राक्षये। अस्माल्लिट्। तस्य क्वसुः

उगिदचामिति नुम्। द्विर्वचनाभावश्छांदसः। वस्वेकाजाद्घसामिति नियमादिडभावः। जाग्रोऽविचिण्णल्ङित्स्विति गुणो न भवति। तत्र विरित्यत्र क्

सोगृहीतत्वात्प्रत्ययस्वरः। इंधते। ञिइन्धी दीप्तौ। अंतर्भावितण्यर्थोयं। निघातः। हव्यवाहं। वह प्रापणे। वहश्चेति ण्विः। कृदुत्तरपदप्रकृतिस्वरत्वं। स

होवृधं। वृधु वर्धने। क्विप् चेति क्विप्॥ ॥ इति तृतीयस्य प्रथमेऽष्टमो वर्गः॥ ॥ अग्निर्होता पुरोहितो ध्वरस्य विचर्षणिः। स वेद यज्ञमानुषक्॥ ॥ अ

ग्निर्होतेति नववर्चमेकादशं सूक्तं विश्वामित्रं गायत्रमाग्नेयं। अग्निर्होता नव गायत्रमित्यनुक्रांतत्वात्। प्रातरनुवाकाश्विनशस्त्रयोर्गायत्रे छंदसी

दं सूक्तं सूत्रितं। वह्निरग्निर्होता यद्भुल इति चतस्र इति। आधाने प्रथमायाः पावमानेष्टौ स्विष्टकृतो याज्या। अग्निर्होता नेष्टा। स हव्यवाळमर्त्य इति पुरो

नुवाक्या। द्वितीयपवमानेष्टौ स्विष्टकृतो नुवाक्या। साह्वानिति सूत्रितं च। साह्वान्विश्वा अभियुजो ऽग्निमीळे पुरोहितमिति संयाज्ये इति। अभिप्ल

विके षूक्थ्येषु तृतीयसवने मैत्रावरुणशस्त्रे अग्निप्रयांसीति। वैकल्पिको नुरूपस्तृचः। अत्र सूत्रं। प्रवो वाजा अभिद्यवो अभिप्रयांसि वाह

सेति॥ ॥ तस्मिन् सूक्ते प्रथमा॥ ॥ अग्निर्होतेति॥ ॥ विश्वामित्रस्तौति होता देवानामाह्वाता पुरोहितः। अध्वरस्य यज्ञस्य विचर्षणिः। विशेषेण द्र राम

ष्टा विचर्षणिर्विचर्षणिरिति [illegible] विधोग्निः। आनुषक्। आनुपूर्व्येण सकलं यज्ञमग्निष्टोमादिकं वेद जानाति। वेदा विद ज्ञाने। वे १४

दो लटो वेतिपो णलादेशः [illegible] आसमंतादनुषजतीत्यानुषक्। षंज संगे। धातुषकारस्य सकारः। क्विन्निति क्विप्

अनुदित्तामित्युपधालोपः। उपसर्गाद्धुनोतीति षत्वं॥१॥ अथ द्वितीया॥ ॥ स हव्यवाळमर्त्य उशिग्दूतश्चनोहितः॥ अग्निर्धिया समृण्वति॥ ॥ स हव्यवाट्
हविषां वोढा अमर्त्यः मरणधर्मरहितः उशिक् हवींषि कामयमानः। दूतः देवानां दूतः चनः हितः हविर्लक्षणेनान्नेन निहितः यद्वा चनोहितः। चने अ-
न्ने हविर्लक्षणे हितमस्येति चनोहितः। स तथाविधोऽग्निर्धिया प्रकृत्या समृण्वति संगच्छते। कर्मविषयप्रज्ञान्वितोऽग्निरस्मानधितादृक्प्रज्ञान्वितान्क-
रोतीत्याशास्ते। हव्यवाट्। वह प्रापणे। वहश्चेति ण्विः। ढत्वं जश्त्वचर्त्वानि। कृदुत्तरपदप्रकृतिस्वरत्वं। प्रत्ययस्वरः। चनोहितः चनेः चायतेरन्ने ह्र-
स्वश्चेत्यसुन्। चतः। चकारो नुडागमः। तस्मिन् यलोपः। नित्त्वादाद्युदात्तः। पुनश्चनसो हितं दसि गतिसंज्ञा वक्तव्येति संज्ञायां गतिरनन्तर इति प्रकृतिस्वरत्वं।
बहुव्रीहौ तु पूर्वपदप्रकृतिस्वरत्वं। धिया सावेकाच इति विभक्तेरुदात्तत्वं। ऋण्वति। ऋणु गतौ। लेटि तनादित्वादुप्रत्ययः। लेटोऽडाटाविति अडागमः।
॥ अथ तृतीया॥ ॥ अग्निर्धिया स चेतति केतुर्यज्ञस्य पूर्व्यः॥ अर्थं ह्यस्य तरणि॥ ॥ यज्ञस्याग्निष्टोमादेः केतुः प्रज्ञापकः। पूर्व्यः पूर्वभवः चिरंतनः स
तथाविधोऽग्निर्धिया प्रज्ञया चेतति सर्वं जानीते अस्य एतादृशस्याग्नेरर्थं गमनस्वभावं तेजः अस्य आकाशे दृश्यमानस्य तमसः। तरणिर्हि तारकं ख-
लु निवर्तकमिति यावत्। चेतति चिती संज्ञाने निघातः। अर्थं। ऋ गतौ। उषिकुषिगार्तिभ्यः स्थन् इति थन्। गुणः। नित्त्वादाद्युदात्तः। तरणि। ऋ प्लवनत-
रणयोः। अर्तिसृधृधमित्यादिना अनि प्रत्ययः। गुणः। प्रत्ययस्वरः॥ ॥ अथ चतुर्थी॥ ॥ अग्निं सूनुं सनश्रुतं सहसो जातवेदसं॥ वह्निं देवा अकृ-
ण्वत॥ ॥ सहसः सूनुं बलस्य पुत्रं मथनरूपेण बलेन निष्पद्यमानत्वात् सनश्रुतं सनातनत्वेन प्रसिद्धं। जातवेदसं जातप्रज्ञं तमिममग्निं देवाः हवि-
र्भुजो देवाः वह्निं हविषां वोढारं अकृण्वत। कुर्वन्। सनश्रुतं। श्रु श्रवणे कर्मणि क्तः। तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं। वह्निं। वह प्रापणे। वहिश्र्युद्रु

नो। वहिश्रीत्यादिना निप्रत्ययः। अह्रुत एव तत्। हृ विहिंसाकरणयोः इति लानुम्। घिलि हृण्ययोरच्च्वेत्क्तप्रत्ययः। अकारश्चान्तादेशः। लडिव्यत्ययेनात्म
ऋ॰वे॰भा॰१ नेपदं। निघातः॥ ॥ अथ पंचमी॥ ॥ अदाभ्यः पुर एता विशामग्निर्मानुषीणां॥ तूर्णी रथः सदा नवः॥ ॥ मानुषीणां मनोर्जातानां पुर एता सन्मार्गप्रदर्श
नेनाग्रतो यंता अत एव तूर्णिः तात्प्रज्ञावैदिकप्रवर्तनकत्वेनान्नासु ग्रहीतुं त्वरायुक्तः आलस्यरहितः रथः हविषां वहनाद्रथसदृशः सदा सर्वदा तत्क
र्मणि नवः नूतनः पुनर्मथनादभिनवः। एवंविधोऽग्निः अदाभ्यः आहिंस्यनकेनापितिरस्कार्य इत्यर्थः। अदाभ्यः। दंभु दंभने। दंभश्चेति वक्तव्य इति क
र्मण्य न्। उपधावृद्धिः। नदाभ्यः नञसमासे तत्पुरुषे तुल्यार्थेति पूर्वपदप्रकृतिस्वरत्वं। पुरएता इण्गतौ। एवुल् तृच्। गुणः। तृचित्वादंतोदात्तः। मा
नुषीणां मनोर्जाताव स्यतो षुक्केति। अनुद्गिद्भ्याणतिङीपा चित्वादाद्युदात्तः। तरास प्रमइति धातोनिरत्यनुवृत्तौ वहिश्रि श्रु यु द्रु ग्लाहात्वरिभ्यो नि
दितिनिप्रत्ययः। ज्वरत्वरेत्यादिना कूठातस्थनित्वादाद्युदात्तः। संहितायां द्वलोपे पूर्वस्येति दीर्घः। रथः। हनिकुषिनीरमिकाशिभ्यः क्थन् इति थप्रत्ययः।
कित्वाद नुदात्तोपदेशेत्यादिना नुनासिकलोपः। नित्वादाद्युदात्तः। सदा सर्वादिषु आद्युदात्तत्वेनपठितत्वादाद्युदात्तः॥ ॥ इति तृतीयस्य प्रथमे नवमो
वर्गः॥ ॥ तस्मिन्नृचः षष्ठी॥ ॥ साह्वान्विश्वा अभियुजः क्रतुर्देवानाममृक्तः॥ अग्निस्तुविश्रवस्तमः॥ ॥ अभियुजः अभियोक्त्रीः विश्वाः सर्वाः सेनाः सा राम
ह्वान् सहमानः स्वबलेन तिरस्कुर्वाण अमृक्तः शत्रुभिरहिंसितः। देवानां क्रतुः कर्ता हविःप्रदानेन पोषकः एवंभूतोऽग्निः तुविश्रवस्तमस्तु विशब्दो १५
बहुवाची। तुविपुर इति तन्नामसु पाठात्। श्रवः शब्दोन्नवाची श्रव इत्यन्ननाम। श्रूयत इति निरुक्तेऽभिधानात्। अतिशयेन विविधान्नयतोवर्तते। य
स्मादेवं तस्मादेवं तस्मादस्मान पिबहुविधान्नोपेतान्करोत्विति भावः। साह्वान्। षह मर्षणे इत्यस्य क्कसौ साह्वान्मीढ्वांश्चेति निपातनाद्द्विर्वचनानिडागम

श्च न भवति। परस्मैपदं च भवति। क्वसुस्वरः। क्रतुः। कृञः कतुः कित्वात् गुणाभावः। उवङादेशः। अंतोदात्तः। श्रवः श्रु श्रवणे। श्रूयते कर्मणीति कर्मण्यसु
न्प्रत्ययः। अतिशयेन तु विश्रव इति अतिशायने तमबिति तमप्। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं॥ ॥ अथ सप्तमी॥ ॥ अभि प्रयांसि वाहसा दाश्वाँ
अश्नोति मर्त्यः॥ क्षयं पावकशोचिषः॥ ॥ दाश्वान् हविषां दाता मर्त्यो मनुष्यो यजमानो वाहसा हविषां वाहकेनाग्निना प्रयांसि अन्नानि अभ्यश्नोति अ
भितः सर्वतः प्राप्नोति किंच। पावकशोचिषः शोधकदीप्तेरग्नेः सकाशात् क्षयं गृहं चाभ्यश्नोति। प्रयांसि प्रीङ् प्रीणने। अस्माद्धातोरंतर्भावितण्य
र्थादसुन्प्रत्ययः प्रीणयंति भोक्तारमिति प्रयांसि। अनित्वादाद्युदात्तः। वाहसा णिदित्यनुवृत्तौ वहिहाधाञ्भ्यः छंदसीत्यसुन्। णित्वादुपधावृद्धिः। नि
त्स्वरः। दाश्वान्। दाशृ दाने इत्यस्य क्वसौ दाश्वान्साह्वान्मीढ्वानिति निपातनादिडागमो द्विर्वचनं च न भवति। क्वसुप्रत्ययस्वरः। अश्नोति। अशू व्याप्तौ। व्यत्य
येन परस्मैपदं। निघातः॥ ॥ अथाष्टमी॥ ॥ परि विश्वानि सुधिताग्नेरश्याम मन्मभिः॥ विप्रासो जातवेदसः॥ ॥ जातवेदसः जातप्रज्ञा विप्रा मेधाविनो
होतादयो वयं अग्नेस्तव संबंधिभिः मन्मभिः मननीयैः स्तोत्रैः विश्वानि सर्वाणि सुधितानि सुहितानि सुष्ठु हितान्यभिलषितानि वसूनि पर्यश्याम सर्व
तः प्राप्नुयाम। जातवेदस इत्यग्नेर्वा विशेषणं जातानि सर्वाणि वेत्तीति जातवेदाः सर्वज्ञ इत्यर्थः। एतादृशो जातवेदस्त्वमग्नेरेवोचितमिति तद्विशेषणत्
त्वं युक्तं। सुधितं डुधाञ् धारणपोषणयोः इत्यस्माद्धातोर्निष्ठायां छंदसीत्यनुवृत्तौ सुधितवसुधितेत्यादिना निपातितः। शेश्छंदसि बहुलमिति शेर्लु
क्। गतिरनंतर इति गतेः प्रकृतिस्वरत्वं। अश्याम अशू व्याप्तौ। बहुलं छंदसीति श्नुप्रत्ययस्य लुक्। व्यत्ययेन परस्मैपदं। यासुट् परस्मैपदेषूदात्त इति
यासुट्। लिङः सलोप इति सलोपः। अदंतत्वाभावादियादेशो न भवति। सः सकारस्य नित्यं ङित इति लोपः। निघातः। मन्मभिः मनु अवबोधने। अन्येभ्यो

ऋ०सं०भा०१

पिदृश्यत इति मन्तिनूः नित्यस्वरः॥ अथ नवमी॥॥ अग्ने विश्वानि वार्या वाजेषु सनिषामहे॥ त्वे देवास एरिरे॥॥ हे अग्ने वार्या वरणीयानि संभजनीया
नि विश्वानि सर्वाणि धनानि वाजेषु युद्धेषु सनिषामहे वयं संभजामहे। यतः कारणं देवासः पूर्वमस्माभिरिष्टा देवा अस्मदभिमतफलं प्रदीयते
त्वयि एरिरे आसमंतादागमनं त्व प्रतिष्ठा इत्यर्थः। सर्वथापि त्वत्सकाशात् फलं लभेमही। लेटोडाटावित्यडागमभेदः वार्या। वृङ् संभक्तौ। ऋहलो
र्ण्यदिति ण्यत्। शेश्छंदसि बहुलमिति शेर्लुक्। ईडवंदेत्यादिना आद्युदात्तः। वाजेषु। वृषादित्वादाद्युदात्तः। सनिषामहे। वनषण संभक्तौ धात्वादेः षः सः।
लेटि बहुलमिति सिप्। सिप आर्धधातुकत्वादिडागमः। व्यत्ययेनात्मनेपदं। निघातः। त्वे युष्मच्छब्दस्य सप्तम्यां त्वादेशः। सुपामिति शे आदे
शः। देश इति प्रगृह्यसंज्ञा। ईरिरे। ईर गतावित्यस्मात् लिटो झस्य इरे आदेशः। इजादेश्च गुरुमत इत्याम् न भवति मंत्रत्वात्। निघातः॥
॥इति तृतीयस्य प्रथमे दशमो वर्गः॥॥ इंद्राग्नी इति नवर्चं द्वादशं सूक्तं। विश्वामित्रस्यार्षं। तथा चानुक्रम्यते। इंद्राग्नी ऐंद्राग्नमिति। अग्निष्टो
मे छावाकशस्त्रे। आवपार्थमिदं सूक्तं। अभिप्लवषष्ठहानीति खंडे सूत्रितं। इंद्राग्नी आगतमाश्विनं यद्योरिदमिति। अग्निष्टोमे छावाकशस्त्रे। इं
द्राग्नी आगतमिति स्तोत्रियस्तृचः। तस्येवाछावाकस्याद्याः शस्त्रयाज्या इंद्राग्नी आगतं सुतमिति याज्येति सूत्रितत्वात्। चतुर्विंशेहनि प्रातः
सवने छावाकशस्त्रे इंद्राग्नी अपसस्परीत्यनुरूपः सूत्रितं च। इंद्राग्नी आगतं सुतमिंद्राग्नी अपसस्परीति॥ ॥तस्मिन्सूक्ते प्रथमा॥॥॥ इंद्राग्नी राम
आगतं सुतं गीर्भिर्नभो वरेण्यं॥ अस्य पातं धियेषिता॥॥ इंद्रश्च अग्निश्च इंद्राग्नी हे देवौ सुतं अभिषवादिसंस्कारैः संस्कृतं अत एव वरेण्यं वरणी २६
यं संभजनीयं इमं सोमं प्रति गीर्भिः अस्मदीयाभिः स्तुतिरूपाभिर्वाग्भिः आ कुतो नभः नभसः स्वर्गस्थानादागदं आगच्छतं। आगत्य च धियास्माभिः

अनुदितामित्युपधालोपः। उपसर्गात्सुनोतीति षत्वं॥॥ अथ द्वितीया॥ ॥स हव्यवाळमर्त्य उशिग्दूतश्चनोहितः॥ अग्निर्धिया समृण्वति॥॥ स हव्यवाट्
हविषां वोढा अमर्त्यः मरणधर्मरहितः उशिक् हवींषि कामयमानः दूतः देवानां दूतः चनः हितः हविर्लक्षणायान्नाय निहितः यद्वा चनोहितः। चने अ
न्ने हविर्लक्षणे हितमस्यास्तीति चनोहितः। स तथाविधोग्निर्धिया प्रज्ञया कर्मणा वा समृण्वति संगच्छते। कर्मविषयप्रज्ञान्वितोग्निरस्मानपि तादृक्प्रज्ञान्वितान्क
रोतीत्याशास्ते। हव्यवाट्। वह प्रापणे। वहश्चेति ण्विः। ढत्वं जश्त्वचर्त्वानि। कृदुत्तरपदप्रकृतिस्वरत्वं। प्रत्ययस्वरः। चनोहितः। चनेः चायतेर्वा ऋ
स्वश्चेत्यसुन्। चतः। वकारो नुडागमः। तस्मिन्नल्लोपः। नित्वादाद्युदात्तः। पुनश्च नसो छंदसि गतिसंज्ञा वक्तव्येति संज्ञायां गतिरनंतर इति प्रकृतिस्वरत्वं
बहुव्रीहौ तु पूर्वपदप्रकृतिस्वरत्वं। धिया सावेकाच इति विभक्तेरुदात्तत्वं। ऋण्वति। ऋणु गतौ। लेटि तनादित्वादुप्रत्ययः। लेटोडाटावित्यडागमः।
॥अथ तृतीया॥ ॥अग्निर्धिया स चेतति केतुर्यज्ञस्य पूर्व्यः॥ अर्थं ह्यस्य तरणि॥॥ यज्ञस्याग्निष्टोमादेः केतुः प्रज्ञापकः। पूर्व्यः पूर्वभवः चिरंतनः स
तथाविधोग्निर्धिया प्रज्ञया चेतति सर्वं जानीते अस्य एतादृशस्याग्नेरर्थं गमनस्वभावं तेजः अस्य आकाशे दृश्यमानस्य तमसः। तरणिर्हि तारकं ख
लु निवर्तकमिति यावत्। चेतति चिती संज्ञाने निघातः। अर्थं ऋ गतौ। उषिकुषिगार्तिभ्यः स्थन् इति थन्। गुणः। नित्वादाद्युदात्तः। तरणि। ऋ प्लवनत
रणयोः। अर्तिसृधृधमित्यादिना अनिप्रत्ययः। गुणः। प्रत्ययस्वरः॥॥ अथ चतुर्थी॥॥ अग्निं सूनुं सनश्रुतं सहसो जातवेदसं॥ वह्निं देवा अकृ
ण्वत॥॥ सहसः सूनुं बलस्य पुत्रं मथनरूपेण बलेन निष्पाद्यमानत्वात् सनश्रुतं सनातनत्वेन प्रसिद्धं। जातवेदसं जातप्रज्ञं तमिममग्निं देवाः हवि
र्भुजो देवाः वह्निं हविषां वोढारं अकृण्वत। कुर्वत। सनश्रुतं। श्रु श्रवणे कर्मणि क्तः। तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं। वह्निं वह प्रापणे। वहिश्रिश्रु

ऋ॰सं॰भा॰२ दा॥ छदि अपवारणे। अस्मात्क्विप्। सुपां सुलुगिति सुपो डादेशः। कृदुत्तरपदप्रकृतिस्वरत्वं। जूतिः। जूतिरिति सौत्रो धातुः अस्मादुदात्तइत्यनुवृत्तौ ऊतियूति
जूती त्यादिना निपातनादंतोदात्तत्वं। उदात्तयणो हल्पूर्वादिति विभक्तेरुदात्तत्वं। वृणे। वृङ् संभक्तौ। अप्रत्ययः। इति आत्मनेपदानामिनीरएत्वं। निघा
तः। ता। सुपां सुलुगिति डादेशः। सोमस्य। षुञ् अभिषवे। अस्मादर्तिस्तुसुहुसृधृक्षि त्यादिना मन्प्रत्ययः। नित्स्वरः। तृंपतां। तृप प्रीणने। लोटि शे मुचादि
त्वात् मुमागमः॥ निघातः॥ ॥ अथ चतुर्थी॥ ॥ तो अघ्नं वृत्रहणा हुवे सजित्वानापराजिता॥ इंद्राग्नी वाजसातमा॥ ॥ तो इंद्राग्नी वृत्राणां बाधकौ। वृत्रहा
पापकृत्त्वस्य पापत्योः अघ्नं भ्रूणवृत्रेषु क्विविति। क्विप्। एकानुत्तरपदे णत्वमिति णत्वं। कृदुत्तरपदप्रकृतिस्वरत्वं। हुवे। ह्वयतेर्बहुलं छंदसीति लुकि सति
ह्वः संप्रसारणमित्यनुवृत्तौ बहुलं छंदसीति संप्रसारणं। कृदुत्तरपदप्रकृतिस्वरत्वं। हुवे। ह्वयतेर्बहुलं छंदसीति लुकि सति ह्वः संप्रसारणमित्य
नुवृत्तौ बहुलं छंदसीति संप्रसारणं। उवङादेशः। व्यत्ययेनात्मनेपदं। निघातः। सजित्वाना। जि जये। इण्नशिजिसर्तिभ्यः क्वरबिति क्वरप्। क्वित्वा
द्गुणाभावः। पित्वात्तुगागमः। समानस्य छंदस्यमूर्धेति समानस्य सभावः। कृदुत्तरपदप्रकृतिस्वरत्वं। पराजिता। नञ्समासः तत्पुरुषे तुल्यार्थतृतीया
पदप्रकृतिस्वरत्वं। इंद्राग्नी देवताद्वंद्वे चेत्युभयपदप्रकृतिस्वरत्वं प्राप्ते नोत्तरपदेऽनुदात्तादाविति प्रतिषेधात्समासस्वरः। वाजसातमा। षणु दाने।
अस्माज्जनसनखनक्रमगमो विडिति विट्। विड्वनोरनुनासिकस्यादित्याकारः। अतिशायने तमबिति तमप्। कृदुत्तरपदप्रकृतिस्वरत्वं॥ ॥ अथ पंचमी॥ राम
प्र वामर्चंत्युक्थिनो नीथाविदो जरितारः॥ इंद्राग्नी इष आवृणे॥ ॥ हे इंद्राग्नी उक्थिनः उक्थं शस्त्रं तद्वंतः शंसितारो होत्रादयः वां युवां प्रार्चंति। इहकर्म १७
णि स्तुतिरूपाभिर्वाग्भिः पूजयंति। तथा नीथाविदः स्तोत्राणि सामगानकुशला जरितारः उद्गात्रादयः। अभिलाषितफलावाप्तये युवां सर्वंति। सह
मपि इषः अन्नस्य लाभार्थं इंद्राग्नी युवामावृणे सर्वतः संभजे पूजयामीत्यर्थः। युवां। युष्मच्छब्दस्य द्वितीयायां पदात्परत्वाद्युष्मदस्मदोः षष्ठीचतुर्थी
द्वितीयास्वित्यादिना वामित्यादेशः। अनुदात्तश्च। अर्चंति। अर्च पूजायां निघातः। बच परिभाषणे पातृतुदिवचिरिचिसिचिभ्यस्थक् इति कर्मणि थक्। वचिस्वपीत्या
दिना संप्रसारणं। उक्थं शस्त्रं एषामस्तीत्यत इनिठनाविति इनिः। यस्येति लोपः। प्रत्ययस्वरः। नीथाविदः। णीञ् प्रापणे। हनिकुषिनीरमी त्यादिना
थक्। किन्त्वाद्गुणाभावः। विद ज्ञाने। क्विपेति क्विप्। कृदुत्तरपदप्रकृतिस्वरत्वं। इंद्राग्नी। आमंत्रितत्वादाद्युदात्तत्वं। वृणे। वृङ् संभक्तौ। निघातः॥ ॥ इति तृती
यस्य प्रथमे काण्डे त्रयोवर्गः॥ ॥ अथ तस्मिन्सूक्ते षष्ठी॥ ॥ इंद्राग्नी नवतिं पुरो दासपत्नीरधूनुतं॥ साकमेकेन कर्मणा॥ ॥ हे इंद्राग्नी दासपत्नीः दास
यंतीति दासा उपक्षपयितारः शत्रवस्ते पतयः पालका यासां ताः दासपत्नीः नवतिं नवतिसंख्याकाः पुरः एवंविधाः शत्रूणां पुरीः एकेन कर्मणा एकेने
वोद्योगेन युवां सह युगपत् अधूनुतं अकंपयतं। तावद्विंद्राग्नी आह्वयामीति शेषः। नवतिं। नवानां दशनीती नवभावः तिश्च प्रत्ययः। प्रत्ययस्वरेणांतोदा
त्तः। दासपत्नीः। दसु उपक्षये। दासयतीति दासः। पचाद्यजंतः। चित्वादंतोदात्तः। ते पतयो यासां। नित्यं सपत्न्यादिषु। दासाच्चेत्युक्तत्वाद्विभाषा सपूर्व
स्येति ङीप्। इकारस्य नकारः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। अधूनुतं। धूञ् कंपने। लङि स्वादिभ्यः श्नुः। निघातः। एकेन। इण्भीकापाशल्यतिमर्चिभ्यः कन्निति कन्। नित्वादाद्युदात्तः॥ ॥ अथ सप्तमी॥ ॥ इंद्राग्नी अपसस्पर्युप प्रयंति धीतयः॥ ऋतस्य
पथ्या३ अनु॥ ॥ हे इंद्राग्नी धीतयो सोमस्य धातारः पातारो होत्रादयः। ऋतस्य कर्मफलस्य पथ्याः पथो मार्गाननुलक्ष्य अपसः अस्माभिः क्रिय
माणस्य कर्मणः परि सर्वतः उप प्रयंति समीपे प्रकर्षेणावर्तन्ते। अतः सोमपानार्थं युवामागच्छतमिति भावः। यद्वा धीतयः स्तुतयः ऋतस्य यज्ञस्य मार्गे

लक्ष्मीकृत्यकर्मणः परिवः प्रवर्तते। अतः स्तोतव्यतया युवामागतमित्युच्यते। इति। इणगतौ। एतादेशः। निघातः। धीतयः। धेट् पान इत्यस्मात्क्तिच्क्तौ चेति घु
ऋ॰सं॰भा॰१ मास्थेतीत्वं। चित्वादन्तोदात्तः॥ अथाष्टमी॥ इंद्राग्नी तविषाणि वां सधस्थानि प्रयांसि च। युवोरप्तूर्यं हितं॥ हे इंद्राग्नी वां युवयोः तविषाणि बलानि
प्रयांसि अन्नानि च सधस्थानि परस्परं वियुज्य वर्तन्ते। तथा अप्तूर्यं वृष्टिद्वारा प्रेरकत्वं युवोः युवयोरेव हितं निहितं वर्तते तस्मात्सोमपानं तत्प्रभृतिषु
सर्वकर्मसु इंद्राग्न्योः स्वाहेव वर्तमानमिति भावः। वां षष्ठी द्विवचने वामित्यादेशः॥ अथ नवमी॥ इंद्राग्नी रोचना दिवः परि वाजेषु भूषथः। तद्वां चे
ति प्र वीर्यं॥ हे इंद्राग्नी दिवो रोचनाः स्वर्गस्य रोचकौ प्रकाशकौ युवां वाजेषु संग्रामेषु परि भूषथः। परितः सर्वतः अलंकर्तौ भवथः। शत्रून्पराजित्य
सर्वतो विजयमानौ वर्तेते। वां युवयोः वीर्यं सामर्थ्यं भवतां तादृशं संग्रामविजयं प्र चेति प्रकर्षेण ज्ञापयति। यद्वा युवां वाजेषु संग्रामेषु परि भूषथः। श
त्रून्परिभूषथः। शेषं पूर्ववत्। रोचना रुच दीप्तावित्यस्य अनुदात्तेतश्च हलादेरिति युच्। चित्वादन्तोदात्तः। भूषथः। भूष भूषणे। निघातः। चेति। चिती
संज्ञाने। अंतर्भावितण्यर्थः। बहुलं छंदसीति शपो लुक्। नकारलोपश्छांदसः॥ इति तृतीयस्य प्रथमे द्वादशो वर्गः॥ तृतीयमंडले प्रथमोनुवा
कः। द्वितीयानुवाके सप्त सूक्तानि। तत्र प्र वो देवायेति सप्तर्चमाद्यं सूक्तं आनुष्टुभं। अनुक्रमणिका। प्र वः सप्त ऋषभस्त्वानुष्टुभमिति विश्वा रामं
मित्रपुत्रो ऋषभ ऋषिः। मंडलादिपरिभाषया अग्निर्देवता। अग्निष्टोमे इदं सूक्तमाज्यशस्त्रं परा ध्यर्यवीठ तदिति सूत्रितं। प्र वो देवायेत्याज्यमुप १८
तनुयादिति। इदमेव सूक्तं प्रातरनुवाकमाश्विनशस्त्रे च विनियुक्तं सूक्तं च प्र वो देवायाग्नय इत्येकदा तद्दति पंचेति अग्नेर्दयेष्टौ रूपाणि त्वमग्ने ददाशुषे र
यामिति सूत्रितं च। स यं तावि प्र एषो दीर्घस्ते अस्त्वं कुश इति॥ तस्मिन्सूक्ते प्रथमा॥ प्र वो देवायाग्नये बर्हिष्ठमर्चास्मै। गमद्देवेभिरासनो यजिष्ठो

क्रियमाणे कर्मणि इषितं प्रेरितो युवां अस्य पातं इमं सोमं सोमं पिबतं। यद्वा धिया अस्मदीयया बुद्ध्या इषितौ प्राप्तौ अस्मदनुज्ञया प्रेरितौ युवामिमं पिब
तं। इंद्राग्नी इंद्रश्च अग्निश्च ह्वां द्वयी इति अग्निशब्दस्य पूर्वनिपाते प्राप्ते अजाद्यदंतमिति इंद्रशब्दस्य पूर्वनिपातः। पादादित्वान्निघातप्रतिषेधः। षाष्ठिकः
स्वरः। गमं गमलृ गतौ। बहुलं छंदसीति शपो लुक्। सति अनुदात्तोपदेशेत्यादिना मकारलोपः। निघातः। वरेण्यं वृङ् संभक्तौ। वृङ एण्यः। वृषादित्वादा
द्युदात्तः। पातं पा पाने। सर्वे विधयश्छंदसि विकल्प्यंत इति न विधयश्छंदसि विकल्प्यंत इति न पिबादेशः। इषिता इषु गतौ। इत्यस्मात् तो निष्ठायां तीष
सहेतीडागमः। आगमा अनुदात्ता इति इटो नुदात्तत्वात् स्वरः शिष्यते॥ अथ द्वितीया॥ इंद्राग्नी जरितुः सचा यज्ञो जिगाति चेतनः। अया पातमि
अ मं सुतं॥ हे इंद्राग्नी जरितुः स्तोतुः सचा स्वर्गादिलक्षणफलप्राप्तौ सहायभूतो यज्ञः ज्योतिष्टोमादितियास्फति लक्षणया वा वा आह्नो संतो सुतं।
अभिषवादिसंस्कारोपेतं। इमं सोमं पातं पिबतं। जिगाति। गा स्तुतावित्ययं धातुरत्र गमने वर्तते। छंदसि जुहोत्यादिः बहुलं छंदसि अभ्यासस्येत्वं। निघा
तः। चेतनः। चिती संज्ञाने। कर्तरि बहुलवचनात् ल्युट्। लित्वात् आद्युदात्तत्वं। अया। इयम् शब्दस्य तृतीयायाः सुपां सुलुगिति याडादेशः। अनादेशप्राप्तौ
हलि लोपः। पातं पा पाने। निघातः॥ अथ तृतीया॥ इंद्रमग्निं कविच्छदा यज्ञस्य जूत्या वृणे। ता सोमस्येह तृम्पतां॥ अस्य यज्ञस्य धनभूतस्य सोम
स्य जूत्या जूतिः प्रेरणं सोमस्तावेद्यजमानं प्रेरयति साधनमुपलभ्यते तत्साध्ये क्रतौ यजमानः प्रवर्तत इति हितस्य प्रेरकत्वं। तया प्रेरणरूपया जू
त्या प्रेरितोहं कविच्छदा कवीनां स्तोतॄणां उचितफलप्रदानेन पापच्छेदकौ इंद्रमग्निं च युवां वृणे सोमपानार्थं महाकर्म गच्छतामिति संभजामि आगतौ
विताविंद्राग्नी इह कर्मणि सोमस्य सोमपानेन तृम्पतां। इंद्रं इदि परमैश्वर्ये इत्यस्माद्दाति ऋज्रेंद्राग्र इति रन्प्रत्ययांतत्वेन निपातनादाद्युदात्तत्वं। कविछ

ऋ॰सं॰भा॰१ परावेन हविर्भिर्वर्धयिष्यंतं वर्धयंतं यजमानानां यथोक्तकर्मप्रदर्शनेन तत्र प्रवर्तकः। अथ किं वयं नराणां ज्योतिष्टोमादीनां सोग्निर्नियंता फलप्रदानेन नि-
यामकः। हि प्रसिद्धौ। अत एव सर्वस्य नियंता खलु। किंच सोग्निर्दाता ज्योतिष्टोमादिकर्मफलदाता मंहिष्ठ मंहनीयधनं मघं रेक्ण इति तन्नामसु पाठात्। तस्यै-
नं वनितानि प्रेयष्ठं श्रेष्ठं भवति वः स्वं बंधिनं ता दुद्राम मग्निं हे ऋत्विजो यूयं दुवस्यत आहुतिप्रदानेन परिचरत। दुवस्यतिः परिचरणकर्मा नमस्यति दुवस्य-
तीति तन्नामसु पाठात्। यंता यम उपरमे इत्यस्य तृच्। ऋदुशनसित्यादिना अनङादेशः। तित्स्वरः। अथाहि निपातस्येति दीर्घः। दुवस्यत। दुवः
परिचरणं। तदिच्छंतः सुपः क्यच्। तदंतस्य धातोर्लोटि रूपं। दाता। डुदाञ् दाने। तार्छीलिकस्तृन्। नित्वादाद्युदात्तः॥ ॥अथ चतुर्थी॥ ॥स नः शर्माणि वी-
तयेग्निर्यच्छतु शंतमा॥ यतो नः प्रुष्णवद्वसु दिवि क्षितिभ्यो अप्स्वा॥ ॥सोग्निः हविःप्रदातृभ्योस्मभ्यं शंतमायतः पशुपुत्रादि अमृतधारा अति-
शयेन सुखकराणि शर्माणि शर्म शरणं गृहं वा छाया शर्म वर्मेति तन्नामसु पाठात्। तथाविधानि गृहाणि वीतये संभजनाय अग्निहोत्रादिकर्मप्राप्त्य-
र्थं यच्छतु ददातु। यतश्च यस्मादग्नेः सकाशात् प्रुष्णवत् समृद्धिमत् दानभोगादिना व्यत्ययेसत्यपि अतिशयेन वर्धमानं दिवि द्युलोके सक्षिति- राम
भ्यो भूलोकात्। अप्सु अंतरिक्षे च समुत्पन्नं वसु वसुवत् लोके असाधारण्येन वर्तमानं धनं आसमंतादुपनमति यतो अग्नेः प्रसादात् त्रिषु लोकेषु विद्य-
मानं धनं अस्माकमागच्छतीति सोग्निरिति पूर्वेणान्वयः। वीतये। विगतिकांत्यादिषु मंत्रे वृषेषपचेत्यादिना क्तिन्नंतात्। उदात्तत्वेन निपातनादुदात्तः। २१
यच्छतु। यम उपरमे। इषुगमियमां छ इति मकारस्य छः। प्रुष्णवत्। प्रुष स्नेहनासेचनपूरणेषु। अस्मादौणादिको नक् प्रत्ययः। तदस्यास्तीति मतुप्
तस्योदात्तता भावश्छांदसः॥ ॥अथ पंचमी॥ ॥दीदिवांसमपूर्व्यं वस्वीभिरस्य धीतिभिः॥ ऋक्वाणो अग्निमिंधते होतारं विश्पतिं विशां॥ ॥ऋक्वाणः स्तुतिकुर्वाणाः

स्तोतारो होत्रादयः दीदिवांसं दीप्यमानं अपूर्व्यं [illegible] तथा [illegible]मभिनवं होतारं देवानामाह्वातारं विश्पतिं प्रजानामतिशायेन पालयितारं तमग्निं व-
स्वीभिः प्रशस्ताभिः अस्य धीतिभिः अग्निविषयस्तुतिलक्षणाभिर्वा अग्निर्वा वस्वीभिर्वसुमद्भिः अस्य धीतिभिः एतदुद्देशेन क्रियमाणैः कर्मभिः इंधते दीपयं-
ति। स्तोत्रकरणे हविःप्रदानादिव्यापारेण समृद्धिं कुर्वंति। दीदिवांसं दिदु क्रीडादावित्यस्य क्वसो रूपं। तुजादीनामित्यभ्यासस्य दीर्घः। लोपो व्योरिति लो-
पः। वस्वीभिः। वसुशब्दात् छंदसि [illegible] अप्। नित्स्वरः। धीतिभिः। धेट् पाने। क्तिच् क्तौ च संज्ञायामिति क्तिच्। किंवा धीमस्यतीत्वं। चित्स्वरः। ऋक्वाणः। ऋचश-
ब्दात् मतुले वनिप्। अयस्मयादित्वात् भसंज्ञत्वात् कुत्वं। पदसंज्ञाभावात् जश्त्वाभावः। इंधते। इंधी दीप्तौ। विश्पतिं परादिश्छंदसि बहुलमित्युत्तरपदाद्युदा-
त्तत्वं। विशां सावेकाचस्तृतीयादिर्विभक्तिरुदात्तत्वं॥ ॥अथ षष्ठी॥ ॥उत नो ब्रह्मन्नविष उक्थेषु देवहूतमः॥ शं नः शोचा मरुद्वृधोग्ने सहस्रसातमः॥ ॥
उत अपि च हे अग्ने नः यज्ञकारिणामस्माकं ब्रह्मन् ब्रह्मणि अस्माभिः क्रियमाणे स्तोत्रे अविषः स्तोत्रविषयगुणातिरेकदोषो यथा न भवति तथा पाल-
य। किंच। देवहूतमः। देवानामाह्वातृतमस्त्वं उक्थेषु अस्माभिः क्रियमाणेषु आज्यप्रउगादिशस्त्रेषु अविषः गोपाय। किंच मरुद्वृधः मरुद्भिर्वर्धमानः
सहस्रसातमः सहस्रसंख्याकस्य धनस्यातिशायेन दाता त्वं नः अस्माकं शं ऐहिकमामुष्मिकं च सुखं शोच दीपय वर्धयेत्यर्थः। अविषः। अव रक्ष-
णादित्यस्य लटि सिब्बहुलमिति सिप्। अस्यार्धधातुकत्वादिट्। इतश्च लोप इति सिप इकारलोपः। लोटो लडादित्यडागमः। निघातः। उक्थेषु। व-
च परिभाषणे। अस्मात्कर्मणि पातृतुदिवचिरिचिसिचिभ्यस्थक् इत्यादिना थक्। किलात् संप्रसारणं। व्यत्ययेन स्वरः। देवहूतमः। ह्वयतेः क्विप् बहुलं छंदसीति संप्रसा-
रणं परत्वं च। हल इति दीर्घः। कृदुत्तरपदप्रकृतिस्वरत्वं। शोच। शुच दीप्तौ। अयमंतर्भावितण्यर्थः। निघातः। मरुद्वृधः। वृधु वर्धने इगुपधलक्षणः कः। मरु-

ऋ·वे·भा·१

दृधादित्वात्पूर्वपदांतोदात्तत्वं । सहस्वसातमः । षणु दाने । अस्य जनसनखनक्रमगमो विट् इति विट् । विड्वनोरनुनासिकस्यात् इत्याकारः । कृदुत्तरपदप्रकृतिस्वरः ॥
॥ अथ सप्तमी ॥ नू नो रास्व सहस्रवत्तोकवत्पुष्टिमद्वसु ॥ द्युमदग्ने सुवीर्यं वर्षिष्ठमनुपक्षितं ॥ अस्मिन्मध्यमा नहे अग्ने सहस्वसंख्योपेतं तोकवत् पुत्र
पौत्रादिसहितं पुष्टिमत् पोषकं । अनेन नखारीरस्य शरीराद्याहारावलोरेण प्रदंगवादिकमुपलक्ष्यते । द्युमत् दीप्तिमत् । अनेन रत्नकनकादिकं परिगृह्यते
सुवीर्यं शोभनसामर्थ्योपेतं तत्कार्येषु व्यवहारयोग्यं वर्षिष्ठं अतिशयेन वृद्धं प्रभूतं अन्नं एव अनुपक्षितं । व्यये क्रियमाणेऽप्यनुक्षीणं एवंभूतं वसु रत्न
कनकपश्वादिकलक्षणं धनं नः अस्मभ्यं त्वरितं अविलंबेन रास्व देहि । नू नः । ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणां इति दीर्घः । रास्व रा दाने अस्य लोटि रूपं । व्यत्ययेनात्म
नेपदं । अदादित्वाच्छपो लुक् । निघातः । सहस्रवत् । मादुपधायाश्च मतोर्वोऽयवादिभ्यः इति मतुपो वत्वं । कर्मादित्वान्मतुपोदात्तः । सहस्रवन्नाङ्गः पुष्टिमत् । पुष पुष्टौ । अ
स्मात् क्तिन् । प्रत्ययस्वरेणांतोदात्तः । ह्रस्वनुड्भ्यां मतुप् इति मतुप उदात्तत्वं । वर्षिष्ठं । प्रियस्थिरेत्यादिना वर्षि इत्यादेशः । नित्स्वरः । अनुपक्षितं । क्षि क्षय
इत्यस्य दीर्घभावात् निष्टानत्वं नत्वं भवति । तत्पुरुषत्वादव्ययपूर्वपदप्रकृतिस्वरः ॥ इति तृतीयस्य प्रथमे त्रयोदशो वर्गः ॥ आ होता मंद्रो विद
थान्यस्थात्सत्यो यज्वा कवितमः स वेधाः ॥ विद्युद्रथः सहसः पुत्रो अग्निः शोचिष्केशः पृथिव्यां पाजो अश्रेत् ॥ आ होतेति नवर्चं चतुर्दशं सूक्तं
आ होतेत्यनुक्रमणिका । ऋषभस्त्विति । अनुवृत्त्यप्रयोगादृष्यादिस्तु । ऋषभ ऋषिः । अनुक्तत्वात्त्रिष्टुप् । अग्निर्देवता एतदादीनि सू
क्तानि तृतीयाष्टमवर्जितानि प्रातरनुवाके आश्विनशस्त्रे त्रैष्टुभे छंदसि विनियुक्तानि । अथैतस्या इति षडे सूत्रितं । आ होतेति द्वे नीरत्तीया
ष्टमे उ क्षरेदिति त्रिष्टुभमिति ॥ तस्मिन्सूक्ते प्रथमा ॥ आ होतेति ॥ ऋभुरग्निर्स्तोति । होता देवानामाह्वाता मंद्रः स्तोतुं मदयिता सत्यः सत्यकर्मा क

राम
२०

बर्हिरासदत् ॥ यजमानो होतादीनति ब्रूते हे होतारो यूयं वः युष्मत्संबंधिने देवाय द्योतमानाय अस्मै । अस्मिन्कर्मणि स्तुत्यामाग्नये वर्षिष्ठं
वृद्धतममिदं स्तुतिरूपं स्तोत्रं शस्त्रादिकं प्रजातं प्रार्चत उच्चारयत । एवं कृतः सोऽग्निः देवेभिर्यष्टव्यैर्देवैः सहितः सन् नः अस्मान् प्रति आगमत् । आगत्य
च यजिष्ठः । यष्टृतमः सोऽग्निः बर्हिः अस्माभिर्वेद्यां स्तीर्णे बर्हिषि आसदत् । आसीदतु । उपविशतु । बर्हिष्ठं । बर्हिशब्दात् छंदसीत्यतिशायने इष्ठन् ।
अर्च अर्च पूजायां । भौवादिकः । बहुवचनस्यैकवचनं निघातः । गमत् । गम्लृ गतौ । अस्य छंदसि लुङ्लङ्लिटः इति लोडर्थे लुङ् । ऌदित्वात्तेरङ् । नित्यं
ङित इतीकारलोपः । पादादित्वान्निघातः । यजिष्ठः । यष्टृशब्दात् तुश्छंदसीति इष्ठन् । तुरिष्ठेमेयस्स्विति तृलोपः । नित्स्वरः । सदत् । पूर्ववल्लोडर्थे लुङ् । षद्लृ वि
शरणगत्यवसादनेषु । अस्य ऌदित्वादङ् । निघातः ॥ अथ द्वितीया ॥ ऋतावा यस्य रोदसी दक्षं सचंत ऊतयः ॥ हविष्मंतस्तमीळते तं सनिष्यंतोऽव
से ॥ यस्य पूर्वमंत्रप्रतिपादितस्याग्नेः रोदसी इमे द्यावापृथिव्यौ तन्नभो भवतः । अग्नेः प्रकाशकत्वेन तदधीनप्रकाशके भवत इत्यर्थः । किं च ऊतयः य
जमानस्य फलप्रदानेन रक्षितारो देवाः दक्षं यस्याग्नेर्बलं सचंते सेवंते इति यास्कः । अग्नेर्यजमानदत्तहविःकायमानो हविर्वहनार्थं तमेवाग्निमीळते
स्तुतिरूपाभिर्वाग्भिः पूजयंति । किं च सनिष्यंतः धनादिलाभमिच्छंतः स्वे अवसे रक्षणाय तमेवाग्निमाश्रयंते । ऋतावा । ऋतशब्दात् छंदसीवनि
पौ च वक्तव्यौ इति वनिप् । अन्येषामपि दृश्यत इति दीर्घः । वनिपः पित्वादनुदात्तत्वे प्रातिपदिकस्वरः । सचंत । षच समवाये । व्यत्ययेनात्मनेपदं । यद्वृत्त
योगादनिघातः । सनिष्यंतः सनि लाभः सनिमिच्छंतः । सुप आत्मनः क्यच् । सर्वप्रातिपदिकेभ्यो लालसायां सुग्वक्तव्य इति क्यचि परतः सुगागमः । क्यच
स्वरः ॥ अथ तृतीया ॥ स यंता विप्र एषां स यज्ञानामथा हि षः ॥ अग्निं तं वो दुवस्यत दाता यो वनिता मघं ॥ विप्रो मेधावी कर्मभिज्ञः अग्निः एषां का

निघातः। चेतति। चिती संज्ञाने। शतुर्लसार्वधातुकस्वरेणानुदात्तत्वे ततोदात्तशतुरनुम इति विभक्तेरुदात्तत्वाभावः। धातुस्वरः। सहस्व। सहोस्यास्तीति मतुप्स
ऋ॰सं॰भा॰२ कारस्यन स्थो मत्वर्थ इति भसंज्ञकत्वात् रुत्वं भवति। मादुपधायाश्च इति मतुपो वत्वं। उगिदचाम् इति नुम्। हल्ङ्यादिलोपे तिन कारस्य मतुवसो रु इति रुत्वं।
आमंत्रितनिघातः। विदुषः। विद ज्ञाने इत्येतस्मादुत्तरस्य शतुर्विदेः शतुर्वसुः इति वस्वादेशः। भसंज्ञायां वसोः संप्रसारणं। प्रत्ययस्वरः। निषत्सि। विश्र
रणादिषु। लटि बहुलं छंदसीति शपो लुक्। शित्प्रत्ययपरत्वाभावात्सीदादेशाभावः। सदेरप्रतेः इति षत्वं। यजत्र। यज देवपूजादिषु। अमिनक्षियजीत्या
दिनात्र प्रत्ययः। आमंत्रितनिघातः॥ ॥ अथ तृतीया॥ ॥ द्रवतां त उषसा वाजयंती अग्ने वातस्य पथ्याभिरच्छ॥ यत्सीमंजंति पूर्व्यं हविर्भिरा वंधुरेव तस्थु
र्दुरोणे॥ ॥ हे अग्ने वाजयंती वाजमन्नं कुर्वाणा उषसा उषासानक्तौ अहोरात्रौ ते त्वां द्रवतां अभिगच्छतां त्वमपि वातस्य वायोः पथ्याभिर्मार्गैः अच्छ ताव
होरात्रौ शीघ्रमभिगच्छ। यद्यस्मात्कारणादहोरात्राभ्यां परस्पराभिगमनेन अन्योन्यसंबंधः। तस्मादहोरात्रयोः सायंप्रातःकालयोः पूर्व्यं पुरातनं
त्वामृत्विजो हविर्भिराज्यादिभिः सीं सर्वतो अंजंति सिंचंति। किंच वंधुरे व यथा कूबरस्थानं परस्परसंसक्तौ हयोपेतं तद्वत्संसक्तौ तावहोरात्रौ दुरोणे
अस्माकं गृहे अग्निहोत्रादिसौकर्यसिद्ध्यर्थं आरस्य पुनः पुनः रावर्तमानौ तस्थतुः तिष्ठतः। द्रवतां द्रु गतावित्यस्य लोटि रूपं। पथ्याभिः पथिषु साधव इ राम
त्यर्थे तत्र साधुरिति यत्। नस्तद्धिते इति टिलोपः। तित्स्वरित इति स्वरितः। तस्थुः। तिष्ठतेर्लिटि उसि रूपं। निघातः॥ ॥ अथ चतुर्थी॥ ॥ मित्रश्च तुभ्यं २२
वरुणः सहस्वोग्ने विश्वे मरुतः सुम्नमर्चन्॥ यच्छोचिषा सहसस्पुत्र तिष्ठा अभि क्षितीः प्रथयन्त्सूर्यो नॄन्॥ ॥ सहस्वः बलवन् हे अग्ने मित्रावरुणश्च
मित्रावरुणौ विश्वे मरुतः सर्वदेवताश्च तुभ्यं त्वदर्थं सुम्नं स्तोत्रं अर्चन् यदा। अर्चतिर्यदा सर्वे देवाः तुभ्यं त्वां सुम्नं सुखेन अर्चन् पूजयंति। यद्यस्मात्कार

णात्। सहसस्पुत्र हे अग्ने सूर्यः सुष्ठु अर्यः स्वामी यद्वा सर्वान्नयां मितया सुष्ठु प्रेरकः यद्वा सूर्यः। शोभनवीर्य अभि क्षितीः क्षितिशब्दो मनुष्यवाची विशः
क्षितय इति तन्नामसु पाठात् मनुष्यानभिलक्ष्य नॄन्नेतॄन्। शोचिदर्शिकत्वेन नेतॄन् आत्मनो रश्मीन् प्रथयन् सर्वतो विस्तारयन् स्वं शोचिषा दीप्त्या समानः स
न्तिष्ठाति तिष्ठसि। तस्मात्ते देवा पूजयंतीति। अर्चन्। अर्च पूजायामित्यस्य लङि रूपं अडभावश्छांदसः। तिष्ठा। ष्ठा गतिनिवृत्तावित्यस्य लेटि रूपं। यद्योगा
दनिघातः। द्व्यचोऽतस्तिङ इत्यादिना तिष्ठादेशस्याद्युदात्तत्वेन निपातनादाद्युदात्तः। सूर्यः। राजसूयसूर्य इति क्यबंतत्वेन निपातनात्सर्वे थाः सिद्धा भवंति॥ ॥ अ
यं पंचमी॥ ॥ वयं ते अद्य ररिमा हि काममुत्तानहस्ता नमसोपसद्य॥ यजिष्ठेन मनसा यक्षि देवानस्रेधता मन्मना विप्रो अग्ने॥ ॥ हे अग्ने उत्तानहस्ताः
हविः स्वीकरणाद उत्तानपाणयो वयं कामं कमनीयं पुरोडाशादि हविः ते तुभ्यं अद्येदानीमस्मिन् कर्मणि ररिम दद्मः नमसा नमस्कारेण उपसद्य
षसंनो भूत्वा यजिष्ठेन यष्टृतमेन यागेच्छावता मनसा अंतःकरणेन देवान् यक्षि यजनीयान् देवेभ्य यज पूजय। किंच विप्रो मेधावी कर्माभिज्ञस्त्वं अस्रे
धता अक्षीणेन प्रभूतेन मन्मना मननीयेन स्तोत्रेण देवान् पूजय। अद्य सद्यः परुत्यार्यंषसद्युत्यादिना निपातितः। अंतोदात्तश्च। ररिम दान इत्यस्य कर्मा
ने लिट्परस्मैपदानां णलतुसित्यादिना मसो देशः। क्रादिनियमादिडागमः। आतो लोप इटि चेत्याकारलोपः। हि च इति न निघातः। आगमा अनुदात्ता
इति नुदात्तत्वात् प्रत्ययस्वरः। उपसद्य। षद्लृ विशरणगत्यवसादनेषु अस्य ल्यपः समासे अनञ्पूर्वे क्त्वो ल्यप्। लित्स्वरः। यक्षि। यज देवपूजासंगतिकरणदाने
ष्विति। लटि बहुलं छंदसीति शपो लुक्। षत्वकत्वे। सिपो ह्यादेशाभावश्छांदसः। अस्रेधता। स्रिधिः क्षयार्थः। नञ्तत्पुरुषे नञः स्वरः॥ ॥ अथ षष्ठी॥ ॥ त्वद्धि पु
त्र सहसो वि पूर्वीर्देवस्य यन्त्यूतयो वि वाजाः॥ त्वं देहि सहस्रिणं रयिं नोऽद्रोघेण वचसा सत्यमग्ने॥ ॥ सहसस्पुत्र बलस्य पुत्र हे अग्ने देवस्य देवनशील

ऋ॰वे॰भा॰१

स्वकर्मकरणप्रवृत्तस्य यजमानस्य त्वत् त्वत्तः सकाशात् पूर्वीः प्रभूता ऊतयो विघ्नपरिहारेण कर्मपरिपालनादिरूपा ऊतयः रक्षाः इयर्तीति विविधं गच्छंति
खलु तमिर्मयजमानं प्राप्नुवंतीति तथा वाजाः अन्नानि धियं तिरन्तं यजमानं प्राप्नुवंतीति किं च हे अग्ने त्वं सहस्रिणं सहस्रसंख्याकं रयिं धनं नोऽस्मभ्यं देहि त
था अद्रोघेण द्रोहरहितेन पापशून्येन वचनेन त्वादेशः ङसः एकवचनस्य चेत्यादेशः। एकदेशस्वरः पुत्रे सहसः परमपि छंदसीति परांगवद्भावात् द्वयो
सर्वानुदात्तत्वं देहि डुदाञ् दाने रस्य लोटि विधा। सोरेद्धाविति धातोरेत्वं। अभ्यासलोपश्च। निघातः। अद्रोघेण द्रुह जिघांसायां। यस्य द्रोघः धकारश्छां
दसः। नञ्समासमित्युत्तरपदांतोदात्तत्वं॥ अथ सप्तमी॥ तुभ्यं दक्ष कविक्रतो यानीमा देव मर्तासो अध्वरे अकर्म। त्वं विश्वस्य सुरथस्य बोधि सर्वं
तदग्ने अमृत स्वदेह॥ समस्तयोः सामर्थ्योपेत कविक्रतो अतींद्रियविषयप्रज्ञोपेत सर्वज्ञ देव दीप्यमान हे अग्ने मर्तासो यजमाना वयं तुभ्यं तदर्थं
यानीमानि हवींषि अध्वरे यज्ञे अकर्म हविस्त्यागमकार्ष्म त्वं च सुरथस्य शोभनद्योतनोपेतस्य विश्वस्य सर्वस्य यजमानबोधि गोपायिता भवामिति बु
ध्यस्व। अमृत मरणधर्मरहिताग्ने इह अस्मिन् कर्मणि अस्माभिर्दत्तं सर्वं हविः स्वद आस्वादय। अकर्म। डुकृञ् करणे इत्यस्य लङि छंदस्युभयथेति
नस आर्धधातुकत्वेन नङित्वाभावाद्गुणः। यद्वृत्तयोगादनिघातः। बोधि बुध अवगमने छंदसि लुङि थ लुङ इति डाति डा भवतीति सत्वादेवाः दीपज
नबुधेत्यादिना कर्तरि चिण् चिणो लुगिति शब्दस्य लोपः। अड्भावः। छांदसस्वरः। स्वद आस्वादने। अंतर्भावितण्यर्थः। लोटि रूपं। निघातः॥ इति राम
तृतीयस्य प्रथमे चतुर्दशो वर्गः॥१४॥ विपाजसा पृथुनेति सप्तर्चं तृतीयं सूक्तं त्रैष्टुभमाग्नेयं। अत्रेयमनुक्रमणिका। विपाजसा कात्यो त्कीलस्त्विति। २२
कतगोत्रोत्पन्नोत्कीलो नाम ऋषिः प्रातरनुवाकाश्विनशस्त्रयोः होतेत्यादि सूक्तदशकं विनियुक्तं तत्रेदं च द्वितीयं सूक्तं॥ तस्मिन् सूक्ते प्रथमा॥१॥

वितमः। अतिशयेन मेधावी देवानां यष्टा वेधाः सर्वस्य जगतो विधाता एवं विधा महिमोपेतः सोऽग्निः विदथानि अस्माभिः क्रियमाणानि यज्ञान् अस्थात्
आतिष्ठति प्राप्नोति। किं च विधुङ्तुदथः। द्योतमानज्वालोपेतः शोचिष्केशः शोचींषि दीप्ता ज्वाला केशा यस्य उज्ज्वलमय्या केशोपेतः सहस्वः सूनुः बलस्य पुत्रः ए
वंभूतसोऽग्निः पृथिव्यां विस्तीर्णे अंतरिक्षे पाजः तेजः स्वकीयां प्रभां अश्रेत् अयनेति प्रापयति। वक्षा पृथिव्यां भूमौ वर्तमानः पाजो बलं सेवते। मंद्रः म
दिरूति मोमदको तिगतिषु। अस्मात् स्फायितंचीत्यादिना रक् रुदित्वान्नुम्। प्रागति निवृत्तो। छंदसि लुङ्लङ्लिट इति वर्तमाने लिङ्। गातिस्थेति
सिचो लोपः। निघातः। यद्वायज देवपूजासंगतिकरणदानेषु। सुयजोर्ङ्वनिबिति वनिप्। तस्य नित्वादनुदात्तत्वे प्रत्ययस्वरः। शोचिष्केशः। शुच
दीप्तौ। अर्चिशुचिहुसृपिछदिछर्दिभ्य इसिरिति उपसर्ग प्रसन्नो भूत्वा यजिष्ठेन यष्टृतमेन यागेच्छावता मनसा अंतःकरणेन देवान् यक्षि यजनीत्युद्गसि
रिती स्मिप्रत्ययस्वरेणांतोदात्तः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरः। अश्रेत् श्रिञ् सेवायामित्यस्य छंदसि वर्तमाने लङ्। बहुलं छंदसीति शपो लुक्॥
सार्वधातुकगुणः। निघातः॥ अथ द्वितीया॥ अयामि ते नम उक्तिं जुषस्व ऋतावस्तुभ्यं चेतते सहस्वः। विद्वाँ आ वक्षि विदुषो नि षत्सि मध्य आ बर्हि
रूतये यजत्र॥ ऋतावः ऋतं सत्यभूतो यज्ञः तद्वन् हे अग्ने ते त्वद्विषयां नम उक्तिं नमस्कारवाक्यमहं अयामि कवयामि प्रेरयामि उच्चारयामि स
हस्वः सहो बलं तद्वन्नग्ने चेतते चेतयित्रे कर्मणः प्रज्ञापकाय तुभ्यं नम उक्तिः क्रियते तां जुषस्व अस्माभिः क्रियमाणां नमस्कारोक्तिं सेवस्व। किं च विद्वान्
आनुपूर्व्येण देवानामाह्वाता अभिज्ञः कर्माभिज्ञो कर्माभिः ज्ञः मनू। आवक्षि आवह। किं च यत्र यष्टव्यं हे अग्ने ऊतये अस्माकं रक्षणाय मध्ये बर्हिस्तीर्ण
स्य बर्हिषो मध्ये आनिषत्सि आसमंतान्निषीद। अयामि इण् गतौ भौवादिकः। पादादित्वादनिघातः। जुषस्व जुषी प्रीतिसेवनयोः। तुदादिः। लोटि रूपं।

ऋ॰ सं॰ भा॰ १

पिता भवासीति बोधि जुषस्व। केचित्सूर्योदयात्प्रागग्निहोत्रं जुह्वति केचिदुदिते तस्मिन्‌ जुह्वति तेषामुभयेषां पालयिता भवेत्यर्थः। तन्वा सुजात।
ज्वालापरिवृतेन शरीरेण सुष्ठु जात दीप्यमानः अथवा तन्वा सुजात आत्मनैव सुजात स्वयं स्वयंभूरित्यर्थः। तादृशस्त्वं मे मदीयं स्तोमं त्वं छंद
वा शस्त्रादिलक्षणं स्तोत्रं नित्यं जुषस्व। तत्र दृष्टांतः। जन्मेवेति यथा जन्म जनकः पिता। औरसं तनयं पुत्रं परिष्वंगादिभिः सेवते। तद्वदस्माभिः क्रियमा
णमिमं जुषस्व सेवस्व व्युष्टौ। उछी विवासे। तमो विवास्यतेनयेति करणे क्तिन्‌। पश्चादिनायत्वं। नादौ च नितिकृत्या वितिगतेः। प्रकृतिस्वरत्वं। गोपाः
गुपरक्षणे गुपूधूपविच्छिपणिपनिभ्य आय इति प्रत्ययः। तदंतात्‌ क्विप्‌। अतो लोप इत्यकारलोपः। लोपो व्योर्वलीति यलोपः। धातुस्वरः। जुष
स्व। जुषी प्रीतिसेवनयोरित्यस्य लोटि रूपं। निघातः॥२॥ अथ तृतीया॥ त्वं नृचक्षा वृषभानु पूर्वीः कृष्णास्वग्ने अरुषो वि भाहि॥ वसो नेषि च पर्षि
चात्यंहः कृधी नो राय उशिजो यविष्ठ॥३॥ वृषभ कामानां वर्षितः हे अग्ने नृचक्षाः नृणां मनुष्याणां शुभाशुभकर्मणो द्रष्टा कृष्णासु रात्रिषु अरु
षः आरोचमानस्त्वं अनुक्रमेण पूर्वीर्बह्वीर्ज्वाला विभाहि विशेषेण प्रकाशय वसो सर्वस्य प्रकाशप्रदानेन स्वस्वस्थानेषु वासयितः अग्ने त्वं नो
अस्मान्‌ नेषि कर्मानुरूपफलानि च प्रापय। अस्माकं दारिद्र्यलक्षणं पापं अतिपारयेति यावत्‌। किं च यविष्ठ युवतम हे अग्ने नो अस्मान्‌ राये
धनाय उशिजः कामयमानान्‌ कृधि कुरु। अभिलषितफलप्रदानेन आप्तकामान्‌ कुर्वित्यर्थः। नृचक्षाः चक्षिङ्‌ व्यक्तायां वाचि। अयमत्र दर्शने
वर्तते। असुन्नित्यनुवृत्ते चक्षेर्बहुलं शिच्चेत्यसुन्‌। शिद्वद्भावात्‌ ख्याञादेशाभावः। कृदुत्तरपदप्रकृतिस्वरः। वृषभ। वृषसेचने। अभजित्यनुवृत्तौ
ऋषिवृषिभ्यां किदिति अभच्‌। कित्वात्‌ गुणाभावः। अपादादित्वान्निघातः। पूर्वीः पुरुशब्दस्य वोतो गुणवचनादिति ङीष्‌। आद्यस्योकारस्य दीर्घः छांद

राम
२३

सः। प्रत्ययस्वरेणांतोदात्तत्वं। भाहि। अतभोविनत्यर्थः। लोटि रूपं। वसो। वस निवासे। उ इत्यनुवृत्तौ। शृस्वृस्निहित्रप्यसिवसी इत्यादिना उ प्रत्ययः। पादादित्वा
न्न निघातः। षाष्ठिकमाद्युदात्तत्वं। नेषि। णीञ्‌ प्रापणे। छंदसीति शपो लुक्‌। आमंत्रितं पूर्वमविद्यमानवदिति आमंत्रितस्य विद्यमानत्वेन पादादित्वान्न नि
घातः। पर्षि। पॄ पालनपूरणयोः। चादिषु चेति न निघातः। कृधि। डुकृञ्‌ करण इत्यस्य लोटि सेर्हिः। तस्य श्रुशृणुपृकृवृभ्यश्छंदसी
ति धिरादेशः। बहुलं छंदसीति शपो लुक्‌। पादादित्वान्न निघातः। राये। रातेर्डैरिति डै प्रत्ययः। ऊडिदमित्यादिना विभक्तेरुदात्तत्वं। उशिजः। वश कांतौ
वशेः किच्चेति इजि प्रत्ययः। कित्त्वात्‌ संप्रसारणं। प्रत्ययस्वरः। यविष्ठ। युवन्‌शब्दादतिशायने इष्ठन्‌ प्रत्ययः। स्थूलदूरयुवेत्यादिना यणादिपरस्य लोपः पू
र्वस्य गुणः। आमंत्रितत्वान्निघातः॥३॥ अथ चतुर्थी॥ अषाळ्हो अग्ने वृषभो दिदीहि पुरो विश्वाः सौभगा संजिगीवान्‌। यज्ञस्य नेता प्रथमस्य पा
योर्जातवेदो बृहतः सुप्रणीते॥४॥ हे अग्ने अषाळ्हः शत्रुभिरसोढः अपराजितः स्वयं शत्रून्‌ जयतीत्यर्थः। वृषभः कामानां वर्षयिता एवंभूतस्त्वं विश्वाः
सर्वाः पुरः शत्रूणां पुरीः सौभगा तत्रत्यानि शोभनानि धनानि च संजिगीवान्‌। सम्यग्‌ जयन्‌ दीदिहि सर्वतो ज्वलाभिर्दीप्यस्व। सुप्रणीते शो
भनप्रणयन जातवेदः जातप्रज्ञ हे अग्ने बृहतः उपदिष्टादिविधिनेति कर्तव्यताकलापेन महतः पायोः स्वर्गफलप्रदानेन रक्षकस्य प्रथमस्य मुख्यस्य या
प्रथमं क्रियमाणस्य एष वाव प्रथमो यज्ञो यज्ञानां यज्ज्योतिष्टोम इति श्रुतेः। तादृशस्य ज्योतिष्टोमाख्यस्य यज्ञस्य नेता हविर्वहनदेवताह्वानादिक्रियायाम नि
र्वाहको भव। अषाळ्हः। षह मर्षण इत्यस्य निष्ठायां हो ढ इति ढकारः। झषस्तथोर्धोध इति क्तस्य धकारः। ढलोपे कृते ढ्रलोपे पूर्वस्य दीर्घ इति दीर्घः। उत्वा
भावश्छांदसः। सहेः साडः स इति सकारस्य मूर्धन्यादेशः। अव्ययपूर्वपदप्रकृतिस्वरेण नञ्स्वरः। वृषभः। वृषसेचने। ऋषिवृषिभ्यां किदित्यभच्‌। चित्स्वरः। दि

ऋ·सं·भा·१

दीदिहि। दिवुक्रीडादावित्यस्य उकालोडो मध्यमैकवचने संज्ञापूर्वको विधिरनित्य इत्यभ्यासस्य गुणाभावः। सर्वे विधयश्छंदसि विकल्प्यंत इति पूर्वस्य अस्या
सिद्धमित्यस्याप्रवृत्तौ परत्वाद्द्व्येतिदीर्घत्वं। पश्चाद्धलोपः। सोभगा सुभगान्मेवइति उक्तावादिषु पाठाद्वार्थे ध्येम्। हङ्गास्संश्रुते इति पूर्वपदस्य वृद्धिः।
उत्तरपदस्य वृद्धिर्भवति। सर्वविधीनां छंदसि विकल्पितत्वात्। सुपां सुलुगिति सुपो डादेशः। तेन च सो भाग्येन धनान्युपलक्ष्यंते। नित्त्वादाद्युदात्तः। संजि
गीवान्। जि जये छंदसि लिट्। तस्य क्वसुः। सन्लिटोर्जेरिति कवर्गादेशः। प्रत्ययस्वरः। दीर्घश्छांदसः। पायो पा रक्षणे। कृवापाजिमीत्यादिना उण् प्रत्ययः।
आतो युक्चिण्कृतोरिति युगागमः। प्रत्ययस्वरः॥ ॥ अथ पंचमी॥ ॥ अच्छिद्रा शर्म जरितः पुरूणि देवाँ अच्छा दीद्यानः सुमेधाः। रथो न सस्निरभि व
क्षि वाजमग्ने त्वं रोदसी नः सुमेके॥ ॥ जरितः सर्वस्य जगतो नकाले जरयितः। हे अग्ने सुमेधाः शोभनप्रज्ञोपेतः दीद्यानः स्वतेजसा प्रकाशमानः त्वं दे
वान् यष्टव्यान् अच्छ अभिलक्ष्य तदुद्देशेन क्रियमाणानि पुरूणि शर्म स्वर्गादिसुखसाधनभूतान्यग्निहोत्रादीनि कर्माणि अच्छिद्रा अच्छिद्राणि छिद्र
त्कर्मसु धनवैकल्यराहित्येन संपूर्णानि कुरु। किंच हे अग्ने त्वं सस्निः सस्निरुद्धस्त्वदीयं सततगमनं संनिरुध्य हविःप्रक्षेपपर्यंतमत्र वर्तमानस्त्वं वा
जं अन्नमस्माभिर्दीयमानं हविर्लक्षणमन्नं अभि देवानभिलक्ष्य वक्षि वह प्रापय। तत्र दृष्टांतः। रथो न रथ इव। वेथारथो धान्यादिकं यद्वा त्वामिमं प्राप
यंति तद्वत्। किंच इमे रोदसी द्यावापृथिव्यौ सुमेके शोभनरूपे ते स्वकीयप्रभाभिः प्रकाशयुक्ते कुरु। दीद्यानः दीदेतिर्दीप्तिकर्मा तानच्। छांदसं अभ्य
स्तानामादिरित्याद्युदात्तत्वं। सुमेधाः। नित्यमसिच् प्रजामेधयोरित्यसिच् प्रत्ययः। बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं।
सस्निः। षच समवाये। अस्मादौणादिको निः। नित्त्वादाद्युदात्तः। वक्षि वह प्रापणे। अस्य लोट्। सिपि बहुलं छंदसीति शपो लुक्। ढत्वकत्वे। हेरादेशः। छां राम २४

॥ वि पाजसा पृथुना शोशुचानो बाधस्व द्विषो रक्षसो अमीवाः॥ सुशर्मणो बृहतः शर्मणि स्यामग्नेरहं सुहवस्य प्रणीतौ॥ ॥ उत्कीलः कात्य इति। हे अ
ग्ने पृथुना विस्तीर्णेन पाजसा तेजसा शोशुचानः अत्यर्थं दीप्यमानस्त्वं द्विषः कर्मानुष्ठानविघ्नकारिणः शत्रून् बाधस्व विशेषेण नाशय। अथ अमीवाः।
रोगराहित्येन सामर्थ्यपितान् रक्षसः उभयत्र सुप्प्रत्ययः। तान् रक्षांसि बाधस्व। कर्मविघ्नकारिणीस्तान्यपनुदस्वेत्यर्थः। अमीवाः अ अभिमुख्येन
अमनं उपरागमनपराः पिशाचिकाश्च बाधस्व। सुशर्मणः स्वर्गादिलक्षणः शोभनसुखदेवतो बृहतो महतः शत्रुविजयेन प्राप्नुमहि सुहवस्य शोभनाह्वानो
पेतस्याग्नेः शर्मणि अस्माकं सुहव तो प्रणीतौ। उत्तरवेद्यादिस्थानेषु प्रणयने कर्तव्ये तं नयनं तत्र तत्र आनय प्रक्षेप। एवंभूतेन च प्रणयानत्र अहं स्यां
अग्निप्रणयनपूर्वके कर्मानुष्ठाने भवेयं। पाजसा पा रक्षणे। असुन्नित्यनुवृत्तौ पातेर्बले जुट् चेत्यसुन् जुडागमः। नित्त्वादाद्युदात्तः। पृथुना। प्रथ प्रख्या
ने। उदित्यनुवृत्तौ प्रथिम्रदिभ्रस्जां संप्रसारणमिति प्रत्ययः। तत्संनियोगेन संप्रसारणं। प्रत्ययस्वरः। शोशुचानः। शुच दीप्तावित्यस्य यङ्लुकि गु
णो यङ्लुकोरित्यभ्यासस्य गुणः। व्यत्ययेन शानच्। चर्करीतं चेत्यदादिवद्भावाच्छपो लुक्। चित्वादंतोदात्तत्वे प्राप्ते अभ्यस्तानामादिरित्याद्युदात्तत्वं। बा
धस्व बाधृ लोडने इत्यस्य लोटि रूपं। पादादित्वान्निघाताभावः। सुशर्मणः शृ हिंसायां दुःखं शृणातीति उणादिको मनिन्। सोर्म
नसी इत्युत्तरपदाद्युदात्तत्वं। स्यां अस भुवीत्यस्य लिङि यासुट् परस्मैपदेष्वित्यादिना यासुट्। तिङ्क्षु सस्लोप इति सलोपः। यासुटो ङित्वान्नश्नसो
रल्लोपः। निघातः॥ ॥ अथ द्वितीया॥ ॥ त्वं नो अस्या उषसो व्युष्टौ त्वं सूर उदिते बोधि गोपाः। जन्मेव नित्यं तनयं जुषस्व स्तोमं मे अग्ने तन्वा सुजात॥
॥ हे अग्ने त्वं अस्याः अद्य वर्तमानायाः उषसः व्युष्टौ व्युच्छने प्रकाशने सूरे सूर्ये उदिते उदये सति नः अग्निहोत्रादिकर्मणि प्रवृत्तानामस्माकं गोपाः गोपा

ऋ.सं.भा.१

रायो धनस्येशे ईष्टे पुत्रपश्वाद्युद्देशेन क्रियमाणकर्मफलसंपादकत्वेन तत्स्वामित्वात् तथा एवंभूतोऽग्निः वृत्रहत्यानां हननं हथा शत्रुभूतस्य पापविनाश
नामपीईष्टे त्वयि समर्पितकर्मणामस्माकं त्वत्प्रसादापेक्षया भावतीति तस्यापि स्वामी। ईशे ईश ऐश्वर्ये। अदादित्वाच्छपो लुक्। लोपस्त आत्मनेपदेष्वि
ति तलोपः। पादादित्वादनिघातः। सौभगस्य। सुभगस्य भावः सौभगं। उद्गात्रादित्वादञ्। सर्वविधीनां। नोछंदसि विकल्पितत्वा दचहृद्भगसिंध्वंते
त्यादिना प्रथमाया उत्तरपदवृद्धेरभावः। रायः। ऊडिदमित्यादिना विभक्तेरुदात्तत्वं। ईशे निघातः। स्वपत्यस्य। नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। वृत्र
हथानां। वृत्रवर्जने। अस्मात् स्फायितंचिवंचीत्यादिना रक्प्रत्ययः। कित्वान्न गुणः। हथानां। हन हिंसागत्योः। इत्यस्मात् हनिकुषिनीरमिकाशिभ्यइ
ति थन्। कित्वादनुनासिकलोपः। कृदुत्तरपदप्रकृतिस्वरः॥ ॥अथ द्वितीया॥ ॥इमं नरो मरुतः सश्चतानु वृधं यस्मिन्रायः शेवृधासः॥ अभि ये संति
पृतनासु दूढ्यो विश्वाहा शत्रुमादभुः॥ ॥नरः कर्मणां नेतारः हे मरुतो देवा यूयं वृधं पञ्चपुत्रादिवर्धकं। इममस्माभिः स्तूयमानमिममग्निं सश्चत ह
विरातयनार्थं सेवध्वं। कीदृशास्ते मरुत इत्याकांक्षायामाह यस्मिन्देवे। रायो धनानि शेवृधासः दानभोगाद्युपयोगेन सुखस्य वर्धकानि संति ये च
देवाः पृतनासु सेनासु तत्र दुराधितेषु संग्रामेषु विश्वाहा दुष्टधनोपेतानात्मनो द्वेष्टॄन् आदभुः आदभ्नुवंति हिंसंति एवंभूतास्ते सर्वे मरुतो यूयं तं राम
मिममग्निं सेवध्वमिति पूर्वेणान्वयः। सश्चत। षच संगे इत्यस्माल्लोटि रूपं। जकारस्य व्यत्ययेन चकारः। निघातः। शेवृधासः। वर्णव्यत्ययः। शं सुखं वर्ध २५
नीति। असुनित्यसुन्। गुणाभावश्छांदसः। गतिकारकयोः पूर्वपदप्रकृतिस्वरत्वं चेत्यौणादिकसूत्रात् पूर्वपदप्रकृतिस्वरत्वं। संति। असु भुवि। दूढ्यः। ध्यै
चिंतायां। अन्येष्वपि दृश्यते इति क्विप्। दुरिति प्रहरणार्थस्य प्रसारणं। दुरो दाशनाशदभध्येषूत्वं वक्तव्यं। उत्तरपदादेः ष्टुत्वं षत्वडत्वढत्वे। छंदस्युभयथेति

आसि इत्यादेशे आधित्वाय यणादेशः। कृदुत्तरपदप्रकृतिस्वरेणोदात्तः। असुः। सुप्रादनुदात्तत्वे कृते उदात्तस्वरितयोर्यण इति आसः स्वरितत्वं। आदभुः।
दंभु दंभे। अस्माल्लुङि सिरूपं। ग्रंथिग्रंथिदंभिस्वंजीनामुपसंख्यानमिति किद्भावादनुनासिकलोपः। द्विर्वचनप्रकरणे छंदसि वेति वक्तव्यमिति द्विर्वच
नाभावः। सतिशिष्टस्वरो बलीयानिति प्रत्ययस्वरः॥ ॥अथ तृतीया॥ ॥स त्वं नो रायः शिशीहि मीढ्वो अग्ने सुवीर्यस्य। तुविद्युम्न वर्षिष्ठस्य प्रजावतो
नमीवस्य शुष्मिणः॥ ॥ हे अग्ने स तथाविधस्त्वं नोस्मान् रायः तृतीयार्थे षष्ठी धनेन शिशीहि तीक्ष्णान् कुरु। अस्मान् धनसमृद्धान् कुरु। किंच तुविद्यु
म्न बहुधनोपेत अत एव मीढ्वः मीढ्वन् कामानां सेक्तः हे अग्ने स त्वं वर्षिष्ठस्य वृद्धतमस्य प्रभूतस्य प्रजावतः अपत्ययुक्तस्य अनमीवस्यारोग्यहेतोः अ
न एव शुष्मिणः बलहेतोः सुवीर्यस्य शोभनसामर्थ्ययुक्तस्यान्नयुक्तस्य सैवंविधेनोस्मान् कुरु। यद्वा एतत्सर्वं रायो विशेषणं तथा योजनीयं एताः षष्ठ्यस्तृ
तीयार्थे। एतदुक्तं भवति। धनेनापत्यारोग्यशरीरबलोग्यतयाते नान्नेन चास्मान् समृद्धान् कुर्विति। शिशीहि शोतिं शासन इत्यस्य लङि बहुलं छंदसीति
विकरणस्य श्लुः। वा छंदसि विकल्पेन ङित्वाद् इत्वं नस्येति हेर्धिरादेशो न भवति। दीर्घश्छांदसः। निघातः। मीढ्वः। मिह सेचने इत्यस्य दाश्वान् साह्वान् मीढ्वान्
मीढ्वांश्चेति निपातनात् क्वसुः। उपधादीर्घश्च संबुद्धौ नुमि कृते हल्ङ्यादिलोपे रेरसंयोगांतलोपे च कृते मतुवसो रु संबुद्धौ छंदसीति रुः। पादादित्वादाद्युदात्तः।
॥अथ चतुर्थी॥ ॥चक्रिर्यो विश्वा भुवनाभि सासहिश्चक्रिर्देवेष्वा दुवः। आ देवेषु यतत आ सुवीर्य आ शंस उत नृणां॥ ॥ योयमग्निः चक्रिः सर्वस्य जग
तः कर्ता स च विश्वा भुवना विश्वानि भुवनानि अभि विजातितत्त्वहातदेवा शुभा विशादिति श्रुतेः। चक्रिणः कर्तासोऽग्निः सासहिः पुरोडाशादिहविर्भरि
सहनशीलः स च दुवः अस्माभिर्दत्तं हविः देवेषु यजनीयदेवेषु आयतते। स चाग्निः देवेषु देवनशीलेषु स्तोतृषु आयतते। आभिमुख्येन गच्छति। उत अ

पिबन्नृणां यज्ञस्य नेतॄणां शाण्डिलं । शंसनं । शंस्यं तस्मिन्सोमिं आगच्छति । तथा नृणां मनुष्याणां सुवीर्यं शोभनवीर्योपेतं पुत्रं एतद्रक्षणार्थमागच्छति । अनेनाग्नेः स
र्वव्यापकता प्रतिपादिता भवति । वृक्किः । डुकृञ् करणे । आदृगमहनजन किकिनौ लिट् चेति किन्प्रत्ययः । लिड्वद्भावाद्द्विर्वचनं । कित्वाद्गुणाभावः । नित्स्वरः । सासहिः । स
हमर्षण इत्यस्माद्यङंतात्सहिवहिचालिपतिभ्यो यङंतेभ्यः किकिनाविति किः प्रत्ययः स्वरः । यतते यती प्रयत्ने यत्नयोगादनिघातः । शंसे भावे घञ् । ञित्स्वरः । शं
स्यं नृ चेति विकल्पेन दीर्घाभावः । नामन्यतरस्यामिति विभक्तेरुदात्तत्वं ॥ ॥ अथ पंचमी ॥ ॥ मा नो अग्नेऽमतये मावीरतायै रीरधः । मागोतायै सहसस्पुत्र मा नि
देऽप द्वेषांस्या कृधि ॥ ॥ सहसस्पुत्र बलस्य पुत्र हे अग्ने त्वं नो अस्मान् अमतये शत्रुभूतया दारिद्र्याय मा रीरधः संसिद्धान्विषयभूतान्मा कुरु । किंच नो अस्मा
न् निदे निंदाय विषयभूतान् मा विधेहि । तथा त्वं द्वेषांसि कर्मपरो निमित्तान् द्विषान् अप कृधि अपाकुरु निवारय । अवीरतायै । अस्य सती नि वीरः अर्श आदि
त्वादच् । तस्य भावः वीरता । तस्य भावस्त्वतलौ । नवीरता । अवीरता नञः स्वरे प्राप्ते परादिश्छंदसि बहुलमिति तस्योत्तरपदस्यादेरुदात्तत्वं सततम् । रीरधा राधसा
धसंसिद्धौ । अस्मात्पंचम्यां छांदसे लुङि णिचि सन् भ्य इति । चङ् च ऊदेशः । णेरनिटीति णिलोपः । रागेवद्रुपधाया इति । उपधाह्रस्वः । चङीति द्विर्वचनं सन्व
ल्लघुनि चङ्परे इति सन्वद्भावः । सन्यत इत्यभ्यासस्यत्वं । तस्य दीर्घो लघोरिति दीर्घः । नमाङ्योग इत्यडभावः । निघातः । आगोतायै गोशब्देन गोमाल्लक्ष्यते । नगो अ
गोः अगो अगो भवितः । अगोता तस्य भावस्त्वतलौ । लित्स्वरः । सहसस्पुत्र । सुबामंत्रिते पराङ्गवद्भावात् । सहसस्पुत्र इत्येतयोः सर्वानुदात्तत्वं । निदे । णिदि कु
त्सायां । अस्मात्संपदादित्वाद्भावे क्विप् । अनित्यमागमानुशासनमिति नुमभावः । सावेकाच इति विभक्तेरुदात्तता ॥ ॥ अथ षष्ठी ॥ ॥ ॥ शग्धि वाज
स्य सुभग प्रजावतोऽग्ने बृहतो अध्वरे ॥ सं राया भूयसा सृज मयोभुना तुविद्युम्न यशस्वता ॥ ॥ सुभग शोभनधनोपेत हे अग्ने त्वं अग्ने त्वं अस्माभिः क्रियमा

दसत्वं न भवति ॥ ॥ अथ षष्ठी ॥ ॥ प्रपीपय वृषभ जिन्व वाजानग्ने त्वं रोदसी नः सुदोघे । देवेभिर्देव सुरुचा रुचानो मा नो मर्तस्य दुर्मतिः परि ष्ठात् ॥ ॥ वृषभ का
मानां वर्षितः हे अग्ने त्वं अस्माकं प्रपीपय अभिलषितफलानि वर्धय । वाजान् अन्नानि च जिन्व प्रयच्छ । किंच देव दीप्यमान हे अग्ने सुरुचा शोभनदीप्त्या
रुचानः शोभमानस्त्वं देवेभिर्यजनीयैर्देवैः सहितः अस्माकं रोदसी इमे द्यावापृथिव्यौ सुदोघे वृष्टिद्वारा अभिमतफलप्रदानेन सुष्ठु दोग्ध्र्यौ कुरु । तथा
मर्त्यस्य शत्रोर्दुर्मतिः दुष्टबुद्धिप्रयुक्तोऽभिभवनोऽस्मान्मा परिष्ठात् । परितो मा गच्छतु । पीपय । पीपानेत्यस्य ण्यंतस्य लुङि द्विर्वचनाभ्यासदीर्घत्वे । सिपो लो
पश्छांदसः । जिन्व । अवि जिवि प्रीणनार्थः । एतस्य लोटि इदित्वान्नुम् । शप् । आतो हेरिति हेर्लुक् । आमंत्रितस्याविद्यमानत्वेन अतिङ उत्तरत्वाभावा
त् निघातः । सुदोघे दोहनं दोघः भावे घञ् । कुत्वं छांदसं । आद्युदात्तं । छंदसी सुदोघे उत्तरपदाद्युदात्तत्वं । दुर्मतिः । मनु अवबोधने मन्यत इति मतिः । बुद्धिः
कर्तरि क्तिच् । दुष्टबुद्धिः । अव्ययपूर्वपदप्रकृतिस्वरे प्राप्ते कृदुत्तरपदप्रकृतिस्वरत्वं ॥ ॥ अथ सप्तमी ॥ ॥ इळामग्न इति ॥ ॥ उतो पितृभ्यामित्यस्मिन्वर्गे व्या
ख्यातेयमृक् ॥ ॥ इति तृतीयस्य प्रथमे पंचदशो वर्गः ॥ ॥ अयमग्निरिति षळर्चं चतुर्थं सूक्तं आग्नेयं । अत्रानुक्रमणिका । अयमग्निः षागाथं । उत्कील
इति तु शब्दप्रयोगादस्यापि सूक्तस्य स एव ऋषिः । अत्र विषमसंख्यानामृचां बृहती छंदः । तृतीयपादस्य द्वादशस्य द्वादशाक्षरत्वात् । समसंख्यानां तु सतो
बृहती प्रथमतृतीयपादयोर्द्वादशाक्षरत्वात् । उक्तं च । अयुजौ जागतौ सतोबृहतीति ॥ ॥ तस्मिन्सूक्ते प्रथमा ॥ ॥ अयमग्निः सुवीर्यस्येशे महः सौभगस्य ॥
राय ईशे स्वपत्यस्य गोमत ईशे वृत्रहथानां ॥ ॥ उत्कील ऋषिः स्तौति ॥ अयं यजनीयत्वेनांगुल्या निर्दिश्यमानोऽग्निः सुवीर्यस्य शोभनसामर्थ्योपेतस्य महो म
हतः सौभगस्य सौभाग्यस्य ईश्वरो भवति । सर्वस्य बलारोग्यहेतुतया सौभाग्यकारित्वात् । तथा गोमतः गवादिपशुयुक्तस्य स्वपत्यस्य शोभनापत्यस्य

तृ॰ संध्री १

भन यज्ञोपेतः एवंभूतोग्निः देवानस्माभिर्यजनीयान् देवान्यथायष्टु अक्तुभिरंजनसाधनैर्घृतादिभिः सम्यगज्यते सम्यक् सिच्यते। प्रथमा। सुपां सुलु
गिति सुपा डादेशः। धर्म धारण इत्यस्मादन्येभ्योपि दृश्यत इति मनिन्। कृत्स्वरत्वं छांदसं। नित्स्वरः। अक्तुभिः। अंजू व्यक्तिम्रक्षणकान्तिगतिषु। अज्यते भिरिति वास्म
दौर्दसीत्याद्युदात्तः। तिस्रः। त्रिशब्दस्य स्त्र्यर्थे। त्रिचतुरोः स्त्रियामिति तिसृ त्यादेशः। अचि र ऋत इति रेफादेशः। तिसृभ्यो जस इति विभक्तेरुदात्तत्वं। आ
जानीः जन जनने। जनिघसिभ्यामिणिति कर्त्तरि इण्। णित्वादुपधावृद्धिः। वा छंदसीति सवर्णदीर्घः। कृदुत्तरपदप्रकृतिस्वरः। अवः। अव रक्षणे। असुनि
त्यसुन्नित्स्वरः। यक्षि। यजेर्दानार्थस्य लेटि रूपं। यजमानाय कं अज्ञोः। कानेन्निति यजेः शानन्नुनित्स्वरः। योः। यु मिश्रणे इत्यस्मादन्येभ्योपि दृश्यन्त इति वि
च्। आर्द्धधातुकलक्षणो गुणः। कृदुत्तरपदप्रकृतिस्वरः॥ ॥ अथ चतुर्थी॥ ॥

राम
२१

॥ अथ चतुर्थी ॥ ॥ अग्निं सुदीतिं सुदृशं गृणंतो नमस्यामस्त्वेड्यं जातवेदः। त्वां दूतमरतिं हव्यवाहं देवा अकृण्वन्नमृतस्य नाभिं ॥ ॥ जातवेदः जातस्य स
र्वस्य वेदितः। हे अग्ने गृणंतः। त्वद्विषयां स्तुतिं कुर्वाणाः वयं अग्निं अंगनादिगुणोपेतं सुदीतिं शोभनदीप्तिं अत एव सुदृशं सर्वैः सुदर्शनं ईड्यं स्तुत्यं ए
वंविधं त्वां नमस्यामः। हविर्भिः पूजयामः। किंच देवाः अस्माभिर्यजनीया इंद्रादयो देवाः अरतिं। न विद्यते विषयेषु रतिः प्रीतिर्यस्यासावरतिः विषयेष्वस
क्तः अत एवामृतस्या देवान्नभूतायाः सुधाया नाभिं स्थानं त्वां तादृशं हव्यवाहं इत्थं अकृण्वन्। हविषां वोढारं इत्थमकृण्वन्। दूतो हि द्विविधः। वचनकारी का
र्यकारी चेति तत्र त्वां कार्यकारिणं दूतं कुर्युरिति भावः। सुदीतिं। दीङ् क्षये। दीयते विनाश्यते ध्वांतं आभिरिति करणे क्तिन्। दीयतोदीप्तयः। बहुव्रीहौ
न सुभ्यामित्युत्तरपदांतोदात्तत्वं। सुदृशं। दृशिर् प्रेक्षणे। तस्मात् कृच्छ्रार्थे खल्। संज्ञापूर्वको विधिरनित्य इति गुणाभावः। लितीति प्रत्ययात्पूर्वस्योदा
त्तत्वं। गृणंतः। गृणातिरर्चतिकर्मा। नमस्यामः। नमः पूजायां। नमोवरिवश्चित्रङः क्यजिति क्यच्। इदंता लटि रूपं। पादादित्वान्न निघातः। दूतं। दु
दु उपतापे। दुतनिभ्यां दीर्घश्चेति क्तः। नसाभियोन धातोर्दीर्घः। इतस्ततः संचारीत्यर्थः। प्रत्ययस्वरः। अरतिं। रमु क्रीडायां। भावे क्तिन्। अकृण्वन्।
कृवि हिंसाकरणयोः। नित्यस्य लङि धिन्विकृण्व्योरच्चेत्युप्रत्ययः। अकारस्यातादेशः। निघातः॥ ॥ अथ पंचमी॥ ॥ यस्त्वद्धोता पूर्वो अग्ने यजीयान्द्विता च

सन्ना स्वधया च शंभुः॥ तस्यानु धर्म प्रयजा चिकित्वोथानो धा अध्वरं देववीतौ॥ ॥हे अग्ने त्वत् त्वत्तोपि पूर्वः प्रथमभावी यजीयान् अतिशयेन यष्टा योयः
ऋ.वे.भा.१ कश्चिद्धोता होमनिष्पादकः द्विधा इदेषं मध्यमे वोत्तमत्वं स्वधया सोमाख्येनान्नेन सह सन्ता निषण्णः सन् शंभुः यष्टृणां सुखभूः भूत् द्वितीयपादमेवं व्या
ख्यो या ख्येया। द्विता च सत्तास्वधया च शंभुः इदेषं सतां मध्यमेव स्थानं उत्तमे च शंभुः सुखं भूरिति चिकित्वः धर्मविषये चेतनावान्। हे अग्ने तस्य
यात्वत्तोपि पूर्वभावी होता निरूपितः तस्य होतुः अनु धर्मं धर्मानुतेनानुष्ठित धर्ममनुपलक्ष्य प्रयज प्रकर्षेण देवान्पूजय। अथानंतरं हे अग्ने त्वं अ
स्माकं संबंधिनमध्वरमिमं यज्ञं देववीतौ देवानां प्रीत्यर्थं धा विधेहि। यजीयान् यजशब्दस्य तुछंदसीति इयसुन्तस्मिन् तुरिष्टेमेयस्स्विति तृचो लो
पः नित्वादाद्युदात्तत्वं। द्वितीय द्विशब्दात् संख्याया विधार्थे धेति धा प्रत्ययः धकारस्य नकारश्छंदसः प्रत्ययस्वरः सत्ता षद्लृ विशरणगत्यवसा
दनेषु अस्यताक्ष्ठो लिकरूपं निस्वरः स्वधया स्वर्गे लोके दधाति यजमानस्येति स्वधाः आतोनुपसर्गे क इति क प्रत्ययः कृदुत्तरपदप्रकृतिस्व
रः शंभुः शं सुखं अस्माद्भवतीति भूसत्तायां। विप्रसंभ्यो डुसंज्ञायामितं द्वादेरुपसंख्यानं तु प्रत्ययः डित्वाड्डिलोपः यज यजने लोटि रूपं चिकित्व
कित ज्ञान इत्यस्य क्वसो रूपं मतुवसोरुः संबुद्धौ छंदसीति वकारस्य कुः अथानः निपातस्य चेति दीर्घः डुधाञ् धारणपोषणयोरित्यस्य छंद राम
सेलुङि रूपं अडभावश्छांदसः देववीतौ देवानां वीतिरशनं यत्र प्रीतौ सा प्रीतिर्देवप्रीतिः वीकांत्यादिष्विति अस्मान्क्तिन् बहुव्रीहौ पूर्वपदप्रकृ २८
तिस्वरः॥ ॥इति तृतीयस्य प्रथमे सप्तदशो वर्गः॥ ॥भवानो अग्न इति पंचर्चं षष्ठं सूक्तं भवानइत्यनुक्रमणिका कृता वैश्वामित्रऋषिस्त्रिष्टुप् प्रयो
गश्चापि वैश्वामित्रकृतं ऋषिः अग्निर्देवता प्रातरनुवाकाश्विन शस्त्रयोरुक्तः सूक्तविनियोगः प्रवर्ग्ये अभिष्टवे भवानो अग्न इति द्वा विनियुक्तं

लोस्मिन्नग्निष्टोमादि कर्मणि रूहतो मतः प्रभृत्तस्य प्रजावतः अपत्योपेतस्य वाजस्यान्नस्य शग्धि ईशिषे तादृशमन्नमस्मिन्नध्वरे स्मभ्यं देहि किंच तुविद्युम्न
बहुधनयुक्त हे अग्ने मयोभू नाम मय इति सुखनाम शोभमय इति तन्नाम सुपाठात् तद्धानाद्युपयोग हेतुतया सुखस्य भावके न अत एव यशस्वतां कीर्तिम
तां भूयसा अतिप्रभूतेन रय्या एवं विधेन धनेनास्मान्संसृज संयोजय। शग्धि शक्लृ शक्तावित्यस्य लोटि बहुलं छंदसीति विकरणस्य लुक् हुझल्भ्यो हेर्धि
रिति विभक्तेरुदात्तत्वं भूयसा बहुशब्दात् द्विवचनविभज्योपपदे इति ईयसुन् बहोर्लोपो भू च बहोरिति ईयनः सर्वस्य लोपे शब्दे आदेः परस्येति प्रत्ययस्या
देलोपः बहोर्भूरादेशो नित्स्वरः स्रज स्रुज विसर्गे तुदादि लोटि रूपं मयोभुवा भूयसत्तायामित्यस्मादौणादिको डुप्रत्ययः तुविद्युम्न पादादित्वादनिघा
तः॥ ॥इति तृतीयस्य प्रथमे षोडशो वर्गः॥ ॥समिध्यमान इति पंचर्चं सप्तमं सूक्तं आग्नेयं त्रैष्टुभं विश्वामित्रस्य कतस्यार्षं तदुक्तं। समिध्यमानः पंच कतो
वैश्वामित्रस्त्विति॥ आहोते त्यादि सूक्तदशकस्य विनियोग उक्तः प्रातरनुवाकाश्विन शस्त्रयोरिति। तत्रेदं चतुर्थ वाजपेये बार्हस्पत्ये चरावग्निं सुदीति
मिति स्विष्टकृतो याज्या वाजपेयेनेत्यादि खंडे सूत्रितं अग्निं सुदीतिं सुदृशं गृणंत इति संयाज्ये इति॥ ॥तस्मिन्सूक्ते प्रथमा॥ ॥समिध्यमानः प्रथमा
नु धर्मा सम क्तुभिर्ज्यते विश्ववारः। शोचिष्केशो घृतनिर्णिक्पावकः सुयज्ञो अग्निर्यजथाय देवान्॥ ॥कतः स्तौति। कर्मधारिणा धर्मा अग्नेर्यजमानेर्वाह
कतया तद्वारकत्वात् धर्माग्निः तथा च मंत्रः धर्मणामग्निं विदथस्य साधनमिति। तादृशोग्निः प्रथमा प्रथमं यज्ञोपक्रमे अनु अध्यायतनेषु अनुक्रमे
णसमिध्यमानः सम्यक्प्रज्वाल्यमानः यद्वा अनु धर्म धर्मसाधन भूतेषु यज्ञेषु प्रथमं समिध्यमानः विश्ववारः विश्वैः सर्वैर्यजमानैर्यद्धव्यतया वरणीयः
शोचिष्केशः शोचींषि ज्वालाः केशा यस्य स तथोक्तः घृतनिर्णिक् घृतस्य तापन द्वारा विलयनेन शोधकः पावकः अस्मत्पापशोधकः पावकः सुयज्ञः शो

यथा भवति तृष्यातपोतपोच्यबोधयत्व। किंच। अररुषः। नु भ्यंहविरप्रयच्छतः अतएव परस्य शत्रु भूतस्य स्वन्नोसं अभिला षंतपक्षपयवसोसर्वस्य वा
ऋ॰सं॰भा॰२ सथितः हे अग्ने चिकितानः कर्मभिरस्व अविता सत्कर्मण्यनोस क्रमनन्पुरुषान्तपसोमनतपयस्मादेवं तस्मात्तिवर अमयः अजराजरारहिताः अनिबे
धरहिताः अतएव अयासः सर्वत्र गमन स्वभावाः त्सनोवितिष्ठतो विशेषेण तिष्ठंतु। तपउणुणः। उत्तमवलंब्य उत्त इति प्रगृह्यसंज्ञा। पादादित्वादनिघा
तः। तप। तपसंतापइत्यस्य लोटिरूपं। छ्यचोतस्त्रिङः इति संहितायां दीर्घः। अररुषः। रादान इत्यस्य क्वसो। वस्वेकाजिति प्राप्तस्येटः संप्रसारणे। सं
प्रसारणाश्रयं चलीय इति संप्रसारणबलीयस्त्वान्निवृत्तिः। वसोः संप्रसारणमिति संप्रसारणं। समासेन सत्स्वरः॥ ॥ अथ तृतीया॥ ॥ इध्मेनाग्न
इच्छमानो घृतेन जुहोमि हव्यं तरसे बलाय॥ यावदीशे ब्रह्मणा वंदमान इमां धियं शतसेयाय देवीं॥ ॥ हे अग्ने इच्छमानः धनं कामयमानोहं यनमा
नइध्मेन समिंधनकारी समिल्समोहेन घृतेनाज्येन सह हव्यं हवनयोग्यं हविः पुरोडाशादिकं जुहोमि। किमर्थं तरसे वेगाय तवसततगमनसिध्य
र्थं बलाय सामर्थ्याय पुरोडाशादिहविर्भिरवहनसिध्यर्थं त्वयि हविः प्रक्षिपामि किंच ब्रह्मणा स्तोत्रेण वंदमानस्त्वां वंदनमहं यावदीशे दानेवोदु राम
शक्तो भितावद्देहि। त्वं च इमां अस्माभिः क्रियमाणां धियं त्वद्विषयीं स्तुतिं शतसेयाय अपरिमितधनपर्यवसानाय देवीं दीप्तां अतिप्रभूतां कुरु। इध्मे
तेनेधाग्निरितिइध्मो काष्ठविशेषः। इति युधिदसिरूपाधूसूभ्यो मगिति करणे मक्। किलादत्तुनासिकलोपः। प्रत्ययः स्वरः। इच्छमानः। इषु इच्छायां। २९
व्यत्ययेन शानच। इषुगमियमां छः इति छकारः। जुहोमि। हुदानादनयोः प्रत्ययस्य लिटि रूपं। पादादित्वादनिघातः। हव्यं हवनमर्हतीति छंदसि च
निप्रत्ययः। भसंज्ञायां यस्येति लोपः। प्रत्ययः स्वरः। यावत्। यच्छ इत्यत्र यत्तदेवेभ्यः परिमाणे वतुपितिवतुप्। आसर्वनाम्न आकारः। आद्युदात्तः। ई

शे। ईशऐश्वर्य इत्यस्य लुङुत्तमैकवचने इटः। टेरेत्वं। आदित्वाछपोलुक्। शतसेयाय। षोतकर्मणि। आदेच उपदेशेशितीत्यात्वं। अचोयदित्ति भावेय
त्। इयतीतिईत्वं। आर्धधातुकलक्षणो गुणः। कृदुत्तरपदप्रकृतिस्वरः॥ ॥ अथ चतुर्थी॥ ॥ उच्छोचिषा सहसस्पुत्र स्तुतो बृहद्वयः शशमानेषु
धेहि॥ रेवदग्ने विश्वामित्रेषु शं योर्मर्मृज्मा ते तन्वं भूरि कृत्वः॥ ॥ सहसस्पुत्र हे अग्ने शोचिषा स्वकीय शंसनं कुर्वाणेषु विश्वामित्रेषु। विश्वं मित्र
मास्यति विश्वामित्रः एकस्मिन् बहुवचनपूजार्थं तथाविधेष्वस्मासु रेवधनयुक्तं बृहत् प्रभूतं वयः वयः। शंश्ले त्रवाची अर्धं वक्ष अत्यत्र नाम
सु यपठितत्वात्। तादृशं प्रभूतमन्नं धेहि। किंच शरोगाणा यश्च मनं वास्मासु धेहि। यो मे संभयानां अमिश्रणं च धेहि। शमन रोगा णांयावनं च भ
यानामिति यास्कः। कृत्वः अस्माभिः क्रियमाणस्य कर्मणः प्रयोजकत्वेन वर्त्तः। हे अग्ने तेनवतन्तुं भूरि बहूवारं मर्मृज्म। पुनः पुनः सोमाज्यपयः प्रभृ
तिभिर्वर्धयिसिं चाम॥ शशमानेषु। शशप्लुगताविति अयं धातुस्तस्तुत्यर्थः। ताच्छील्यवयोवचनशक्तिषुचितिचानश। चितद्रूत्यन्तोदात्तत्वं। धेहि। डुधाञ् धार
णपोषणयोरित्यस्य लोटिरूपं। रेवत्। रयिरस्यास्तीति मतुप्। छंदसीरः इति मत्तुप्यवतिमनुषउदात्तत्वं। छंदसीइति तस्य वत्वं। रयेसीतो बहुलं छंदसीति संप्रसार
णे। परत्वं गुणः। विश्वामित्रेषु। मित्रे चर्षाविति तस्यपूर्वति पूर्वपदस्य दीर्घत्वं। बहुव्रीहौ विश्वं संज्ञायामिति पूर्वपदांतोदात्तत्वं। मर्मृज्म। मृजूशुद्धावित्य
स्य वर्तमान लोटि उत्तमबहुवचने मसोमादेशः। आदित्याभागभत्रासनामिती इ भावः। रेफश्छांदसः। पादादित्वादनिघातः। प्रत्ययः स्वरः। भूरि। भूसत्ता
यां। आदि शादिभ्य उम्भिभ्यः क्रिन्निति किन्। कित्वाद्गुणाभावः। कृत्वः कुकरणे। संपदादित्वात् क्विप्। तदस्यास्तीति मतुप्। कृत्य इति तस्य वत्वं। वसोम
त्वर्थ इति भसंज्ञायां नकारस्य जश्त्वभावः। मतुवसोरुदिति भकारस्य रुत्वं॥ ॥ अथ पंचमी॥ ॥ कृधि रत्नं सुसनितर्धनानां स घेदग्ने भवसि यत्समिद्धः।

ऋ॰ सं॰ भा॰ २

स्तोतुर्दुरोणे सुभगस्य रेवत्सृप्रा करस्ना दधिषे वपूंषि॥ ॥सुसनितः अभिलषित धनानां सुष्ठु दातः। हे अग्ने धनकनकाश्वादीनां मध्ये रत्नं उत्तमं
धनं दधिषे विधेहि। मह्यं दत्स्वेत्यर्थः। यदा त्वं समिद्धः सोमाज्यादिभिः सम्यगिद्धो दीप्तो वर्तते। तदा स इत्। सनाहृ इदं एव त्वं धनस्य दाता खलु। किंच सुभगस्य
सद्भिषयस्कृत्या शोभन धनयुक्तस्य स्तोतुर्यजमानस्य दुरोणे गृहे सृप्रा प्रसर्पणशीलौ कर्मकरणार्थं प्रसृतौ करस्ना कर्मणां प्रस्नातारौ बहू कर्म
णां प्रस्नातारौ इति यास्कः। वपूंषि रूपाणि वपीवपु इति रूपनामसु पठितत्वात्। तादृशो बहू भास्वराणि ज्योतींषि च रेवत्। धनयुक्तं यथा भवति तथा
दधिषे धारयसि सुसनितः। षणु दाने इत्यस्य तृचि रूपं। आमंत्रितनिघातः। सृप्रा। सृप्रगतौ। अस्मात् स्फायितंचिवंची इत्यादिना रक्। कित्वादगुणः।
प्रत्ययःस्वरः। करस्ना। करोतीति करः कर्मण्यवा घञः। कर्मस्नाऔ धनं ययोस्तौ यद्वा कर्मणां धनेया स्नामिति बहुव्रीहौ पूर्वपदस्वरः। दधिषे। डु
धाञ् धारणपोषणयोः इत्यस्य लिटि छंदस्युभयथेति थास आर्धधातुकत्वादिट्। अनौ लोपान्निघातः॥ ॥इति तृतीयस्य प्रथमे ऽष्टादशो वर्गः॥
॥अग्निं होतारमिति पंचर्चं सप्तमं सूक्तं। त्रैष्टुभमाग्नेयं गाथिन आर्षं। तथा चानुक्रांतं। अग्निं होतारं गाथी हे ति प्रातरनुवाकाश्विन शस्त्रयोरुक्तो वि
नियोगः॥ तस्मिन् सूक्ते प्रथमा॥ ॥अग्निं होतारं प्र वृणे मियेधे गृत्सं कविं विश्वविदममूरं॥ स नो यक्षद्देवताता यजीयान्राये वाजाय वनते मघा
नि॥ ॥हे अग्ने गृत्सं गृणंतं देवानां स्तोतारं कुर्वतं कविं मेधाविनं विश्वविदं सर्वविषयज्ञानोपेतं अमूरममूढं अग्निं अंगनादिगुणोपेतं त्वां मियेधे अस्मा
भिः क्रियमाणे स्मिन्यज्ञे होतारं होमनिष्पादकं देवानामाह्वातारं वा अहं प्रवृणे प्रकर्षेणासंभजे स तथाविधो ग्निः यजीयान् यष्टृतमः सन् नोस्माकं
देवताता यष्टव्यतया संबंधिनो देवान् यक्षत्। यजतु। किंच सो ग्निः राये धनाय वाजायान्नाय च मघानि मंहनीयानि अस्माभिर्दीयमानानि हवींषि

राम

३०

भवानो अग्ने सुमन्ना उपेता इति निधृवाच्चित्ति॥ ॥तस्मिन्सूक्ते प्रथमा॥ ॥भवा नो अग्ने सुमना उपेतौ सखेव सख्ये पितरेव साधुः॥ पुरुद्रुहो हि क्षि
तयो जनानां प्रति प्रतीचीर्दहतादरातीः॥ ॥हे अग्ने त्वं उपेतौ अस्माभिः क्रियमाणेः प्रवर्ग्याख्यस्य कर्मणि भिरख्ये नागमने सुमनाः त्वं कर्मसिद्ध्यर्थमनु
कूलं सुमनस्को भूत्वा नः साधु भव अस्मत्संबंधिनः कर्मसाधको न भव। तत्र दृष्टांतद्वयं। सखेव सख्ये पितरेवेति। यथा संख्या सुकृतमित्राय हितोपदेशे
न साधुर्भवति। यथा। च पितरा माता पितरो पुत्राय सन्मार्गोपदेशेन साधको भवतः। तद्वत्। किंच। जनानां मनुष्याणां क्षितयो मनुष्याः पुरुद्रुहो ना
नाविधद्रोहयुक्ता हि शब्दः कारणपरः। यस्माल्लोके परस्परमशार्यादिना न्योन्यमसहमाना जनावर्तंते। तस्मात्वं प्रतीति। प्रतीचः। प्रतिकूलतयास्म
दाभिमुख्येनागच्छतः अरातीः अरातीन् शत्रून् प्रतिदहतात्। त्वं। प्रतिकूलः सन् भस्मसात् कुरु। भवते। द्व्यचोतस्तिङ इति संहितायां दीर्घः। उप
तौ। इण्गतौ। अनयमिति। भावे क्तिन्। प्रादि समासः। तादौ च निति कृत्यतौ इति गतेः प्रकृतिस्वरत्वं। सखा। समानेख्य श्चोदात्त इति इण्। टिल्वादिलोपः
तत्संनियोगेन य लोपः। समानस्य। समानस्य छंदसीत्यादिना सभावः। उदात्त इति इन्। त्वादुपपदस्योदात्तत्वं॥ साधुः। राध साध संसिद्धौ। कृवापाजी
त्यादिना उण् प्रत्ययः। प्रत्ययस्वरः। प्रतीचीः। अंचु गतिपूजनयोः। ऋत्विग्दधृगित्यादिना। क्विन्। स्त्रियां उगितश्चेति ङीप्। प्राप्ते पुनः धातोरुगितः प्र
तिषेधः इति प्रतिषिद्धे अंचतेश्चोपसंख्यानमिति प्रतिप्रसवात् ङीप्। तस्मिन् भसंज्ञायां अचः इत्युकारलोपः। चाविति दीर्घः। तद्दहतात्। दह भस्मीकरणे। ह्र
त्यस्य लोपमध्यमैकवचनस्य तुह्योस्तातङाशिषीति तातङ् आदेशः। निघातः। अरातीः प्रतीचीः उभयत्र लिंगव्यत्ययः॥ ॥अथ द्वितीया॥ ॥तपो ष्वग्ने अंतराँ
अमित्रान् तपा शंसमररुषः परस्य॥ तपो वसो चिकितानो अचित्तान् वि ते तिष्ठंतामजरा अयासः॥ ॥हे अग्ने अंतरान् अभिभावकान् मित्रांश्च त्वं सुष्ठु

णिजुत्पत्तिः। नान्यस्मादिति तदंतात्क्विप्। जस्त्वस्य पितीति तुक्। णिचोलोपाभावश्छांदसः। णिच्स्वरः। देवतातिः। देवशब्दात्सर्वदेवात्तातिलिति तातिल्। लिति
त॰सं॰भा॰१ तिप्रत्ययात्पूर्वस्योदात्तत्वं। उराणः। उरुकरोतीति णिच्। तदंतात् छंदसि लिट्। अमंत्रत्वादाम् न भवति तस्य कानच्। णेरनिटीति णिलोपः। वरादेशाभावश्छांद
सः। चित्वादंतोदात्तः। अश्रेत्। श्रिञ् सेवायामित्यस्य छांदसे लङि बहुलं छंदसीति शपो लुक्। निघातः॥ ३॥ अथ तृतीया॥ ॥ स तेजीयसा मनसा त्वोत
उत शिक्ष स्वपत्यस्य शिक्षोः। अग्ने रायो नृतमस्य प्रभूतौ भूयाम ते सुष्टुतयश्च वस्वः॥ ॥ हे अग्ने त्वोतः त्वया रक्ष्यमाणः स तेजीयसा अतिशयेन ती
क्ष्णेन सत्कर्मविषयतीक्ष्णबुद्धियुक्तेन मनसा अंतःकरणेन युक्तो भवति। उत अपि च तस्य स्वपत्यस्य शोभनापत्योपेतं धनं शिक्षस्व
यच्छ। शिक्षतिर्दानकर्मा दात्यादिषु दानकर्मसु पठितत्वात्। हे अग्ने शिक्षोः अभिमतफलप्रदाने शक्तिमिच्छोः रायो नृतमस्य धनस्य अतिशयेन
नेतुर्दातुस्ते तव प्रभूतौ प्रभावे महिम्नि वर्तमाना वयं स्याम। किंच सुष्टुतयः त्वद्विषयशोभनस्तुतिमंतो वयं वस्वः वसुनो भोजनं भूयाम भूयास्म। तेजीयसा तेजि
तृशब्दादतिशायने ईयसुन्। तुरिष्ठेमेयस्स्विति तृलोपः। नित्स्वरः। त्वोतः। अव रक्षणादिषु। निष्ठायां ज्वरत्वरेत्यादिना वमुपधायाश्चेत्यूठ्। टिलोपः। त्व रामं
या ऊतः तृतीयेति योगविभागात्समासः। टिलोपश्छांदसः। तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरः। शिक्ष विद्योपादाने इत्ययमत्र दानार्थः। अस्मा २१
ल्लोटि व्यत्ययेन परस्मैपदं। शिक्षोः शक्नोः सन्। सनि एकाच उपदेशादिति इट्प्रतिषेधः। सनि मीमाघुरभलभशकपतपदामच इस्। शक्निधा
तोश्च ईशादेशः। अत्र लोपोऽभ्यासस्येत्यभ्यासलोपः। सनाशंसभिक्ष उरित्युप्रत्ययः। प्रत्ययस्वरः। प्रभूतौ। भू सत्तायामित्यस्य भावे क्तिन्। तादौ
च निति कृत्यतादिति गतेः प्रकृतिस्वरत्वं। भूयाम। भू सत्तायां। आशीर्लिङि लिङ्याशिष्यङिति यासुट्। छंदस्युभयथेति तस्य सार्वधातुकत्वात् सलोपः।

आगमस्वरः। यद्वा तस्मात्प्रार्थनायां लिङ्। यासुट्। बहुलं छंदसीति शपो लुक्। आर्धधातुकत्वाभावात् देङ्ग्रो न भवति। सुष्टुतयः। नञ्सुभ्यामित्युत्तरपदां
तोदात्तत्वं। वस्वः। आगमानुशासनस्यानित्यत्वादुडभावः। संज्ञापूर्वकस्य विधेरनित्यत्वात् गुणाभावः। यणादेशः॥ ४॥ अथ चतुर्थी॥ ॥ भूरीणि हि त्वे द
धिरे अनीकाग्ने देवस्य यज्यवो जनासः॥ स आ वह देवतातिं यविष्ठ शर्धो यदद्य दिव्यं यजासि॥ ॥ हे अग्ने देवस्य द्योतमानस्य तव संबंधिनः यज्य
वो यष्टारो धर्तुप्रभृतयो जनासो जनाः भूरीणि बहूनि अनीका अनीकानि सेनारूपतया सर्वत्र प्रभूतानि ज्वालारूपाणि तेजांसि आहुतिप्रक्षेपे
ण। त्वे त्वयि दधिरे हि। विदधिरे खलु। चकुरिति यावत्। स त्वं तादृशस्त्वं देवतातिं यष्टव्यान् देवान् महि कर्मण्यवह आह्वय। यविष्ठ युवतम यत् यस्मात्कार
णादद्य अस्मिन् कर्मणि दिव्यं देवसंबंधि शर्धः तेजस्त्वं यजासि यजसि तस्मादेवान्मह्यमिति शेषः। दधिरे। दधातेर्लिटि रूपं। हियोगादनिघातः। चित्वा
दंतोदात्तः। यज्यवः यज देवपूजादिषु। यजमनिशुधिदसिजनिभ्यो युजिति युच्। व्यत्ययेनाद्युदात्तत्वं। देवतातिं। देवशब्दात्सर्वदेवात्तातिलिति तातिल्।
लितीति प्रत्ययात्पूर्वस्योदात्तत्वं। यजासि यजेर्लेट्याडागमः। यद्योगादनिघातः॥ ५॥ अथ पंचमी॥ ॥ यत्त्वा होतारमनजन्मियेधे निषादयंतो यजथाय
देवाः॥ स त्वं नो अग्नेऽवितेह बोध्यधि श्रवांसि धेहि नस्तनूषु॥ ॥ हे अग्ने यजथाय यजनार्थं निषादयंतो निवसंतः देवा दीप्यमाना ऋत्विजो मियेधे।
मियेधे यज्ञे होतारं देवानामाह्वातारं त्वा त्वां यत् यस्मात् अनजन् घृताहुतिरोक्षन् यद्वा निषादयंतः होतारं होमनिष्पादकं त्वां बर्हिषि उपवेशयंत ऋ
त्विजो घृतेरसिंचन् तस्मात्तथाविधस्त्वं इहास्मिन् कर्मणि नोऽस्माकं अविता पालयिता भव। मीति बोधि बुध्यस्व। किंच नस्तनूषु अस्माकं तनूजेष्व
पत्येषु श्रवांसि अन्नानि अधिधेहि। अधिकं निधेहि। अजन्। अञ्जू व्यक्तिम्रक्षणकांतिगतिषु। अस्माल्लुङि सिपि धादित्वात् तमं। छांदसत्वाद्झोपाभावः। अ

निदितामित्युपधालोपः। निपादयंतः। षद्लृ विशरणगत्यवसादनेषु। विशादि। सदिर प्रतेरिति षत्वं। यद्वा। हेतुमति णिच्। शतुर्लसार्वधातुकस्वरेणानुदात्त

तृ॰सं॰भा॰१ त्वे कृते निच्स्वरः। बोधि। बुध अवगमने। लोटि बहुलं छंदसीति शपो लुक्। सेर्ह्यपिच्चेति हिरादेशः। वा छंदसीति विकल्पेन पित्वात् गुणः। हुझल्भ्यो

हेर्धिरिति हेर्धिरादेशः। धकारलोपश्छांदसः। निघातः। धेहि। दधातेर्लोटि रूपं॥१॥ इति तृतीयस्य प्रथमे एकोनविंशो वर्गः॥ ॥ अग्निमुषसमिति पंच

र्चमष्टमं सूक्तं त्रैष्टुभं। अत्रेयमनुक्रमणिका। अग्निमुषसमाद्यं तेष्वैश्वदेव्याविति। गाथी हीति तुह्यप्रयोगादस्यापि सूक्तस्य गाथी ऋषिः। प्रथमापंचम्यौ

विश्वेदेवा देवता। शिष्टास्तिस्र आग्नेय्यः। अस्य सूक्तस्योक्तो विनियोगः॥ मरुत्वतीय शस्त्रे अग्निर्नेतेत्येषा धाय्या। सूत्रितं च। अग्निर्नेता त्वं सोम क्रतु

भिः पिन्वंत्यप इति धाय्या इति॥ तस्मिन् सूक्ते प्रथमा॥ ॥ अग्निमुषसमश्विना दधिक्रां व्युष्टिषु हवते वह्निरुक्थैः॥ सुज्योतिषो नः शृण्वंतु देवाः सजो

षसो अध्वरं वावशानाः॥१॥ गाथी ऋते। वह्निर्हविषां प्रापयिता वाग्निः व्युष्टिषु उषसां व्युच्छंतीषु। अग्निं यजनीयं देवं उषसं उषोभिमानिनी देवतां

अश्विना अश्विनौ देवौ दधिक्रां दधिक्रावा नाम कश्चिद्देवस्तं। दधिक्रावाणमेतान् देवान् उक्थैः शास्त्रैः शंसनसाधनैः प्रगीत मंत्रात्मकैः सूक्तैः ह

वते आह्वयति। सुज्योतिषः सुष्ठु द्योतमानाः नोऽस्माकं अध्वरं अस्मत्संबंधिनमिमं यज्ञं वावशानाः कामयमानाः सजोषसः परस्परं संगता भूत्वा सर्वे देवाः तदाह्वा राम

नं शृण्वंतु दधिक्रां। क्रमु पादविक्षेपे। दधीत्युपपदे जनसनखनक्रमगम इति विट्। विड्वनोरनुनासिकस्यादित्याकारः। कृदुत्तरपदप्रकृतिस्वरः। व्युष्टिषु २२

उछी विवासने। भावे क्तिन्। वश्चादिना षत्वं। तादौ च निति कृत्यताविति गतेः प्रकृतिस्वरत्वं। हवते ह्वयतेर्बहुलं छंदसीति संप्रसारणं। सुज्योतिषः सुष्ठु द्योत

माना इति विग्रहे द्युत दीप्तावित्यस्य द्युतिरिसिन्नादेश्च ज इतीसिप्रत्ययः दकारस्य जकारः। नञ्सुभ्यामिति उत्तरपदप्रकृतिस्वरत्वं। बहुव्रीहिपक्षे तु नञ्सुभ्यामि

वनते संभजतो। वृणे। वृङ् संभक्तौ निघातः। मियेधे। अकारो कारयोर्मध्य इयागमश्छांदसः। गृत्सं। गृधु अभिकांक्षायां। गृधिपत्योर्दसाविति स

प्रत्ययः। अंत्यस्य दकारः। व्यत्ययेनाद्युदात्तत्वं। अमूरः। मुह वैचित्त्ये अस्य निष्ठायां रूपं। रेफश्छांदसः। नञो समासे तस्य स्वरः। यक्षन्। यजेर्लेटि सिब्ब

हुलं लेटीति सिप्। लेटोऽडाटाविति अडागमः। इतश्चेतीकारलोपः। देवताता। देवशब्दात् स्वार्थे सर्वदेवतातिलिति तातिल्। सुपां सुलुगिति। सुपो डादेशः।

लित्स्वरः। वनते। वन षण संभक्तावित्यस्य लटि व्यत्ययेनात्मनेपदं। निघातः॥१॥ अथ द्वितीया॥ प्र ते अग्ने हविष्मतीमियर्म्यच्छा सुद्युम्नां रातिनीं घृ

ताचीं॥ प्रदक्षिणिद्देवतातिमुराणः सं रातिभिर्वसुभिर्यज्ञमश्रेत्॥२॥ हे अग्ने सुद्युम्नां सुतेजसं हविष्मतीं पुरोडाशादि हविर्युक्तां रातिनीं हविर्दात्रीं घृ

ताचीं घृतान्वितां जुहूमुपभृतं वा ते तव अच्छ आभिमुख्येन प्रेयर्मि प्रेरयामि। देवतातिं देवान् उराणः उरु बहु कुर्वाणः उराणः उरु कुर्वाण इ

ति यास्कः। तादृशो भवान् रातिभिः अस्मभ्यं देयैर्वसुभिर्धनैः सह प्रदक्षिणित् प्रादक्षिण्येन समश्रेत् तमिमं यज्ञं सम्यक् सेवतां। हविष्मतीं।

हविरस्यास्तीति मतुप्। तसौ मत्वर्थ इति भसंज्ञायां सकारस्य रुत्वं न भवति। उगितश्चेति ङीप्। स्वरविधौ व्यंजनमविद्यमानवदिति परिभाषया नाद्यस्य

ह्रस्वनुड्भ्यां मतुबिति मतुप उदात्तत्वाभावः। इयर्मि। ऋ गतौ जुहोत्यादिः। अर्तिपिपर्त्योश्चेत्यभ्यासस्येत्वं। अभ्यासस्यासवर्णे इतीयङादेशः। मिपः पित्वादगुणः। निघातः।

अच्छ। निपातस्य चेति संहितायां दीर्घः। रातिनी। रा दाने क्तिन्। अस्य नपुंसके भावे क्तः। रातमस्या अस्तीति अत इनिठनाविति इनिप्रत्ययः स्वरः। घृताची। घृत

पूर्वादंचतेः ऋत्विगित्यादिना क्विन्। अंचतेश्चोपसंख्यानमिति ङीप्। भसंज्ञायां अच इत्याकारलोपः। चाविति दीर्घः। उदात्तनिवृत्तिस्वरेण ङीप

उदात्तत्वे प्राप्ते चाविति पूर्वपदांतोदात्तः। प्रदक्षिणित्। प्रदक्षिणं करोतीति तत्करोतीति णिच्। तुत्यद्यमानो दक्षिणशब्दो भवति। संग्रामयतेः सोपसर्गा

ऋ·वे·भा·१

धुः संपपृचुर्जुजिरे तास्त्वयि संतीति समा यज्ञविघ्नकारिणां मायिनां मायाः परिहृत्यास्मदीयं यज्ञं पालयेति भावः। स्वधा अस्यास्तीति मतुप् मतुवसो रु
रिति मकारस्य रुः। अमृतस्य न म्रियत इति मरणमित्रमृता इति उत्तरपदाद्युदात्तत्वं। नाम णमु प्रह्वत्वे नामन् सामन् सोमन् व्योमन्नित्यादिना मनिन् प्रत्ययो
न्तत्वेन निपातनादकारलोपो दीर्घश्च नमयंति सर्वान् यस्यास्य भूतान्युरूषानीति नामानि तेजांसि। सुपां सुलुगिति सुपो लुक्। चदाद्युदात्तः। मा
यिनां मायाः एषां संतीति व्रीह्यादित्वादिनिः। यस्येति लोपः प्रत्ययस्वरः। विश्वमिन्व इति व्याप्तिप्रीणनयोरित्यस्मात् विश्वशब्दे उपपदे कर्मण्यणिति अ
ण्प्रत्ययः धातूपदेशावस्थायामिदितो नुमिति नुमि प्राप्ते लघूपधगुणो न भवति विश्वमिन्व इति प्रीणयतीति विश्वमिन्वः तत्पुरुषे कृति बहुलमिति
द्वितीयाया अलुक्। आमंत्रितत्वान्निघातः। संदधुः। डुधाञ् धारणपोषणयोरित्यस्य लिटि उसि रूपं। यद्वृत्तयोगादनिघातः। प्रत्ययस्वरः। पृष्टबं
धो। पृच्छ ज्ञीप्सायां। इत्यस्य कर्मणि निष्ठायां ग्रहिज्यावयीत्यादिना संप्रसारणं। पश्चादिना षत्वं। बंध बंधन इत्यस्मात् शृस्निहीत्यादिना उप्रत्ययः।
षष्ठीसमासः। आमंत्रितत्वान्निघातः॥ ३॥ अथ चतुर्थी॥ अग्निर्नेता भग इव क्षितीनां दैवीनां देव ऋतुपा ऋतावा॥ स वृत्रहा सनयो विश्ववेदाः पर्ष
द्विश्वाति दुरिता गृणंतं॥ ॥ योयमग्निः क्षितीनां मनुष्याणां। दैवीनां देवसंबंधिनीनां हविषां नेता अंतर्यामितया नियामकः। तत्र दृष्टांतः। ऋतुपाः भग राम
इव यथा वसंताद्यृतूनां पालकः सूर्यः सर्वस्य स्वप्रकाशप्रदानेन प्रवर्तकः तद्वत् यश्चाग्निः ऋतावा। सत्यकर्मा वृत्रहा वृत्रस्य हंता सनयः सनातनः २२
पुराणः विश्ववेदाः सर्वविषयज्ञानवान् सर्वज्ञः स तथाविधोऽग्निः गृणंतं तद्विषयां स्तुतिं कुर्वंतं स्तोतारं विश्वा दुरिता सर्वाणि दुरितान्यतिक्रम्य पर्षत्
पारं नयतु नेता णीञ् प्रापणे इत्यस्य तृचि रूपं चित्स्वरः। क्षिति निवासगत्योः। किंच। क्तौ च संज्ञायामिति क्तिच् नामन्यतरस्यामित्यंतोदात्तत्वं। दैवीनां देव

शशास्त्रसंबंधार्थे देवाघम्। आविति जस्। ङित्वादिडागम इति ङीप्। ङित्वादाद्युदात्तः। ऋतुपा पा रक्षण इत्यस्मादन्येभ्योपि दृश्यंत इति विच्। ऋतून् पातीति
उपपदमतिङिति समासः कृदुत्तरपदप्रकृतिस्वरः। वृत्रहा हन हिंसागत्योः ब्रह्मभ्रूणवृत्रेषु क्विप्। विश्ववेदाः बहुव्रीहौ विश्वं संज्ञायामिति पूर्वपदां
तोदात्तत्वं। पर्षत्। पॄ पालनपूरणयोरित्यस्य लोटि सिब्बहुलमिति सिप् अडागमः। इतश्च लोप इतीकारलोपः। पादादित्वादनिघातः। गृणंतं गृशब्दे ल
टः शतृ। क्र्यादित्वात् श्ना। श्नाभ्यस्तयोरात इत्याकारलोपः। शतुः प्रत्ययस्वरः॥ ४॥ अथ पंचमी॥ दधिक्रामग्निमुषसं च देवीं बृहस्पतिं सविता
रं च देवं॥ अश्विना मित्रावरुणा भगं च वसून्रुद्राँ आदित्याँ इह हुवे॥ ॥ हे दधिक्रावा देवः सर्वे देवाः होताहं दधिक्रावाणं अग्निमुषसं देवीं उषोभिमा
निनीं देवानां च बृहस्पतिं। देवं द्योतमानं सवितारं सर्वस्य जगतः प्रेरकं देवं त्वं अश्विना अश्विनौ देवौ मित्रावरुणौ भगं सूर्यं च वसून् अष्टौ वसून् रुद्रान्
एकादशान् आदित्यान् द्वादशादित्यान् सर्वान् हविर्भुजो युष्मान् इहास्मदीये कर्मणि हुवे। हविःस्वीकरणार्थमाह्वयामि। दधिक्रां दधातेः किं दधिः आ
दृगमहनेत्यादिना ... विक्षनोरित्याद्युदात्तत्वं। देवी देवस्य पत्नी देवी। पुंयोगादाख्यायामिति ङीप्। यस्येति लोपः। प्रत्ययस्वरेणांतोदात्तः। बृहस्पतिं। त
बृहतः करपत्योः चोरदेवतयोः सुट् तलोपश्चेति पतिशब्दे परतो बृहच्छब्दस्य तलोपः। सुडागमश्च। उभे वनस्पत्यादिषु युगपदिति उभयपदाद्युदात्तत्वं।
सवितारं षू प्रेरणे इत्यस्य तृचि आर्धधातुकस्येड्वलादेरिति इडागमः। चित्वादंतोदात्तत्वं। रुद्रानादित्यान्। अत्र संहितायां ह्रस्वान्नकारस्य दीर्घादटि
टि समानपाद इति रुत्वं। ततः पूर्वस्य वर्णस्य आतोऽटि नित्यमित्यनुनासिकत्वं। भो भगो अघो अपूर्वस्य योऽशीति रेफस्य यकारः। लोपः शाकल्यस्येति तस्य लोप
लोपस्यासिद्धत्वात् स्वरसंधिर्न भवति। अतः रुद्रानादित्यानिति भवति। एवमेकस्मिन् पादे अकारादटिफलः। अकारस्यत्व पूर्वसवर्णानुनासिकाठियाः।

उद्युक्षयते। लटि बहुलं छंदसीति संप्रसारणं॥ लिटस्त आत्मनेपदानामित्येत्वं। ऊवक्षुः। देशः। निघातः॥॥ इति तृतीयस्य प्रथमे विंशो वर्गः॥॥ इमं न इति पं
ऋ.सं.भा.१ चर्चं नवमं सूक्तं। अत्रेयमनुक्रमणिका। इमं न उप धेज्ञानुष्टुभौ विराड्रूपा सप्तमी बृहती वा चेति। द्वितीयास्तृतीये अनुष्टुभौ पंचमी विराड्रूपा सप्तमी बृहती वा
नुक्त्वा प्रथमा चतुर्थी त्रिष्टुभौ अस्यापि गाथी ऋषिः पशौ स्तोकानुवचने इदं सूक्तं। सूत्रितं च। जुषस्व सप्रथस्तममिमं नो यज्ञ नोति॥॥ तस्मिन्सूक्ते
प्रथमा॥॥ इमं नो यज्ञममृतेषु धेहीमा हव्या जातवेदो जुषस्व॥ स्तोकानामग्ने मेदसो घृतस्य होतः प्राशान प्रथमो निषद्य॥॥॥ गाथी प्रार्थयते। हे जात
वेदः नोऽस्माकं संबंधिनमिमं पशुयागं अमृतेषु मरणधर्मरहितेषु यष्टव्यदेवेषु धेहि स्थापय। तं नय समर्पय त्वं च इमानि अस्माभिर्दीयमानानि ह
वींषि हवींषि जुषस्व सेवस्व। किंच होतः। देवानामाह्वातः अग्निर्वै देवानां होतेति। आम्नानात्। तादृश हे अग्ने निषद्य वेद्यामुपविश्य प्रथमः सर्वेषामृत्विजामा
दिमः सन्मेदसो वपारूपस्य हविषः घृतस्य आज्यस्य च स्तोकानां बिंदूनां आर्थे षष्ठी मेदो घृतयोर्ये स्तोका बिंदवो विद्यंते तानाप्रकर्षेण अशान भक्षय पिबेत्यर्थः धे
हि दधातेर्लोटि रूपं। जुषस्व जुषी प्रीतिसेवनयोरित्यस्य लोट्यात्मनेपदे रूपं। प्राशान। अश भोजन इत्यस्य लोटि हल श्नः शानज्झाविति शानजादेशः। प
श्रादेनोहश्रतिहेर्लुक्। निघातः। प्रथमः। प्रथ प्रख्याने। प्रथमः। प्रथ प्रख्याने। प्रथते स्माद्वितीयादय इत्यस्य प्रथेरमजित्यमच्। विन्नाइंतोदात्तः। निषद्य।
षद्लृ विशरणगत्यवसादनेष्वित्यस्य ल्यपि रूपं। सदेरप्रतेरिति षत्वं। लिति प्रत्यया पूर्वस्योदात्तत्वं॥॥॥ अथ द्वितीया॥॥ घृतवंतः पावक ते स्तोका श्चोतंति मे राम
दसः॥ स्वधर्मंदेववीतये श्रेष्ठं नो धेहि वार्यं॥॥ पावक पापस्य शोधक हे अग्ने स्वधर्मन् स्वंगतस्य यज्ञे नेतव भक्षणार्थं देववीतये यज जनीय देवानां भक्षणार्थं च ३४
घृतवंतः घृतोपेताः मेदसो मेदः पेताः मेदसो मेदोरूपस्य हविषः स्तोका बिंदवश्चोतंति क्षरंति अथवा देववीतये वस्यत ववीन यद्वतियोजनीयं। तस्माद्वा भजनी

स्तुत्तरपदांतोदात्तत्वं स्यात्। यथोस्तुजो तिषो अकं वस्ता अग्नियुरित्यंतोदात्तता तस्माद्वनार्थे समासः। किं तु तत्पुरुष एव। स्थत्वेत्। अश्व अव ण इत्यस्माद्रुच
श्चेतिकः। तसंनियोगेन धातोः श्च इत्यादेशः। निघातः। वां श्रानाः व श्राकोंतावित्यस्य यद्धकि रूपं अभ्यासस्य दीर्घोकित इति दीर्घः। व्यत्ययेन शान चु
त्वं स्वरः॥॥ अथ द्वितीया॥॥ अग्ने त्री ते वाजिना त्री षधस्था तिस्रस्ते जिह्वा ऋतजात पूर्वीः॥ तिस्र उ ते तन्वो देववातास्ताभिर्नः पाहि गिरो अप्रयुच्छन्॥ हे
अग्ने तव त्री वाजिना आज्यौषधसोमात्मकानि त्रीण्यन्नानि त्री षधस्था त्रीणि अग्नीध्रीयादीनि धिष्ण्यानि स्थानानि यद्वा एकाहाहीनसत्राख्यानि त्री
णि स्थानानि यद्वा त्रयो लोकाः ऋतजात ऋतेषु सत्यभूतेषु यज्ञेषु समुत्पन्न हे अग्ने तव पूर्वीः देवानामुदरपूरयित्र्यः तिस्रो गार्हपत्याद्याजिह्वाः हे अ
ग्ने तव देववाता। देवैरभिषिताः तिस्रस्तन्वः पवमानपावकशुच्यात्मकानि त्रीणि शरीराणि एवंभूतस्त्वं अप्रयुच्छन् अप्रमाद्यन् सावधानो भूत्वा ताभि
स्तनूभिर्नोऽस्माकं स्तोतॄणां गिरः स्तोत्रशस्त्रादीनि वाक्यानि पाहि पालय। तिस्रः। तिसृभ्यो जसः इति जस उदात्तत्वं। जिह्वाः। लिह आस्वादने। लिहं त्या भी
रसादि इति शेवायह्वजिह्वाग्रीवाप्वमीवादि इति निपातनाद्रूपं। लकारस्य जकारः गुणाभावः। व्यत्ययेनांतोदात्तत्वं। देववाताः वा गतिगंधनयोः अस्मा
त्कर्मणि क्तः तीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं। पाहि। यार क्षण इत्यस्य लोटि रूपं। निघातः। अप्रयुच्छन्। युच्छ प्रमादेन न्नस्वरः॥॥ अथ तृतीया॥॥
अग्ने भूरीणि तव जातवेदो देव स्वधावो मृतस्य नाम॥ याश्च माया मायिनां विश्वमिन्व त्वे पूर्वीः संदधुः पृष्टबंधो॥॥ देव द्योतमान जातवेदः जातप्रज्ञ
स्वधावः अन्नवन् हे अग्ने अमृतस्य मरणधर्मरहितस्य तव संबंधिनो देवाः भूरीणि बहूनि नाम नामानि तेजांसि त्वयि संदधुः संदधिरे किं चवि
श्वमिन्व विश्वस्य संतर्पक। पृष्टबंधो अपेक्षितफलप्रश्नविषयाणां स्तोतॄणां बंधो हे अग्ने मायिनामसुराणां पूर्वीः भूयसीः यामाया देवास्त्वयि संद

ऋ॰सं॰भा॰१

नत्वं। भानुना भादीप्तो। दभाभ्यां नुडिति कर्तरि नुः प्रत्ययस्वरः। अगाः। इण् गतावित्यस्य छांदसे लुङि इणो गेति गादेशः। गातिस्थेति सिचो लोपः। नि
घातः। मेधिरः। मेधा रथाभ्यामिरनिरचौ वक्तव्याविति रन्। आमेंत्रितत्वान्निघातः॥ ॥ अथ पंचमी॥ ॥ ओजिष्ठं ते मध्यतो मेद उद्भृतं प्र ते वयं ददामहे॥ श्चो
ततितवसो स्तोका अधि त्वचि प्रति तान् देवशो विहि॥ ५ हे अग्ने ओजिष्ठं अतिशयेन सारयुक्तं मेदसः वपायाः त्वेहविः मध्यतः पशोर्मध्यभागात् तत्त्वदर्थं
उद्धृतं अध्यायदियो वयं अस्मिन्यज्ञे ते तुभ्यं प्र ददामहे। उद्धृतं तद्रूपास्त्वं हविष्यच्छोमः। वसो सर्वस्य जगतो वासयितः। त्वगधि चुपायामुपरि ये स्तो
काः घृतमिश्रा विंदवः। तेत्वदर्थं श्चोतंति स्रवंति। तान् स्तोकान् देवशः। देवेषु प्रति विहि प्रत्येकं विभजस्व। मध्यतः मध्यशब्दात् पंचम्यास्तसिरिति तसिः
प्रत्ययः स्वरः। उद्भृतं हृग्रहोर्भश्छंदसीति हकारस्य भकारः। गतिरनंतर इति। गतेः प्रकृतिस्वरत्वं। ददामहे। ददाने। इत्यस्य ल
टि ङित्वादात्मनेपदं। अतो दीर्घो यञीति दीर्घः। निघातः। श्चोतंति। श्चुतिर् क्षरणे। पदात्परत्वान्निघातः। अनेर्लसार्वधातुकस्वरेणानुदात्तत्वे कृते धातुस्व
रः। त्वचि तनु विस्तारे। तनेरश्च वइति कर्त्तरि कर्मणि वा चिक्। आकारनकारयोर्वकारादेशः। तनोतितयेवा। त्वक्। सावेकाचइति विभक्तेरुदात्त
त्वं। विहि। वीकांतिगती व्याप्तीत्यस्य लोटि अदादित्वाच्छपो लुक्। हुस्व छांदसः खिलं॥ ॥ इति तृतीयस्य प्रथमे एकविंशो वर्गः॥ ॥ अयं स इति पंचर्चं
पंचमं सूक्तं। अत्रेयमनुक्रमणिका। अयं स उपांत्यानुष्टुप् पुरीष्याग्निभ्यः अदर्धिरिति। कौशिको गाथी पंचाविति रूपामग्निर्या देवता चतुर्थ्यनुष्टुप्
शिष्टास्त्रिष्टुभः। प्रातरनुवाकाश्विनशस्त्रयोरुक्तः सूक्तविनियोगः। अग्निचयने इष्टकाप्रणयने पुरीषासङ्गत्येषा अनुवचनीया। प्रवित्तः पुरीषावि
तयं चाहेत्युपक्रम्य पुरीषासो अग्नय इति त्रिरूपां ब्रूयाद्प्रणवामिति सूत्रितं॥ ॥ तस्मिन्सूक्ते प्रथमा॥ ॥ अयं सो अग्निर्यस्मिन्त्सोममिंद्रः सुतं दधे जठरे वा

राम
३५

वशानः॥ सहस्रिणं वाजमत्यं न सप्तिं ससवान्त्सन्त्स्तूयसे जातवेदः॥ गाथी ऋषिः॥ अयं स अग्निरा वधिमा दुग्ध्यधिकरणभूताहवनीयरूपतया दृश्यमानोऽ
ग्निः स तथाविधः स्वलु वावशानः सोमं कामयमानः यस्मिन्नग्नौ हुतं सुतमभिषवादिसंस्कारोपेतं सोमं जठरे स्वोदरे दधे धारयामास। तस्मान्नो द्रुघ्ना
दिमापतः सोऽग्निरिति पूर्वेणान्वयः। किंच हे जातवेदः सहस्रिणं सहस्रं नाना रूपं तां युधियो भजंति सन्तत्सहस्रीयं तस्याग्वे गतं शत्रुतने तत्र शीलं सप्तिं अ
श्वमिव वाजं आज्यौषधिसोमानेकप्रकारहविर्लक्षणमन्नं ससवान् भोजितवान् सन्न त्वं स्तूयसे स्तोतृभिः स्तोत्राभिः स्तूयमानो वर्तसे। दधे। दधातेर्लिटि लिट्
तास्योरेजिति प्रत्ययस्य एशिल्यादेशः। यद्वृत्तयोगादनिघातः। प्रत्ययस्वरः। वावशानः। वशकांतौ। इत्यस्य यङ्लुकि दीर्घोकित इत्यभ्यासस्य दीर्घः व्यत्य
येन शानच् चित्स्वरः। ससवान्। षणसंभक्तौ। क्वसोऽङ्गभावश्चनलोपः प्रत्ययस्वरः। स्तूयसे। ष्टुञ् स्तुतौ। कर्मणि यक्। अकृत्सार्वधातुकयोरिति दीर्घः। नि
घातः॥ ॥ अथ द्वितीया॥ ॥ अग्ने यत्ते दिवि वर्चः पृथिव्यां यदोषधीष्वप्स्वा यजत्र॥ येनांतरिक्षमुर्वाततंथ त्वेषः स भानुरर्णवो नृचक्षाः॥ ॥ यजत्र यजमानाय हे
अग्ने दिवि द्युलोके यद्वर्चः आदित्याख्यं यज्ज्योतिः तत्तेवैव ज्योतिः पृथिव्यामाहवनीयादिरूपं तयावर्तमानं यत्ते जः तत्त्वदीयमेव प्रसिद्धं ते ज्योतिर्धा
यद्रूपं ज्योतिरभिधत्ते। यदोषधीष्विति। ओषधीष्विति अरणिप्रभृतिषु काष्ठेषु पच्यतेष्वयनेऽप्सु यद्वा ओषधीषु वनस्पत्यादिषु सोमाख्यं यत्तेजः तत्सर्वं आ
सर्वत्र वर्तमानं तेजस्त्वावकमेव। किंच। येन वायुरूपेण तेजसांतरिक्षं आकाशं उरु आततंथ आतेनिथ विस्तीर्णं दीप्तिमान् अतएव भानुमान् समानः नृच
क्षा नृणां सानितया द्रष्टा अर्णवः समुद्रवन्महान् सतादृशस्त्वं अंतरिक्षमाततनिथेति पूर्वेणान्वयः। उक्ता च वाजसनेयकं। आग्नयत्ते दिवि वर्च इत्यादित्ये
वा अस्य दिवि वर्चः पृथिव्यामित्ययमग्निः पृथिव्यां यदोषधीष्वप्स्वा यजत्रेति। एवो ओषधिषु वाप्सु वा अग्निस्तमेतदाहयेनांतरिक्षमुर्वाततंथेति वायुसत्वेषः सभा

ऋ·सं·भा·१ पुरर्णवो नचक्षा इति महात्म्या भानुररणीवान् नचक्षा इत्येतदिति। पृथिव्यां। उदात्तयणो हल्पूर्वादिति विभक्तेरुदात्तत्वं। बहुलं छन्दसीति विभक्तेर्लुक्। अवप
थमायामिति दीर्घत्वं। अप्सु सावेकाचस्तृतीयादिर्विभक्तेरुदात्तता। आततंथात नु विस्तार इत्यस्य लिटि थलि भूयासत्तंथ जगृभ्म वव्र्थेति नियागमे तनादित्वा
सलोपाभावः तिलिनी तिप्रत्ययात्पूर्वस्योदात्तत्वं। यद्वृत्तयोगादनिघातः। अर्णवः। अर्णवस्य तस्मिन्संतीति मनुवर्ययेव प्रकारेण। येभ्यो पि दृश्यत इ
ति वप्रत्ययः। अर्णसः सलोपः। प्रत्ययः स्वरः। नृचक्षाः। चक्षङ् व्यक्तायां वाचि। अभिपूर्वस्य वाग्यार्थे यं धातुस्ताभिख्या क्रिमा नोत्तरेत्पाश्च बहुलं
सिद्धे स्युसुनः कृदुत्तरपदप्रकृतिस्वरः॥ ॥ अथ तृतीया॥ ॥ अग्ने दिवो अर्णमच्छा जिगास्यच्छा देवाँ ऊचिषे धिष्ण्या ये॥ यारोचने परस्तात्सूर्यस्य या
श्चावस्तादुपतिष्ठंत आपः॥ ॥ हे अग्ने त्वं दिवो अस्माद्युलोके वर्तमानं अर्णः अंभः अच्छाभिलक्ष्य जिगासि। धूमद्वारा प्राप्नोषि। किंच धिष्ण्याः धिये
बुध्युपहितं देहं उच्छंतीति। उष्णीकुर्वंतीति धिष्ण्याः। प्राणाभिमानिनो देवास्ता प्राणाख्या देवीन च्छानुपक्रमेण ऊचिषे समवेताकरोषि समवेता भवेत्य
कवानसीत्यर्थः। सूर्यस्य लोकस्य परस्तादुपरि रोचने रोचनामा यं लोकः। यत्रासेयं ज्योतिस्तपति तस्मिन्भासमाने रोचनाख्ये लोके या आपो विद्यंते अ
वस्तात्सूर्यलोकादधस्तादंतरिक्षलोके पश्चाप उपतिष्ठंते वर्तंते ताउभयीरपस्त्वं प्रेरयसि। उक्तार्थो वाजसनेयिभिः सान्त्वमभिहिता। आयो वा अस्य ... राम
दिवोर्णस्तात्एषधूमेनाच्छेत्यच्छा देवाँ ऊचिषे धिष्ण्याय इति प्राणा वै देवा धिष्ण्यास्तेहि सर्वाधियइत्ययारोचने परस्तात् तानेष सचते रोचन इति रो ३६
चनो ह नामैष लोको यत्रैष एतत्तपति तद्या श्चैतं परेणापो या श्चावरेणाता एतदाकेहेनि। ताउभयीरपस्त्वप्रेरयसीति। अर्णं अंगगमावित्यस्मादुदके
उदेत्यसुन्नामुडागमश्च। अर्थः तथा पातेनलितापासु विमर्थः। नकार लोपश्चांदसः। नित्यत्वाद्धा द्युदात्तः। मीस्कलो ग्रहेंदसीत्ययं धातुः। धकाराक्

यश्चेच्छमुत्तमं धनं। नोक्षमर्थ्यं ग्रहे प्रयच्छक्षोतीति। ऋतिरक्षणाइत्यस्य लोटि रूपं। स्वधर्मस्त्वे अंगभूता धर्माणो यस्येति बहुव्रीहौ पूर्वपदप्रकृतिस्वरः। श्रेष्ठः
प्रशस्यशब्दादतिशायने इष्ठन् प्रशस्यस्य श्र इति आदेशः। गुणः। एकादेशः स्वरः। धेहि। दधाते लेटि वायं। हुङ् स भक्तो कुहलोर्यदिति यं तादेउ वदेत्या
दिना घुदात्तत्वं। एतिस्तुशास्त्वित्यादिना क्यप्रत्ययेण तस्वेनहुङ॥ ॥ अथ तृतीया॥ ॥ तुभ्यं स्तोका घृतश्चुतो ग्ने विप्राय संत्य॥ ऋषिः श्रेष्ठः समिध्यसे यज्ञस्य प्रा
विता भव॥ ॥ सत्य यद्भ्यः संभजनीय यद्वाय हेभ्यः फलप्रद हे अग्ने विप्राय मेधाविने तुभ्यं त्वदर्थं घृतश्चुतः घृतक्षरणयुक्ताः युष्मच्छंदस्य ङयि तुभ्यम
ह्यो ङ्यीति तुभ्यादेशः। ङे प्रथमयोरमिति किंचु नस्कि विदीर्घश्रृति दीर्घनिलोपाभावश्चतो भाषः तत्र साधुरिति वा छंदसीति तत्रसाधुरिति वायत्प्रत्ययः।
यस्येति लोपः। आमंत्रितत्वान्निघातः। इध्यसे। इंधी दीप्तौ। कर्मणि यक् क्लित्वादनुनासिकलोपः। निघातः। प्राविता अवरक्षणादिषु तृन्निति रूपं। समासस्वरः।
भव निघातः॥ ॥ अथ चतुर्थी॥ ॥ तुभ्यं श्चोतंत्यध्रिगो शचीवः स्तोकासो अग्ने मेदसो घृतस्य॥ कविशस्तो बृहता भानुनागा हव्याजुषस्व मेधिर॥ ॥ अध्रि
गो अध्रितगमन संततगमनस्वभाव अतएव शचीवः शक्तिमन हे अग्ने तुभ्यं त्वदर्थं मेदोरूपस्य हविषः घृतस्य स्तोकासो विंदवः श्चोतंति स्रवंति। अस्मा
कं विशस्तः कविभिः कर्माभिज्ञैर्होत्रादिभिः स्तुतः त्वं बृहता प्रभूतेन भानुना तेजसा सहितः सन् आगाः अस्मादीयं यज्ञं आगच्छ। आगत्य च मधि
र प्राज्ञ वन्त्यग्ने हव्या अस्माभिर्दीयमानानि नः तानि हवींषि जुषस्व सेवस्व। अध्रिगो गमनं गो रिति गम्यः स्व प्रगता विल्यस्य भावगमः दिरितिडः। अध्रित
गोत्यीनत्यत्र गोस्त्रियोरुपसर्जनस्येति गो शब्दस्य ह्रस्वत्वं। धृतगा शब्दस्य पृषोदरादित्वात् धिभावः। संबोधने संबुद्धो चेति गुणः। अपादित्वान्निघातः। शची
वः मतुयोमतुवसोरुरिति रुत्वं। कविशस्तः शसु स्तुता वित्यस्मात् छयोमनुनासिकलोपः। यस्य विभाषेतीट्प्रतिषेधः। थाथ अंत्यास्वमिश्रकारणामित्यंतोदा

तृ॰सं॰भा॰१

रलोपं छांदसः। प्रत्ययस्वरेणांतोदात्तः॥ ॥अथ पंचमी॥ ॥ इळामग्न इति॥ एषा सूक्ते पूर्वमेव व्याख्याता॥ ॥इति तृतीयस्य प्रथमे द्वाविंशो वर्गः॥२२॥
निर्मथितः सुधित इति पंचर्चमेकादशं सूक्तं। अत्रानुक्रमणिका। निर्मथितो देवश्रवा देववातश्च भारतौ स्तुतिर्धासतो बृहतीति भरतस्य पुत्रौ देवश्रवा देववातश्च
ऋषी। तृतीयासतो बृहती। शिष्टास्त्रिष्टुभः। अग्निर्देवता। आ होतेत्यादिसूक्तदशकस्य उक्तो विनियोगः॥ प्रातरनुवाके आश्विनशस्त्रे च। इ
ळामग्न इत्यस्या विनियोगोसकृदुक्तः॥ ॥तस्मिन्सूक्ते प्रथमा॥ ॥निर्मथितः सुधित आ सधस्थे युवा कविरध्वरस्य प्रणेता॥ जूर्यत्स्वग्निरजरो वनेष्वत्रा
दधे अमृतं जातवेदाः॥ ॥भारतावृषी स्तोत्रं कुर्वाते। योग्निर्निर्मथितः अग्निष्टोमादिकर्मस्वरण्योः नितरां मथितः स सधस्थे यजमानगृहे सुधितः गार्हप
त्यादिषु कुंडेषु सुष्ठु निहितः निधाय च काष्ठप्रक्षेपेण प्रज्वाल्यमानो युवा प्रबुद्धः अत एवाध्वरस्य ज्योतिष्टोमादेः प्रणेता प्रकर्षेण नेता निर्वोढकः नेतृत्वादे
व कविः क्रांतदर्शी। तथाविधो जातवेदाः सर्वविषयाभिज्ञानवान् सोग्निः वनेषु महारण्येषु जूर्यत्सु दावाग्निसंबंधाज्जूर्यमाणेषु जरां गच्छत्सु प्राप्नुवत्स्वपि स्व
यमजर एव जरारहितः प्रत्युत दीप्यमानः सन् अत एवं कृतिं कुर्वाणेषु अमृतं क्षयरहितं क्षयप्रभृतमन्नमादधे निदधाति। सुधितः। दधातेः कर्मणि निष्ठायां सुधि
तवसुधितनेमधितेत्यादिना इडित्यादेशः। गतिरनंतरः गतेः प्रकृतिस्वरत्वं। जूर्यत्सु जॄ। व्यत्ययेन शतृप्रत्ययः। दिवादित्वाच्छ्यन्। नित्वादाद्युदात्तः। अजरः।
जॄष् वयोहानावित्यस्मात् ... विताय मः। गुप्ताः नभो जरमरमित्रमृता इत्युत्तरपदाद्युदात्तत्वं। दधे। दधातेर्वर्तमाने लिटि रूपं। जातवेदाः। जनी प्रादु
र्भावे इत्यस्य जनसनखनां सञ्झलोरित्याकारः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरः॥ ॥अथ द्वितीया॥ ॥अमंथिष्टां भारता रेवदग्निं देवश्रवा देववातः सुद
क्षं। अग्ने विपश्य बृहताभि रायेषां नो नेता भवतादनु द्यून्॥ ॥हे अग्ने भारता भरतौ भरतस्य पुत्रौ देवश्रवा देववातश्चोभौ सुदक्षं शोभनसामर्थ्यं

राम
२१

तं रेवत् रयिमंतं अग्निं अगतादिगुणोपेतौ अमंथिष्टां अग्निष्टोमादिकर्मप्रत्यर्थं अलूहतां। मथानेन न्याम्युत्पादितइत्यर्थः। तादृशस्त्वं बृहता प्रभूते
नारायाधनेन सहितः सन् अभि अभिमुखो भूत्वा विपश्य अस्मान्विशेषेणानुग्रहदृष्ट्यावीक्षस्व। किंच। द्यून्। द्युशब्दोहर्वाची वक्तो द्युरितिनामसुपा
ठात्। द्यूननु सर्वेषु दिवसेषु नो अस्माकं इषां अन्नानां नेता अनेता भवतात्। अमंथिष्टां। मथ विलोडन इत्यस्मात् लुङि सिच। वदव्रजहलंतस्याच इति वृ
द्धौ प्राप्तायां नेटीति प्रतिषेधः। तस्थस्थमिपामित्यादिना तामादेशः। पादादित्वादनिघातः। अट् स्वरः। भारता। भरतस्यापत्यमित्यर्थे उत्सादित्वाद्वृ
तद्धितेष्वचामादेरित्यादिना वृद्धिः। ञित्स्वरः। अश्रुत्वान्नीति कर्मण्यसुन्। देवैः श्रूयते प्रख्याप्यते सावितिदेवश्रवा ऋषिः। उत्तरपदं प्रकृतिस्वरत्वे
प्राप्ते गतिकारकयोरस्मात्कर्मणि क्तः। देवैरिष्यमाणेन यां प्राप्ताः देववात ऋषिः। तृतीया कर्मणीति पूर्वपदस्वरः। घन् घ अभिगमने। द्युतदीप्तौ वा। उ
चेत्यनुवृत्तौ द्युयुवाभ्यां चेति योजनसूत्रेण प्रत्ययः। डित्त्व द्युते अस्वाद्ये श्वेति डुस्प्रत्ययः। अभिगच्छंत्यस्मिन्स्वर्गमेतं देशं प्राणिन इति द्योतनकिरणसं
बंधादिति वा द्युः। दिवसः। प्रथमयोः पूर्वसवर्णदीर्घः। तस्माच्छसो नः पुंसीति सकारस्य नकारः॥ ॥अथ तृतीया॥ ॥दश क्षिपः पूर्व्यं सीमजीजनन्त्सुजातं मा
तृषु प्रियं। अग्निं स्तुहि दैववातं देवश्रवो यो जनानामसद्वशी॥ ॥हे अग्ने देवनातस्याक्षिप्यंते कर्मकरणार्थमिति क्षिपोंगुलयः। ता अदशा बहुदयस्य
प्रथनसाधनत्वेनतत्र हत्यंगुलयो दशसंख्याकाः तादृशोंगुलयः पूर्व्यं पुरातनं सीमेनं त्वां अजीजनन् उदपीपदन्। हे देवश्रवाः मातृषु अरण्योः।
सुजातं सुष्ठूत्पन्नं अत एव प्रियं कमनीयं दैववातं देववातेन संपादितं एतमग्निं स्तुहि। योग्निः जनानां स्तोतॄणां यजमानानां वशी वशवर्ता कर्मणां स्वायत्तीक
ण प्रवर्तको असत् भवति। तं स्तुहीति पूर्वेणान्वयः। दशः। दंश दशने। कनित्यनुवृत्तौ उणादिके तिकनिन्। नित्स्वरः। क्षिपः। क्षिपप्रेरणे। ॐ णादिकः कर्मणि कि

ऋ॰सं॰भा॰१

पणिग्यंते प्रेर्यंते कर्मस्विति क्षिपो गुलयः॥ धातुस्वरः। अजीजनन्। जनी प्रादुर्भावे। हेतुमत्यस्य लुङि चङि। द्विर्वचनसन्वद्भावाभ्यासेत्वदीर्घाः। निघातः। सुहि
तुधृ सुतावित्यस्य लोटि रूपं। अदादित्वाच्छपो लुक्। निघातः। देववातं तेन निर्मथितमित्यर्थं तेन निर्मथितमित्यण्। प्रत्ययस्वरः। असत्। असु भुवि। अस्य लङ्यड्
आगमः। यद्वृत्तयोगादनिघातः॥३॥ अथ चतुर्थी॥ नि त्वा दधे वर आ पृथिव्या इळायास्पदे सुदिनत्वे अह्नां॥ दृषद्वत्यां मानुष आपयायां सरस्वत्यां रेवदग्ने
दिदीहि॥४॥ हे अग्ने इळायाः गोरूपधारिण्याः पृथिव्याः भूमेर्वरे वरिष्ठे उत्तरवेद्याख्ये अह्नां सुदिनत्वे शोभनदिनत्वार्थं पुसुदिनेषु इंद्रादयो
वरीयांसः देवा इज्यंते तानि सुदिनानि तदर्थं त्वा त्वां निदधे। अमंतानिदधामि। उत्तमानि स्थानानि दर्शयति। दृषद्वत्यां दृषद्वती नामका विनदी मानुष
मनुष्यं संचरणे विषायतीरे आपयायां अपयानामिका च नदी तस्यां सरस्वत्यां नद्यां एतेषूत्तमेषु स्थानेषु रेवता धनयुक्तं यथा भवति दिदीहि। दीप्य
स्व। महर्षयः सरस्वतीति। रे खलु यज्ञादिकर्माण्यकार्षुः। अग्रह दधिक्षिगमश्चेत्यपधि वादेनुदात्तत्वे धातुस्वरः। दृषद्वत्यां दृ विदारणे। दृणातेषुक्स्व
श्चेत्यादिना षुगागमः। धातोर्ह्रस्वश्च। दृषद उपला यस्यां संतीति मतुप्। मलयड्गितं तस्य वत्वं। स्वरविधौ व्यंजनमविद्यमानवदित्यस्याः परिभाषाया अ
नाश्रयणाभावा उदात्तनाभावः। अदिप्रत्ययस्वरः। सरस्वत्यां। सरः अक्षेसुनंतत्वादाद्युदात्तः। तदस्यास्तीति मतुप्। अदुपधत्वात्स्यवत्वं। उगितत्वात् ङी
प्। दिदीहि। दिवु क्रीडादावित्यस्य यङ्लुकि रूपं॥४॥ अथ पंचमी॥ इळामग्न इति॥ व्याख्यातयमित्युपेक्षिता॥५॥ इति तृतीयस्य प्रथमे त्रयोविंशोव
र्गः॥२३॥ अग्ने सहस्वेति पंचर्चं द्वादशं सूक्तं। अत्रानुक्रमणिका। अग्ने सहस्व गायत्रमंत्यानुष्टुबिति। ऋषिर्गाथिनो विश्वामित्रः। अग्निर्देवता। अंत्यानु
ष्टुप् शिष्टा गायत्र्यः। सूक्तविनियोगो लैंगिकः। प्रातरनुवाके आश्विनशस्त्रे च प्रथमावर्ज्यं तस्य सूक्तस्य विनियोगः। अथेतस्या इति खंडे सूत्रितं॥

राम
३४

मनेवर्तमाने। जुहोत्यादिः। बहुलं छंदसीत्यभ्यासस्येत्वं। निघातः। ऋचीषे ऋ गतौ। ऋ ऊत्यव्यचक्रायो याचीत्यनस्य ङित्वाद्धातोर्गुणत्वं डुवो वा
विरतिव न्यादेशः। असंयोगाल्लिट् कित्। इति कित्त्वाद्वचिस्वपियजादीनां संप्रसारणं। अभ्यासस्य लिट्यभ्यासस्योभयेषामिति संप्रसारणं। आर्धधातुकेड्-न्
निघातः। धिष्ण्या। उष उष दाहे। धिष्णु उल्कं नीतिसानसिधामसिपधर्मासितं डुलां कुत्रावर्वाले ल्य पन्नस्य स धिष्ण्याः शल्याङ्गि निपातनाय। तु डागमः
ध्यात्वाद्दिलोपो पपदर्हस्वत्वादयः। सर्वे सिद्धा भवंतिनित्वाद्य्युदात्तः। अवस्तात्। अवरशब्दात्दिक्शब्देभ्यः सप्तमी पंचमीत्यादिना अस्तातिः। अस्मिन्त्रिभाषा
वरस्येति अवादेशः। प्रत्ययस्वरः। उपतिष्ठते आगति निरत्नो उपपूर्वात्तिष्ठतेरकर्मकात्त्वेत्यात्मनेपदं। यद्वृत्तयोगादनिघातः॥११॥ अथ चतुर्थी॥ पुरीष्या
सो अग्नयः प्रावणेभिः सजोषसः॥ जुषंतां यज्ञमद्रुहो नमीवा इषो महीः॥४॥ पुरीष्यासः पुरीषसः परस्परसंगताः यज्ञं अस्माभिः क्रियमाणमग्निच
यनपूर्वकमिति सोमयागं जुषतां सेवतां। किंच अद्रुहः अद्रोग्धारे पूर्वं अनमीवाः रोगादिवर्जिताः महीः महत्यः इषः ऊर्जः रोगादिरहितान्यन्नान्यस्म
भ्यं प्रयछंतु। पुरीष्यासः पृ पालनपूरणयोः। इषिन्त्रित्यनुवृत्तौ पृ भ्यां कित् इतीषप्रत्ययः। किं वा कित्त्वात् गुणप्रतिषेधे उदोष्ठ्यपूर्वस्येत्युत्वे रपरः। पृ
णाति पूर्यते वैभिरिति। पुरीषं पृणातेः पूरयतेर्वेति यास्कः। तदर्हतीति पुरीष्याः। छंदसि वेति थ प्रत्ययः। यचिभमिति भसंज्ञायां यस्येति लोपः। प्रत्ययस्वरः
प्रवणेभिः वन षण संभक्तौ इत्यस्मात् सिसंज्ञायां घः प्रापणेति करणे यप्रत्ययः। प्रकर्षेण वन्यंते संभज्यंते संस्पृश्यंते मदे मिरिति प्रापणा त्वानित्वाणि
प्रतिरंत इत्यादिना णत्वं। वनं समासमित्यं तोदात्तत्वं। कृदुत्तरपदस्वरः। यद्वा। अञ्ज गतौ। प्रवणं नेगछंते मृत्स्वेन नं प्रतीति चलनं शायादिकर्मका घञ्। इत्व
रा पूर्वस्मिन् पक्षे अवग्रहाभावश्छांदसः। तिवक्तव्यं। जुषतां। जुषी प्रीतिसेवनयोरित्यस्य लोटि रूपं। पादादित्वदनिघातः। महीः मह पूजायां। औणादिक इप्रत्ययः

वैदाज्ञाग रणोपेत आहूतदेवताह्वानार्थं अस्माभिराहूत सहसः। सूनो बलस्य पुत्र हे अग्ने मम संबंध्यस्मिन्यक्षे यद्‌द्यामासीर्णमिदं बर्हिः तत्र
ऋ·सं·भा·१ आसीदत आसीदजागृवे। जागृनिद्राक्षये जागृभ्याः किविनिक्विन्नूकिवत्वात् गुणः। जागतीति जागृविः। जागृविजागरणादिति या स्कः। संबुद्धेश्चेतिगु
णः। ह्रस्वादिति सोर्लोपः। निघातः। सहसः। सूनो सुप आमंत्रिते पराङ्गवद्भावादनुदात्तत्वे पादादित्वादनिघातः। सहः। षल्दृविशरणगत्यवसादनेष्वित्य
स्य छांदसे लुङि च्‍लि दित्वादड्निघातः। मम। अस्मच्छब्दस्य षष्ठ्येकवचने ममादेशः। युष्मदस्मदोर्ङसीत्याद्युदात्तत्वं॥॥ अथ चतुर्थी॥ अग्ने विश्वे
भिरग्निभिर्देवेभिर्महया गिरः॥ यज्ञेषु य उ चायवः॥४॥ हे अग्ने देवेभिः द्योतमानैः विश्वेभिः सर्वैः अग्निभिः यष्टव्यतयाऽस्थितैरग्निभिः सहितस्त्वं चायवः
उत्त विषयस्तुतिरूपाभिर्वाग्भिः अन्नप्यमनस्कतथा प्रसकारये विद्यते तेषां यज्ञेषु ज्योतिष्टोमादिषु स्तोत्रशस्त्रादिभक्षणानि महच्च पूजय। मह पूजा
यां। चुरादिः। स्वदंतत्वादुपधावृद्ध्यभावः। निघातः। चायवः। चायृ पूजानिशामनयोः कृत्वादयश्चेति कुप्रत्ययः। प्रत्ययस्वरः॥॥ अथ पंचमी॥ ५
अग्ने दा दाशुषे रयिं वीरवंतं परीणसं॥ शिशीहि नः सूनुमतः॥५॥ हे अग्ने दाशुषे तुभ्यं हविर्दत्तवते यजमानाय वीरवंतं पुत्रं युक्तं परीणसं प्रभूतं
रयिं धनं देहि। सूनुमतः पुत्रपौत्रादिसहितान्नोऽस्मान् शिशीहि। धनप्रदानेन तीक्ष्णीकुरु दाः। डुदाञ् दान इत्यस्य लुङि सोदाधीसा च्‍लि सहो
तिनिपातनात् द्विर्वचनाभावश्च इड्भावश्च घुसंज्ञायां संप्रसारणं प्रत्ययः स्वरः। परीणसं। परिपूर्वान्नसतेर्व्याप्त्यर्थात् क्विप अन्येषामपि दृश्यत इति।
दीर्घः। शिशीहि। शो तनूकरणे। व्यत्ययेन श्लुः। दीर्घश्छांदसः। हेरपित्वादंतोदात्तत्वं॥॥ इति तृतीयस्य प्रथमे चतुर्विंशो वर्गः॥ ॥ अग्ने दिव इति पंच
र्चं त्रयोदशं सूक्तं। वैश्वामित्रं। अत्रेयमनुक्रमणिका। अग्ने दिवो विराजमुपान्त्यां द्वीविशद्धं छंदसि। अग्नि इंद्रश्चेति याज्या। अग्न इंद्रश्च दाशुषो दुरोण
इति याज्येति सूचितत्वात्॥॥ तस्मिन्सूक्ते प्रथमा॥॥ अग्ने दिवः सूनुरसि प्रचेतास्तना पृथिव्या उत विश्ववेदाः॥ ऋधग्देवाँ इह यजा चिकित्वः॥ ॥ विश्वा
मित्रस्तौति॥ हे अग्ने विश्ववेदाः सर्वविषयज्ञानवान् प्रचेताः कर्मविषयज्ञानवान् त्वं दिवः द्युलोकाभिमानिदेवतायाः सूनुरसि पुत्रो भवसि। उत अपि
च पृथिव्याः पृथिव्यभिमानिदेवतायाः तना तनयोऽसि। किंच चिकित्वान् चेतनवान् हे अग्ने इहास्माभिः क्रियमाणेऽस्मिन्कर्मणि देवान् यजनीयानिंद्रा
दिदेवान् ऋधक् पृथक् क्रमेण यज हविःप्रदानेन पूजय। अस्मिंश्च सनुवीत्यस्य लुङि तासस्त्योर्लोप इति सलोपः। निघातः। विश्ववेदाः। बहुव्रीहौ विश्वं
संज्ञायामिति विश्वस्यांतोदात्तत्वं॥॥ अथ द्वितीया॥॥ अग्निः सनोति वीर्याणि विद्वान्त्सनोति वाजममृताय भूषन्॥ स नो देवाँ एह वहा पुरुक्षो॥॥ विद्वान्
कर्माभिज्ञोऽग्निः भूषन् स्वतेजसा सर्वं जगत् भूषयन् अलंकुर्वन् अमृताय मरणधर्मरहिताय इंद्रादिदेवाय वाजं हविर्लक्षणमन्नं सनोति प्रयच्छ
ति। पुरुक्षो पुरोडाशादिबहुविधधनोपेत हे अग्ने स तादृशस्त्वं नः अस्माकं संबंधिनि इहास्मिन्यज्ञे देवान्यजनीयान्देवानावह आह्वय सनोति। षणु
दाने। तनादित्वादुप्रत्ययः। प्रत्ययस्वरः। पादादित्वादनिघातः। भूषन्। भूष अलंकारे। अंतर्भावितण्यर्थः। वा चुर्लसार्वधातुलसार्वधातुकस्वरेणाद्य
दात्तत्वे धातुस्वरः। शिष्यते। वहावहे लोटि रूपं। पुरुक्षो। पुरवः क्षुधाऽन्नानि यस्येति पुरुक्षुः। अत्यलोपश्छांदसः। संबुद्धौ चेति गुणः॥ ॥ अथ तृतीया॥॥
अग्निर्द्यावापृथिवी विश्वजन्ये आ भाति देवी अमृते अमूरः॥ क्षयन्वाजैः पुरुश्चंद्रो नमोभिः॥॥ अमूरः अमूढः सर्वज्ञः क्षयन् ईश्वानः सर्वस्य जगतः
अत एव पुरुश्चंद्रः पुरुश्चंद्रः बहुहिरण्योपेतः यद्वा बहुदीप्तिस्वरूपः वाजैर्बलैर्नमोभिः अन्नैश्च सहितः सोऽग्निः विश्वजन्ये विश्वस्य जनयित्र्यौ य
द्वा विश्वजन्ये उत्पाद्ये याभ्यां ते देवी द्योतमाने अमृते मरणधर्मरहिते द्यावापृथिवी द्यावापृथिव्यौ आसमंतात्प्रकाशयति। द्यावापृथिवी। दिवश्चादस्य

राम
२९

दिवो द्यावेति द्यावादेशः ॥ आद्युदात्तः । पृथिवी शब्दो ङीषंतत्वेनांतोदात्तः । देवताद्वंद्वे चेत्युभयोः प्रकृतिस्वरत्वं । बहुव्रीहौ विश्वं संज्ञायामिति पूर्वपदां
तोदात्तः ॥ तत्पुरुषे स्वरश्चिंतनीयः । आभीमाति भा दीप्तौ । अंतर्भावितण्यर्थः । क्षयन्तु । क्षि ऐश्वर्ये । शपो लुक् सार्वधातुकस्वरेणानुदात्तत्वे धातुस्वरः । पुरु
श्चंद्रः ह्रस्वाच्चंद्रोत्तरपदे मंत्र इति सुडागमः । श्चुत्वेन शकारः । उत्तरपदांतोदात्तत्वं ॥ ॥ अथ चतुर्थी ॥ ॥ अग्न इंद्रश्च दाशुषो दुरोणे सुतावतो यज्ञमि
होपयातं ॥ अमर्धंता सोमपेयाय देवा ॥ ॥ हे अग्ने त्वमिंद्रश्चोभौ ---- युवां अमर्धंता अनागमनेनाय ज्ञहिंसामकुर्वंतौ संतौ सुतवतः सोमाभि
षवं कुर्वतः दाशुषः हविर्दत्तवतो यजमानस्य दुरोणे गृहे क्रियमाण इत्यस्य लोटि रूपं । निघातः । अमर्धंता । मृधु हिंसायां इत्यस्य शतरि रूपं । न
भा नञा समासः । सुपो ङादेशः । तत्पुरुषेणाव्ययस्वरः । सोमपेयाय पापाने । अचो यदिति यत् । ईद्यतीति आकारादेशः । आर्धधातुकलक्षणो गु
णः । तदुत्तरपदप्रकृतिस्वरः ॥ ॥ अथ पंचमी ॥ ॥ अग्ने अपां समिध्यसे दुरोणे नित्यः सूनो सहसो जातवेदः ॥ सधस्थानि महयमान ऊती ॥ ॥
। सहसः सूनो बलस्य पुत्र जातवेदः जातप्रज्ञ हे अग्ने नित्यः विनाशी ऊती ऊत्या रक्षणेन सधस्थानि प्राणिनां निवासभूतान् लोकान् महयमानः प
रिचरंस्त्वं अपां दुरोणे अपां सधस्थाने अंतरिक्षे समिध्यसे सम्यग्दीप्यसे । दुरोणे अवरण इत्यस्मादौणादिकोनक प्रत्ययः । ज्वरत्वरेत्यादिना ऊठ् गुणः
दुरोणं दुः स्थिति गृहनाम दुरवा भवंतीति यास्कः । प्रत्ययस्वरः । महयमानः । मह पूजायां । व्यत्ययेन शानच् । शपा न चो लसार्वधातुकस्वरेणानुदात्तत्वे
णिच्स्वरः । ऊती । अव रक्षणादिषु । ऊतियूतिजूत्यादिना निपातनादंतोदात्तः । सुपां सुलुगिति तृतीयायाः सवर्णदीर्घः ॥ ॥ इति तृतीयस्य प्रथ
मे पंचविंशो वर्गः ॥ ॥ वैश्वानरं नवेति नवर्चं चतुर्दशं सूक्तं अत्रानुक्रमणिका । वैश्वानरं नव ऋचं वैश्वानरीयमाकृतीदृश आत्मनः स्तुतिर्वा पूर्वा

अग्न इळेति च तस्य इति अष्टुप्दयेष्टा व गेर्दानुरस्तु वा । अग्निरग्ने दाशुष इत्येषा आग्नेय्य इति खंडे सूत्रितं । अग्ने दा दाशुषे रयिं सयंता विप्र एषामिति
॥ तस्मिन्सूक्ते प्रथमा ॥ ॥ अग्ने सहस्व पृतना अभिमातीरपास्य ॥ दुष्टरस्तरन्नरातीर्वर्चो धा यज्ञवाहसे ॥ ॥ विश्वामित्रः स्तौति ॥ हे अग्ने पृतना अभि
योक्त्रीः सेनाः सहस्व अभिभव अभिमातीः । अभिमानिनः कर्मविघ्नकारिणः शत्रून् अपास्य अपनुद किं च दुष्टरः । दुष्टरनकेनापि तरितुं शक्यः । अ
त एव अरातीन् शत्रून् स्वतेजसा तिरस्कुर्वंस्त्वं यज्ञवाहसे यज्ञनिर्वाहकाय यजमानाय वर्चो धाः । अन्नं धेहि कुरु सहस्व । सह मर्षणे इत्यस्य लोटि रू
पं । आमंत्रितस्य विद्यमानत्वेन पादादित्वाद निघातः । अभिमातीः । माङ् माने । माकंमानः । भावे क्तिन् । अस्य लुग्विकरणत्वादित्वं न भवतः । अभितो मामं
येषां त इति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । अपास्य अस्यु क्षेपणे । दिवादेः । लोटि रूपं । दुष्टरः । तृ प्लवनतरणयोः । अस्माद् दुःकृच्छ्रार्थे खल् । लाद्विसर्जनीय
स्य सकारस्य षत्वं । लित्स्वरः । तरन् । तरतेः शतृ त्वे रूपं । अदुपदेशात् सार्वधातुकस्वरेणानुदात्तत्वे कृते धातुस्वरः । धाः दधातेश्छंदसि लुङि रू
पं । निघातः ॥ ॥ अथ द्वितीया ॥ ॥ अग्न इळा समिध्यसे वीतिहोत्रो अमर्त्यः ॥ जुषस्व सू नो अध्वरं ॥ ॥ हे अग्ने वीतिहोत्रः वीतिः प्रीतिविषयं होत्रमग्नि
होत्रादिकं यस्यासौ वीतिहोत्रः प्रतिमानित्यर्थः । अमर्त्यः मरणधर्मरहितस्त्वं इळा इळया मनुष्यैर्वेद्यां समिध्यसे । आज्याहुतिप्रक्षेपेण स्य
ज्वाल्यसे । तादृशस्त्वं नो अस्माकं अध्वरमिमं यज्ञं सु सुष्ठु जुषस्व । अङ्कुनिस्वीकरणेन सेवस्व । वीतिहोत्रः वी कांत्यादिषु अस्मात् कर्मणि मंत्रे वृषेत्य व
त्यादिना क्तिन् उदात्तः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरः । जुषस्व लोटि रूपं । शप्स्वरः । सुनि याति अस्य चेति संहितायां दीर्घः ॥ ॥ अथ तृतीया ॥ ॥ अग्ने द्युम्नेन
जागृवे सहसः सूनवाहुत ॥ एदं बर्हिः सदो मम ॥ ॥ द्युम्नेन स्वतेजसा सहसः जागृवे जागर्तीति जागृविः तस्य संबुद्धिः । लोकरक्षार्थं स्वतेजसा सहस

ऋ॰सं॰भा॰१

मित्यर्थे तस्येदमित्यण्। प्रत्ययःस्वरः। निचाय्य। चायृ पूजानिशामनयोः। ल्यपि ल्यप्यादि रूपं। तित्स्वरः। अनुषत्यं। अनुगछंत्यनेन। अवादय४ कृत्याद्य
र्थेत्वेति यायतिसमासः। सुधामादित्वात्स्वत्वं। निरुदकादित्वादंतोदात्तत्वं। सुदानुं। दाम् दाने। दानाभ्यां नुरिति कर्तरि नुप्रत्ययः। परादिश्छंदसि बहुलमिति उत्त
रपदाद्युदात्तत्वं। रथिरं। रथशब्दान्मत्वर्थे मेधारथाभ्यामिरन्निरचौ। वक्तव्याविति इरच्। तित्स्वरः। वसूयवः। वसून्यात्मन इछंत इति सुप आत्मनः क्यच्। अ
कृत्सार्वधातुकयोरिति दीर्घः। क्याच्छंदसीत्यु प्रत्ययः। अतोलोपः। प्रत्ययस्वरः। रण्वं तं। रवि गत्यर्थः। रण्वति। यज्ञं गछंतीति रण्वः। पचाद्यजंतः। तित्स्वरः।
कुशिकासः। कुशिकाद्यात्रशब्दाद्गोत्रमित्यर्थे विदादित्वादञ्। तस्य बहुषु प्रत्ययोत्वेति लुक्। हवामहे। ह्वयतेर्बहुलं छंदसीति संप्रसारणं। निघातः॥ ॥ अ
थ द्वितीया॥ ॥ तं शुभ्रमग्निमवसे हवामहे वैश्वानरं मातरिश्वानमुक्थ्यं॥ बृहस्पतिं मनुषो देवतातये विप्रं श्रोतारमतिथिं रघुष्यदं॥ ॥ योग्निः पूर्वमंत्रे प्रतिपा
दितः तं शुभ्रं द्योतमानं वैश्वानरं विश्वानरं संबंधिनं मातरिश्वानं मातर्यंतरिक्षे श्वसिति विद्युदादिरूपतया चेष्टत इति। मातरिश्वाग्निः उक्थ्यं उक्थैः शस्त्रैः
शंसनीयं बृहस्पतिं बृहतो यज्ञस्य पतिं पालकतया स्वामिनं विप्रं मेधाविनं श्रोतारं स्तोत्रादिमंत्रवाक्यं शृण्वंतं अतिथिं अतिथिवत्पूज्यतया यदृछं
या प्राप्तं रघुष्यदं रघु लघु स्यदो वेगो यस्येति क्षिप्रं गंतारं। यद्वा स्यदशब्देन तद्वा लक्ष्यते रघुस्यदः क्षिप्रं गंतेत्यर्थः। तं एवंविधं युक्तमग्निं अवसे रक्षाकर
णाय हवामहे कुशिकगोत्रा आवयं आह्वयामः। किंच। मनुषो मनुष्यस्य देवतातये यज्ञार्थं त्वामाह्वयाम। आशु शुभ्रं शुभदीप्तो। अस्मादुत्थापिते
चीत्यादिना कर्तरि रक्। कित्वाद्गुणाभावः। प्रत्ययःस्वरः। मातरिश्वानं। निर्माणहेतुत्वान्माता तां तरिक्षं तत्र श्वसिति प्राणितीति मातरिश्वाग्निः श्वन्नुक्षन्नित्या
दिना मातरिश्वन्शब्दः कन्प्रत्ययांतत्वेन निपातनात्पूर्वपदांतोदात्तत्वं। उक्थ्यं उक्थेन स्तोत्रेण स्तुत्यः तत्र भव इत्यर्थः। भवे छंदसीति यत्। तित्स्वरितत्वान्निस्व

राम ४१

रितः। देवतातये। देवएव देवतातिः स्वार्थे कृताति लू देवताति शब्देन यज्ञो लक्ष्यते। तत्संप्रदानकत्वाद्यज्ञस्य। लित्स्वरः। रघुस्यदं। स्यंदू स्रवण इत्यस्मा
त् घञंतः स्यंदशब्दः स्यदो जव इति निपातनादनुनासिकलोपः। कृदुत्तरपदप्रकृतिस्वरत्वं॥ ॥ अथ तृतीया॥ ॥ अश्वो न क्रंदं जनिभिः समिध्यते वैश्वानरः
कुशिकेभिर्युगेयुगे॥ स नो अग्निः सुवीर्यं स्वश्व्यं दधातु रत्नममृतेषु जागृविः॥ ५ यो वैश्वानरोग्निः कुशिकेभिः स्तोत्रं कुर्वाणैः होत्रादिभिः युगेयुगे प्र
तिदिनं समिध्यते। आज्याहुतिप्रक्षेपेण सम्यग्दीप्यते। तत्र दृष्टांतः। अश्वो नेति यथा जातो श्वः क्रंदन् हेषारवं कुर्वन् जनिभिः जनयित्रीभिर्वडवाभि
स्तनप्रदानेन प्रतिदिनं सम्यक्पोष्यते तद्वत्। अमृतेषु मरणधर्मरहितेषु देवेषु मध्ये जागृविः ज्वालया जाग्रत् दीप्यमानः सोअग्निः सुवीर्यं शोभनाप्ये
त्युक्तं स्वश्व्यं शोभनाश्वादिपशुयुक्तं। रत्नमुत्तमं धनं चास्माकं दधातु। विद धातु प्रयच्छतु। युगेयुगे। नित्यवीप्सयोरिति द्विर्वचनं। परस्याम्रेडितत्वादनुदा
त्तत्वं पूर्वपदप्रकृतिस्वरः। स्वश्व्यं। स्वश्वशब्दः कन्प्रत्ययांतः। आद्युदात्तः। बहुव्रीहौ आद्युदात्तं। द्व्यच् छंदसीत्युत्तरपदाद्युदात्तत्वं। यकारोपजनश्छां
दसः। यद्वा स्वश्वेषु साधवः स्वश्व्याः। तत्र साधुरिति यत्। यतोनाव इत्याद्युदात्तत्वं। बहुव्रीहौ पूर्वपदप्रकृतिस्वरः। दधातेर्लोटि रूपं। रमु क्रीडायां। रमेस्त्वेति
अधिकरणे न प्रत्ययः। नकारश्चांतादेशः। रमंते स्मिन्निति रत्नं निदित्यनुवृत्तेर्नौ आद्युदात्तः। जागृविः। क्रिन्प्रत्ययांतः। नित्वादाद्युदात्तः॥ ॥ अथ चतुर्थी॥ ॥
॥ प्रयंतु वाजास्तविषीभिरग्नयः शुभे संमिश्लाः पृषतीरयुक्षत॥ बृहदुक्षो मरुतो विश्ववेदसः प्रवेपयंति पर्वताँ अदाभ्याः॥ ॥ वाजाः वेगवंतो अग्नयः
प्रयंतु जलमभिलक्ष्य गच्छंतु वाजाश्च तेग्नयश्च तविषीभिर्मरुद्भिः शुभे जले संमिश्लाः संगताः संतः पृषतीः बिंदून् अयुक्षत। अयुंजन्। जले बिंदून् कु
र्वन् यद्वा वाजाः वेगवंतोग्नयः तविषीभिर्बलयुक्तैर्मरुद्भिः जलमनुलक्ष्य प्रयंतु गच्छंतु। ते च मरुतः शुभे जलेन संमिश्ला अग्निभिः संगताः संतः पृष

ती। श्वित्रवर्णा वाहनरूपा वडवा अयुक्षत। रथेषु मेघभेदनार्थं। अपां क्षरः। रथारूढास्ते विश्ववेदसः प्राणिकृतकर्माभिज्ञानयुक्ताः अदाभ्याः केनाप्य
ऋ॰सं॰भा॰१ तिरस्कार्याः मरुतः एवंविधा वा अमवः बृहदुक्षः प्रभूतसेक्तारः पर्वतान् मेघान् च्यावयंति यथाभूता वृष्टिर्भवति। तथा मेघान् चालयंति। तविषीभिः त
वगताविति सौत्रो धातुः अस्मान्नचेर्नि... इति टिषच्। नित्तवंति चरंत्याकाश इति तविषा वायवः। षिद्गौरादिभ्यश्चेति ङीप्। लिंगव्यत्ययः। नित्वादाद्युदात्तः।
पृषतीः पृषसेचने। पृष पालनपूरणयोरिति वा। अस्मात् वर्तमाने पृषद्बृहन्महदिति निपातनादतिप्रत्ययः। शतृवद्भावात्। उगितश्चेति ङीप्। अवंत
ति पृषतः शीकराः पृषंति पालयंतीति पृषत्यो वडवाः। अयुक्षत। युजिर् योग इत्यस्य लुङि सिचि रूपे निघातः। बृहदुक्षः। उक्ष सेचन इत्यस्मात् क्वि
प्। तदुत्तरपदप्रकृतिस्वरः। वेपयंति वेपृ कंपने। निघातः। पर्वतान्। पर्व पूरणे इत्यस्मात् भृमृदृशी इत्यादिना अतच्। पर्वति पूरयति भूमिमुदकेनेति पर्व
तो मेघः। व्यत्ययेनाद्युदात्तः॥१॥ अथ पंचमी॥ अग्निश्रियो मरुतो विश्वकृष्टय आ त्वेषमुग्रमव ईमहे वयं। ते स्वानिनो रुद्रिया वर्षनिर्णिजः सिं
हा न हेषक्रतवः सुदानवः॥२॥ अग्निश्रियः विप्रकृतमग्निं श्रयंतो विश्वकृष्टयः विश्वस्य वृक्षादेः कृष्टिराकर्षणं। नमनोन्नमादिलक्षणं कर्म येभ्यो
भवति। ते विश्वकृष्टयः। एवंविधाये मरुतो वियं तेषां च मरुतां त्वेषं दीप्तं उग्रं उद्गूर्णं अव रक्षणं। एमहे कुशिकाः कुशिकावयं आसमंताद्याचाम राम
हे। ते मरुतः रुद्रियाः रुद्रपुत्रा मरुतः वर्षनिर्णिजः। निर्णिक्शब्दो रूपवाची निर्णिक् वव्रिरिति तन्नामसु पाठात्। वर्षणं रूपं स्वभावो येषां ते वर्ष ४२
निर्णिजः। हेषक्रतवः हेषरवस्य कर्तुकरणं येषां ते कृतहेषारवाः सिंहा न सिंहा इव स्वानिनः शब्दं कुर्वंतः एवंविधास्ते मरुतः सुदानवः सुष्ठु ज
लस्य दातारो भवंति। अग्निश्रियः श्रिञ् सेवायां। क्विब्वचीत्यादिना क्विप् संप्रसारणाभावः धातोर्दीर्घश्च। जसि इयङादेशः। कृत्स्वरः। उग्रं ग

त्मनीगीतां योपाध्यायस्कृतिः॥ इति वैश्वानरं मनसेत्याद्यौ [illegible] जागतौ। प्रथमस्य वैश्वानरो अग्निर्देवता सप्तम्याद्यास्तिस्रस्त्रिष्टुभः। अग्निरस्मी
ति इत्यस्या अग्निः परं ब्रह्म वा देवता नवम्या उपाध्यायस्तुतित्वात् स एव देवता सप्तमी वा कृत्स्नस्य सूक्तस्य विश्वामित्र ऋषिः। सप्तम्याः ब्रह्म वा
त्मत्वाद्यस्य वा दृष्टत्वात्स ऋषिरित्येतन्न्यायेन ब्रह्म ऋषिः। वैश्वानरं मनसेत्यादि तृचः आभिप्लविके चतुर्थेऽहनि आग्निमारुते वैश्वानरीयो निविद्धानि
नियुक्तः। तृतीयस्येति खंडे सूत्रितं वैश्वानरं मनसेति तिस्र इति। अयमेव तृचो बृहस्पतिसवे आग्निमारुते वैश्वानरीये निविद्धानीयः। अयं नु वाजा
इति द्वितीय ऋचो बृहस्पतिसवे मारुते निविद्धानीयः। उभयमपि उशनस्तोमेनेति खंडे सूत्रितं वैश्वानरं मनसाग्निं निचाय्य प्र यंतु वाजास्तविषीभिरग्न
य इति। अग्निचयने संचितमनुशासने अग्निरस्मीत्येषा। अथाग्निं संचितमनुमीतमनुशंसेत्। पदिस्युपक्रम्य सूत्रितं। अग्निरस्मि जन्मना जातवेदा
इति त्रिभिर्मध्यमया वा चेति॥ तस्मिन्सूक्ते प्रथमा॥ वैश्वानरं मनसाग्निं निचाय्या हविष्मंतो अनुषत्यं स्वर्विदं। सुदानुं देवं रथिरं वसूयवो गीर्भी रण्वं
कुशिकासो हवामहे॥ विश्वामित्रः स्तौति। हे अग्ने हविष्मंतः संभृतहविष्काः वसूयवः धनमात्मन इच्छंतः कुशिकाः कुशिकगोत्रोत्पन्ना वयं वैश्वान
रं विश्वे नरा अग्निप्रणयनादिक्रियमाणे नारो यस्येति विश्वानरः कश्चित्तस्य संबंधि वैश्वानरः अपत्यमिति यावत्। यदा विश्वानर एव वैश्वानरः त
धितोऽन्यार्थो राक्षसवायसादिवत्। अनुषत्यं सत्येनानुगतं कर्मानुरूपफलप्रदाने सत्यप्रतिज्ञं स्वर्विदं स्वर्गादिलक्षणफलस्य ज्ञातारं अत एव सु
दानुं सुष्ठुफलस्य दातारं रथिरं रथवंतं अत एव रण्वं यज्ञानुगच्छंतं देवं द्योतमानं तमिममग्निं मनसा निचाय्य अंतःकरणेन एवंविधगुणविशिष्टत्व
मिति ज्ञात्वा गीर्भिः स्तुतिलक्षणाभिर्वाग्भिः हवामहे इह कर्मणि त्वां आह्वयामः। वैश्वानरं। नरे संज्ञायामिति पूर्वपदस्य दीर्घत्वं। विश्वानरस्येद

नाम॥ ॥साक्षात्कृतपरतत्वरूपोग्निर्हृष्टेन स्वात्मनः सर्वात्मकत्वादनुभावमाविष्करोति। हे कुशिकाः भोक्तृभोग्यभावेन द्विविधं हीदं सर्वं जगदेतावद्वा इ-
ऋ·सं·भा·१ दमन्नं चैवान्नादश्च सोम एवान्नमग्निरन्नाद इति श्रुतेः। तत्र सकलभोक्तृवर्गरूपेणान्नादोग्निः। स चाग्निर्वाय्वादित्यभेदेन त्रेधा भूलोकपृथिव्यंतरिक्षद्युलो-
कानधितिष्ठति। तदुक्तं वाजसनेयके। स त्रेधात्मानं व्यभजत। आदित्यं तृतीयं वायुं तृतीयमिति। तत्र सोग्निरहं जन्मनैव जातवेदा अस्मि श्रवणम-
ननादिसाधननिरपेक्षेण स्वभावत एव साक्षात्कृतपरतत्वस्वरूपोस्मि। घृतं मे चक्षुः विश्वस्य विभासकं मम स्वभावभूतप्रकाशात्मकं चक्षुः तद्घृत-
मिदानीमर्त्यं तं दीप्तं यदेतदमृतं कर्मफलं दिव्यादिव्यविविधविषयोपभोगात्मकं तन्मे मम आसन् आस्ये वर्त्तते। सकलभोक्तृवर्गात्मना स्वयमेवाव-
स्थानात्। एवं स्वात्मनः पृथिव्यधिष्ठातृरूपतामाह। अर्को जगत्स्रष्टा प्राणः सोर्चन्नचरत्तस्यार्चत आपो। अजायन्तार्चते वै मे कमभूदिति तदेवार्कस्या-
र्कत्वमिति श्रुतेः। स प्राणोहं त्रिधातुः त्रेधात्मानं विभज्य तत्र वाय्वात्मना रजोन्तरिक्षस्य विमानः विमाता। अधिष्ठातास्मि तथादित्यरूपेण द्युलोकाधि-
ष्ठाता आदित्योहमस्मि। एवं भोक्तृरूपमात्मनोनुसंधाय भोग्यरूपतामप्यनुसंधत्ते। यद्धविर्भोग्यं प्रसिद्धमस्ति तदप्यहमेवास्मि। यद्वा अहमग्निर-
स्मि देवानां हविःप्रापणादंगनादिगुणयुक्तोस्मि। किं च जन्मना उत्पत्त्या जातवेदाः जातप्रज्ञोस्मि। अथवा जातसर्वस्वात्मरूपतया यो वेत्तीति जातवेदाः राम
सर्वात्मक इत्यर्थः। तत्कथमित्युच्यते। घृतं मे चक्षुः यदेतद्घृतं प्रसिद्धमस्ति। तन्मे चक्षुःस्थानीयं। यथा लोके चक्षुर्भासकं एवं घृतं मयि प्रक्षिप्तं ज्वालमुत्पा- ४२
दयत् मम भासकं अमृतं प्रभारूपं यदमृतं तदविनाशि ज्योतिः मे मम आसन् आस्ये वर्त्तते त्रिधातुः प्राणापानव्यानात्मना त्रिधा वर्त्तमानः। अर्कस्तु नी-
य प्राणोस्मि सोप्यहमेवास्मि तथैव रजसोन्तरिक्षस्य विमानः विशेषेण माता परिच्छेत्ता वायुश्चाहमस्मि। किं बहुना आज्यपुरोडाशादिरूपं यदेतद्धविर-

स्ति तदुपलक्षितं सर्वमप्यहमस्मि। सर्वं खल्विदं ब्रह्मेति श्रुतेः। नामशब्दः प्रसिद्धौ। एतदनेनाग्नेः सर्वात्मकत्वप्रतिपादनेन परब्रह्मत्वमुक्तं भवति। लक्ष्म-
णश्चिन्त्यक्ता यथा वाचि। उत्पत्तिरित्यनुवृत्तौ चक्षेः शिच्चेत्युसिन्नुशिद्ध्वावीन्नुस्वाभोदेशाभावः। नित्स्वरः। आसन् आस्य आस्यशब्दस्य पद्दन्नोमासित्यादि-
ना आसन्नादेशः। सुपां सुलुगिति सप्तम्या लुक्। विमानः। माङ् माने। कृत्यल्युटो बहुलमिति। कर्त्तरि ल्युट्। लित्स्वरः। अजस्रः। जसु मोक्षणे। नमु-
पूर्वः। नमिकंपिस्म्यजसकमहिंसदीपो र इति ताच्छीलिको रप्रत्ययः। नञ्पूर्वो जसिस्तेनेरं तथैव वर्तते नञ्स्वरः। जस्य उपक्षयो वा॥ ॥ अथाष्टमी॥ ॥ त्रि-
भिः पवित्रैरपुपोद्ध्यर्कं हृदा मतिं ज्योतिरनु प्रजानन्॥ वर्षिष्ठं रत्नमकृत स्वधाभिरादिद्द्यावापृथिवी पर्यपश्यत्॥ ॥ सर्वात्मकोग्निः हृदा अन्तःक-
रणरूपया मतिं मननीयं ज्योतिः स्वप्रकाशरूपं परब्रह्माख्यं तेजः अनुप्रजानन् श्रवणमननादिकर्मणा प्रकर्षेण संशयविपर्यासभावनाबुद्धिनि-
रासेन स्वात्मस्वरूपतया जानानः सन् पवित्रैः पावनैस्त्रिभिरग्निर्वायुसूर्यैः अर्कमर्चनीयं स्वात्मानं अपुपोत् शोधितवानपि निर्मलतया पावनं परिशि[illegible]
खलु। यथा दशापवित्रेण सोमं पावयति। तद्वत् एवं जानन् अग्निः वर्षिष्ठं स्वमात्मानं उत्तमं स्वधाभिः स्वानुलोकान् दधातीति स्वधा। तैरग्निर्वायुसू-
र्यैः रत्नं रमणीयं अकृत अकार्षीत्। आदित् अनंतरमेव आत्मनि जाते सति द्यावापृथिव्यौ तदुपलक्षिते भवतीति श्रुतेः। पवित्रैः पूङ् पवने। अस्मात्कर्त-
रि चर्षिदेवतयोरिति। देवतायामभिधेयायां कर्त्तरि इत्रः। अस्य यङ्लुगंतस्य रूपं। संज्ञापूर्वकस्य विधेरनित्यत्वादभ्यासस्य गुणाभावः। यद्धितुपरं छंद-
सीति न निघातः। अर्कं अर्कः अर्च पूजायां। कृदाधारार्चिकलिभ्यः क इति कप्रत्ययः। हृदा हृदयशब्दस्य पद्दन्नित्यादिना हृदादेशः। मतिं। मन ज्ञाने।
मंत्रे वृषेषपचमनेत्यादिना क्तिन् उदात्तः। अकृत करोतेर्लुङि सिचः तस्य ह्रस्वादंगादिति लोपः। द्यावापृथिवी देवताद्वंद्वे चेत्युपपदप्रकृ-

तृ॰सं॰भा॰१

निस्वरः ॥ ॥ अथ नवमी ॥ ॥ शतधारमुत्समक्षीयमाणं विपश्चितं पितरं वक्त्वानां ॥ मेळिं मदंतं पित्रोरुपस्थे तं रोदसी पिपृतं सत्यवाचं ॥ ॥ यस्मादुपाध्या
याद्विश्वामित्रो वैश्वानराख्यं परं ब्रह्म हृदय इत्यासीत् । तमिममुपाध्यायमनया ऋचा स्तौति । हे रोदसी द्यावापृथिव्यौ शतधारं अपरिमितधारया युक्तं अक्षी
यमाणं न कदापि विच्छिन्नप्रवाहं उत्सं उत्समिव ज्ञानप्रवाहोपेतं स्रोत इव विच्छिन्नवावसरणीसमेतं विपश्चितं मेधाविनं सकलशास्त्राभिज्ञं पितरं शि
ष्याणां विद्योपदेशेन पालकं वक्त्वानां वक्तव्यानां वेदवाक्यानां मेळिं मेलकं नाम शाखागतानां वाक्यानामेकस्मिन्नर्थे सकलस्य वक्तारं पित्रोर्द्यावा
पृथिव्योरुपस्थे समीपे मदंतं शोभमानं तिशयेन हृष्यंतं अत एव सत्यवाचं अज्ञातार्थभावात्परप्रतारणे च कारणाभावात्सत्यवादिनं तमिममुपाध्यायं पि
पृतं अपेक्षितफलप्रदानेन संपूर्णं कुरुतं । यद्वा पालयतं । उत्सं । उंदी क्लेदने अस्मादुंदिगुधिकृषिभ्यः किदिति स प्रत्ययः किल्वान्नकारलोपः ।
उन्नतीत्युत्सः । व्यत्ययेनाद्युदात्तः । विपश्चितं । विशेषेण याती ति विपा वाक् विपया वा चश्चिनोतीति क्विप् । कृत्स्वपिनीति नुक् । तत्पुरुषे कृति बहुलमि
ति बहुलवचनात् द्वितीयाया अलुक् कृदुत्तरपदप्रकृतिस्वरः । वक्त्वानां । वच परिभाषणे । अस्मात्कृत्यार्थे तवैकेन्केन्यत्वन इति त्वन्प्रत्ययः । नेः कुरिति कुत्वं ।
निस्वरः । मेळिं । मेळिः संपर्कार्थो धातुः । अस्मादौणादिक इ प्रत्ययः । रोदसी । आमंत्रितत्वान्निघातः । पिपृतं । पृ पालनपूरणयोः । जुहोत्यादिः
आर्तिपिपर्त्योश्चेत्यभ्यासस्येत्वं । निघातः ॥ ॥ इति तृतीयस्य प्रथमे सप्तविंशो वर्गः ॥ ॥ प्र वो वाजा इति पंचदशर्चं पंचदशं सूक्तं । अनुक्रमणिका
प्र वः पंचोना गायत्रं तु तृतीयाद्या वाद्यंति । विश्वामित्र ऋषिः । गायत्री छंदः । अग्निर्देवता । आद्या ऋतुदेवत्या वा प्रातरनुवाक आश्विन शस्त्रे च गायत्रे छंद
सि अस्य सूक्तस्य विनियोगः । प्रवो वाजा उपसर्गाद्योज्येति । आभिप्लविके प्रथमेहनि प्रउगे प्र वो वाजा इति वैकल्पिकेष्टौ त्रियस्तृचः सूत्रितं । प्र वो वाजा अभिद्यवो

राम
४४

ऋगतो । उत्पूर्वः । ऋजेर्द्वैरिति निपातनादीकृत्ययमकारलोपः । उपसर्गस्यायतौ लोपश्च उकृत्वती त्युत्प्रत्ययः स्वरः । ईमहे । ईङ् गतौ त्यादिषु । व्यत्ययेना
त्मनेपदं । अदादित्वाच्छपो लुक् । निघातः ॥ स्वानिनः ॥ स्वानो च अंतः । तदंतः अत इनिठनाविति इनिः प्रत्ययः स्वरः ॥ रुद्रियाः । रुद्र शब्दात्तस्येदमित्यर्थे घः तस्येदमित्यर्थे
अः ॥ ॥ इति तृतीयस्य प्रथमे षड्विंशो वर्गः ॥ ॥ अग्ने ऋक् षष्ठी ॥ ॥ व्रातंव्रातं गणंगणं सुशस्तिभिरग्नेर्भामं मरुतामोज ईमहे । पृषदश्वासो अन
वभ्रराधसो गंतारो यज्ञं विदथेषु धीराः ॥ ॥ कुशिकावयं अग्ने भामं भासकं मरुतामोजस्तेजः व्रातंव्रातं व्राते व्राते प्रतिसमूहं गणंगणं गणेगणे
महति समूहे समूहे । क्रियमाणाभिः सुशस्तिभिः शोभनाः शस्तयः सुशस्तयो येषां मंत्रैः क्रियंते तैः सुशस्तयः तेर्मंत्रैरीमहे नाद इमां मारुतं तेजो
याचामहे । पृषदश्वासः पृषत्यश्च वडवा अश्वा येषां ते तादृशा अनवभ्रराधसः तद्विद्यते अवभ्रं शो यस्य तदनवभ्रं अनवभ्रंशं राधो धनं येषां ते अ
नवभ्रष्टधनाः । संपूर्णधना इति यावत् । धीराः कर्माभिज्ञास्ते मरुतः विदथेषु यज्ञेषु यज्ञं यजनीयं हविरभिलक्ष्य गंतारो गमनीयशीला भवंति ।
गणंगणं । गणसंख्याने पचाद्यच् । नित्यवीप्सयोरिति द्विर्वचनं परस्याम्रेडितत्वादनुदात्तत्वे पूर्वपदस्वरः । सुशस्तिभिः बहुव्रीहौ नञ्सुभ्यामि
त्युत्तरपदांतोदात्तत्वं । भामं भा दीप्तौ । अर्तिस्तुसुहुसृधृक्षिक्षुभायावापदियक्षिनीभ्यो मन्नित्यादिना मन्प्रत्ययः नित्स्वरः । ओजः । उब्ज आर्जवे । उब्जेर्बले बलोपश्चेत्यसुन् । तत्संनियोगेन बकारलोपः । आ
द्यधातुकलक्षणो गुणः । नित्स्वरः ॥ ईमहे । ईङ् गतौ त्यादिषु । निघातः । अनवभ्रराधसः । अनवभ्रं नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । उत्तरबहुव्रीहौ
पूर्वपदस्वरः । गंतारः । तृन् । लित्स्वरः । विदथेषु । विद ज्ञाने । रुदिविदिभ्यां ङिदिति । य प्रत्ययः किल्वाद्गुणाभावः विदंत्यस्मिन्कर्मजातमध्वर्य्वादय इति । विद
थो यज्ञः प्रत्ययस्वरः ॥ ॥ अथ सप्तमी ॥ ॥ अग्निरस्मि जन्मना जातवेदा घृतं मे चक्षुरमृतं म आसन् । अर्कस्त्रिधातू रजसो विमानो जस्रो घर्मो हविरस्मि

ऋ·सं·भा·१

ईळे अग्निं विपश्चितं गिरा यज्ञस्य साधनं ॥ श्रुष्टीवानं धितावानं ॥ ॥ विपश्चितं मेधाविनं यज्ञस्य साधनं यज्ञस्य निर्वाहकं श्रुष्टीवानं सुखवंतं यद्वा वेग-
वंतं धितावानं वननीयं धनं धितं निहितं यस्य तं निहितधनं तमिममग्निं गिरा स्तुतिलक्षणया वाचा ईळे विश्वामित्रोहं स्तौमि ईळे ईळ स्तुतौ श्रुष्टीवा-
नं वनषणसंभक्तावित्यस्माद्विच् श्रुष्टी वनतीति श्रुष्टीवा कृदुत्तरपदस्वरः धितावानं दधातेर्निष्ठायां धिरादेशश्छांदसः चनेसंभक्तौ कर्मणि घिञ्
बहुव्रीहौ निष्ठेति धितशब्दस्य पूर्वनिपातः पूर्वपदप्रकृतिस्वरः ॥ ॥ अथ तृतीया ॥ ॥ अग्ने शकेम ते वयं यमं देवस्य वाजिनः ॥ अति द्वेषांसि तरेम ॥ ॥
हे अग्ने वाजिनः अन्नहविष्का वयं देवस्य द्योतमानस्य ते न वयं यमं यमनं आयज्ञसमाप्तेरवस्थानं कर्तुं शकेम शक्यास्म वाजिनो वेगवतो देवस्येति
वाजो जनीयं ततः कारणात् द्वेषांसि अस्मदीयानि पापानि अतितरेम पापेभ्य उत्तीर्णा भवेम शकेम शक्ल शक्तावित्यस्या आशीर्लिङि लिङ्याशिष्यङ् इत्यङ्प्र-
त्ययः किदाशिषीति यासुट् संज्ञोपेयादेशयलोपगुणसलोपाः आमंत्रितस्याविद्यमानत्वेन पादादित्वादनिघातः उदात्तनिवृत्तिस्वरः यमं यमउप-
रम इत्यस्मात् भावे अप् यामउपरम इति निपातनाद्वृध्याभावः थाथादिस्वरः तरेम तॄप्लवनतरणयोः प्रार्थने लिङि रूपं निघातः ॥ ॥ अथ चतुर्थी ॥ ॥ स-
मिध्यमानो अध्वरे अग्निः पावक ईड्यः ॥ शोचिष्केशस्तमीमहे ॥ ॥ यो अग्निः अध्वरे समिध्यमानः घृताद्याहुतिभिः सम्यक्प्रज्वल्यमानः अत एव शोचि-
ष्केशः पावकः शोधकः ईड्यः स्तोतृभिः प्रशस्यो भवति तमिमं अभिमतफलार्थं ईमहे वयं याचामहे ईड्यः ईड स्तुतावित्यस्मात् एवयत् अस्यतिस्व-
रितइतिस्वरितत्वे प्राप्ते ईडवंदेत्यादिनाद्युदात्तत्वं ईमहे ईकोत्यादिषु याचनार्थः धातुरनयाच्यार्थः निघातः ॥ ॥ अथ पंचमी ॥ ॥ पृथुपाजा अमर्त्यो घृत-
निर्णिक् स्वाहुतः ॥ अग्निर्यज्ञस्य हव्यवाट् ॥ ॥ पृथुपाजाः प्रभूततेजोरूपः अमर्त्यः मरणधर्मरहितः घृतनिर्णिक् घृतस्य विलयनद्वारा शोधयने

राम
४५

निः घृतनिर्णिक् स्वाहुतः सुष्टु होत्रादिभिः सम्यक् हुतः एवंभूतोग्निः यज्ञस्य ज्योतिष्टोमादेः हव्यवाट् हव्यानां वोढा भवति पृथुपाजाः कृदुत्तरपदस्व-
रः स्वाहुतः जुहोतेः कर्मणि क्तः गतिरनंतर इति गतेः प्रकृतिस्वरत्वं हव्यवाट् वहेश्चेति ण्विभावः ॥ ॥ इति तृतीयस्य प्रथमे षड्विंशो वर्गः ॥ ॥ अ-
थ तस्मिन्सूक्ते षष्ठी ॥ ॥ तं सबाधो यतस्रुच इत्था धिया यज्ञवंतः ॥ आ चक्रुरग्निमूतये ॥ ॥ सबाधः रक्षोघ्नमंत्रोच्चारणेन तद्द्वेषः बाधासहवर्तंत इ-
ति सबाधः यज्ञवंतः यजनीयं हविर्युक्ताः यतस्रुचः यंताः संयुताः स्रुचो जुह्वाद्याये सेयतस्रुचः ऋत्विजः इत्था इत्थं अनेन प्रकारेण क्रियमाणया
धिया स्तुत्या तमेवंभूतमग्निं ऊतये राक्षसबाधाद्रक्षणाय आ अग्निमभिमुखं चक्रुः डुकृञ् करण इत्यस्य लिट्युसि यणादेशे कृतेन तस्य द्विर्वचने
वीति स्थानिवद्भावात् द्विर्वचनं निघातः ॥ ॥ अथ सप्तमी ॥ ॥ होता देवो अमर्त्यः पुरस्तादेति मायया ॥ विदथानि प्रचोदयन् ॥ ॥ होता होमनिष्पाद-
कः अमर्त्यो मरणधर्मरहितः देवो द्योतमानः विदथानि वेदितव्यानि कर्माणि प्रचोदयात् प्रकर्षेण प्रेरयन् सोग्निः मायया विषयाभिज्ञानेन युक्तः
सन् पुरस्तात् कर्मप्रारंभकाल एव एति अस्मानागच्छति मायया माङ्माने इत्यस्मान्माछाशसिसूभ्यो य इति कर्तरि कर्मणि वा यप्रत्ययः मिमीते जन-
नीते कर्म मीयते नयेति वा माया कर्मविषयज्ञानं प्रत्ययस्वरः विदथानि विदज्ञान इत्यस्मात् रुदिविदिविभ्यां किदिति कर्मण्यथप्रत्ययः कित्वादगुणः
प्रत्ययः स्वरः ॥ ॥ अथाष्टमी ॥ ॥ वाजी वाजेषु धीयते अध्वरेषु प्रणीयते ॥ विप्रो यज्ञस्य साधनः ॥ ॥ वाजी बलवानग्निः वाजेषु युद्धेषु धीयते देवैः अग्रे ह-
ननार्थं निधीयते किंच अध्वरेषु अग्निहोत्रादिषु प्रणीयते अध्वर्य्वादिभिः प्रकर्षेण आहवनीयादिस्थानेषु प्रक्षिप्यते अत एव विप्रो मेधावी सन्नग्निः य-
ज्ञस्याग्निहोत्रादेः साधनः साधको भवति धीयते दधातेः कर्मणि यक् घुमास्थागापाजहातिसां हलि इति ईत्वं निघातः कर्मणि यकि रूपं उपसर्गादसमासेपि

ऋ० सं० भा०

लोपदेशस्येति णत्वं । साधनः । साधसंसिद्धौ । नंद्यादित्वात्कर्तरि ल्युः । लित्स्वरः ॥ ॥ अथ नवमी ॥ ॥ क्षिया चक्रे वरेण्यो भूतानां गर्भमा दधे ॥ दक्षस्य पिता
तना ॥ ॥ योग्निः आधानपवमानेष्टिरूपेण कारणेन चक्रे आहवनीयरूपस्तथा कृतो भूत् । अतएव वरेण्यः सर्वैर्यजमानैः कर्मार्जित्वेन वरणीयः । यश्च
भूतानां स्थावरजंगमात्मकानां भूतजातानामंतः गर्भस्थात्मानमेव गर्भरूपतया आदधे सर्वत्र दधार । पितरं सर्वस्य जगतः पालकं तमिममग्निं दक्ष
प्रजापतेः । तना तनया वेदिरूपा भूमिः दर्शपूर्णमासाग्निहोत्रादिकर्मसिध्यर्थं धारयति । भूमेर्दक्षदुहितृत्वेन मंत्रवर्णः । अदितिर्ह्यजनिष्ट दक्ष या दु
हिता तवेति । चक्रे । करोतेः कर्मणि लिटि रूपं । गर्भं गृ निगरणे इत्यस्माद्दर्त्तिगृभ्यां भन्निति भन् । गिरंति गीर्यते वा गर्भः । नित्वादाद्युदात्तः । दधे । दधातेर्लि
टि रूपं । पितरं । पा रक्षणे । नप्तृनेष्टृत्वष्ट्रित्यादिना तृजंतेन निपातितः । तनिपा । क्षयती ति पालकः । चित्स्वरः । तना यलोपश्छांदसः ॥ ॥ अथ दशमी ॥
॥ नि त्वा दधे वरेण्यं दक्षस्येळा सहस्कृत ॥ अग्ने सुदीतिमुशिजं ॥ ॥ उक्तार्थेन यत्नविशेषेण प्रियते । सहस्कृत मथनात्मकेन निष्पन्न हे अग्ने सुदीतिं
शोभनदीप्तियुक्तं उशिजं पुरोडाशादिहविः कामयमानं यज्ञकर्मार्थिभिः काम्यमानं अतएव वरेण्यं तैर्वरणीयं त्वा एवंविधं त्वां दक्षस्य दुहिताडा
वेद्यादिलक्षणा भूमिः निदधे । अग्निहोत्रादिकर्मसमृध्यर्थं नितरां दधार । इळा । इडस्कृतो पुंसि संज्ञायामित्यत्र प्रापिकवचनानुस्थार्थे पित्त्वप्रत्ययः
ह्रस्वश्छांदसः । संज्ञापूर्वकस्य विधेरनित्यत्वाद्गुणाः । ईड्यंते स्तूयंते स्यां यजमानैर्देवा इतीळा भूमिः उदात्तनिठनिस्वरेणांतोदात्तः । प्रत्ययः स्वरः । उशि
जं वशकांतावित्यस्मात् हृशः केचितिजिप्रत्ययः । कित्वात्संप्रसारणं । वष्टि वष्टिः कामयते काम्यते कर्मार्थिभिरिति वा उशिगग्निः प्रत्ययः स्वरः ॥ ॥ इत्येतत्
यस्य प्रथमे एकोनत्रिंशो वर्गः ॥ ॥ अथ तस्मिन्सूक्ते एकादशी ॥ ॥ अग्निं यंतुरमप्तुरमृतस्य योगे वनुषः ॥ विप्रा वाजैः समिंधते ॥ ॥ वनुषः कर्मसिध्य

प्र आयाहि वीतये इति सामिधेनीषु समिध्यमान इत्येका सूत्रितं च । समिध्यमानो अध्वरे समिधो अग्न आहुतेति द्वे इति । आधाने तत्तीयामिष्टौ सा
मिधेनीषु इध्यमानेध्य धत्यामध्ये पृथुपाजसा इति द्वे धाय्ये सूत्रितं च । आ गुपो ज्ञमया पृथुपाजा अमर्त्य इति द्वे इति । एवमन्यत्रापि यत्र सप्तदश सामि
धेन्यः तत्र तत्रोक्ते धाय्ये इति दृष्टव्यं । विष्णुवतिरेकविंशतिः सामिधेन्यः तत्र पृथुपाजा अमर्त्य इति षळ्‌चो धाय्याः सामिधेनीनामिति । सूत्रितं महा
व्रते विपंचविंशतिसंख्याकाः सामिधेन्यः तत्राप्येताः षळ्‌चो दृष्टव्याः । अग्नीषोमप्रणयने । होता देवो अमर्त्यः पुरस्तादुपत्वाग्ने दिवे दिव इति ईळेन्यो
नमस्य स्तिर इति । सूत्रितं च । इळेन्यो नमस्यस्तिरोग्निं दूतं वृणीमह इति ॥ ॥ तस्मिन्सूक्ते प्रथमा ॥ ॥ प्र वो वाजा अभिद्यवो हविष्मंतो घृताच्या ॥ देवाञ्जि
गाति सुम्नयुः ॥ ॥ हे ऋत्विजः वाजाः अर्जंति गच्छंतीति वाजा मासाः अभिद्यवः अभितो द्योतिदवसा येष्विति । अभिद्यवो ह मासा इति ह विज्ञायंते गो घृता
चीति । यद्वा हविषा हविषः क्षीरादेः प्रदातारः पशवः घृताच्या घृतमंचति प्राप्नोतीति घृताची स्रुक् । तथा च वाजसनेयकं । पशवो ह हविष्मंतः स्रुक् घृता
चीति हविष्मंतो देवाः पशवश्च मासा अर्धमासा अधिश्वेति सर्वे वो युष्माकं यज्ञार्थं प्रभवंति । तेषु प्रभवत्सु सत्सु सुम्नयुः सुखमात्मन इच्छन्यजमा
नो देवान्‌जिगाति । यज्ञद्वारा देवान्प्राप्नोति । उक्तार्थं तैत्तिरीयब्राह्मणं । प्र वो वाजा इत्याह मासा वै वाजा अर्धमासा अभिद्यवो देवा हविष्मंतो घृताची
यज्ञो देवान्‌जिगाति यजमानः सुम्नयुरिति अभिद्यवः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरः । घृताच्या । घृक्षरपादिस्योः । अस्मात्किति घृतिभ्यः क्रुड्यमे
कर्मणि क्तः । घृतमाज्यमंचतीति । ऋत्विग्दधृगित्यादिना क्विन् । अनिदितामिति लुप धालोपः । मंत्रतेश्चोपसंख्यानमिति । ङीपू । चाविति पूर्वपदांतोदा
त्तत्वं । जिगाति । गातिर्गत्यर्थश्छांदसो जुहोत्यादिः । निघातः । सुम्नयुः सुखमात्मन इच्छन्तीति सुप आत्मनः क्यच् । क्याच्छंदसीत्युप्रत्ययः स्वरः ॥ ॥ अथ द्वितीया ॥ ॥

राम
४६

त्यादिना कनिन्। कित्वाद्गुणः। नित्वादाद्युदात्तः॥१३॥ अथ चतुर्दशी॥ वृषो अग्निः समिध्यतेऽश्वो न देववाहनः। तं हविष्मंत ईळते॥१४॥ वृषो वृषैव कामानां वर्षि-
ऋ॰सं॰भा॰१ ता देववाहनः देववानामश्वः तद्वतो वाहनभूतो योऽग्निः समिध्यते आहुतिप्रदानेन सम्यग्दीप्यते। ततादृशं अग्निं हविष्मंतः संभृतहविष्का यजमाना ईळते
कर्मसिध्यर्थं स्तुवंति। वृषा उ गुणः। उक्रमवलव्यपग्घसंज्ञा। देववाहनः। वहप्रापणे इत्यस्मात् ण्यंतात् कर्तरि ल्युः। लित्स्वरः। समासे कृदुत्तरपदस्वरः॥
॥अथ पंचदशी॥ वृषणं त्वा वयं वृषन् वृषणः समिधीमहि। अग्ने दीद्यतं बृहत्॥१५॥ वृषन् कामानां वर्षितः हे अग्ने वृषणः वृषाणः घृताद्याहुतीनां से-
क्तारो वयं वृषणं आहुतिद्वारा उदकस्य सेक्तारं। तथा च स्मृतिः। अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठति। आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः इ-
ति। दीद्यतं दीप्यमानं बृहत् अत एव महांतं त्वामिममग्निं समिधीमहि सम्यक् दीपयामः। इधीमहि दीपां दीप्ताविल्यस्य पार्थते लिङि नकारलोपश्छां-
दसः। दीद्यतं। दीदेतिर्दीप्तिकर्मा तस्य शतृ रूपं। अभ्यस्तानामादिरित्याद्युदात्तत्वं॥१५॥ इति तृतीयस्य प्रथमे त्रिंशो वर्गः॥ अग्ने जुषस्व नो हविः पुरो-
ळाशं जातवेदः। प्रातःसावे धियावसो॥ अग्ने जुषस्वेति षळृचं षोडशं सूक्तं वैश्वामित्रमाग्नेयं। अत्रानुक्रमणिका। अग्ने जुषस्व षट् तृतीयो-
ष्णिक् त्रिष्टुप् जगत्य इति। पूर्वसूक्ते गायत्रं त्वित्युक्तत्वादेतदपि गायत्रं। तृतीया उष्णिक्। चतुर्थी त्रिष्टुप्। पंचमी जगती। अग्ने जुषस्वेति सवनीय राम
पुरोडाशो स्विष्टकृतः प्रातःसवनीयानुवाक्या सूत्रितं च। अथास्य स्विष्टकृतोऽग्ने जुषस्व नो हविरिति। अतिरात्रे आश्विनशस्त्रे प्रतिहिते सति वसग- ५१
णैः सहाश्विनोऽधिकपालः पुरोडाशः सर्वहुतो होतव्यः। यदि पुरोडाशमवशेषं स्विष्टकृतं कुर्युः। तस्य स्विष्टकृतः पुरोडा अग्न इत्येषा याज्या।
यद्येतस्य पुरोडाशस्य स्विष्टकृतं चारयुः। पुरोळा अग्ने पचत इति सूत्रितं। माध्यंदिने सवने जातवेद इति तृतीयसवने सवनीयपुरोडाशस्य स्विष्ट-

कृतोऽनुवाक्या। अग्ने तृतीये सवन इत्येषा सूत्रितं। यः अग्ने तृतीयसवने हिकानिषद्धत्यनुसवनमनुवाक्येति। आश्विनपुरोडाशस्य स्विष्टकृतो या-
ज्या। अग्ने वृधान इत्येषा सूत्रितं च। अग्ने वृधान आहुतिमिति संयाज्येति॥ तस्मिन् सूक्ते प्रथमा॥ अग्ने जुषस्वेति॥ विश्वामित्रस्तौति। जातवे-
दः जातप्रज्ञ धियावसो धिया स्तोत्रेण वसु धनं यस्माद्भवति। सोऽयं धियावसुः तस्य संबुद्धिः कर्मानुरूपधनप्रद हे अग्ने प्रातःसावे अग्निष्टोमे प्रातःस-
वने अस्मत्संबंधि पुरोडाशं पुरोडाशाख्यं हविः जुषस्व सेवस्व स्वीकुरुष्व। जुषी प्रीतिसेवनयोरित्यस्मात् लटि रूपं। आमंत्रितस्य विद्यमानत्वेन
पादादित्वाद निघातः। प्रातःप्रातःसावे षुञ्। अभिषवे। सवनं सावः। भावे घञ्। थाथघञ्क्ताजबित्रकाणामिति अंतोदात्तत्वं धियावसो विभक्त्यलो-
पः छांदसः॥१॥ अथ द्वितीया॥ पुरोळा अग्ने पचतस्तुभ्यं वा घा परिष्कृतः। तं जुषस्व यविष्ठ्य॥२॥ यविष्ठ्य युवतम हे अग्ने यः पुरोडाशः पुरोडाशं ते
धर्यादयः पुरोडाः पुरोडाशः पचतः कपालयोः पक्वोऽस्ति। स च तुभ्यं त्वदर्थं परिष्कृतः पर्यग्निकरणादिभिरलंकृतः खलु। तमिमं पुरोडाशं जुषस्व से-
वस्व। पुरोडः दाशृ दाने इत्यस्मात् पुरःपूर्वादन्येष्वेतव कृत्। पुरोळाशो स्विन्निति कर्मणि एविनिष्ठः नेश्वेतवहादीनां डस्य दस्ये नि डस्प्रत्यये च कृते अव-
याः श्वेतवाः पुरोडाश्चेति निपातनात् दकारस्य डुत्वं। पुरोडाशं तरवतमिति पुरोडाः पुरोडाशः डकारस्य ळकारो बह्वृचसांप्रदायिकः। कृदुत्तरपदस्वरः।
पचतः डुपचष् पाके इत्यस्मात् भृमृदृशी त्यादिना कर्मण्यतच्प्रत्ययः पच्यते सा वितिप चतः पक्व चित्स्वरः। ऋचि तुनुघेत्यादिना संहितायां दीर्घः।
परिष्कृतः संपर्युपेभ्यः करोतौ भूषणे इति करोतेः सुडागमः। गतिरनंतर इति गतेः प्रकृतिस्वरत्वं। यविष्ठ्य। यविष्ठ एव यविष्ठ्यः। पादादाघाभ्यां व-
त्वकारेण च स्वादीनां स्वार्थे यत्प्रत्ययस्योपादानात् यविष्ठ्य इत्यत्र स्वार्थिको यत्प्रत्ययः। आमंत्रितत्वान्निघातः॥२॥ अथ तृतीया॥ अग्ने वीहि पुरो-

ऋ॰सं॰भा॰१

लाशमाहुतं तिरो अह्न्यम् ॥ सहसः सूनुरस्यध्वरे हितः ॥ १ ॥ हे अग्ने तिरः अह्न्यं अह्नि तिरोहिते सति आहुतं आसमंतात् हुतं पुरोडाशं पुरोडाशरूपं ह
विः । वीहि — क्षय ॥ अध्वरे अस्मिन्यज्ञे सहसः सूनो बलस्य पुत्र त्वं हितोऽसि आहवनीयादिस्थानेषु अस्माभिर्निहितोऽसि तस्माद्वीहीति शेषः ॥ वीहि
कांतिगत्यादिषु । लोटि रूपं । देशपिच्छादंतोदात्तत्वं । आहुतं । जुहोतेः कर्मणि क्तः गतिरनंतर इति गतेः प्रकृतिस्वरत्वं । तिरो अह्न्यं । अह्नि भवमह्न्यं
वेश्छंदसीति यत् । तिरोभूतमह्न्यं यस्मिन्काले सति अह्न्यः रात्रिकाल इत्यर्थः । कालाध्वनोरत्यंतसंयोग इति द्वितीया । प्रकृत्यांतःपदमव्येऽङ्ग प्रकृतिभा
वः । बहुव्रीहौ पूर्वपदस्वरः ॥ १ ॥ अथ चतुर्थी ॥ माध्यंदिने सवने जातवेदः पुरोळाशमिह कवे जुषस्व ॥ अग्ने यह्वस्य तव भागधेयं न प्र मिनंति वि
दथेषु धीराः ॥ कवे मेधाविन् हे जातवेदः इह अस्मिन्नग्निष्टोमाख्ये कर्मणि तत्र च माध्यंदिनसंबंधिनि सवने पुरोडाशं माध्यंदिनसवनीयं पुरोडाशं
जुषस्व । सेवस्व । हे अग्ने विदथेषु यज्ञेषु धीराः कर्मकुशलाः अध्वर्यादयः यह्वस्य यांति प्राप्नुवंति देवा हवींष्यनेनेति यह्वो महानग्निः यह्वस्य महतस्त
व भागधेयं भागतया परिकल्पितमिमं पुरोडाशं न प्र मिनंति न हिंसंति । किंतु तुभ्यं प्रयच्छंति । तं जुषस्वेति शेषः । माध्यंदिनस्य इदमित्यर्थे उत्सादित्वा
दञ् । जित्वादादिवृद्धिः । जित्वादेवाद्युदात्तत्वं । यह्वस्य । याधातोः पाण इत्यस्मात् शोवाजिह्वाय ह्व इति निपातनात्करणे वन्प्रत्ययः । हुगागमः धातुह्रस्वो । यां
त्यनेनेति यह्वोऽग्निः । वन्प्रत्ययेनांतोदात्तः । भागधेयं । भाग एव भागधेयं । स्वार्थे भागरूपनामभ्यो धेयप्रत्ययो वक्तव्य इति धेयः प्रत्ययः स्वरः । मिनंति । मीञ् हिंसाया राम
मित्यस्य क्र्यादित्वात् श्ना । मीनातेर्निगम इति ह्रस्वत्वं । हिनुमीनेति णत्वं न भवति । सर्वविधीनां छंदसि विकल्पितत्वादिति ॥ ४ ॥ अथ पंचमी ॥ ५ ४८
। अग्ने तृतीये सवने हि कानिषः पुरोळाशं सहसः सूनवाहुतं ॥ अथ देवेष्वध्वरं विपन्यया धा रत्नवंतममृतेषु जागृविं ॥ सहसः सूनो बलस्य पु

र्थं । भजमानमेधाविनो अध्वर्य्वादयः यंतुं सर्वस्य [illegible]तारं यद्वा अक्षिं गंतारं अध्वरं अपां प्रेरकं तमिममग्निं ऋतस्य सत्यभूतस्य ज्योतिष्टोमादेर्योगं प्रयो
गार्थं आने हविर्लक्षणैरन्नैः समिंधते सम्यग्दीपयंति । यंतुरं वर्णव्यत्ययः रयंतारमित्यर्थः । अतुरं । तुर त्वरणे । अतः स्तुतो निलायतीति कि प्रकृदुत्तरपद
स्वरः । योगे । युजिर् योगे । भावे घञ् । चजोः कु घिण्यतोरिति कुत्वं । थित्स्वरः । वनुषः । वन षण संभक्तौ । जनेरुसिरित्यधिकारे बहुलवचनादस्मादपि उ
सिः प्रत्ययः स्वरः । इंधते । ञिइंधी दीप्तौ निघातः ॥ ११ ॥ अथ द्वादशी ॥ ऊर्जो नपातमध्वरे दीदिवांसमुप द्यवि ॥ अग्निमीळे कविक्रतुं ॥ ऊर्जो नपातं हविर्लक्ष
णैरन्नैः समिध्यमानत्वेनान्नस्य पुत्रं यद्वा अन्नस्य रक्षितारं यया आदाहुतिराहुतेरादित्य आदित्याद्दृष्टिरिति । उप द्यवि अंतरिक्षस्य समीपे दीदिवांसं अतिश
येन दीप्यमानं कविक्रतुं कवयो मेधाविनो दयो मथानन क्रतवः कर्तारो यस्येति अध्वर्यादिभिर्निष्पाद्यमानं तमिममग्निं अध्वरे अस्मिन्यज्ञे ईळे स्तौति लक्ष
णाभिर्गीर्भिरहं स्तौमि । ऊर्जः । ऊर्ज बल इत्यस्माद्भ्राजभासेत्यादिना ताच्छीलिके क्विप् ऊर्जयतीत्यर्थ इति ऊर्क् । अत्रं सावेकाच इति । विभक्तेरुदात्तत्वं । दी
दिवांसं । दीप्त्यस्मादो लिटः क्वसुः प्रत्ययः । द्योततेर्किरणसंबंधादिति क्रुत ऋक्षं त्रित्स्वरः । इळे । लटि रूपं ॥ १२ ॥ अथ त्रयोदशी ॥ इळेन्यो नमस्य स्तिरस्त
मांसि दर्शतः ॥ समग्निरिध्यते वृषा ॥ इळेन्यः स्तोत्रभिरीड्यः अत एव नमस्यः सर्वैर्नमस्कार्यः तमांसि तिरः ध्वांतानि स्वप्रभाभिस्तिरस्कुर्वन् दर्शतः क
मनीयतया सर्वैर्दर्शनीयः तादृशोऽग्निर्वृषा यजमानस्य कामानां वर्षिता सम् इध्यते आहुतिप्रक्षेपण प्रज्वाल्यते । उक्तार्थं वाजसनेयके । इळेन्यो नम
मस्यो हेव तिरस्तमांसि दर्शतः समिध इति । इळेन्यः ईड स्तुतौ । कृत्यार्थे तवै केन्केन्यत्वन इति केन्यः प्रत्ययः स्वरः । नमस्यः । नमस्यतेरचो यदिति यत् । य
तो लोपः यलोपः । तित्स्वर इति स्वरितः । दर्शतः । दृशिर् प्रेक्षणे अस्माद्भृमृदृशीत्यादिना कर्मण्यतच् प्रत्ययः । चित्स्वरः । वृषा सिञ्चन इत्यस्मात्कनिन्युवृषी

लोके चिकित्वानिति स्तुतिः। अरण्यामग्निसभ्यमरोपयत्। अयं ते योनिरित्येषा सूत्रितं च। अयं ते योनिर्ऋत्विय इत्यरणी गार्हपत्ये प्रतिपत्यरणी वेति।
ऋ॰सं॰भा॰१ ॥ तस्मिन् सूक्ते प्रथमा॥ ॥ अस्तीदमधिमंथनमस्ति प्रजननं कृतं। एतां विश्पत्नीमाभराग्निं मंथाम पूर्वथा॥ ॥ यजमानोऽध्वर्य्वादीन् प्रति ब्रूते। इदम
धियूपशकलमस्ति अधिमंथनं अरण्या उपरि निधेयं मंथनसाधनभूतं दंडरज्ज्वादिकमस्ति। प्रजननसाधनभूतं दंडरज्ज्वादिकमस्ति। प्रजनन
साधनभूतं दर्भपिंजूलं कृतं संपादितमस्ति भरणी अभर हे अध्वर्यो आहार। तस्यामाहृतायां पूर्वथा यथा वयमाधानकालेऽग्निममथिम यथा
वा पूर्वमहर्षयोऽग्निममंथिषुः तद्वदद्यमेन मग्निमस्मिन् कर्मणि मयाम मथनेन निष्पन्नं करवामासीति यद्वृत्तस्य पादादित्वादनिघातः। विश्पत्नी
पतिशब्दस्य विभाषा सपूर्वस्येति ङीप्। नकारश्चांतादेशः। परादिश्छंदसि बहुलमिति उत्तरपदाद्युदात्तत्वं। मंथाम मंथ विलोडने लोटि रूपं। निघातः।
पूर्वथा पूर्वथा पूर्वशब्दादि वार्थे प्रत्नपूर्वविश्वेमात्थाल् छंदसीति थाल् प्रत्ययः। लितीति प्रत्ययात्पूर्वस्योदात्तत्वं॥ ॥ अथ द्वितीया॥ ॥ अरण्योर्नि
हितो जातवेदा गर्भ इव सुधितो गर्भिणीषु। दिवेदिव ईड्यो जागृवद्भिर्हविष्मद्भिर्मनुष्येभिरग्निः॥ ॥ जातवेदाः सर्वविषयज्ञानवानयमग्निः अ
रण्योर्निहितः देवैर्यज्ञार्थं निहितः स्थापितोऽस्ति अत्र दृष्टांतः। गर्भ इवेति। यथा गर्भो गर्भिणीषु स्त्रीषु सुधितः सुष्ठु निहितो वर्तते तद्वत्तादृशो राम
ग्निर्हविष्मद्भिः संभृतहविष्कैः। अत एव जागृवद्भिः कर्मणि जागरूकैर्मनुष्येभिः मनुष्यैरस्माभिर्दिवेदिवे प्रत्यहमुत्पत्त्यर्थं ईड्यः स्तुतिरूपाभिर्गी ४१
र्भिः स्तोतव्यः। अरण्योः ऋग्गतो। अभित्वसृक्‌धर्मत्यादिना अभिः प्रत्ययः स्वरः। निहितः। दधातेः कर्मणि निष्ठायां दधातेर्हिरिति हिरादेशः। गतिरनंतर
इति गतेः प्रकृतिस्वरत्वं। सुधितः। दधातेः कर्मणि निष्ठा तस्मिन् सुधितवसुधितेत्यादिना निपातनाद्धिरादेशः। दिवेदिवे दिवेदिवु क्रीडादौ। इगु

पधलक्षणः कानित्यची प्सयोरिति द्विवचनं। तस्याम्रेडितत्वात्। द्विर्वचनाभावः। वसुस्त्वं सुध्वंस्वनडुहां दइति वसोः सकारस्य दत्वं। प्रत्ययस्वरः॥
॥ अथ तृतीया॥ ॥ उत्तानायामव भरा चिकित्वान्त्सद्यः प्रवीता वृषणं जजान। अरुषस्तूपो रुशदस्य पाज इळायास्पुत्रो वयुनेऽजनिष्ट॥ ॥ चिकित्वा
न् ज्ञानवानध्वर्युस्त्वं उत्तानायां अधराण्यामुत्तानशायायां उत्तरारणिं अवभर अधोमुखीं धारय। अनंतरं सा धरारणिः सद्यः पूर्वनीतदानीमेव नि
षिक्तरेतस्कारती वृषणं कामानां वर्षकमग्निं जनानजयंतु। अयमग्नेः रुशत्तमो विनाशात्मा तमोविनाशनतमो विनाशयत्। पाजः। तेजोमात्रं तत्रा
भूत्। अनंतरं अरुषस्तूपः आरोचमानतेजः सद्योपेतः इळायास्पुत्रोऽग्निः वयुने अरण्यां योनिस्थाने अजनिष्ट अजनि। जजान। जनजयने। लोङर्थे
लिटि वलुभ्मन्यत्रापि संज्ञाछंदसोरिति णिलोपः। इत्ययतेत्वाभावादम्प्रभवति। निघातः। अरुषस्तूपः। नविद्यते रुषः क्रोधयस्य तु रुपः क्रोधरा
हित्येन रोचमान इत्यर्थः। नसुसुभ्यामित्युत्तरपदांतोदात्तत्वं। स्तुक्सूक्षतो स्तोतेः दीर्घश्चेति स प्रत्ययः। किं च धातोर्दीर्घश्च। रुश हिंसायां। रथे विरूपं। व
युने। अज गतिक्षेपणयोः अजियमि शीङ्भ्यः श्चेत्युनन्। वित्संज्ञकः अजतिर्वीयते। वा च युनमगं प्रत्ययस्य व्यत्ययेनाद्युदात्तत्वं। अजनिष्ट जनी
प्रादुर्भावे लुङि चिणिवृत्पेन निघातः॥ ॥ अथ चतुर्थी॥ ॥ इळायास्त्वा पदे वयं नाभा पृथिव्या अधि। जातवेदो निधीमह्यग्ने हव्याय वोळ्हवे॥ ॥ जातवेदः
जातप्रज्ञ हे अग्ने अध्वर्यो इळाया पृथिव्या अधि भूमेरुपर्युत्तरवेद्यां नाभा नाभौ तस्यां नाभिस्थाने मध्यप्रदेशे उत्तरवेदिस्थानं विशेष्यते। इळाया पदे मा
नया इळायागोपदे मानव्या इळायागोपदे इळा परस्पे उत्तरवेद्युत्तरके स्थाने त्वा त्वां हव्याय येऽग्नेरुपर्युत्तराद्यलक्षणाह विर्वोढुं निधीमहि। उक्तार्थे ब्रा
ह्मणं इडायास्त्वा पदे वयं नाभा पृथिव्या अधीत्येतद्वा इडायास्पदं यदुत्तरवेदी नाभिः जातवेदो निधीमहीति भास्यंतो हेनेभवत्यग्ने हव्याय वोळ्हवे

वह्नतिहव्यंहविर्वहन्भवतीति। नाभाएवं धनोनिदित्यनुदत्तेनहो भस्येतीनुभकारश्चांतादेशः। निताद्युपधैर्धिः नक्ष्यती। तिनाभिमध्यस्थानं।
ऋ॰सं॰भा॰१ सुपांसुलुगितिसप्तम्याडादेशः। तित्स्वरः। धीमहि दधातेर्लिङि रूपं। लिङः सीयुडिति सीयुट्। छंदस्युभयथेतिर्वचनाभावः छांदसः। निघातः। वोळ्हवे वह प्रा
पणे। तुमर्थेतवेन्। सहिवहोरोदवर्णस्येति धात्वकारस्योत्वं। ढत्वं च धुत्वं ढलोपाः। नित्वादाद्युदात्तः॥ ॥अथपंचमी॥ ॥मंथतानरः कविमद्वयंतं प्रचे
तसममृतं सुप्रतीकं॥ यज्ञस्यकेतुं प्रथमं पुरस्तादग्निंनरोजनयतासुशेवं॥ ॥ नरःकर्मणोनेतारो हे अध्वर्यादयः कविं क्रांतदर्शिनं अद्वयंतं द्व्य
मतावरं तं अस्मद्वेतंकुर्वाणं अन्यत्र प्रचेतसं प्रकृष्टज्ञानोपेतं अमृतं मरणधर्मरहितं सुप्रतीकं शोभनैरंगैः ज्वालाभिः सोमं तं तमिममग्निं मथनेन
निष्पादयत। किंच हेनरः कर्मणोनेतारोऽध्वर्यादयो यूयं यज्ञस्य ज्योतिष्टोमादेः केतुं प्रज्ञापकं प्रथमं मुख्यांगभूतं अग्निपूर्वकत्वात्सर्वेषामुक्तं सु
खंसुशेवं शोभनसुखोपेतं तादृशमग्निं पुरस्तात्कर्मणः प्रारंभेजनयत। तमिममग्निमेवंविधगुणयुक्तं कुरुतेतिभावः। मंथत। मंथविलोडने। लोटि
रूपं। पादादित्वादनिघातः॥ अद्वयंतं। द्वयमिवाचरतीत्यर्थे सर्वप्रातिपदिकेभ्यः क्विब्वक्तव्य इत्याचारार्थेक्विप्। द्वयमितितस्य शतरिरूपं। द्वयं नि
तिनद्वयन्। अद्वयंतं। तत्पुरुषस्वरः। सुप्रतीकं। बहुव्रीहौ कृत्वादयाश्चेत्युत्तरपदाद्युदात्तत्वं। अजनयत। जनीप्रादुर्भावे। णिच्। अतउपधाया इति वृद्धौ राम
प्राप्तायां जनीजृष्क्नसुरंजोऽमंताश्चेति मित्वान्मितां ह्रस्व इति ह्रस्वः। निघातः। सुशेवं शेवशब्दो वस्य त्यपांतः। आद्युदात्तः। बहुव्रीहौ आद्युदात्त ५०
द्व्यच्छंदसीति उत्तरपदाद्युदात्तत्वं॥ ॥ इति तृतीयस्य प्रथमे द्वात्रिंशो वर्गः॥ ॥ अथषष्ठी॥ ॥यदीमंथंति बाहुभिर्विरोचतेऽश्वो न वाज्य
रुषो वनेष्वा॥ चित्रो न यामन्नश्विनोरनिवृतः परिवृणक्त्यश्मनस्तृणा दहन्॥ ॥ यद्यध्वर्यादयः बाहुभिः स्वकीयैर्हस्तैरग्निमं मंथंति मथ्नंति। तत्स

नहे अग्ने त्वं तृतीये सवने आहुतं हूयमानं पुरोडाशं कानिषः कामयसे। अथ अनंतरं अध्रं अविनाशिनं रत्नधेयं रत्नशब्देन स्वर्गादिलक्षणमुत्तमंफल
मभिधीयते तद्दत्तंफलप्रदं जागृविं जागरणकारिणं प्रातःसोमो जागृविर्भवति स्वप्ननिवारक इति। तमिमं विपन्यया स्तुतिलक्षणया वाचा धेहि स्तुतस्त्वं
अमृतेषु मरणधर्मरहितेषु देवेषु इद् इदधेहि तृतीये। त्रिशब्दात्पूरणार्थे त्रेः संप्रसारणं चेति तीयप्रत्ययः। तत्संनियोगेन संप्रसारणं। हल इति
दीर्घो न भवति। अणितितत्रानुवर्तमानात्। प्रत्ययस्वरः। कानिषः। कनिघुक्तौ। त्यादिषु। लोटि सुबहुलं मिसिप्। तस्यार्धधातुकत्वादिडागमः। को
तिरभिलाषः। अकारस्य आकारो व्यत्ययेन। हियोगादनिघातः। धातुस्वरः। विपन्यया पनस्तुतौ। भावे क्विप्। विपनंयातीति कप्रत्ययः स्वरः। धा॰ द
धाते श्छांदसे लुङि रूपं। पादादित्वादनिघातः। जागृविं। क्विप्रत्ययोन्तो जागृविर्द्व इति नित्स्वरः॥ ॥अथषष्ठी॥ ॥अग्नेवृधान आहुतिं पुरोळाशं जा
तवेदः॥ जुषस्व तिरो अह्न्यं॥ ॥ जातवेदा जातप्रज्ञ हे अग्ने वृधानः आहुतिभिर्वर्धमानस्त्वं तिरोअह्न्यं अह्निभवमह्न्यं दिवसकृत्यं तिरोभूतमह्न्यं
यस्मिन्काले सति तिरोअह्न्यः रात्रिकालः तस्मिन्काले आहुतिपुरोडाशाख्यं हविर्जुषस्व सेवस्व। आहुतिं जुहोतेः कर्मणि क्तिच्। त्यादौ गतिनिक्त स्व
रावितिगतेः प्रकृतिस्वरत्वं॥ ॥ इति तृतीयस्य प्रथमे एकत्रिंशो वर्गः॥ ॥ अस्तीदमिति षोडशर्चं सप्तदशं सूक्तं वैश्वामित्रं। अत्रानुक्रमणिका। अस्ती
दं षोडश आद्या चतुर्थी दशमी द्वादश्यो नुष्टुभः षष्ठी एकादशी चतुर्दशी पंचदशी च जगत्यः शिष्टास्त्रिष्टुभः। पंचमीमंथतानरइत्येषा त्विदेव
ताकाग्निदेवताकावा। शिष्टा आग्निदेवताकाः। सूक्तविनियोगो लैंगिकः। वरुणप्रघासेष्वग्निप्रणयने इळायास्त्वापद इत्येषा सूत्रितं च। इळायास्त्वा प
दे वयमग्ने विश्वेभिः स्वनीक देवैरित्यर्धर्चआरभेदिति। तत्रैवाग्निप्रणयने उत्तरवेद्यामग्नौ स्थापिते सति सीद होतरित्येषा निहितेऽग्नौ सीद होतः स्व उ

तृ॰सं॰भा॰१

ये लोके उत्तरवेद्यां वा भोसीदस्व। होमनिमित्तमुपविशेव। तथा चिकित्वान् ज्ञानवान् सुकृतस्य सुकृतजन्योपभोगस्य योनौ स्थाने उत्तमलोके यज्ञं
यज्ञस्य कर्तारं यजमानं सादय स्थापय। देवावीः देवान् हविःप्रदानेन अवतीति देवावीः स त्वं देवान् हविषा पुरोडाशादिलक्षणेन हव्येन दे-
वान् यजासि यज। अथ त्वं यजमाने यागं कुर्वाणे मयि बृहत् महत् भूतं पशुपुत्रादिसमेतं वयोऽन्नं धाः विधेहि। सीद। सदेर्लोटि रूपं। सादय। सदेर्ण्यंत-
स्य लोटि रूपं। णिस्वरः। देवावीः। अव रक्षणे। अवितृस्तृतंत्रिभ्य ई इति प्रत्ययः। कृदुत्तरपदस्वरः। यजासि। यजेर्लेट्याडागमः। दधाते छांदसं
लुङि रूपं॥ ॥ अथ नवमी॥ ॥ कृणोत धूमं वृषणं सखायोऽस्रेधंत इतन वाजमच्छ॥ अयमग्निः पृतनाषाट् सुवीरो येन देवासो असहंत दस्यून्॥
यजमानोऽध्वर्यादीन् प्रति ब्रूते। सखायः कर्मसहकारिणो यूयं कृणोत कुरुत मथनेनोत्पादयत। यद्याग्निर्न जायते तदानीमाह। अस्रेधंतः असी-
णाः अनुपरतसामर्थ्याः संतो यूयं वाजं मथनेन लक्ष्यं युद्धं अच्छ आभिमुख्येन इतन प्राप्नुत। सुवीरः शोभनसामर्थ्योपेतोऽयमग्निः पृतना-
षाट् पृतनोपलक्षितं युद्धं सहमानेनाग्निना देवासो देवाः दस्यून् उपक्षयितॄन् असुरान् असहंत अभ्यभवन् तस्मात् क्षीणबला यूयं मंथनं कु-
रुतेति भावः। कृणोत। कृवि हिंसाकरणयोः। लोटि तप्रत्ययस्य तप्तनप्तनथनाश्चेति तबादेशः। पित्वात् कृणः। पादादित्वादनिघातः। उप्रत्ययस्वरः।
धूमं। धूञ् कंपने। इषियुधींधिदसिश्यादि मक्। कित्वात् गुणाभावः। धुनोति कंपयति। दाह्यानीति धूमोऽग्निः। प्रत्ययस्वरः। इतन। इण् गतौ। वि-
त्यस्य लोटि तप्रत्ययस्य तनादेशः। निघातः। पृतनाषाट्। षह मर्षणे। छंदसि सहः इति ण्विः। णित्वादुपधावृद्धिः। सहेः साढः स इति षत्वं। कृदुत्तरपद-

राम ५१

स्वरः। असहंत। षह मर्षणे इत्यस्य लङि रूपं। अडागमो दनिघातः। दस्यून्। दसु उपक्षये। यजिमनिशुंधिदसिजनिभ्यो युजिति युच्। दस्यंती-
ति दस्यवः। शत्रवः। व्यत्ययेनाद्युदात्तत्वं॥ ॥ अथ दशमी॥ ॥ अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः॥ तं जानन्नग्न आसीदाथा नो वर्धया
गिरः॥ ॥ हे अग्ने ऋत्वियः वसंतादिऋतौ भवः अयं अयं गुल्याभिर्ह्रियमाणः शाल्मल्या अश्वत्थादिमयः काष्ठविशेषोऽरणिः ते तव योनिः उत्पत्ति-
स्थानं यतोऽरणेर्जातस्त्वं अरोचथाः अदीप्यथाः जानन् त्वं तं अरणीरूपं वृक्षविशेषं आसीद तस्यामरण्यामारोपितः स च नैरंतर्येण तिष्ठ। अ-
थानंतरं नोऽस्माकं गिरः स्तुतिलक्षणा वाचः वर्धय। यद्वा गीरशब्देन तद्धेतवः लक्ष्यंते। तस्मात् नः अस्मान् वर्धय पशुपुत्रादिभिः समृद्धान् कुरु।
योनिः। यु मिश्रणे। वहिश्रित्यादिना निप्रत्ययः। निहित्युक्तत्वादाद्युदात्तः। ऋत्वियः। छंदसि घसिति। ऋतुशब्दात् स्वार्थे घस्प्रत्ययः। घस्य
इयादेशः। सितीति पदसंज्ञायां तु गुण इति संज्ञायां तु गुण इति संज्ञाधीनो गुणो न भवति। प्रत्ययस्वरः। अरोचथाः। रुच दीप्तावित्यस्य लङ
ङि रूपं। यद्वृत्तयोगादनिघातः॥ सीद सदेर्लोटि पाघ्रादिना सीदादेशः। निघातः। अथ निपातस्य चेति सांहितिको दीर्घः। वर्धय। वृधु वर्धने।
हेतुमति णिच्। निघातः॥ ॥ इति तृतीयस्य प्रथमे त्रयस्त्रिंशो वर्गः॥ ॥ अथ तस्मिन्सूक्ते एकादशी॥ ॥ तनूनपादुच्यते गर्भ आसुरो नराशं-
सो भवति यद्विजायते। मातरिश्वा यदमिमीत मातरि वातस्य सर्गो अभवत्सरीमणि॥ ॥ योऽग्निः यदा गर्भः अरण्योः गर्भरूपतया वर्तते। त-
दासोऽग्निस्तनूनपादुच्यते। स्रष्टृणां तनूः शरीराणि न पातयति न पतनीति व्युत्पत्तेः। यद्वा तनूशब्देनापत्याभिधीयंते। नपाच्छब्देनैकांतरिताः प्रजाः।

तथा चायं नराशंसः कथमेतत्। अप्समना। अंतरिक्षे ताभ्यः ओषधिवनस्पतयो जायंते। तेभ्यो ह्येषद्भूति। यद्यदा विजायते विशेषेण प्रत्यक्षं जायाय
ऋ॰सं॰भा॰१ ते तदा असुरस्यः। कर्मविघ्नकारिणामसुराणां हंता अतएव नराशंसः। नरैः कर्मणां नेतृभिः ऋत्विग्भिः शंसनीयो भवति। तदा मातर्यंतरिक्षे स्वं
तेजः अमिमीत निर्मिमीते। तदा मातरिश्वा भवति। मातरि अंतरिक्षे श्वसिति चेष्टते इति व्युत्पत्तेः। एवंविधस्याग्नेः सरीमणि सरणे शीघ्रगमने वातस्य वा
योः मणी सृष्टिभव इव इति। यदाग्निररणीषु गर्भरूपतया वर्तते। तदा तनूनपान्नामको भवति। यदा जायते तदा नराशंसनामको भवति। यदांत
रिक्षे विद्योतते तदा मातरिश्वा नामको भवतीति। तनूनपात्। तनु विस्तारे। भदितमितानिधनि सज्जिरवर्जिभ्य ऊरिलू प्रत्ययः। व्यत्ययेनाद्युदात्तः
नपात् पारक्षणे पदे गतो। श्लाते क्विप्। नि पातिनयातयतीति वा नपात्। कृदुत्तरपदप्रकृतिस्वरत्वे प्राप्ते भेवनस्पत्यादिषु युगपदिति प्रकृत्य प्र
कृतिस्वरत्वं। आसुरः। असुरस्यायमासुरः। अहितकारित्वेन संबंधी। तस्येदमित्यण्। प्रत्ययस्वरः। नराशंसः। नृ नये। सृदोरवित्यष्। प्रत्यय
स्यपि शाद्भयोः प्रकृतिस्वरत्वं विजायते जनी प्रादुर्भावे। दिवादित्वात् श्यन्। धातुस्वरः। अमिमीत। माङ् माने शब्दे च। जुहोत्यादिः। भृञा
मित्यभ्यासस्येत्वं। यद्योगादनिघातः। सरीमणि। सृ गतौ। हृभृसृस्तृदृभ्य इति ईमनिन् प्रत्ययः। नित्स्वरः॥ ॥ अथ द्वादशी॥ ॥ सुनिर्मथा निर्म राम
थितः सुनिधा निहितः कविः॥ अग्ने स्वध्वरा कृणु देवान्देवयते यज॥ ॥ हे अग्ने कविर्मेधावी सुनिर्मथा शोभनेन मथनेन निर्मथितः नितरां ५२
मथितोसि। तथा सुनिधा शोभनेन निधानेन निहितोसि। उत्तरवेद्यादिस्थानेषु नितरां प्रक्षिप्तोसि। किंच स्वध्वरा अस्माभिः क्रियमाणानि क

जातोऽग्निः वनेषु काष्ठेषु वाजी शीघ्रगमनवान् अरुषः आरोचमानः सर्वेषां प्रीतिकरः सन् आविरोचते आसमंताद्विशेषेण दीप्यते। तत्र दृष्टांतः अ
श्वो नेति। यथाश्वो वनेषु वननीयेषु वा स्थलीस्थानेषु वेगवानश्वः आरोचमानो वर्तते तद्वत्। तत्रैव दृष्टांतरं। चित्रो नेति। यथा यामन् यामनि वेगागम
न इत्यर्थः। सोयमग्निः अश्मन् उपलान् तृणानि वा दहन् भस्मसात्कुर्वन्। अपरिवृणक्ति दग्धस्थानानि परिवृणक्ति। दग्धस्थानानि परितो
वाजी। ताद् आग्निरोचत इति पूर्वेणान्वयः। मंथंति। मंथ लोडने। लिटि रूपं। यद्योगादनिघातः। रोचते। रुच दीप्तौ भौवादिकः। लटि रूपं। निघातः।
यामन्। या प्रापणे। आतो मनिन्क्वनिब्वनिपश्चेति मनिन्। सुपां सुलुगित्यादिना सप्तम्या लुक्। नित्स्वरः। अनिवृतः। वृञ् वरणे। निष्ठायां यस्य वि
भाषेतीट् प्रतिषेधः। निपूर्वो वृणातिर्निवारणे वर्तते। न निवृत्तः अनिवृत्तः। नञ्स्वरः। वृणक्ति। वृजी वर्जने। रुधादिभिः चोः कुरिति कुत्वं। निघातः। तृ
णा तृण हिंसायां। हक्कन् हलोपाश्चेति कन्। कित्वादगुणः। हलोपश्च। तद्धितेन हृत्वादिभिरिति तृणं। नित्स्वरः॥ ॥ अथ सप्तमी॥ ॥ जातो अग्नी रो
चते चेकितानो वाजी विप्रः कविशस्तः सुदानुः॥ यं देवास ईड्यं विश्वविदं हव्यवाहमदधुरध्वरेषु॥ ॥ जातः मंथनानंतरमुत्पन्नः सः चेकितानः
कित ज्ञाने इत्यस्य यङ्लुकि गुणो यङ्लुकोरित्यभ्यासस्य गुणः। अभ्यस्तानामादिरित्याद्युदात्तत्वं। कविशस्तः थाथ घञ्क्ताजवित्रकाणामिति सोदा
त्तत्वं। अदधुः। दधाते र्लङि। रु सिजभ्यस्तविदिभ्यश्चेति जुस। यद्वृत्तयोगादनिघातः। अद्युगेमस्वरः॥ ॥ अथ अष्टमी॥ ॥ सीद होतः स्व उलोके चि
कित्वान्सादया यज्ञं सुकृतस्य योनौ॥ देवावीर्देवान्हविषा यजास्यग्ने बृहद्यजमाने वयो धाः॥ ॥ यजमानो हूते होतः होमनिष्पादक हे अग्ने स्वके

मीति । सम्मि इत्यादेशः । अवतेश्चोपसंख्यानमिति ङीप् । अव इत्यकारलोपः । चाविति दीर्घः । वा छंदसीति पूर्वसवर्णदीर्घः । एकादेशस्वरः । ऊमासी
ऋ॰वे॰भा॰१ वारक्षण इत्यस्मात् पातेर्डुमसुन्निति डुमसुन् प्रत्ययः । पुंसोऽसुङिति असुङादेशः । पाति कुलमिति पुमान् । नित्स्वरः । रंभते रे भश इत्यस्य लिटि
रूपं । निघातः ॥ ॥ अथ चतुर्दशी ॥ ॥ प्र सप्तहोता सनकादरोचत मातुरुपस्थे यदशोचदूधनि । न नि मिषति सुरणो दिवेदिवे यदसुरस्य जठरा
दजायत ॥ ॥ सनकात् सनातनात् सोऽग्निः सप्तहोता रोहोत्रकायस्यासौ सप्तहोता सन् प्ररोचत । गार्हपत्यस्थाने अवस्थानात् पतत्पदामातुः पृथि[व्याः]
उपस्थे उत्संगेऽपि च ऊधनि ऊधस्थाने उत्तरवेद्यां अरोचत अरोचत । तदासोऽग्निः सुरणः सुष्ठु रणयति शब्दयतीति सुरणः सर्वैः कमनीयतया
दृश्यमानः सन् दिवे दिवे प्रतिदिनं न नि मिषति । किं तु सर्वदा यज्ञार्थं जागर्त्येव यद्यस्मादसुरस्याग्नेः प्रेरकस्यारणी रूपस्य काष्ठस्य जठरादुदरादजा
यत । कर्मार्थमुदपद्यत । तस्मात् न नि मिषतीति पूर्वेणान्वयः । अरोचत । रुच दीप्तावित्यस्य लङि रूपं । निघातः । अरोचत । रुच दीप्तौ । ऊधनि ।
सकारस्य नकारश्छांदसः । मिषति । मिष सेवन इत्यस्य लटि रूपं । सुरणः । रण शब्दे । तत्करोतीति णिच् । तस्मादकृच्छ्रार्थे खल् । लित्स्वरः । जठरात् । ज
नी प्रादुर्भाव इत्यस्मात् जनेररः ठश्चेत्यरप्रत्ययः । ठकारश्चांतादेशः । यद्योगादनिघातः ॥ ॥ अथ पंचदशी ॥ ॥ अमित्रायुधो मरुतामिव प्रयाः प्र
थमजा ब्रह्मणो विश्वमिद्विदुः । द्युम्नवद्ब्रह्म कुशिकास एरिर एकएको दमे अग्निं समीधिरे ॥ ॥ अमित्रायुधः अमित्रैः कर्मविघ्नकारिभिरसु
रैः सह योद्धारः । यद्वा अमित्राणि पापानि तैः सह योद्धारः । तत्र दृष्टांतः । मरुतामिव प्रया इति यथा मरुतो देवानां प्रयाः प्रकर्षेण शत्रून् अभियां राम
तीति प्रयाः बलानि शत्रूणां हंतॄणि तद्वत् कर्मविघ्नकारीणि पापानि च हंतारः ब्रह्मणः सर्वस्य जगतः स्रष्टुः प्रथमजाः प्रथमसृष्टाः कुशिकासः ५३

कुशिकगोत्रोत्पन्ना ऋषयः विश्वं स्थावरजंगमात्मकं सर्वं जगदिद् इत्यवधारितं जानंत्येव । ते मे कुशिकाः द्युम्नवद्दीप्तियुक्तं ब्रह्म स्तोत्रं एरिरे अग्नये
आसमंतात्प्रेरयंति । दमे दमे स्वे स्वे गृहे एक एके भूत्वा अग्निं समीधिरे । आज्याद्या आहुतिभिः सम्यग्दीपयंति । अमित्रायुधः । युध संप्रहारे ।
क्विप् । कृदुत्तरपदस्वरः । संहितायां पूर्वपदस्य दीर्घश्छांदसः । प्रयः । प्रयया प्रापणे । अन्येभ्योऽपि दृश्यत इति विच् । प्रथमजाः । जनी प्रादुर्भावे ।
जनसनखनेत्यादिना विट् । विड्वनोरित्यात्वं । विदुः । विद ज्ञाने । लटि विदो लटो वेति झेरुशादेशः । ईरिरे । ईर गतावित्यस्य लिटि रूपं । मंत्र त्वद्दांत्रभव…
दमे दमु उपशमने । करणे घञ् । नोदात्तोपदेशस्येति वृद्धिप्रतिषेधः । ञित्स्वरः । ईधिरे । ञिइंधी दीप्तावित्यस्य लिटि । इंधि भवतिभ्यां चेति किद्वद्भावान्नकारलो
पः । निघातः ॥ ॥ अथ षोडशी ॥ ॥ यदद्य त्वा प्रयति यज्ञे अस्मिन् होतश्चिकित्वोऽवृणीमहीह । ध्रुवमया ध्रुवमुताशमिष्ठाः प्रजानन्विद्वाँ उप याहि सोमं ।
॥ होतः होमनिष्पादक चिकित्वः कर्मविषयज्ञानवन् हे अग्ने अद्येदानीं प्रयति प्रवर्तमाने अस्मिन् ज्योतिष्टोमादौ यज्ञे त्वा त्वां यस्मात्कारणादवृणीम
हि त्वद्विषयं वरं कुर्मः तस्मात् हे अग्ने त्वं इह कर्मणि देवान् ध्रुवमयाः ध्रुवं यथा भवति तथा अस्माभिर्दत्तानि हवींषि प्रापयः । उत अपि च अशमिष्ठाः हे
विष्ठ स्वीकरणात् तत्त्वमेदवैः शांतत्वं अकरिष्ठाः । अथ प्रजानन् इमं यज्ञं सम्यक् जानन् विद्वान् यज्ञवित् सर्वं जानानः त्वं सोम अस्माभिः क्रियमा
णमभिषुतं सोमं अभिलक्ष्य उप अस्मान् हि समीपे आगच्छ । इण गतावित्यस्य शानचि रूपं । शास्त्रुरतुम इति विभक्तेरुदात्तत्वं । अवृणीमहि । वृञ्
वरणे । स्यादित्वात् श्ना । छंदस्युभयथेति वनेइह ल्यपि द्वौ रितीत्वं । आमंत्रितस्याविद्यमानवत्वेन पादादित्वादनिघातः । अयाः । या प्रापणे इत्यस्य
लिङि सिपि रूपं । निघातः । अशमिष्ठाः । शमु उपशमन इत्यस्य ण्यंतस्य लुङि स्य सिचि सीयुडिति विकल्पेन उपधायाः । तस्य सिद्धत्वात् । अमंतिदीर्घः ॥

न.सं.भा.

ति लोपः। निघातः॥ ॥इति तृतीयस्य प्रथमे चतुस्त्रिंशो वर्गः॥ ॥इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्क भूपाल
साम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये तृतीयमंडले तृतीयाष्टके प्रथमोऽध्यायः॥ १॥ छ॥ छ॥
वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्। पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥ छ॥ ॥श्रीभालचंद्राय नमः॥ ॥द्वितीयानुवाकः समा
प्तः॥ ॥ॐ नमः॥ तृतीयेऽनुवाके नव सूक्तानि तत्रेच्छंति त्वेति द्वाविंशत्यृचं प्रथमं सूक्तं तत्रेयमनुक्रमणिका। इच्छंति द्व्यधिकेंद्रमिति मंडलद्रष्टा
विश्वामित्र ऋषिः। इंद्रो देवता॥ अनुक्तत्वात् त्रिष्टुप् छंदः। आभिप्लविके प्रथमेहनि दशरात्रे प्रथमेहनि च माध्यंदिने सवनेऽच्छावाकशस्त्रे अह
न सूक्तस्थाने द्वितीयमिदं संपातसूक्तं। अभिप्लवषष्ठ्याहवनीति खंडे सूत्रितं। इमामू षु वृ इच्छंति त्वाशासहांति इति संपाता इति। इंद्रस्य वृत्रघ्नस्व
धिनिपक्षोसहदानुमिति वपायाज्यासहदानुं पुरुहूतक्षियंतं स्तुत इंद्रो मघवा यद्ध वृत्रेति सूत्रितं। स्वस्त्ययेवाजिभिश्चेत्येषाल्यैंद्रपशोर्हविषो याज्या।
सूत्रितं च। स्वस्त्ययेवाजिभिश्च प्रणेतः शुचीवो हव्या मरुतः शुचीनामिति। शुनासीरीये वैकल्पिकस्यैंद्रस्य शुनस्य शुनं हुवेमेत्यनुवाक्या सूत्रितं
च। शुनं हुवेम मघवानमिंद्रमस्थायंतो गव्यंतो वाजयंत इति॥ ॥तस्मिन्सूक्ते प्रथमा॥ ॥इच्छंति त्वा सोम्यासः सखायः सुन्वंति सोमं दधति प्रयां
सि॥ तितिक्षंते अभिशस्तिं जनानामिंद्र त्वदा कश्चन हि प्रकेतः॥ ॥विश्वामित्रस्तौति। हे इंद्र सोम्यासः सोमार्हा ब्राह्मणाः त्वां त्वां शंसितुमिच्छंति। अ
तएव सखायस्ते ब्राह्मणाः त्वदर्थं सोमं सुन्वंति अभिषुण्वंति। प्रयांसि इतराण्यपि हवींषि दधति। त्वदर्थं धारयंति त्वया प्रेरिताः संतो जनानां संपन्नानामभि
शस्तिं कृतां हिंसां तितिक्षंते सहंते। तएव मनुष्यहके [illegible] चनोभाः कश्चिन्न हि को नाम पुरुषः खलु आ प्रकेतः सर्वतो जगति प्रकर्षेण ज्ञायत इति

राम
५४

र्माणि सु हिंसारहितानि कृणु कुरु। तथा [illegible] मध्वमानाय यजमानाय देवान् जनीयान्विंद्रान् यजत्र जय। स्तुनिर्मथा। मंथ विलोड
ने। अस्मात्संपदादिलक्षणो भावे क्विप्। भाति। कृदुत्तरपदस्वरः। निर्मथितः। गतिरनंतर इति गतेः प्रकृतिस्वरत्वं। सुनिधाने पूर्ववदधाने भा
वे आतश्चोपसर्ग इत्यङ्। सुपां सुलुगिति तृतीयाया लुक्। कृदुत्तरपदस्वरः। कृणु। कृवि हिंसाकरणयोः। इत्यस्य लोटि धिन्विकृण्व्योरिति उप्रत्ययः। उ
तश्च प्रत्ययादिति हेर्लुक्। निघातः॥ ॥अथ त्रयोदशी॥ ॥अजीजनन्नमृतं मर्त्यासोऽस्रेमाणं तरणिं वीळुजंभं॥ दश स्वसारो अग्रुवः समानीः पु
मांसं जातमभि सं रभंते॥ ॥मर्त्यासो मर्त्याः ऋत्विजः अमृतं मरणधर्मरहितं अस्रेमाणं क्षयरहितं वीळुजंभं हविर्भक्षणार्थं दृढदंतं। त
रणिं तारयितारं यजमानानां पापमनेनेति तरणिरग्निः। तमजीजनन्। मथनेनोदीपीपदन्। अथ जातमग्निमभिलक्ष्य स्वसारः सरंत्यः सरभंते शब्दं कुर्वते। जात
मग्निं दृष्ट्वा अध्वर्य्वादयो हर्षाद्धस्तद्वयसंपुटेन शब्दं कुर्वंतीत्यर्थः। तत्र दृष्टांतः। पुमांसमिति। यथा जातं पुत्रमुपलभ्य तत्रत्याः पित्रादयो हर्षवंतो भवं
ति तद्वत्। अजीजनन्। जनि प्रादुर्भावे इत्यस्माण्णिजंतस्य लुङि रूपं। अस्रेमाणं। स्रिवु गतिशोषणयोः। भावे मनिन्निति मनिन्प्रत्ययः। लघूपधगुणः।
लोपो व्योर्वलीति वलोपः। बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। तरणिः। तॄ प्लवनतरणयोः। अर्त्तिअवितृभ्यो निरित्यनिप्रत्ययः। गुणः। प्र
त्ययस्वरः। स्वसारः। असु क्षेपणे इत्यस्मात् ऋघसे ऋन्निति ऋन्प्रत्ययः। सुपूर्वः अस्यंति कर्म सुपदार्था विति स्वसारः। न षट्स्वस्रादिभ्य इति ङीपः
प्रतिषेधः। नित्वादाद्युदात्तः। अग्रुवः। अभिगंत्र्यः। अग्रादयश्चेति रुप्रत्ययः। निपातनादत्र लोपः। अमितत्वादित्वाद्धुवङादेशः। प्रत्ययस्वरः। समानीः
इयागतावित्यस्मात्समीण इति षट्प्रत्ययः। धातोर्दीर्घश्च। ऋित्वाद्दीर्घाजित्यादिना ङीप्। संयतीति। समीच्यः। सद्दृशा। सह पूर्वस्यायतेः क्विप्। समः स

इंद्रः परमैश्वर्यसंपन्नः सुशिप्रः शिप्राशब्देन शिरस्त्राणमभिधीयते। शोभनशिरस्त्राणोपेतः। यद्वा शोभनहनुमान्। शिप्रे हनुनासिके वेति या
ऋ॰सं॰भा॰२ स्कः। मघवान् धनवान् तरुत्रः तरत्यनेन शत्रून्देवादिति तरुत्र इंद्रो महाव्रातैः मरुद्भिर्महाव्रातैः समूहो यस्येति स तथोक्तः तुविकूर्मिः संग्रा
मे बाधितः सन् मर्त्येषु मारयितृष्वसुरेषु यान्यानि वीर्याणि धाः अधाः इदानीं तेन त्वत्तोन्यानि वीर्याणि न क्वापि सन्ति वद। सुशिप्र। सूपगतो। ऊणादिको
रन्प्रत्ययः। बाहुलकात् रन् इत्यस्य शिप्रादेशः। बहुव्रीहौ यत्नाद्युदात्तत्वं। महाव्रातः। आन्महत इत्याकारादेशो महतस्तकारस्य। तुविकूर्मिः
करोतेरौणादिको मिप्रत्ययः गुणे कृते रकारस्य उत्वे छांदसं हलि चेति दीर्घः। ऋघावान्। ऋघ हिंसायां हंतीति ऋघाः अन्येभ्योपि दृश्यत इति विच्
दृशिग्रहणादलोपो हकारस्य घत्वं। तदस्यास्तीति मतुबर्थे छंदसीवनिपाविति वनिप्। वत्ययेनाद्युदात्तः। क्व किंशब्दस्य सप्तम्यर्थे किमादि
ति। अत्प्रत्ययः। तस्मिन् क्वातीति क्वादेशः। तित्स्वरितः॥३॥ अथ चतुर्थी॥ ॥त्वं हि ष्मा च्यावयन्नच्युतान्येको वृत्रा चरसि जिघ्नमानः। तव द्यावापृ
थिवी पर्वतासोनु व्रताय निमितेव तस्थुः॥ ॥हे इंद्र त्वमेकः असहाय एव अच्युतानि च्युतिरहितानि दृढमूलान्यपि तव प्रतिपक्षभूतानि र
क्षांसि च्यावयन् स्वस्थानात्पातयन् तथा वृत्राणि पापानि जिघ्नमानः हिंसन् चरसि हिंसार्थं वर्तते खलु। किंच। एवंविधसामर्थ्योपेतस्य तव व्र राम
तायकर्मणे आज्ञायै द्यावापृथिव्यौ पर्वतासः निमितेव निखाता निश्चला इव अनुतस्थुः तिष्ठंति। स्म पूरणः। दीर्घादद्युदात्तः। च्यावयन्। च्युङ् गतावित्य ५५
स्य ण्यंतस्य शतरि रूपाणि तत्स्वरः। चरसि चर गतिभक्षणयोः। हियोगादनिघातः। जिघ्नमानः हन हिंसागत्योरित्यस्य घञर्थे कविधानमिति कः।
तस्य छंदस्युभयथेति सार्वधातुकत्वात् लटः शानच्। तस्य श्लुः बहुलं छंदसीत्यभ्यासस्येत्वं जिघ्नतीति जिघ्नः। आचारार्थे क्विप्। अस्मात्ताच्छील्यार्थे चानश्॥

शप्प्रत्ययेनाद्युदात्तत्वं। द्यावापृथिवी देवता द्वंद्वे चेत्युभयपदप्रकृतिस्वरत्वं। निमितेव। डुमिञ् प्रक्षेपण इत्यस्य कर्मणि निष्ठा गतिरनंतरगतेः
प्रकृतिस्वरत्वं सुपां सुलुगिति सुप आडादेशः। इवेन विभक्त्यलोपः। इत्युक्तत्वात् पूर्वपदस्वरः। तस्थुः। ष्ठा गतिनिवृत्ताविति अस्य लिटि उसि श्रीतो लो
पे कृते तस्य द्विर्वचने चीति स्थानिवद्भावात् द्विर्वचनं निघातः॥४॥ अथ पंचमी॥ ॥उताभये पुरुहूत श्रवोभिरेको दृळ्हमवदो वृत्रहा सन्। इमे
चिदिंद्र रोदसी अपारे यत्संगृभ्णा मघवन्काशिरित्ते॥ ॥उत त्यामंत्रणे॥ हे इंद्र पुरुहूत पुरुभिर्बहुभिर्यज्ञभिराहूत इंद्र यद्वा देवैरसुरैर्भ्यार
क्षार्थं बहुवारमाहूत श्रवोभिर्वीर्यैरुपेत एकः असहायस्त्वं वृत्रहा वृत्रशत्रोर्हंतासन् अभये असुरेभ्यः सकाशान्मा बिभीतेति देवानाति यद्वास्य
मवदः अबादः। यद्वाक्यं दृढं सत्यमेव। किंच मघवन्निंद्र त्वं अपारे विगतपारे चिन् अपि रोदसी द्यावापृथिव्यौ यद्यस्मात्कारणात् संगृभ्णाः संगृह्
सि परस्परमथरोत्तरभावेन संयोजितं करोषीति। यत् एष तेन तव महिमा काशिरित् प्रकाशो लोके प्रसिद्धः प्रभावः। यद्वा यत्त्वयानेन रोदसी संगृ
हीतो सितेन तव काशिर्मुष्टिर्महान् काशिर्मुष्टिरिति यास्कः। अभये ञिभी भय इत्यस्माद्भावे एरजित्यच्प्रत्ययः। नञ्समासे तत्स्वरः। अवदः
वद व्यक्तायां वाचि। लङि रूपं। निघातः। अपारे बहुव्रीहौ नञो सुभ्यामित्युत्तरपदांतोदात्तत्वं। संगृभ्णाः गृह उपादाने। क्र्यादित्वात् श्ना। ग्रहिज्या
वयीत्यादिना संप्रसारणं। हृग्रहोर्भश्छंदसीति हकारस्य भकारः। इतश्चेति सिप इकारलोपः। बहुलं छंदसीत्यडभावः। समासस्वरः। काशिर्दीप्तौ।
कुणादिक इप्रत्ययस्वरः॥५॥ इति तृतीयस्याष्टके द्वितीये प्रथमो वर्गः॥ ॥तस्मिन्नृक्षे षष्ठी॥ ॥प्रसक्ष इंद्र प्रवता हरिभ्यां प्र ते वज्रः प्रमृणन्नेतु शत्रून्।
जहि प्रतीचो अनूचः पराचो विश्वं सत्यं कृणुहि विष्टमस्तु॥ ॥हे इंद्र तेन तव हरिभ्यामश्वाभ्यां युक्तो रथः शत्रूनभिलक्ष्य प्रवता प्रवणेन मार्गेण सुष्टु

ऋ॰सं॰भा॰२

सुपेतु शीघ्रं गछतु। तथा तेव ज्रः अशनिः शत्रून् असुरान् अमृणान् प्रेतु त्वं च प्रतीचः त्वदाभिमुख्येनागछतः शत्रून् जहि मारय तथा अनूचः
अनुगछतः पार्ष्णिग्रहान् असुरान् पराचः पलायमानानप्यसुरान् जहि। एवं कृत्वा सुपुत्राधितेषु सत्सु विश्वं जगत् सत्यं कृणुहि। सत्यभूतान् अग्निहोत्रादिकर्मप
रं कुरु। एवंविधं सामर्थ्यं त्वयि विद्यते निविष्टमतं। प्रवता। प्रशब्द उपसर्गः छंदसि धात्वर्थ इति वति प्रत्ययः स्वरः। अमृणान्। मृण हिंसायां। जहि।
हन हिंसागत्योरित्यस्य लोटि सिपो हिरादेशः। तस्मिन् हन्तेर्जः इति जादेशः। अतो हेरिति लुकि प्राप्ते आभाच्छास्त्रीयस्यासिद्धत्वान्न लुगिति। हि
चोदात्तः। प्रतीचः। अंचु गतिपूजनयोः। अंचेश्छंदस्यसर्वनामस्थानमिति विभक्तेरुदात्तत्वं। पराचः। अनिगंतोंचतौ वप्रत्यय इति गतेः प्रकृति
स्वरत्वं। कृणुहि। कृवि हिंसाकरणयोः। असु असुभुवि॥ ॥ अथ सप्तमी॥ ॥ यस्मै धायुरदधा मर्त्यायाभक्तं चिद्भजते गेह्यं सः॥ भद्रा त इंद्र
सुमतिर्घृताची सहस्रदाना पुरुहूत रातिः॥ ॥ हे इंद्र धायुः निरंतरमैश्वर्यं दधानस्त्वं परस्मै मर्त्याय मनुष्याय अदधाः यद्वीर्यं दध्याग्निसम
र्त्यः अभक्तं चित् पूर्वमप्राप्तमपि गेह्यं गृहेषु भवं कनकमश्वादिकं भजते प्राप्नोति किंच। हे पुरुहूत बहुभिराहूत इंद्र घृताची घृतशब्दो हविर्मा
त्रमुपलक्षयति। तथा च सोमाज्यपुरोडाशादिलक्षणं हविरंचति प्राप्नोतीति घृताची तेतव सुमतिः शोभनाबुद्धिः भद्रा कल्याणकारी तथा राम
तव रातिर्दानशक्तिः सहस्रदाना अपरिमितधनदानसमेता इंद्रस्य बहुदातृत्वे मंत्रवर्णः। भूरिदा भूरि देहि नो मा दभ्रं भूर्या भरेति धायुः दधा २६
तेर्णादिक उण्प्रत्ययः। अदधाः दधातेर्लङि रूपं [illegible] न्नयोगादनिघातः। मर्त्याय। मर्त एव मर्त्यः। वस्वादिषु पाठात् स्वार्थिको यत्। यतोनावइ
त्याद्युदात्तत्वं। गेह्यं। गेहशब्दात्तत्र भव इत्यर्थे [illegible] इति स्वरितः। सुमतिः। मंत्रे वृषेत्यादिना क्तिन् उदात्तः॥ ॥ अथाष्टमी॥ ॥ सहदानुं पुरुहू

प्रकेतः प्रज्ञापितो विद्यते। सोम्यासः सोमम[illegible]मर्हंतीत्यर्थः इति यः प्रत्ययः स्वरः। षुञ् अभिषवे स्वादित्वात् श्नुः सति शिष्टत्वाल्लीयानिति
हि प्रत्ययस्वरः। दधातिर्दधातेर्लेटि रूपं समानवाक्ये युष्मदस्मदादिशानिघाता इति सोमपदस्योत्तरवाक्येनान्वयान्निघातः। अभ्यज्ञानामादिरित्या
द्युदात्तत्वं। तितिक्षंते तिज निशाने इत्यस्य क्षमायां गुप्तिज्किद्भ्यः सन्निति सन्। अभ्यस्तस्वरः। अभिशस्तिं। शसु हिंसायामित्यस्माद्भावे क्तिन् तादौ
च निति कृत्यतौ इति गतेः प्रकृतिस्वरत्वं। प्रकेतः। कित ज्ञाने। कर्मणि घञ्। थाथघञ्क्ताजबित्रकाणामित्युत्तरपदांतोदात्तत्वं॥ ॥ अथ द्वितीया॥ ॥ न ते दूरे परमा चिद्रजां
स्या तु प्र याहि हरिवो हरिभ्यां॥ स्थिराय वृष्णे सवना कृतेमा युक्ता ग्रावाणः समिधाने अग्नौ॥ ॥ हे हरिवः हरितवर्णाविश्वौ यस्य सोयं हरिवान् इंद्र हे
हरिवः परमा चित् परमाण्यपि दूरे वर्तमानान्यपि रजांसि स्थानानि तेतव दूरे न भवंति। यस्मात् हरिभ्यामुपेतस्त्वं आ प्र याहि अस्मदीयं यज्ञमभिलक्ष्य
आगच्छ। स्थिराय फलदाने दृढचित्ताय अत एव वृष्णे कामानां वर्षित्रे तुभ्यं इमानि सवनानि प्रातरादीनि कृताकृतानि किंच। अग्नावाहवनी
यसमिधाने आकृत्य अधिकरणतया सम्यग्दीप्यमाने सति ग्रावाणः उपलाः युक्ताः सोमाभिषवार्थं युक्ताः अतस्त्वं क्षिप्रमागच्छेति भावः। या
हि आ प्रा पाण यण इत्यस्य लोटि रूपं। हरिवः हरी अस्य स्त इति मतुप्। छंदसीर इति मस्य वत्वं। आमंत्रितत्वान्निघातः। स्थिराय ष्ठा गतिनिवृत्तौ। अ
स्मादजिरशिशिरेत्यादिना किरच्प्रत्ययांतत्वेन निपातनात् सकारलोपः। चित्स्वरः। सवना। षुञ् अभिषव इत्यस्मादधिकरणे ल्युट् इति ल्युट्। सू
यते सोमो यत्रेति सवनानि प्रातरादीनि लित्स्वरः। समिधाने। इन्धी दीप्तावित्यस्य कानचि रूपं। किन्वान्नकारलोपः। चित्स्वरः॥ ॥ अथ तृतीया॥ ॥ इंद्रः सु
शिप्रो मघवा तरुत्रो महाव्रातस्तुविकूर्मिर्ऋघावान्॥ यदुग्रो धा बाधितो मर्त्येषु क्व१ त्या ते वृषभ वीर्याणि॥ मंद्रः वृषभ कामानां वर्षक हे इंद्र त्वं

ऋ॰सं॰भा॰२

धांक्षलोकमसृक्षात् यथा न पतति तथा अधारयत्। तथा च मंत्रवर्णः। यत्पृथिवीं व्यथमानामदृंहादिति। सामानो समरं वसामा तदस्या
स्त्वीति मनुष्यवर्षणामादित्वान्न प्रत्ययः। प्रत्ययस्वरः। इषिरो। इषु गतौ। इषु मुदि त्यादिना। किच्च प्रत्ययः। कित्वादगुणः। चित्स्वरः। समक्षा
षद्विसरणगत्यवसादनेषु लिट्यस्य अंतर्भावितण्यर्थस्य लिटि थलि उपदेशे ऽत्वत इतीट् प्रतिषेधः। निघातः। अस्कभ्नात्। स्कंभु स्तंभु भ
इति सौत्रो धातुः। स्तंभु स्तुंभ्वित्यादिना श्नाप्रत्ययः। श्नान्नलोप इत्यादिना धातुनकारलोपः। अडागमस्वरः। अर्षंतु। ऋष गतौ। व्यत्ययेन
शप् प्रत्ययः। गुणः। पादादित्वादनिघातः। आपः। आप्लृ व्याप्तौ। क्विप् धातो र्ह्रस्वश्च जसि। अप्तृन्तृजित्यादिना दीर्घः। जस्वि सुप्त्वाद
नुदात्तत्वे धातुस्वरः। प्रसूताः। षूङ् प्रेरणे इत्यस्य कर्मणि निष्ठा। गतिरनंतर इति गतेः प्रकृतिस्वरत्वं॥ ॥अथ दशमी॥ ॥ अलातृणो वल इंद्र
व्रजो गोः पुरा हंतो र्भयमानो व्यार॥ सुगान्पथो अकृणोन्निरजे गाः प्रावन्वाणीः पुरुहूतं धमंतीः॥ ॥हे इंद्र अलातृणः बहूदकं तथा
अलमत्यर्थमातृद्यते हिंस्यत इत्यलातृणः। गोर्माध्यमिकाया वाचः व्रजः। गोष्ठभूतो वलः वृणोत्याकाशमिति वलो मेघः। पुरा हंतोः त
व वज्रप्रहारात् प्राक् भयमानः बिभ्यत् व्यार विशेषेण भूय। अनंतरं स इंद्रः गाः आपा निरजे निर्गमयितुं सुगान् सुगमान् पथो मार्गान् अ
कृणोत् अकरोत्। अतः वाणीः वननीया धमंतीः शब्दायमाना आपः पुरुहूतं बहुभिः राहूतं पार्थिवमुदकं प्रति प्रावन् अभ्यागछ
न्। एतामृचं यास्क एवं व्याख्यात्। अलातृणो वल इंद्र व्रजो गोः अलातृणो वल आतर्द नामा मेघो वलो वृणोते र्व्रजो व्रजत्यंतरिक्षे गोरेतस्या माध्य
मिकाया वाचः पुरा हननाद्भयमानो व्यार सुगा‌न्पथो अकृणो न्निरजे गाः सुगमनान्पथो अकारो न्निर्गमनाय गवां प्रावन्वाणीः पुरुहूतं धम

तीः। आपो वा वहनाद्वाचो वा वदनाद्बहुभिराहूतमुदकं धमतिर्गतिकर्मा। अलातृणः। तृदिर् हिंसायां। अलं पूर्वात्तृदेः घ अर्थे कविधानमिति
कर्मणि कप्रत्ययः। अलात्मा पकारस्याकाशः। वल संवरणे। वल्यते आछाद्यते तमो नेनेति वलो मेघः पुंसि संज्ञायामिति घः। प्रत्ययस्वरः। व्रजः। व्र
ज गतौ गोचरसंचरे त्यादिना प्रत्ययांतत्वेन निपातनात् कुत्वाभावः। व्रजंत्यंतरिक्ष इति प्रत्ययस्वरः। भयमानः। ञिभी भये। व्यत्ययेन शप्। आर
ऋ गतौ वित्यस्य लिटि णलि रूपं। निघातः। सुगान्। गम्लृ गतौ वित्यस्मादधिकरणे सुपुरो दधिकरण इति डप्रत्ययः। डित्वाट्टिलोपः। कृत्स्वरः। आ
वन्। अव रक्षणगत्यादिष्वित्यस्य लङि रूपं। निरजे। अज गतिक्षेपणयोरित्यस्मात्संपदादिलक्षणो भावे क्विप्। कृदुत्तरस्वरः। आवन्। अव रक्षणग
त्यादिष्वित्यस्य लङि रूपं। पुरुहूतं। ह्वयते र्निष्ठायां यजादित्वात् संप्रसारणं। हल इति दीर्घः। थाथादिस्वरः। धमंतीः। ध्मा शब्दे। शपि पाघ्रेत्यादिना ध
मादेशः। वाछंदसीति जसः पूर्वसवर्णदीर्घः। शतुर्लसार्वधातुकस्वरे कृते धातुस्वरः॥ ॥इति तृतीयस्य द्वितीये द्वितीयो वर्गः॥ ॥ अथ तस्मिन् सूक्ते
एकादशी॥ ॥एको द्वे वसुमती समीची इंद्र आपप्रौ पृथिवीमुत द्यां॥ उतांतरिक्षादभि नः समीक इषो रथीः सयुजः शूर वाजान्॥ ॥ योयमिंद्रः ए
कः असहाय एव सन् पृथिवीं उत अपि च द्यां हे एते द्यावापृथिव्यौ समीची परस्परं संगते वसुमती धनयुक्ते सत्यौ आपप्रौ समंतात् पूरयामास। उ
तापि च हे शूर सामर्थ्योपेत तादृशस्त्वं रथी रथवान् सन् नोस्माकं समीके समीपे इषः स्थातुमिछन् सयुजः संगतान् वाजान् वजंतिगछंतीति वा
जा अश्वाः तानश्वान् अंतरिक्षसकाशात् अभि प्रेरय आरथाद् हस्त्वमस्मान् समीपे शीघ्रमागछेति भावः। वसुमती। वस छंदसीति। पूर्वसवर्णदी
र्घः। पप्रौ। प्रा पूरण इत्यस्य लिटि णलि आत औ णल इत्यौकारः। निघातः। इषः। इषु इछायां। अस्मादिगुपधलक्षणः कः। कित्वादगुणः।

राम
५७

ऋ·सं·भा·२

प्रत्ययस्वरः। रथीः रथोऽस्यास्तीति मत्वर्थे छंदसीवनिपाविति ई प्रत्ययः। प्रत्ययस्वरः॥ ॥ अथ द्वादशी॥ ॥ दिशः सूर्यो न मिनाति प्रदिष्टा दिवेदिवे
हर्यश्वप्रसूताः॥ सं यदानळ् अध्वन आदिदश्वैर्विमोचनं कृणुते तत्त्वस्य॥ ॥ हर्यश्वप्रसूताः हरी अश्वौ यस्यासाविति हर्यश्वः इंद्रः तेन प्रेरिता दिशः
दिवेदिवे प्रतिदिवसं प्रदिष्टाः सूर्यस्य गमनार्थं ताः या दिशो विद्यंते ताः सूर्यो न मिनाति न हिनस्ति किं तु ताभिरेव व्रजतीत्यर्थः। यद्यदा सूर्यः। अध्वनो गं
न्तव्याद्देशान् अश्वैर्गमनसाधनभूतैः समानळ् सम्यग्गच्छति। आदित् अनंतरमेव विमोचनं कृणुते अश्वानां विमोचनं कुरुते। तदेतत् सर्वं कर्म अस्य
तवैव खलु अनुप्रसिद्धो सूर्यः प्रेषण इत्यस्मात् सुसूधागृधिभ्यः क्रन् इति क्रन्प्रत्ययः सुवति प्रेरयतीति सूर आदित्यः सूर एव सूर्यः। चेरवादित्वात् स्वा
र्थिको यत्। यतोनाव इत्याद्युदात्तत्वं। मिनाति। मी हिंसायां। मीनातेर्निगम इति ह्रस्वः। हर्यश्वप्रसूताः तृतीया कर्मणीति पूर्वपदप्रकृतिस्व
रत्वं। आनट्। अशू व्याप्तावित्यस्य बहुलं छंदसीति लङ्। श्नुः अश्नोतेश्चेति नुडागमः प्रश्नादित्वात्त्वं। यद्योगादनिघातः॥ ॥ अथ त्रयोदशी॥
॥ दिदृक्षंत उषसो यामन्नक्तोर्विवस्वत्या महि चित्रमनीकं॥ विश्वे जानंति महिना यदागादिंद्रस्य कर्म सुकृता पुरूणि॥ ॥ विश्वे सर्वे जनाः विवस्व
त्याः विवासनवत्याः निर्गमनपरायाः अक्तोः रात्रेः संबंधिनः उषसो यामन् यामनि निर्गमने सति महि महत् चित्रं चायनीयं अनीकं सौरं तेजः राम
दिदृक्षंते द्रष्टुमिच्छंति। यद्यदा आगात् उषसः कालसमंतादागात् व्येति तत् इच्छंति त्यो दिदृक्षमाणाः सर्वे जनाः महिना महत्त्वेन या अग्निहोत्रा ५८
दीनि कर्माणि जानंति कर्तव्यतया च बुध्यंते के इंद्र पुरूणि बहूनि सुकृता सुष्ठुकृतानि कर्माणि इंद्रस्य तत्रैव दिदृक्षंते। दृशिर् प्रेक्षणे इत्यस्य सनि
ज्ञाश्रुस्मृदृशां सन इत्यात्मनेपदं। अभ्यस्तस्वरः। विवस्वत्याः विवासतेः संपदादिलक्षणः क्विप् व्यत्ययेनोपधाह्रस्वत्वं। तस्मान्मतुप् अस्यास्तीति म

त क्षियंतमहस्तमिंद्र संपिणक्कुणारुं॥ अभि वृत्रं वर्धमानं पियारुमपादमिंद्र तवसा जघंथ॥ ॥ हे पुरुहूत इंद्र त्वं सहदानुं दानुभिर्दानवैः
सह वर्तत इति सहदानुः तं क्षियंतं बोधमानं कुणारुं क्षुणनशीलं कंचिदसुरं अहस्तं हस्तहीनं कृत्वा संपिणक् सम्यक् चूर्णी कुरु।
किं च हे इंद्र वर्धमानं सर्वतः इषुमात्रं वर्धमानं सइषुमात्र अभिषुमात्रं विष्वक् वर्धत इति श्रुतेः पियारुं हिंसकं वृत्रं वृत्रासुरं अपादं पादहीनं
कृत्वा तवसा बलेन अभिजघंथ हतवानसि यद्वा सहदानुं नुदक दानोपेतं क्षियंतं आकाशे निवसंतं कुणारुं वर्जंतं शत्रं शणोत्वा छादय
ति न भद्र इति वृणोमेध नमिमं वर्धमानं मेधं हस्तपादशून्यं कृत्वा संपिणक् संपिपिहि तथा चयास्कः अहस्तमिंद्र कृत्वा संपिंड्डि परिक्वण
नं मेघमिति। सहदानुं। दो अवखंडने। दाभाभ्यां नुरिति नु प्रत्ययः। मतीनिदं नुदमनिवः। यद्वा दानुदूनि बहुव्रीहौ पूर्वपदप्रकृतिस्वरः। क्षियं
तं। क्षि निवासगत्योः तुदादित्वाच्छः। अप्रत्ययः स्वरः। पिणक्। पिल्ल संचूर्णने। रुधादित्वात् श्नं हेर्लुक् षकारस्य ककारश्छांदसः। कुणारुं
कुण शब्दे। बाहुलकादूप्रत्ययः। आघ्नंतः जघंथ हन हिंसागत्योः इत्यस्य लिटि थलि रूपे अभ्यासाच्चेति तथा नुहकारस्य त्वं निघा
तः। उपदेशेत्वत इति इट्प्रतिषेधः॥ ॥ अथ नवमी॥ ॥ नि सामनामिषिरामिंद्र भूमिं महीमपारां सदने ससत्थ॥ अस्तभ्नाद्द्यां वृषभो अं
तरिक्षमर्षंत्वापस्त्वयेह प्रसूताः॥ ॥ हे इंद्र महीं महतीं अत एव अपारां इषिरां स्थाना भावेन चलंतीं एवंविधां भूमिं समेतां तथा च मंत्र
ब्राह्मणः। गावोते सामना विन्न इति। यद्वा समरेव सा मनतथा च शतपथे श्रूयंते। यदेवसमः पृथिव्या समो मनसा केन समो नागेन सम एते त्रिभिर्लो
के समाहूत समेत दस्यास्तीति सामना तां सम्यवनी कृत्वा सदने स्थाने निषसनि वेशयामास तथा वृषभः अभिमतफला नां वर्षकः इंद्रः

याहननीयाः दृह्याद्दृहद्दृहि वृह वृह दृह्यो। व्यत्ययेन श्यन् लोटि रूपं निघातः। अभूवन्। भू सत्तायां। अस्य लुङि रूपं। गातिस्थेति सिचो लुक्। भूसुवो
स्तिङीति गुणप्रतिषेधे भुवो वुग्लुङ्लिटोरिति वुगागमः। निघातः। शिक्ष। शिक्ष विद्योपादाने। अयं धातुरत्र दाने वर्त्तते व्यत्ययेन परस्मैपदं। निघातः। दु
र्मायवः। मिनोतेः। कृवापाजिमीत्यादिना उण्प्रत्ययः। कृदुत्तरपदस्वरः। दुरेवाः। इण् गतौ। इण्शीङ्भ्यां वन्निति कर्त्तरि वन्प्रत्ययः। रिपवः। रपी
च वसिवक्षोरपेति चोपधाया इत्याप्रत्ययः। उपधाया इत्वं। प्रत्ययस्वरः। हत्वासः। हन हिंसागत्योः। कृत्यार्थे तवैकेन्केन्यत्वन इति त्वन्। नित्वादा
द्युदात्तः॥ ॥इति तृतीयस्य द्वितीये तृतीयो वर्गः॥३॥ अथ तस्मिन्सूक्ते षोडशी॥ ॥संघोषः शृण्वे वमैरमित्रैर्जही न्येष्वशनिं तपिष्ठां॥ वृश्चेम धस्ता
द्विरुजा सहस्व जहि रक्षो मघवन्रंधयस्व॥ ॥हे इंद्र अवमैः समीपे वर्त्तमानैरमित्रैः शत्रुभिरसुरैरुत्पादितो योशनिः घोषः उच्यमानः संशृण्वे सं
म्यगस्माभिः श्रूयते तपिष्ठां अतिशयेन तापिकां नामशनिं एषु शत्रुषु अवनिधाय जहि मारय तान्। प्रयुक्तमशनिं नातानेव प्रापयेति भावः। ईदृशा
न् शत्रून् अधस्तात् मूलतो वृश्च छिंधि किंच विरुजा तान्विशेषेण बाधस्व अभिभव हे मघवन्निंद्र रक्षः कर्मविघ्नकारीणि रक्षांसि जहि मार
य। अनंतरमिमं यज्ञं रंधयस्व जहि। हन हिंसागत्योः। अस्य लोटि रूपं। अशनिं। अशू व्याप्तौ। अश्यवितृभ्यो निरित्यनिप्रत्ययः। प्रत्ययस्वरः। त
पिष्ठां तपुशब्दादिष्ठन्। तिस्वरः। वृश्च। व्रश्चू छेदने। जुहोत्यादिः। ग्रहिज्यादिना संप्रसारणं। सहस्व वाक्यभेदादनिघातः। रंधयस्व रध्य हिंसा
सिद्ध्योरित्यस्य ण्यंतस्य लोटि रधिजभोरचीति नुमागमः। वाक्यभेदादनिघातः॥ ॥अथ सप्तदशी॥ ॥उद्वृह रक्षः सहमूलमिंद्र वृश्चा मध्यं
प्रत्यग्रं शृणीहि॥ आ कीवतः सललूकं चकर्थ ब्रह्मद्विषे तपुषिं हेतिमस्य॥ ॥हे इंद्र रक्षः कर्मणि विघ्नकारि रक्षः कुलं सहमूलं मूलसहितं यथा भ

वति तथा उद्वृह उद्धर। किंच। मध्यं तस्य मध्यभागं वृश्च छिंधि। प्रत्यग्रं अग्रमग्रं प्रत्यागतं तन्शृणीहि जहि। तस्य रक्षः कुलस्य मध्ये सललूकं मरण
शीलं रक्षः आकीवतः आ अपरायां क्रियतेभिज्ञायमानपरिमाणाद्दिनिद्राद्देशाच्च कथं कुरु। कृत्वा च ब्रह्मद्विषे ब्राह्मणद्वेषकारिणे तस्मै रक्ष
से तपुषिं तापकं हेतिं घातकं आयुधं तस्य क्षिप। उक्तमर्थं यास्कोऽब्रवीत्। उद्वृह रक्षः सहमूलमिंद्र मूलं मोचनाद्वा मोषणाद्वा मोहनाद्वा वृश्चाम
ध्यं प्रतिशृणीह्यग्रमग्रमाकद्भगवत्याक्रियतो देशात् सरस्रूहं संलुब्धं भवति पापकमिति नैरुक्ताः सललूकं वास्यात्सर्तेरभ्यस्तात्स्वयस्ते हेतिहन्ते
रिति वृह। वृहउद्यमने इत्यस्य लोटि रूपं। शृणीहि। शॄ हिंसायां। अस्य लोटि हौ ई हल्यघोरितीत्वं निघातः। कीवतः। किंशब्दात् किंपरिमाणमस्येत्य
र्थे किमिदंभ्यां वो घ इति। किंशब्दाद्वतुबस्तीति ज्ञापयित्वा द्वतुप्। वादेशाभावश्छांदसः। इदंकिमोरीश्की इति कीत्यादेशः। सललूकं सृ गतौ। छांद
सी रूपसिद्धिः। चकर्थ। डुकृञ् करणे इत्यस्य लिटि थलि रूपं। क्रादित्वादिडभावः। निघातः। तपुषिं। तप संताप इत्यस्मादर्त्तिपृवपियजितनिधनि
तपिभ्यो नित्। उसिप्रत्ययः। नित्त्वं। अकारस्य इकारश्छांदसः। नित्स्वरः। हेतिं हन हिंसागत्योः। ऊतियूतिजूतिसातीत्यादिना निपतनांतोदात्तः।
अस्य। असु क्षेपणे। लोटि रूपं॥ ॥अथाष्टादशी॥ ॥स्वस्तये वाजिभिश्च प्रणेतः संयन्महीरिषआसत्सि पूर्वीः। रायोवंतारो बृहतः स्यामास्मे अ
स्तु भग इंद्र प्रजावान्॥ ॥प्रणेतः प्रकर्षेण जगतो निर्वाहक हे इंद्र अस्मान्वाजिभिरश्वैः सहितान्कुरु। स्वस्तये अविनाशाय कुरु। यदा त्वं समासत्सि
अस्माकं समीपे यज्ञनिर्वाहार्थमासीदसि तदा वयं महीर्महांति इषोन्नानि पूर्वीः प्रभूतानि रायो धनानि वंतारः तेषां संभक्तारः संतः बृहतो महतो
महांतः स्याम भवेम। किंच। प्रजावान् अपत्योपेतं भगो धनं अस्मे अस्मासु अस्तु। असत्सि। षद्लृ शरणादिषु। बहुलं छंदसीति शपो लुक्। यद्योगादनि

[illegible] भा॰ २ घातः॥ इषोराय इतिचा द्वेषष्यर्थे द्वितीयेलंतारः॥ वनषणसंभक्तावित्यस्यतत्वि आगमानुशासनस्यानित्यत्वादिड भावः॥ निस्वरः॥ स्यामः॥ अ
सुभुवीत्यस्यलिङिरूपं॥ अस्मे॥ अस्मच्छब्दस्य सप्तम्याः सुपांसुलुगितिशे इत्यादेशः॥ ॥ अथैकोनविंशी॥ ॥ आनोभर भगमिंद्र द्युमंतं निते दे
ष्ठस्य धीमहि प्ररेके॥ ऊर्व इव पप्रथे कामो अस्मे तमापृण वसुपते वसूनां॥ ॥ हे इंद्र नोस्मदर्थं द्युमंतं दीप्तियुक्तं भगं धनं आभर॥ आसमंतात्संभ
र देष्ठस्य दानशीलस्य तेतव संबंधिनो धनस्य प्ररेके प्ररेचने दानदाने निधीमहि॥ धनदानस्य वयं पात्रभूता अस्म इत्यर्थः॥ कुत इत्यत आ
ह॥ अस्मे अस्माकं कामो भिलाषः ऊर्व इव अनवाप्तकामो वडवानल इव पप्रथे प्रभूतो वर्त्तते॥ वसूनां वसुपते धनानां मध्य उत्तमधनानाम
धिपते हे इंद्र तं महांतं कामं आपृण बहुधनप्रदानेन पूरय॥ आभर॥ भृञ् भरण इत्यस्य लोटि रूपं॥ देष्ठस्य॥ डुदाञ् दाने॥ गादीभ्यामिष्ठुजेतीष्ठु
चप्रत्ययः॥ अत्यर्थं ददातीति देष्ठः॥ चित्स्वरः॥ धीमहि॥ दधातेर्लिङि बहुलं छंदसीति॥ शपो लुक्॥ छंदस्युभयथेति महिङः सार्वधातुकत्वात्सी
युट् आर्धधातुकत्वादातो लोपः॥ निघातः॥ ऊर्व इव॥ पूर्वपदस्वरः॥ पप्रथे॥ प्रथ प्रख्याने इत्यस्य लिटि रूपं॥ पृण प्रेण प्रीण इत्यस्य लोटि॥ सर्हिः
तुदादिः॥ अतो हेरिति हेर्लुक्॥ वसूनां॥ नित्वादाद्युदात्तत्वं॥ ॥ अथ विंशी॥ ॥ इमं कामं मंदया गोभिरश्वैश्चंद्रवता राधसा पप्रथश्च॥ स्वर्यवो मति
भिस्तुभ्यं विप्रा इंद्राय वाहः कुशिकासो अक्रन्॥ ॥ हे इंद्र इमं धनादिविषयं कामं अस्मदीयमभिलाषं गोभिः अग्निहोत्रादिकर्मसाधनभूतैर्ग ऋग्
वादिभिर्वाहनसाधनभूतैरश्वैश्च इवता दीप्तियुक्तेन राधसा धनेन च मंदय एतानि दत्वा इमम् अभिलाषं पूरय॥ किंच॥ एतैः रसान् पप्रथः॥ प्रथि ६०
तांश्च कुरु पप्रथ॥ स्वर्यवः॥ स्वर्गादिसुखमात्मन इच्छंतः विप्राः कर्मकुशलाः कुशिकासः कुशिकाः॥ मतिभिर्मननीयैर्मंत्रैर्वाहः स्तोत्रं इंद्राय तुभ्यमक्रं

तुप्मादुपधाया इति तस्य वत्वं॥ मतुपः पित्वादनुदात्तत्वे धातुस्वरः॥ जानंति ज्ञा अवबोधने ज्ञाजनोर्जेति जादेशः॥ निघातः॥ अगात्॥ इण् गतावित्य
स्य लुङि रूपं॥ यद्वृत्तयोगादनिघातः॥ सुक्रतो॥ गतिरनंतर इति गतेः प्रकृतिस्वरत्वं॥ ॥ अथ चतुर्थी॥ ॥ महि ज्योतिर्निहितं वक्षणास्वामा पक्वं चरति बि
भ्रती गौः॥ विश्वं स्वाद्म संभृतमुस्रियायां यत्सीमिंद्रो अदधाद्भोजनाय॥ ॥ वक्षणासु वक्ष्यंते यासु सूदकानीति वक्षणा नद्यः तासु महि महत् ज्यो
तिः ज्योतिषम् उदकं निहितमिंद्रेण आमानवसूतिका गौः पक्वं क्षीरादिकं बिभ्रती दधाना सती चरति सर्वत्र वर्त्तते॥ यद्वास्मादुदकस्या[illegible]स्यादुत्तर
संभृतं संपादितं दधिघृतक्षीरादिकं सीमितः सर्वत उस्त्रि उस्रियायां गवि भोजनाय अदधात् तस्मात्क्षीरादिकं बिभ्रती गौश्चरतीति पूर्वेणान्वयः॥ व
क्षणासु॥ वक्ष रोषे॥ अस्मात्करणाधिकरणयोश्चेति करणे ल्युट्॥ नित्स्वरः॥ पक्वं॥ पचेर्निष्ठातकारस्य पचो व इति वत्वं॥ प्रत्ययस्वरः॥ चरति॥ चर
तिर्गत्यर्थः॥ बिभ्रती॥ डुभृञ् धारणपोषणयोः॥ जुहोत्यादिः॥ शतुरुगितत्वादुगितश्चेति ङीप्॥ अभ्यस्तानामादिरित्याद्युदात्तत्वं॥ उस्रियायां॥ वस निवा
से॥ स्फायितंचीत्यादिना अधिकरणे रक्प्रत्ययः॥ यजादित्वात्संप्रसारणं॥ शासिवसिघसीनां चेति षत्वाभावश्छांदसः॥ स्वार्थिको यप्रत्ययः॥ प्रत्ययस्व
रः॥ ॥ अथ पंचदशी॥ ॥ इंद्र दृह्य यामकोशा अभूवन्यज्ञाय शिक्ष गृणते सखिभ्यः॥ दुर्मायवो दुरेवा मर्त्यासो निषंगिणो रिपवो हंत्वासः॥ ॥ हे
इंद्र दृह्य दृढो भव॥ यतः यामकोशाः॥ यांत्यस्मिन्निति यामो मार्गः तस्य कोशाः॥ कोशवदाच्छादकाः॥ मार्गप्रतिबंधकाः॥ राक्षसा अभूवन्॥ त्वं यज्ञाय
यज्ञकर्त्रे गृणते स्तोत्रं कुर्वते यजमानाय सखिभ्यः पुत्रादिभ्यस्त्वं शिक्ष अपेक्षितं फलं देहि॥ दुर्मायवः॥ दुष्टमाधीनि मिन्वंति प्रक्षिपंतीति दुर्मायवः॥ दु
रेवाः दुष्टं गच्छंतः॥ मर्त्यासो मारयितारो निषंगिणः॥ निषंग शब्देन इषुधिरभिधीयते तद्वंतः॥ एवंविधसामर्थ्योपेता रिपवः शत्रवो राक्षसाः हंत्वासः॥ सत्व

जायसंमातरि प्रत्यृञ्जस्य विधानं पूजयन्नित्यादिना शासत् । शासेः शतरि अभ्यस्तत्वान्नुमभावः । दुहितुः । दुह प्रपूरणे । नप्तृनेष्टृ इत्यादिना तृच्
निपातनादिडागमः । चित्स्वरः । नप्त्र्यं नप्तरि भवं भवे छन्दसीति यत् । रीङृत इति रीङादेशः । यस्येति लोपः । रेफलोपः छांदसः । गात् । इण् गतौ । लेः
ट्यस्य छांदसे लुङि रूपं । ऋञ्जतिः प्रसाधनकर्मा । शग्म्येन । शं सुखं गच्छतीति । गमेरौणादिकः कप्रत्यये कित्वात् गमहनेत्यादिनोपधालोपः । शग्मे
साधुरिति यत्प्रत्ययः । वीरवीर्यौ चेत्यत्र यतेसा च इत्यस्यानित्यत्वज्ञापितत्वादेव नित्स्वरः । दधन्वे । धन्व इति सौत्रो धातुः । लिटि रूपं । प्रत्ययस्वरः ।
॥ अथ द्वितीया ॥ ॥ न जामये तान्वो रिक्थमारैक् चकार गर्भं सनितुर्निधानं । यदी मातरो जनयंत वह्निमन्यः कर्ता सुकृतोरन्य ऋंधन् ॥ ॥ अभ्रा
तृका दुहितुः पुत्रिका काचित्सा रिक्थभागित्युक्तं । भ्रातृमत्यास्तस्या रिक्थभाक्त्वं नास्तीति ब्रूते । तान्वः तनूजः औरसः पुत्रो जामये भगिन्यै रिक्थं
पित्र्यं धनं नारैक् न प्ररेचयति न प्रददाति किं तर्हि । सनितुर्वनी भजमानस्य भर्तुः गर्भं षष्ठ्यर्थे द्वितीया । गर्भस्य निधानं रेतःसेकं निधानं निधामेनां
चकार । पाणिग्रहणेन संस्कृतामेनां करोति । न तु तस्यै रिक्थं ददातीत्यभिप्रायः । असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैः । भगिन्यश्च निजा
दंशाद्दत्त्वांशं तु तुरीयकमिति याज्ञवल्क्यस्मरणात् । स्त्रीपुंसलक्षणस्यापत्यस्यैकोत्पाद्यत्वाविशेषात्तूभमपत्यस्यैको विशेष इति विशेषं दर्शयति ।
यदि यद्यपि मातरो मातापितरौ वह्निं अवह्निं स्त्री वह्निः पुमान् स्वभार्याया वोढृत्वात् । अवह्निश्च अवह्निः तादृशं स्त्रीपुंसलक्षणमपत्यं जनयंत तथा
पि तयोर्मध्ये अन्यः पुंलक्षणः सुकृतोः शोभनस्य पिंडदानादेः कर्मणः कर्ता भवति । अन्यः स्त्रीलक्षणः ऋंधन् वस्त्रालंकारादिना ऋध्यमान एव
भवति पिंडदानादिकर्तृत्वात्पुत्रो दायार्हः दुहितुः तथा नेति न दायार्हा सा तु केवलं यस्मै दीयते । तथा च निरुक्तं । न जामये भगिन्यै जामिरन्येस्यां ज

ऋ॰सं॰भा॰२ येमः शुनं । टुओश्वि गतिवृद्ध्योः । रित्यस्य निष्ठायां यस्य विभाषेतीट्प्रतिषेधः । होहंते ऋति कुत्वं । संजितं । जिजये क्विप् । तुक् ॥ ॥ इति तृतीयस्य द्वितीये
तृतीयो वर्गः ॥ ॥ वैश्वामित्र एवाश्रुतेरिति ॥ इषिरथस्य पुत्रः कुशिकः विश्वामित्र एव वा ऋषिः इंद्रो
देवता त्रिष्टुप् छंदः चातुर्विंशिकेहनि माध्यंदिनसवने अच्छावाकशस्त्रे आरंभणीयायाः ऊर्ध्वमहीनसूक्तसंज्ञकमेतत्सूक्तं । शंसनीयं । सूत्रितं च
अस्मा इदु प्रतवसे शासद्वह्निरिति त एव नेहीनसूक्ते इति । एष्ट्याभिप्लवषडहयोः प्रथमेहनि माध्यंदिनसवने अच्छावाकशस्त्रे अहीनसूक्तस्य
स्थाने त्रीणि संपातानां सूक्तानि तत्रेदं तृतीयं संपातसूक्तं । इमामूषुविच्छंतित्वा शासद्वह्निरिति संपाता इति ॥ ॥ तस्मिन् सूक्ते प्रथमा ॥ ॥ शास
द्वह्निर्दुहितुर्नप्त्यं गाद्विद्वाँ ऋतस्य दीधितिं सपर्यन् ॥ पिता यत्र दुहितुः सेकमृंजन्त्सं शग्म्येन मनसा दधन्वे ॥ ॥ कुशिकः प्रसंगात् कंचिच्छा
स्त्रार्थं ब्रूते । अपुत्रो यः पिता कन्यामन्यकुलं प्रापयति स वह्निरित्युच्यते । स पिता शासत् । अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलंकृतां । अस्यां
यो जायते पुत्रः स मे पुत्रो भवेदिति स्मृत्युक्तमनुशासनं कुर्वन् । दुहितुः पुत्रिकायाः नप्त्यं नप्तृभवं पिंडदानादिकं कर्तव्यतया गात् गच्छति । किं
कुर्वन् । विद्वान् अस्यां दुहितरि जातः पुत्रो मम स्वधाकारो भविष्यतीति जानन् ऋतस्य पुत्रोत्पादनेन सत्यस्य समर्थस्य रेतसः दीधितिं धन्तरिस राम
पर्यन् । वस्त्रालंकारादिना पूजयन् । पिता नप्तृभावं गच्छति । अत्र यस्या दुहितुः पिता पालकः पतिर्जामाता सेकं तस्यां रेतःसेकं ऋंजन् प्रसाधय ६१
न् । यः शग्म्येन केवलं सुखनिमित्तेन मनसा भयास्वरीत् दधन्वे । संधत्ते न तु पुत्रनिमित्तेन मनसा । एतमर्थं यास्को याह । प्रशास्ति वोढा संतान
कर्मणे दुहितुः पुत्रभावं दुहिता दुर्हिता दोग्धेर्वा नप्तारमुपागमद्दौहित्रमिति । विद्वान् प्रजानन् । यस्यां रेतःसेको अंगादंगात्संभवसि हृदयादधि

ग्रकः। घुः। मंद्य। मदिस्तुत्यादि। छिंत्यस्य लोटि रूपं। भगोभिः सावेकाच इति विभक्तेरुदात्तत्वे प्राप्ते नगोश्वन्साववर्णेत्यादिना प्रतिषेधः प्रकृतिस्वरः।
पप्रथ। प्रथ प्रख्याने। छंद्। छंदस्युभयथेति तस्य सार्वधातुकत्वात्तस्य बहुलं छंदसीति श्लुः। धातुस्वरः। अकृन्। करोते लुङि मंत्रे घस ह्वर इत्या-
दिना लुक्। निघातः॥ ॥अथैकविंशी॥ ॥आ नो गोत्रा दर्दृहि गोपते गाः समस्मभ्यं सनयो यंतु वाजाः। दिवक्षा असि वृषभ सत्यशुष्मोऽस्मभ्यं सु मघव-
न्बोधि गोदाः॥ ॥गोपते स्वर्गाधिपते हे इंद्र नोऽस्मदर्थं गा आगो गोत्राण्यालिगाः अपः प्रतिदर्दृहि। आद्रियस्व। आप्रालि विदार्य जलानि प्रापयेत्यर्थः।
ततः सनयः संभजनीयानि वाजा अन्नानि अस्मभ्यमस्मदर्थं संयंतु संगच्छंतु वृषभ कामानां वर्षितः हे इंद्र अस्मभ्यं गोदाः गवां प्रदाता भवामीति
सु बोधि सुष्ठु बुध्यस्व दर्दृहि दृङ् आदरे। यङ्लुकि लोटि रूपं। ऋतश्चेत्यभ्यासस्य रुगागमः। निघातः। ओतोम्शसोरित्योकारस्याकारः। एकादेश-
स्वरः। अस्मभ्यं। भ्यसो भ्यमिति चतुर्थी बहुवचनस्य भ्यमादेशः। यंतु। इण् गतौ। लोटि रूपं। दिवक्षाः अक्षू व्याप्तौ। असुन्। दिव व्याप्नोतीति दि-
वक्षाः। कृदुत्तरपदस्वरः। गोदाः। हृदा अदाने। आस्माद्विवृ। दिकृदुत्तरपदस्वरः॥ ॥अथ द्वाविंशी॥ ॥शुनं हुवेम मघवानमिंद्रमस्मिन्भरे नृतमं वाजसा-
तौ। शृण्वंतमुग्रमूतये समत्सु घ्नंतं वृत्राणि संजितं धनानां॥ ॥हे इंद्र इवाज सातौ वाजस्यान्नस्य सातिर्लाभो यातिस्मिन्सोयं वाजसातिः तस्मिन्भ-
रे बिभ्रति जयलक्ष्मीमनेन योद्धार इति भरः संग्रामः। तस्मिन्संग्रामे शुनं शुनमुत्साहेन युक्तं मघवानं धनवंतं अतएव इंद्रं निरतिशयैश्वर्यसंपन्नं
नृतमं सर्वस्य जगतोतिशयेन नेतारं त्वां हुवेम कुशिका वयं यज्ञार्थमाह्वायामतथा शृण्वंतं अस्माभिः क्रियमाणां स्तुतिं शृण्वंतं उग्रं शत्रूणां भयंकरं
समत्सु संग्रामेषु वृत्राणि अनुपलक्षितानि सर्वाणि रक्षांसि घ्नंतं हिंसंतं धनानां शत्रुसंबंधिनां संजितं सम्यक् जेतारं। तामूतये रक्षणाय वयं माह्व-

ऋ॰सं॰भा॰२ नयंति। जयेत्यं जमतेर्वस्याह्वृतिकर्मणो निर्गमनप्राया भवति तान्व आत्मजः पुत्रो रिक्थं धारिक्थमादात्त्व कारेनां गर्भं निधानं सनितुर्हस्तग्राहस्य य-
दि ह मातरो जनयंत वह्निं पुत्रमवह्निं स्त्रियमन्यतरः संतानकर्त्ता भवति तु मानद्धादोन्यतरोर्धयित्वा जामिः प्रदीयते परस्मा इति। तान्वः प्राणाद्वि-
च्छित्तवाजन्तूः प्राणवती तद्विकार इत्यर्थे प्राणरजतादिभ्यो नित्यमसंज्ञापूर्वकस्य विधेरनित्यत्वात् गुणाभावः। रिच्छरिचरविरेचने। पादलुदिवविभ्यस्त-
कप्रत्ययस्वरः। अरेक् रिचिर विरेचन इत्यस्य लुङि स्त्रिवियद व्राजत्यादिना वृद्धिः। बहुलं छंदसीति इडभावः। हल्ङ्यादिसंयोगांतलोपो। निघातः
सनितुः शेषश्छांदसः। द्विवचनस्य बहुवचनं प्रजा येजनयंते। जने र्लिङि रूपं। वह्निं पुमांस्त्रिभियेति विभक्तेः शेषः। सुकृतोः करोतेरेणादिकः
क्विप्रत्ययः। रंधन् ऋधु वृद्धौ। व्यत्ययेनश्नं॥ ॥अथ तृतीया॥ ॥अग्निर्जज्ञे जुह्वा रेजमानो महस्पुत्राँ अरुषस्य प्रयक्षे। महान्गर्भो मह्या जा-
तमेषां मही प्रवृद्धर्यश्वस्य यज्ञैः॥ ॥हे इंद्र अरुषस्य रोचमानस्य तव प्रयक्षे यज्ञार्थं जुह्वा ज्वालाभी रेजमानः कंपमानोग्निर्महः प्रभूतान्पु-
त्रान्रश्मीन्यज्ञे उत्पादयामास। एषां रश्मीनां गर्भो जलानां अंगीकारः महानासीत् अनेन प्रकारेण प्रवृत्तिः हर्यश्वस्य इंद्रस्य यज्ञैर्यज्ञसमर्हैः
सोमाज्यादिप्रभृतिभिः मही महती भवंति। यज्ञे जनी प्रादुर्भावे इत्यस्य लिटि रूपं। अंतर्भावितेत्यर्थः। जुह्वा जुहोतेर्दीर्घश्चेति क्विप् द्विर्वचनं दी- राम
र्घश्च धातोरुदात्तस्वरितयोरिति नत्वं। हर्यश्वा हरी अश्वौ यस्येति बहुव्रीहौ पूर्वपदप्रकृतिस्वरः॥ ॥अथ चतुर्थी॥ ॥अभि जैत्रीरसचंत स्पृधानं ६२
महि ज्योतिस्तमसो निरजानन्। तं जानतीः प्रत्युदायन्नुषासः पतिर्गवामभवदेक इंद्रः॥ ॥जैत्रीः जित्वर्यो विजयामरुतः स्पृधानं वृत्रेण स्पर्धमानमिं-
द्रं अभ्यसचंत सर्वतः आगच्छन् ते च मरुतः महि महत् ज्योतिः सूर्याख्यं तेजः तमसस्तमोरूपाद्वृत्रान्निरजानन् निर्गतमज्ञासिषुः। तमुदितं सूर्यं जा-

ऋ॰सं॰भा॰२

धुरित्यर्थे तत्र साधुरिति यत्प्रत्ययः। यचि भमिति संज्ञायां नस्तद्धिते इति टिलोपः। यतोऽनाव इत्यस्यानित्यत्वात् तित्स्वरितमिति स्वरितः। विवेश। विश प्रवेशने
इत्यस्य लिटि रूपं॥ इति तृतीयस्य द्वितीये पंचमो वर्गः॥५॥ अथ [illegible] षष्ठी॥ विदद्यदी सरमा रुग्णमद्रेर्महि पाथः पूर्व्यं सध्र्यक्कः॥ अग्रं
नयत्सुपद्यक्षराणामच्छा रवं प्रथमा जानती गात्॥ यदिति यदा सरमा इंद्रेण गवान्वेषणार्थं प्रेषिता सरमानामदेवशुनी अद्रेः रुग्णं भग्नं द्वारं विद
त् अलभत तदानीमिंद्रः महिमहत् पूर्व्यं पूर्वं प्रेषणकाले अन्नादिनीतेभ्यो जीकरिष्यामीति प्रतिज्ञातं सध्र्यक् इतरैरपि भोज्यैः सध्रीचीनं पाथो गव्या
दिलक्षणमन्नं कः अकार्षीत् तस्यै दत्तवान्। ततः सुपदी शोभनपादयुक्ता सा सरमा अक्षराणां क्षयरहितानां गवाम् अग्रं प्रांतं नयत् प्राप्नोति कुत इत्य
त आह। ततः हर्वे तेषां हंभारवं प्रथमा प्रथमं जानती सती अच्छ अभिमुख्येन गात्। जगाम। विदत्। विद्लृ लाभे इत्यस्य लुङि तिपि ---- रङादे
शः तस्य स्वरः। सरमा। सृ गतौ। औणादिको अमप्रत्ययः। सरसीति सरमा। सरमा सरणादिति यास्कः। प्रत्ययस्वरः। रुग्णं रुजो भंग इत्यस्य निष्ठायां
ओदितश्चेति नत्वं। प्रत्ययस्वरः। पाथः। पा रक्षणे। अन्नेवेत्यसुन्प्रत्ययः। पुडागमः। पातीति पाथो अन्नं। नित्स्वरः। सध्र्यक्। अंचु गतिपूजनयोः ऋ
त्विगित्यादिना क्विन्। सह अंचतीति। सहस्य सध्रिरिति सध्र्यादेशः। क्विप्रत्ययस्य कुत्वं। अद्रिसध्र्योरंतोदात्तत्वं निपात्यते स्वरनिवृत्त्यर्थमिति सध्रि
इत्यादेशोऽन्तोदात्तः यणादेशे कृते उदात्तस्वरितयोर्यणः स्वरित इति यणः स्वरितत्वं। कः करोतेर्लुङि रूपं। सुपदी। पादोऽन्यतरस्यामिति ङीप्। इणो [right margin: सम ६२]
गा लुङि रूपं॥ अथ सप्तमी॥ अगच्छदु विप्रतमः सखीयन्नसूदयत्सुकृते गर्भमद्रिः॥ ससान मर्यो युवभिर्मखस्यन्नथाभवदंगिराः सद्यो अर्चन्॥
विप्रतमः अतिशयेन मेधावी सखीयन् अंगिरोभिः साकमात्मनः सखित्वमिच्छन् इंद्रो गच्छन् गोभिरधिष्ठितं पर्वतमगमदेव सोऽद्रिः सखित्वमिच्छन्।

सुकृते सुष्ठु युद्धकर्त्रे इंद्राय गर्भं गवात्मकं गर्भमसूदयत् गुहानिर्निःसृतरोमरुद्भिः सह मखस्यन् गोधनमंगिरसामिच्छन् मर्यः असुराणां मारयि
ता इंद्रः ससान असुरैरपहृता गा भेजे। अथानंतरमंगिराः सप्तानामंगिरसां मध्ये वरिष्ठोऽङ्गिरा ऋषिः इंद्रात् गा लब्ध्वा सद्यस्तदानीमेव अर्चन् इंद्रं पू
जयन् अभवत्। अगच्छत्। गमेर्लङि रूपं। सखीयन्। सुप आत्मनः क्यच्। असूदयत्। षूद क्षरणे इत्यस्य ण्यन्तस्य लङि रूपं। ससान। वन षण संभक्तौ इ
त्यस्य लिटि णलि रूपं। मखस्यन्। छंदसि परेच्छायामपि क्यच्। सर्वप्रातिपदिकेभ्यो लालसायां सुग्वक्तव्य इति सुगागमः। एकादेशस्वरः। अंगिराः
अगि गतौ। अंगारशब्द उपपदे सर्तेर्धातोः असुन्प्रत्ययः उपपदे गकारात्परस्याकारस्येत्वं। अन्त्यलोपश्च धातोर्गपश्च अंगिरा इति सूत्रेण निपात्यते भू
तकाले अंगारेभ्यः सृत इत्यंगिरा ऋषिः अंगारेष्वंगिरा इति यास्कः। नित्स्वरः॥ अथाष्टमी॥ सतःसतः प्रतिमानं पुरोभूर्विश्वा वेद जनिमा हंति
शुष्णं॥ प्रणो दिवः पदवीर्गव्युरर्चन्सखा सखीँरमुंचन्निरवद्यात्॥ सोऽयमिंद्रः सतः सतः उत्तमस्य वसुनः प्रतिमानं प्रतिमीयते उपमीयतेऽनेन
सर्वमिति प्रतिमानं। यद्वा सतः सतो जातस्य सर्वस्य प्रतिमानं स्वस्य महत्त्वेन प्रतिमा इति यतया सर्वं परिच्छिनत्तीत्यर्थः। पुरोभूः युद्धे पुरतः शत्रू
न् व्याप्नोतीति पुरोभूः स विश्वा जनिमा सर्वाणि जातानि वेद जानाति शुष्णं शुष्कं नामानमसुरं हंति पदवीः कवितमः। गव्युः गोधनमंगिरसामिच्छन्
अस्माकं सखा इंद्रः सखीन् अस्मान् दिवः द्युलोकादागत्य प्रार्चन् प्रकर्षेण पूजयन् अवद्यात् बंधरूपदोषान्निरमुंचत नितरां मुंचतु। प्रतिमानं मा
तीति मानं औणादिको मनिन्प्रत्ययः यद्वा करणे ल्युट्। पुरोभूः भू सत्तायां क्विप्। वेद विदेर्लटि रूपं। जनिमा जनी प्रादुर्भावे। जनिदभ्यामिमनि
ति इमन्प्रत्ययः। भूतकाले। जानातीति जनिमा सुपां सुलुगिति सुपो लुक्॥ नित्स्वरः। हंति हंतेर्लटि रूपं वाक्यभेदः। निघातः शुष्णं शोधयतीति शुष्णः

प्रणुत्युपसर्गाद्बहुलमिति संहितायां णत्वं । पदवीः वी कांत्यादिषु । क्विप् । पदानि चेति परस्परं संगतानि करोतीति पदवी कविः । गव्युः ङ्गोशा शात्परे छायां
छंदसीति क्यच् । वांतो यि प्रत्यय इति वांतादेशः । क्याच्छंदसीत्युप्रत्ययः । प्रत्ययस्वरः । अर्चन् । अर्चतेः शतरि रूपं । सखीन् संहितायां नकारस्य दी
र्घः । दरीतुरः । पूर्वस्य वर्णस्य अत्रानुनासिक इत्यनुनासिकादेशः । अमुंचत् । मुच्ऌ मोक्षणे इत्यस्य लङि शेमुचादीनामिति नुमागमः । निघातः ।
अवद्यात् । वद व्यक्तायां वाचीत्यस्य नञ्पूर्वस्य गर्ह्यार्थे अवद्यपण्यवर्या इति निपातनात् यत्प्रत्ययः ॥ ॥ अथ नवमी ॥ ॥ नि गव्यता मनसा सेदुरर्कैः
कृण्वानासो अमृतत्वाय गातुं ॥ इदं चिन्नु सदनं भूर्येषां येन मासाँ असिषासन्नृतेन ॥ ॥ गव्यता गा इच्छता मनसा युक्ताः अर्कैः अर्चनीयैः स्तो
त्रैः अमृतत्वाय देवत्वप्राप्त्यर्थं गातुं गच्छंत्यनेनेति गातुर्मार्गः अमृतत्वप्राप्त्युपायभूतं मार्गं कृण्वानाः कुर्वाणास्तेंगिरसः निषेदुः सत्राख्यं कर्म
ण्यासेदन् । एषामंगिरसां इदं चित् सदनं इदमेव सत्राख्यं च तन्नाम्या सदनं भूरि नुप्र भूतं अमृतत्वप्राप्त्यर्थं महानुपायः खलु कृतमित्यर्थः आह । ऋ
तेन सत्यभूतेन येन सत्रकर्मणा तेंगिरसो इमान् अभिप्लुव षष्ठ्य षडहो क्ळृप्त कलितान् मासान् असिषासन् संभक्तुमैच्छन् गव्यता । गोशब्दात् क्यचि
रूपं । वांतो यि प्रत्यय इति वांतादेशः । एकादेशस्वरः । सेदुः सदेर्लिटि अत एकहल्मध्येऽनादेशादेर्लिटीत्येत्वाभ्यासलोपौ निघातः । कृण्वानासः ।
कृवि हिंसाकरणयोरित्यस्य ताच्छीलिक चानश् । धिन्विकृण्व्योरित्युप्रत्ययः । चित्स्वरः । गातुं गाङ् गतौ कमिमनिजनिगाभायाहिभ्यश्चेति तु
प्रत्ययः । असिषासन् । षणु संभक्तौ इत्यस्य सनि जनसनखनां सञ्झलोरित्यात्वे । अभ्यासस्येत्वं सन्यत इतीत्वं । सनोतेरन इति संहितायां
षत्वं तदशात् लङि रूपं । यद्वृत्तयोगादनिघातः ॥ ॥ अथ दशमी ॥ ॥ संपश्यमाना अमदन्नभि स्वं पयः प्रत्नस्य रेतसो दुघानाः ॥ वि रोदसी अतपद्घो

तीर्णान् उषासः तं प्रत्युत अभिलक्ष्येव आयन् [illegible] रुमी नामैकः द्वितीय एवेन्द्रः पतिरभवत् । श्रौत्रीः जयते स्तुविरूपं । गुणस्य स्था
ने यत्त्यनेन ऋधिः । चित्स्वरः । असचंत । षच समवाये । इत्यस्य लिङि रूपं । स्पृधानं । स्पर्ध संघर्षे । छांदसिकानजादेशः । छंदसि द्विर्वचनस्य विकल्पित
त्वाद् द्विर्वचनाभावश्च । चित्स्वरः । अजानन् । ज्ञा अवबोधने इत्यस्य लङि रूपं । निघातः । आयन् । अपगता इत्यस्य लङि रूपं ॥ ॥ अथ पंचमी ॥ ॥ वीळौ स
तीरभि धीरा अतृंदन् प्राचाहिन्वन् मनसा सप्त विप्राः ॥ विश्वामविंदन् पथ्यामृतस्य प्रजानन्नित्ता नमसा विवेश ॥ ॥ पुरा किलांगिरसां गावः पणिना
मा केरसुरेरपहृत्य निगूढे कस्मिंश्चित् पर्वते स्थापिताः । तेंगिरसस्तत्प्राप्त्यर्थं इंद्रं तुष्टुवुः । स्तुतश्च इंद्रो गवान्वेषणाय देवशुनीं प्राहिणोत् । सा च ग
वेषणं कुर्वती तत्स्थानमलभत । या विज्ञापितः इंद्रस्ता आनीयांगिरोभ्यः प्रादादित्येतिहासिकी कथा । तथा चास्या ऋचो यमर्थः धीराः धीमंतः सप्त वि
प्रा मेधाविनः संप्रसंख्याकाः अंगिरसः वीळौ दृढे पर्वते सतीः निगूढाः सतीर्गाः अभि अभिलक्ष्य अतृंदन् उपेक्षामकुर्वन् । ततस्तेंगिरसः पर्वतवि
ले गावः संतीति मनसा निश्चित्य प्राचा येन मार्गेण प्रविष्टास्तेनैव प्राचीनेन मार्गेण ता गोः अहिन्वन् निरगमयन् । यद्वा प्राच्यां प्रकर्षेणेंद्रमविशा
प्रातीति प्राक् तेनेंद्रविषयेण मनसा मन्यत इति मनः स्तोत्रं तेन स्तोत्रेण अहिन्वन् अवर्धयन् इंद्रं तुष्टमकुर्वन् स्तुत्वा च ऋतस्य पथ्यां यज्ञमार्गेण स
भूतां विश्वां सर्वामपहृतां गामविंदन् अलभंत ततः स इंद्रः एता अंगिरसां कर्माणि प्रजानन् नित्तत्प्रकर्षेण जानन्निंद्रः नमस्कारेणांगिरसः संभावयन्
तेरधिष्ठितपर्वतमाविवेश । अतृंदन् तृदिर् हिंसानादरयोरित्यस्य लङि रुधादित्वात् श्नम् । तस्य श्नसोरल्लोपः । निघातः । प्राचा अञ्चतेर्दस्य स
स्थानमिति विभक्तेरुदात्तत्वं । अहिन्वन् हि गतिवृद्ध्योरित्यस्य लङि रूपं । अविंदन् । विद्लृ लाभे इत्यस्य शेमुचादित्वान्नुम् । निघातः पथ्यां पथि सो

श्रम
६४

ऋ.सं.भा.२

एवमेनुरूवी उरु प्रभूतम् अग्निहोत्रादिकर्म चेति हविः प्रदातुं प्राप्नोति। उरूवी जेन्या जेतव्या प्रशाक्ता गौरस्येयज्ञ...नाय स्वाप्न स्वाडुन रक्षीयादिदुहेदु
ह्यतेस्म। उस्त्रियाः वस निवास इत्यस्मात् स्फायितंचीत्यादिना रक्प्रत्ययः। उस्त्रा इति स्वार्थे पृषोदरादित्वात् तत्र प्रत्ययः। प्रत्ययस्वरः। यद्वा सृ
नोयत्पूर्वस्य स्त्रवतेः कप्रत्ययः पूर्वपदस्यान्तलोपः छांदसः। अत्रापि स्वार्थिको घप्रत्ययः। असृजत सृज विसर्ग इत्यस्य लङि रूपं। उरूची गुरुं अ
चतीति क्विन्। अंचतेश्चोपसंख्यानमिति ङीप्। उदात्तनिवृत्तिस्वरेणांतोदात्तः। दुदुहे। दुह प्रपूरण इत्यस्य लिटि रूपं। जेन्या जयतेः कृत्यार्थे केन्
प्रत्ययः। इकारलोपश्छांदसः। प्रत्ययस्वरः। ॥ अथ द्वादशी ॥ पित्रे चिच्चक्रुः सदनं समस्मै महि त्विषीमत्सुकृतो वि हि ख्यन्॥ विष्कभ्नंतः स्कंभ
नेना जनित्री आसीना ऊर्ध्वं रभसं वि मिन्वन्॥ ॥ सत्रमनुतिष्ठंतोंगिरसः पित्रे चित् पालकायास्मा इंद्राय महि महत्त्विषीमद्दीप्तिमत् सदनमन्नवंतं स्था
नं सचक्रुः। कथमिति तदुच्यते। यत्सुकृतं समुपार्जितकर्माणस्ते अंगिरसः तादृशं इंद्रस्योचितं स्थानं विहि ख्यन् हविर्विशेषेणादर्शयन् खलु। कुत इत्य
तआह। आसीनाः सत्रमुपतिष्ठंतोंगिरसः जनित्री सर्वस्य जगतो जनयित्र्यौ द्यावापृथिव्यौ स्कंभनेन स्तंभनसाधनेनांतरिक्षेण विष्कभ्नंतः। यथातेरो
दस्यावधो न पततः तथा पिष्टब्धे कुर्वंतः से ते रभसं वेगवंतं तमिंद्रं ऊर्ध्वलोके विमिन्वन् हविः स्वीकरणार्थं विशेषेण स्थापयन्। चक्रुः। करोतेर्लिट्यु रम
सि रूपं निघातः। ख्यन् ख्या प्रकथने। अस्य लुङि अस्यतिवक्तिख्यातिभ्योऽङ् इत्यङादेशः। आतो लोप इटि चेत्याकारलोपः। हियोगादनिघातः। विष्क ६५
भ्नंतः स्कंभु रोधन इति निपातनाल्लोपः। वा छंदसीति सवर्णदीर्घः। आस उपवेशन इत्यस्मात् शानच्। ईदास इतीकारः। शानशोर्लसार्वधातुकस्वरे कृ
ते धातुस्वरः। मिन्वन्। डुमिञ् प्रक्षेपण इत्यस्य लङि रूपं निघातः॥ ॥ अथ त्रयोदशी ॥ मही यदि धिषणा शिश्नथे धात् सद्योवृधं विभ्वं रोदस्योः। गि

रो यस्मिन्ननवद्याः समीचीर्विश्वा इंद्राय तविषीरनुत्ताः॥ ॥ मही महती धिषणा अस्माभिः क्रियमाणेंद्रविषया स्तुतिः रोदस्योः शिश्नथे। द्यावापृथि
व्योरन्योन्यविश्लेषाय सद्योमेधंतवृधानामेव वर्धमानं विभ्वं तयोर्धारणसमर्थं साधनं यदि धात् ततस्तत्र वर्तमाने यस्मिन्निंद्रे अनवद्याः दोषरहि
ता गिरः स्तुतिलक्षणा वाचः समीचीः संगता भवंति इंद्रायेति विभक्तिव्यत्ययः। तादृशस्येंद्रस्य विश्वाः तविषीः सर्वाणि बलानि अनुत्ता अपरं प्रेषिता
नि स्वभावसिद्धानि वधिषणा शिश्नथा प्राशाभ्ये। पूर्णे धिषत्वं संज्ञायामिति क्युप्रत्ययः। धातोर्धिषादेशः। धिष्ण्यो न्यायनेयेति धिषणा स्तुतिः। प्रत्यय
स्वरः। शिश्नथे। श्नथ हिंसार्थः। अस्माल्लिटि छांदसमुभयथेति तस्य सार्वधातुकत्वात् लप्। तस्य बहुलं छंदसीति विधुः। बहुलं छंदसीत्यभ्यास
स्येत्वं। धातुस्वरः। दधातेः छांदसे लुङि रूपं यद्योगादनिघातः। विभ्वं। भवतेः क्विप्। छंदस्युभयथेति यणादेशः। उदात्तस्वरितयोर्यण इति
स्वरितत्वं। अनुत्ताः। नुद प्रेरण इत्यस्य नञ्पूर्वस्य नसत्तनिषत्तेत्यादिना निपातनात् निष्ठातकारस्य नत्वाभावः। नञ्स्वरः॥ ॥ अथ चतुर्दशी ॥ मह्या
ते सख्यं वश्मि शक्तीरा वृत्रघ्ने नियुतो यंति पूर्वीः॥ महि स्तोत्रमव आगन्म सूरेरस्माकं सु मघवन्बोधि गोपाः॥ ॥ हे इंद्र ते तव महि महत्सख्यमा
वश्मि आकामये शक्तीः त्वत्संबंधिनि पादानीति निवाकामये वृत्रघ्ने वृत्रासुरस्य हंत्रे तुभ्यं पूर्वीः बह्व्यो नियुतो वडवा आयंतु निर्वहनार्थं आगच्छंति
सूरेर्विदुषस्तव महिमहत्स्तोत्रं अवः। हविर्लक्षणमन्नं च। आगन्म प्रापयामहे। मघवन्निंद्र तादृशस्त्वमस्माकं सुसुष्ठु गोपाः पालयिता भवा
मीति बोधि बुध्यस्व सख्य। सख्युर्य इति भावे यप्रत्ययः। प्रत्ययस्वरः। वश्मि। वश कांतौ। लटि रूपं। नियुतः युमिश्रणे क्विप्। नितरां युवंति। मि
श्रयंत्यात्मानं रथे इति नियुतो वाडवाः। आगन्म आगमेर्लङि अङ्बहुलं छंदसीति शपो लुक्। म्वोश्चेति मकारस्य नकारः। निघातः

ऋ॰सं॰भा॰२

बोधितुधे लोटि हेर्ध्यौरूपं। निघातः। गोपाः। गुपू रक्षणे गुप धूपेत्यादिना आय प्रत्ययः। तदंतात्क्विप्। अतो लोपः लोपो प्रत्ययस्वरः॥ ॥अथ पंचदशी॥
॥ महि क्षेत्रं पुरु श्चंद्रं विविद्वानादित्सखिभ्यश्चरथं समैरत्॥ इंद्रो नृभिरजनद्दीद्यानः साकं सूर्यमुषसं गातुमग्निं॥ ॥ योयमिंद्रः महि मह
क्षेत्रं केदारादि पुरु प्रभूतं चंद्रं हिरण्यं विविद्वान् अर्थिभ्यः सखिभ्यः स्तोतृभ्यो लंभयत्। आदित् अनंतरं चरथं चरात्मकं गवादिकं च समैरत्। सम्यक्
प्रेरयत्। तेभ्यो दत्तवानित्यर्थः। दीद्यानः दीप्यमानः सोयमिंद्रः नृभिः नेतृभिः कर्मसहायभूतैर्मरुद्भिः साकं सहितः सन् सूर्यं कालेस्य निवासं आदित्यं उ
षसं उषःकालं गातुं गायंति स्तुवंत्यस्यामिंद्रादिदेवानिति गातुः पृथिवी तां अग्निं अग्निहोत्रादिकर्मसाधनभूतं आहवनीयादिलक्षणमग्निं वा जन
त्। अजनयत्। पुरु चंद्रं संहितायां ह्रस्वाच्चंद्रोत्तरपदे मंत्र इति सुडागमः। तस्य श्चुत्वेन शकारः। पदकाले तु नास्ति सुडागमः। पुरु शब्द प्रत्ययः। स्वरः
चंद्रं। करप्रत्ययस्वरः। चर गत्यर्थः। अस्मादौणादिकोथप्रत्ययः। प्रत्ययस्वरः। ऐरत्। ईर गतावित्यस्य लङि आडजादीनामित्याडागमः॥ नि
घातः। अजनत्। जनेर्ण्यंतस्य लङि रूपं। बहुलं मंत्रेपि। संज्ञाछंदसोरिति णिलुक्। गातुं। गै शब्दे। गापाभ्यां हि भ्य इति तुप्रत्ययः। प्रत्ययस्वरः।
॥इति तृतीयस्य द्वितीये सप्तमो वर्गः॥ ॥ अथ तस्मिन्सूक्ते षोडशी॥ ॥ अपश्चिदेष विभ्वो३ दमूनाः प्र सध्रीचीरसृजद्विश्वश्चंद्राः। मध्वः पुना राम
नाः कविभिः पवित्रैर्द्युभिर्हिन्वंत्यक्तुभिर्धनुत्रीः॥ ॥ दमूनाः दांतमना यस्यासौ दमूनाः। दांतमनाः। यद्वा दाम्यतीति दमूनाः। उपरत इत्यर्थः। स ६६
एष देवेंद्रः विभ्वः व्याप्ताः सध्रीचीः परस्परसंगताः। विश्वश्चंद्राः विश्वस्याह्लादयित्रीः विश्वस्याह्लादयोया भवंतीति स्वां वा एवंभूता आपः असृजत्।
सृष्टवान्। सृष्टा अता आपः मध्वः माधुर्योपेताः। कविभिः पवित्रैः अग्निवायुसूर्यैः पुनानाः शोधयित्र्यः धनुत्रीः सर्वस्य जगतः प्रीणयित्र्यः द्युभि

र्एषां जाते निष्ठां मदधुर्गोषु वीरान्॥ ॥ स्वं स्वकीयं गोधनं अभि अभिलक्ष्य संपश्यमानाः मदीया एता गाव इत्यात्मीयतया जानाना अंगिरसः प्रत्न
स्य पुरोजातस्य रेतसः सक्तदुपलक्षितस्य धारणार्थं पयो दुघानाः। नागाः पयो दुहंतः संतो मदन एषां अंगिरसां घोषः घर्षादुत्पन्नो महाध्वनिः स्तुति
जातो वा रोदसी द्यावापृथिव्यौ व्यतयत्। ते व्याप्तवंतिनाः॥ ‾ ‾ ‾ ततस्तेंगिरसः संघाते आत्मीनतया संपन्ने चराचरात्मके वस्तुनि निष्ठां पूर्ववत् स्थि
तिमकार्षुः। तथा गोषु आकृता सुवीरान् अस्माकं कर्मण्यपि शूरान् पुरुषान् आदधुः स्थापयामासुः। संपश्यमानाः संपूर्वस्य दृशेः। दृशो ग्रहणीत्रे कर्तरि यमि
त्यात्मनेपदं शानच् चात्मे सार्वधातुकस्वरेणानुदात्तत्वे कृते धातुस्वरः। अमदन्। मदी हर्ष इत्यस्य लुङि सिच्यङि रूपं। निघातः। दुहानाः दुह प्रपूरणे
इत्यस्मात् शानच्। अदादित्वाच्छपो लुक्। घर्षे लोपश्छंदसि। रुधादित्वाद्दुघानाः। अतपत्। विपूर्वस्य पतेरत्र सकर्मकत्वादात्मनेपदाभावः। लङि रूपं।
घोषः घुष संशब्दने। घञंतः। ञित्स्वरः। निष्ठां। णा गतिनिवृत्तौ। स्थ्यकचुक्विप्। कृदुत्तरस्वरः। अदधुः। दधातेर्लङि झेर्जुस्। सिजभ्यस्तेति जुसादेशः। वा
क्यभेदात् निघाताभावः। गोषु। सावेकाच इति विभक्तेरुदात्तत्वे प्राप्ते न गोश्वन्साववर्णेति प्रतिषेधात्प्रातिपदिकस्वरः॥ ॥इति तृतीयस्य द्वितीये षष्ठो वर्गः॥
॥ अथ तस्मिन्सूक्ते एकादशी॥ ॥ स जातेभिर्वृत्रहा सेदु हव्यैरुदुस्रिया असृजदिंद्रो अर्कैः॥ उरूच्यस्मै घृतवद्भरंती मधु स्वाद्म दुदुहे जेन्या गौः॥
॥ स इंद्रः जातेभिः सहायतया संपन्नैर्मरुद्भिः सहितः सन् वृत्रहा वृत्रस्यासुरस्य हंता भवति। सेदु स एवेंद्रः अर्कैः अर्चनीयैः अत एव हव्यैः ह्वातव्यैर्म
रुद्भिः सहितः सन् उस्रियाः ऊर्ध्वं वसत्या सु क्षीरादिरूपं हविरित्युस्रिया गावः यद्वा ऊर्ध्वं क्षरद्दधिनवनीतादि क्रमेणा स्रुवंतीति उस्रियेति गोनाम।
उस्रा वित्रोस्त्रीभो गा इति यास्कः। ता गा उदसृजत्। यज्ञार्थं सम्यक् ससर्ज। यस्मादेवं तस्मात् घृतवत् घृतेनोपेतं क्षीरादिकं हविः भरंती बिभ्राणा अत

पश्यतिसूनितिप्रियमुच्यते। तज्जनदृतंच सत्यंचेति सूनृतं। परादिश्छंदसि बहुलमिति उत्तरपदान्तत्वं। वयोधाः। वयस्युपपदे धातेर्विच्। गाहि। गमेर्लो
ऋ·सं·भा·२ टि बहुलं छंदसीति शपो लुक्। मेर्हिरादेशः पित्त्वं। तस्य ङित्वादनुदात्तोपदेशेत्यादिना नलोपः। तस्यासिद्धत्वाद्दतो हेरिति हेर्लुङ्न भवति। निघातः।
सरण्यन्। सरणशब्दात् क्यच्। एकादेशस्वरः॥ ॥अथैकोनविंशी॥ ॥स अंगिरस्वन्नमसा सपर्यन्नव्यं कृणोमि सन्यसे पुराजां। द्रुहो वियाहि बहुला
अदेवीः स्वश्च नो मघवन्सातये धाः॥ ॥हे इंद्र अंगिरस्वत् अंगिरस इव नमसा स्तोत्रेण सपर्यन् पूजयन् विश्वामित्रोऽहं तं। तादृशं महिमोपेतं पुरा
जां पुरातनं। त्वां सन्यसे संभजनाय नव्यं कृणोमि। स्तोत्रं नूतनमभिनवं करोमि। आ देवीः। नमोरूपत्वेनाद्योतमानान् बहुलान् बहून् द्रुहः द्रोग्धॄ
न् शत्रून् भातान् राक्षसान् वियाहि विशेषेण मृतिं प्रापय। हे मघवन् इंद्र नोऽस्मभ्यं स्वः स्वधनं च सातये संभजनार्थं धेहि। अंगिरस्वत्। अंगिरस
इव तेन तुल्यमिति वतिप्रत्ययः। नभोंगिरोमनुषां वत्युपसंख्यानमिति भसंज्ञायां सकारस्य रुत्वाभावः। सपर्यन्। सपर कंड्वादिः। नव्यं। स्तु
तावित्यस्मादचो यदिति प्रत्ययः॥ धातोस्तन्निमित्तस्यैवेति वान्तादेशः। यतोऽनाव इत्याद्युदात्तत्वं। कृणोमि। कृवि लटि रूपं। पुराजां जानविद्यात्वे रूपं।
याहि। याते लिटि रूपं। स्वः। स्वरादिनिपातमव्ययमित्यव्ययसंज्ञायां अव्ययादाप्सुप इति सुपो लुक्। सातये। षणसंभक्तौ। भावे क्तिन्। जनसनखना राम
दिना आत्वं। ऊतियूतीत्यादिना निपातनादुदात्तः॥ ॥अथ विंशी॥ ॥मिहः पावकाः प्रतता अभूवन्स्वस्ति नः पिपृहि पारमासां॥ इंद्र त्वं रथिरः पाहि ६७
नो रिषो मक्षूमक्षू कृणुहि गोजितो नः॥ ॥हे इंद्र ते पावकाः पापानां शोधयित्र्यः मिहः सेचनसाधना आपः। प्रतताः लोके प्रकर्षेण विस्तृता अभूवन्।
तासामासां अपां स्वस्ति विनाशरहितं पारं तीरं नोऽस्मदर्थं पिपृहि। जलैः संपूर्णं कुरु जलमपारपारीणं कुर्वित्यर्थः। रथिरः रथिवांस्त्वं रिषो हिंसकाच्छ

त्रोः सकाशान्नोऽस्मान्पाहि परिपालय। अनंतरं नोऽस्मान् मक्षूमक्षु शीघ्रं गोजितः गवादिपशूनां जेतॄन् कृणुहि कुरु वृष्टिप्रदानेन तटाकादिजलाशयान्
संपूर्णान् कृत्वा गवादिधनयुक्तान् कुर्विति भावः। अभूवन्। भू सत्तायामित्यस्य लुङि रूपं। निघातः। पिपृहि। पृ पालनपूरणयोः। जुहोत्यादिः। अर्तिपि
पर्त्योश्चेत्यभ्यासस्येत्वं। हेर्ङित्वाद्गुणाभावः। निघातः। रथिरः। मत्वर्थमेधारथाभ्यामिरन्निरचाविति इरच्प्रत्ययः। रिष हिंसायां। ऋचि तुनुघमक्षुतङ्
ति दीर्घः॥ ॥अथ एकविंशी॥ ॥अदेदिष्ट वृत्रहा गोपतिर्गा अंतः कृष्णाँ अरुषैर्धामभिर्गात्॥ प्र सूनृता दिशमान ऋतेन दुरश्च विश्वा अवृणोद
प स्वाः॥ ॥वृत्रहा वृत्रस्य हंता गोपतिः गवां स्वामी सन्निंद्रः गाः अदेदिष्ट। अस्मभ्यं दिशतु। तथा कृष्णान् कर्मविघ्नकारिणोऽसुरान् रुषैरारोचनैर्धा
मभिस्तेजोभिः अंतर्गतधनं विनाशं गात् नमयतु। तथा सूनृताः प्रियतमाः ऋतेन सत्यारणवर्जितेन सत्येन वाक्येन प्रदिशमानः अंगिरोभ्यः प्रदिश
न्निंद्रः विश्वाः सर्वाणि दुरः गवां स्वेच्छया निर्गमनद्वाराणि स्वाः स्वकीयगाश्च अपावृणोत् व्रजे गाः स्थापयित्वा तानि द्वाराणि आच्छादितवानित्यर्थः।
अदेदिष्ट। दिश अतिसर्जने इत्यस्मात् यङ्लुकि लङि व्यत्ययेनात्मनेपदं। अडागमः स्वरः। गोपतिः पत्यावैश्वर्ये इति पूर्वपदप्रकृतिस्वरः। गात्। इणगमो। अं
तर्भावितण्यर्थः। दिशमानः। दिशो व्यत्ययेन शानच्। तस्य सार्वधातुकस्वरेणानुदात्तत्वे धातुस्वरः। अवृणोत्। वृञ् वरण इत्यस्य लङि रूपं॥ ॥अथ
द्वाविंशी॥ ॥शुनं हुवेमेति॥ ॥व्याख्यातेयमृक्॥ ॥इति तृतीयस्य द्वितीये षष्ठो वर्गः॥ ॥इंद्र सोमं सोमपत इति सप्तदशर्चं तृतीयं सूक्तं वैश्वा
मित्रः त्रैष्टुभमैंद्रं। अनुक्रांतं च। इंद्र सोमं त्र्यूनेति। पृष्ठ्याभिप्लवषडहयोः द्वितीयेऽहनि मरुत्वतीये इंद्र सोमामितीदं सूक्तं निविद्धानं द्वितीयस्येति
खंडे सूत्रितं च। इंद्र सोमं पात ऊतिरवमेति मध्यंदिन इति गोसववि वधायां अपि मरुत्वतीयशस्त्रे एतत्सूक्तं। सूत्रितं च। इंद्र सोमामेतयोमेति मध्यंदि

ह्वत इति उद्रि वलत्र इति भिंदद इत्येषामरुत्वतीय एतत्सूक्तं सूक्तिं तं च। इंद्र सोममिंद्रः पूर्भिदिति मध्यंदिन इति तस्मिन्सूक्ते प्रथमा॥ ॥ इंद्र सोमं सोमपते पिबेमं मा
ध्यंदिनं सवनं चारु यत्ते॥ प्रपुथ्या शिप्रे मघवन्नृजीषिन्विमुच्या हरी इह मादयस्व॥ ॥ विश्वामित्रो ऋते। सोमपते सोमस्याधिपते हे इंद्र इममस्माभि
र्माध्यंदिने सवने क्रियमाणं सोमं सोमरसं पिब यद्यस्मात्ते त्वदर्थं क्रियमाणं माध्यंदिनं मध्यंदिनसंबंधि सवनं निष्केवल्याख्यं शस्त्रं चारु रमणीयं
वर्त्तते। मघवन्नृजीषिन् ऋजीषशब्देन गतसारं सोमद्रव्यमुच्यते। तद्वन् हे इंद्र हरी रथे योजितावश्वौ रथाद्विमुच्य शिप्रे हनू प्रपुथ्य अत्यंतं ग्रा
सेन पूरयित्वा इह देवयजनदेशे मादयस्व तावश्वौ हर्षय प्रपुथ्य। प्रथ पर्याप्तौ विस्तारे ल्यादित्वं। छांदसः। लित्स्वरः। ऋजीषिन्। अर्जेः सर्ज
अर्जने इत्यस्मादर्जेश्च ऋजि चेति ईषन्प्रत्ययः। ऋजि इत्यादेशश्च धातोः। अर्ज्यत इत्यृजीषं तदस्यास्तीति इनिप्रत्ययः। आमंत्रितत्वान्निघातः। मा
दयस्व। मदि स्तुत्यादिषु। हेतुमणिच्। निघातः॥ ॥ अथ द्वितीया॥ ॥ गवाशिरं मंथिनमिंद्र शुक्रं पिबा सोमं ररिमा ते मदाय॥ ब्रह्मकृता मारुतेना
गणेन सजोषा रुद्रैस्तृपदा वृषस्व॥ ॥ हे इंद्र गवाशिरं गव्यस्य पयस आशीर्मिश्रणं यस्मिन्सोमे तं अपि च मंथिनं मंथसंयुक्तं शुक्रं अभिनवं यद्वा
शुक्रा शुक्रामंथिग्रहे वर्त्तमानः एवं त्रिषु सवनेषु वर्त्तमानमिमं सोमं पिब। ते तव मदाय हर्षाय। ररिम तं सोमं प्रयच्छामः। मारुतेन मरुतां गणो मारु राम
तः स च ब्रह्मकृता ब्रह्म स्तोत्रं करोतीति इंद्रस्तोत्रं कुर्वाणेन मारुतेन गणेन रुद्रैरेकादशसंख्याकैः रुद्रैश्च सजोषाः संगतस्त्वं तृपत् सोमपानेन तृप्त ६८
न्निमं सर्वतो जठरे सिंच धारय गवाशिरं श्रीणातेराङ्पूर्वात् क्विप्। अपस्पृधेथामानृचुरित्यादिना निपातितो माश्चिरादेशः। बहुव्रीहौ पूर्वपदप्रकृतिस्व
रः। पिब द्व्यचोतस्तिङ इति संहितायां दीर्घः। ररिमा तेः छांदसो वर्त्तमाने लिटि रूपं। असमानवाक्यत्वान्निघाताभावः। आगमा अनुदात्ता इतीटोनु

दिवसे रक्तुभिः रात्रिभिर्हिन्वति रात्रिंदिवं सर्वं जगत् स्वस्वव्यापारप्रवणं कुर्वंतीत्यर्थः। दमूनाः दमु उपशमे। दमेरुनसिरित्युनसिप्रत्ययः शाम्यतीति
दमूनाः यद्वा दानशब्दस्य दमावः। मनसो मकारांतस्य आकारस्य उकारश्छांदसः। प्रसृजन्त्विसृज विसर्गे हिन्वंति। हिगतौ। निघातः। धनुत्रीः।
धनधान्यरूपमादधीताद्दिवादित्रप्रत्ययः। शार्ङ्गरवाद्यञो ङीन् इति ङीन्। नित्स्वरः॥ ॥ अथ सप्तदशी॥ ॥ अनु कृष्णे वसुधिती जिहाते उभे सूर्यस्य
मंहना यजत्रे॥ परि यत्ते महिमानं वृजध्यै सखाय इंद्र काम्या ऋजिप्याः॥ ॥ हे इंद्र सूर्यस्य सुष्टु जगतः प्रेरकस्य ते तव मंहना महत्वेन सामर्थ्ये
न वसुधिती वसूनां सर्वधारणे यजत्रे यजमानानार्हति उभे कृष्णे अहोरात्रे अनु जिहाते पुनः पुनरावृत्य वर्त्तेते। किं कुर्वद्भिः ऋजुगतयः स
खायस्ते मित्रभूता। काम्याः कामनीयाः मरुतः प्रभवंति। जिहाते। ओहाङ् गतौ जुहोत्यादिः आभिदित्य भ्यासस्येत्वं। निघातः। मंहना। महि वृद्धौ।
ल्युट्। लित्स्वरः। वृजध्यै। वृजी वर्जने तुमर्थे कध्ये प्रत्ययः। कित्वात् गुणाभावः। प्रत्ययस्वरः। काम्याः। कर्मत्वं तस्या चोयदिति ण्यत् प्रत्ययः। यतो
नाव इत्याद्युदात्तत्वं। ऋजिप्याः प्यायी वृद्धौ क्विप्। लोपो व्योर्वलीति यलोपः। पूर्वपदस्याकारस्येकारो व्यत्ययेन। बहुवचनस्यैकवचनं। छांदसं। कृदुत्त
रपदप्रकृतिस्वरः॥ ॥ अथाष्टादशी॥ ॥ पतिर्भव वृत्रहन्सूनृतानां गिरां विश्वायुर्वृषभो वयोधाः॥ आ नो गहि सख्येभिः शिवेभिर्महान्महीभिरूतिभिः
सरण्यन्॥ ॥ हे वृत्रहन् इंद्र विश्वायुः विश्वं संपूर्णमायुर्यस्य सो विश्वायुरविनाशी वृषभः कामानां वर्षिता वयोधाः अन्नस्य दाता इंद्र त्वं सूनृता
नां गिरां अस्माभिः क्रियमाणानां प्रियतमानां वाचां पतिः स्वामी भव सरण्यन् सरणं आगमनमिच्छन् महान् महीभिर्महतीभिरूतिभिः रक्षाभिः शिवेभिः क
ल्याणैः सख्येभिः फलप्रदानरूपोपकारलक्षणैः सख्यैश्च सहितस्त्वं नोऽस्मान् आगहि। यज्ञार्थमागच्छ सूनृतानां। ऋणपरिहाणे। सूनृतरी सूनृस्थति अग्नि

णः सेवमानस्तु शश्वते शश्वते वीर्याय परपरिभवलक्षणाय सामर्थ्याय इमं सोमं पिब। हे हर्यश्व सतात् शश्वत्त्वं यज्ञेयं जनीयैर्मरुद्भिः सा कम्
ऋ॰सं॰भा॰२ वहत्व आगच्छ किंच सरण्युभिः। एकश्रुतिमन्त्रो जानात्मनरुच्छद्भिः यद्वा सरण्युभिः सरणशीलैर्मरुद्भिः सहितस्त्वं अपां तरिक्षस्थितान्युदकानि
अर्णा पार्थिवान्युदकानि सिसर्षि प्रापय। यद्वा अपः पंचम्येतमेतत्पदं अपो वान्नादंतरिक्षात्सकाशात्पार्थी सिप्रापय चरत्वं वृत्तवर्तने। व्यत्ययेन ग
पद्मसु। लोटि रूपं। सरण्युभिः रण शब्दार्थः क्विप्। समानो रणः ध्वनिर्येषां ते सरणा मंत्राः तानिच्छंतः। सुप आत्मनः क्यच्। क्याच्छंदसि उ प्रत्ययः। यद्वा सृ गतौ। सृ
युवचिभ्यो न्युज्ञा। गृज्जनुवद् इत्यन्यु प्रत्ययः। रेषाभ्यामिति णत्वं। ञित्वादंतोदात्तः। अपः। आप्लृ व्याप्तौ। अप्नोतेर्ह्रस्वश्चेति क्विप्। धातोर्ह्रस्व
श्च। सा वेकाच इति विभक्तेरुदात्तत्वं। सिसर्षि। सृ गतौ। छांदसो जुहोत्यादिः बहुलं छंदसीत्यभ्यासस्येत्वं॥ इति तृतीयस्य द्वितीये नवमो वर्गः॥
अथ तस्मिन् सूक्ते षष्ठी॥ त्वमपो यद्ध वृत्रं जघन्वाँ अत्याँ इव प्रासृजः सर्तवाजौ॥ शयानमिंद्र चरता वधेन वव्रिवांसं परि देवीरदेवं॥ हे इंद्र त्वं देवी
र्देवनशीला आपः परिवव्रिवांसं परित आवृत्य वर्तमानं। अत एव देवं वकुकतया स्वच्छंदेना प्रतिभासमानं शयानमेकत्र निश्चलतया वर्तमानं वृत्रं मे
घं चरता वरतातमुद्दिश्य वर्तमानेन वधेन युधेन जघन्वान्। हतवानसि तदा त्वं आजौ युधे सर्तवे अभिगमनाय अत्यानिव अश्वानिव प्रेरयसि राम
तथा त्वमप उदकानि अंतरिक्षादकाशात्। प्रासृजो हप्रकर्षेण मेघभेदं कृत्वा असृजः खलु। तं यज्ञामहे इत्युत्तरेणान्वयः। जघन्वान्। हन हिंसाग ६१
त्योः। इत्यस्य क्वसो विभाषा गमहनविदविशामिति इटो विकल्पितत्वादत्रेरभावः। अभ्यासाच्चेति हकारस्य घत्वं। प्रत्ययस्वरः। असृजः। सृज विसर्गे।
तुविकरणी। यद्वृत्तयोगादनिघातः। सर्तवे। सृ गतौ। तुमर्थे तवेप्रत्ययः। अंतश्च तवे युगपदिति धातोः प्रत्ययस्य चोदात्तत्वं। आजौ। अज गति क्षेपण

योः। अज्यति अभ्योरंति इण् प्रत्ययः। णित्वादुपधावृद्धिः। अजं गच्छंति। यस्मिन्नित्याजिर्युद्धं। प्रत्ययस्वरः। अत्याँ इवा आवित्यत्र संहितायादेशः कृते
तस्य लोपः आकच्छस्येति वकारलोपः सर्वविधीनां छंदसि विकल्पितत्वात्सवर्णदीर्घत्वे वत्वे कर्तव्ये यलोपो नासिद्धो भवति सवर्णदीर्घः। शयानं
शीङ् स्वप्ने शानच्। अदादित्वाच्छपो लुक्। ङित्वात्सार्वधातुकस्वरेण शानचो नुदात्ते धातुस्वरः। वधेन। हंतेर्वधाभावे हन्श्च वधादेशः। अंत
श्च इकारः। अंतोदात्तश्च। वव्रिवांसं। वृञ् वरणे इत्यस्य क्वसौ विभाषा गमेश्छांदसः। प्रत्ययस्वरः॥ अथ सप्तमी॥ यजाम इन्नमसा वृद्धमिंद्रं बृहंत
मृष्वमजरं युवानं॥ यस्य प्रिये ममतुर्यज्ञियस्य न रोदसी महिमानं ममाते॥ नमसा हविर्लक्षणेनान्नेन वृद्धं प्रवृद्धं वृद्धं अत एव बृहंतं महांतं
ऋष्वं ऋष्यते गम्यते गम्यते स्तुतिलक्षणैर्मंत्रैरिति ऋष्वं स्तोतव्यं। अजरं जरारहितं। अत एव युवानं नित्यतरुणं एवंविधं इंद्रं यजाम इति कुशिका
वयं इसि ध्यर्थं स्तुतिवाक्यैः पूजयामः। प्रिये प्रियतमे द्यावापृथिवी यो यज्ञियस्य यज्ञार्हस्य यस्य इंद्रस्य तत्त्वं महिमानं वैभवं ममतुर्न परिच्छेत्तुं शक्नु
यामः। ममाते इति द्वितीयं क्रियापदं मादरार्थं। यजामः यजेर्लटि रूपं। ऋष्वं ऋषी गतौ। सर्वनिघृष्वऋष्वेत्यादिना व प्रत्ययांतो निपातितः। प्रत्ययस्व
रः। प्रिये ईदूदेदिति प्रगृह्यसंज्ञा। ममतुः। मामाने इत्यस्य लिट्युसि रूपं। यद्वृत्तयोगादनिघातः। प्रत्ययस्वरः। महिमानं। महच्छब्दात्स्वभाव इ
त्यर्थे पृथ्वादिभ्य इमनिच्। चित्स्वरः। ममाते। माङ् माने शब्दे च अस्य लिघातामिति रूपं॥ अथाष्टमी॥ इंद्रस्य कर्म सुकृता पुरूणि व्रतानि देवा न मि
नंति विश्वे॥ दाधार यः पृथिवीं द्यामुतेमां जजान सूर्यमुषसं सुदंसाः॥ विश्वे सर्वे देवाः इंद्रस्य तव कर्माणि सुकृतानि सुष्ठु निर्मितानि पृथिव्यादि
नि पुरूणि बहूनि व्रतानि यज्ञादीनि न मिनंति एतानि सर्वाणि कर्माणि हिंसंति किं तर्हि प्रियंते। किंच। यो यमिंद्रः पृथिवीं भूलोकं द्यां द्युलोकं उतापि

मां द्युमंतं रिक्षलोकं चरंतीं स्त्रीं लोकान् धाराः सुकर्माशो भन्यः कर्मा सन्निंद्रः सूर्येण लोकप्रकाशं मा दित्यं उ प्रसे अग्निहोत्रादिकर्मनिर्वाहकयुषः
काले। यजमानं उत्पादयमास। इंद्रस्य कर्म सुकृता पुरूणीत्येतत्पदकदंबकं एको देव सुमती त्यस्मिन्वर्गे पठितं। अत्रापि तद्वत् उच्यते। पदकाले
नोत्सृज्यत इति चेत् न वाक्यभेदात्। तत्र। इंद्रस्य कर्म सुकृता पुरूणीत्येकवाक्यं अत्र तु कर्म सुकृतेत्येकवाक्यं पुरूणीतानि उत्तापरं। किंच तत्रत्यं पद
कदंबकं प्रथमांतं। अत्रत्यं द्वितीयांतं। अतो वाक्यभेदः अत्र पदकाले नोत्सृज्यते। मिनंति। मीञ् हिंसायामित्यस्य लटि रूपं। निघातः। दाधार। धृञ् धा
रण इत्यस्य लिटि रूपं। तुजादित्वात् अभ्यासस्य दीर्घः। लित्स्वरः। जजान। जन जनन इत्यस्यांतर्भावितण्यर्थस्य लिटि रूपं। लित्स्वरः॥ सुदंसाः। सो
र्मन् सिद्धुत्युत्तरपदाद्युदात्तत्वं॥ ॥ अथ नवमी॥ ॥ अद्रोघ सत्यं तव तन्महित्वं सद्यो यज्जातो अपिबो ह सोमं॥ न द्याव इंद्र तवसस्त ओजो नाहा न
मासाः शरदो वरंत॥ ॥ अद्रोघ द्रोहवर्जित हे इंद्र तेन तव महित्वं तादृशं महात्म्यं सत्यं यथार्थं यद्यस्मात् जातः उत्पन्नः सद्यस्तदानीमेव सोमं अस्मा
भिर्दत्तं यमानं सोमरसमपिबः। ह प्रसिद्धौ। तवसो बलवतस्ते तव ओजः सामर्थ्यं। द्यावः। दिवोपलक्षिताः सार्वलोकाः न वरंत न निवारयंति। किंच। अ
हाः प्रतिपदादिन्याः अहानि न वारयंति। यथा मासाः चैत्राद्याः शरदः संवत्सराः तवसामर्थ्यं न वारयंति। तव सामर्थ्यं मनुष्यस्य सर्वे वर्जंतीति भावः। अ
द्रोघ। आमंत्रितस्य चेति षाष्ठिकमाद्युदात्तत्वं। अपिबः। यद्योगान्निघातः। मासः। मासपरिभाषणे। मस्यते परिमीयते। त्रिंशतादिनैरिति मासाः। क
र्मणि घञ् नित्वादाद्युदात्तः। शरदः। शॄ हिंसायामित्यस्मात् शृदृभसोदिति रित्यधिकरणे अदि प्रत्ययः। धीर्यंते अस्यां गुल्मवनस्पतीनीति शारत्प्र
त्ययः स्वरः। वरंत। वृञ् वरणे अंतर्भावितण्यर्थो। आविष्करणे वर्तते। गोवादिकः। छांदसे लङि रूपं निघातः॥ ॥ अथ दशमी॥ ॥ सा घस्केनाद्येकादशी

स्तत्वात् प्रत्ययस्वरः। तपत। तृप प्रीणने। तुदादिः। आत्मनेपदं तु आसन्नस्यानित्यत्वात् मुमभावः। तृपस्व। तृपसे वने। व्यत्ययेन शः॥ ॥ अथ तृतीया॥
॥ येन शुष्मं येन विषीमवर्धन् वतंत इंद्र मरुतस्त ओजः॥ माध्यंदिने सवने वज्रहस्त पिबा रुद्रेभिः सगणः सुशिप्र॥ ॥ हे इंद्र ये मरुत स्ते तव शुष्मं
तेजः। ये च मरुतः त्वाविषी बलं चावर्धयन्। युद्धसहकारितया अवर्धयन्। ते मरुतस्तु व मर्चंति तत्स्वां सतः तेन तव ओजो युद्धसामर्थ्यमवर्धय
न्। वज्रहस्त वज्रयुक्तो हस्तो यस्येति तादृश सुशिप्र शोभन हनो शिप्रे हनू नासिके वैयास्कः। हे इंद्र रुद्रेभिः रोदयंति शत्रूनिति रुद्रा मरुतस्तैः
सगणस्त्वं माध्यंदिने सवने सोमं पिब। अवर्धयन्। वृधु वर्धने। अंतर्भावितण्यर्थः। यद्वृत्तयोगान्निघातः। माध्यंदिने उत्सादित्वाद्वञ्। ञित्वादाद्यु
दात्तः॥ ॥ अथ चतुर्थी॥ ॥ त इन्वस्य मधुमद्विविप्र इंद्रस्य शर्धो मरुतो य आसन्॥ येभिर्वृत्रस्येषितो विवेदामर्मणो मन्यमानस्य मर्म॥ ॥ ये म
रुतः इंद्रस्य शर्धा लेकं अभूवन् आसन् त इत् त एव मरुतोस्य द्वितीयार्थे षष्ठी। इमं इंद्रं मधुमत्तत्त्वसदाय वमात्मदेवत्वं युद्धं अभिगच्छंति। मा
धुर्योपेनवाक्येय था भवति विविप्रेतुक्षिप्रं प्रेरयनायमियेयुद्धसहायेमरुद्भिरिषितः प्रेरितः इंद्र अमर्मणः परैर्विदितमर्मस्थाने स्यात एव
मन्यमानस्य न कोपि मम मर्हंतेत्यभिमन्यमानस्य वृत्रस्यासुरस्य मर्मयस्मिन् स्थाने प्रभृतो सत्यां सा मरीभूतितादृशं स्थान विवेद ज्ञासीत्।
विविप्र। विप क्षेपणे इत्यस्य लिटि व्यत्ययेनात्मनेपदं। इरेचरघोरद्वतिरे इत्यादेशः। निघातः। आसन्। असु भुवीत्यस्य लङि रूपं। यद्वृत्तयोगान्नि
घाताभावः। विवेद ज्ञाने इत्यस्य लिटि रूपं। लित्स्वरः। मर्म मृङ् प्राणत्यागे इत्यस्मादौणादिको मनिन्। नित्स्वरः॥ ॥ अथ पंचमी॥ ॥ मनुष्वदिंद्र सव
नं जुषाणः पिबा सोमं शश्वते वीर्याय॥ स आ ववृत्स्व हर्यश्व यज्ञैः सरण्युभिरपो अर्णा सिसर्षि॥ ॥ हे मनुष्वत् मनोर्यज्ञमिव ममेदं सवनं यज्ञं जु

राम ७०

ऋ॰सं॰भा॰२ षहनूहंतेर्लङि सिलोपो अहि। हनहिंसागत्योः। आङिश्रिहनिभ्यां ह्रस्वश्चेति इण्प्रत्ययः। डित्पूर्वपदस्य ङः। वृषादित्वादाद्युदात्तत्वं। ॐ जायमा

नो ॐ जः शाहा दाह्वार्धकर्तुः क्यङ्सलोपश्चेति क्यङ्प्रत्ययः। सलोपश्च। ङित्वादात्मनेपदं। प्रत्ययस्वरः। नुआनं। नुदुनिमोत्रो धातुः। अस्मिन्

जंतातुः छंदसी यसुन्। तुरिष्टेमेयस्स्विति तृचो लोपः। भसंज्ञायामोर्गुणः। ईकारलोपः छांदसः। नित्स्वरः। भूत्। भवतेर्लुङि रूपं। यस्मिन्यागाय वि

भक्तिर्भसंज्ञायां बाधितत्वात्स्वादिष्वसर्वनामस्थानइतिपदसंज्ञाया जस्त्वं ततो याया: पूर्वसवर्णः। क्षां क्षि निवासगत्योः। अन्येभ्योपि दृश्यं

तइति निरूपपदादपि प्रत्ययः। ततष्टापू। क्षियंति निवसंत्यस्यां प्राणिन इति क्षा भूमिः। उदात्तनिवृत्तिस्वरेणांतोदात्तः। अवस्थाः। वस निवास

स्य लङि। अनुदात्तेत्वादात्मनेपदं। थासि अदादित्वाच्छपो लुक्। यद्योगादनिघातः। अडागमस्वरः॥ ॥अथ द्वादशी॥ ॥यज्ञो हित इंद्र

वर्धनो भूदुत प्रियः सुतसोमो मियेधः॥ यज्ञेन यज्ञमव यज्ञियः सन्यज्ञस्ते वज्रमहिहत्य आवत्॥ ॥हे इंद्र अस्मदीयोयं यज्ञस्तेतव वर्धनाह

विःप्रदानेन वर्धयिता भूत् हि भवति खलु उत अपि च सुतसोमः अभिसुतसोमयाग्मियेधरभूतो यज्ञः तवप्रियः सत्वं यज्ञियः यज्ञार्हः

सन् यज्ञं यज्ञस्यकर्तारं यजमानं यज्ञेनानुष्ठीयमानेन नावफलप्रदानेन रक्ष। किं चाथ यज्ञस्तेतव वज्रमहिमहतिवृत्रहनने कर्मणि अव राम

त्ररक्ष तु वर्धनः। वृधुवर्धने इत्यस्य ल्युटंतस्य नुदादित्वात् तदादित्वात्। ल्युप्रत्ययः लित्स्वरः। भूत् हि योगादनिघातः। अव अव तेलोटि रूपं। नि ७१

घातः सन्। असेः शतरि रूपं। प्रत्ययस्वरः। अहिहत्ये। हनहिंसागत्योः इत्यस्य भावे छंदसि चेति क्यप् तकारश्चांतादेशः। कृदुत्तरपदस्वरः। अवत्। छां

दसे लङि रूपं। निघातः॥ ॥अथ त्रयोदशी॥ ॥यज्ञेनेंद्रमवसा चक्रे अर्वागैनं सुम्नाय नव्यसे ववृत्यां॥ यःस्तोमेभिर्वावृधे पूर्व्येभिर्यो मध्यमेभिरुत नूतने

भिः॥ हे इंद्र सदीयजमानः अवसा स्वरक्षणाय यज्ञेन इंद्रं त्वां अर्वागा चक्रे हविः प्रदानेनाभिमुखं कुर्यां कीदृशं त्वं यः पूर्व्येभिः पुरातनैः सोमेभिः स्तो

त्रैः ववृधे यथा च इंद्रो मध्यमेभिर्मध्यमैः स्तोत्रैः उत अपि च नूतनेभिरस्माभिः क्रियमाणैः अधुनातनैर्वर्धते। चक्रे करोतेर्लिटि रूपं। नव्यसे

नवतराय स्तुत्याय दीयत्सुनि भसंज्ञायामकारो लोप ईकारलोपश्छांदसः। नित्वादाद्युदात्तः। ववृत्यां। वृतु वर्तने। लिङि बहुलं छंदसीति शपः श्लुः। व्य

त्ययेन परस्मैपदं। निघातः। ववृधे। वृधु वर्धने। इत्यस्य लिटि रूपं। प्रत्ययस्वरः। मध्यमेभिः मध्यशब्दाच्छंदसि कार्यमिध्यान्मइति मप्रत्ययः।

प्रत्ययस्वरः। नूतनेभिः नवशब्दस्य नूतनश्च प्रत्ययो वक्तव्यो नू इत्यादेशश्चेति तनप्रत्ययः नू इत्यादेशश्च॥ ॥अथ चतुर्दशी॥ ॥विवेषय

न्मा धिषणा जजान स्तवै पुरा पार्यादिंद्रमह्नः। अंहसो यत्र पीपरद्यथा नो नावेव यांतमुभये हवंते॥ ॥यद्यदा धिषणा इंद्र स्तवानीति मदीया

बुद्धिः मां विवेष व्याप्नोत् तदाहं स्तोत्रं जजान करोमि। बुद्धेः स्वरूपं दर्शयति। अहं पार्यात्पारे भवादतिदूरवर्तिनो विघ्नकारिणोह्नः पुरा इंद्रं स्त

वै स्तवानि यत्र यस्यां धिषणायामेव आमायां सत्यां स इंद्रः नोस्मानंहसः पापरूपाद्दारिद्र्यात् यथा पीपरत् यथा पारं नायेत् यथास्मानुभय

पार्श्ववर्तिनो धनार्थिनो जना यं हवंते आह्वयंति। तद्वत्। विवेष। विष्लृ व्याप्तौ विष्लृस्य ... लिटि रूपं। लित्स्वरः। जजान। जन जनने इत्यस्य लिटि णल

लिरूपं। वाक्यभेदादनिघातः। अभगत्यादिषु। आमहके ध्यसुन्प्रत्ययः कृदागमश्च। नित्स्वरः। पीपरत्। पृ पालनपूरणयोरित्यस्य लुङि

चङि ह्रस्वाभ्यासेत्वदीर्घगुणाः। यथायोगादनिघातः। लिंक्परत्॥ नावेव नुद प्रेरणे इत्यस्मात् ग्लानुदिभ्यां डौरिति डौप्रत्ययः। नुघत इति ताः

यः। सा चैकाचस्तृतीयाया उदात्तत्वं। इवेन नित्यसमासो विभक्त्यलोपश्च इत्यादि। उभये। उभयशब्दात्परस्यातपयत उभांतुदात्तो नित्यमिति अ

ऽत्रादेशः। वचनसामर्थ्यादादेरुदात्तत्वं। हवंते। हूयतेर्लिटि रूपं॥ माध्यंदिने सवने आग्नीध्रीयस्य आपूर्णो अस्येति प्रस्थितयाज्या। सूत्रितं च। आ
पूर्णो अस्य कलशः स्वाहेति मध्यंदिन इति॥ सेषा सूक्ते पंचदशी॥ आपूर्णो अस्य कलशः स्वाहा सेक्तेव कोशं सिसिचे पिबध्यै। समु प्रिया आ
ववृत्रन्मदाय प्रदक्षिणिदभि सोमास इंद्रं॥ हे इंद्र अस्य तव पानार्थं कलशः द्रोणकलशः सोमेन आपूर्णः। स्वाहाकृतो दत्तश्च सोमसहितः कलशः
पिबध्यै तव पानार्थं सिसिचे चोदिता धारसिंचामि। तत्र दृष्टांतः। कोशं सेक्तेव। यथा सेक्ता सेचकः जलपूर्णात्कोशात् द्रोणं सकाशात् जलं पात्रां
तरे सिंचति। तद्वत्। प्रियाः स्वादुतमाः सोमासः इंद्रत्वत्तेसोमाः इमं त्वामभिलक्ष्यैव मादायतरु हर्षार्थं प्रदक्षिणित् आदक्षिण्येन समावववृत्रन्। सम्य
गावृत्य वर्तंतां। आपूर्णः। पृ पालनपूरणयोः। अस्य कर्मणि निष्ठा रदाभ्यामिति तस्य नत्वं। गतिरनंतर इति गतिस्वरः। स्वाहा निपातत्वादाद्युदात्तः।
सेक्तेव कोशं। न लोकाव्ययेति षष्ठीप्रतिषेधः। सिसिचे। षिच क्षरणे इत्यस्य लिटि रूपं। पिबध्यै। पा पाने इत्यस्य तुमर्थे ध्यै अत्ययः। पिबत्वादि
बादेशः। नित्वादाद्युदात्तः। आववृत्रन्। वृतु वर्तने इत्यस्य लङि शपो बहुलं छंदसीति तस्य श्लुः। व्यत्ययेन परस्मैपदं बहुलं छंदसीति रुगा
गमः॥ अथ षोडशी॥ न त्वा गभीरः पुरुहूत सिंधुर्नाद्रयः परि षंतो वरंत। इत्था सखिभ्य इषितो यदिंद्रा दृल्हं चिदरुजो गव्यमूर्वं॥ हे पु
रुहूत त्वं गभीरः सिंधुः समुद्रः त्वां न वारयति ततः परिपरितो वर्तमानाः संतो अद्रयः शैलाः त्वां न वरंत न वारयंति किं तु त्वामनुसरंत्येव इत्थम
स्मादिच्छाया अनेन प्रकारेण सखिभ्यः मरुद्भिरिषितः प्रार्थितः त्वं दृल्हं चिद् अतिप्रबलमपि गव्यं गोविभवं अवतेवर्तमानं पूर्वं मूर्वं नल
मरुतः सम्यगाभोसीः गभीरः। गाधृ प्रतिष्ठा ... इत्ययः धकारस्य भकारः। आकारस्य ह्रस्वत्वं। गभीरगंभीरा विश्वा

लेन षष्ठेव ... त्वं सद्यो अपिब इति सूक्तम् ... त्वं सद्यो अपिबो जात इंद्र मदाय सोमं परमे व्योमन्। यद्ध द्यावापृथिवी आविवेशीरथा भवः पूर्व्यः कारुधायाः॥ सेषा सूक्ते दशमी॥ त्वं
सद्यो अपिबो जात इंद्र मदाय सोमं परमे व्योमन्। यद्ध द्यावापृथिवी आविवेशीरथाभवः पूर्व्यः कारुधायाः॥ हे इंद्र सद्यस्तदानीमेव जातः परमे व्यो
मन्। उत्तमे स्थाने स्थितः त्वं मदाय हर्षाय सोमम् अपिबः। यद्यदा त्वं द्यावापृथिव्यौ आविवेशीः। आ समंतात् प्रविष्टोऽसि खलु। अथानंतरं पूर्व्यः पु
रातनः सन्। कारुधायाः करूणं विधाता भावः खलु। व्योमन्। अव रक्षणे गत्यादिषु। विपूर्वस्यावतेर्मनिन्। सामन्व्युमन्निति इत्यादिना मनिन्। ज्वरत्वरेत्या
दिना संप्रसारणं विशेषेण आत्मनेपदस्य नत्। सुपां सुलुगित्यादिना सुपो लुक्। बहुव्रीहौ पूर्वपदप्रकृतिस्वरः। आविवेशीः। विश प्रवेशने इत्यस्य
लुङि लिटि सिपि थलि वेति इडागमः। इतश्चेति सिप इकारलोपः। यद्योगादनिघातः। कारुधायाः। कारुकलवाण जिनिस्विदि अभ्य उण् प्रत्ययः। प्रि
या द्विषिः। दधातेर्वहिहाधाञ्भ्यश्छंदसीत्यसुन्। प्रित्यादिस्त्वनुदात्तः। आतो युक् चिण्कृतोरिति युगागमः। समासे सति गतिकारकोपपदात्कृदिति पूर्वप
दप्रकृतिस्वरत्वं चेति सूत्रात्पूर्वपदप्रकृतिस्वरः॥ इति तृतीयस्य द्वितीये दशमो वर्गः॥ अथ तस्मिन्सूक्ते एकादशी॥ अहन्नहिं परिशयान
मर्ण ओजायमानं तुविजात तव्यान्। न ते महित्वमनु भूदध द्यौर्यदन्यया स्फिग्या क्षामवस्थाः॥ तुविजात बहूनि जातानि पृथिव्यादीनि य
स्मात्सोयं तुविजातः। हे तुविजात इंद्र तव्यान् विशायेन प्रवृद्धस्त्वं अर्णः परिशयानं उदकं परितः शयानं उदकमंतः कृत्वा परितो वर्तमानं अतएवौजा
यमानं बलमाचरंतं अहिं आसमंतात् हंत्यपहरंति उदकमित्यहिर्मेघः। तमिमं मेघमहन् उदकप्रेरणाय हतवानसि। अथ ते महित्वं महिमानं द्यौ
र्नानुभूत् नानुभवति। न जानाति। यद्यस्मात्त्वं अन्यया करोत् तया स्फिग्या। अन्यया कया स्फिग्या केथा क्षां अवस्थाः। अवस्थापयसि।

राम ७२

न्तर्णीतः सन्नर्थो लिहिः । वत्सेव जिह्वया लेढुमिच्छंत्यौ शुभ्रे शुभ्रं गच्छतः । तद्वत् समुद्रं गंतुं ज...च्छंत्यौ पयसा संयुक्ते विपाट् कूलविपाटनात् विपाड्ना
ऋ·सं·भा·२ द्रुत पुत्रो भूत्वा नमारते मुमूर्षोर्वसिष्ठस्य पाशान् अस्यां विपाशयंत विमोचनाद्वा विपाट् । शुतुद्री शुक्षिप्रं तुन्नातु तेव द्रवतीति गच्छतीति शुतुद्री ए
तन्नामके नद्यौ प्रजावते समुद्रं प्रति शुभ्रे शुभ्रं गच्छतः । अत्र निरुक्तं । पर्वतानामुपस्थादुपस्थात् नद्यौ कामयमाने अश्वे इव विमुक्ते इति वा विषमे इव मेद्रु
ति वा हासमाने हासतिः स्पर्धायां हर्षमाणे वा वा विवशोभमाने संमातरौ रिहाणे विपाट् शुतुद्री व्याख्याते इति । उशती । वश कांतौ । अस्य शतरि
त्वा ग्रहिज्यावयी त्यादिना संप्रसारणं । विषयते । विश्व यन इत्यस्य कर्मणि निष्ठा । संहितायां परिनिविभ्यः सेवसितसयसिवुसहेत्यादिना षत्वं । गति
रनंतर इति गतेः प्रकृतिस्वरः । हासतिः स्पर्धाकर्मा हसंने । शानच् । तस्य लसार्वधातुकस्वरे कृते धातुस्वरः । रिहाणे लिह । आदने । आस्वादने स्व
रितत्वादुभयपदी शानच् । अदादित्वाच्छपो लुक् । लकारस्य रेफश्छांदसो रेफस्य वत्वं । णत्वं । शुतुद्री छांदसी रूपसिद्धिः । जवेते । जु इति गतौ । भौवादि
को लिङित्वादात्मनेपदं । अतो ङित इति इयादेशः । निघातः ॥ ॥ अथ द्वितीया ॥ ॥ इंद्रेषिते प्रसवं भिक्षमाणे अच्छा समुद्रं रथ्येव याथः । समाराणे ऊ
र्मिभिः पिन्वमाने अन्या वामन्यामप्येति शुभ्रे ॥ ॥ हे नद्यौ इंद्रेण इषिते प्रसवं ते स्येंद्रस्यानुज्ञां भिक्षमाणे प्रार्थयमाने समुद्रमागच्छाभिमुखेन र्य राम
थो गच्छथः । तत्र दृष्टांतः । रथ्येवेति । यथा रथिनो लक्ष्यं तं देशमभिगच्छतः तद्वत् । किं कुर्वत्यौ । समाराणे परस्परं संगच्छंत्यौ सं ऊर्मिभिस्तरंगैः पि ७२
न्वमाने परिसरप्रदेशं संतर्पयंत्यौ शुभ्रे शोभमाने युवां समुद्रं गच्छथ इति पूर्वेणान्वयः । तथा वां युवयोर्मध्ये अन्या एका अन्यामपरां नदीमप्येति
अपिगच्छति । परस्परमेकत्वमापद्येते इत्यर्थः । इंद्रेषिते । ... कर्मणि निष्ठायां तीषसहेत्यादिना इडागमः । तृतीया कर्मणीति पूर्वपद

स्वरः । प्रसवं ... भिक्ष याच्ञायां । आत्मनेपदी । शानचो लसार्वधातुकस्वरेणानुदात्तत्वे धातु
स्वरः । रथ्येव । रथस्येमे । तस्येदमित्यर्थे रथाद्यदिति यत्प्रत्ययः । तित्स्वरितः । इवेन विभक्त्यलोप इत्यादि । याथः । यातेर्लट् रूपं । समाराणे । ऋ गतौ
वित्यस्य लिटः संपूर्वस्यात्मने समागमृच्छि इत्यादिनात्मनेपदत्वं ॥ ॥ अथ तृतीया ॥ ॥ अच्छा सिंधुं मातृतमामयासं विपाशमुर्वीं सुभगामगन्म । व
त्समिव मातरा संरिहाणे समानं योनिमनु संचरंती ॥ ॥ हे नद्यौ मातृतमां अतिशयेन मातरं सिंधुं अपं नीं शुतुद्रीं त्वमच्छाभिमुख्येनायासं विश्वा
मित्रोहं प्राप्तो भूवं । उर्वीं महतीं सुभगां सौभाग्यवतीं विपाशं त्वां अगन्म वयं प्राप्ताः स्मः । किं कुर्वत्यौ । मातरा मातरौ द्वे धेनू वत्समिव संरिहाणे अन्तर्णी
तसन्नर्थो लिहिः । लेढुमिच्छंत्यौ वत्समनुगच्छतः । तद्वत् समानमेकं योनिं स्थानं समुद्रं अनु अभिलक्ष्य संचरंती सम्यक् चरंत्यौ युवाम
यासिषमिति पूर्वेणान्वयः । अयासं या प्रापणे इत्यस्य रूपं । इड्भावश्छांदसः । अगन्म । गमेर्लङि बहुलं छंदसीति । शपो लुक् । म्वोश्चेति मका
रस्य नकारः । निघातः । संचरंती चर गत्यर्थः । तृतीया युक्तात्वाभावात् आत्मनेपदाभावः । शतुर्लसार्वधातुकस्वरेणानुदात्तत्वे कृते धातुस्वरः ॥
॥ अथ चतुर्थी ॥ ॥ एना वयं पयसा पिन्वमाना अनु योनिं देवकृतं चरंतीः । न वर्त्तवे प्रसवः सर्गतक्तः किंयुर्विप्रो नद्यो जोहवीति ॥ ॥ एवं स्तुतेन द्वे
विश्वामित्रं प्रत्यूचतुः । एना एनेन पयसा पिन्वमानाः संतर्पयंत्यो देवकृतं देवेनेंद्रेण कृतं संदिष्टं योनिं स्थानं समुद्रमनुलक्षीकृत्य चरंतीर्गच्छंत्यो
वयमास्महे । द्वयोर्बहुवचनं पूजार्थं । तासामासां अस्माकं सर्गतक्तः सर्गाय गमने प्रवृत्तः प्रसव उद्योगो न्यवर्त्तवे निवर्त्तयितुं न भवति । किंयुः कि
मिच्छन् सो विप्रो ब्राह्मणो नद्यो नदीरस्मान् जोहवीति भृशमाह्वयति । एना । एतत् शब्दस्य तृतीयायाम् एनादेशः । सुपां सुलुगिति तृतीयाया ।

ऋ·सं·भा·२

आज्ञादेशः। अ[illegible]दमित्तिावभक्तेरुदात्तत्वं। पिप्यमानाः पिबैसेवित्ते। देवकृती कृतीयाकर्मणीति पूर्वपदप्रकृतिस्वरः। वर्त्तेचे। इहुवर्त्तने। तुमर्थे तवे
प्रत्ययः। नित्स्वरः। सर्गतक्तः क्तिचेति पूर्वपदप्रकृतिस्वरः। किंयुः। किमिच्छन्। क्यचि मान्तत्व्ययं प्रतिषेधइति छांदसत्वो दत्र प्रतिषेधो भवति।
क्यच्छन्दसीत्युप्रत्ययः। प्रत्ययस्वरः। नद्यः। छांदसोयणादेशः। जोहवीति ह्वेञ्यलुकि अभ्यस्तस्य चेति संप्रसारणे कृते गुणो यङ्लुकोरि
त्यभ्यासस्य गुणः। यङो चेति तेपङ्डागमः। गुणः। निघातः॥ ॥ अथ पंचमी॥ ॥ रमध्वं मे वचसे सोम्याय ऋतावरीरुप मुहूर्तमेवैः। प्र सिंधु
मच्छा बृहती मनीषावस्युरह्वे कुशिकस्य सूनुः॥ ॥ विश्वामित्रो नदीः प्रतिब्रूते ऋत[illegible]कं तद्वत्यो हे नद्यः यूयं मे विश्वामित्रस्य मम सोम्याय
उत्तीर्याहं सोमं संपादयामीत्येवं सोमसंपादिने वचसे तदर्थं एवैः पंचम्यर्थे तृतीया छांदसं गमनेभ्यः मुहूर्तमात्रमुपारमध्वं उपपूर्वो रमिरुपर्स
हारे वर्त्तते। रक्षणमात्रं शीघ्रगमनात्। उपरता भवत सामान्येन नदीषु पृच्छमानासु समीहितं प्रयोजनमकुर्वतीषु पुरो वर्त्तिनी शुतुद्रीं प्रति
ब्रूते। कुशिकस्य राजर्षेः सूनुर्विश्वामित्रोहं बृहती महत्या मनीषा मनीषया स्तुत्या अवस्युः आत्मनो रक्षणमिच्छन् सन् सिंधुं शुतुद्रीं वा
मिच्छाभिमुख्येन प्रह्वे प्रकर्षेणाह्वयामि॥ अत्र निरुक्तं। उपरमध्वं। मे वचसे सोम्याय सोमसंपादिने ऋतावरी ऋतवत्य ऋतमित्युदकना
मप्रत्यृतं भवति मुहूर्तमेवैरयनैरवनैर्वा प्राभिह्वयामि सिंधुं बृहत्या मनीषया मनस ईषया स्तुत्या प्रज्ञया वावनाय कुशिकस्य सूनुः कुशि
कोराजा बभूवेति। रमध्वं। रमु क्रीडायां परमे। उपा[illegible]रमते [illegible] व्याङ्परिभ्यो रम इति आत्मनेपदं। ऋतावरीः। ऋतशब्दात् मत्वर्थे छंदसीवनिपाविति। व
निपवनो र च [illegible] प [illegible] वा [illegible] [illegible] मंत्रितस्य पादादित्वात् षाष्ठिकमाद्युदात्तत्वं। एवैः। इण् गतौ। इण्शीभ्यां	राम
७४

नरनिपात्यते [illegible] स्वरः। [illegible] युः। स्पृह[illegible] [illegible] सं[illegible] [illegible] प्रत्ययः। संप्रसारणं इकारस्य धकारः। निदित्यनुवृत्तेराद्युदात्तः। परिष
तः। सतः। अस्तेः शतरि रूपं। उपसर्गप्रादुर्भ्यामस्तिर्यच्परइति षत्वं। केचितारः क्रियाव्ययमिच्छंति। तदा षत्वमनुपपन्नं परिनिपातः स्वरः। सतः प्रत्य
यस्वरः। वरतः। वृञ् वरणे। भौवादिकः लङि रूपं। निघातः। अहं अः ऋजो भंग इत्यस्य लङि रूपं। गव्या। गाविकार इत्यर्थे गोपयसोर्यत् इति यत्। यतोना
वइत्याद्युदात्तत्वं॥ ॥ अथ सप्तदशी॥ ॥ शुनं हुवेमेति॥ ॥ एषा[illegible] प्रथमो वाम व्याख्यातः॥ ॥ इति तृतीयस्य द्वितीये एकादशो वर्गः॥ ॥ प्रपर्वता
नामिति त्रयोदशर्चं चतुर्थं सूक्तं। अत्रेयमनुक्रमणिका। प्रपर्वतानां सप्तोना संवादो नदीभिर्विश्वामित्रस्यो त्रि तिस्रोत्र नदीवाक्यं चतुर्थी
षष्ठ्यष्टमी दशम्यः षष्ठी सप्तम्यो त्रिंद्रस्तुतिरंत्यानुष्टुप्इति अत्र चतुर्थी षष्ठ्यष्टमीदशमीनां नदीवाक्यत्वात्ता एव ऋषयः। शिष्टानां वि
श्वामित्रवाक्यत्वात्स एव ऋषिः अंत्यानुष्टुप् शिष्टास्त्रिष्टुभः इंद्रो देवता आद्यया षष्ठ्या च विश्वामित्रो नद्यः स्तूयंते। तथापीन्द्रो देवतासूक्त वि
नियोगो लैंगिकः। पुरा किल विश्वामित्रः पैजवनस्य सुदासो राज्ञः पुरोहितो बभूव। स च पौरोहित्येन लब्धधनः सर्वं धनमादाय विपाट्छुतुद्र्योः
संभेदमागमत्। वो त्तितीर्षुर्विश्वामित्रोगाधजले तेनद्यौ दृष्ट्वोत्तरार्थमाद्याभिस्तिसृभिरस्तुवात्॥ ॥ तस्येषाद्यस्य प्रथमा॥ ॥ प्रपर्वतानामुशती
उपस्थादश्वे इव विषिते हासमाने॥ गावेव शुभ्रे मातरा रिहाणे विपाट्छुतुद्री पयसा जवेते॥ ॥ पर्वतानां गिरीणां शैलानामुपस्थादुत्संगान्निर्गत्ये
शती समुद्रगमनं कामयमाने गमने दृष्टांतः। अश्वे इव। यथा विषिते विमुक्ते हासमाने अन्योन्यं जयेन स्पर्धमाने यद्वा हृष्यंती अश्वे इव
अश्वे इव त्वरया गच्छंत्यौ अपरं दृष्टांतं तथा गावेव शुभ्रे यथा द्वे गावौ शोभमानौ वर्त्तेते। तद्वच्छुभ्रे शोभमाने इव मातरा यथा मातरौ धेनू रिहाणे अ

ऋ·वे·भा·२

यङ्शपोलुक्। बहुव्रीहौ नञ्सुभ्यामिति प्रत्ययस्वरः। प्रसवे। षूङ्प्रेरणे। ऋदोरप् इति भावे अप्प्रत्ययः। थाथ ब्रम्। केलुसी निसवर्णदीर्घः। प्रत्य
यस्वरः॥ ॥अथसप्तमी॥ ॥प्रवाच्यं शश्वधा वीर्यं१तदिंद्रस्य कर्म यदहिं विवृश्चत्॥ विवज्रेण परिषदो जघानायन्नापोयनमिच्छमानाः॥ ॥
तयोर्थमिंद्रो हि सेहुं विवृश्चत् उदकप्रेरणार्थं जघानेति यतः कर्मच्छेदनरूपं तदिदं तस्येंद्रस्य वीर्यं सामर्थ्यं शश्वधा सर्वदा प्रवाच्यं प्रकर्षेणव
चनीयं नयासदइंद्रः परिषदः परितः सीदतः आसीनान् प्रतिबंधकारिणोसुरान् वज्रेणाविजघान्। अथायनं स्थानं इच्छमाना इच्छंत्य आप
आयन्। प्रांति। प्रवाच्यं। वचपरिभाषणे। इत्यस्मात् ऋहलोर्ण्यदिति ण्यत्। णित्वादुपधावृद्धिः। वचोशब्दसंज्ञायामिति कुत्वाभावः। यत्प्रत्ययस्या
घुदात्तत्वं। यद्वा वाच्यते स्मोयत्। यतोनावइति स्वरः। शश्वधा शश्वच्छब्दात् थार्थे धा प्रत्ययः। नकारलोपश्छंदसः। विवृश्चत्। ओव्रश्चू
छेदने। तुदादिः। लङि ग्रहिज्यावयीत्यादिना संप्रसारणं। सहसुपेत्यत्र सहेति योगविभागात् समासः। समासस्वरः। परिषदः। क्विप्। संहि
तायां सदेरप्रतेरिति षत्वं। जघान। हंतेर्लिटि णलि रूपं। निघातः। आयन्। अयगतावित्यस्य लङि रूपं। पादादित्वादनिघातः। इच्छमानाः।
इषुइच्छायामित्यस्मात् व्यत्ययेन शानच्। तस्य लसार्वधातुकस्वरे कृते प्रत्ययस्वरः॥ ॥अथाष्टमी॥ ॥एतद्वचो जरितर्मापि मृष्ठा आयत्ते
घोषानुत्तरायुगानि॥ उक्थेषु कारो प्रति नो जुषस्व मानोनिकः पुरुषत्रानमस्ते॥ ॥ नद्यः प्रसंगादिंद्रस्तोत्रं कृत्वाविश्वामित्रं प्रत्यूचुः। ज
रितः स्तोतर्हे विश्वामित्र ते त्वं यं त्वसंवादात्मकं वचः। स्त्वनोधीषइत्याघोषानुघोषयत्तं एतद्वचो मापिमृष्ठाः। मा विस्मार्षीः। किंकारणं।
उत्तरायुगानि उत्तरेषु यागिकेषु योगेष्वहःसु उक्थेषु शास्त्राणां कर्ता त्वं नोस्मान् प्रतिजुषस्व। संवादात्मकेन नेन वाक्येन प्रति सेवस्व। इदा

नीं नोस्मान्पुरुषत्रा पुरुषेषु मानिकः। उक्तप्रत्युक्तिरूपं संवाद वाक्यं ध्यायनेन नितरां पुप्रगल्भामा कार्षीः। ते तुभ्यं नमः। मृष्ठाः। मृजू
षशुद्धावित्यस्य लङि व्यत्ययेनात्मनेपदं। अदादित्वाच्छपोलुक्। व्रश्चादिना षत्वं। निघातः। घोषान्। घुषसंशब्दने इत्यस्य शतरि सर्ववि
धीनां छंदसि विकल्पितत्वादिर्गतिगुण इति पदरूपत्वाभावः। सवर्णदीर्घः। शतुर्लसार्वधातुकस्वरे कृते धातुस्वरः। युगानि। युजिर्योगे।
उंछादित्वात् घुयुकुत्वेन निपातनादिघुउणत्वं। विष्विष्टविषयेचनियातननिघते। कालविशेषेरथाद्युपकरणे चेति तत्र पाठादेवांतोदात्त
त्वं। कारो। करोतेः कृवापाजिमिस्वादिना उण् प्रत्ययः। आमंत्रितत्वान्निघातः। कः। करोतेर्लुङि मंत्रे
घसेत्यादिना लुक्। हल्ङ्याब्भ्य इत्यादिना सिचोलोपः। नमाङ्योगे इत्याभावः। पुरुषत्रा देवमनुष्यपुरुषमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलमिति सप्तम्य
र्थेत्राप्रत्ययः। प्रत्ययस्वरः॥ ॥अथनवमी॥ ॥ओषुस्वसारः कारवे शृणोत ययौ वो दूरादनसा रथेन॥ निषूनमध्वं भवता सुपारा अधोअ
क्षाः सिंधवः स्रोत्याभिः॥ ॥विश्वामित्रो नदीः प्रत्युवाच स्वसारो भगिन्यः सिंधवो नद्यः कारवे स्तोत्रं कुर्वाणस्य मम वचनं शृणोत। सुसुष्ठु
शृणोतेव। अनसा शकटेन रथेन च सह दूरादति प्रकृष्टाद्देशाद्वो युष्मान्प्रतियौ प्राप्तोस्मि। यूयं सुसुष्ठुनि। नमध्वं आत्मनः स्वरूपं प्रह्वीभवत।
तथा सुपाराः यथा रथादीनां तीरात्सुखेनावरोहणारोहणं यथा स्यात्तथा शोभनरोधसश्च भवत। किंच यूयं स्रोत्याभिः स्रवणशीला
भिरद्भिः अधोअक्षाः रथोगस्याक्षस्य धस्ताद्भवत। ओसदा आपो क्षस्याधस्ताद्भवंति तदा रथादीनि नेतुं शक्यते। तस्मात्तत्परिमाणोदकाभ
वतेत्यर्थः। अभिप्रायम् ओदिति प्रगृह्यसंज्ञा। शृणोत। श्रुश्रवणे। इत्यस्य लोटि तप्रत्ययस्य तप्तनप्तनथनाश्चेति तनबादेशः। विक्त्वाद्गुणः। निघातः।

राम

७४

ऋ.सं.भा.२

यथो। या प्रापणइत्यस्याः भूतमात्रे लिङ् उत्तमेणलि आत उपालइत्यौकारः४। एकादेशस्वरः। वः। युष्मच्छब्दस्य द्वितीयाया बहुवचनस्य वस्नसाविति
वसादेशः४। सुनिपातस्येति संहितायां दीर्घः। नमध्वं। णमु प्रह्वत्वे शब्दे इत्यस्य कर्मकर्तरि नदुहस्नुनमां यक्चिणाविति। प्रतिषेधाच्छप्भावः। अ
धोअक्षाः४। अधरशब्दस्य पूर्वाधरावराणामसिपुरधवश्चैषामित्यसिप्रत्ययः। अधादेशश्च। अक्षशब्दो शः अच्या हविरित्यस्मादशेर्देवन इति
सप्रत्ययांतः४। कृदुत्तरपदप्रकृतिस्वरः। सिंधवः। आमंत्रितत्वान्निघातः। स्रोत्याभिः। स्रोतः शब्दात्स्वान्तसो विभाषा उया विति उयप्रत्ययः।
उश्वात्टिलोपः। प्रत्ययस्वरः४॥७॥ अथ दशमी॥ आते कारो शृणवामा वचांसि ययाथ दूरादनसा रथेन। नितेनंसै पीप्यानेव योषा मर्यायेव कं
न्याशश्वचैते॥ ५ नद्यः पूर्वं विश्वामित्रवाक्यं प्रत्याख्यायानर्यतीतस्य वाक्यमाशुश्रुवुः। कारोस्तोत्रं कुर्वाण हे विश्वामित्र तव वचांसि इमा
निवाक्यानि आशृणवाम श्रुणुमः। तव समीहितं प्रयोजनं कुर्म इत्यर्थः। अनसा शकटेन रथेन च सह यथाथ यतो दूरादागतोसि। वयं च।
तत्वदर्थं निनंसै नीचैर्नमाम प्रत्येकविवक्षया त्रिकवचनं। रथेगंतुं गाधोदका भवामेत्यर्थः। तत्र दृष्टांतः। पीप्यानेव योषा पीप्याना पुत्रं स्तनं पा
ययंती योषा माता यथा प्रह्वी भवति। दृष्टांतान्तरं। यथा कन्या युवतिर्मर्यायेव मनुष्याय पुत्रे भ्रात्रे शश्वचैते परिष्वजनाय नितरां नमति तथेति। राम
कारोसंबुद्धौ शाकल्यस्येन्दाविति प्रगृह्यसंज्ञा। आशृणवाम। श्रु श्रवणे इत्यस्य लोटि आडुत्तमस्य पिच्चेत्याडागमः। वित्वा श्रुणुः४। यथाप्ययोषाप ३६
पाइत्यस्य भूतमात्रे छिन्दसि लिटि एकाचउपदेशेनुदात्तादितीट्। प्रतिषेधः। लित्स्वरः। सहार्थे तृतीया। नंसै। णमु प्रह्वत्वे इत्यस्य लेट्युत्तमे लि
ङ्सिबहुलमिति सिपू वैतो न्यत्रेति ऐकारादे[illegible]पीप्याने व। पीङ्या नहूल्यस्यांत र्भावित एवर्थस्य लिटि कानच्छिरूपं। चित्स्वरः। योषा।

वज्रबाहुरपा[illegible]तीयायाः पूर्वसवर्णदीर्घः। अवस्युः। अवोरक्षणमिच्छन्। सुप आत्म
नः क्यच्। नः क्यच् इति नकारान्तस्य पदसं[illegible]नलोपः नकारस्य न भवति। क्याच्छन्दसीत्युप्रत्ययः। अंके। अञ्च्यते। लुङि सिच् आ
त्मनेपदेष्वन्यतरस्यामित्यङादेशः। निघातः॥ इति तृतीयस्य द्वितीये द्वादशो वर्गः॥ अथ तस्मिन्सूक्ते षष्ठी॥ इंद्रो अस्माँ अर
दद्वज्रबाहुरपाहन्वृत्रं परिधिं नदीनां॥ देवोनयत्सविता सुपाणिस्तस्य वयं प्रसवे याम उर्वीः॥ ६ नद्यः प्रत्यूचुः। हे विश्वामित्र वज्रबा
हुर्यस्यासौ वज्रबाहुः तादृशो बलवानिंद्रः नदीरस्मानरदत्। रदतिः खनतिकर्मा। अखनत् न तु कथमखनत् उच्यते। नदीनां शब्दकारि
णीनामपां परिधिं नाम परिधिं परितो निहितं उदकमन्तः कृत्वा परितो वर्तमानमित्यर्थः। तादृशं वृत्रं वृणोत्याकाशमिति वृत्रो मेघः। तं मेघ
मपाहन्नजघान तस्मिन्हते आपः पतिताः ताभिर्गच्छन्तीभिर्वयं खाताः एवं मेघहननद्वारेणाखनत्। न केवलमखनत्। किंतर्हि सविता
सर्वस्य जगतः प्रेरकः सुपाणिः शोभनहस्तः उत्पत्तिस्थितिकर्तृत्वात् तादृशो देवो द्योतमान इंद्रोस्माननयत् मेघभेदनं कृत्वोदकप्रेरणेन स
मुद्रं प्रत्यनयत्। तस्य तादृशस्य सामर्थ्योपेतस्येंद्रस्य प्रसवेभ्यनुज्ञायां वर्तमाना उर्वीः उरुदकैः प्रभूता वयं याम गच्छामः। न तव वचनात् उपरमामहे।
उक्तार्थे यास्को ब्रवीति। इंद्रोऽस्मानरदद्वज्रबाहू रदतिः खनतिकर्मा पाहन्वृत्रं परिधिं नदीनामिति व्याख्याते। देवोनयत्सविता सुपाणिः
कल्याणपाणिः पाणिः पणायतेः पूजाकर्मणः प्रगृह्य पाणी देवान्पूजयन्ति तस्य वयं प्रसवे याम उर्वीः ऊर्व्य इति। अरदत्। रदते र्लङि रूपं। वज्र
बाहुः बहुव्रीहौ पूर्वपदस्वरः। अहन्। हन्तेर्लङि रूपं। निघातः। परिधिं। सुपाणिः। पणव्यवहारे स्तुतौ च। अशिपणाय्योरुरुलुकौ। त्वतीण आ

ऋ॰सं॰भा॰२ गा आत्मन इच्छंतः। भरताः भरतकुलजाः सर्वे अतारिषुः तां नदीं समतरन् विप्रो मेधावी विश्वामित्रो नदीनां सुमतिं शोभनां स्तुतिं समभक्त समभ
जत। यूयं तु यथापूर्वं इषयंतीः कुल्यादिद्वारा धनं कुर्वाणा अतएव सुराधाः शोभनधनोपेता यूयं वक्षणाः स्रोतांसि सरितः कुल्याः प्रपिन्वध्वं प्रक
र्षेण तर्पयत। आपृणध्वं ताः सर्वतः पूरयत तु वशी भन्नु शीघ्रं यात गच्छत च। अतारिषुः। तृ प्लवनतरणयोः। दिव्यस्य लुङि सिचि वृद्धिः परस्मैपदे
ष्विति वृद्धिः। अडागमस्वरः। तस्य स्वरः। अभक्त। भज सेवायां। मित्यस्य लुङि सिचो न लो— लीतिलोपः। पादादित्वाद निघातः। पिन्वध्वं। पिवि सेच
न इत्यस्य लोटि रूपं। निघातः। इषयंतीः। इषं कुर्वत्यः। तत्करोतीति णिच् णाविष्ठवत्प्रातिपदिकस्येति इष्ठवद्भावात् टेरिति टिलोपः। वा छंदसीति
सवर्णदीर्घः। प्रत्ययः स्वरः। पृणध्वं। पृण प्रीणने। लोटि रूपं व्यत्ययेनात्मनेपदं। वाक्यभेदादनिघातः। यात। या प्रापणे इत्यस्य लोटि रूपं। अत्रा
पि तिङ्निघातः। शीभं। शीभृ कत्थने श्लाघायां तने। नते [illegible] इतिकरणे घञ् [illegible] स्वरः॥ ॥ अथ त्रयोदशी॥ ॥ उद्व ऊर्मिः शम्या हंत्वापो योक्त्राणि मुं
चत। मादुष्कृतौ व्येनसाघ्न्यौ शूनमारतां॥ ॥ पूर्वमिन्द्रितीर्षु विश्वामित्रो नदीरुक्त्वा धुनोतीति तीर्षु पुनराह। हे नद्यो वा युष्माकं ऊर्मिस्तरंगः शम्याः
युगकंठपाश्वादेः संलग्नाव [illegible] इद यथा भवति तथा हंतु मिच्छतु। स तरंगो [illegible] गच्छत्वित्यभिप्रायः। तथा। हे आपो यूयं योक्त्रा — राम
णि तानि रज्जूं मुंचत यथा न स्पृशंति यां तत्त्वित्यभिप्रायः। व्येनसा विगतपापेन अतएवा दुष्कृतौ कल्याणकर्मकारिणौ अघ्न्यौ नाहंतव्यौ नितिरस्क — ७१
रणीये विपाट् शु— शुतुद्र्यौ शूनं समृद्धिम् आतरां आगच्छतां एवं विश्वामित्रो नदीः स्तुत्वा ताभिरनुज्ञातो नदीरतरदिति। ऊर्मिः। अर्तेः। अर्तेरूच्चेति मि प्रत्ययः।
अर इत्ययमादेशो धातोः। [illegible] ऊर्मिभिः। प्रत्ययस्वरः। शम्याः। शमु उपशमे योरदुपधादिति यप्रत्ययः। यतोनाव इत्याद्युदात्तत्वं। हंतु। हन हिं

सा गत्योरित्यस्य लोटि रूपं। निघातः। योक्त्राणि। युजिर् योगे। यारणे दाम्नीशसयुयुजेत्यादिना ष्ट्रन् प्रत्ययः। नित्स्वरः। मुंचत। मुच्लृ मोक्षणे। निघातः।
अदुष्कृतौ। इसुसोः सामर्थ्ये इति विसर्जनीयस्य षत्वं। व्येनसा। बहुव्रीहौ पूर्वपदस्वरः। सुपां सुलुगिति आदेशः। अघ्न्ये। हन हिंसागत्योरित्यस्य नञ्पूर्वस्य
अघ्न्यादयश्चेति निपातनाद् यत्। किंत्वादुपधालोपः। होहंतेरिति घत्वं। सर्वविधीनां छंदसि विकल्पितत्वात् आरशी भाव एकादेशः स्वरः। शूनं श्व
यतेर्नपुंसके क्त इति क्तः। यजादित्वात् संप्रसारणं। हल इति दीर्घत्वं। दितेश्वीति निष्ठा निल्वं निष्ठा च द्व्यजनादित्याद्युदात्तः। अरतां। ऋ गतावि
त्यस्य लुङि लेः सर्त्तिशास्त्यर्तिभ्यश्चेत्यङादेशः। ऋदृशोऽङि गुणः। न माङ्योग इत्यडभावः। निघातः॥ ॥ इति तृतीयस्य द्वितीये त्रयोविंशो वर्गः॥
॥ इंद्रः पूर्भिदित्येकादशर्चं पंचमं सूक्तं। वैश्वामित्रं त्रैष्टुभमैंद्रं। अत्रानुक्रमणिका। इंद्रः पूर्भिदेकादशेति। अग्निष्टोमे माध्यंदिनसवने ब्राह्म
णाच्छंसिशस्त्रे इंद्रः पूर्भिदिति सूक्तं होत्रकाणामिति खंडे सूत्रितं। इंद्रः पूर्भिदुदु ब्रह्माणीति [illegible] षडहस्य प्रथमेहनि माध्यंदिन
सवने ब्राह्मणाच्छंसिशस्त्रे चातुर्विंशिकातिदिष्टस्याहीनसूक्तस्य स्थाने त्रीणि संपातसूक्तानि तत्रेदं प्रथमं। इंद्रः पूर्भिद्य एक इद्धव्य इति सम
गा इति उद्भिद्बलभिदोर्निष्केवल्य एतत्सूक्तं निविद्धानीयं। सूत्रितं च। इंद्रः सोमं इंद्रः पूर्भिदिति माध्यंदिन इति। ॥ तस्मिन्सूक्ते प्रथमा॥ ॥ इं
द्रः पूर्भिदातिरद्दासमर्कैर्विदद्वसुर्दयमानो विशत्रून्। ब्रह्मजूतस्तन्वा वावृधानो भूरिदात्र आपृणद्रोदसी उभे॥ ॥ पूर्भित् असुरपुराणां भेत्ता
अतएव विदद्वसुः विदयद्भिः स्वमहिमप्रख्यापकैर्वसुभिर्युक्तः शत्रून् सुरान् विदधमानः विशेषेण हिंसन्। तथा वयास्कः। विदद्वसुर्दसमानो
विशत्रूनिति हिंसाकर्मेति। तादृश इंद्रो दासं दस्यते तेनेन तम इति दासे वा सरत्नमर्कैः अर्चनीयैः स्वतेजोभिरातिरत्। समंतादवर्द्धत्। इंद्रस्य स्वात्मक

ऋ॰सं॰भा॰२

त्वात्। तथा च स्मृतिः। चैत्रमासे नापदिं इंद्र इति। किंच ब्रह्मजूतः ब्रह्मणा स्तोत्रेण कृष्टः। यद्वा ब्रह्मणा जगत्स्रष्ट्रा प्रेरितस्तत्त्वावाशरीरेण वावृधा
नो वर्धमानो भूरिदात्रो दायते लूयते नेन शत्रुशिर इति दात्रमायुधं बहुविधायुधोपेतः। तादृश इंद्रः उभे रोदसी द्यावापृथिव्यौ आपृणात्। सर्वतोत
र्पयत्। पूर्भित्। भिदिर् विदारणे। क्विप्। अतिरत्। तरते र्व्यत्ययेन शः। ऋत इद्धातोरितीत्वं। निघातः। दासां करणे घञ्। ञित्स्वरः। विद् द्रु सुःवि
दे रंतर्भावितण्यर्थस्य तरेः आद्यादित्वात्तसिः लुकि सति। प्रत्ययस्वरेण शत्रुरंतोदात्तत्वं। बहुव्रीहौ पूर्वपदस्वरः। दयमानः। दय दानगतिरक्षणहिं
सादानेषु। आत्मनेपदी। लटः शानच्। न लोकाव्ययेति षष्ठीप्रतिषेधः। वव्धानः वृध वर्धने कानिचि रूपं। संहितायामभ्यासस्य तुजादित्वाद्दीर्घः।
भूरिदात्रः दाप् लवने। करणे दाम्नीत्यादिना ष्ट्रन् प्रत्ययः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरः। आपृणात्। पृण प्रीणने इत्यस्य लङि तुदादित्वाच्छः। निघा
तः। रोदसी। रुदेरसुनि रूपं। नित्स्वरः॥ ॥ अथ द्वितीया॥ ॥ मखस्य ते तविषस्य प्र जूतिमियर्मि वाचममृताय भूषन्। इंद्र क्षितीनामसि मानु
षीणां विशां दैवीनामुत पूर्वयावा॥ ॥ हे इंद्र भूषन् त्वामलंकुर्वन् अहं मखस्य मखनीयस्य स्तुत्यस्य तविषस्य बलवतस्तव प्रजूतिं मनसा प्र
ेरितां वाचं स्तुतिलक्षणाममृताय अमृतत्वाय मोक्षार्थं प्रेय इयर्मि प्रकर्षेण प्रेरयामि। मानुषीणां क्षितीनां मनोर्जातानां मानुष्याणां। उत अपि च दैवीनां देवसंबंधी
नां विशां प्रजानां पूर्वयावा अग्रतो गंता त्वमसि। मखस्य मह पूजायां। महेर्हलोपश्चेति हलोपः इत्यनुवृत्तौ महेश्चेति मख प्रत्ययः। हलोपश्च। म
ह्यते पूज्यते सर्वैरिति मखः। खं तेस्य सोतेरित्यंतोदात्तत्वं। यद्यपि कृशानां दे भवति। तथापि वचनसामर्थ्याद्भवति तविषस्य। तवतेष्टिषच् प्रत्ययः।
चित्स्वरः। जूतिं। ऊतियूतीत्यादिना निपातनादुदात्तत्वं। इयर्मि। ऋ गतौ। अर्तिपिपर्त्योश्चेति। अभ्यासस्येत्वं। अभ्यासस्येति पदः इयङादेशः। पादादित्वा

त्निघातो न। हृस्वदिहील्यादिनायं प्रत्ययः। दे तौ तिथौ प्राकृ पादित्वाद्दीर्घः स्वसः। शश्वद्यौ सा परिभ्रग इत्यस्य पार्श्व पादादि लक्षणो भावे क्विप् प्र
षोदरादित्वादिष्टरूपसिद्धिरंतोदात्तत्वं॥ ५ ॥ इति तृतीयस्य द्वितीये त्रयोदशो वर्गः॥ ॥ अथ तस्मिन्सूक्ते एकादशी॥ ॥ यदंग त्वा भरताः संतरेयु
र्गव्यन्ग्राम इषित इंद्रजूतः। अर्षादह प्रसवः सर्गतक्त आ वो वृणे सुमतिं यज्ञियानां॥ ॥ विश्वामित्रो नदीः प्रत्युवाच। अंग त्वा मंत्रेणेहेन घः
यद्यस्माद्युष्माभिरभिमतीर्वा अस्मत्तरणमभ्यनुज्ञातं तस्माद्भरताः भरतकुले जाता मदीयाः सर्वेत्वा परस्परमेकतामापन्नाः नदीत्वां संतरेयुः सम्य
गुत्तीर्णा भवेयुः। तदेव विशिनष्टि गव्यन् गा उदकानि तरीतुमिच्छन् इषितस्त्वया सत्तु ज्ञात इंद्रजूतः युष्माकं प्रवर्तकेनेंद्रेण च प्रेरितो ग्रामो भ
रतानां संघो यातः संतरेत्। यतः सर्गतक्तः गमनाय प्रवृत्तः प्रसवस्तेषामघो गोह पूर्वं युष्माभिरनुज्ञातः अहं तु यज्ञियानां यज्ञार्हाणां वो युष्माकं सु
मतिं शोभनां कृतिं शोभनां स्तुतिमावृणे सर्वतः। संभजे भरताः। भरतशब्दो द्दुतसादित्वादन्। तस्य यञ् भोऽस्येति लुक्। अत्र च प्रत्ययस्वरः। सं
तरेयुः तरतेर्लिङि झेर्जुसि रूपं। जुसि सार्वधातुकस्वरे धातुस्वरः। तिङ् चोदात्तवतीति मतने निघातः। गव्यन्। गा आत्मन इच्छन्सुपः क्यच्। एकादे
शस्वरः। ग्रामः। ग्रसेराविति प्रत्ययः। आकारादेशश्च नित्स्वरः। इंद्रजूतः। जू इति सौत्रो धातुर्गत्यर्थः। क्तः। क्विमिति निष्ठायामितीट्प्रतिषेधः।
तृतीयाकर्मणीति पूर्वपदप्रकृतिस्वरः। अर्षात्। ऋष गतौ विस्त्यस्य लेटि टितिपि सिब्बहुलमिति सिप्। लेटो डागमः। एकाच इतीट्प्रतिषेधः। गुणः प्र
त्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः। वृणे। वृङ् संभक्तौ इत्यस्य लिटि रूपं। यज्ञियानां यज्ञर्त्विग्भ्यां घखञाविति घप्रत्ययः। प्रत्ययस्वरः॥ ॥ अ
थ द्वादशी॥ ॥ अतारिषुर्भरता गव्यवः सममभक्त विप्रः सुमतिं नदीनां। प्र पिन्वध्वमिषयंतीः सुराधा आवक्षणाः पृणध्वं यात शीभं॥ ॥ गव्यवः

राम

१८

लोट्। ऊति हिंसाकरणयोः। निघातः। रम्याणां। रमु क्रीडायां। रम ऽर्हत्यार्थेच्छंदसि वेति यप्रत्ययः। तस्य स्वरः। यद्वा रमवं तणी अस्या
ऋ॰सं॰भा॰२ र्थेऽपि दधाः। दयक्केति यक्प्रत्ययः। रमयति भूतानि। नक्तं चारिण्युपरमयतीति रात्रीति यास्कः। विर्वत्प्रत्ययः॥ ॥ अथ चतुर्थी॥ ॥ इंद्रः स्वर्षा जनन्
येन्नहानि जिगायोशिग्भिः पृतना अभिष्टिः॥ प्रारोचयन्मनवे केतुमह्नामविंदज्ज्योतिर्बृहते रणाय॥ स्वर्षाः स्वर्गप्रदः इंद्रो हानि स्वतेजोभिर्जनय
न्नुशिग्भिः युद्धं कामयमानैरंगिरोभिः सह पृतनाः परकीयाः सेना अभिष्टिरभिभावुकः सन् जिगाय। शत्रून्जैषीत्। शत्रुवधानंतरं मनवे
मनुष्याय कर्मकर्त्रे यजमानायैतथा अह्नां केतुं ज्ञापकं सूर्यं प्रारोचयत्। तथा च तमोरूपासुररोधस्य कर्षणादीपयत्। ततो बृहते रणाय यु
द्धप्रकाशनाय ज्योतिः प्रकाशमविंदत् अलभत। स्वर्षाः षणु दाने। क्विप्। जनसनखनां सञ्झलोरित्यात्वं। सनोतेरन इति षत्वं। अहरा
दीनां पत्यादिषूपसंख्यानमिति विसर्जनीयस्य रुत्वं। जिगाय। जि जये। इत्यस्य लिटि सन्लिटोर्जेरित्यभ्यासादुत्तरस्य कवर्गादेशः। पृतना
पृङ्। अयामेऽरुङ्भ्यां किदिति तनप्रत्ययः। यो धार इति पृतनाः। सनो नित्वादाद्युदात्तः। अभिष्टिः। अभिगंता। इषु गतौ। मंत्रे वृषेष्यादिना
क्तिन्नुदात्तः। इकुभावे इति तितुत्रसेत्यादिनेट्प्रतिषेधः। एमन्नादित्वात्पररूपत्वं। तदुत्तरस्वरः। अरोचयत्। रुच दीप्तावित्यस्य लङि ओमुचा रा॰
दीनामिति नुम्। पाघ्रादित्वान्निघातः। रणाय। रण शब्दे। कर्तव्यतिसंप्रदानसंज्ञा। रणतिः शब्दार्थः वशिरण्योरुपसंख्यानमित्यपूर्वत्व ७९
यो रणंति शब्दं कुर्वंति परस्परं योधा यो त्रेति रणः संग्रामः। प्रत्ययपित्वादनुदात्तत्वे धातुस्वरः॥ ॥ अथ पंचमी॥ ॥ इंद्रस्तुजो बर्हणा आवि
वेश नृवद्दधानो नर्या पुरूणि॥ अचेतयद्धिय इमा जरित्रे प्रेमं वर्णमतिरच्छुक्रमासां॥ ॥ सनातनः इंद्रस्तुजो बाधिकाः बर्हणा युद्धोत्साहेन वर्ध

मानाः परकीयाः सेना नृवन्मनुष्यवद्यथा वैर्वेष्टिका आक्रम्य प्राविशत्। किं कुर्वन्। पुरूणि बहूनि युधनयसकारणानि यो धानि धनानि दधानः धा
रयन् आविवेश। स इंद्रो जरित्रे स्तोत्रे इमा दृश्यमाना धियः स्तोत्रसाध्यायस्यानुष्ठा इति ता धियो चेतयत्। अज्ञापयत्। अथासामुषसां इमं शु
क्रवर्णं प्रतिरत् स्वतेजसा प्रकर्षेण वर्धयति। धीः शब्दात् लीङ्परत्वे मंत्रवर्णः। शुक्रवर्णमिधुनो यं संततेधियमिति। तुजः। तुज हिंसायां। क्विप्।
धातुस्वरः। बर्हणा। बृहि वृद्धौ। अस्माद्युच्। बहुलमिति कर्तरि युच्। व्यत्ययेनाद्युदात्तत्वं। विवेश। विश प्रवेशने लिटि रूपं। निघातः। नृवत्। नृशब्दा
न्तुल्यमिति वतिप्रत्ययः। तस्य स्वरः। दधानः। दधाते शानच्रूपं। अभ्यस्तानामादिरित्याद्युदात्तत्वं। नर्या। नरेभ्यो साधूनि इति यत्। तत्र साधुरिति
यत्। यतो नाव इत्याद्युदात्तत्वं। अचेतयत्। चिती संज्ञाने इत्यस्य ण्यंतस्य लङि रूपं। अडागमस्वरः। धियः। ध्यै चिंतायां। अन्येभ्योऽपि दृश्यत इ
ति क्विप्। दृशिग्रहणात् संप्रसारणं। धातुस्वरः। इमाः। इदमो मः। इति दकारस्य मकारः। एकादेशस्वरः। अतिरत्। तरतेर्व्यत्ययेन शः। निघातः। आसां। इद
मोऽन्वादेशेऽशनुदात्त इति। अशादेशोऽनुदात्तः। आम् प्रत्ययः सुप्त्वादनुदात्तः। अतः सर्वानुदात्तः॥ ॥ इति तृतीयस्य द्वितीये पंचदशो वर्गः॥ ॥ अथ तस्मिन्नृ
चि षष्ठी॥ ॥ महो महानि पनयंत्यस्येंद्रस्य कर्म सुकृता पुरूणि॥ वृजनेन वृजिनान्सं पिपेष मायाभिर्दस्यूंरभिभूत्योजाः॥ ॥ महो महतः अस्येत
स्य सामर्थ्यस्य इंद्रस्य महानि महांति यानि पुरूणि सुकृतानि कर्माणि वृत्रहननादीनि कर्माणि पनयंति स्तुवंति। इंद्रस्य कर्म सुकृता पुरूणीत्येतत् पू
र्ववदेकं अत्रार्थे भेदाभावात्पदकालीनो व्याख्यायते। स इंद्रः। वृजनेन वर्ज्यते शत्रवोऽनेनेति वृजनं बलं तेन बलेन वृजिनान् पापरूपानसुरान् संपिपे
ष सम्यक् चूर्णीचकार। मायाभिः भूत्योजाः अभिभूतिः शत्रुविषयोऽभिभवः तत्र ओजो बलं यस्येति अभिभूत्योजाः शत्रूणां पराभवसामर्थ्यः॥

नादश इंद्रो दस्यूनुपक्षपितॄन्नसुरानायोभिः कर्पदैः संपिपेष ॥ पनयंति । पनतेः स्तुत्यर्थस्य गुपूधूपविच्छिपणिपनिभ्य आय इत्यायप्रत्ययः । ङक्स्वः छांद

ऋ॰सं॰भा॰२ सः । निघातः । वृजनेन । वृजी वर्जने । वृजेः किं चेति क्युन् प्रत्ययः । वृजिनं पापं तद्धतः । अर्शआदिभ्योऽच् । एकादेशः स्वरः । विवेद । विप्लृ संचूर्णने इत्यस्य लो

टि णलि रूपं । निघातः । अभिभूत्योजाः । भूतिर्भवनं भावे क्तिन् । तादौ च निति कृत्यतौ इति गतेः प्रकृतिस्वरत्वं । अभिभूतो ओजो यस्येति सप्तम्युपमानपूर्वपदस्य

बहुव्रीहिरिति समासः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरः ॥ ॥ अथ सप्तमी ॥ ॥ युधेंद्रो मह्ना वरिवश्चकार देवेभ्यः सत्पतिश्चर्षणिप्राः ॥ विवस्वतः

सदने अस्य तानि विप्रा उक्थेभिः कवयो गृणंति ॥ ॥ सत्पतिः सतां देवानां पतिः चर्षणिप्राश्चर्षणीनां मनुष्याणां अपेक्षितफलप्रदानेन कामपूर

कः स इंद्रः मह्ना महता युधा युद्धेन वरिवः । भ्रंशं क्यते थेभि रिति वरिवो धनं तादृशं धनं युद्धेन लब्धं देवेभ्यो देवनशीलेभ्यः स्तोतृभ्यश्चकार

दत्तवान् विप्रा मेधाविनः कवयः स्तोतारो विवस्वतः । विशेषेण अग्निहोत्रादिककर्मार्थं वसतो यजमानस्य सदने गृहे अस्येंद्रस्य तानि वृत्रहनन

वसुप्रदानानि कर्माणि गृणंति । स्तुवंति । युधा । युध संप्रहारे भावे संपदादिलक्षणः क्विप् सावेकाच इति विभक्तेरुदात्तता । वरिवः वृञ् वरणे इ

त्यस्मादसुन्कित्त्वेत्यभ्यासस्य रिगागमः । नदंतादसुन् । बाहुलकादिलोपः । नित्स्वरः । चकार । करोतेर्लिटि रूपं । निघातः । सत्पतिः । अस्तेः शतरि रा॰

रूपं । सदिति पत्यावैश्वर्य इति पूर्वपदप्रकृतिस्वरत्वं । चर्षणिप्राः । प्रा पूरणे । विच् । विवस्वतः । विपूर्वाद्वस निवास इत्यस्मात्संपदादिलक्षणो भावे ८०

क्विप् । तदस्यास्त्यस्मिन्निति मतुप् । मादुपधाया इति तस्य वत्वं । प्रत्ययस्य पित्वादनुदात्तत्वे धातुस्वरः । गृणंति । गॄ शब्द इत्यस्मात् लटि रूपं । निघा

तः ॥ ॥ अथाष्टमी ॥ ॥ सत्रासाहं [illegible] सहोदां ससवांसं स्व[illegible]श्च देवीः ॥ ससान यः पृथिवीं द्यामुतेमामिंद्रं मदंत्यनु धीरणासः ॥ ॥ धीरणा सोधि

अनिघातः । अस्य लस्वरः । भूतम् [illegible] अलं [illegible] रूपं । धातुलसार्वधातुकस्वरे धातुकस्वरः । अस्ति । अस्तेर्लटि रूपं । निघातः ।

मानुषीणां । मनोर्जातावञ्यतौ षुक् च । युगागमः । टिड्ढाणञिति ङीप् । ञित्स्वरः । देवीनां । देवाद्यञञाविति अञ् । अत्रापि पूर्ववत् ङीप् । ञित्स्वरः । पूर्वथा

वा । या प्रापण इत्यस्माद्धातोर्मनिन् । कृनि पूर्व निपरये ति वनिप् । कृदुत्तरपदस्वरः ॥ ॥ अथ तृतीया ॥ ॥ इंद्रो वृत्रमवृणोच्छर्धनीतिः प्र मायि

नाममिनाद्वर्पणीतिः ॥ अहन्व्यंसमुशधग्वनेष्वाविर्धेना अकृणोद्राम्याणां ॥ शर्धनीतिः नयनं नीतिः कर्म शर्धं प्रवृद्धं प्रवृद्धनीतिः । क

र्मयस्य सतथोक्तः स इंद्रो वृत्रमसुरं अवृणोत् बलेनारुंधत् । तथा वर्पणीतिः । युद्धे परप्रहाराणां निवारकं कर्म इंद्रः मायिनो द्वितीयार्थे षष्ठी

मायिनो असुरान् प्रामिनात् प्रकर्षेण वधीत् । उशधक् उशद्वधं कामयमान इंद्रः वनेषु गूढचारिणमसुरं व्यंसं विगतांसं यथा भवति तथा त

मां अहन् जघान । अथ तस्मिन् रात्रिचरे गवामपहर्तरि हते सति राम्याणां रमणं स्त्रीभिः सह क्रीडा रामः तमर्हंतीति राम्यो रात्रयः तासां रात्रीणामंत

र्हितानां आविरकृणोत् प्रकटा अकरोत् रात्रीणामसुराक्रांतत्वेन तिरोहितत्वं । अहर्देवानामासीद्रात्रिरसुराणां ते सुराः पदेवानां वित्तं वेद्यमासी

त्तेन सह रात्रिं प्राविशन्निति । यद्दिवा दाशराम्यास्त्वेषो वा चोधेना इति । अकृणोत् । कृञ् वरण इत्यस्य लङि रूपं । निघातः । शर्धनीतिः । शर्धति

रुत्सहार्थः । शार्ध्यस्मिन्नकर्मणि घञ् । बहुव्रीहौ पूर्वपदस्वरः । अमिनात् । मीञ् हिंसायां मीनातेर्निगमे इति ह्रस्वः । निघातः । अ

हन् । हंतेर्लङि रूपं । उशधक् । वश कांतौ । पृषोदरादित्वाद्रूपसिद्धिः । आविः स्वरादिषु नोदात्तत्वेन पठितत्वादंतोदात्तः । धेनाः । धेट् पाने । धेट इ

देति नप्रत्ययः । एकारश्चांतादेशः । गुणः । धयंति तामिति धेना वा कृधेना गानीत्यत्र प्रत्ययस्वरेणांतोदात्तः । अत्र व्यत्ययेनाद्युदात्तत्वं । प्राकृ

ऋ॰सं॰भा॰२ द्बलं नुनुदे विवाचो ऽथाभवद्दमिताभिक्रतूनां ॥ ॥ हे इंद्रः ओषधीः पक्वफलं संभक्षणाय गुल्म्यादिका असनोत् प्राणिनामुपभोगार्थं प्रादात्। त
थाहानि दिवसांश्च आसुः परि कृत्स्नमर्थं प्राप्यछत्। किंच वनस्पतीन् यज्ञार्थं खदिरपलाशादिलक्षणान् वृक्षान् असनोत्। तथा अंतरिक्षं संचरार्थं प्रादा
त्। तथा बलं संव्रियते नेनोत्सादनमिति बलो मेघः। तं मेघं बिभेद उदकप्रेरणार्थं अभिदत्। विवाचो विरुद्धवाचः प्रतिकूलान् असुरान् नुनुदे प्राणिनां
रक्षार्थं तान् बबाध। अथानंतरमभिक्रतूनां क्रतुः कर्म अभि आभिमुख्येन युद्धार्थं कर्म येषां ते अभिक्रतवो बलीयांसः शत्रवस्तेषामपि दमिता उपश
मयिता अभवत् एवं हितकरणाहितपरिहाराभ्यां सर्वाः प्रजाः पालयतीत्यभिप्रायः। असनोत्। षणु दाने इत्यस्य लङि रूपं वनस्पतीन् पारस्करप्रभृ
तित्वात् सुडागमः। वनशब्दः अषिषयस्येत्याद्युदात्तः। पतिशब्दः प्रत्ययस्वरेणाद्युदात्तः उभे वनस्पत्यादिषु युगपदित्युभयपदप्रकृतिस्वरत्वं। बि
भेद भिदिर् विदारणे इत्यस्य लिटि रूपं। लित्स्वरः। नुनुदे। णुद प्रेरणे इत्यस्य लिटि रूपं वाक्यभेदादनिघातः। प्रत्ययस्वरः। दमिता। दमु उपशमे इ
त्यस्य तृचि रूपं। चित्स्वरः। अभिक्रतूनां बहुव्रीहौ पूर्वपदस्वरः ॥ ॥ अथैकादशी ॥ ॥ शुनं हुवेमेति ॥ ॥ एषा ऋक् पूर्वमेव व्याख्याता ॥ ॥ इति तृ
तीयस्य द्वितीये षोडशो वर्गः ॥ ॥ तिष्ठा हरी इत्येकादशर्चं षष्ठं सूक्तं वैश्वामित्रं त्रैष्टुभमैंद्रं तिष्ठाहरी इत्यनुक्रमणिका ॥ अग्निष्टुति मरुत्वतीयशस्त्रे नि रा
विधानं सूक्तं। सूत्रितं च। तिष्ठाहरी या आ न एतु माध्यंदिने सवन इति इंद्राग्न्योः कुलायनाम्न्येकाहे एतन्मरुत्वतीयनिविद्धानं। सूत्रितं च। तिष्ठाहरी ७१
तमु ष्टुहीति माध्यंदिन इति समूढे दशरात्रे तृतीयेऽह्नि द्वोमे मरुत्वतीयशस्त्र एतत्सूक्तं। सूत्रितं च। तिष्ठाहरी प्रमंदिने इमा उ त्वेति मरुत्वतीयमिति। अति
रात्रे तृतीयपर्याये होतुः शस्त्रे परिहिते सूक्त्या द्यः। तिष्ठाहरी येषा इत्याज्या। सूत्रितं च। विश्वजित्तिष्ठाहरी रथ आ युज्यमाने ति याज्येति ॥ ॥ अस्मि

न्सूक्ते प्रथमा ॥ ॥ तिष्ठा हरी रथ आ युज्यमाना याहि वायुर्न नियुतो नो अच्छ। पिबास्यंधो अभिसृष्टो अस्मे इंद्र स्वाहा ररिमा ते मदाय ॥ ॥ विश्वा
मित्रस्तौति। हे इंद्र रथे स्यंदने युज्यमानौ संयुज्यमानौ हरी अश्वौ अभिलषकं चिरकालमातिष्ठत। तत्र दृष्टांतः। वायुर्नेति। यथा वायू रथे नियुज्यमा
नान्नियुतो वडवा अभिलष्यकं चिरकालं तिष्ठंति तद्वत्। अथ अथानंतरं त्वं नोऽस्मानच्छ अभिलक्ष्य याहि शीघ्रमागच्छ। आगत्य च अस्मे अस्माभिर
भिसृष्टो ऽनुज्ञातस्त्वं अंधः सोमलक्षणमन्नं पिबासि पिब। स्वाहा दत्तत्वार्थं सोमः वर्तते तेन त्वमदाय हर्षाय स्वाहाकृतमिमं सोमं ररिम दद्मः। अत्र यो
हि वायुर्न नियुतो नो अच्छेत्यत्र रथे गां याहीत्यर्थः। आपच्छील्यविप्यस्तूयेत्नि नगाव इत्येतन्न रथेति पदकाले नोच्यते तिष्ठ इत्यस्याने लोटि रूपं। तिष्ठा
द्वेशस्याद्युदात्तः। याहि। याते लोटि रूपं। हेर्ङित्वादंतोदात्तः। वायुवागतिगंधनयोरित्यस्मात्। कृवापाजि इत्यादिना उण्। आतो युक्। प्रत्ययः स्वरः।
पिबासि। पाते लेट्याडागमः। आगमस्यानुदात्तत्वाद्धातुस्वरः। अंधः। अद भक्षणे। अदेर्नुम् धश्चेति असुन्। नुमागमो धकारश्चांतादेशः। अघ
ते शालीभिः कृतास्वयमद्वीति। तथा च श्रुतिः। अद्यते त्ति च भूतानि तस्मादन्नं तदुच्यत इति। नित्स्वरः। अस्मे सुपां सुलुगिति तृतीयायाः शे इत्यादेशः।
ररिम। राते लिटि रूपं। वाक्यभेदादनिघातः। प्रत्ययस्वरः ॥ ॥ अथ द्वितीया ॥ ॥ उपाजिरा पुरुहूताय सप्ती हरी रथस्य धूर्ष्वा युनज्मि ॥ द्रवद्यथा संभृ
तं विश्वतश्चिदुपेमं यज्ञमा वहात इंद्रं ॥ ॥ हे इंद्र पुरुहूताय पुरुभिर्बहुभिर्यजमानैर्यज्ञार्थमाहूताय तुभ्यं अजिरा शीघ्रगमनशीलौ सप्ती सर्पण
शीलौ हरी हरिनामकावश्वौ रथस्य धूर्षु युगप्रांतेषु उपायुनज्मि अहं तथा योजयामि। द्रवत् सरथो यथा गच्छेत् तथेति शेषः। विश्वतश्चित् सर्वतः संभृतं अ
भियुज्याभिसवितारस्ते मेरित्यादियज्ञसंभारैः संपूर्णमिमं यज्ञं प्रति इंद्रं त्वामुपावहतः। तावश्वौ सम्यग्वहतां। धूर्षु। धूर्धो हिंसार्थः। क्विप्। रात्लोपः।

इति वकारलोपः। वीरुपधाया इति दीर्घः। साचेकाच इति विभक्तेरुदात्तता॥ युनज्मि युजिर् योगे रुधादिः। लटि रूपं॥ ॥ अथ तृतीया॥ ॥ उपो नयस्व वृ
ऋ.सं.भा.२ षणा तपुष्पोतेमवत्वं वृषभ स्वधावः। ग्रसेतामश्वा वि मुचेह शोणा दिवेदिवे सदृशीरद्धि धानाः॥ ॥ वृषभ कामानां वर्षक स्वधावः अन्नवन् हे इंद्र वृष
णा सेचनसमर्थौ अपुष्यातापकेभ्यः। शत्रुभ्यो रक्षकावश्वौ उपो नयस्व अस्मत्समीपं प्रापय। उतापि च त्वं इमं यजमानं अवपालय शोणा शोणव
र्णौ तावश्वौ इह अस्मिन् देवयजने विमुच विमुंच। विमुक्तौ तावश्वौ ग्रसेतां। ग्रसु अदन इत्यस्य लोट्यातामिति रूपं। विग्रसं भक्षयतां। त्वं तु सदृशीरेक
रूपान् धानाः सृष्टयवान् दिवेदिवे प्रतिदिवसं अधि भक्षय। अनयस्व। नयते र्लोटि रूपं। तपुष्या परेक्षणे। अतोनुपसर्गकः। सुपां सुलुगिति डादेशः। इसु
सोः सामर्थ्य इति संहितायां विसर्जनीयस्य षत्वं। ऋदुत्तरपदप्रकृतिस्वरः। अव। अवते र्लोटि रूपं। स्वधावः। मतुवसोरिति नकारस्य रुत्वं। निघा
तः। ग्रसेतां। ग्रसु अदन इत्यस्य लोट्यातामिति रूपं। पादादित्वादनिघातः। आतो मोल सार्वधातुकस्वरे धातुस्वरः। मुंच मुंचतेः। आगमानुशास
नस्यानित्यत्वात् नुमभावः। सदृशीः। समानशब्दे उपपदे दृशिर् प्रेक्षणे इत्यस्मात् समानान्ययोश्चेति कञ् प्रत्ययः। समानस्य दृग्दृशवतुष्विति आ
वः। टिड्ढाणञ् इत्यादिना ङीप्। तस्य पित्वादनुदात्तत्वे धातुस्वरः। अद्धि। अद भक्षण इत्यस्य लोटि अदादित्वाच्छपो लुक्। हुझल्भ्यो हेर्धिरिति धादे
शः। निघातः। धानाः। धा धारणपोषणयोः। धाञस्तिभ्यो न इति प्रत्ययः। प्रत्ययस्वरः॥ चातुर्थिके हनि माध्यंदिने सवने ब्राह्मणाछंसिशस्त्रे ब्रह्मणात ८२
इत्यारंभणीया। सूत्रितं च। ब्रह्मणा ते ब्रह्मयुजा युनज्मि। उरुं नो लोकमनुनेषि विद्वानिति॥ ॥ सैषा सूक्ते चतुर्थी॥ ॥ ब्रह्मणा ते ब्रह्मयुजा युन
ज्मि हरी सखाया सधमाद आशू। स्थिरं रथं सुखमिंद्राधितिष्ठन् प्रजानन्विद्वाँ उप याहि सोमं॥ ॥ हे इंद्र ब्रह्मयुजा ब्रह्मणा मंत्रेण योक्तव्यौ

याकृत्यारमयतस्तोतारः। सत्रासाहं सहतो शत्रूनभिभवितारं। अत एव वरेण्यं सर्वैर्वरणीयं सहोदां बलस्यार्थिनां च स्वपदं देवशीला अपः स्वश्च
लोकं च ससवांसं भजमानं इंद्रं अनु मदंति हृष्यंति। हर्षमनु स्वयं हृष्यंतीत्यर्थः। य इंद्रः पृथिवीं उतापि च द्यां द्युलोकं इमामिमं अंतरिक्षलोकं चेता
स्त्रीन्लोकान् ससान। तांल्लोकानस्मभ्यं ददौ। तमनु दन्नेत्यन्वयः। सत्रासाहं। षह मर्षणे। छंदसि सह इति ण्विः। णित्वादुपधावृद्धिः। ससवांसं
षण संभक्तौ इत्यस्य क्वसौ इडभावेन कारलोपे रूपं प्रत्ययं प्रत्ययस्वरः। ससान। षणु दान इत्यस्य लिटि रूपं। निस्वरः। मदंति। मदि स्तुत्यादिषि
त्यस्य वेत्ययेन परस्मैपदं। निघातः। धीरणासः। रणतीति रणा वाक् धिया स्तुत्या रणा येषां ते धीरणाः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरः॥ ॥ अथ न
वमी॥ ॥ ससानात्यां उत सूर्यं ससानेंद्रः ससान पुरुभोजसं गां। हिरण्ययमुत भोगं ससान हत्वी दस्यून्प्रार्यं वर्णमावत्॥ ॥ पूर्वमंत्रे प्रतिपा
दितः स इंद्रः अत्यान् अश्वान् ससान युद्धार्थं मरुद्भ्यो ददौ। उतापि च सूर्यं जगत्प्रकाशं आदित्यं ससान। प्राणिनां व्यवहार निर्वाहयते भ्यो ददौ। त
था पुरुभोजसं पुरुभिः सर्वैः जनैः क्षीरादिद्वारेण उपभुज्यत पुरुभोजाः। क्षीरादिरूपं बहुविधान्नोपेतां गामग्निहोत्रादिसिद्ध्यर्थं ससान तेभ्यो
ददौ। हिरण्ययं सुवर्णमयं भोगं धनं भुज्यते स्मिन्निति भोगो गृहं वा ससान। अर्थिभ्यो ददौ। ततो दस्यून् बाधकानसुरान् हत्वी हत्वा आर्यमुत्तमं व
र्णं त्रैवर्णिकं प्रावत्। यथा कर्मविघ्नो न भवेत् तथा पालयत् ससानः। षणु दाने इत्यस्य लिटि णलि रूपं। निस्वरः। हिरण्ययं हिरण्यशब्दाद्विकारा
र्थे मयट् तयोरिति विहितस्य छंदसि विषये ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्ययानि छंदसीति निपातनान्मयटो मकारलोपः। प्रत्ययस्वरः। हत्वी। हंतेर्जः क्त्वा
स्नात्व्यादयश्चेति निपातितः। प्रत्ययस्वरः। आवत्। अवतेर्लङि रूपं॥ ॥ अथ दशमी॥ ॥ इंद्र ओषधीरसनोदहानि वनस्पतीरसनोदंतरिक्षं॥ बिभे

पाहि। पा पान इत्यस्य लोटि रूपं। वङ्कुत्वं दसीति शापो लुक्। निघातः। निषद्य। सदेर्ल्यपि सदिरप्रतेरिति षत्वं। लित्स्वरः। दधिष्व। दधातेर्लोटि
छंदस्युभयथेति थास आर्धधातुकत्वादिडागमः। प्रत्ययस्वरः। इंदुं। उंदी क्लेदने। उंदेरबादेरित्युप्रत्ययः। धातोरुदः इकारादेशः। निदि
त्यनुवृत्तेराद्युदात्तः॥ ॥अथ सप्तमी॥ ॥स्तीर्णं ते बर्हिः सुत इंद्र सोमः कृता धाना अत्तवे ते हरिभ्यां॥ तदोकसे पुरुशाकाय वृष्णे मरुत्वते
तुभ्यं राता हवींषि॥ ॥हे इंद्र ते तव उपवेशनार्थं बर्हिः स्तीर्णं विस्तृतं तथा सोमश्च त्वदर्थमभिषुतः। तव हरिभ्यामत्तवे भक्षणार्थं धाना
भृष्टयवाः कृताः। तदोकसे तत् हरिरोको निलयो यस्य तस्मै पुरुशाकाय बहुभिः शक्त्याय यद्वा बहुसहायाय वृष्णे कामानां वर्षित्रे मरुत्व
ते मरुतो देवविशस्तद्वते एवंभूताय तुभ्यं हवींषि सोमादीनि रातानि अस्माभिर्दत्तानि निसेवस्वेति भावः। स्तीर्णं। स्तृञ् आच्छादन
इत्यस्य क्ते इ धातो रितीत्वं रदाभ्यामिति निष्ठानत्वं। प्रत्ययस्वरः। अत्तवे। अद भक्षण इत्यस्मात्तुमर्थे तवेन् प्रत्ययः। नित्स्वरः। तदोकसे।
बहुव्रीहौ पूर्वपदस्वरः। पुरुशाकाय। शाकिर्वाचीति अस्मात्कर्मणि घञ्। चजोः कुघिण्ण्यतोरिति कुत्वं। कृदुत्तरपदस्वरः। मरुत्वते। असो
मन्त्वर्थे इति भसंज्ञायां तकारस्य जश्त्वाभावः। प्रकृत्ययस्य पित्वादनुदात्तत्वे प्रातिपदिकस्वरः। राता। रा दान इत्यस्मात्कर्मणि क्तः। प्रत्यय
स्वरः॥ ॥अथाष्टमी॥ ॥इमं नरः पर्वतास्तुभ्यमापः समिंद्र गोभिर्मधुमंतमक्रन्॥ तस्यागत्या सुमना ऋष्व पाहि प्रजानन्विद्वान्पथ्या
अनु स्वाः॥ ॥हे इंद्र नरः कर्मणां नेतारो ध्वर्यादयः। पर्वता ग्रावाणः आपश्च एते सर्वे संभूय तुभ्यं त्वदर्थं इमं सोमं गोभिः पयोभिर्मधुमंतं माधु
र्योपेतं समक्रन् सम्यगकार्षुः। ऋष्व दर्शनीय हे इंद्र सुमनाः शोभनमनस्कः विद्वान् कर्माभिज्ञः पथ्याः वैदिके कर्मणि साधुभूताः स्तुतीरनु

प्रजानन् त्वं अस्य पाहि इममभिषुतं सोमं पिब। अक्रन्। करोतेर्लुङि रूपं। निघातः। आगत्य। आगमेर्ल्यपि रूपं। लित्स्वरः। पाहि। पातेर्लोटि रूपं॥
॥अथ नवमी॥ ॥यां आभजो मरुत इंद्र सोमे ये त्वामवर्धन्नभवन्गणस्ते॥ तेभिरेतं सजोषा वावशानो ऽग्नेः पिब जिह्वया सोममिंद्र॥ ॥हे
इंद्र या मरुतः सोमे सोमपाने विषये आभजः। समभावयः। ये वा मरुतः त्वामवर्धन् प्रोत्साहोत्पादनेनावर्धयन्। ये च मरुतस्तव गणा
भवन् सहयोऽभूवन्नित्यर्थः। हे इंद्र एवंविधैस्तैर्मरुद्भिः सजोषाः। संगतः सन् एतमभिषुतं वावशानः कामयमानस्त्वमग्नेर्बाहु
येधिकरणभूतस्याहवनीयस्य ज्वालरूपया जिह्वया इमं पिब। आभजः। भज सेवायामित्यस्य लङि रूपं। यद्वृत्तयोगादनिघातः। अवर्धन्।
वृधु वर्धने इत्यस्य ण्यंतस्य लङि रूपं। छंदस्युभयथेति तेरार्धधातुकत्वाण्णेरनिटीति णिलोपः। अत्रापि यद्योगादनिघातः॥ ॥अथ द
शमी॥ ॥इंद्र पिब स्वधया चित्सुतस्याग्नेर्वा पाहि जिह्वया यजत्र॥ अध्वर्योर्वा प्रयतं शक्र हस्ताद्धोतुर्वा यज्ञं हविषो जुषस्व॥ ॥हे इंद्र स्व
धया स्वमात्मानं बध्नातीति स्वपोषवतीति स्वधा। बलं तेन बलादपहृत्य सतस्य सुतमभिषुतं इंद्र तवापि त्वं यजत्र यष्टव्य अग्ने ज्वालारूपया जि
ह्वया ज्वा हुतं सोमं पाहि पिब। हे शक्र समर्थ अध्वर्योर्हस्तात् प्रयतं दातुमुपक्रांतं सोमं पिब। अथवा होतुर्यज्ञं यजनीयं वषट्कारोपेतं ह
विर्भागं जुषस्व सेवस्व। सर्वथापि त्वमत्रागत्यास्माभिर्दीयमानं सोमं पिबेति भावः। पिब। आमंत्रितस्याविद्यमानत्वेन पादादित्वादनिघातः।
अध्वर्योः। अध्वरं कामयतीति क्यच्। कव्यध्वरेति अकारलोपः। प्रत्ययःस्वरः। ततएकादेशस्वरः। प्रयतं। यम उपरम इत्यस्य कर्मणि निष्ठा। शक्र।
शक्लृ शक्तौ। स्फायितंचीत्यादिना रक्। असिहसीत्यादिना तन्। नित्स्वरः। होतुः। जुहोतेस्ताच्छीलिकस्तृन्। नित्स्वरः। जुषस्व। जुषी

प्रीतिसेवनयोरित्यस्य लोटि रूपं। निघातः॥ ११॥ अथैकादशी॥ शुनं हुवेमेति॥ एषा ऋक् व्याख्याता॥ ॥ इति तृतीयस्य द्वितीये ऽष्टादशो वर्गः॥
त॰सं॰भा॰२ ॥ इमामू ष्वेकादशर्चं सप्तमं सूक्तं त्रैष्टुभमैंद्रं। अत्रानुक्रमणिका। इमामू षु पंचोना घोरोप श्यत्सान्निर्वहन्नुस्थमानस्ति इत्यनं इति। दशम्या आ
गिरसो घोर ऋषिः शिष्टानां विश्वामित्रः। अग्निष्टोमे माध्यंदिनसवने अच्छावाकशस्त्रे दशमीवर्जितं इमामू ष्विति सूक्तं। सूत्रितं च। इमामू ष्वित्य
नमो न्नरो मुत्थारत्सर्वत्रेति। पृष्ठ्याभिप्लवषडहयोर्मध्यंदिनसवने अच्छावाकशस्त्रे चातुर्विंशतिकातिदिष्टस्याहीनसूक्तस्य स्थाने त्रीणि स
पातसूक्तानि तत्रापो तमावजीमतत्प्रथमं सूक्तं। सूत्रितं च। इमामू ष्विच्छं तिल्वेति॥ ॥ तस्मिन् सूक्ते प्रथमा॥ ॥ इमामू षु प्रभृतिं सातये धाः श
श्वच्छश्वदूतिभिर्यादमानः॥ सुते सुते वावृधे वर्धनेभिर्यः कर्मभिर्महद्भिः सुश्रुतो भूत्॥ ॥ विश्वामित्र इंद्रं स्तौति। हे इंद्र ऊतिभिरवतिरक्ष
तिसर्वमिति ऊतयो मरुतः ते शश्वत्सर्वदा यादमानः संगतिं याचमानस्त्वं प्रभृतिं प्रकर्षेण भ्रियते धार्यते यज्ञार्थमिति प्रभृतिः सोमस्तुति
र्वा इमामिमं सोमं इमां स्तुतिं वा सातये अस्माकं भक्ता भाधं सुधाः सुष्ठु संपादय। तथ इंद्रः सुते सोमे अभिषुते सति वर्धनकारिभिः सोमाज्यादि
भिर्हविर्भिर्वावृधे वर्धते। य इंद्रो महद्भिः कर्मभिः असुरवधवृत्रभेदनादिलक्षणैर्व्यापारैः स श्रुतो लोके प्रसिद्धो भूत्। स इंद्र इति पूर्वेणान्व राम
यः। प्रभृतिं तो दोष्यत्रिति कृत्यनावितिगते प्रकृतिस्वरत्वं। धाः दधातेश्छांदसे लुङि रूपं। निघातः। शश्वच्छश्वत्। नित्यवीप्सयोरिति द्विर्वचनं। ८४
यादमानः यद्र पा ऋयायां। शानचि रूपं। चकारस्य दकारश्छांदसः। वावृधे। वृधु वर्धन इत्यस्मात् कर्मणि क्तः। गतिरनंतर इति गतिस्वरः। भूतभवने
लङि रूपं॥ ॥ माध्यंदिनसवने दधिघर्मस्य प्रतिगर एषा। इंद्राय सोमाः प्रदिवो विदाना आ पूर्णे अस्येति॥ ॥ सैषा सूक्ते द्वितीया॥ ॥ इंद्राय सो

सधमादे माद्यंति यो ऽस्मिन्नितिमादो युध सह मादः सधमादः तस्मिन्युद्धे सखायः समानप्रसिद्धी अत एवानुस्थिप्रगमनावेतौ तेन वहरी अश्वौ
अहं ब्रह्मणा युनज्मि रथे संयोजयामि स्थिरं सुदृढं सुखं सुष्ठु हावरं नाम इमं रथं अधितिष्ठ आरूढस्त्वं सोमपानार्थं आयाहि प्रजानन्नित्यागमनं। ब्र
ह्म युजां युजेरौणादिकः कर्मणि क्विप्। युनज्मि। युजेर्लटि रूपं। निघातः। सधमादे मदी हर्षे अधिकरणे घञ्। सधमादस्थयोश्छंदसीति म
हस्य सादेशः। कृदुत्तरपदप्रकृतिस्वरः। रथं। अधितिष्ठ। हस्तासां कर्मेति कर्मसंज्ञा। सुखं खनु विदारणे। अन्येभ्योपि दृश्यत इति डः कृदुत्तरस्व
रः॥ ॥ अथ पंचमी॥ ॥ पाते हरी वृषणा वीतपृष्ठा निरीरमन्यजमानासो अन्ये॥ अत्याया हि शश्वतो वयं ते अरं सुतेभिः कृणवाम सोमैः॥ ॥
हे इंद्र वृषणा कामानां सेवकौ वीतपृष्ठा कमनीयपृष्ठभागौ ते तव हरी अन्ये अस्मदर्थन्ये यजमानासो यजमानासो यजमानानां निरीरम
न्मा हर्षयंतु वयं तु सुशितेभिरभिषुतैः सोमैस्ते तव अरं पर्याप्तं कृणवाम। तथा तवतृप्तिर्भवति तथा कुर्म इत्यर्थः। त्वं तु अत्याया हि। याते
र्लोटि रूपं। गतिगताविति पूर्वस्य निघातः। कृणवाम। कृवोर्लेटि रूपं। निघातः॥ ॥ इति तृतीयस्य द्वितीये सप्तदशो वर्गः॥ ॥ तवायं सोम इ
ति माध्यंदिने सवने नेष्टुः प्रस्थितयाज्या। सूत्रितं च। तवायं सोमस्त्वमेह्यर्वाङ्ङिन्द्राय सोमाः प्रदिव इति॥ ॥ सैषा सूक्ते षष्ठी॥ ॥ तवायं सोम
स्त्वमेह्यर्वाङ् शश्वत्तमं सुमना अस्य पाहि॥ अस्मिन्यज्ञे बर्हिष्या निषद्या दधिष्वेमं जठर इंदुमिंद्र॥ ॥ हे इंद्र अयं सोमं पाहि पिब बर्हिषि
प्रस्तृते अस्मिन्यज्ञे निषद्योपविश्य इंदुं क्लेदनं शीलं इमं जठरे आदधिष्व धारय। यथा नाभेरधस्तान्न गच्छति तथा धारय। अंगिरोभिरागहि
यज्ञियेभिरित्यत्र नय ज्ञविशेषणं। बर्हिः रूपं वा न इत्यतो नो लुप्यते इति हि इ लगतो। अस्य लोटि रूपं। निघातः। शश्वत्तमं उत्तमादित्वादंतोदात्तत्वं।

ष्याद्यनिघातः। पाहि पाते र्लोटि बहुलं छंदसीति शपो लुक्। निघातः। पन्यः। पनतेः स्तुत्यर्थस्य अघ्न्यादित्वाद्यत्। यतोनाव इत्याद्युदात्तत्वं।
नवीयान्। नवशब्दादीयसुनि रूपं। नित्स्वरः॥ ॥ अथ चतुर्थी॥ ॥ महाँ अमत्रो वृजने विरप्श्युग्रं शवः पत्यते धृष्ण्वोजः। नाह विव्याच पृथि
वी चनैनं यत्सोमासो हर्यश्वममंदन्॥ ॥ योयमिंद्रो महान् अतिशयित सामर्थ्यवान् वृजने बलोपलक्षितेषु युद्धेषु शत्रूणामभिभविता अ
नत एव विरप्शी विरप्शी विरपणशीलः भुजास्फालनयुद्धार्थं शत्रूणामाह्वानकारी यद्वा विविधं रपणं स्तुतिलक्षणं यस्येति सर्वैः स्तुत्य इत्यर्थः।
तादृशस्येंद्रस्य उग्रं उद्गूर्णं शवः बलं धृष्णु धर्षणशीलं ओजः पराक्रमलक्षणं तेजः पत्यते सर्वत्र प्रसरति। एवमेतादृशमहिमा एतमिंद्रं पृथिवी
विस्तीर्णा भूमिः न विव्याच न व्याप्नोति अहशब्द एवार्थो वा नेति द्यौरपि न व्याप्नोतीत्यर्थः। यद्यदा सोमासः स्वाहाकृताः सोमा हर्यश्वमिंद्रं ममंदन्।
अमादयन् तथा तमेनं द्यावापृथिव्यौ व्याप्तुं न शक्नुत इत्यर्थः। अमंत्रः। अम गत्यादिषु। अभिनक्षियजीत्यादिनात्रन्प्रत्ययः। विरप्शी रप
लपव्यक्तायां वाचि। श्रोणादिकश्च प्रत्ययः। विविधं रपंतीति विरप्शाः स्तोतारः तेहस्य संतीति अतइनिः। यद्वा विविधं रपणं विरप्शं तदस्यास्ती
ति व्यत्ययस्वरः। पत्यते व्यत्ययेन यक् कर्तरि। निघातः। धृष्णु ञिधृषा प्रागल्भ्ये। त्रसिगृधिधृषिक्षिपेः क्नुः प्रत्ययः। रषाभ्यामिति णत्वं। प्रत्ययस्व
रः। विव्याच। व्यचेर्लिटि णलि लिट्यभ्यासस्योभयेषामित्यभ्यासस्य संप्रसारणं। निघातः। चनेति निपातसमुदायः चार्थे वर्तते। एवमादित्वादं
तोदात्तः। अमदन्। मदि स्तुत्यादिष्वित्यस्य लङि रूपं। यद्योगादनिघातः॥ ॥ अथ पंचमी॥ ॥ महाँ उग्रो वावृधे वीर्याय समाचक्रे वृषभः काव्येन।
इंद्रो भगो वाजदा अस्य गावः प्रजायंते दक्षिणा अस्य पूर्वीः॥ ॥ महान् युद्धकर्मणि बलवान् उग्रः शत्रूणां भयंकरः इंद्रो वीर्याय वीर्यकरणा

य वावृधे वर्धते। वृषभः फलस्याभिवर्षकः। भगः सर्वैर्भजनीयः स इंद्रः काव्येन कवयः स्तोतारः तत्कर्म स्तोत्रं तेन स्तोत्रेण समाचक्रे संगच्छते। वा
जदाः अस्येंद्रस्य गावः वाजदाः क्षीरादिलक्षणान्नप्रदानाः प्रजायंते। तथास्य पूर्वीर्बह्व्यो गावो दक्षिणाः प्रजायंते। वावृधे। वर्धतेर्लिटि रू
पं। निघातः। वीर्याय। वीर्ये भवं वीर्यं। भवे छंदसीति यत्। वीरवीर्यौ चेत्यत्र यतोनाव इत्यस्य नित्यत्वस्य ज्ञापितत्वात्स्वरितः। समाचक्रे। करोते
र्लिटि रूपं। गतिर्गताविति पूर्वपदस्य गतेर्निघातः। काव्येन। कवेः। कर्म काव्यं। ब्राह्मणादित्वात्ष्यञ्। ञित्वादुपधावृद्धिः। ञित्स्वरः। वाजदाः। दद
तेरातोनुपसर्गे कः। जायंते। जनी प्रादुर्भावे इत्यस्य लटि रूपं। दक्षिणाः। दक्ष वृद्धावित्यस्मात् द्रुदक्षिभ्यामिननिति इनन्प्रत्ययः। नित्वादा
द्युदात्तः॥ ॥ इति तृतीयस्य द्वितीये एकोनविंशो वर्गः॥ ॥ अथ तस्मिन्सूक्ते षष्ठी॥ ॥ प्र यत्सिंधवः प्रसवं यथायन्नापः समुद्रं रथ्येव जग्मुः। अ
तश्चिदिंद्रः सदसो वरीयान् यदीं सोमः पृणति दुग्धो अंशुः॥ ॥ सिंधवो नद्यः यथा प्रसवं प्रकर्षेण सूयत इति प्रसवः कामतमनुकृत्य यद्यदा
आयन्। प्रकृष्टमतिभरं समुद्रं गच्छंति। तदा आपो महांतं समुद्रं रथ्येव रथिन इव जग्मुः प्राणनार्थं गच्छंति। तद्वत्। अतश्चित्। अस्मादत्यंत
रिक्तात्। असाविंद्रो वरीयान् उरुतरः खलु यदीयमेनमिंद्रं दुग्धः ग्रावभिः सुतः — — लतारूपोंऽशुः सोमः पृणाति प्रीणयति। यथा आपो नद्यो जल
योसिंचजलानि महांतमर्णवं प्रीणयंति। तद्वदल्पतरोंशुभूतः सोमो वरीयांसमिंद्रं प्रीणयति। प्रसवः। कर्मण्यप्। थाथादिस्वरः। आयन्। अ
यतेर्लङि रूपं। यद्योगादनिघातः। रथ्येव। रथस्येमे रथ्याः। रथाद्यदिति यत्। सुपांसुलुगिति सुपो डादेशः। नित्स्वरितः। इवेन विभक्त्यलोपः पूर्वपद
प्रकृतिस्वरः। जग्मुः। गमेर्लिटि गमहनेत्यादिनोपधालोपः। निघातः। वरीयान्। उरुशब्दादीयसुनि प्रियस्थिरेत्यादिना वरादेशः। नित्वादाद्युदात्तः॥

ऋ·सं·भा·२ घ्नानि । शीलशीलानां । तुह्यादिः यद्योगादनिघातः । दुग्धः । दुहेक्तः । एको चइतीह प्रतिषेधः । दादेर्धातोर्घ इति हकारस्य घत्वं । झषस्तथोर्धोधः । प्रत्य
यस्वरः ॥ ॥ अथ सप्तमी ॥ ॥ समुद्रेणासिंधवो यादमाना इंद्राय सोमं सुषुतं भरंतः । अंशुं दुहंति हस्तिनो भरित्रैर्मध्वः पुनंति धारया पवि
त्रैः ॥ ॥ समुद्रेण सहिता नद्यादिरूपेणापोभिद्रवंत्यनेनेति समुद्रः । तेन यादमानाः । तेन साहाय्यं संगतिं मानाः सिंधवो नद्यो यथा नं पूरयंति तत्
द्वत् । हस्तिनो हस्तवंतो ध्वर्यादयः इंद्राय तुभ्यं सुषुतं सुष्ठु अभिषुतं सोमं आश्वतः दुरोऽश्वि गतिवृध्योः अस्मात् संधेहमित्यादिना अतिप्रत्य
त्ययोत्त्वे न निपातनत्वादिष्टरूपसिद्धिः ॥

राम
८६

माः प्रदिवो विदाना ऋभुर्येभिर्वृषपर्वा विहायाः । प्रयम्यमानान् प्रति षू गृभायेंद्र पिब वृषधूतस्य वृष्णः ॥ ॥ हे इंद्र इंद्राय तुभ्यं सोमाः प्रदिवः प्रग
तेषु पूर्वेष्वहस्सु विदानाः अस्माभिर्लभिताः वर्षं वीर्पाणाः फलस्य वर्षकाः पर्वाणि कालान्नयवावृषाद्यायस्य सतथोक्तः । कामात्मकामात्म
काइत्यर्थः । अतएवविहायाः विजहात्युत्सृजत्यर्थानर्थिभ्य इति वाधि । हाम्महान् तादृश इंद्रः येर्दत्तैः सोमैर्ऋभुर्दीप्तोवर्तते । हे इंद्र त्वं प्रय
म्यमानान् प्रक्षेपेण मंत्रैरुच्यमानानिमान् सोमान् सुषु प्रतिगृभाय प्रतिगृहाण गृहीत्वा च वृषधूतस्य वृषभिर्नेतृभिरभिषुतस्य वृष्णः स्वर्गादि
फलवर्षकमिमं सोमं पिब । प्रदिवः । दिवु क्रीडादौ । क्विप् । कालाध्वनोरत्यंतसंयोग इति द्वितीया । दिव्शब्दो दिवसवाची । कृदुत्तरपदस्वरः । विदा
नाः । विदुलाभ इत्यस्य व्यत्ययेन शानच् । बहुलं छंदसीति विकरणस्य लुक् । विहायाः । ओहाक् त्यागे । वहिहाधाञ्भ्यश्छंदसीत्यसुन् । णित्वनुव
र्तते । आतो युक् चिण्कृतोरिति युगागमः । गतिकारकयोरिति पूर्वपदप्रकृतिस्वरत्वं । गृभाय । ग्रह उपादाने इत्यस्य लोटि हौ श्नाप्रत्ययस्य छंदसि शा
यजपीति शायजादेशः । हृग्रहोर्भ इति भत्वं । अतो हेरिति हेर्लुक् । निघातश्च । माध्यंदिने सवने अच्छावाकशस्त्रयाज्या पिबावर्धस्वेत्येषा । सूत्रितं च । पि
बावर्धस्व तव घा सुतास इति याज्येति ॥ ॥ सैषा सूक्ते तृतीया ॥ ॥ पिबा वर्धस्व तव घा सुतास इंद्र सोमासः प्रथमा उतेमे ॥ यथा पिबः पूर्व्याँ इं
द्र सोमाँ एवा पाहि पन्यो अद्या नवीयान् ॥ ॥ हे इंद्र इमं सोमं पिब तेन वर्धस्व शरीरेण पुष्टो भव । त्वदर्थं प्रथमाः पुरातनाः उत अपि च इमे अभिन
वा उभयविधाः सोमाः सुतासो ग्रावभिरभिषुताः खलु हे इंद्र त्वं पूर्व्यान् पुरातनान् सोमान् यथा त्वं पिब एवमद्य अधाधुना पन्यः स्तुत्यः अत
एव नवीयान् अतिशयेनाभिनवस्त्वं इमान् अभिनवान् सोमान् पाहि पिब । पिबपाने लोटि रूपं । वर्धस्वेति ङुरत्वान्निघातः । पन्यः । अपिबः । यथायो

वात्तस्याश्चादेशाभावः। निदित्यनुषंगेराद्युदात्तत्वं। कृण्वंतु। कृवि हिंसाकरणयोः। इत्यस्य लोटि रूपं। आमंत्रितस्याविद्यमानत्वे दयानापित्वाद्
ऋ॰सं॰भा॰२ निघातः। प्रत्ययस्वरः। वाघतः। वह प्रापणे। संश्चद्वेहत्यादिना अतिप्रत्ययांतत्वेन निपातनादुपधावृद्धिः। हकारस्य घत्वं। प्रत्ययस्वरः॥ ॥अ
थ तृतीया॥ ॥नामानि ते शतक्रतो विश्वाभिर्गीर्भिरीमहे। इंद्राभिमातिषाह्ये॥ ॥शतक्रतो हे इंद्र अभिमातिषाह्ये मातिर्मानो गर्वः अभि
तो मानो येषां ते अभिमातयः शत्रवस्तेषां सहनमेव सह्यं तस्मिन्युद्धे अस्माकमुपस्थिते सति ते तव नामानि शक्रवज्रहस्तादीनि नामधेयानि
यद्वा तद्गुणलक्षितानि निबद्धानि विश्वाभिर्गीर्भिः सर्वाभिः स्तुतिलक्षणाभिर्वाग्भिरीमहे वयं याचामहे। ईकात्यादिषु। व्यत्ययेनात्मनेपदं। अ
दादित्वाच्छपो लुक्। निघातः॥ ॥अथ चतुर्थी॥ ॥पुरुष्टुतस्य धामभिः शतेन महयामसि। इंद्रस्य चर्षणीधृतः॥ ॥हे इंद्र पुरुष्टुतस्य पु
रुभिर्बहुभिः स्तोतृभिः स्तुतस्य शतेन अपरिमितसंख्याकैर्धामभिस्तेजोभिर्युक्तस्य चर्षणीधृतः चर्षणीनां मनुष्याणां कर्मानुष्ठातॄणां अ
भिमतफलसंपादनेन धारकस्येंद्रस्य यद्वा आकृषति सर्वमानेनेति चर्षणी बलं तद्धारकस्य तव हयामसि क्रमी। पुरुष्टुतस्य। ष्टुञ् स्तुतौ। क
र्मणि क्तः। थाथादिस्वरः। संहितायां सुतसोमयोः छंदसीति षत्वं। महयामसि। मह पूजायामित्यस्य लटि इदंतो मसि। निघातः। चर्षणीधृ राम
तः। कृष आकर्षणे। कृषेरादेश्च चेत्यनिप्रत्ययः। ककारस्य चकारादेशः। यद्वा कृष विलेखने। कर्षति कर्षणयो मनुष्याः। धृञ् धारणे। क्विप्। कृ ८७
दुत्तरपदस्वरः॥ ॥अथ पंचमी॥ ॥इंद्रं वृत्राय हंतवे पुरुहूतमुप ब्रुवे। भरेषु वाजसातये॥ ॥हे इंद्र वृत्राय हंतवे वृत्रनामकमसुरं हंतुं भरेषु
वाजसातये अन्नोपलक्षितधनलाभाय च पुरुहूतं पुरुभिराहूतमिंद्रं बलवंतं त्वामुपक्रमे सोमपानार्थं विशेषाभिज्ञो हमाह्वयामि। वृत्राय

क्रियाग्रहणं कर्तव्यमिति कर्मण्यमिति कर्मणः संप्रदानत्वं। हंतवे। हंतेः तुमर्थे तवेन्प्रत्ययः। नित्स्वरः। ब्रुवे। ब्रूञ् व्यक्तायां वाचीत्यस्य लटि उ
त्तमइति रूपं। निघातः। वाजसातये। सननं सातिः वाजस्य सातिर्वाजसातिः दासीभारादित्वात्पूर्वपदप्रकृतिस्वरः॥ ॥इति तृतीयस्य द्विती
येएकविंशो वर्गः॥ ॥अथ तस्मिन्नेव सूक्ते षष्ठी॥ ॥वाजेषु सासहिर्भव त्वामीमहे शतक्रतो। इंद्र वृत्राय हंतवे॥ ॥शतक्रतो हे इंद्र वाजेषु
सासहिः शत्रूणामभिभविता भव। वृत्रान् हंतुं वृत्रहंतुं त्वामीमहे प्रार्थयामहे। सासहिः। सहिवहिचलिपतिभ्यो यङंतेभ्यः किकिनौ व
क्तव्याविति किप्रत्ययः। तस्य स्वरः। वृत्राय कर्मणः संप्रदानं। हंतवे तुमर्थे तवेन्प्रत्ययः॥ ॥अथ सप्तमी॥ ॥द्युम्नेषु पृतनाज्ये पृत्सुतूर्षु
श्रवःसु च। इंद्र साक्ष्वाभिमातिषु॥ ॥द्युम्नेषु द्योतमानेषु अभिमानितया ये सपत्नीः पृतनाज्ये पृतनानां आजनं गमनं यस्मिन्निति पृतना
ज्यं संग्रामः। तस्मिन्संग्रामे च पृत्सुतूर्षु तरणशीलेषु शूरेषु श्रवःसु वकेषु च ये अभिमानिनः सपत्नाः सनितान्साक्ष्वाभिभव तथा अभि
मानिषु सर्वतो गर्वयुक्तेषु शत्रुषु पुरुषेषु। पेसंपन्नाः तांश्चाभिभव पृतनाज्ये अज गतिक्षेपणयोः इत्यस्य ल्यंतस्य अचो यत्। पृतनानां आ
ज्य एकादेशस्वरः। पृत्सुतूर्षु पृतनाशब्दस्य सोपरंतः मांसपृत्स्नूनां उपसंख्यानमिति पदादेशः। त्वरा संभ्रमे ताच्छीलिके क्विप्। ज्वरत्वरेत्या
दिना ऊठ्। तत्पुरुषे कृति बहुलमिति पूर्वपदस्य सप्तम्या अलुक्। ढत्वकत्वादीर्घश्छांदसः। चातुर्थिके हनि माध्यंदिने सवने ब्राह्मणाच्छंसि
शस्त्रे शुष्मिंतमं न ऊतय इति तृचो नैकल्पिको नुरूपः। सूत्रितं। शुष्मिंतमं न ऊतये आयं तद्वस्सूर्यमिति॥ ॥सैषा सूक्ते अष्टमी॥ ॥शु
ष्मिंतमं न ऊतये द्युम्निनं पाहि जागृविं। इंद्र सोमं शतक्रतो॥ ॥शतक्रतो हे इंद्र शुष्मिंतमं बलवतां मध्ये अतिशयेन बलवंतं द्युम्निनं दीप्ति

तृ॰सं॰भा॰२ वलं यद्वा शुष्मिंतमं शत्रूणां शोषकतमं द्युम्निनं आगृधिं। आगरणशीलं पीतवतः। सोमं आगृधिः स्वप्ननिवारक इति तात्पर्यं। अस्माकं संबंधिनं सो
मं अस्माकं रक्षणाय पाहि अत्रागत्य पिब। शुष्मिंतमं तमपः पित्वादनुदात्तत्वे प्रत्ययस्वरः। पाहि। पाते र्लोटि बहुलं छंदसीति शपो लुक्। निघा
तः। आगृधिः। किन्प्रत्ययांतः नित्वादाद्युदात्तः॥ ॥ अथ नवमी॥ ॥ इंद्रियाणि शतक्रतो या ते जनेषु पंचसु॥ इंद्र तानि त आ वृणे॥॥ शतक्र
तो हे इंद्र ते तव संबंधीनि पंचसु जनेषु गंधर्वाः पितरो देवा असुरा रक्षांसीत्येषु यान्यानींद्रियाणि रूपग्रहणादिसामर्थ्यानि संति तानि त्वदी
यानि तानींद्रियाणि अहमावृणे। यद्वा पंच जनेषु निषादपंचमेषु चतुर्षु जनेषु यानींद्रियाणि सामर्थ्यानि तानि त्वदीयान्यहमावृणे। इंद्रि
याणि इंद्रियमिंद्रलिंगमिंद्रदृष्टमिंद्रजुष्टमिति चेति घच्प्रत्ययांतत्वेन निपातनादंतोदात्तः। वृणे वृङ्संभक्तौ। विकरणस्य लुकि रूपं। निघातः॥॥
अथ दशमी॥॥ अगन्निंद्र श्रवो बृहद्द्युम्नं दधिष्व दुष्टरं॥ उत्ते शुष्मं तिरामसि॥ ॥ हे इंद्र वृत्रहन्यह श्रवः सोमलक्षणमन्नमस्माभिर्दीयमा
नमन्नं अगन् त्वां गच्छतु। त्वं दुष्टरं दुस्तरं शत्रुभिस्तरीतुमशक्यं द्युम्नं धनं दधिष्व अस्मभ्यं प्रयच्छ। वयं तु तत्त्वदीयं शुष्मं बलं उत्कृष्टं ति
रामसि सोमादिभिर्वर्धयामः। अगन्। गमेर्लुङि बहुलं छंदसीति शपो लुक्। हल्ङ्यादिना तिलोपः। मो नो धातोः। अडागमस्वरः। दधि
ष्व। दधाते र्लोटि छंदस्युभयथेति थास आर्धधातुकत्वादिडागमः। निघातः। दुष्टरं तरतेः कृच्छ्रार्थे खल्। सुषामादित्वात् संहितायां षत्वं। लित्स्वरः।
तिरामसि। निघातः॥॥ अथैकादशी॥॥ अर्वावतो न आ गह्यथो शक्र परावतः॥ उ लोको यस्ते अद्रिव इंद्रेह तत आ गहि॥ ॥ शक्र बलवन्॥
हे इंद्र अर्वावतः अर्वाचीनात्समीपस्थाद्देशात् अथो अपि च परावतः दूरादेशात् नोस्मानभिलक्ष्य आगहि। आगच्छ। अद्रिवः अतिभक्षयति शत्रूनि
५८

अथैकादशी॥॥ शुनं हुवेमेति॥ इति तृतीयस्य द्वितीये विंशो वर्गः॥॥ वार्त्रहत्यायेत्येकादशर्चं अष्टमं सूक्तं। एकादश अनुष्टुभः शिष्टा गा
यत्र्यः। तथा चानुक्रांतं वार्त्रहत्याय गायत्रमंत्यानुष्टुबिति। अतिरात्रे प्रथमे पर्याये ब्राह्मणाच्छंसिशस्त्रे वार्त्रहत्यायेत्युत्तमवर्जं सूक्तं शंस
नीयं। वार्त्रहत्यायेत्युत्तमाक्षरे दिति। महाव्रते गायत्रेतृचाशीतौ उत्तमावर्जमिदं सूक्तं पंचमारण्यके सूत्रितं। वार्त्रहत्याय शवसेत्युत्तमामुद्ध
रतीति॥ ॥ तस्मिन्सूक्ते प्रथमा॥॥ वार्त्रहत्याय शवसे पृतनाषाह्याय च॥ इंद्र त्वा वर्तयामसि॥॥ विश्वामित्रस्तौति। हे इंद्र वार्त्रहत्याय
वृत्रहनननिमित्ताय शवसे बलाय अपि च पृतनाषाह्याय परकीयसेनाभिभवाय त्वां आ सर्वतो वर्तयामसि। प्रवर्तयामः। वार्त्रहत्याय वृत्रघ्नः
कर्मेत्यर्थे ब्राह्मणादित्वात् ष्यञ्। हनस्तोचिण्णलोरिति तकारः। नित्वादाद्युदात्तः। पृतनाषाह्याय। षह मर्षणे इत्यस्माद्भावे शकिसहोश्चेति यत्।
संहितायां साहः पृतनर्ताभ्यां चेति षत्वं। दीर्घश्छांदसः। वर्तयामसि। वृतु वर्तने इत्यस्य ण्यंतस्य मस इदंतो मसीति मसिरादेशः। निघातः।
॥॥ अथ द्वितीया॥॥ अर्वाचीनं सु ते मन उत चक्षुः शतक्रतो॥ इंद्र कृण्वंतु वाघतः॥॥ हे शतक्रतो बहवो यस्यासौ शतक्रतुः। हे इंद्र वाघतः
वहंति यज्ञियां धुरमिति वाघतः स्तोतारः। ते तव सु अस्मदभिमतसंपादनेन शोभनं मनः अर्वाचीनं अस्मदभिमुखं कृण्वंतु। उत अपि च चक्षुः
त्वदीयं दर्शनमस्मास्वनुग्रहदृष्टिः कुर्वंतु। अर्वाचीनं। विभाषांचेरदिक्स्त्रियामिति ख प्रत्ययः। चक्षुः। चक्षेः शिच्च उसि प्रत्ययः। शित्वभा

ऋ॰सं॰भा॰२

निप्रियाणि तान्येव तदभिमर्मृशतो यं त्वम् आरभमाणाः परो वास्माल्लोकात्स्वर्गलोकं कामेव तदभिवदन्ति कवीन्पृच्छामि संदृशो सुमेधा इति पैवे
तेन ऋषयः पूर्वं प्रेतास्तैर्वै कवयस्तानेव तदभ्यतिवदतीति। तष्टेव। तक्षू त्वक्षू तनूकरणे इत्यस्य तृचि रूपं। नित्स्वरः। दीध्या। दीधीङ् दीप्तिदेव
नयोरित्यस्य अन्तर्भावितण्यर्थस्य लोटि शपो बहुलं छंदसीति लुगभावः। व्यत्ययेन परस्मैपदं। सुधुरः। आद्युदात्तं द्व्यच्छंदसीत्युत्तरपदाद्युदा
त्तं। जिहानः ओहाङ् गतावित्यस्य शानचि भृञामित्यभ्यासस्येत्वं श्लौ चेति द्वित्वे चादंतो दात्तत्वप्राप्ते अभ्यस्तानामादिरित्याद्युदात्तत्वं। मर्मृशत्। मृश आ
मर्शने इत्यस्य यङ्लुकि रुग्रिकौ च लुकीत्यभ्यासस्य रुगागमः। तदंतात् शतरि रूपं। नाभ्यस्ताच्छतुरिति नुमभावः। अभ्यस्तस्वरः। संदृशो दृशिर् प्रेक्षणे इत्य
स्मात्तुमर्थे दृशे विख्ये चेति के प्रत्ययांतत्वेन निपातनाद्युदात्तः समासे तदुत्तरपदस्वरः। सुमेधाः। नित्यमसिच् प्रजामेधयोरित्यसिच् प्रत्ययः।
चित्स्वरः॥ ॥अथ द्वितीया॥ ॥इनोत पृच्छ जनिमा कवीनां मनोधृतः सुकृतस्तक्षत द्यां॥ इमा उ ते प्रण्यो वर्धमाना मनोवाता अध नु धर्मणि ग्मन्॥
॥उतेत्यामंत्रणे। हे इंद्र कवीनां सुकृतकर्मणां देवभूयं गतानां जनिम जन्म केन कर्मणा दिवं गताः कुतो वा तेषामुत्पत्तिरिति एतमर्थं इनादीश्वरात्
गुरुत्वं पृच्छ। ते कवयो मनोधृतः संयतमनस्का अत एव सुकृताः शोभनकर्माणः सन्तो द्यां दिवं तक्षता कुर्वन्। अध अथेदानीं धर्मण्यस्मिन्नप्येतेत्व
दर्थं प्रण्यः प्रणीगमना मनोवाता मनोवेगा वर्धमाना वर्धयंत इमा अस्माभिः क्रियमाणाः स्तुतयो नु क्षिप्रं ग्मन् त्वां गच्छन्तु। गमु सर्वत्र प्रसिध्यर्थः। प
छंदसि क्षीणायो इत्यस्य लोटि बहुलं छंदसीति शपो लुक्। तस्य हेर्ध्यादिना संप्रसारणं। निघातः। प्रण्यः। णीञ् प्रापणे इत्यस्मादौणादिकः कर्मणि क्वि
प्। सर्वविधीनां छंदसी विकल्पो लुक्। ... इत्यादिना उपधालोपः। निघातः॥ ॥अथ तृतीया॥ ॥नि षीमिदत्र गुह्या दधाना उत क्षत्राय रो

दसी समंजन्॥ सं मात्राभिर्ममिरे येमुरुर्वी अंतर्मही समृते धायसे धुः॥ ॥अत्र भूर्लोके गुह्या गूढानि कर्माणि मितं सर्वत एव निदधानाः कुर्वा
णा एते कवयः क्षत्राय बलाय धनाय वा रोदसी द्यावापृथिव्यौ समंजन् ओषधीभिः पृथिवीं देवैश्च दिवं संगतामकार्षुः। किंच तेमात्राभिर्मीयंते मानी
तिवा मात्राः शीतोष्णाद्याः ताभिर्मात्राभिः संममिरे ते रोदस्यावपि पक्षयापरिच्छिन्नत्वं कुर्वाश्च समृते परस्परं संगते उर्वी विस्तीर्णे मही महत्यौ ते द्या
वापृथिव्यौ येमुः विष्टंभकेनांतरिक्षेण उदयच्छन्। तथा तयोर्द्धारणार्थमंतरिक्षं अधुः इन्द्र धारणार्थं गुह्या गुहायां भवा निभवार्थे यत्। यतोना
वदत्याद्युदात्तः। दधानाः दधातेः शानचि रूपं। अभ्यस्तस्वरः। अंजन्। अंजू व्यक्तिम्रक्षणगतिष्वित्यस्य लङि श्नसोरल्लोपः। निघातः। मात्राभिः मा
माने। माङ् माने वा। त्रन् प्रत्ययः। नित्स्वरः। ममिरे। माङ् माने इत्यस्य लिटि रूपं। आद्दिलोपे विभाषेति निघातः। येमुः। यम उपरम इत्यस्य
लिटि उसि रूपं तिङ्ङतिङ इति निघातः। धायसे। वदिहाधाञ्भ्यश्छंदसीत्यसुन्। नित्स्वरः। धुः। दधातेर्लुङि रूपं॥ ॥अथ चतुर्थी॥ ॥आतिष्ठंतं परि वि
श्वे अभूषञ्छ्रियो वसानश्चरति स्वरोचिः॥ महत्तद्वृष्णो असुरस्य नामा विश्वरूपो अमृतानि तस्थौ॥ ॥विश्वे सर्वे कवयः रथमातिष्ठंतमिंद्रं पर्य
भूषन् परितोऽलंकुर्वन् स्वरोचिः स्वयमेव रोचिर्यस्यासौ स्वरोचिः स्वप्रभयेव दीप्यमान इत्यर्थः। अत एव श्रियो दीप्तीर्वसानः। सोऽयमिंद्रश्चरति स
र्वत्र वर्तते। वृष्णः कामानां वर्षितुः असुरस्य निरस्यति प्रेरयति सर्वानिति असुरः। तस्येंद्रस्य तन्नाम इदमनु भूतपर्वनामयति सर्वानेशत्रूनिति
नामकर्म यद्वा नम्यते सर्वैर्नमस्क्रियत इति नामेंद्रस्य कर्म वा महत्प्रभूतं दाश्चर्यं एतं वर्तते तथा विश्वरूपो नानाविधरूपतो भजमानः स इंद्रो वरुणा
त्मना अमृतानि जलानि अंतरेण अधितिष्ठति विश्वेजसः। अभूषन्। भूष अलंकारे इत्यस्य लङि रूपं। वसानः। वस आच्छादने इत्यस्य शानचि रू

राम

८१

तृ॰सं॰भा॰२

पं। तस्य लसार्वधातुकस्वरे धातुस्वरः। नाम। पा मु पश्चक्ल इत्यस्मात् नामन्सामन्नित्यादिना मनिप्रत्ययांतत्वेन निपातना छुद्दाः। विश्वरूप इति तस्य
संज्ञा बहुव्रीहौ विश्वं संज्ञायामिति पूर्वपदांतोदात्तत्वं। अमृतानि। कालाध्वनोरत्यंतसंयोगे इति द्वितीया। तस्थौ। तिष्ठतेर्लिटि णलि रूपं॥३॥ अ
थ पंचमी॥ अस्तृत पूर्वो वृषभो ज्यायानिमा अस्य शुरुधः संति पूर्वीः॥ दिवो नपाता विदथस्य धीभिः क्षत्रं राजाना प्रदिवो दधाथे॥ तयोः
पूर्वः वृषभः कामानां वर्षकः पूर्वः चिरंतनः अत एव ज्यायान् इंद्राख्य वापः ससर्ज पूर्वीर्बह्वीरिमा अनेन सृष्टा आपः अस्य शुरुधः शुचः पिपा
सायाः रोधयित्र्यो भवंति। दिवो नपाता पितारौ हे राजाना मित्रावरुणौ प्रदिवः प्रकर्षेण द्योतमानस्य विविदथस्य यज्ञकारिणः स्तोतुर्धीभिः क्ष
त्रं धनं दधाथे अस्मभ्यं दातुं धारयेथे। अस्तृतः हृङ् आच्छादने गर्भविमोचनोऽस्यस्य क्तिः रूपं। अडागमस्वरः। ज्यायान् प्रत्ययस्य शः श्राद्यीयसुनि
ज्य चेति ज्यादेशः। ज्यादादीयस आदेकारादेशः। नित्वादाद्युदात्तत्वं। शुरुधः। पृषोदरादिः। नपाता। न भ्राण्नपादिति निपातना नञः प्रकृतिभावः।
आमंत्रितत्वान्निघातः। धीभिः सावेकाचस्तृतीयादिर्विभक्तेरुदात्तत्वं। राजाना। आमंत्रितत्वान्निघातः। दधाथे। दधातेर्लिटि रूपं। निघातः॥४॥ इति तृ
तीयस्य द्वितीये त्रयोविंशो वर्गः॥ अथ तस्मिन् सूक्ते षष्ठी॥ त्रीणि राजाना विदथे पुरूणि परि विश्वानि भूषथः सदांसि॥ अपश्यमत्र मनसा ज
गन्वान्व्रते गंधर्वाँ अपि वायुकेशान्॥ हे राजाना मित्रावरुणौ विदथे अस्मिन् यज्ञे विश्वानि व्याप्तानि पुरूणि यजनीयैः सोमादिभिः पूर्णानि त्रीणि स
दांसि सवनानि परि भूषथः सर्वतोऽलंकुरुथः। हे इंद्र त्वं जगत्वान् यज्ञं प्रतिगतवानसि। अपिः संभावनायां। यतो हे मनु व्रते यज्ञे वायुकेशान् षा
युवेतं करत्रमीन गंधर्वान् सोमरक्षकान् अस्तुत्वान् भ्राजादीनमन्मापश्यं तेत्र स्थाना भ्राजादयस्तैत्तिरीयाः कस्य पृष्टमभिहिताः। स्थान भ्राजं धारे हे

राम
१०

ति अद्रिर्वज्रः। महद्भ्रू हे इंद्र [illegible] लोकात् आदिहास्मिन् देवयजने देशे सोमपानार्थमागहि आगच्छ। गहि ग
मेर्लोटि रूपं परावतः उपसर्गाच्छंदसि धात्वर्थ इति वतिः। प्रत्ययस्वरः। अद्रिवः मतुवसो रु संबुद्धौ छंदसीति रुः ततः पंचम्यास्तसिल्लिति तसिल् लित्स्वरः॥
॥ इति तृतीयस्य द्वितीये द्वाविंशो वर्गः॥ ॥ अभि तष्टेवेति दशर्चं नवमं सूक्तं अत्रानुक्रमणिका। अभि तष्टेव दश प्रजापतिः सवैश्वामित्रो वाच्यो
वा द्वौ वा तौ न वै कोपीति विश्वामित्रगोत्रः प्रजापतिः वाच्यः पुत्रः प्रजापतिर्वा ऋषिः तावुभावपि समुच्चितौ वास्य सूक्तस्य ऋषी इति द्वितीयः पक्षः
अथवा नोभावपि किंतु विश्वामित्र एवेति तृतीयः पक्षः त्रिष्टुप् छंदः इंद्रो देवता चातुर्विंशिके हनि माध्यंदिने अच्छावाकशस्त्रे अभि तष्टेवेत्यहर
हः शस्यनामके सूक्ते सूत्रितं च। उदु ब्रह्माण्यभि तष्टेति तरावहरहः शस्यनामकं सूक्तं। सूत्रितं च। उदु ब्रह्माण्यभि तष्टेव नरावहरहः शस्यमे
वं सर्वत्राहर्गणेषु द्वितीयादिष्वहःसु माध्यंदिने सवने अच्छावाकशस्त्र एव सूक्तं॥ ॥ अथ तस्मिन् सूक्ते प्रथमा॥ ॥ अभि तष्टेव दीधया मनीषामत्यो
न वाजी सुधुरो जिहानः॥ अभि प्रियाणि मर्मृशत्पराणि कवींरिच्छामि संदृशे सुमेधाः॥ ॥ यजमानः स्तोतारः प्रतिब्रूते हे स्तोतारः मनीषामिंद्रवि
षयां स्तुतिं अभि दीधय सर्वतो दीप्तां कुरुत तत्र दृष्टांतः। तष्टेव यथा तष्टा तक्षणेन काष्ठं संस्करोति तद्वत् सुधुरः शोभनया धुरा युक्तो वाजी वेगवा
न् अत्यो नाश्व इव जिहानः कर्मणि प्रवर्तमानः पराण्युत्तमानि प्रियाणि इंद्रस्य प्रियतमानि उपराण्युत्तरेद्युरहःसु क्रियमाणानि कर्माणि अभिम
र्मृशत् अत्यर्थं अभिमृशात् सुमेधाः शोभनमेधावानहं कवीन् पूर्वमनुष्ठितज्ञान देव भूयमागतान् कवयः तान् संदृशे संद्रष्टुमिच्छामि इच्छा
र्थे ब्राह्मणं। अभि तष्टेव दीधया मनीषामित्यच्छावाकोहरहः शंसत्यभिवन्नस्यैरूपम भि प्रियाणि मर्मृशत्पराणीति प्रियाण्येव पराण्यहानि ता

ण्ययीं सुवर्णमयीं अमतिं कान्तिं नकिः कोऽपि परिछिनत्ति खलु यां मदीयां दीप्तिं अशिश्रेत्। य आश्रयति स सुष्टुती शोभनया स्तुत्या स्तुतः
सन् विश्वमिन्वे सर्वस्य संतर्पयित्र्यौ रोदसी द्यावापृथिव्यौ आवव्रे स्वकीयतया सर्वतो वृणुते। तत्र दृष्टांतः। अपीव योषा जनिमानि यथा योषा स्त्री
जनिमानि जनितान्यपत्यानि यथा वृणोति तद्वत्। नकिः। निपातः। हिरण्ययीं। हिरण्यस्य विकारार्थे मयधेतयोरिति मयट्। ऋत्व्यवास्त्व्यवा
स्त्वमाध्वीहिरण्ययाः निछंदसीति निपातनान्मयटो मकारलोपः। टिड्ढाणञिति ङीप्। प्रत्ययस्वरः। अमतिं। अम गत्यादिषु। अमे
रतिरित्यतिप्रत्ययः। प्रत्ययस्वरः। अशिश्रेत्। श्रयतेर्लुङि बहुलं छंदसीति शपः श्लुः। यद्वृत्तयोगादनिघातः। सुष्टुती। सुपां सुलुगिति
तृतीयायाः सवर्णदीर्घः। विश्वमिन्वे। इवि व्याप्तिप्रीणनयोरित्यस्मात्कर्मण्यण्। इदित्वान्नुम्। तत्पुरुषे कृति बहुलमिति द्वितीयाया
अलुक्। कृदुत्तरपदस्वरः। योषा यौतेर्मिश्रीभावकर्मणः। हृतवदिहनिकमिकषिभ्यः स इति सप्रत्ययः। ग्रामादित्वादाद्युदात्तः।
जनिमानि जनी प्रादुर्भावे। हृजनिभ्यामनिन्निति इमन्प्रत्ययो भूतकाले नित्वादाद्युदात्तः। वव्रे वृञ् वरणे इत्यस्य लिटि रूपं॥ ॥ अथ
नवमी॥ ९ युवं प्रत्नस्य साधथो महो यद्दैवी स्वस्तिः परि णः स्यातं। गोपाजिह्वस्य तस्थुषो विरूपा विश्वे पश्यंति मायिनः कृतानि॥ ९ हे इंद्रावरु
णौ युवं युवां प्रत्नस्य स्तोतुर्महस्तादृशं श्रेयः साधथः। साधयथः कीदृशं तदित्यत आह। यद्दैवी स्वस्तिः यदिदं देवसंबंधि श्रेयः स्यात्। अथ [illegible]णः। किं च
युवां नास्मान् परितः स्यातं रक्षकौ भवेतं। विश्वे सर्वे मायिनो देवाः गोपाजिह्वस्य गोप्त्री जिह्वा माविभीतेत्येतादृशी वाग्यस्य सततयोक्तः तस्थुषः
स्थिरतरस्येंद्रस्य तत् विरूपाणि नानाविधानि वृत्रहननादीनि कृतानि कर्माणि पश्यंति। एवमिंद्रस्य विश्वरूपत्वमुक्तं। युष्मच्छब्दस्य द्विवचने युवावौ

द्विवचने इति युवादेशः। ङेप्रथमयोरमिति सुपोमादेशः। साधथः। साध संसिद्धावित्यस्य लटि थसि रूपं। बहुलमन्यत्रापीति शपो लुक्। निघातः।
दैवी। देवाद्यञञाविति अञ्प्रत्ययः। ञित्स्वरः। स्यातं अस्तेर्लिङि रूपं। गोपाजिह्वस्य। गुपू रक्षणे इत्यस्मादायप्रत्ययांतस्य क्विपि अतो लोपयलो
पयोः कृतयो रूपं। गोपा इति बहुव्रीहौ पूर्वपदस्वरः। तस्थुषः। ष्ठा गतिनिवृत्तावित्यस्य क्वसौ वस्वेकाजाद्घसामिति प्राप्तस्येटः संप्रसारणं संप्र
सारणाश्रयं च बलीय इति संप्रसारणस्य बलीयस्त्वान्निवृत्तिः। वसोः संप्रसारणं। प्रत्ययस्वरः। पश्यंति। तिङ्ङतिङ इति निघातः॥ ॥ अथ दश
मी॥ १० शुनं हुवेमेति॥ ॥ इति तृतीयस्य द्वितीये चतुर्विंशो वर्गः॥ ॥ तृतीयमंडले तृतीयोऽनुवाकः॥ ॥ अथ चतुर्थेऽनुवाके पंचदश सूक्ता
नि तत्रेंद्रं मतिरिति नवर्चं प्रथमं सूक्तं विश्वामित्रं त्रैष्टुभमैंद्रं इंद्रं मतिरित्यनुक्रांतं। सूक्तविनियोगो लैंगिकादवगंतव्यः॥ ॥ तत्रेषां सूक्ते प्रथमा॥ ॥
इंद्रं मतिर्हृद आ वच्यमानाच्छा पतिं स्तोमतष्टा जिगाति। या जागृविर्विदथे शस्यमानेंद्र यत्ते जायते विद्धि तस्य॥ १ विश्वामित्रः स्तौति। हे इंद्र
इतो हृदयात् वच्यमानो वच्यमानो स्तोमतष्टा स्तोमकारिभिः कृता मतिः स्तुतिः पतिं सर्वस्य जगतः स्वामिनं त्वां अच्छ अभिलक्ष्य जिगाति। समंता
द्गच्छतु। या मदीया स्तुतिः जागृविः स्तुत्यस्य तव जागरणं कुर्वाणा विदथे यज्ञे शस्यमाना वर्तते हे इंद्र ते त्वदर्थं यत् स्तोत्रं मत्तो जायते तद्विद्धि जा
नीहि। तस्येति द्वितीयार्थे षष्ठी॥ मतिः। मंत्रेण वृषेत्यादिना क्तिनुदात्तः। हृदः। हृदयशब्दस्य पद्दन्नोमास्हृन्नित्यादिना हृदादेशः। ऊडिदमिति विभ
क्तेरुदात्तत्वं। वच्यमाना वच परिभाषणे इत्यस्य कर्मणि यकि संप्रसारणाभावः छांदसः। प्रत्ययस्वरः। स्तोमतष्टा। तक्षू त्वक्षू तनूकरणे निष्ठा।
तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं। जिगाति। गा स्तुतौ छंदसीति जुहोत्यादिकं बहुलं छंदसीत्यभ्यासस्येत्वं। निघातः। जायते जनी प्रादुर्भावे इत्य

ऋ·सं·भा·२

स्यलुङि रूपं। यद्वृत्तयोगादनिघातः॥ विद्धा। विद ज्ञाने इत्यस्य लोटि हेर्हुंझल्भ्यो हेर्धिरिति धिरादेशः। वाक्यभेदादनिघातः॥ ॥ अथ द्वितीया॥ ॥ दि
वश्चिदा पूर्व्या जायमाना वि जागृविर्विदथे शस्यमाना॥ भद्रा वस्त्राण्यर्जुना वसाना सेयमस्मे सनजा पित्र्या धीः॥ ॥ द्योतमानात्सूर्यादपि
पूर्व्या पूर्वं भवा उषः कालसंबंधिनी आजायमाना या स्तुतिलक्षणा वाक् विभवति। सेयं वाक् यज्ञेषु शस्यमाना जागृविः स्तुत्यस्य तत्र जा
रणं कुर्वती भद्रा कल्याणानि अर्जुनानि शुक्लवर्णानि वस्त्राणि योग्यतया। नजा असि वसाना अस्मे अस्माकं पित्र्या पितृक्रमागता। अतएव सनजा
पुरातनी सती धीः स्तव स्तुतिर्भवति। दिवः दिवो क्विप्। ऊडिदमिति विभक्तेरुदात्तत्वं। अर्जुना अर्जेर्णिलुक् च इत्युनन् नित्स्वरः। सनजा। जनेरन्ये
भ्योऽपि दृश्यत इति डः। प्रत्ययस्वरः। पित्र्या पितृशब्दात् तत्र आगत इत्यर्थे पितुर्यच्चेति यत्प्रत्ययः। रीङ्ऋत इति रीङादेशः। यस्येति लोपः। यतोनाव इत्या
द्युदात्तत्वं॥ ॥ अथ तृतीया॥ ॥ यमा चिदत्र यमसूरसूत जिह्वाया अग्रं पतदा ह्यस्थात्॥ वपूंषि जाता मिथुना सचेते तमोहना तपुषो बुध्न
एता॥ ॥ प्रसंगादुषः कालं प्रशंसति। यमः स्तूः यमौ यमलौ सूत इति यमसूः उषोभिमानिदेवता सा। यमलावश्विनावुषः काले असूत। तत्र
श्विनोः स्तूयमानत्वात् तावश्विनौ स्तोतुं मम जिह्वाया अग्रं पतत् चलमास्था ह्यातिष्ठति खलु तमोहनात् तमसो हंतारौ ते तपुषः तपत्यस्मिन्नि
ति तपुर्दिवसस्तस्य बुध्ने मूले एतावागतौ मिथुना परस्परं संगतौ तावश्विनौ जातौ उत्पन्नौ वपूंषि रूपाणि निधीयंते अस्मिन्निति वपूंषि उषःकाले
क्रियमाणानि शस्त्रादीनि कर्माणि सचेते संगच्छतः पतत् पत्लृ गतौ शतुर्लसार्वधातुकस्वरे धातुस्वरः। अस्थात्। स्थागतीति सिचो लुक्। लुङि रू
पं। हियोगादनिघातः। वपूंषि। डुवप् बीजसंताने अर्तिपृवपियजितनिधनितपिभ्यो निदिति उसिप्रत्ययः। निच्चेत्यादिस्वरः। सुद्युदात्तः। सचेते। षच सम
राम

स्व सुहस्तं कृशानेते वः सोमक्रयणान् ... भक्षितीति भूषथः। भूष अलंकार इत्यस्य लटि रूपं। अपश्यं। दृशिर् प्रेक्षण इत्यस्य ल
ङि रूपं। पादादित्वादनिघातः। जगन्वान्। गमेः क्वसोर्विभाषा गमहनविदविशामिति इट् विकल्पितत्वादत्र — मो नो धातोः म्वोश्चेति मका
रस्य नकारः। मेधर्वानुः धन्वं धार इत्यस्य गोशब्द उपपदे गवि गनूधञो वहतिच प्रत्ययः। तत्संयोगेन गो उ शब्दस्य वगत्रादेशः। प्रत्ययस्वरः।
॥ अथ सप्तमी॥ ॥ तदिन्वस्य वृषभस्य धेनोरा नामभिर्ममिरे सक्म्यं गोः॥ अन्यदन्यदसुर्यं वसाना नि मायिनो ममिरे रूपमस्मिन्॥ ॥
यद्यजमानाः वृषभस्य अभिमतफलप्रदस्यास्य इंद्रस्यार्थं धेनोर्या नामभिः विश्वायुः विश्वायवा इत्यादिनामभिः स्तवलक्षितां गोः सक्म्यं संभजना
र्हं तत्क्षीरादिकं हविः तुक्षिप्रं आममिरे आकृतिर्ईति। धातूनामनेकार्थत्वात्। तेन च हविषा यज्ञमनुष्ठाय देवं सूर्यं प्राप्ताः कवयः अन्यदन्य
न्नूतनं असुर्यं असुराणां बलं वसानाः आच्छादयंतः। अतएव मायाविनः मायया स्वीकृतकामरूपाः यद्वा मायिनः प्रज्ञावंतः संतः अस्मि
न्निंद्रे रूपं स्वं स्वं रूपं निममिरे इयं यज्ञया परिच्छिद्य निदधुः। ममिरे। माङ् माने लिटि रूपं। निघातः। युजिरुचितिजां कुश्चेत्यत्र चकारस्यानु
क्तसमुच्चयार्थत्वात् सचतेर्मक्प्रत्ययः। कुत्वं च। सक्मं सचमः तत्र च मित्यर्थ भावः छंदसीति यत्। यतोनाव इत्याद्युदात्तः। गोः एकादेशस्वरः।
असुर्यं। असुरस्वमित्यर्थे असुरस्य स्वमिति यत्। तित्स्वरितः। रूपं। रूप क्रियायां रूपतः स्वर्ण शेष्य रूपतयेत तस्मात् इतिप्रत्ययो तत्वेन नि
पातनात् स्वकारलोपो गुणत्वं च। रूपयति रूप्यते रूपं। प्रत्ययस्वरः॥ ॥ अथाष्टमी॥ ॥ तदिन्वस्य सवितुर्नकिर्मे हिरण्ययीममतिं यामशिश्रेत्॥
आ सुष्टुती रोदसी विश्वमिन्वे अपीव योषा जनिमानि वव्रे॥ ॥ तत्तस्मात् सवितुः सर्वस्य जगतां तत्यामितया प्रसवितुरस्येंद्रस्यामे मम हिर

गतजानुकं यथा भवति तथा अगमन् नु अगच्छन् त्रिः। इंः तत्र अबिले दशग्वैः दशभिर्मासैरनुसत्रमनुष्ठाय लब्धफलाः इति छन्दोगा दशग्वाः। दशभिर्दशसं
ख्याकैरंगिरोभिः संहितः सन् तमसि बिले अन्धकारे क्षियंतं निवसंतं सत्यं यथार्थप्रकाशं सूर्यं विवेद लेभे। ततो लब्धप्रकाशाः स इंद्रो गा अंगि
रोभ्यः प्रापदिति भावः। सखा ख्या प्रकथने। समाने ख्यश्चोदात्त इति इण्प्रत्ययः। ङित्व समानस्य छंदसीति समानस्य सभावः उदात्त इत्युक्तत्वेन स
मर्थ्यमुपपदस्येति गम्यते। आद्युदात्तः। नवग्वैः गमेर्डोण्णादिको ड्प्रत्ययः बहुव्रीहौ पूर्वपदस्वरः। अभिज्ञ। प्रसंभ्यां जानुनो ज्ञुरिति विधीयमाना
ज्ञुरभेऽल्तरस्य व्यत्ययेन भवति। सत्वभिः षलु विशरणगत्यवसादनेष्वित्यस्मात् अन्येष्वपि दृश्यत इति क्वनिप्रत्ययः। नुधागमः। नित्वाद्युदात्तः। अनु
ग्मन्। गमेः शतरि बहुलं छंदसीति शपो लुकि कृते गमहन इत्युपधालोपः प्रादिसमासः। शन्तस्वरः। विवेद। विद ज्ञाने इत्यस्माल्लिटि णलि रूपं।।। इति
तृतीयस्य द्वितीये पंचविंशो वर्गः।। ।। तस्मिन् सूक्ते षष्ठी।।। इंद्रो मधु संभृतमुस्रियायां पद्वद्विवेद शफवन्नमे गोः।। गुहा हितं गुह्यं गूळ्हमप्सु
हस्ते दधे दक्षिणे दक्षिणावान्।। इंद्रः उस्रियायां क्षीरदध्यादिक्रमेणो धौ स्त्राविभाववत्यां गवि संभृतं संपादितं मधु क्षीरादि विवेद ज्ञासीत् ततस्तद
र्थं यद्वत् त्यादयुक्तं शफवत् खरोपेतं गोधनं विवेद लेभे। कथं लब्धवानिति तदुच्यते। नमे गोः। गोरिति द्वितीयार्थे षष्ठी पणिनामाकरे सुरैः अपहृतां
गां नपे आनीतामाकारोत्। तथा दक्षिणापानो दार्यदाने समर्थः। स इंद्रो गुहां गुहायां हितं गुणगुहां छप्रह्वं अन्तरेवास्तु अन्तरिक्षे रुद्धा वारि हितामाथि
नमसुरं त्वं दक्षिणे हस्ते दधे दधार। अपहृतादित्यर्थः।। द्वितीयाष्टके श्रुधी हवमित्यस्मिन् वर्गे गुहा हितमित्येतत् सप्तम्यगम्यधायि। उस्रियायां पक्रियां
सम्यक् पूर्वमेवावादि विवेद। विद ज्ञाने विदर्लाभे स्वयो लिटि रूपं। शफवत्। शफोस्यास्तीति मतुप्। ह्रस्वनुड्भ्यां मतुबिति मतुप उदात्तत्वं। नमे। ण

मुपध्मत्वे शब्द इत्यस्याल्लिटि रूपं द्विर्वचनस्य [illegible] त्वाद [illegible] वें वन्नाभावः। वाक्यभेदाद निघातः। गुहा। गुह संवरण इत्यस्मात् छंदसि गुहि
दुहिभ्यो वेति वक्तव्यमिति क्यप्। कित्वाद् गुणः। प्रत्ययस्य पित्वादनुदात्तत्वे धातुस्वरः। दधे। दधातेर्लिटि रूपं। दक्षिणावान्। दक्ष वृद्धौ। दुदक्षिभ्यामि
नन्निता नन् प्रत्ययः। तदस्यास्तीति मतुप्। संहितायामन्येषामपि दृश्यत इति पूर्वपदस्य दीर्घः।। नित्स्वरः।। अथ सप्तमी।।। ज्योतिर्वृणीत तमसो वि
जानन्नारे स्याम दुरितादभीके।। इमा गिरः सोमपाः सोमवृद्ध जुषस्वेंद्र पुरुतमस्य कारोः।। ।। तमसो रात्रेः सकाशाद् विशेषेण जानन् प्रादुर्भवन् सूर्या
त्मकं इंद्रो ज्योतिर्वृणीत। जगद्व्यवहारनिर्वाहकं प्रकाशं समभक्त। यद्वा तमसस्तमोरूपात् वृत्रादि विजानन् प्रादुर्भवन् वृत्रं हत्वा प्रकाशमवृणीत। वयं दुरि
ताद्या दारे दूरे पापवर्जिताः संतो अभीके भयरहिते स्थाने स्याम भवेम। सोमपाः सोमस्य पातः अतएव सोमपाने श्रुद्ध हे इंद्र पुरुतमस्य पुरू शत्रू
न् आमयति। लोपयति। इति पुरुतमः तादृशस्य कारोः स्तोत्रं कुर्वाणस्य ऋत्विजः इमाः स्तुतिलक्षणा गिरो वाचो जुषस्व सेवस्व। वृणीत वृङ् संभक्तावित्य
स्य लङि रूपं। विजानन्। ज्ञा अवबोधने। विशेषेण ज्ञानं प्रकाशः। प्रत्ययस्वरः। अभीके। नाविद्यते भीर्यस्मिन् तत् न शेषाद्विभाषेति कप्रत्ययः। नञ्सुभ्य
मित्यंतोदात्तत्वे प्राप्ते कपि पूर्वस्यांतोदात्तत्वं। पुरुतमस्य। तमु ग्लान इत्यस्मात् ण्यंतात् पचाद्यच्। परादिश्छंदसि बहुलमिति उत्तरपदाद्युदात्तत्वं।।। अथा
ष्टमी।।। ज्योतिर्यज्ञाय रोदसी अनु ष्यादारे स्याम दुरितस्य भूरेः।। भूरि चिद्धि तुजतो मर्त्यस्य सुपारासो वसवो बर्हणावत्।।। हे इंद्र ज्योतिर्जगत्प्रकाश
कः सूर्यः यज्ञाय अग्निहोत्रादिकर्मकरणाय रोदसी। द्यावापृथिव्यावनुष्यात्। अनुभवतु प्रकाशयतु। वयं भूरेः अभूतस्य दुरितस्य मायस्यारे स्या
म भवेम। हे वसवः सर्वस्य वासयितारः इंद्रादयः सुपारासः सुपाराः शोभनपाराः स्तुत्याभिपूर्णीकर्तुं शक्या यूयं भूरि चित् अतिप्रभूतं बर्हणावत्। स

ऋषिणुक्तं धनं नूजतो भूरिपदस्य मर्त्यस्य प्रयच्छ । अत्र योग्यक्रियाध्याहारः स्यात् । अस्तेर्लिङि रूपं । संहितायां मनोरुत्तरस्यास्तेरुपसर्गप्रादुर्भ्यो
तृ·सं·भा·२ मस्तिर्यच्परइति षत्वं । निघातः । नुजतः । नुजपि जर्ज हिंसादाननिकेतनेषु । शपुतुम इति विभक्तेः स्वदान्नत्वं । बंहणावतः । दृहि बृहि वृद्धावित्यस्य भावे औणादि
कोयुप्रत्ययः । प्रत्ययस्वरः ॥ अथ नवमी ॥ शुनं हुवेमेति ॥ इति तृतीयस्य द्वितीये षड्विंशो वर्गः ॥ २६ ॥ इति श्रीमद्राजाधिराजपरमेश्वर
वैदिकमार्गप्रवर्तक श्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये तृतीयाष्टके द्वि
तीयोध्यायः ॥ २ ॥ छ ॥ श्री शिवादिगुरुदेवेनमः ॥ यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् । निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥ इंद्रत्वे
ति नवर्चं द्वितीयं सूक्तं वैश्वामित्रं गायत्रमैंद्रं तथा चानुक्रांतं । इंद्रत्वा गायत्रं हीति । अग्निष्टोमे प्रातःसवने ब्राह्मणाच्छंसिशस्त्रे इदं सूक्तं । सूत्रितं
च । इंद्रत्वा वृषभमुद्ध हरिभीति तिस्र इति । आद्या प्रातःसवने ब्राह्मणाच्छंसिनः प्रस्थितयाज्या । सूत्रितं च । इंद्रत्वा वृषभं मरुतो यस्येति ॥ सैषा सू
क्ते प्रथमा ॥ इंद्रत्वा वृषभं वयं सुते सोमे हवामहे ॥ स पाहि मध्वो अंधसः ॥ इंद्रो स्रवति सोमरसे रमते । रमीडंती इंद्रः । यद्वा इदं सर्वं जगत् साक्षा राम
द्दर्श । यनीद्रतस्य संबुद्धिः । हे इंद्र कामानां वर्षकं त्वा त्वां सुते ग्रावभिरभिषुते सोमे वयं हवामहे सोमपानार्थमाह्वयामः । स त्वं मध्वः मदकरं अंधसः ९४
अन्नलक्षणं सोमं पाहि पिब । इंद्रशब्दं यास्को बहुधा निर्वाचे च । इंद्र इरां दृणातीति । वेरां दधातीति वेरां दारयतीति । वेरां धारयतीति विंदवे द्रवत इ
ति वेंदौ रमत इति वेंधे भूतानीति । तद्यदेनं प्राणैः समैंधंस्तदिंद्रस्येंद्रत्वमिति । तत्र यत्र योर्थोनुगुणस्तत्र सोर्थः । स्वीकार्य इदं दर्शनादित्ययमन्यच
इदं ब्रह्म साक्षात्पश्यतीति [illegible] तमपश्यदिदमदर्शदिति तस्मादिंद्रो नामेंद्रो ह वै नामा तमिंदं संतमिं

दाय इत्यस्य लटि रूपं । [illegible] । बुध्नः । बध बंधने । बंधेर्ब्रधि बुधी चेति नक्प्रत्ययः । ब्रधि बुधी एतावादेशौ
धातोः प्रत्ययस्वरः । एताः इण् गतौ [illegible] स्यस्य क [illegible] निष्ठा । गतिरनंतर इति गतेः स्वरः ॥ अथ चतुर्थी ॥ नकिरेषां निंदिता मर्त्येषु ये अस्माकं पि
तरो गोषु योधाः ॥ इंद्र एषां दृंहिता माहिनावानुद्गोत्राणि ससृजे दंसनावान् ॥ हे इंद्र सत्रे प्रवृत्तानामस्माकं ये पितरो गिरसः गोषु पणिभि
रपहृतेषु योधाः योधारो वर्तंते । तेषामेषां मर्त्येषु निंदिता दूषको नकिः नकश्चिदस्ति कुत इत्यत आह । माहिनावान् महिमोपेतो दंसनावान् वृत्रहननादि
कर्मवानिंद्रः एषामंगिरसां दृंहितानि समृद्धानि गोत्राणि गवां वृंदानि उत्ससृजे तेभ्यो गिरोभ्यो ददौ । निंदिता निंदकः । ताच्छीलिकस्तृन् । दिरूपं । मर्त्येषु । व
स्वादित्वात्स्वार्थिको यत् । ततो नावद्द्व्या युद्धात्त्वं । योधाः । युध संप्रहार इत्यस्य पचाद्यचि रूपं । दृंहिता । दृह दृहि वृद्धावित्यस्य निष्ठायां रूपं । माहिनावा
न् महेरिनण्चेति इनण्प्रत्ययः । तदस्यास्तीति मतुप् । माहिनावानिति मस्य संज्ञामतो बहुलं छंदसि वनजिरादीनामिति संहितायां दीर्घः । गोत्राणि गवां समूह
इत्यर्थे खलगोरथादिनि त्रो इति त्रप्रत्ययश्चेति गोशब्दात् त्रप्रत्ययः स्वरः । ससृजे । सृज विसर्गे इत्यस्य लिटि रूपं । दशयेये निष्ठे बल्ये निविशानी यस्य
पुरस्तात्सखावाद दधत्रे त्येषा । सूत्रितं च । सखाह यत्र सखिभिर्नवग्वैरिति निविद्धानीयायोराध इति ॥ तत्रैषा सूक्ते पंचमी ॥ सखाह यत्र सखिभिर्नव
ग्वैरभिज्ञ्वा सत्वभिर्गा अनुग्मन् ॥ सत्यं तदिंद्रो दशभिर्दशग्वैः सूर्यं विवेद तमसि क्षियंतं ॥ सखिभिः समानख्यानैः ऋत्विग्भिः इंद्रमभितः सद
द्भिः नवभिः नवग्वैर्मेधातिथिप्रभृतयोंगिरसः केचिन्नवमासान् सत्रमनुष्ठाय फलं लेभिरे । केचिद्दशमासाननुष्ठायेति तत्र येन नवमासान् सत्रमनु
ष्ठाय लब्धफलास्तदतिष्ठन् तेऽज्ञग्ध्वाः तैः सखिभिरंगिरोभिः सखा समानख्यान इंद्रः यत्र यस्मिन्बिले परिभिनिरुद्धा गा अभिलक्ष्य स्ये अभिज्ञो अभि

तृ॰सं॰भा॰२

नच स्कंय इत्युपपदाभावेपि। कर्मण्यान चु प्रत्ययः। आमंत्रितत्वान्निघातः॥ ॥अथ चतुर्थी॥ ॥इंद्र सोमाः सुता इमे तव प्रयंति सत्पते॥ क्षयं चंद्रास
इंदवः॥ ॥हे सत्पते इंद्र चंद्रासः आल्हादयितारः। इंदवो दीप्ताः सुता अभिषुता इमेस्माभिर्दत्ताः सोमाः। क्षयं कुक्षिं यंति निवसंत्यत्रादीन्योदनि
क्षयो जठरं। प्रयंति प्रकर्षेण गच्छंति। तान् धारयेति भावः। क्षयं क्षि निवासगत्योः। तस्माद् अधिकरणे घ प्रत्ययः। प्रत्ययस्वरेणांतोदात्ते प्राप्ते क्षयो नि
वास इत्याद्युदात्तत्वं। चंद्रासः। चदि आल्हादने दीप्तौ। अस्मात् स्फायितंचीत्यादिना रक् प्रत्ययः। आज्जसेरसुक्। धास्व सुक प्रत्ययस्वरः। इंदवः।
इंदेरिच्चादेरित्युप्रत्ययः। भिदित्यनुवृत्तेराद्युदात्तः॥ ॥अथ पंचमी॥ ॥दधिष्वा जठरे सुतं सोममिंद्र वरेण्यं॥ तव द्युक्षास इंदवः॥ ॥हे इंद्र वरेण्यं
सर्वैर्वरणीयं सुतमभिषुतं सोमं जठरे दधिष्व धारय। इंदवो दीप्ता इमे सोमाः तव द्युक्षासः दिवि क्षियंति निवसंतीति द्युक्षसः। अतस्त्वं तान् धारये
ति भावः। दधिष्व दधातेर्लोटि रूपं। आगमा अनुदात्ता इतीटोनुदात्तत्वात् प्रत्ययस्वरः। वरेण्यं। वृङ् संभक्तौ। वृङ् संभक्तौ। वृङ एण्य प्रत्ययः। इ
धीत्वादाद्युदात्तः। द्युक्षासः। क्षि क्षये। अन्येभ्योपि दृश्यंत इति डप्रत्ययः। कृदुत्तरपदस्वरः॥ ॥इति तृतीयस्य तृतीये प्रथमो वर्गः॥ ॥अथ षष्ठी॥ ॥ राम
॥गिर्वणः पाहि नः सुतं मधोर्धाराभिरज्यसे॥ इंद्र त्वादातमिद्यशः॥ ॥गिर्वणः गीर्भिर्वननीयं। तथा च यास्कः। गिर्वणो देवो भवति गीर्भिरेनं वनयं ९९
तीति। तादृश इंद्र नः अस्मदीयं सुतमभिषुतमिमं सोमं पाहि पिब। अतो मधोर्मदकस्य सोमस्य धाराभिः रज्यसे हे इंद्र त्वादातमित् त्वया शोधितं
विशदीकृतमेव यशो अस्मासु भवति। गिर्वणः। वन संभक्तौ। वनित्यस्माद् असुन्। गिर उपधाया दीर्घाभावश्छांदसः। आमंत्रितस्येति षाष्ठिकमाद्युदात्त
त्वं। पाहि। पापाने इत्यस्माल्लोटि रूपं। आमंत्रितस्याविद्यमानत्वेन पादादित्वादनिघातः। प्रत्ययस्वरः। त्वादातं। दप् शोध। नसत्यपि प्रकारेणानुबं

धकृतमनेनेभं नतत्वामित्ये अंत एवायं तत आदेव इत्यात्वं। अस्य कर्मणि क्तः। दाधाघ्वदाबित्यत्रादाबिति प्रतिषेधेन घुसंज्ञाया अभावाद् दे दो ति
दादेशो न भवति। वेति युष्मच्छब्दस्य तृतीयाकर्करणे कृता बहुलमिति समासः। तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरः। यशः। अशूङ् व्याप्तौ। अ
शेर्युट् चेत्यसुन् तत्संनियोगेन धातोर्युगागमः। नित्वादाद्युदात्तः॥ ॥अथ सप्तमी॥ ॥अभि द्युम्नानि वनिन इंद्रं सचंते अक्षिता॥ पीत्वी सोमस्य
वावृधे॥ ॥वनिनः। वनं देवताविषयं संभजनमस्मास्तीति तस्य देवानसं भजमानस्य द्युम्नानि द्योतमानान्नानि। अक्षिताक्षयरहितानि संपूर्णा
नि सोम्या सोमादीनि हवींषि इंद्रमभि अभितः सचंते समवयंति। तच्च मध्ये सोमस्य पीत्वी वावृधे स इंद्रो वर्धते। वनिनः। अतइनिठनाविति निप्र
त्ययः। नस्वरः। सचंते। षच समवाये इत्यस्य लटि रूपं। अक्षिता। क्षि क्षय इत्यस्य निष्ठा। अन्येष्वपि दृश्यत इति दीर्घाभावः। तस्मादेव क्षियो दीर्घादि
ति निष्ठानत्वाभावः। नञा समासस्तस्य स्वरः। पीत्वी। पापाने इत्यस्मात् त्वाप्रत्ययस्य स्नात्व्यादयश्चेति निपातनात् त्वी इत्यादेशः। प्रत्ययस्वरः। घु
मास्थागापेत्यादिना ईत्वं॥ ॥अथाष्टमी॥ ॥अर्वावतो न आगहि परावतश्च वृत्रहन्॥ इमा जुषस्व नो गिरः॥ ॥हे वृत्रहन् इंद्र अर्वावतः अर्वावीना
त्समीपदेशात् परावतोति दूरादेशाद्वा नोस्मानभिलक्ष्य आगहि आगच्छ। आगत्य च नोस्मदीया इमाः स्तुतिलक्षणा गिरो वाचो जुषस्व। परावतः। उ
पसर्गाच्छंदसि धात्वर्थ इति वतिः प्रत्ययस्वरः॥ ॥अथ नवमी॥ ॥यदंतरा परावतमर्वावतं च हूयसे॥ इंद्रेह तत आगहि॥ ॥हे इंद्र यद्यस्मिन् परा
वतमतिविप्रकृष्टस्य देशस्य अर्वावतं संनिकृष्टस्य देशस्यांतरा तयोर्मध्यादेशे हूयसे सम्यगित्यसे तत तस्माद्देशादिहास्मिन्यज्ञे आगहि। सो
मयानाय मागच्छ। परावतं अनंतरांतरेण युक्ते इति द्वितीया। ततः पंचम्यास्तसिल्। लित्स्वरः॥ ॥इति तृतीयस्य तृतीये द्वितीयो वर्गः॥ ॥आ तू न इंद्र

ऋ॰सं॰भा॰२

तिनवर्चलतीयं सूक्तं वैश्वामित्रं गायत्रमैन्द्रं आ तू न इत्यनुक्रांतं। अतिरात्रे द्वितीयपर्याये ब्राह्मणाच्छंसिशस्त्र एतदादिके द्वे सूक्ते। सूत्रितं च। आ तू न इंद्र
मद्र्यगिति सूक्ते इति॥ तस्मिन्सूक्ते प्रथमा॥ आ तू न इंद्र मद्र्यग्घुवानः सोमपीतये॥ हरिभ्यां याह्यद्रिवः॥ हे अद्रिवः हे वज्रिन् हे इंद्र हुवानः होतृ
भिः आहूयमानस्त्वं मद्र्यक् मदभिमुखः सन् नोऽस्मदीये यज्ञे सोमपीतये सोमपानार्थं हरिभ्यां अश्वाभ्यां सह तु क्षिप्रमायाहि। तु ऋचि तु नु घेत्यादिना
संहितायां दीर्घः। मद्र्यक्। मामंचतीति। ऋत्विग्दधृगित्यादिना क्विन्प्रत्ययो। विष्वग्देवयोश्चेति अस्मच्छब्दस्यैकवचने मपर्यंतस्य मादेशः। अंतोदात्तः। यणा
देशे कृते उदात्तस्वरितयोर्यण इति यणः स्वरितत्वं। किं प्रत्ययस्य कुरिति कुत्वं। सोमपीतये। दासीभारादित्वात् पूर्वपदप्रकृतिस्वरत्वं। अद्रिवः। मतुवसो रुरिति रुत्वं।
आमंत्रितत्वादनिघातः॥ अथ द्वितीया॥ सत्तो होता न ऋत्वियस्तिस्तिरे बर्हिरानुषक्॥ अयुज्रन्प्रातरद्रयः॥ हे इंद्र नोऽस्मदीये यज्ञे होता ऋत्वि
क् तवाह्वानार्थं ऋत्वियः प्राप्तकालः सन् सत्तो निषण्णो वर्त्तते। तथा बर्हिः आनुषक्। आनुषक् परस्परसंबंधं यथा भवति तथा तिस्तिरे अतिघास त्रेपुस्ती
र्णमभूत्तथा प्रातःसवने सोमाभिषवार्थं अद्रयो ग्रावाणः अयुज्रन् परस्परं संगता अभूवन्। तस्मात् सोमपानार्थं त्वमागच्छेति भावः॥ सत्तः। षद्लृ विशरण
गत्यवसादनेषु। अस्मात् कर्त्रर्थे अकर्मकत्वात् श्लिषेत्यादिना कर्तरि क्तः। सर्वे विधयश्छंदसि विकल्प्यंत इति रदाभ्यां निष्ठातो नकारस्य नत्वाभावः। ऋत्वियः। ऋतुशब्दाच्छंदसि
घसिति घस्प्रत्ययः। यस्येति चेति लोपे प्राप्ते सितिचेति पदसंज्ञायां ओर्गुण इति भसंज्ञाधीनो गुणो भवति। यणादेशः। प्रत्ययस्वरः। आनुषक्। षंज संगे। क्वि
प्। अनिदितामिति नलोपः। अन्वोरुपसर्गयोः प्राक्प्रयोगः। गतिसमासः। कृदुत्तरपदस्वरः। अयुज्रन्। युजिर् योग इत्यस्य लङि झस्य रन्नोवेत्यरुडादे
शः। बहुलं छंदसीति [illegible] निघातः [illegible]॥ अथ तृतीया॥ इमा ब्रह्म ब्रह्मवाह क्रियंत आ बर्हिः सीद॥ वीहि शूर

राम
६६

इ इत्याचक्षते परोक्षेण परोक्षप्रिया इव हि देवा इति। इदि परमैश्वर्य इति धातुः। स्वमायया जगद्रूपत्वं परमैश्वर्यं अनेनाभिप्रायेण श्रूयते। इंद्रो मायाभिः
पुरुरूप ईयत इति। इंद्रशब्द उपपदे रमतेरन्येभ्योऽपि दृश्यत इति डः। पूर्वपदस्योकारलोपः। इदि परमैश्वर्ये इत्यस्माद्वा ऋज्रेंद्राग्रवज्रेत्यादिना रन्प्रत्ययांत
त्वेन निपातितः। एवमेतानि निर्वचनान्यभिदृष्टव्यानि। आमंत्रितत्वादनुदात्तत्वं। हवामहे। ह्वयतेर्बहुलं छंदसीति संप्रसारणे लिटि [illegible] मधु। मधुशब्दः फ
लिपाटलीत्यादिना उ प्रत्ययांतः। आगमानुशासनस्यानित्यत्वात् नुमभावः। संज्ञापूर्वकस्य विधेरनित्यत्वात् गुणाभावः। यणादेशः। अंधसः। अदेर्नु
म च धश्चेत्यसुन्। नित्स्वरः। ब्राह्मणाच्छंसिनः प्रातःसवने इंद्र क्रतुविदमिति शस्त्रयाज्या। सूत्रितं। इंद्र क्रतुविदं सुतमिति याज्येति॥ सेयं सूक्ते द्वि
तीया॥ इंद्र क्रतुविदं सुतं सोमं हर्य पुरुष्टुत॥ पिबा वृषस्व तातृपिं॥ हे इंद्र क्रतुविदं क्रतोः प्रज्ञायाः लंभकं सुतमभिषुतमिमं सोमं हर्य पातुं काम
यस्व हे पुरुष्टुत पुरुभिः स्तुतेंद्र तातृपिं तर्पकं आप्यायनकारिणमिमं सोमं पिब पीत्वा इमं सोमं आवृषस्व जठरे सिंचस्व। तथा नाभेरधो न पततीति तथा व्याप्
येति भावः॥ हर्य। हर्य गतिकांत्योः। इवं लस्य लोट् रूपं। निघातः। तातृपिं। तृप प्रीणन इत्यस्मात् छंदसि ससादिभ्य आदृगमहनेति किन्। तस्य लिङ्वद्भावात् द्विर्व
चनादि। संहितायामन्येषामपि दृश्यत इत्यभ्यासस्य दीर्घः। नित्वादाद्युदात्तः॥ अथ तृतीया॥ इंद्र प्रणो धितावानं यज्ञं विश्वेभिर्देवेभिः॥ तिर स्तवान विश्पते॥
हे स्तवान स्तोतृभिः स्तूयमान विश्पते विशां मरुतां पते। हे इंद्र विश्वेभिर्देवेभिः सर्वैर्यजनीयैर्देवैः सह धितावानं यन्यते संभज्यंत इति धितावानं हविधितेनिहि
तं हविर्यस्य तं संभृतहविष्कमित्यर्थः। अस्मदीयमिमं यज्ञं प्रतिर प्रकर्षेण वर्धय। हविःस्वीकरणेन संपूर्णं कुर्विति भावः॥ उपसर्गाद्बहुलमिति
संहितायां णत्वं। धितावानं। डुधाञ् धारणपोषणयोः इत्यस्मान्निष्ठा। बहुव्रीहौ पूर्वपदस्वरः। तरतेर्व्यत्ययेन शः। प्रत्ययस्वरः। स्तवान। ष्टुञ् स्तुतौ। सुप्या

तृ॰ सं॰ भा॰ ३

शवसस्पतिमितिसंहितायांप्रथ्याः पतिपुत्रपृष्ठेष्वित्यादिनाविसर्जनीयस्यसत्वं। वसो। वदत्यन्त्यकायोवा। वि अस्माद्रुत्रवदिहनीत्यादिनाप्रत्ययः।
वदत्यभीस्त्वंमातरमितिवत्सोगोबलप्रत्ययस्वरः॥ ॥इतितृतीयस्यतृतीयेतृतीयोवर्गः॥ ॥अथषष्ठी॥ ॥समंदस्वाह्यंधसोराधसेतन्वा
महे॥ नस्तोतारंनिदेकरः॥ ॥हेइंद्रसतथाविधस्त्वंमहेमहतेराधसेधनायअंधसः अस्माभिर्दीयमानस्यसोमात्वंपानेनतन्वाशरीरेण
सहमंदस्वहृष्टोभव। हिरत्रसमुच्चयार्थः। किंच। नस्तोतारंमांनिदेनिंदायैविषयभूतंनकरः माकार्षीः। मंदस्वप्रादिस्तुत्यादिष्वित्यस्यलोटिरू
पं। हि चेतिनिघातप्रतिषेधेनभवितव्यमितिचेत्। तत्राप्राप्तिलोप्यइतिवर्त्तते अत्रहेः समुच्चयार्थत्वान्निघातः। तत्वात्उदात्तस्वरितयोरितिस्व
रितत्वं। महेतकारलोपश्छांदसः। इहन्महतारूपसंख्यानमितिविभक्तेरुदात्तत्वं। निदे णिदि कुत्सायामित्यस्मात्संपदादिलक्षणोभावेक्वि
प्। आगमानुशासनस्यानित्यत्वान्नुमभावः। सावेकाच इतिविभक्तेरुदात्तत्वं। करः करोतेर्लुङि ह्मृत्रृदृरुहिभ्यश्छंदसीत्यङादेशः। नि
घातः॥ ॥अथसप्तमी॥ ॥वयमिंद्रत्वायवोहविष्मंतोजरामहे॥ उतत्वमस्मयुर्वसो॥ ॥हेइंद्रत्वायवोयज्ञार्थंत्वामात्मनइच्छंतः तत्कामाः
संततोहविष्मंतः संभृतहविष्मंतः संभृतहविष्कावयंजरामहेत्वांस्तुमः। हेवसोसर्वस्यवासकइंद्रउतत्वमपिअस्मयुः हविस्वीकरणा
र्थंअस्मानात्मनइच्छन्भवतायवः त्वामिच्छंतीत्यर्थेसुप्आत्मनः क्यच्प्रत्ययोऽन्तरपदयाश्चेतिमपर्यंतस्यादेशः क्याच्छंदसीत्युप्रत्ययः।
अस्मयंतइतिप्राप्तेयुष्मदस्मदोरनादेशइतिअविभक्तावपिहलादौ व्यत्ययेनात्वं। प्रत्ययस्वरः। हविष्मंतः तसौमत्वर्थइतिभसंज्ञायांसका
रस्यरुत्वाभावः स्वरविधौव्यंजनमविद्यमानवदितिपरिभाषयानाश्रयणान्मतुपउदात्तत्वाभावः इतिप्रत्ययस्वरः। जरामहेजरतिः स्तुतिकर्मेति

यास्कः। अस्मानिच्छतीत्यर्थेसुपः ... लोपश्छांदसः प्रत्ययस्वरः॥ ॥अथाष्टमी॥ ॥मारेअस्मद्विमुमुचोह
रिप्रियार्वाङ्याहि॥ इंद्रस्वधावोमत्स्वेह॥ ॥हेहरिप्रियहरीअश्वौप्रियौयस्यतादृश। हेइंद्रअस्मदस्मत्तः आरेदूरेरथेयोजितावश्वौमा
विमुमुचः माविमोचय। ताभ्यामुपेतएवार्वाङ्अस्मदभिमुख्येनयाहिआगच्छ। हेस्वधावः सोमलक्षणान्नवनइंद्रइहास्मिन्देवयजने
मत्स्वसोमंपीत्वाहृष्टोभव। अस्मत्। अस्मच्छब्दस्यपंचमीबहुवचनस्यपंचम्याअदित्यदादेशः। मुमुचः मुच्ळृमोक्षणइत्यस्यल्यंतस्य
छांदसेलुङिचङिरूपं। अभ्यासस्यदीर्घाभावश्छांदसः। नमाङ्योगइत्यडभावः। हरिप्रियआमंत्रितस्यपादादित्वात्षाष्ठिकमाद्युदात्तत्वं।
मत्स्व मदिस्तुत्यादिष्वित्यस्यलोटिबहुलंछंदसीतिविकरणस्यलुक्। आमंत्रितस्याविद्यमानत्वेनपादादित्वान्ननिघातः॥ ॥अथनवमी॥
॥अर्वाचंत्वासुखेरथेवहतामिंद्रकेशिना॥ घृतस्नूबर्हिरासदे॥ ॥हेइंद्रघृतस्नूश्रमबिंदुजलप्रस्रवणयुक्तौकेशिनौस्कंधप्रदेशलंबमा
नकेशयुक्तौहरीआसदेआसदनीयंबर्हिरभिलक्ष्यसुखेसुखकरेरथेअर्वाचं अस्मदभिमुखंत्वात्वांवहतां। अर्वाचं अञ्चतेः ऋत्विग्दधृगि
दवामितिनुम्। वहतां। वहेर्लोटिरूपं। तसोलसार्वधातुकस्वरेकृतेधातुस्वरः। सदे सदः कृत्यार्थेकेन्प्रत्ययः। नित्स्वरः। कृदुत्तरपदस्व
रः॥ ॥इतितृतीयस्यतृतीयेचतुर्थोवर्गः॥ ॥उपनःसुतिनवर्च
॥ ॥तत्रप्रथमा॥ ॥उपनःसुतमागहिसोममिंद्रगवाशिरं॥ हरिभ्यांयस्ते
अस्मयुः॥ ॥सोऽस्मदीयंसुतमभिषुतंगवाशिरंपयसामिश्रितंसोमंप्रतिउपागहिसमीपेआगच्छ। यतः हरिभ्यामश्वाभ्यांयुक्तस्तवरथ्यास्म

राम
२७

युः।अस्मान्कामयमानोवर्त्तते।गवाशिरं।आङ्पूर्वस्यश्रीणातेःक्विपिअपस्पृधेथामानृचुरित्यादिनाशिरइत्यादेशः।बहुव्रीहौपूर्वपदस्वरः।
त·सं·भा·३ ॥अथद्वितीया॥ तमिंद्रमदमागहिबर्हिष्ठांग्रावभिःसुतं॥कुविन्न्वस्यतृप्णवः॥ हेइंद्रग्रावभिःसुतमभिषुतंबर्हिष्ठांबर्हिषिस्थितंमदं
मद्यते।माद्यतिमदःसोमःसोममिमंसोममागह्यागच्छ।कुविद्बहुभूतंयथाभवतितथाअस्यसोमस्यपानेनुक्षिप्रं।तृप्णवःतृप्तोभव।मदं।मदी
हर्षमदोरनुपसर्गइत्यप्प्रत्ययः।तस्यपित्वादनुदात्तत्वेधातुस्वरः।बर्हिष्ठां।ष्ठागतिनिवृत्तौ।क्विप्।संहितायांपूर्वपदसकारस्यादेशः।प्रत्यय
तयाश्रितिषत्वं।कृदुत्तरपदस्वरः।तृप्णवः।तृपप्रीणनइत्यस्यलेट्याडागमः।कुविद्योगादनिघातः।क्षुभ्नादिषुतृतमनतृप्नोतीतिपाठि
ते।तथापिछंदसिसर्वेविधीनांछंदसिविकल्पितत्वादत्रणत्वप्रतिषेधोनभवति।प्रत्ययस्वरः॥ अथतृतीया॥ इंद्रमित्थागिरोममाच्छा
गुरिषिताइतः॥आवृतेसोमपीतये॥ हेइंद्रइषितीप्रदर्थप्रेरिताइत्थाइत्थमनेनप्रकारेणोच्यमानाममगिरःस्तुतिलक्षणावाचःइंद्रंत्वा
मितोस्माद्देवयजनदेशात्।अच्छागुःआभिमुख्येनगच्छंतु।किमर्थंसोमपीतयेसोमपानार्थं।आवृतेत्वामावर्त्तयितुंइत्था।इदमस्थात्था
हेतौचछंदसीतिप्रत्ययेनथाप्रत्ययः।इदमएतेतोरथोरितिइदमइत्यादेशः।प्रत्ययःस्वरः।अच्छ।अच्छगत्यर्थवदेष्वितिगतिसंज्ञा।अगुः राम
इणगतावित्यस्यलुङिरूपं।निघातः॥ अथचतुर्थी॥ इंद्रंसोमस्यपीतयेस्तोमैरिहहवामहे॥उक्थेभिःकुविदागमत्॥ स्तोमैस्त्रिवृ १८
त्पंचदशादिस्तोमैःसाध्यैरुक्थैः।शस्त्रैःसहइहकर्मणिसोमस्यपीतयेसोमपानार्थंइंद्रंहवामहे।वयमाह्वयामः।कुविद्बहुवारंआगतःसइं
द्रःआगमत्।गम्लृंप्रकाशाच्छ [illegible] आगमा अनुदात्तादित्ययेनुदात्तत्वाद्धातुस्वरः।तिङ्चोदात्तवतीतिगतेर्निघा

२

पुरोळाशं॥ ब्रह्माणिस्तोत्राणि [illegible] ळाशोयेनाप्यतइतिवाहस्तुत्यं।इमाइमानिब्रह्माणिस्तोत्राणिअ
स्माभिःक्रियंते।अतःबर्हिरासीदसीदेत्यतयाबर्हिर्विषयज्ञेउपविश्य।हेशूरसमर्थेंद्रअस्माभिर्दीयमानमिमंपुरोळाशंपुरोळाशाख्यंहविःवी
हिभक्षय।ब्रह्मवाहः।वहप्रापणइत्यस्मात्वहिहाधाञ्भ्यःछंदसीत्यसुन्।णित्।दित्यनुवृत्तेरुपधावृद्धिः।आमंत्रितत्वान्निघातः।क्रियं
ते।करोतेःकर्मणियक्।रिङ्शयग्लिङ्क्षुइतिरिङादेशः।प्रत्ययस्वरः।पादादित्वादनिघातः।बर्हिः।कालात्यंतसंयोगेद्वितीया।वीहि।वीका
त्यादिषु।लोटिरूपं।हेर्ङित्त्वादनुदात्तः।पुरोळाशं।दाशृदानइत्यस्मात्पुरःपूर्वात्कर्मणिघञ्।स्वेतवहोक्थशस्पुरोडाशोण्विन्।पुरोडाशंतयननिपाति।
निपातनाद्दकारस्यलकारः।कृदुत्तरपदस्वरः॥ अथचतुर्थी॥ रारंधिसवनेषुणएषुस्तोमेषुवृत्रहन्॥ उक्थेष्विंद्रगिर्वणः॥ हेगि
र्वणोगीर्भिःस्तुतिभिर्वननीयवृत्रहन्वृत्रस्यहंतःहेइंद्रनोस्माकंसंबंधिषुसवनेषुएषुक्रियमाणेषुस्तोत्रेषुउक्थेषुचरारंधिरम
स्व।रारंधिरमतेर्लोटिबहुलंछंदसीतिशपःश्लुः।छंदस्युभयथेति।हेरार्धधातुकत्वेनाङित्वादाङितश्चेतिहेर्धिः।सवनेषु।सूयतेसोमो
येष्विति।अधिकरणेसुनोतेर्ल्युट्।लित्स्वरः।नसो।नकारस्यनश्चधातुस्थोरुषुभ्यइतिसंहितायांणत्वं॥ अथपंचमी॥ मतयः
सोमपामुरुंरिहंतिशवसस्पतिं॥इंद्रंवत्संनमातरः॥ हेइंद्रमतयोस्माभिःक्रियमाणाःस्तुतयःउरुंमहांतंसोमपांसोमस्यपाना
रंशवसोबलस्यपतिमिंद्रं।वोरिहंतिलिहंति।तत्रदृष्टांतः।वत्संनयथावत्संमातरोधेनवोलिहंति।तद्वत्।मतयः।मनज्ञानइत्यस्मात्क
र्मणिमंत्रेवृषेत्यादिनाक्तिन्उदात्तः।उरुं।उर्णुञ्आच्छादनइत्यस्मान्महत्यर्थःगम्यमानेमहतिकुर्चेतिनुप्रत्ययः।धातोर्हस्वश्च।प्रत्ययस्वरः।

कीये ऽध्ये स्थाने जठरे अतिशुतमे मंसो मां वाशमि प्रत्ययामि। एष पीतः सोमः। तव च हृदि कृ दयेररं तु अत्यर्थं रमतां। युष्मयुष्मच्छब्द
स्य चतुर्थ्येकवचनेन तुभ्यमत्या विति तुभ्यादेशः। सुपांसुलुगिति सुपो लुक्। इयि वतिरोग्धुदात्तः। ॐ स्थेवेषीदित्वान्स्वाथी कायतप्रत्य
यः। तित्स्वरितः। वोदामि। वदप्रेरणे ण्यंतस्य लटि रूपं। बहुलमन्यत्रापीति णेर्लुक्। निघातः। ररंतु। रमु क्रीडायां। इत्यस्य यङ्लुकि लोटि
सर्वविधीनां छंदसि विकल्पितत्वाद अभ्यासस्यानुमभावः। संहितायामन्येषामपीति अभ्यासस्य दीर्घः। निघातः। हृदि हृदये शब्दस्य
पद्दन्नोमासहृदीत्यादिना हृदादेशः। ऊडिदमिति विभक्तेरुदात्तत्वं॥ ॥ अथ नवमी॥ ॥ त्वां सुतस्य पीतये प्रत्नमिंद्र हवामहे कुशिकासो
अवस्यवः॥ ॥ हे इंद्र अवस्यवः त्वत्तो रक्षणमिच्छंतः कुशिकगोत्रोत्पन्ना वयं सुतस्य ग्रावभिरभिषुतस्य सोमस्य पीतये पानार्थं प्रत्नं पुरा
तनं त्वां हवामहे। श्रुतिलक्षणा [illegible] गीर्भिराह्वयामः। पीतये स्थागापापचोभावइति क्तिन्। हि सुवत्सरतिशतानामित्यंतोदात्तत्वं। हवामहे।
ह्वयतेर्लटि बहुलं छंदसीति संप्रसारणे रूपं। अवस्यवः। अव इच्छंतीत्यत्रार्थे सुपः क्यच्। क्याच्छंदसीत्युप्रत्ययः। कुशिकासो अव
स्यव इत्यत्र संहितायां अव्यादवद्यादित्यादिना एङः प्रकृतिभावः॥ ॥ इति तृतीयस्य तृतीये षष्ठो वर्गः॥ ५ आ याह्यर्वाङित्यष्टर्चं पंच
मं सूक्तं। वैश्वामित्रं त्रैष्टुभमैंद्रं। आ याह्यष्टावित्यनुक्रमणिका। दशरात्रे चतुर्थेहनि स्तोमवृद्धौ माध्यंदिनसवने ग्रावाक शस्त्रे स्तोमा
तिशंसनार्थमिदं सूक्तं। सूत्रितं च। आ याह्यर्वाङित्यष्टर्चान्यावपेतरं त्रितिमहाव्रते॥ ॥ तस्मिन्सूक्ते प्रथमा॥ ॥ आ याह्यर्वाङुप वंधुरे
ष्ठास्तवेदनु प्रदिवः सोमपेयं। प्रिया सखाया वि मुचोप बर्हिस्त्वामिमे हव्यवाहो हवंते॥ ॥ हे इंद्र वंधुरेष्ठाः वंधुरशब्देनेषा। द्वयं वंधस्था

नमभिधीयते। तेन तद्विशिष्टो रथो लक्ष्यते। तस्मिन्रथे तिष्ठन्नुत्वं अर्वाङ् अस्मदभिमुखः सन् अनु अभिलक्ष्य उपयाहि। समीपे आगच्छ।
प्रत्नं पूर्वक्रमागतं। तव तत्तवेव संबंधि सोमपेयं सोमपानं त्वं अनु उद्दिश्य। प्रिया तवप्रियतमौ सखायौ समानख्यानौ वौ अश्वौ बर्हिरुपबर्हि
षः समीपे विमुच विमुंच। हव्यवाहः हव्यं वहंतीति हव्यवाहः इमे ऋत्विजः त्वां हवंते। सोमपानार्थमाह्वयंति। तस्मादागच्छेति भावः। वंधुरे
ष्ठाः। तिष्ठतेर्विच्। तत्पुरुषे कृति बहुलमिति सप्तम्या अलुक्। प्रदिवः। सकारांतमव्ययं। सोमपेयं। पापान इत्यस्य भावे अचो यदिति यत्प्र
त्ययः। ईद्यतीतीत्वं। आर्धधातुकलक्षणो गुणः। यतोनाव इत्यस्य इत्याद्युदात्तत्वं। समासे तत्पुरुषउत्तरपदस्वरः। मुचतेर्लोटि आगमानुशास
नस्यानित्यत्वान्नुमभावः॥ ॥ अथ द्वितीया॥ ॥ आ याहि पूर्वीरति चर्षणीरां अर्य आशिष उप नो हरिभ्यां। इमा हि त्वा मतयः स्तोमतष्टा इं
द्र हवंते सख्यं जुषाणाः॥ ॥ हे इंद्र पूर्वीः बह्वीः प्रजाः अत्यायाहि अतिक्रम्यागच्छतु। अर्यः अस्माकं स्वामी त्वं आशिषः त्वमत्रागत्य सोमं
पिबेत्येवमादिकाः अस्माकं प्रार्थनाः हरिभ्यामश्वाभ्यां युक्तः सन् उपागच्छ। किंच तेन तव सख्यं जुषाणाः सेवमानाः स्तोमतष्टाः स्तोमकारिभिः
स्तोतृभिः कृताः इमाः मतयः स्तुतयो हवंते सोमपानार्थं शब्दाह्वयंति। हि प्रसिद्धो कर्तृव्यापारः काष्ठाग्नि पचतीतिवत्। आ संहितायां आङो नु
नासिकः छंदसीत्यनुनासिकः। अर्यः। ऋ गतौ। अर्यः स्वामिवैश्ययोरिति निपातनाद्यत्प्रत्ययः। यतोनाव इत्याद्युदात्तत्वे प्राप्ते अर्यस्य स्वा
म्याख्या चेदित्यंतोदात्तत्वं। आशिषः। क्विपि शास इदङ्हलोरित्युपधाया इत्वं। शासिवसिघसीनां चेति षत्वं। स्तोमेन तष्टाः तत्वक्षतनूक
रणे इत्यस्य निष्ठा। तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरः॥ ॥ अथ तृतीया॥ ॥ आ नो यज्ञं नमोवृधं सजोषा इंद्र देव हरिभिर्याहि तूयं॥

अहं हि त्वा मतिभिर्जोहवीमि घृतप्रयाः सधमादे मधूनां ॥ ॥ द्योतमान हे इंद्र नोस्माकं नमोवृधं नमसोन्नस्य वर्धकमिमं यज्ञं हरिभिः
रथेः सजोषाः सहप्रीतिस्त्वं रूपं क्षितमायाहि घृतप्रयाः घृतसहितानि प्रयांस्यन्नानि हवींषि यस्य स तथोक्तः ताहृशोहं मधूनां सोमानां स
धमादे सहमाद्यंति यत्र सोम्य इति सधमादः तस्मिन्स्थाने यातिभिः स्तुतिभिः त्वां जोहवीमि हि भृशमाह्वयामि खलु। जोहवीमि। यङ्लुकि
अभ्यस्तवेति संप्रसारणं गुणाय ङकोरिस्य अभ्यासस्य गुणः। यङो वीति ईडागमः। हियोगीदन्निघातः। अभ्यस्तानामादिरित्याद्युदात्तः। घृत
प्रयाः। घृतकृणदीप्त्योरित्यस्मादंजि हृषिभ्यः क्त इति क्तप्रत्ययः। बहुव्रीहौ पूर्वपदस्वरः॥ ॥ अथ चतुर्थी ॥ ॥ आ च त्वामेता वृषणा वहातो हरी
सखाया सुधुरा स्वंगा ॥ धानावदिंद्रः सवनं जुषाणः सखा सख्युः शृणवद्वंदनानि ॥ ॥ हे इंद्र वृषणा सेचनसमर्थौ सुधुरा शोभनया धुराजितो
स्वंगा शोभनावयवोपेतौ सखाया शोभनाख्यानावेता एतौ हरी नामवहतेः यज्ञं प्रत्यागमनाधरथे त्वामावहतः। अथ धानावत् भृष्टयवो
पेतं सवनं जुषाणः सेवमानः सखा सखिभूतः स इंद्रः सख्युः स्तोतुर्मम वंदनानि स्तोत्राणि शृणवच्च शृणुयात् वहातः। वहेर्लेट्याडागमे
पंचवायोगे प्रथमेति न निघातः। शृणवत्। श्रु श्रवण इत्यस्य लेट्याडागमे रूपं निघातः॥ ॥ अथ पंचमी ॥ ॥ कुविन्मा गोपां करसे जनस्य कु
विद्राजानं मघवन्नृजीषिन्। कुविन्म ऋषिं पपिवांसं सुतस्य कुविन्मे वस्वो अमृतस्य शिक्षाः॥ ॥ हे इंद्र कुविदपि नमापां जनस्य गोपारं क
रसे कुरु। तथा हे मघवन् धनवन् ऋजीषिन् सोमवन् हे इंद्र मां राजानं सर्वस्य स्वामिनं कुरु। कुविन्मामां ऋषिं अतींद्रियार्थस्य द्रष्टा
रं कुरु। ऋषिर्दर्शनादिति यास्कः॥ तथा सुत [illegible] तस्य सोमस्य पपिवांसं पातारं कुरु। अपि च मे मह्यं अमृतस्य क्षयरहितं वस्वो वसुनः श

तः। कुविद्योगादनिघातः॥ ॥ अथ पंचमी ॥ ॥ इंद्र सोमाः सुता इमे तान्दधिष्व शतक्रतो ॥ जठरे वाजिनीवसो ॥ ॥ हे शतक्रतो इंद्र इमे सोमाः सु
ताः ग्रावभिस्त्वदर्थमभिषुताः हे वाजिनीवसो वाजिनी धनेयद्वा वाजोन्नमाश्रु फलत्वेनास्तीति वाजिन्यः क्रियाः तासां वासक। हे इंद्र इतो नु सोमरसान्
जठरे दधिष्व धारय। वाजिनीवसो। वाजशब्दान्मत्वर्थे अत इनिठनाविति निप्रत्ययः। ऋन्नेभ्यो ङीबिति ङीप् तासां वसो संबुद्धौ। वतिगुणः। आम
न्त्रितत्वादाष्टमिकमनुदात्तत्वं ॥ ॥ इति तृतीयस्य तृतीये पंचमो वर्गः॥ ॥ अथ षष्ठी ॥ ॥ विद्माहि त्वा धनंजयं वाजेषु दधृषं कवे ॥ अधा ते सु
म्नमीमहे ॥ ॥ हे कवे क्रांतदर्शिन् इंद्र त्वा वाजेषु युद्धेषु दधृषं शत्रूणामभिभवितारं अत एव धनंजयं धनं जयतीति धनंजयः तादृशं त्वा त्वां वि
द्म जानीमः खलु। अधानंतरं ते तव सुम्नं धनमीमहे याचामहे। विद्म। विद ज्ञाने लिटि विदो लटो वेति मसो मादेशः। पादादित्वादनिघातः। धनं
जयं। जि जय इत्यस्मात् धन उपपदे संज्ञायां भृतृवृजिधारिसहितपिदमः इति खच्प्रत्ययः। अरुर्द्विषदजंतस्य मुमिति पूर्वपदस्य मुमागमः।
चित्वादंतोदात्तः। दधृषं। ञि धृषा प्रागल्भ्ये इत्यस्य यङ्लुकि अभ्यासस्य रीगागमाभावश्छांदसः तदंतात् पचाद्यच्। चितः अचि इति यङो लुक्। ल
घूपधगुणाभावेन धातुलोप इति तस्य प्रतिषेधः। चित्वादंतोदात्तः॥ ॥ अथ सप्तमी ॥ ॥ इममिंद्र गवाशिरं यवाशिरं च नः पिब ॥ आगत्या
वृषभिः सुतं ॥ ॥ हे इंद्र गवाशिरं गव्यमिश्रणोपेतं सोमं तथा यवाशिरं यवमिश्रणोपेतं वृषभिर्ग्रावभिः सुतमभिषुतं नोस्मदीयमिमं देव
यजनमागत्य पिब। गवाशिरमित्यत्र आङ्पूर्वस्य श्रीणातेः क्विपि अपस्पृधेथामानृचुरित्यादिना शिर इत्यादेशः। बहुव्रीहौ पूर्वपदप्र
कृतिस्वरः॥ ॥ अथाष्टमी ॥ ॥ तुभ्येदिंद्र स्व ओक्ये सोमं चोदामि पीतये ॥ एष रारंतु ते हृदि ॥ ॥ हे इंद्र तुभ्येत् तुभ्यमेव पीतये पानार्थं स्वे स्व

यसियस्यसोमास्यमस्यमादसेज्ञातेसतिगोअग्रागोमुद्करछिमभिः।रावृतंवर्षास्तनुषुत्रायंतेपालयंतीतिगो॰भामिधातानपचवर्याविहृपोषि।
ऋ॰सं॰भा॰२ वृषधूतस्य।धूञ्कंपनइत्यस्यनिष्ठायांयस्यतिभावेतीट्प्रतिषेधः।तृतीयाकर्मणीतिपूर्वपदस्वरः।नाभ्येचगतो।स्यास्म्याद्अभिवृष्यइ
नच्प्रत्ययः।म्यायनइतिश्येनः।चित्वादंतोदात्तः।जभार।हरतेर्लिटिणलिरूपं।हृग्रहोर्भश्छंदसीतिभकारः।यद्वृत्तयोगादनिघातः।लि
त्स्वरः।मदे।मदीहर्षेमिदोनुपसर्गइत्यप्प्रत्ययः।तस्यपित्वादनुदात्तत्वेधातुस्वरः।गात्रा।त्रेङ्पालनइत्यस्यआतोनुपसर्गेकइतिकः
सुपोडादेशः।एकादेशस्वरः।ववर्थ।वृञ्वरणइत्यस्यलिटिथलिऋतोभारद्वाजस्येतीट्प्रतिषेधः।गुणः।लित्स्वरः।।।अथाष्टमी।।५
शुनंहुवेमेति०।।५।।इतितृतीयस्यतृतीयेसप्तमोवर्गः।।४।।अयंतेअस्तुहर्यतइतिपंचर्चंषष्ठंसूक्तंवैश्वामित्रंबार्हतमैंद्रं।अत्रानुक्रम
णिका।अयंतेपंचबार्हतमैंद्रं।अत्रानुक्रमणिका।अयंतेपंचबार्हतंत्वाशीतादिदंसूक्तंषोडशिशस्त्रे।अयंतेअस्तुहर्यतइत्याद्यसूक्तो
विनियुक्तः।सूत्रितंच।अयंतेअस्तुहर्यतइत्योष्णिहंबार्हतंतोत्तवाविति।।तस्मिन्सूक्तेप्रथमा।।।अयंतेअस्तुहर्यतःसोमआहरिभिःसु
तः।।जुषाणइंद्रहरिभिर्नआगह्यातिष्ठहरितंरथं।।।हेइंद्रहरिभिःहरंतिसोमरसानेभिरितिहरयोअश्वाः।तेराःसुतःसर्वतोभिषुतोह राम
र्यतःकमनीयोजुषाणःप्रीतिविषयोयंसोमःतेतुभ्यमस्तुत्वंहरिभिरश्वैर्युक्तंहरितंहरिद्वर्णंरथमातिष्ठअधितिष्ठ।ततोनास्मानभिलक्ष्याग १०५
ह्यागच्छ।हर्यतः।हर्यगतिकांत्योरित्यस्मात्भृमृदशीत्यादिनाअतच्प्रत्ययः।चित्वादंतोदात्तः।हरितं।हृञ्हरणे।हृश्याभ्यामितनित्यतच्प्र
त्ययः।नित्वादाद्युदात्तः।रथं।रमुक्रीडायांहनिकुषिनीरम्यादिनाक्थन्प्रत्ययः।कित्वादनुनासिकलोपः।नित्स्वरः।।।अथद्वितीया।।।हर्य

न्नुषसमर्चयःसूर्यंहर्यन्नरोचयः।।विद्वांश्चि[illegible]र्यश्ववर्धसइंद्रविश्वाअभिश्रियः।।।हेइंद्रहर्यन्सोमंकामयमानस्त्वंउषसंउषः
कालंअर्चयःपूजयसि।तथाहर्यन्उदितंसूर्यंसोमंकामयमानस्त्वं।सूर्यमरोचयः।दीपयसि।हेहर्यश्वेंद्रविद्वान्एतत्सर्वंजानानश्चि
कित्वादस्मदभिलषितफलविषयज्ञानवांस्त्वंविश्वाःसर्वाःश्रियोनःसंपदःअभिवर्धसे।अभिमतफलप्रदानेनअभितोवर्धयसि।चिकि
त्वान्।कितज्ञानइत्यस्यक्वसोरूपं।प्रत्ययस्वरः।वर्धसे।वृधुवर्धनइत्यस्यांतर्भावितण्यर्थस्यलटिरूपं।निघातः।।अथतृतीया।।द्या
मिंद्रोहरिधायसंपृथिवींहरिवर्पसं।।अधारयद्धरितोर्भूरिभोजनंययोरंतर्हरिश्चरत्।।।सोयमिंद्रोहरिधायसंहरितोहरितवर्णधा
यसोधारकाररूमयोयस्याःसातांद्यामधारयत्।तथाहरितवर्पसंरूपंयथाभिर्हरितवर्णांपृथिवीमधारयत्।हरितोहरिवर्णयाद्यावा
पृथिव्योर्मध्येस्वकीययोरश्वयोर्भूरिभूतंभोजनंभुज्यतइतिभोजनंयवसादिलभ्यते।तयोश्चद्यावापृथिव्योरंतर्मध्येहरिरिंद्रश्चरत्
चरति।तेषांवापृथिव्याविंद्रोधारयदित्यर्थः।हरिधायसं।डुधाञ्धारणपोषणयोरित्यस्माद्वहिहाधाञ्भ्यश्छंदसीत्यसुन्।णिदित्यनुवृत्ते
रातोयुक्।बहुव्रीहौपूर्वपदस्वरः।पृथिवीप्रथेःषिवन्संप्रसारणंचेतिषिवन्प्रत्ययः।षिद्गौरादिभ्यश्चेतिङीष्।प्रत्ययस्वरेणांतोदात्तः।हरि
वर्पसं।हृञ्संभक्तौरङीडिभ्यांरूपस्वांगयोरित्यसुन्प्रत्ययः।युगागमश्च।संभज्यते।तद्वितवर्णारूपं।बहुव्रीहौपूर्वपदस्वरः।हरितोः
हल्हृहरणइत्यस्मात्हसरुहियुषिभ्यइतिरितिप्रत्ययः।प्रत्ययस्वरः।भोजनं।भुजपालनाभ्यवहारयोरित्यस्मात्कृत्यल्युटोबहुलं
मितिकर्मणिल्युट्।लित्स्वरः।अंतः।स्वरादिष्वंतोदात्तत्वेनपठितत्वादंतोदात्तः।चरत्।चरतिर्गत्यर्थः।लङिरूपं।यद्वृत्तयोगादनिघातः।।७।।

तृ॰सं॰भा॰३

॥अथ चतुर्थी॥ ॥ जज्ञानो हरितो वृषा विश्वमा भाति रोचनं। हर्यश्वो हरितं धत्त आयुधमा वज्रं बाह्वोर्हरिं॥ [illegible]
॥वृषा कामानां वर्षको हरितो हरिद्वर्णोपेतो जज्ञानः। अतइंद्रो विश्वं सर्वं रोचनं दीप्यमानं लोकमाभाति सर्वतः प्रकाशयति। तथा ह
र्यश्वः इंद्रो हरितः हरिद्वर्णोपेतमायुधं धत्ते। बाह्वोर्धत्ते। तथा हरिं शत्रूणां प्रहारकं वज्रं बाधत्ते। जज्ञानः। जनी प्रादुर्भावे इत्यस्य लिटः का
नच्। गमहनेत्यादिनोपधालोपः। चित्वादंतोदात्तः। भातिभा दीप्तावित्यस्मात् भावितण्यर्थस्य लटि रूपं। रोचनं। रुच दीप्तावित्यस्माद् अनु
दात्तेतश्च हलादेरिति युच्। चित्वादंतोदात्तः। बाह्वोः। उदात्तयणो हल्पूर्वादिति विभक्तेरुदात्तत्वं॥ ॥अथ पंचमी॥ ॥ इंद्रो हर्यंतमर्जुनं व
ज्रं शुक्रैरभीवृतं॥ अपावृणोद्धरिभिरद्रिभिः सुतमुद्गा हरिभिराजत॥ ॥सोयमिंद्रः हर्यंतं कमनीयमर्जुनं शुभ्रं शुभ्रत्वमुपपादयति। शु
क्रैः शुभ्रैः दीप्त्यादिभिरभिवृतं। व्याप्तं वज्रं वेगवंतं हरिभिः हरंतेभिः सोमरसानिति तैरद्रिभिर्ग्रावभिः सुतमभिषुतं अपावृणोत्। आवर
णरहितमकरोत्। तथा च मंत्रदर्शः। पूषा राजानमाघृणिरपगूळ्हं गुहा हितं। अविंददिति। तथा गाः पणिभिरपहृता गाः हरिभिरश्वैरुण
तः सइंद्रः उदाकृत्वा बलान्निरगमयत्। अर्जुनं। अर्ज सर्ज अर्जन इत्यस्मादेः अर्जेर्णिलुक् चेति उनन्। नित्स्वरः। अभिवृतं। गतिरनंतर इति ग
तेः प्रकृतिस्वरः। त्वं। आ कृता अजगतिक्षेपणयोः लङि व्यत्ययेनात्मनेपदं निघातः॥ ॥ इति तृतीयस्य तृतीये षष्ठो वर्गः॥ ॥ आमंद्रैरिति
पंचर्चं सप्तमं सूक्तं वैश्वामित्रं [illegible] मिंद्रस्याद्यो बृहती इत्यनुक्रमणिका। पूर्वसूक्ते बार्हतं त्विति उक्तत्वादस्यापि बार्हतत्वं। विशेषविनियोग
लैंगिक [illegible] इति॥ तत्र प्रथमा॥ ॥ आमंद्रैरिंद्र हरिभिर्याहि मयूररोमभिः॥ मा

राम
११२

क्षाः प्रयच्छ। करत् [illegible] मूरूपं। कृ वि [illegible] तः। मत्रजीषिमित्यत्र संहितायां इत्यक इति प्रक्षभावः। दुस्त्वं। आप
विर्वांसः पापान इत्यस्य कर्वे व्ये पेक [illegible] धि सां मेति इट्। उगमः। प्रत्ययस्वरः। शिक्षः। शिक्ष निदानकर्मा अस्माल्लेट्यडागमे रूपं। कुविद्योगाद
निघातः। आगमा अनुदात्ता इत्याडोनुदात्तत्वे धातुस्वरः॥ ॥अथ षष्ठी॥ ॥ आ त्वा बृहंतो हरयो युजाना अर्वागिंद्र सधमादो वहंतु॥ प्रयेद्वि
तादिव कृजंत्याता ॥ सुसंमृष्टासो वृषभस्य मूराः॥ ॥ हे इंद्र त्वा त्वां बृहंतो महांतो युजाना रथेयुज्यमाना हरयोश्वाः सधमादः सहमाद
यंतः सेतो वा अर्वाक् अस्मदभिमुखमावहंतु। वृषभस्य कामानां वर्षितुरिंद्रस्य मूराः शत्रूणां मारकाः सुसंमृष्टासः इंद्रस्य हस्ताभ्यां पृष्ठभागेषु
सुसंस्पृष्टाः दिवो नभसः सकाशादागच्छंतो या आताः अभिमुख्येन गमयंते प्राणिभिस्तत्कार्यं प्रतीति। आता दिशः सर्वा द्विता द्विधं तथा भवति
प्रकर्षेण प्रकर्षेण संधयंति युजानाः। युजिर् योगे इति युधि [illegible] किं चेति विद्यादानूचुकित्वादंतोदात्तः। सधमादः। मदी हर्षे इत्यस्मात्
क्विप् कृदुत्तरपदस्वरः। द्विता द्विशब्दात्संख्याया विधार्थे धेति धा प्रत्ययः। धकारस्य तकार छांदसः। प्रत्ययस्वरः। दिव ऊडिदमिति
विभक्तेरुदात्तत्वं। आताः। अत सातत्यगमने इत्यस्मात्कर्मणि घञ्। व्यत्ययेनाद्युदात्तः॥ ॥अथ सप्तमी॥ ॥ इंद्र पिब वृषधूतस्य वृष्ण
आ यं ते श्येन उशते जभार॥ यस्य मदे च्यावयसि प्र कृष्टीर्यस्य मदे अप गोत्रा ववर्थ॥ ॥ हे इंद्र वृषधूतस्य ग्रावभिरभिषुतं वृष्णः अभि
मतफलसेक्तुः सोमं पिब। श्येनः। शंसनीयं गच्छति [illegible] दोलूपः सुपर्णः। उशते सोमं कामयते तुभ्यं यं सोमं माजहार आजहार यस्य सोमस्य
मदे हर्षे संजाते सति कृष्टीः आकर्षति वशीकुर्वंति कर्मणा सर्वाणि इति कृष्टयो मनुष्याः तान् संपन्नभूतान् मनुष्यान् प्रच्यावयसि प्रकर्षेण पात

ऋ·सं·भा·३ थादिस्वरः॥ अथ तृतीया॥ गंभीराँ उदधीँरिव क्रतुं पुष्यसि गा इव। प्र सुगोपा यवसं धेनवो यथा ह्रदं कुल्या इवाशत॥ हे इंद्र त्वं गंभीरान्
महावकाशानुदधीन् समुद्रानुदके यथा पोषयसि तद्वत् क्रतुं यजमानस्य कर्म मिमं अभिमतफलप्रदानेन पुष्यसि पोषयसि। अत्र दृष्टांतः। यथा
सुगोपाः समीचीनो गोपालः यवसेन गाः पोषयति। तद्वत्। यथा धेनवो यवसं तृणादिकं प्राप्नुवंति। तद्वत्। त्वं सोमान् प्राप्नोषि। ते च सोमाः कुल्याः
कृत्रिमसरितो ह्रदं महाजलाशयं यथा प्राप्नुवंति तद्वत् त्वामाशत व्याप्नुवंति। गंभीरान्। गाधृ प्रतिष्ठालिप्सयोर्ग्रंथे च। अस्माद्गंभीरगंभीरा
वित्यनेन सूत्रेणेरन्प्रत्ययः। नुमागमो पधाकृस्य भकारः सर्वे निपात्यंते। नित्वादाद्युदात्तः। उदधीनिव। उदकशब्द उपपदे दधातेरधिकरणे
र्थे कर्मण्यधिकरणे चेति किप्रत्ययः। उदकशब्दस्य पेषंवासवाहनधिषु चेति उदभावः। कृत्स्वरः। इवेन विभक्त्यलोपः। पुष्यसि। पुष पुष्टौ चेत्य
स्मात् तस्मीतरापर्थस्य लिंङि रूपं। निघातः। सुगोपाः। गोपायतेः क्विपि रूपं यथाययेति निघातः। आशत। अशु व्याप्तावित्यस्मात् लङि बहुलं
छंदसीति विकरणस्य लुक्। निघातः॥ अथ चतुर्थी॥ आ नस्तुजं रयिं भरांशं न प्रतिजानते। वृक्षं पक्वं फलमंकीव धूनुहींद्र संपारणं
वसु॥ हे इंद्र नोस्माकं तुजं शत्रूणां बाधकं रयिं धनेनोपलक्षितं पुत्रमाभर संपादय। तत्र दृष्टांतः। अंशं न। यथा पिता प्रतिजानते व्यवहारज्ञा राम
य पुत्राय स्वकीयस्य धनस्य भागं ददाति तद्वत्। किंच पक्वफलं प्रति वृक्षमंकीव अंकुशी यथा धुनोति। तथा त्वं संपारणं अस्मदिच्छायाः सम्य ६०३
क्पूरकं वसु धनं धूनुहि चालय प्रयच्छेत्यर्थः। प्रतिजानते। ज्ञा अवबोधने इत्यस्य शतरि रूपं। प्रादिसमासः। शतुरनुम इति विभक्तेरुदात्तत्वं। धू
नुहि। धूञ् कंपने इत्यस्य लोटि रूपं। संपारणं। पॄ पालनपूरणयोरित्यस्य ण्यंतस्य करणे ल्युट्। समासे कृत्स्वरः॥ अथ पंचमी॥ स्वयुरिंद्र स्व

राळसि स्मद्दिष्टिः स्वयशस्तरः॥ स वावृधान ओजसा पुरुष्टुत भवा नः सुश्रवस्तमः॥ हे इंद्र स्वयुर्धनवान् उसितया त्वं स्वराट् स्वर्गस्य राजासि
स्मद्दिष्टिः भद्रवाक्यः स्वयशस्तरः अतिशयेन प्रभूतकीर्तिरसि। हे पुरुष्टुत बहुभिराहूतेंद्र स त्वमोजसा बलेन वावृधानः वर्धमानः सन् नोस्म
दर्थं सुश्रवस्तमः अतिशयेन शोभनान्नोपेतो भव। स्वयुः स्वशब्दान्मत्वर्थीयो युः स्वराट्। राजृ दीप्तौ क्विप्। दृश्यादिना षत्वं। स्मद्दिष्टिः स्मत् सुमदि
त्यर्थे उकारलोपश्छांदसः। बहुव्रीहौ पूर्वपदस्वरः। पुरुष्टुत संहितायां स्तुतस्तोमयोश्छंदसीति षत्वं। भव। व्यत्ययेन लोटि रूपं। द्व्यचोतस्तिङ इति
संहितायां दीर्घः। सुश्रवस्तमः। श्रवः शब्दो सुत्रंतः बहुव्रीहौ आद्युदात्तं द्व्यच्छंदसीति उत्तरपदाद्युदात्तत्वं। तदंतादतिशायने तमप्। तस्यापि
त्वादनुदात्तत्वे बहुव्रीहिस्वरः॥ इति तृतीयस्य तृतीये नवमो वर्गः॥ युध्मस्य ते इति पंचर्चमष्टमं सूक्तं विश्वामित्रमैंद्रं युध्मस्येत्यनुक्र
मणिका। दशरात्रे चतुर्थेहनि निष्केवल्ये युध्मस्य त इति सूक्तं निविद्धानं। सूत्रितं च। कुह श्रुत इंद्रो युध्मस्य त इति निष्केवल्य इति स्व
भस्येकाहेपि निष्केवल्य इदं सूक्तं निविद्धानं। सूत्रितं च। युध्मस्य त इति मध्यंदिन इति॥ तत्र प्रथमा॥ युध्मस्य ते वृषभस्य स्वराज उग्र
स्य यूनः स्थविरस्य घृष्वेः। अजूर्यतो वज्रिणो वीर्याणींद्र श्रुतस्य महतो महानि॥ हे इंद्र युध्मस्य योधनशीलस्य वृषभस्य अभिमतफल
सेचकस्य स्वराजः धनाधिपतेः उग्रस्य समर्थस्य यूनो नित्यतरुणस्य स्थविरस्य चिरंतनस्य घृष्वेः शत्रूणां संघर्षकस्य अजूर्यतः जरारहित
स्य वज्रिणः श्रुतस्य त्रिषु लोकेषु प्रसिद्धस्य अत एव महतस्ते तव वीर्याणि महानि महांति खलु। युध्मस्य। युध संप्रहारे। इषुयुधिदृशीत्यादि
ना मक् प्रत्ययः। यूनः। यातेः कनिन् युवृषीत्यादिना कनिन्। श्वयुवमघोनामतद्धित इति संप्रसारणं। नित्स्वरः। स्थविरस्य। अजिर शिशिर शिथिल

तृ·सं·भा·२

त्यादिना किरच्प्रत्ययांतो निपातितः। धृषेः। धृषु संघर्षे। कृ विघृषिछंदसीत्यादिना किन्प्रत्ययांतो निपात्यते। निलादाद्युदात्तः॥१॥ अथ द्वितीया॥
महाँ असि महिष वृष्ण्येभिर्धनस्पृदुग्र सहमानो अन्यान्॥ एको विश्वस्य भुवनस्य राजा स योधया च क्षयया च जनान्॥ हे महिष महनीय
उग्र इंद्र त्वं महान् असि धनस्पृत् धनानि वान भोगत्यागैः पारं नयस्त्वं वृष्ण्येभिः वीर्यैरन्यान् शत्रून् सहमानोभिभवत् वर्तसे। तथा विश्वस्य सर्वस्य
भुवनस्य एकः असहायो राजा स त्वं योधय च संपन्नान् प्रहरबनान क्षयय निवासय बाधकान् हत्वा साधुजनान् स्वस्थाने स्थापयेत्यभिप्रा
यः। महिषा महे पूजायां मेति। संधोष्टिषच् जितिटिषच् प्रत्ययः। आमंत्रितत्वाद निघातः। वृष्ण्येभिः वृष्णि भवानि भाव श्छंदसीति यत्। यतो भोवद्
त्याद्युदात्तत्व॥ योधय युधसंप्रहार इत्यस्य ण्यंतस्य लोटि रूपं। चादिषु चेति न निघातः। णित्स्वरः। क्षयय क्षि निवासगत्योरित्यस्य णपंतस्य लो
टि रूपं। अत्रापि पूर्ववदनिघातः॥२॥ अथ तृतीया॥ प्र मात्राभी रिरिचे रोचमानः प्र देवेभिर्विश्वतो अप्रतीतः॥ प्र मज्मना दिव इंद्रः पृथि
व्याः प्रोरोर्महो अंतरिक्षादृजीषी॥ रोचमानो दीप्यमानो विश्वतः सर्वैरप्रतीतः एतावदस्य सामर्थ्यमित्यपरिच्छिद्यमानः ऋजीषी सोमवा
निंद्रः मात्राभि मीयंते परिच्छिद्यंत इति मात्राः त्रिलोक्याः। तेभ्योपि प्ररिरिचे प्रकर्षेण महत्तया अतिरिक्तो भूत् तथा देवेभिर्देवेभ्योपि मज्मना
मज्जयति शत्रून् दुःखसागर इति मज्म बलं तेन बलेन प्ररिरिचे तथा दिवः पृथिव्याः द्यावापृथिवीभ्यां पं प्ररिरिचे तथात्र — उरोर्विस्तारवतो नि राम
महो महतोंतरिक्षादपि प्ररिरिचे॥ मात्राभिः। मा माने अस्मान् अट्टेत्यस्मात् बहुलमायां अभसि भ्यस्त्र इति त्र प्रत्ययः। निलाद्युदात्तः। इलोपपूर्वस्य दी १०४
र्घणा इति संहितायो [illegible] रूपं। तस्य जसार्वधातुकः स्वरे धातुस्वरः। अप्रतीतः इण् गतौ कर्मणि क्तः।

त्वा के चिन्नियमन् विं न पाशिनो ऽति धन्वेव [illegible] यि नृभिर्मयूररोमभिः। मयूररोमसदृश्य रोमयुक्तैर्हरिभिरश्वैरुपेतस्त्व
मायाहि। यज्ञं प्रत्यागच्छ। केचिदपि [illegible] त्वा नियमन् नियमन् मा नियच्छंतु। गमनप्रतिबंधमा कुर्वंत्वित्यभिप्रायः। प्रतिबंधे दृष्टांतः। विं न य
था पाशिनः पाशहस्ता व्याधा वेगेन गच्छंतं पक्षिणं निगच्छंति। तद्वन्मा नियच्छंतु। यद्वा धन्वेव यथा पाशाः धन्व मरुदेशं शीघ्रमभिगच्छंति
तद्वद्गमनं प्रतिबंधकानतीत्य शीघ्रमागच्छ। मंद्रैः। मदि स्तुत्यादिष्वित्यस्य स्फायितंची त्यादिना रक् प्रत्ययः। इदित्वान्नुम्। प्रत्ययस्वरः। मयू
र रोमभिः। मयूररोमवद्रोमाणि येषामिति सप्तम्युपमान पूर्वपदस्य बहुव्रीहिर्वोत्तरपदलोपश्चेति समासः उत्तरपदलोपश्च मयूरशब्दो मी
नाते रूरन्निति करन् प्रत्ययांतः। मीनाति सर्पानिति मयूरो बहीं निलादाद्युदात्तत्वे प्राप्ते मादीनामिति सूत्रेण मध्योदात्तः। बहुव्रीहौ पूर्वपदप्र
कृतिस्वरः। यमन् यमु उपरमे इत्यस्य लेट्यडागमे रूपं। इहि। इण् गतावित्यस्य लोटि रूपं॥१॥ अथ द्वितीया॥ वृत्रखादो वलंरुजः पुरां दर्मो
अपामजः॥ स्थाता रथस्य हर्योरभिस्वर इंद्रो दृळ्हा चिदारुजः॥ सोयमिंद्रो वृत्रखादः वृत्रं खादति हिनस्तीति वृत्रखादः वलं रुजः रुणे
त्याकाशमिति वलो मेघः तस्य भंजकः। तथा च मंत्रवर्णः। बिभेद वलमिति। ततोपामजः मेघभेदनद्वारापां प्रेरकः पुरां शत्रुसंबंधिनीनां दर्मः दा
रकः। तथा हर्योरश्वयोरभिस्वरे अस्माद भिमुख्येन प्रेरणे निमित्ते भूते सति रथस्य स्थाता रथमधिष्ठाता तथा दृळ्हा चित् दृढानामति बलवतां श
त्रूणामपि आरुजः समंताद् भंजको भवति। वृत्रखादः। खाद भक्षणे इत्यस्मात् कर्मण्यण्। कृदुत्तरपदस्वरः। वलंरुजः रुजो भंगे कर्मण्युपपदे मूलवि
भुजादित्वात्क प्रत्ययः। तत्पुरुषे तिबहुलमिति द्वितीयाया अलुक्। थाथादिस्वरः। आरुजः रुजो भंग इत्यस्मादिगुपधलक्षणः कः समासे था

यद्वृत्तयोगादनिघातः। अञ्जादिप्रत्ययपरत्वाभावादन्नाभ्यस्तानामादिरिति स्वरो न भवति। प्रत्ययस्वरः। त्वाया। त्वामिच्छतीत्यर्थे सुप आत्मनः क्य
ऋ॰सं॰भा॰२ च्। कव्यध्वरपृतनस्यर्चि लोप इति आकारलोपः। क्याच्छन्दसीत्युप्रत्ययः। प्रत्ययस्वरः। पातवे। पायानं। तुमर्थे सेसेन् इति तवेप्रत्ययः। अन्तश्च तवै यु
गपदिति धात्वंतस्य प्रत्ययस्य चोदात्तत्वं। उत्तर इति प्रगृह्यसंज्ञा॥ ॥ इति तृतीयस्य तृतीये दशमो वर्गः॥ ॥ मरुत्वानिति पंचर्चं नवमं सूक्तं
त्रैष्टुभमैंद्रं। मरुत्वानित्यनुक्रमणिका। दशरात्रे चतुर्थेहनि मरुत्वतीयशस्त्र एतन्निविधानं सूत्रितं च। श्रुधी हवमिंद्र मरुत्वाँ इंद्र इति म
रुत्वतीयमिति। ऋषभ नाम्न्येकाहे मरुत्वतीयशस्त्र एतन्निविधानं सूत्रितं च मरुत्वाँ इंद्र युध्मस्य ते इति मध्यंदिन इति॥ ॥ तत्र प्रथमा॥ ॥
मरुत्वाँ इंद्र वृषभो रणाय पिबा सोममनुष्वधं मदाय। आ सिंचस्व जठरे मध्व ऊर्मिं त्वं राजासि प्रदिवः सुतानां॥ ॥ हे इंद्र यो वृषभो अपां
वर्षिता मरुत्वान् मरुतो देवविशस्तद्वान्। स त्वं अनुष्वधं स्वधया हविषा तृतीय पुरोडाशादिरूपेण तेन अनुगतं सोमं रणाय रमणीयाय संग्रामा
र्थं मदाय वंसो मं पिब। किंच मध्वः मदकरस्य सोमस्य ऊर्मिं सिधानं वक्रूरसं जठरे जग्ध्यमन्नमस्मिन्निति जठरमुदरं तस्मिन्नुदरे आसि
चस्व। सर्वतः पालयं। यन्त्वं प्रदिवः पूर्वेष्वहःसु सुतानां अभिषुतानां सोमानां राजासि ईश्वरोऽसि। न केवलमधुनातनानामिति भावः। उ राम.
रुमर्थं यास्को ब्रवीति। मरुत्वानिंद्र वृषभो वर्षिता रणाय रमणीयाय संग्रामाय पिब सोममनुष्वधमन्नमदाय मदनीयाय जैत्रा १५
यासिंचस्व जठरे मधुन ऊर्मिं मधु सोममित्यौपमिकं माद्यतेरिदमपीतरन्मध्वेतस्मादेव त्वं राजासि पूर्वेष्वहःसु सुतानामिति। अनुष्वधं स्व
धामनुगमय्य वर्तमाने अत्यादयः क्रांताद्यर्थे द्वितीययेति समासः। संहितायां पूर्वपदादिति षत्वं। निरुदकादित्वादंतोदात्तत्वं। ऊर्मिं अर्तेरूच्चेति मि

प्रत्ययः। धातोरूवादिशोरपरः। प्रत्ययस्वरः॥ ॥ मरुत्वतीये ग्रहस्य याज्या। सूत्रितं च। सजोषा इंद्र सगणो मरुद्भिरिति भक्षपिलेन त्वात्रम्
मि॥ ॥ सेषा सूक्ते द्वितीया॥ ॥ सजोषा इंद्र सगणो मरुद्भिः सोमं पिब वृत्रहा शूर विद्वान्॥ जहि शत्रूँ रप मृधो नुदस्वाथाभयं कृणुहि विश्व
तो नः॥ ॥ हे शूर बलवन् हे इंद्र सजोषाः सर्गतो देवैर्मरुद्भिः सगणः। वृत्रहा वृत्रस्य हंता विद्वान् कर्मविषयाभिज्ञस्त्वं सोमं पिब तथा नः शत्रू
न् जहि। मृधः। हिंसकान् शत्रून्त्वपनुदस्वायद्धा मृधः हिंस्यन्ते त्र प्राणिन इति मृधः संग्रामः। तत्र वर्तमानान् शत्रून् अपनुदस्व। अथानंतरं नो स्मा
कं विश्वतः सर्वतः अभयं कृणुहि कुरु। सपीतान् भयरहितानस्मान् कुर्वित्यर्थः। वृत्रहा ब्रह्म भ्रूणवृत्रेषु क्विप्। अभयं। ञिभी भय इत्यस्मादेरच्। न
ञ् समासे नञ्स्वरः। विश्वतः पंचम्यास्तसिल्। लित्स्वरः॥ ॥ अथ तृतीया॥ ॥ उत ऋतुभिर्ऋतुपाः पाहि सोममिंद्र देवेभिः सखिभिः सुतं नः॥
यौं आभजो मरुतो ये त्वान्वहन्नदधुस्तुभ्यमोजः॥ ॥ उत अपि च ऋतुपाः कालनिर्वाहकतया ऋतूनां पाता ऋतुषु सोमं पिबतीति वा ऋतुपाः
यद्वा ऋतुभिर्मरुद्भिः सह सोमं पिबतीति ऋतुपाः। तादृश हे इंद्र सखिभिः समानस्थाने ऋतुभिः मरुद्भिः सहितस्त्वं नः अस्माकं सुतमभिषुतं
सोमं पाहि पिब। किंच यान् मरुतः आभजः युधसहायार्थं असेवथाः। ये च मरुतः त्वा त्वां युधि स्वामिनमन्वभजत। ततस्त्वे वृत्रहननं त्यजन् सितेमरुत
स्तुभ्यं त्वदर्थं ओजो युधे शत्रुहननादिरूपं पराक्रममदधुः अकुर्वन्। आभजः भज सेवायामित्यस्य लङि रूपं। यद्वृत्तयोगादनिघातः। अह
न्नहन हिंसागत्योरित्यस्य लङ् उसिपो हल्ङ्यादिलोपः। पादादित्वादनिघातः। अदधुः दधातेर्लङि ङितः सिजभ्यस्तेति जुसः भस्य भेदादनिघा
तः। मरुत्वतीये ग्रहस्य याज्या ये त्वाहिहत्य इत्येषा सूत्रितं च। ये त्वाहिहत्ये मघवन्नवर्धन्निति याज्येति॥ ॥ सैषा सूक्ते चतुर्थी॥ ॥ ये त्वाहिह

ऋ॰सं॰भा॰२

त्येमघवन्नवर्धन्ये शांबरे हरिवो ये गविष्टौ॥ ये त्वा नूनमनुमदंति विप्राः पिबेंद्र सोमं सगणो मरुद्भिः॥ ॥ हे मघवन् मघवन्निंद्र ये मरुतः अहि
हत्ये वृत्रहनने रूपे कर्मणि त्वामवर्धयन् प्रहर भगवो जहि वीरयस्वेति बलदानेनावीवृधन्। हे हरिवो अश्ववन्निंद्र शांबरे शंबरेण सह युद्धे त्वामवीवृध
न् इंद्रः शंबरमवधीदित्यस्मिन्नर्थे मंत्रवर्णः। यः शंबरं पर्वतेषु क्षियंतं चत्वारिंश्यां शरद्यन्वविंदत्। ओजायमानं यो अहिं जघानेति॥ तथा ये
मरुतः गविष्टौ पणिनामकेरसुरैः सह गवार्थं युद्धे त्वामवीवृधन्। विप्रा मेधाविनो ये च मरुतः नूनमिदानीं त्वामनुमदंति तादृशैस्तैर्मरु
द्भिः सगणः सन् इमं सोमं पिब। अहिहत्ये हंतेर्षणी वहनस्तचेति क्यप्कृदुत्तरपदस्वरः। अवर्धयन् वृधु वृद्धौ। वित्यस्य ण्यंतस्य लङि रूपं छंद
स्युभयथेति तेरार्धधातुकत्वाण्णिलोपः। यद्वृत्तयोगादनिघातः। शंबरे। शंबरस्येदमित्यर्थे तस्येदमिति प्रत्ययः। गविष्टौ। इषु इच्छायां।
भावे क्तिन्। बहुव्रीहौ पूर्वपदस्वरः। अनुमदंति। मदि स्तुत्यादिष्वित्यस्य लिटि व्यत्ययेन परस्मैपदं। आगमानुशासनस्यानित्यत्वान्नुम
भावः। तेर्लसार्वधातुकस्वरे कृते धातुस्वरः। तिङ्चोदात्तवती तिगतेर्निघातः॥ ॥ अथ पंचमी॥ ॥ मरुत्वंतं वृषभं वावृधानमकवारिं दिव्यं
शासमिंद्रं॥ विश्वासाहमवसे नूतनायोग्रं सहोदामिह तं हुवेम॥ ॥ हे इंद्र मरुत्वंतं मरुद्भिः स्तुतं वृषभं मेघभेदनद्वारा वर्षकं वावृधा राम.
नं वृत्रहननादिकर्मसु वृद्ध्या हनं वर्धमानमकवारिं प्रभूतशत्रूकं यद्वा अकुत्सितारिं। तथा च मंत्रः। स्वरिरमत्रो ववक्षे रणायेति। दिव्यं दिविस्व १०६
र्गलोके वर्तमानं शासं। हितोपदेशेनाहितपरिहाराभ्यां शासितारं विश्वासाहं विश्वस्य प्रतिपक्षस्य सर्वस्याभिभवितारं उग्रं शत्रुषु क्रूरं सहो
दां युधि सहकारिणो मरुतो बलप्रदं तं तादृशं सामर्थ्येनमिंद्रं नूतना। येन नवतराय अवसे रक्षणाय इह कर्मणि हुवेम त्वामाह्वयेम नूतनाय नवशा

प्रादिसमासः। नजासमासेन [illegible] सादिको मनिन्प्रत्ययः। जनोंजज्ञानशीति जस्त्वं। चित्वादंतोदात्तः। पृथिव्याः।
उदात्तयण इह लूर्वादिति विभक्तेरुदात्तत्वं॥ ॥ अथ चतुर्थी॥ ॥ उरुं गभीरं जनुषाभ्युग्रं विश्वव्यचसमवतं मतीनां॥ इंद्रं सोमासः प्रदिवि
सुतासः समुद्रं न स्रवत आ विशंति॥ ॥ उरुं महांतं अत एव गंभीरं महोवकाशं जनुषा जन्मना यस्य भावत एवात्र शत्रूणां भयंकरं गभीर
त्वमेवोच्यते। विश्वव्यचसं विश्वव्याप्तमतीनां स्तोतॄणां वा अवतं रक्षकं। तादृशमिंद्रं प्रदिवि पूर्वेद्युरहः सु सुतासो ग्रावभिषुताः सोमाः अभि
मुख्येनाविशंति। तत्र दृष्टांतः। समुद्रं न यथा स्रवतः स्रवंत्यो नद्यः समुद्रमाविशंति। तद्वत् जनुषा। जनी प्रादुर्भाव इत्यस्मात् जनेरुसि रि
त्युसि प्रत्ययः। विश्वव्यचसं। व्यच व्याजीकरण इत्यस्मादसुन्। व्यचेः कुटादित्वमनसीति वक्तव्यमित्यत्रानसीति पर्युदासात् ङित्वाभावः।
विश्वव्यचा इति इंद्रस्य नाम। बहुव्रीहौ विश्वं संज्ञायामिति पूर्वपदस्यांतोदात्तत्वं। अवतं। अव रक्षणादिषु। औणादिकोतन्प्रत्ययः। चित्वादं
तोदात्तः॥ ॥ अथ पंचमी॥ ॥ यं सोममिंद्र पृथिवीद्यावा गर्भं न माता बिभृतस्त्वाया॥ तं ते हिन्वंति तमु ते मृजंत्यध्वर्यवो वृषभ पातवा उ॥ ॥ हे इंद्र पृ
थिवीद्यावापृथिव्यौ त्वाया कामनया यं सोमं बिभृतः। अंतर्धारयतः। अत्र दृष्टांतः। गर्भं न। यथा माता गर्भं बिभर्ति तद्वत्। हे वृषभ कामानाव
र्षक हे इंद्र अध्वर्यवः अध्वरं यजमानाय इच्छंतः तं त्वदर्थं तं सोमं हिन्वंति प्रेरयंति। किं च ते तव पातवे पानाय तं सोमं मृजंति शोधयंति। उप
सिधौ पृथिवी द्यावा दिवो द्यावेति द्यावादेशः। आद्युदात्तः। नोत्तरपदे अनुदात्ता द्यावापृथिवी रुद्र पूषणमधिष्ठित्य त्वत्र पर्युदासाद्देवताद्वंद्वे चेत्युभ
यपदप्रकृतिस्वरः। कृतसमासस्य विपर्यासश्छांदसः। बिभृतः। डुभृञ् धारणपोषणयोरिति तस्य स्मान्लुटि भृञामिदित्यभ्यासस्येत्वं।

स्मिन्नेवाहनि अस्य सोमस्य कामे पिपासायां सत्यां। गिरिष्ठां गिरिस्थां उच्चस्थाने वर्त्तमाने अंशोः सोमलताखंडविशिष्टस्य ऋजीषस्य पी
यूषं अभिनवं रसमपिबः। पीतवानसि। उत्पत्तिक्षण एव सोमपाने कारणं दर्शयति। तेतव जनित्री माता योषा युवतिः अदितिः महः मह
तः पितुर्जनकस्य कश्यपस्य ददे सूतिकागृहे अग्रे त्वत्पानात्प्रथमं तादृशं सोमं पर्यसिंचत्। तवास्ये पतितो क्षारयत्। जायथाः। जे
नी प्रादुर्भाव इत्यस्य लङि बहुलं छंदसीत्युडभावः। यद्वृत्तयोगादनिघातः। जनित्री। जनितामंत्रे इति निपातनात्स्मलोपः॥ ॥ अथ तृतीया॥
उपस्थाय मातरमन्नमैट्ट तिग्ममपश्यदभि सोममूधः। प्रयावयन्नचरद्गृत्सो अन्यान्महानि चक्रे पुरुधप्रतीकः॥ ॥ स इंद्रः मातरमुपस्थाय
प्रार्थयित्वा यत्र मे इति मन्नमयाप्नवत इत्यैट्टिरध्येषणाकर्मेति यास्कः। ततस्तस्या ऊधनुधसि क्षीररूपेण स्थितं तिग्मं दीप्तं सोममभ्यपश्यत्।
सर्वादर्शयित्। गृत्सः अभिकांक्ष्यते। सर्वैर्देवैः शत्रुहननार्थमिति गृत्स इंद्रः अन्यान्सपत्नान्स्वस्वस्थानात्प्रकर्षेण च्यावयन्नचरत्। सर्वत्र
चरति किं पुरुधप्रतीकस्तेजोयोगाद्बहुधा विक्षिप्तांगः महानि महांति वृत्रहननादीनि कर्माणि चक्रे उपस्थायेति ष्ठातेर्ल्यपि घुमास्थेतीत्वे
प्राप्ते न ल्यपीति प्रतिषेधः। लित्स्वरः। ऐट्ट इटि गत्यर्थः। तस्मात्तङि रूपं। आडजादीनामित्याडागमः। हुत्वान्निघातः। तिग्मं। तिज निशाने। अस्मा
द्युजिरुचितिजां कुश्चेति मक् प्रत्ययः कवर्गादेशश्च। प्रयावयन्। युमिश्रणामिश्रणयोरित्यस्य ण्यन्तस्य शतरि रूपं। लित्स्वरः। गृत्सः। गृधु
अभिकांक्षायां। गृधिपद्योर्दसौ चेति स प्रत्ययः। दकारस्य तादेशः। वृषादित्वादाद्युदात्तः। पुरुधप्रतीकः। पुरुशब्दाद्बहुसंख्याया विधार्थे धा इति
धा प्रत्ययः। ह्रस्वश्छांदसः बहुव्रीहौ पूर्वपदप्रकृतिस्वरः॥ ॥ अथ चतुर्थी॥ ॥ उग्रस्तुराषाळभिभूत्योजा यथावशं तन्वं चक्र एषः। त्वष्टारमिं

द्रो जनुषाभिभूयामुष्या सोममपिबच्चमूषु॥ ॥ यत्र एष इंद्रः उग्रः शत्रूणां भयंकरः तुराषाट् तुरया शत्रूणामभिभवनपराक्रमोपेतः। सच्च तत्व
मात्मीयं शरीरं यथावशं यथा। नानाविधरूपाण्येतं चक्रे। तथा च मंत्रवर्ण्यां रूपंरूपं मघवा बोभवीतीति। स इंद्रो जनुषा सामर्थ्येन त्वष्टा
रं त्वष्टनामकमसुरमभिभूय चमसेषु स्थितमामुष्य चोरयित्वा सोममपिबत्। त्वष्टा ह वै पुत्रा वीड्मित्यादि। प्रासहा सोममपिबदिति तैत्तिरी
यकं। तुराषाट्। त्वर संभ्रमे क्विप्। ज्वरत्वरेत्यादिना ऊठ्। सहेश्छांदसि ण्विः। कर्तृकरणे कृता बहुलमिति समासः। तत्पुरुषे कृति बहुल
मिति तृतीयाया अलुक्। सहेः साढः स इति षत्वं। कृदुत्तरपदस्वरः। यथावशं। वशं काममनतिक्रम्येति अव्ययीभावसमासः। समासस्वरः।
आमुष्य। मुष स्तेये। ल्यप्। चमूषु। चमु अदने। कृषिचमितनिधनिसर्जिभ्य ऊः इत्यू प्रत्ययः। प्रत्ययस्वरः॥ ॥ अथ पंचमी॥ ॥ शुनं हुवे
मेति॥ ॥ सिद्धैषा॥ ॥ इति तृतीयस्य तृतीये द्वादशो वर्गः॥ ॥ शंसा महामिति पंचर्चमेकादशं सूक्तं वैश्वामित्रं त्रैष्टुभमैंद्रं शंसा महामित्य
नुक्रमणिका। समूळ्हे दशरात्रे अष्टमेहनि मरुत्वतीयशस्त्र एतत्सूक्तं सूत्रितं च। शंसा महामिंद्रं यस्मिन्विश्वा इति॥ ॥ तत्र प्रथमा॥ ॥ शंसा
महामिंद्रं यस्मिन्विश्वा आ कृष्टयः सोमपाः काममव्यन्। यं सुक्रतुं धिषणे विभ्वतष्टं घनं वृत्राणां जनयंत देवाः॥ ॥ हे होतः महां महांतमिं
द्रं शंस शस्त्रे स्तुहि। अस्मिन्निंद्रे रक्षितरि विश्वाः कृष्टयः सर्वे मनुष्याः सोमपाः यज्ञे मनुष्याये। सोमपाः संतः कामं काम्यत इति कामः स्वर्गादिः
तमव्यन् सर्वतः प्राप्नुवंति धिषणे देवमनुष्यादीनां धारयित्र्यौ यद्वा प्रगल्भे समर्थे स्वाश्रितान्रक्षितुमिति धिषणे द्यावापृथिव्यौ देवाश्च सुक्र
तुं कर्म जगत्पालनादि शोभनः क्रतुर्यस्यासौ सुक्रतुः तादृशं विभ्वतष्टं विभुना ब्रह्मणा जगदाधिपत्ये स्थापितं महांतं वृत्राणां पापरूपाणां धने

राम
१०७

हंतारं युद्धं इंद्रमजनयंत अजनयत्। शंसा शंस स्तुताविस्यस्य लोटि रूपं। पादादित्वादनिघातः। द्व्यचोतस्तिङ इति संहितायां दीर्घः। अव्यन्। लङि रूपं।

ऋ॰सं॰भा॰३ यद्वृत्तयोगादनिघातः। सस्वरः। सुक्रतुं। क्रत्वादयश्चेत्युत्तरपदाद्युदात्तत्वं। धिषणा। ञिधृषा प्रागल्भ्ये इत्यस्माद्धृषेर्धिषित्। संज्ञायामिति क्युप्रत्ययः।

धिष इत्यादेशः। प्रत्ययस्वरः। धन ते। स्तुसि संज्ञायां वः। सो हंतेरिति क्युत्वं। प्रत्ययस्वरः। जनयंत। जनेर्ण्यंतस्य लङि रूपं यद्वृत्तयोगादनिघा

तः॥ ॥ अथ द्वितीया॥ ॥ यं नु नकिः पृतनासु स्वराजं द्विता तरति नृतमं हरिष्ठां॥ इनतमः सत्वभिर्यो ह शूषैः पृथुज्रया अमिनादायुर्दस्योः॥

॥ पृतनासु या प्रियंते त्रयो हार इति पृतनाः संग्रामाः तेषु स्वराजं हरिष्ठां हरिस्थां हरियुक्ते रथे वर्तमानं नृतमं बलस्य युधेन नृतमं द्वितायु

मा साधसानो द्विधा कृत्वा वर्तमानं तमिंद्रं नकिः कश्चिदपि नरति उत्तीर्य गच्छति न कोपस्मात्यर्थः। तु प्रसिद्धौ। स इंद्र इनतमः अतिशयेन सेना

स्वामी सत्वभिः प्रेरितःसीरद्भिः मरुद्भिः यः यान् गच्छन् शूषैः शोषयंति परिबलानीति शूषाणि बलानि तैः पृथुज्रया दधं प्रतिनीतिर्वृः। वेगः सन्

दस्योः शत्रोरायुरन्नं प्राणं वेमिनादिति हिं। नश्ति। ह प्रसिद्धौ। अत्र निरुक्तं। पृथुज्रयाः पृथुज्रवः पृथुज्रया अमिनादायुर्दस्योरिति। इन्द्रव

न तरणायु रित्यस्य लटि रूपं। यद्वृत्तयोगादनिघातः। शपः पित्वादनुदात्तत्वे धातुस्वरः। यः। पा पापणा [illegible] णादिकः प्रत्ययः। अतोलोपः प्रत्य

यःस्वरः॥ ॥ अथ तृतीया॥ ॥ स हा वा पृत्सु तरणिर्नार्वा व्यानशी रोदसी महना वा। भगो न कारे हव्यो मतीनां पितेव चारुः सुहवो वयोधाः॥

॥ य इंद्रः सहावा बलवान् पृत्सु संग्रामेषु। तरणिः शत्रून् उत्तीर्य वर्तत इति तरणिः। तत्र दृष्टांतः। अर्वान्। यथा अर्वा बलवान् अश्वः शत्रुबलं तरति

तथा रोदसी द्यावापृथिव्यौ [illegible] व्याप्नो [illegible] अस्मिन्नर्थे भ्य इति मेहनं धनं त्वष्टानं इव तिना ह इंद्रः कारे क्रियत इति का

राम

१०८

इस्यनू इत्यादेशः। वनः [illegible] इति [illegible] यु॥ ॥ इति तृतीयस्य तृतीये एकादशो वर्गः॥ ॥ सद्यो ह जात इति पंचर्चं दश

मं सूक्तं वैश्वामित्रं त्रैष्टुभमैंद्रं। सद्यो ह इत्यनुक्रमणिका। अग्निष्टोमे माध्यंदिनसवने मैत्रावरुणशस्त्रे सद्यो ह जातो वृषभः कनीन इत्येतत्सू

क्तं। सूत्रितं च। सद्यो ह जात एव त्वामिति चतुर्विंशके च अहनि मैत्रावरुणशस्त्रे अहरहःशस्य संज्ञकमेतत्सूक्तं। सूत्रितं च। सद्यो ह जात इत्यहर

हःशस्यं मैत्रावरुण इति अहर्गणे द्वितीयादिषु अहःसु माध्यंदिनसवने अस्मिन् शस्त्रे एतत्सूक्तं। अहरहःशस्यानीति होत्रकाद्वितीयादिषु वे

ति सूत्रितं। तद्यस्ते एकाहे मरुत्वतीयशस्त्रे सायाय्याह जात इत्या द्यासूक्तमुखीया। सूत्रितं च। सद्यो ह जातो वृषभः कनीन स्त्वं सद्यो अपि वो ज

त इंद्रेति॥ ॥ सैषा सूक्ते प्रथमा॥ ॥ सद्यो ह जातो वृषभः कनीनः प्रभर्तुमावदंधसः सुतस्य। साधोः पिब प्रतिकामं यथा ते रसाशिरः प्रथमं सो

म्यस्य॥ ॥ वृषभो वृष्टिद्वारा यां वर्षिसद्यस्तदानीमेव जात उत्पन्नः कनीनः इंद्रः सुतस्याभिषुतस्यांधसः हविर्लक्षणस्यास्यामस्य प्रभर्तुः प्रकर्ष

ण भर्तारं तं संग्रहितारं यजमानमावतरक्षतु। ह प्रसिद्धौ। किंच ताद्दश त्वं प्रतिकाम कामे सोमपाने त्वं रायो स त्यांतेतव यथा कामस्य पूर्त्तिर्भ

वति तथा साधोः रसात्मना संसिद्धं रसाशिरः गव्यो मिश्रणोपेतं सोम्यस्य सोममयं रसं प्रथमं सर्वेभ्यो देवेभ्यः पुरस्तात् पिब प्रतिकामकामं

प्रति वीप्सायामव्ययीभावसमासस्वरः पथा प्रपादेशःत्वा। इवालित्स्वरः। रसाशिरः आङ् पूर्वात्। श्रीणातेः किंपि अपस्पृधेथामित्यादिना शि

र इत्यादेशः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरः। सोमस्या सोमं ग्राह्य मदर्थमिति प्रत्ययः॥ ॥ अथ द्वितीया॥ ॥ यज्जायथास्तदहरस्य कामें

शोः पीयूषमपिबो गिरिष्ठां॥ तं ते माता परि योषा जनित्री महः पितुर्दम आसिंचदग्रे॥ ॥ हे इंद्र त्वं यद्यस्मिन्नहनि जायथाः अजायथाः ततः सो

एकाच उपदेशादितीट्प्रतिषेधः। आदोऽनुनासिक इति कृत्यताविति गतेः प्रकृतिस्वरत्वं ॥ ॥ अथ पंचमी ॥ ॥ शुनं हुवेमेति ॥ ॥ इति तृतीयस्य तृतीये त्रयो
दशो वर्गः ॥ ॥ इंद्र स्वाहेति पंचर्चं द्वादशं सूक्तं वैश्वामित्रं त्रैष्टुभमैंद्रं दशरात्रे नवमेहनि मरुत्वतीयशस्त्रे इदं सूक्तं। सूत्रितं च। तृतीयस्येंद्र स्वा
हा गायत्साम मेति ॥ ॥ तत्र प्रथमा ॥ ॥ इंद्रः स्वाहा पिबतु यस्य सोम आगत्या तुम्रो वृषभो मरुत्वान् ॥ ओरुव्यचाः पृणतामेभिरन्नैरास्य हविस्त
न्वः कामं ऋध्याः ॥ ॥ यमिंद्र स्वाहाकृतमिमं सोमं पिबतु यस्येंद्रस्य अयं सोमः स इंद्रो यज्ञं प्रति आगत्या तुम्रः कर्मविघ्नकारिणां हिंसको वृष
भो वृष्टेर्वा अभिमतफलवर्षकः मरुत्वान् मरुद्भिस्तद्वान् उरुव्यचाः प्रभूतव्याप्तिः सन् एभिरस्माभिर्दत्तैरन्नैः सोमादिलक्षणैः हविर्भिरा
पृणतां समंतात् पूरयतु उनतः अस्येंद्रस्य संबंधिनस्तन्वाः शरीरस्य कामं पुष्ट्यादिलक्षणं विषयमभिलाषं हविरस्माभिर्दत्तं ऋध्याः सर्वतः प्र
रयतु। तुम्रः तुमिर्हिंसनार्थः उरुव्यचाः व्यचेरसुन् व्याचः कुटादित्वमनसीति वक्तव्यमिति अत्र अनसीति पर्युदासादिद्वण्या भावः।
क्त उत्तरस्वरः। ऋध्याः ऋधोतेराशीर्लिङि रूपं ॥ ॥ अथ द्वितीया ॥ ॥ आ ते सपर्यू जवसे युनज्मि ययोरनु प्रदिवः श्रुष्टिमावः ॥ इह त्वा धेयु
र्हरयः सुशिप्र पिबा त्व१स्य सुषुतस्य चारोः ॥ ॥ हे इंद्र ते तव जवसे यज्ञं प्रत्यागमनाय सपर्यू परिचारकौ हरी आयुनज्मि नराय। याजया
मि। प्रदिवः पुरातनस्त्वं ययोरश्वयोः श्रुष्टिं वेगं श्रुष्टीति क्षिप्रनामेति यास्कः। तमन्वावः अनुगच्छसि हे सुशिप्र शोभनहनो इंद्र हरयो रथे
योजितास्ते अश्वा इह कर्मणि त्वां धेयुः यज्ञं प्रतिधारयंतु ततः आगतस्त्वं सुषुतस्य सुष्ठु अभिषुतं चारोः कमनीयं अस्येमं सोमं तृप्तिं प्रपिब।
सपर्यू सपर [illegible] आवः। अवरक्षणादिषु छांदसे लङि रूपं। यद्वृत्तयोगादनिघातः। धेयुः दधातेराशि

लिङि किदाशिषीति यासुट् एर्लिङीत्याकारस्य एत्वं अनिघातः। पिब पादादित्वादनिघातः। सुषुतस्य पुञ् अभिषवे कर्मणि क्तः। गतिरनंतर इ
ति गतिस्वरः। उपसर्गात्सुनोतीत्यादिना संहितायां षत्वं ॥ ॥ अथ तृतीया ॥ ॥ गोभिर्मिमिक्षुं दधिरे सुपारमिंद्रं ज्यैष्ठ्याय धायसे गृणानाः ॥ मं
दानः सोमं पपिवाँ ऋजीषिन्त्समस्मभ्यं पुरुधा गा इषण्य ॥ ॥ गृणानाः स्तोत्रं कुर्वाणा ऋत्विजो निर्मिमिक्षुं स्तोतृणामभिमतफलं वर्षितु
मिच्छंतं सुपारं शोभनतीरं स्तुतिभिः सुखेन कर्तुं शक्यमित्यर्थः। तादृशमिंद्रं ज्यैष्ठ्याय धनादिसंपत्त्या श्रेष्ठत्वाय धायसे चिरकालमायुर्धा
यसे चिरकालमायुर्धारणाय च गोभिर्गव्यैर्मिश्रितैः सोमैः दधिरे धारयंति प्रत्यहं। हे ऋजीषिन् सोमवन् इंद्र स त्वं मंदानः मोदमानः सोमं
पिवान् सोमस्य पाता सन् अस्मभ्यं पुरुधा बहुधा गाः अग्निहोत्रादिकर्मसिध्यर्थं धेनूः समिषण्य सम्यक् प्रेरय। गोभिः सावेकाचे
इति विभक्तेरुदात्तत्वे प्राप्ते न गोश्वन्साववर्णेति प्रतिषेधः। मिमिक्षुं मिह सेचने इत्यस्य सनि एकाच इतीट्प्रतिषेधे हलंतोच्चेति किद्वद्भावः। स
नाशंसभिक्ष उः। प्रत्ययस्वरः। ज्यैष्ठ्याय ज्येष्ठस्य भाव इत्यर्थे ब्राह्मणादित्वात् ष्यञ्। नित्वादाद्युदात्तः। गृणानाः गृ शब्दे। क्र्यादित्वात् श्ना
वित्वादंतोदात्तः। मंदानः मदि स्तुत्यादिष्वित्यस्य शानच् बहुलं छंदसीति शपो लुक्। पुरुधा पुरुशब्दादिह संख्यावाचीसंख्याया विधा
र्थे धेति धा प्रत्ययः। इषण्य इषु गतौ। इषणमिच्छतीति छंदसि परेच्छायां क्यच्। तदंतादंतर्भावितण्यर्थस्य लोटि रूपं ॥ ॥ अथ चतुर्थी ॥
इमं कामं मंदया गोभिरश्वैश्चंद्रवता राधसा पप्रथश्च ॥ स्वर्यवो मतिभिस्तुभ्यं विप्रा इंद्राय वाहः कुशिकासो अक्रन् ॥ ॥

ऋ॰सं॰भा॰३

॥ अथ पंचमी ॥ ॥ शुनं हुवेमेति ॥ ॥ एतेव्याख्यायते ॥ ॥ इति तृतीयस्य तृतीये चतुर्द्दशो वर्गः ॥ ॥ चर्षणीधृतमिति द्वादशर्चं त्रयोदशं सूक्तं
वैश्वामित्रमैंद्रं । अत्रानुक्रमणिका । चर्षणीधृतं द्वादशाद्यांत्यौ तृचौ जागतगायत्राविति । आद्यस्तृचो जागतः अंत्यस्तृचो गायत्रः । त्रि
ष्टुभोऽन्यास्त्रिष्टुभः सूक्तविनियोगो लैंगिकः । उक्थ्ये क्रतौ मैत्रावरुणशस्त्रे अनुरूपतृचानंतरमाद्यस्तृचः शंसनीयः सूत्रितं च । चर्षणी
धृतं मघवानमुक्थ्यमसुर इति तिस्र इति । विषुवति निष्केवल्ये नृणामुत्वेति तृचः विषुवानिति खंडे सूत्रितं नृणामुत्वा नृतमं गीर्भिरुक्थैरिति तिस्र
इति बृहस्पतिसवेप्ययं तृचो निष्केवल्ये निविद्धानीयः सूत्रितं च । नृणामुत्वेति माध्यंदिन इति महाव्रतेपि निष्केवल्ये अयं तृचः दशरा
त्रे चतुर्थेहनि मरुत्वतीये इंद्र मरुत्व इति तिस्रः षष्ठेहनि षष्ठस्येति खंडे सूत्रितं । इंद्र मरुत्व इति तिस्र इति मरुत्वतीयमिति बृहस्प
तिसवेपि मरुत्वतीयशस्त्रे अयं तृचो निविद्धानीयः सूत्रितं च । इंद्र मरुत्व इह नृणामुत्वेति माध्यंदिन इति । [illegible]मरुत्वतीयग्रहस्या
नुवाक्या । सूत्रितं च । मरुत्वतीयेन ग्रहेण चरंती इंद्र मरुत्व इह पाहि सोममिति तृतीये पर्याये होतुः शस्त्रे इदं ह्यन्वोजसेति स्तोत्रियः तृ
चः सूत्रितं च । इदं ह्यन्वोजसा सुतं राधानां पते महाँ इंद्रो य ओजसेति ॥ ॥ तत्र प्रथमा ॥ ॥ चर्षणीधृतं मघवानमुक्थ्य१मिंद्रं गिरो बृह राम
तीरभ्यनूषत ॥ वावृधानं पुरुहूतं सुवृक्तिभिरमर्त्यं जरमाणं दिवेदिवे ॥ ॥ बृहस्पतीः प्रभूताः गिरोऽस्मदीयाः स्तुतिलक्षणा वाचः च ११०
र्षणीधृतं चर्षणीनां मनुष्याणामभिमतफलप्रदानेन धारकं पोषकं यद्वा आकर्षणेन सर्वमिति चर्षणं बलं तद्धारकं मघवानं धनवंतं
उक्थ्यं उक्थैः शस्त्रैः शंसनीयं वावृधानं बलधनादिसंपत्त्या प्रतिक्षणं वर्धमानं पुरुहूतं स्तोतृभिर्बहुवारमाहूतं अमर्त्यं मरणधर्म

रोयुक्तादितरस्मिन्यद्वा अपगोऽन्न पूर्णादेवं जुर्नाम हव्यो हवनीयः । मतीनां स्तोतृणां स्तुतीनां वा पितेव पालयिता चारुः कमनीयः सुहवः सुहू
तात्मोपेतः वयोधाः ॥ अन्नस्य दाता भवति । सहावा सहोऽस्यास्तीति मतुबर्थे छंदसी वनिपाविति वनिप् । अन्येषामपि दृश्यत इति संहिता
यां दीर्घः । पृत्सु । पृतनाशब्दस्य सोपरे तः मांस्पृन्नसूतमुपसंख्यानमिति पृदादेशः । सावेकाच इति विभक्तेरुदात्तत्वं । व्यानशिः अशू व्या
प्तावित्यस्माच्छंदसि सदादित्वान्नकिप्रत्ययः तस्य लिड्वद्भावः । अत आदेरित्यभ्यासस्य दीर्घत्वे कृते अश्नोतेश्चेति नुमागमः । प्रादिसमासः ।
कारे । कारोतेः कर्मणि घञ् कर्षात्वतो घञोंत उदात्त इत्यंतोदात्तत्वं । हव्यः । जुहोतेः अचो यतायतोनवद्य इत्याद्युदात्तत्वं । सुहवः ह्वयतेर्भा
वुपसर्गेप्यप्रत्ययः संप्रसारणं । प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः । आद्युदात्तं द्व्यच्छंदसीति बहुव्रीहावुत्तरपदाद्युदात्तत्वं ॥ ॥ अ
थ चतुर्थी ॥ ॥ धर्ता दिवो रजसस्पृष्ट ऊर्ध्वो रथो न वायुर्वसुभिर्नियुत्वान् ॥ क्षपां वस्ता जनिता सूर्यस्य विभक्ता भागं धिषणेव वाजं ॥ ॥
स इंद्रो दिवो द्युलोकस्य रजसोंतरिक्षस्य च धर्ता धारकः पृष्टः सर्वत्र वर्तमानः रथो न तदीयो रथ इव ऊर्ध्वः । पुरूर्ध्वं गंता वसुभिः सहाय
तया निवसद्भिनिर्वानसहायवान् यद्वा नेत्यमुत्रोपि संबध्यते । यथा वायुर्नियुत्वान् नियुन्नामकवडवाभिस्तद्वान् एवमिंद्रो वसुभिः
मरुद्भिः सहावान् तथा क्षपां वस्ता रात्रीमाच्छादयन् । सूर्यस्य जगत्प्रकाशस्यादित्यस्य जनिता जनयिता भागं भजनीयं वाजं कर्मफलरूप
मन्नं विभक्ता साधु विभागकर्ता भवति । तत्र दृष्टांतः । धिषणेवा यथा धीमान् भागस्येदमिति विभागं करोति तद्वत् । रजसः । रंज रागे इत्यस्मा
द्भूरंजिभ्यां किदित्यसुन् । कित्वान्नलोपः । रज्यते प्रकाशेनेति रजोंतरिक्षं नित्त्वादाद्युदात्तः । विभक्ता । भजसेवायामित्यस्य साधुकारिण्यर्थे तृन् ।

ऋ०सं०भा०३

सो जरिता पनस्यते नेहसत्तम इंद्रो दुवस्यति ॥ विवस्वतः सदन आ हि पिप्रिये सत्रासाहमभिमातिहनं स्तुहि ॥ ॥ जरिता शत्रूणां जार
यिता इंद्रः आकरे आकीर्यते युधार्थं धनमत्रेत्याकरो युद्धं तस्मिन्वसो धनस्य स्थानभूते युद्धे पनस्यते सर्वैः स्तूयते। यद्वा वसोः वसत्याभिमुख्येन
तिष्ठतीति वसुः शत्रुः तस्य जरयिता तियोजनीयं स इंद्र मानहस्वः अपापाः स्तुभः स्तुतीः दुवस्यति परिचरति तासां फलं प्रयच्छन्पूजयतीत्यर्थः।
किंच स इंद्रो विवस्वतः विशेषणमिहो आर्थवसतो हविष्मतो वा यजमानस्य सदने गृहे आ पिप्रिये हि सोमपानादिना असंतं प्रीतो भवति
खलु सत्रासाहं शत्रूणामेव हंतारं यद्वा मरुद्भिः सह शत्रूणामभिभवितारं अतारवाभिमातिहनं शत्रूणां हंतारमिंद्रं स्तुहि। हे विश्वामि
त्रेति आरु रे। क्षविक्षेपे। अधिकरणे ऋदोरबित्यप्। थाथादिस्वरेणांतोदात्तः। जरिता। जृष वयोहानौ। इत्यस्मात् भावितण्यर्थस्य तृचि रूपं चि
त्वादंतोदात्तः। पनस्यते। पनस्यति स्तुतिकर्मा विस्य कर्मणि लटि रूपं निघातः। अनेहसः। हंतेर्नञि उपपदे नञ्याहनएहिरेति असिप्रत्ययः।
एह इत्ययं वादेशो धातोः। नञ्सुभ्यामिति स्वरेणांतोदात्तः। स्तुभः। स्तोभतिरर्चतिकर्मा। क्विप्। दुवस्यति। दुवः परिचरणमात्मन इच्छती
त्यर्थे क्यच्। निघातः। पिप्रिये। प्रीङ् तर्पणे। लिटि रूपं। हियोगादनिघातः॥ ॥ अथ चतुर्थी॥ ॥ नृणामु त्वा नृतमं गीर्भिरुक्थैरभि प्रवीरम राम
र्चता सबाधः ॥ सं सहसे पुरुमायो जिहीते नमो अस्य प्रदिव एक ईशे॥ ॥ हे इंद्र सबाधः रक्षोघ्नमंत्रोच्चारणेन तद्द्विषय बाधया सह १११
वर्तंत इति सबाधः ऋत्विजो नृणां नृतमं मनुष्याणामिति शयेन स्वकर्मणि नेतारं वीरं सामर्थ्योपेतं त्वां गीर्भिः स्तुतेः साधनभूतैर्वाक्यैरुक्थैः
शस्त्रैश्चाभिमुख्येन प्रार्चत प्रकर्षेणार्चेति। पुरुमाया वृत्रहननादिबहुकर्मा स इंद्रः सहसे बलाय संजिहीते गमनोद्यमं करोति। किं

च प्रदिवः पुरातनः एकः असहायः स इंद्रः नमः नमसो अस्य हविर्लक्षणस्यान्नस्य ईशे ईष्टे। यद्वा अस्य सर्वस्य जगत ईष्टे तस्मा इंद्रायन
मः नृणां नामन्यतरस्यामिति विभक्तेरुदात्तत्वं। अर्चत अर्चतेर्लोट्। तस्यादेशः। तिङ्तिङोभवंतीति वचनात्। सबाधः। बाधविलोडने क्वि
प्। बाधसह जीवनस्येति सहस्य सत्वं। कृदुत्तरपदस्वरः। पुरुमायः अंतोदात्तप्रकरणे त्रिचक्रादीनामुपसंख्यानमिति अंतोदात्तत्वं। ईशे।
ईश ऐश्वर्ये इत्यस्य लटि लोपस्त आत्मनेपदेष्विति तलोपः। निघातः॥ ॥ अथ पंचमी॥ ॥ पूर्वीरस्य निःषिधो मर्त्येषु पुरू वसूनि पृथिवी बि
भर्ति॥ इंद्राय द्याव ओषधीरुतापो रयिं रक्षंति जीरयो वनानि॥ ॥ मर्त्येषु मनुष्येषु अस्येंद्रस्य पूर्वीर्निःषिधो नुशासनानि पूर्वीः हितोप
देशादिभिः प्रभूता निनानाप्रकाराणि भवंति। इंद्रस्य शासितृत्वे मंत्रः। उक्थमिंद्राय शंस्यं वर्धनं पुरुनिष्षिध इति। तथाशासकाय तस्मा
इंद्राय पृथिवी पुरु पुरूणि बहूनि नानाविधानि बिभर्ति अंतर्धारयति। किंच द्यावो द्युलोकाः ओषधीरोषधयः उतापि आपो जलानि जीरयः जीर्य
त इति जीरयो मनुष्याः वनानि वृक्षाश्चैते सर्वे इंद्रस्याज्ञया तदुपभोगयोग्यो रयिं धनं रक्षंति। निःषिधः। षिधु गत्यो। संहितायां। निसः सकारे
ण इणोय्यवधानेऽपीदस त्वोदना इत्यनुपसर्गात्सुनोतीत्यादिना षत्वं। निसः सकारस्य ष्टुना ष्टुरिति षत्वं॥ ॥ इति तृतीयस्य तृतीये पंचदशो
वर्गः॥ ॥ अथ षष्ठी॥ ॥ तुभ्यं ब्रह्माणि गिर इंद्र तुभ्यं सत्रा दधिरे हरिवो जुषस्व॥ बोध्यापिरवसो नूतनस्य सखे वसो जरितृभ्यो वयो धाः॥
॥ हे हरिवः अश्ववन् इंद्र तुभ्यं त्वदर्थं ब्रह्माणि स्तोत्राणि तथा तुभ्यं गिरः शस्त्राणि च सत्रा सत्यमेव दधिरे ऋत्विजो धारयंति। तानि जुष
स्व। हे वसो सर्वस्य वासयितः सखे सखिभूत हे इंद्र आपिर्व्याप्तिस्त्वं नूतनस्य नवतरस्य अवसो रक्षणस्य हविषो बोधि त्वदर्थं दीयमानं जानीहि

अतस्त्वं जरितृभ्यः स्तोतृभ्यो ऽस्मभ्यं वयो ऽन्नं धाः देहि। तुभ्यं। ङयि चेत्याद्युदात्तत्वं। जुषस्व। जुषी प्रीतिसेवनयोरित्यस्य लोटि रूपं। वाक्यभेदान्नि
त॰सं॰भा॰२ घातः। बोधि। बुध अवगमन इत्यस्य लोटि वा छंदसीति हेर्विकल्पेन पित्वाद् अपि चात् गुणः कृतः ल्भ्यो हेर्धिरिति धिआदेशः। ङित्वादंतोदा
त्तः॥ ॥ अथ सप्तमी॥ ॥ इंद्र मरुत्व इह पाहि सोमं यथा शार्याते अपिबः सुतस्य। तव प्रणीती तव शूर शर्मन्नाविवासंति कवयः सुयज्ञाः॥ ॥
हे मरुत्वः मरुद्भिर्युक्त हे इंद्र त्वं इहास्मदीये यज्ञे आगत्य सोमं पाहि पिब। तथा त्वं पूर्वं शार्याते पुत्रे ऽस्मिन् राजनि यज्ञं कुर्वाणे सुतस्याभि
षुतं सोमम् अपिबः तथा अपिबेत्यर्थः। इंद्रः शार्यातस्य यज्ञे सोमरसान् अपिबदित्येषोऽर्थः कौषीतके स्पष्टमुक्तः। तथा मंत्रवर्णश्च। आस्मा रथं वृषपा
णेषु तिष्ठसि शार्यातस्य प्रभृता येषु मंदस इति। हे शूर इंद्र तव संबंधिनि शर्मन् शर्मणि निबोधस्थाने स्थिताः सुयज्ञाः कवयो मेधाविनो यजमा
नाः प्रणीती तव हविषां प्रणयनेन प्रापणेन आ समंताद्विवासंति। त्वामेव परिचरंति। विवासतिः परिचरणकर्मा। शार्याते। शार्यातेरयमित्यर्थे तस्ये
दमित्यण्प्रत्ययः। अपिबः। यथायोगादनिघातः। अडागमस्वरः। प्रणीती। नयतेर्भावे क्तिन्। तादौ च निति कृत्यतौ इति गतेः प्रकृतिस्वरत्वं। सुपां सुलु
गिति तृतीयायाः सवर्णदीर्घः। उपसर्गादसमासेपीति णत्वं॥ ॥ अथाष्टमी॥ ॥ स वावशान इह पाहि सोमं मरुद्भिरिंद्र सखिभिः सुतं नः। जातं य
त्त्वा परि देवा अभूषन्महे भराय पुरुहूत विश्वे॥ ॥ हे इंद्र वावशानः सोमं कामयमानः स त्वं सखिभिः समानख्यानैर्मरुद्भिः सह नोऽस्मत्सं राम ११२
बंधिनीहास्मिन् यज्ञे सुतमभिषुतं सोमं पाहि पिब। हे पुरुहूत पुरुभिराहूत इंद्र जातं प्रादुर्भूतं प्राबल्यं संप्राप्तं यत् यं त्वा विश्वे सर्वे देवाः महे महते च
यध्रियंते योधा नाम भ्रियंत इति भरः संग्रामः तस्मै तस्मै संग्रामाय पर्यभूषन् सर्वतो ऽलंकुर्वन्। वावशानः। वशेर्यङ्लुकि चानशि रूपं। नित्वादंतोदात्तः। अ

रहितं सुवृक्तिभिः शोभनस्तुतिवाक्यैः दिवेदिवे प्रत्यहं जरमाणं स्तूयमानं तमिमम् इंद्रम् अभ्यनूषत अभितः सर्वतः स्तुवंति। वृहस्पती वाछं
दसीति सर्वस्य दीर्घः। अनूषत। णु स्तवने। अस्मात् लुङि सिच्। धातोः कुटादित्वात् सिचो ङित्वेन गुणाभावः। सुवृक्तिभिः। नञ्सुभ्यामिति
उत्तरपदांतोदात्तत्वं। यद्वा सुवृक्तयः इति स्तुतिकरणभूता ऋचो ऽभिधीयंते इति ऋचो वेति किचु। कृत्स्वरेणांतोदात्तः। दिवेदिवे नि
त्यवीप्सयोरिति द्विर्वचनं। परस्याम्रेडितत्वात् अनुदात्तत्वे पूर्वपदस्वरः॥ ॥ अथ द्वितीया॥ ॥ शतक्रतुमर्णवं शाकिनं नरं गिरो म इंद्रमु
प यंति विश्वतः। वाजसनिं पूर्भिदं तूर्णिमप्तुरं धामसाचमभिषाचं स्वर्विदं॥ ॥ मदीया गिरः स्तुतिलक्षणा वाचः शतक्रतुं शतक्रतवो
यज्ञा यस्य तं अर्णवं आत्मना उदकवंतं शाकिनं शाक्तो ऽत्यभिरिंद्र इति शाकाः सहायभूता मरुतः तद्वंतं नरं सर्वस्य जगतो नेतारं वाजस्या
न्नस्य दातारं पूर्भिदं शत्रुपुरां भेत्तारं तूर्णिं युद्धं प्रति शीघ्रं गंतारं अप्तुरं मेघभेदनद्वारा यां प्रेरकं धामसाचं तेजो भजमानं यद्वा धनं धा
मतद्भिः सह योजयितारं अभिषाचं शत्रूणाम् अभिभवितारं स्वर्विदं स्वर्गस्य लंभकं तम् इंद्रं विश्वतः सर्वतः उप यंति उपगच्छंतु। अ
र्णवं। अर्णो ऽस्यास्तीति मत्वर्थे अर्णसः सलोपश्चेति प्रत्ययः सकारलोपश्च। प्रत्ययस्वरः। नरं। नयतेर्डिच्चेति प्रत्ययः। अमः सुप्त्वाद
नुदात्तत्वे प्रत्ययस्वरः। यंति। इण् गतावित्यस्य लटि इणो यणिति यण्। निघातः। सो जसनिं। षणु दाने। खनिकष्यज्यसिवसीत्यादिना
इप्रत्ययः। परादिश्छंदसि बहुलमिति उत्तरपदाद्युदात्तत्वं। तूर्णिं। त्वर संभ्रमे। वहि प्रीत्यादिना नि प्रत्ययः। ज्वरत्वरेत्यादिना ऊठ्। निदि
त्वाति दत्ताद्युदात्तः। अप्तुरं। तुर त्वरणे। क्विप्। कृदुत्तरपदस्वरः। अभिषाचं। षच समवाये ण्यंतस्य क्विप्॥ ॥ अथ तृतीया॥ ॥ आकरे व

ऋ॰सं॰भा॰२

श्रोतु प्रकर्षेण व्याप्नोतु ॥ तथा ब्रह्मणा स्तोत्रेण सहितः ससोमः शिरः शरीरं अवयवादिना अवयवी लक्ष्यते । तच्छरीरं प्राप्नोतु । हे शूर इंद्र राध
से धनाय तव बाहू अपि प्राप्नोतु । अश्नोतेर्व्याप्तिकर्मणो लेटि व्यत्ययेन परस्मैपदं । निघातः । कुक्ष्योः । उदात्तयणो हल्पूर्वादिति विभक्तेरुदात्तत्वं
॥ इति तृतीयस्य तृतीये षोडशो वर्गः ॥ ॥ धानावंतं करंभिणमित्यष्टर्चं चतुर्दशं सूक्तं वैश्वामित्रमैंद्रं अत्रेयमनुक्रमणिका । धानावंतमष्टौ
पूर्वार्धगायत्रं षष्ठी जगतीति आदितस्तिस्रो गायत्र्यः तृतीय धाना इति षष्ठी जगती शिष्टास्त्रिष्टुभः सूक्तविनियोगो लिंगादवगंतव्यः । प्राता
सवनीयपुरोडाशस्यानुवाक्या धानावंतमित्याद्या । धानावंतं करंभिणमिति प्रातःसवने नुवाक्येति ॥ तत्र प्रथमा ॥ ॥ धानावंतं करंभिण
मपूपवंतमुक्थिनं ॥ इंद्र प्रातर्जुषस्व नः ॥ ॥ हे इंद्र धानावंतं धानाः भृष्टयवास्तद्वंतं करंभिणं करंभो दधिमिश्राः सक्तवः तद्वंतं । अपूपवंतं
सवनीयपुरोडाशोपेतं उक्थिनं शस्त्रिणं नोस्मदीयमिमं सोमं प्रातःसवने जुषस्व सेवस्व । प्रातःस्वरादि घंतो दात्वेन पठितत्वादंतोदात्तः ॥ १ ॥
॥ अथ द्वितीया ॥ ॥ पुरोळाशं पचत्यं जुषस्वेंद्रा गुरस्व च ॥ तुभ्यं हव्यानि सिस्रते ॥ ॥ हे इंद्र पचत्यं पचने साधुं पुरोडाशं चयनमिति पुरोडाशं
हविः जुषस्व । किंच आगुरस्व पुरोडाशभक्षणार्थमुद्यमं कुरु हव्यानि हवनयोग्यानि पुरोडाशादीनि हवींषि तुभ्यं त्वदर्थं सिस्रते अवनीयं गच्छं
ति । तानि सेवस्वेति भावः । पचत्यं पचने साधु तत्र साधुरिति यत् त्यत्ययांतस्य पदस्य द्वित्वाभावादत्र यतो नाव इत्यस्य प्राप्तिर्नास्तीति तित्स्वरितः । गु
रस्व । गुरी उद्यमने । शविकरणः । निघातः । सिस्रते सृ गतौ छंदसि जुहोत्यादिः । व्यत्ययेनात्मनेपदं ॥ ॥ अथ तृतीया ॥ ॥ पुरोळाशं च नो घसो जो
षयासे गिरश्च नः ॥ वधूयुरिव योषणां ॥ ॥ हे इंद्र नोस्मत्संबंधिनं पुरोडाशं घसः भक्षय च नोस्मदीयाः स्तुतिलक्षणा गिरो जोषयासे सेवस्व ।

राम ११२

तत्र दृष्टांतः । वधूयुरिव योषणां । यथा वधूयुः स्त्रीकामः । योषणां भजनीयां युवतिं सचते । तद्वत् । घसः घस्ल दाने इत्यस्य लेट्यडागमरूपं । च
वा योगेन प्रथमेति न निघातः । जोषयासे जुषी प्रीतिसेवनयोरित्यस्य ण्यंतस्य लेट्याडागमे रूपं । आगमस्यानुदात्तत्वे लित्स्वरः । पादादि
त्वादनिघातः । वधूयुरिव सुप आत्मनः क्यच् । क्याच्छंदसीत्युप्रत्ययः । प्रत्ययस्वरः । योषणां युष भजन इति सौत्रो धातुः । कृत्यल्युटो बहु
लमिति ल्युट् । लित्स्वरः ॥ ॥ अथ चतुर्थी ॥ ॥ पुरोळाशं सनश्रुत प्रातःसावे जुषस्व नः ॥ इंद्र क्रतुर्हि ते बृहन् ॥ ॥ हे सनश्रुत पुराणतया प्रसि
द्ध हे इंद्र नोस्मत्संबंधिनमिमं पुरोडाशं प्रातःसावे सूयते तत्र सोम इति सावः । तस्मिन्प्रातःसवने जुषस्व । यतस्ते तव क्रतुः कर्म बृहन हविःप्रा
तःसावे । षुञ् अभिषवे । कर्मणि घञ् । प्रादिसमासः । थाथादिस्वरेणांतोदात्तः ॥ माध्यंदिनसवने सवनीयपुरोडाशे माध्यंदिनस्य सवनस्य
धाना इत्यनुवाक्या सूत्रितं च । माध्यंदिनस्य सवनस्य धाना इति माध्यंदिन इति ॥ सैषा सूक्ते पंचमी ॥ ॥ माध्यंदिनस्य सवनस्य धानाः
पुरोळाशमिंद्र कृष्वेह चारुं ॥ प्र यत्स्तोता जरिता तूर्ण्यर्थो वृषायमाण उप गीर्भिरीट्टे ॥ ॥ हे इंद्र माध्यंदिनस्य मध्यंदिने भवस्य संबंधि
नीः धाना भृष्टयवान् चारुं कमनीयं पुरोडाशं च इह कर्मण्यागत्य कृष्व भक्षणेन संस्कुरु । यत् यदा जरिता भवत्परिचरणं कुर्वाणः तूर्ण्यर्थः
त्वां स्तोतुमित्यतः त्वरितगमनः अत एव वृषायमाणः वृष इवाचरन् स्तोता गीर्भिः स्तुतिलक्षणाभिर्वाग्भिः उप समीपे प्रेट्टे प्रकर्षेण स्तौति त
दा पुरोडाशादीनि हवींषि भक्षयेति भावः । माध्यंदिन शब्दो तत्र भवार्थे उत्सादित्वादञ् । ञित्वादाद्युदात्तः । चारुं चर गति भक्षणयोः दृसनिज
निचरिचटिसहिभ्यो ञुण् इति ञुण् । णित्वादुपधावृद्धिः । ञित्वादाद्युदात्तः । तूर्ण्यर्थः तूर्णिः ञित्वरा संभ्रमे इत्यस्माद्वह्निश्र्यादिना निप्रत्ययः ।

न॰सं॰भा॰३

स्विव। अर्थः। ऋतो। ऽसि कुषिगार्त्तिभ्यः। इत्यन्निति थन्। बहुव्रीहौ पूर्वपदस्वरः। वृषायमाणः वृषइवाचरतीत्यर्थे कर्तुः क्यङ् सलोपश्चेति क्यङ्। अ-
कृत्सार्वधातुकयोर्दीर्घः। ङित्वादनुदात्तं ङित आत्मनेपदं लिट् शानच्। तस्य लसार्वधातुकस्वरे धातुस्वरेः इंद्र इंद्र उक्थानि नित्यस्य लटिस्म-
पो यद्योगादनिघातः॥ इति तृतीयस्य तृतीये सप्तदशो वर्गः॥ तृतीयसवने सवनीयपुरोडाशस्य तृतीये धाना इत्यनुवाक्या सूत्रितं च
तृतीये धानाः सवने पुरुष्टुत पुरोळाशमाहुतं मामहस्व नः॥ ऋभुमंतं वाजवंतं त्वा क-
वे प्रयस्वंत उपशिक्षेम धीतिभिः॥५॥ हे पुरुष्टुत पुरुभिर्बहुभिः स्तोतृभिः स्तुत हे इंद्र तृतीये सवने सोमस्य दीयाः धानाः आहुतान् भक्षय आहुतं
पुरोडाशं च मामहस्व। भक्षणेन महस्व पूजय हे कवे इंद्र प्रयस्वंतः संभृतसहविष्का वयं ऋभुमंतं ऋभावायके वनदेवाः तद्युक्तं वाजवंतं वाजो ना-
मसुधन्वनः पुत्रः तद्युक्तं त्वां धीतिभिः स्तुतिभिः उपशिक्षेम समीपे परिचरेम। आहुतं। जुहोतेः कर्मणि क्तः। गतिरनंतर इति गतेः स्वरः। मामहस्व।
मह पूजायां। इत्यस्य यङ्लुगंतस्य लोटि व्यत्ययेनात्मनेपदं। शपो लुगभावश्छांदसः। शिक्षेम। शिक्षतेराशीर्लिङि किति इडागमः शिषाव्युच्यत इ प्रत्य-
यः। निघातः। धीतिभिः। हिपुवत्परतिशयो नाम्नीत्यंतोदात्तत्वं॥ अथ सप्तमी॥ पूषण्वते ते चकृमा करंभं हरिवते हर्यश्वाय धानाः।
अपूपमद्धि सगणो मरुद्भिः सोमं पिब वृत्रहा शूर विद्वान्॥७॥ हे इंद्र पूषण्वते पूषा नाम कश्चिद्देवः अदंतकः तद्युक्तो अस्मभ्यं करंभं दधिमि-
श्रं सक्तुं वेकेमवक्षणार्थं कृ... तथा च श्रुतिः। पूषा प्रपिष्टभागो ऽदंतको हीति। हरिवते हरिनामकावश्वौ तद्युक्ते हर्यश्वाय इंद्राय तुभ्यं धाना भ-
क्षणार्थं कुर्मः। [illegible] अतः सेनाम अश्वौ विमुच्य हे ब्राह्मणाद्दिवेदिवे सहशीर्षिधाना इति। मरुद्भिः सगणस्त्वं अपूपं पुरोडाशं अद्धि भ-

राम
२२४

क्षय च। भूष अलंकारे। [illegible] धात्वादिः [illegible] अपूपं [illegible] निघातः। भराय। हृञ् हरणे। अधिकरणे घः। हृग्रहोर्भश्छंदसीति हकारस्य भकारः। वृषादि-
त्वादाद्युदात्तः॥ अथ नवमी॥ अन्वर्य मरुत आपिरेषो ऽमंदन्निंद्रमनु दातिवाराः। तेभिः साकं पिबतु वृत्रखादः सुतं सोमं दाशुषः स्वे सधस्थे॥
हे मरुतः यः एष इंद्रः अनु अर्य अपां प्रेरणे आपिः युष्माकं सुखाय स्वेन वन्नीत दातिवाराः। वारो वरणीयं बलं धनं वा दत्तं वारो यैः दत्तधनवंतो मरुतः
तमिंद्रं मदत अहर्षयन् वृत्रखादः वृत्रस्य हिंसकः स इंद्रः तेभिस्तैर्मरुद्भिः साकं दाशुषः हविर्दत्तवतो यजमानस्य स्वे स्वकीये सधस्थे सह
तिष्ठंत्यस्मिन्निति सधस्थं गृहं तस्मिन् सुतमभिषुतं सोमं पिबतु। अर्यः। अपूर्यानूरी आराद्धि सयोरित्यस्मादधाद्यश्चेति यत्प्रत्ययः। यतो नाव इत्या-
द्युदात्तः। समासे। कृदुत्तरपदस्वरः। अमंदन्। मदि स्तुत्यादिषु परस्मैपदी पदात् दित्वादनिघातः। वृत्रखादः। खाद भक्षणे कर्मण्यण्। दाशुषः।
दाशृ दान इत्यस्य क्वसौ दाश्वान्साह्वान्मीढ्वांश्चेति द्विर्वचनाद्यभावः। वसोः संप्रसारणं प्रत्ययस्वरः। सधमादस्थयोश्छंदसीति सहस्य सधादेशः।
॥ अथ दशमी॥ इदं ह्यन्वोजसा सुतं राधानां पते। पिबा त्व१स्य गिर्वणः॥ हे राधानां पते धनानां स्वामिन् गिर्वणः गीर्भिः स्तुतिभिर्वननीय हे इंद्र
दमनुक्रमेण उद्देशानुक्रमेणेत्यर्थः। ओजसा बलेन ग्रावभिः सुतमभिषुतं सोमं नु क्षिप्रं पिबहि॥ अथैकादशी॥ यस्ते अनु स्वधामसत्सुते
नि यच्छ तन्वं। स त्वा ममत्तु सोम्यं॥ हे इंद्र त्वदर्थं यः सोमः स्वधां अन्नमनु सत्य ग्रावभिरभिषुतो भूत् सुते तस्मिन् सोमे तन्वं स्वकीयं शरीरं नि-
यच्छ प्रेरय। स सोमः सोम्यं सोमार्हं त्वां ममत्तु मादयतु। असत्। अस्तेर्लेट्याडागमे रूपं। यद्वृत्तयोगादनिघातः। आगमस्यानुदात्तत्वे धातुस्व-
रः॥ अथ द्वादशी॥ प्र ते अश्नोतु कुक्ष्योः प्रेंद्र ब्रह्मणा शिरः। प्र बाहू शूर राधसे॥ हे इंद्र स सोमस्तेन तव कुक्ष्योः कुक्ष्योरुभयोः पार्श्वयोः प्र-

ऋ॰सं॰भा॰३

योग्यानि पुरोडाशादीनि हवींषि वीतं भक्षयतं तथा इळया अस्माद्दत्तेनान्नेन मादह । विप्रा मदंता हृष्यंतौ युवां गीर्भिः स्तुतिलक्षणाभिरस्मदीयाभिर्वा
भिः वर्धेथां समृद्धौ भवतं इंद्रापर्वता । आमंत्रितस्य यद्वादित्वात् षाष्ठिकमाद्युदात्तत्वं । सुवीराः । बह्वीरा हो वीरवीर्यौ चेति उत्तरपदाद्युदात्तत्वं ।
वी कांत्यादिष्वित्यस्य लोटि अदादित्वाच्छपो लुक् । प्रत्ययस्वरः । वर्धेथां । वृधु वृद्धावित्यस्य लोटि आथां । अन्योलसार्वधातुकस्वरः ॥१॥ अहर्गणे षं
त्यवर्जितष्वहः ॥ सुतिष्ठ सकमित्यनुवाक्या । सूत्रितं च । तिष्ठा सुकं मघवन्मा परागाः अयं यथो देवया अयमियेध इति ॥ सेषा सूक्ते द्वितीया ॥
॥ तिष्ठा सुकं मघवन्मा परागाः सोमस्य नु त्वा सुषुतस्य यक्षि ॥ पितुर्न पुत्रः सिचमा रभे त इंद्र स्वादिष्ठया गिरा शचीवः ॥ ॥ हे मघवन् धन
वन्निंद्र कं सुखेनास्मिन्यज्ञे सु तिष्ठ सु सुष्ठु कं चिरकालं आ तिष्ठ मा परागा अस्मदीयाद्यज्ञान्मागच्छ । तत्र कारणमाह ॥ सुषुतस्य सुष्ठु अ
भिषुतस्य सोमेन नु क्षिप्रं यजे हे शचीवः शक्तिमन्निंद्र ते तव सिचं वस्त्रप्रांतं स्वादिष्ठया स्वादुतरया स्तुतिलक्षणया गिरा आरभे गृह्णामीत्य
र्थः । तत्र दृष्टांतः । पितुर्न यथा पुत्रः मधुरया वाचा पितुर्जनकस्य वस्त्रं चलं गृह्णाति तद्वत् सुकमिति निपातद्वयं प्रथमस्य निपाता आद्यु
दात्ता इत्याद्युदात्तत्वं । द्वितीयस्य चादयोऽनुदात्ता इत्यनुदात्तत्वं । सोमस्य यक्षीत्य यज देवपूजासंगतकरणदानेष्वस्य रितं ङित इत्यात्मने
पदं तस्य लुङि सिचि एकाच इतीट्प्रतिषेधः व्रश्चादिना षत्वं । षढोः कः सि इति कत्वं । सिचः सकारस्य षत्वं । निघातः । रभेः डुलभष् प्राप्तो । लङु
त्तम इति रूपं । रलयोरभेदः । निघातः । स्वादिष्ठया । स्वादुशब्दादिष्ठनि रूपं । नित्वादाद्युदात्तः ॥ ॥ अथ तृतीया ॥ ॥ शंसावाध्वर्यो प्रति मे
गृणीहींद्राय वाहः कृणवाव जुष्टं ॥ एदं बर्हिर्यजमानस्य सीदाथा च भूदुक्थमिंद्राय शस्तं ॥ ॥ शंसिषं नु होता अध्वर्युं ब्रूते । हे अध्वर्यो आ

राम

११५

वां शंसानि । अत आह । प्रति मे गृणीहीति । त्वं मे प्रतिगृणीहि । अथ मोदैवेत्यादिको होतुः शस्त्रे हे जननः प्रतिगरः तदनंतरं इंद्राय
जुष्टं प्रीतियुक्तं वाहः स्तोत्रं कृणवाव करवाव त्वं यजमानस्य इदं बर्हिः अस्मिन् बर्हिषि आसीद उपविश । अथ अथवानंतरं इंद्राय इंद्रार्थमा
वाभ्यां क्रियमाणमुक्थं शस्त्रं प्रशस्तं अभूत् । भवतु । शंसाव शंसु स्तुतावित्यस्य लोटि उत्तमद्विवचने रूपं । आडुत्तमस्य पिच्चेत्याडागमः । उ
त्तमस्य पित्त्वादनुदात्तत्वे धातुस्वरः । मा । अनुप्रतिगृणश्चेति संप्रदानसंज्ञा । जुष्टं नित्यं मंत्र इत्याद्युदात्तत्वं ॥ ॥ अथ चतुर्थी ॥ ॥ जाये
दस्तं मघवन्त्सेदु योनिस्तदित्त्वा युक्ता हरयो वहंतु ॥ यदा कदा च सुनवाम सोममग्निष्ट्वा दूतो धन्वात्यच्छ ॥ ॥ मघवन् धनवन् अस्तं अ
स्यते क्षिप्यंते पदार्था अत्रेत्यस्तं गृहं जायेत् जायैव गृहं भवति । न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यत इति स्मृतेः । तथा । सेदु सा जाये
व योनिः पुरुषस्य मिश्रणस्थानं उ प्रसिध्यर्थः । तस्मात्तदित् तत्र गृह एव युक्ता रथे योजिता हरयो वाल्वां वहंतु । वयं तु यदा च च चर्थे सोमं
सुनवाम अभिषुतं करवाम । तदास्माभिः प्रहितो दूतोऽग्निः त्वां अच्छ आभिमुख्येन धन्वाति गच्छेत् । अस्तं । असु क्षेपणे । असिहसि भृमृण्वा
मीत्यादिना तन्प्रत्ययः । नित्वादाद्युदात्तः । सुनवाम । षुञ् अभिषव इत्यस्य लोटि रूपं । यद्वृत्तयोगादनिघातः । त्वा युष्मत्तत्ततक्षुष्वंतः पादमि
ति संहितायां षत्वं । धन्वाति धवि गत्यर्थः । लेट्यडागमे रूपं ॥ ॥ अहर्गणे अंत्यवर्जितेष्वहःसु हादि । याजनस्य विकल्पिकी परा याहीत्यनुवा
क्या परा याहि मघवन्ना च याहीति वाक्येति सूत्रितं ॥ ॥ सेषा सूक्ते पंचमी ॥ ॥ परा याहि मघवन्ना च याहींद्र भ्रातरुभयत्रा ते अर्थं ॥ यत्रा
रथस्य बृहतो निधानं विमोचनं वाजिनो रासभस्य ॥ ॥ हे मघवन् धनवन्निंद्र त्वं परा याहि अस्माद्देवयजनात्पराङ्मुखो गृहं प्रतिगच्छ । अ

ऋ॰सं॰भा॰३

यथा देवयजमाने प्रत्ययाहि। हे भ्रातः पोषक उभयत्रापि ते तव अर्थं अर्यते प्राप्यत इत्यर्थः। प्रयोजनं। अर्थ संगतौ। उषिकुषिगार्त्तिभ्यस्थन्नि
ति थन्।×१ अस्ति तत्र जाया अत्र सोमाः प्रयोजनं तस्मात् हि यत्र गृहे प्रतिगमनं बृहतो महतो रथस्योपरि निधानं। अत्र स्थाने प्रयोजनं।×१
नित्स्वरः। निधानं। दधातेर्भावे ल्युट्। लिति इति प्रत्ययात् पूर्वस्योदात्तत्वं। रासभस्य रासृ शब्दे। रासिवल्लिभ्यां चेति कर्त्तरि अभच् प्रत्ययः। जो
मादित्वाद्युदात्तः॥ ॥ इति तृतीयस्य तृतीये एकोनविंशो वर्गः॥ ॥ अत्येव हः सुहरियोजस्यायोः सोममित्यनुवाक्या सूचितं च। हारियो
जान अपाः सोमम् अस्तम् इंद्र प्रयाहि कल्याणीर्जाया सुरणं गृहे ते॥ सेषा षष्ठी॥ ॥ अपाः सोमम् अस्तम् इंद्र प्रयाहि कल्याणीर्जाया सुरणं गृ
हे ते। यत्रा रथस्य बृहतो निधानं विमोचनं वाजिनो दक्षिणावत्॥ ॥ हे इंद्र सोमम् अपाः अत्रैव स्थित्वा सोमं पिब पीत्वा अस्तं गृहं प्रतिपाहि
प्रकर्षेण गच्छ ते तव गृहे कल्याणी मंगलकारिणी जाया। शची विद्यते। सुरणं गीतादिध्वनिश्चाप्ति। यत्रेत्यादि गतं। दक्षिणावत् अत्र स्थि
तो सत्यारथ्यो जितानां वाजिनां विमोचनं स्याद् अनयानादिना दक्षिणावत् प्रयोजनवद् भवति। विमुक्तेभ्यो वाजिभ्योऽश्वादनं पानं चोपहर
ति। पापाने। लुङि गातिस्थेति सुचो लुक्। अडागमस्वरः। कल्याणीः कल्याणमस्या अस्तीति मत्वर्थे छंदसीवनिपाविति ई प्रत्ययः। सुरणं
रण शब्दार्थः। अस्मादकृच्छ्रार्थे स्वतन्त्रात् लित्स्वरः। मध्ययसीपित्वादनुदात्तत्वे धातुस्वरः। समासे कृदुत्तरपदस्वरः॥ ॥ अथ सप्तमी॥ ॥ इ
मे भोजा अंगिरसो विरूपा दिवस्पुत्रासो असुरस्य वीराः। विश्वामित्राय ददतो मघानि सहस्रसावे प्रतिरंत आयुः॥ ॥ हे इंद्र इमे याग
कुर्वाणाः भोजाः सोमदाः क्षत्रियाः तेयाजका विरूपा नानारूपा मेधातिथिप्रभृतयो अंगिरसश्च दिवो असुरस्य देवेभ्यो पिवन्तवतो रुद्र

राम

११६

रमु

क्षये। हे शूर। असहाय इंद्र वृत्रहा वृत्रस्य हंता विद्वान् सर्वं जानानस्त्वं सोमं पिब। पूषण्वते पूषिशब्दस्य मरुत्पू अन्येनोनुडिति नुडागमः। रघा
म्यामीति णत्वं। चकृम। करोतेश्छंदसि वर्तमाने लिट्। कादि इडभावः। तिनिघातः। हरिवते छंदसीर इति मतुपो वत्वं॥ ॥ अथाष्टमी॥ ॥ प्रति धाना भ
रत तूयमस्मै पुरोळाशं वीरतमाय नृणां॥ दिवेदिवे सदृशीरिंद्र तुभ्यं वर्धंतु त्वा सोमपेयाय धृष्णो॥ ॥ यजमानो ध्वर्य्वादीन् प्रति ब्रूते हे अध्व
र्यवः अस्मा इंद्राय धानाः तूयं क्षिप्रं भरत संपादयत। नृणां वीरतमाय अस्मा इंद्राय पुरोडाशं च संपादयत। अथ प्रत्यक्षस्तुतिः। हे धृष्णो श
त्रूणाम् अभिभवनशील हे इंद्र सदृशीरेकविधाः स्तुतयस्तुभ्यं त्वदर्थं दिवेदिवे प्रतिदिवसम् अस्माभिः क्रियंते। ताः स्तुतयः सोमपेयाय सोमपाना
र्थं त्वां वर्धंतु। उत्साहनप्रवर्धं कुर्वंतु। सदृशीः समानान्यायाश्चेति कञ् प्रत्ययः टिड्ढाणञित्यादिना ङीप्। दृग्दशे च तु ङि ति समानस्य सभा
वः॥ ॥ इति तृतीयस्य तृतीये अष्टादशो वर्गः॥ ॥ इंद्रापर्वता इति विंशत्यृचं पंचमं सूक्तं। अत्रेयमनुक्रमणिका। इंद्रापर्वतौ विंशतिराद्येंद्रा
पर्वतीयं च दशादि द्वा वेससर्पयै चतस्रो रथांगस्तुतयोंत्या अभिशापास्ता वसिष्ठद्विषिरापानवशिष्टाः श्रूणवेति दशमी षोडश्यौ जगत्यौ
त्रयोदशी गायत्री द्वादशीति द्वाविंशस्तिस्रोनुष्टुभः अष्टादशी बृहती शिष्टास्त्रिष्टुभः। आद्या इंद्रापर्वतादेवत्यं अपं च दशी षोडश्यो वाग्दे
वत्यौ तदुत्तरास्तिस्रो रथांगदेवताकाः शिष्टा ऐंद्र्यः॥ ॥ तत्र प्रथमा॥ ॥ इंद्रापर्वता बृहता रथेन वामीरिष आ वहतं सुवीराः॥ वीतं हव्यान्य
ध्वरेषु देवा वर्धेथां गीर्भिरिळया मदंता॥ ॥ हे इंद्रापर्वतौ [illegible] बृहता महता रथेन वामीः वननीयाः शोभनपुत्रोपे
ताः इषोन्नानि आवहतं। अस्मदर्थं धारयतं प्रयच्छतमित्यर्थः। किं च हे देवौ द्योतमानौ अध्वरेष्वस्मात्संबंधिषु यज्ञेषु हव्यानि वहन

रमु

ऋ०सं०भा०२

सवेगमकरोत्। किं च विश्वामित्रः सुदासं पैजवनं तं राजानं यत् यदा अवहत् अयाजयत्। तदानीमिंद्र कुशिकेभिः कुशिकगोत्रोत्पन्नैः ऋषिभिः सह प्रि
यापतत् प्रियइवाचरत्। वहद्धापणद्रुत्यस्य लङि रूपं। यद्योगादनिघातः। अप्रियाय प्रियइव आचरतीत्यर्थे कर्तुः क्यङ् सलोपश्चेति क्यङ्। तदं
त्तं लङि रूपं पादादित्वादनिघातः॥ ॥अथ दशमी॥ ॥हंसाइव कृणुथ श्लोकमद्रिभिर्मदंतो गीर्भिरध्वरे सुते सचा। देवेभिर्विप्रा ऋषयो नृचक्ष
सो वि पिबध्वं कुशिकाः सोम्यं मधु॥ ॥हे विप्राः मेधाविनो हे ऋषयः अतीन्द्रियार्थस्य द्रष्टारो हे नृचक्षसो नृणां कर्मणां नेतॄणां विशेषेण द्रष्टारः। हे कु
शिकाः कुशिकगोत्रोत्पन्ना हे पुत्राः अध्वरे यज्ञे अद्रिभिर्ग्रावभिः सोमे सुते अभिषुते सति गीर्भिर्मदंतः स्तुतिभिर्देवान्मादयंतो यूयं श्लोकं श्लोक्य
ते शस्यतेऽनेनेति श्लोकः शस्त्रं कृणुथ सस्य गुच्चारयत। तत्र दृष्टांतः। हंसाइव। यथा हंसाः सम्यक् शब्दं कुर्वंति तद्वत्। किं च देवेभिः सचा यष्ट
व्यदेवैः संहिता यूयं सोम्यं सोममयं मधु मधुकरं रसं वि पिबध्वं परस्परव्यवहारेण पिबत। श्लोकं। श्लोकृ संघाते। करणे घञ्। नित्वादाद्युदा
त्तः। मदंतः। मदी हर्षे इतरस्यां तर्भावितण्यर्थस्य व्यत्ययेन शप्। वर्त्तरिकर्मव्यतिहार इत्यात्मनेपदं। सोम्य शब्दो मयार्थ इति यप्रत्ययः॥
॥इति तृतीयस्य तृतीये विंशो वर्गः॥ ॥अथैकादशी॥ ॥उप प्रेत कुशिकाश्चेतयध्वमश्वं राये प्र मुंचता सुदासः। राजा वृत्रं जंघनत्प्रागा
पागुदगथा यजाते वर आ पृथिव्याः॥ ॥कुशिकाः कुशिकगोत्रोत्पन्नाः पुत्राः उप प्रेत अश्वस्य समीपे प्रकर्षेण गच्छत। तत्र गत्वा चेत
यध्वं सावधाना भवत। यद्वा अश्वरक्षिणः सावधानान् कुरुत। सुदासः पैजवनस्य राज्ञोऽश्वं राये तस्य दिग्विजयेन धनलाभाय प्र मुंचत। रा
जा देवानां स्वामीन्द्रः वृत्रं कर्मविघ्नकारिणमसुरं प्राणापागुदक् पूर्वपश्चिमोत्तरेषु देशेषु जंघनत् भृशं हतवान्। तस्माद्दश्वं विमुंचतेति भावः। अ
थानंतरं पृथिव्याः वरे उत्तमे देवयजने देशे आ जाते सराजा यजेत। चेतयध्वं। चिती संज्ञाने इत्यस्य ण्यंतस्य लोटि रूपं। आमंत्रितस्याविद्यमानेन च

राम
११९

त्वेन तिङ उत्तरत्वाच्च निघातः। जंघनत्। हन हिंसागत्योरित्यस्य यङ्लुकि नुगतोऽनुनासिकांतस्येति अभ्यासस्य नुगागमः। तदंतात् लेटि अडागमः।
प्राकृ अंचेते क्विन्निरूपं। अतिगंतौ वताव प्रत्यय इति गतेः स्वरः। यजाते। यज लेटि आडागमः। निघातः। वरे वृञ् वरणे इत्यस्मात् ग्रह वृदृनिश्चिगम
श्चेत्यप्। तस्यापित्वादनुदात्तत्वे धातुस्वरः॥ ॥अथ द्वादशी॥ ॥य इमे रोदसी उभे अहमिंद्रमतुष्टवं। विश्वामित्रस्य रक्षति ब्रह्मेदं भार
तं जनं॥ ॥हे कुशिकाः कुशिकपुत्राः यः हे विश्वामित्रः उभे इमे रोदसी द्यावापृथिव्यौ इंद्रमनुष्टवं स्तुत्येभिः द्यावापृथिवीभ्यामिंद्रस्य स्तोत्रमपा
कारितमित्यर्थः। यद्वा उभयो रोदस्योरंतरा स्थितमिंद्रं स्तोमि स्तोत्रं कुर्वाणस्य विश्वामित्रस्य मामकमिदं विषयं ब्रह्म स्तोत्रं भारतं भरतकुल
जनं रक्षति पालयति। अतुष्टवं। ष्टुञ् स्तुतौ ण्यंतस्य लुङि चङि रूपं। यद्वृत्तयोगादनिघातः। भारतो भरतः शब्द उत्सादित्वादाद्युदात्तः॥ ॥
॥अथ त्रयोदशी॥ ॥विश्वामित्रा अरासत ब्रह्मेंद्राय वज्रिणे। करदिन्नः सुराधसः॥ ॥विश्वामित्राः तज्जोत्पन्नाः वज्रहस्तायेंद्राय ब्रह्म स्तोत्र
मरासत अकुर्वन्। कृतः सइंद्रः नोऽस्मान् सुराधसः शोभनधनोपेतान् करदित् करोत्येव। अरासत। रा दाने इत्यस्य लङि बहुलं छंदसीति
शपो लुक्। निघातः। करत्। करोतेर्लुङि लेट्कृमृदृरुहिभ्यश्छंदसीति अङ्। देशः। सुराधसः। आद्युदात्तं द्व्यच्छंदसीत्युत्तरपदाद्युदात्तत्वं॥ ॥
॥अथ चतुर्दशी॥ ॥किं ते कृण्वंति कीकटेषु गावो नाशिरं दुह्रे न तपंति घर्मं। आ नो भर प्रमगंदस्य वेदो नैचाशाखं मघवन्रंधया नः॥ ॥
हे इंद्र कीकटेषु अनार्यनिवासेषु जनपदेषु यद्वा कुलं भिर्यागदानहोमलक्षणाभिः किं फलिष्यतीत्यश्रद्दधानाः प्रत्युत पिबत खादत यता
यमेव लोको न पर इति वदंतो नास्तिकाः कीटकाः तेषु गावस्ते तव किं कृण्वंति किं कुर्वंति न कंचित्तवोपयोगं कुर्वंतीत्यर्थः। अनुपयोगं द

शयति। आशिरं सोममिश्रणयोग्यं पयः। न दुह्रे न दुहंति। किंच घर्मं प्रवर्ग्यस्य कर्मोपयुक्तं महावीराख्यं स्वपयःप्रदानद्वारेण न तपंति न दीपयंति। ए
ऋ॰सं॰भा॰३ तेन सान्नाय्याद्यर्थमपि नोपयुज्यंत इत्यपि सूचितं भवति। एवंभूता विद्यपि वैदिके कर्मणि अनुपयुक्ता गाः नोस्मभ्यं आहर। न केवलं ता एव किंतर्हि
प्रमगंदस्य हे गुणादिलक्षणपरिमाणगतो धाममेवागमिष्यतीति बुध्या परेषां ददातीति गंदः। वार्धुषिकः। तस्यापत्यं पुत्रादिः प्रमगंदः। प्रकृष्ट एव
दिवदप्रत्यार्थे प्रशंसे मघोन्यते तस्यापत्यं तत्कुसीदकुलस्य वेदो धनं आहर। किंच। हे मघवन् धनवन्निंद्र नैचाशाखं नीचाः स्युः शूद्रा योनिषु उ
त्पादितास्तासां पुत्रपौत्रादिपरंपरा येन समीचाशाखः। शूद्र इवित्येत्थाकेवलेः। शूद्रावेदी पतत्यत्रिरिति च पातकहेतुत्वेन स्मरणात्पतितस्य संबंधि ध
नं नैचाशाखं तदनं नोस्मभ्यं रंधय साधय एतेषां यद्धनं तद्वनेनोपयुज्यते अस्मदायत्तं तु तद्धनं यागादिद्वारा तत्रोपयुज्यते न च स्मात्तदस्मभ्यं प्रयच्छेति
भावः। एतदर्थं यास्को व्याख्यात्। किं ते कुर्वंति कीकटेषु गावः। कीकटा नाम देशोऽनार्यनिवासः। कीकटाः। किंकृताः। किंक्रियाभिरिति प्रेप्सा वा नैव चाशिरं दु
ह्रे न तपंति घर्मं घर्मधरणमाहरणं। प्रमगंदस्य धनानि मगंदः कुसीदी मां गतो मामागमिष्यतीति च ददाति तदपत्यं प्रमगंदो त्यंतं कुसीदकुलीनः
प्रमगतो वा योयमेवाहिलोको न पर इति प्रेप्सुः पंडगो वा पंडगः प्रनगः प्रदेत्वा प्राद् पल्यंड वांडा वाणी इव वीडयतित त्स्वंन नैचाशाखं नीचैः शा राम
खं शाखाः आप्नोते राणिररणत नो मघवन् रंधयं स्वेतिरध्यतिर्वशगमन इति आशिरं आङ्पूर्वाच्छ्रीणातेः क्विपि अपस्पृधेथामित्यादिनाशि ११८
र इत्यादेशः। दुह्रे दुहेर्लिटि इरयोरे इति रे आदेशः। द्विर्वचनस्य विकल्पितत्वात् द्विर्वचनाभावः। वादिलोपे विभाषेति न निघातः। नैचाशाखं
नस्येदमित्यण्। प्रत्ययस्वरः। रंधयानः। रंधेर्ण्यंतस्य रधिजभोरचीति नुमागमः॥ ॥ अथ पंचदशी॥ ॥ससर्परीरमतिं बाधमाना बृहन्मिमाय ज

स्य पुत्रासः पुत्रा वीरा बलवंतो मरुतः। ते सर्वे विश्वामित्राय महं सहस्रसावे सहस्रं सूयते। अत्रेति सावो अश्वमेधः तस्मिन्नश्वमेधे मघानि मं
हनीयानि धनानि ददतः प्रयच्छंतः संतः। आयुर्जीवनमत्रं वो प्रतिरंते प्रकर्षेण वर्धयंति। दिवस्पुत्रासः इति संहितायां षष्ठ्याः पतिपुत्रेति वि
सर्जनीयस्य सत्वं। ददतुः। इदानु दान इत्यस्माच्छतरि रूपं। अभ्यस्तानामादिरित्याद्युदात्तत्वं। तिरते व्यत्ययेन शः॥ ॥ अथाष्टमी॥ ॥ रूपंरू
पं मघवा बोभवीति मायाः कृण्वानस्तन्वं परि स्वां। त्रिर्यद्दिवः परि मुहूर्तमागात्स्वैर्मंत्रैरनृतुपा ऋतावा॥ ॥ मघवा धनवान् इंद्रः य
द्रूपं कामयते तत्तद्रूपं बोभवीति तत्तद्रूपात्मको भवति। तत्र कारणमुच्यते। मायाः अनेकरूपग्रहणसामर्थ्यापितः कृण्वानः कुर्वा
णः स्वां तन्वं स्वकीयां तनूं परि परितः सर्वत्र शरीराणि नानाविधानि शरीराणि निर्मीमाने यद्वा स्वां तनूं नानाविधरूपोपेतां करोति। तथा च
मंत्रवर्णः। इंद्रो मायाभिः पुरुरूप इति। यद्यस्मात्स्वैर्मंत्रैः स्वकीयैः स्तुतिलक्षणैर्वाक्यैराहूतः अनृतुपाः न केवलमृतावेव पिबति किंतु
अनृतावपि बहुशः सोमं पिबतीत्यर्थः। ऋतावा सत्यवान् तादृश इंद्रः दिवः स्वर्गलोकात् परि मुहूर्तमेकस्मिन्नेव मुहूर्ते नानादेशगतेषु
यज्ञेषु तत्रापि त्रिः त्रिषु सवनेषु आगात्। आगच्छति। बोभवीति भवतेर्यङ्लुकि निपित्यड्वेतीडागमः। निघातः। आगात् इणो लुङि रू
पं। यद्वृत्तयोगादनिघातः॥ ॥ अथ नवमी॥ ॥ महाँ ऋषिर्देवजा देवजूतोऽस्तभ्नात्सिंधुमर्णवं नृचक्षाः। विश्वामित्रो यदवहत्सुदासमप्रि
यायत कुशिकेभिरिंद्रः॥ ॥ महान् तपसा अतिशयितसामर्थ्यवान् ऋषिः अतींद्रियार्थद्रष्टा देवजाः द्योतमानानां तेजसा जनयिता देवजूतः
तेस्तेजोभिराकृष्टः नृणां कर्मनेतॄणामध्वर्य्वादीनां उपद्रष्टा स विश्वामित्रः अर्णवमुदकवंतं सिंधुं विपाट्छुतुद्र्योः संभेदनमस्तभ्नात् निरु

भवतु ईषादंडश्च मा विवर्हि स्वधोमा भवतु युगं च मा विशारि विशीर्णं मा भवतु। ईङः पातन्त्ये पतनशीले कीलके शशीतोर्विशारणा शाकटदातो घा
रयतु। हे अरिष्टनेमे असित अछिद्र विश्लिष्ट हे रथ नोस्मान् अभिमुख्येन सचस्व संगतो भव। विवर्हि। वृहि र्धो। विपूर्वो वृहिर्विनाशे वर्तते। अस्मा
त्कर्मकर्तरि लुङि। चिण् भावकर्मणोरिति चिण्। चिणो लुगिति तप्रत्ययस्य लुक्। निघातः। युगं युगशब्दे उञ्छादिषु ख्यापकरणार्थ घर्यंत
त्वेन निपातनादगुणत्वं तत्रपाठादंतोदात्तत्वं। शारि शृ हिंसायामित्यस्य लुङि रूपं। अरिष्टनेमे। पादादित्वात्षाष्ठिकमाद्युदात्तत्वं॥ ॥अथाष्टा
दशी॥ ॥ बलं धेहि तनूषु नो बलमिंद्रानडुत्सु नः॥ बलं तोकाय तनयाय जीवसे त्वं हि बलदा असि॥ ॥ हे इंद्र नोस्माकं तनूषु शरीरेषु बलं
धेहि नोस्मत्संबंधिरथवाहेष्वनडुत्सु बलं धेहि। तोकाय पुत्राय तनयाय पौत्राय च जीवसे चिरंजीवनाय बलं आयुर्विधेहि। एतादृशं दात
त्वं कुत इत्याह। त्वं बलदा बलं ददातीति। बलदा असि। हि सर्वेषु लोकेषु प्रसिद्धो खलु। अनडुत्सु वह प्रापणे। अनसि वहे। क्विप् अनसोडश्चे
ति क्विप्। अनसः सकारस्य डत्वं। वहश्च आदित्वात्संप्रसारणं। वसुस्रंसुध्वंस्वनडुहां द इति हकारस्य दत्वं कृदुत्तरस्वरः। असि हियोगादनि
घातः। सिपः पित्वादनुदात्तत्वे धातुस्वरः॥ ॥अथैकोनविंशी॥ ॥ अभि व्ययस्व खदिरस्य सारमोजो धेहि स्पंदने शिंशपायां॥ अक्ष वीडो वीडित
वीडयस्व मा यामादस्मादव जीहिपो नः॥ ॥ हे इंद्र खदिरस्य सारेण हि आणिः क्रियंते तेन खदिरस्य सारभूतमाणिमभिव्ययस्व अभितस्तेन राम
स्थानेषु दार्ढ्यार्थमिति धेहि स्पंदने रथस्य गमने सति शिंशपायां शिंशपाख्यदारुनिर्मिते रथस्य फलके ओजो धेहि दार्ढ्यं कुरु। हे वीडो वीडित अ ११९
स्मद्दृढीकृत हे अक्ष वीडो त्वं दृढो भव। यद्वा अस्मान् दृढी कुरु। यामाद्गच्छतोस्मान् अवजीहिपः मा पीपयः खदिरस्य। अजिर शिशिरेत्यादिना

किरच्प्रत्ययांतत्वेन निपातनादंतोदात्तः। वीडित वीडयतेर्ण्यंतस्य। निष्ठायामिडागमः। निष्ठायां सेटीति णेर्लुक्। वीडयस्व। आमंत्रितस्याविद्यमा
नत्वेन पादादित्वादनिघातः। यामात् या प्रापणे इत्यस्मात् अर्तिस्तुसुहुसृ इत्यादिना मप्रत्ययः। नित्वादाद्युदात्तः। जीहिपः ओहाक् त्यागे ण्यंत
स्य लुङि चङि रूपं। अकारस्येकारश्छांदसः॥ ॥अथ विंशी॥ ॥ अयमस्मान् वनस्पतिर्मा च हा मा च रीरिषत्॥ स्वस्त्या गृहेभ्य आवसा आवि
मोचनात्॥ ॥ यजमान आत्मनः अयमाशास्ते। वनस्पतिः वनस्पतिविनिर्मितोयं रथः रथारूढानस्मानस्मान् मा च हाः मा त्याक्षीत्। किंच
मा रीरिषत्। अस्मान् मा विनाशयतु। किंच गृहेभ्यः यावद्गृहान् प्राप्नुयाम तावदस्मभ्यं स्वस्ति भवतु। तथा आवसे पंचम्यर्थे चतुर्थी। आवा
द्रथांवेगावमानं तावत् आविमोचनात् यावद्रथो योजित अश्वविमोचनं तावत् स्वस्ति भवतु। हाः ओहाक् त्यागे। लुङि चङि रूपं। द्वितीयत्वान्निघातः।
गृहेभ्यः ग्रेहः गेहे कइति कः एवं चम्य पाडः पररूपमिति। अवसे पोंत कर्मणि क्विप्। चतुर्थ्येकवचने अतोलोपाभावश्छांदसः। वृहिः एकादेशस्वरः
॥ इति तृतीयस्य तृतीये द्वाविंशो वर्गः॥ ॥अथैकविंशी॥ ॥ इंद्रोतिभिर्बहुलाभिर्नो अद्य याच्छ्रेष्ठाभिर्मघवंछूरजिन्व॥ यो नो द्वेष्ट्यधरः स
स्पदीष्ट यमु द्विष्मस्तमु प्राणो जहातु॥ ॥

मदग्निदत्ता ॥ ॐ सूर्यस्य दुहिता ततान श्रवो देवेष्वमृतमजुर्यं ॥ ॥ जमदग्निदत्ता जमदग्निभिः प्रज्वलिताग्निभिः ऋषिभिरस्मभ्यं दत्ता अमति
अज्ञानं बाधमाना ससर्परीः सर्वत्ररूपशब्दतया सर्पणशीला वाक् बृहत्प्रभूतं यथा भवति। तथाभिमायनभव सिशब्दं करोति। सैषा सूर्यस्य दुहिता
वा देवता देवेष्विंद्रादिषु अजुर्यं क्षयरहितं अमृतलक्षणं श्रवोन्नं आततान सम्मता आहोकारवाचं तनोति। जमदग्निदत्ता। दाणदानइत्यस्येनिष्ठायां
दोदद्घोरितिददादेशः। तृतीयाकर्मणीतिपूर्वपदप्रकृतिस्वरः। अजुर्यं जूर्वयोहानो। ऋहलोर्ण्यदितवकुलंछंदसीत्युक्तं। नयसुभ्यामित्यंतोदात्तत्वं॥
॥ इति तृतीयस्य तृतीये एकविंशो वर्गः ॥ ॥ अथ षोडशी ॥ ॥ ससर्परीरभरत्तूयमेभ्योधिश्रवः पांचजन्यासु कृष्टिषु ॥ सापक्ष्या ३ नव्यमायुर्दधा
ना यां मे पलस्तिजमदग्नयो ददुः ॥ ॥ ससर्परीः सर्वत्रगद्यपद्यात्मकत्वेनसर्पणशीला वाग्देवता पांचजन्यासु कृष्टिषु निषादपंचमाः चत्वारो वर्णाः त
सु बोधिनीषु प्रजासु यत् श्रवोन्नं विद्यते तन्नोस्मभ्यं अधि अधिकं यथा भवति तथा तूयं क्षिप्रं अभरत् भरतु। संपादयतु पलस्तिजमदग्नयः प
लस्तपः पलिताः दीर्घायुषो जमदग्नयो मुनयः यां वाचं सूर्याद्दूयमेमह्यं ददुः अदुः पक्ष्या पक्षस्य पक्षादिनिर्वाहकस्य सूर्यस्य दुहिता सा वाक् न
व्यं नवतरमायुरन्नं जीवनं वा दधाना मम कुर्वाणा भवतु। पांचजन्या सुपहिद्देवपंचजनेभ्यश्चेति वक्तव्यमिति ञ्यप्रत्ययः। नित्वादाद्युदात्तः। पक्ष्या
पक्षेभवा दिगादित्वात्। नित्स्वरितः। नव्यां नवशब्दाद्दुस्यादित्वत्स्वार्थिकोयत्। पलस्तिजमदग्नयः कर्मधारयसमासः। समासस्वरः ॥ ॥ अथ स
प्तदशी ॥ ॥ स्थिरौ गावौ भवतां वीलुरक्षो मेषा विवर्हि मा युगं विशारि ॥ इंद्रः पातल्ये ददतां शरीतोरस्ष्टिनेमे अभि नः सचस्व ॥ ॥ राजः सुदासो यज्ञेऽ
व भृथं कृत्वा यज्ञशालं प्रत्यतो निर्गंतुमिछन्नूरथेश्चादियुज्जानो विश्वामित्रो रथांगानि स्तौति। गावौ गच्छंताविति गावौ बलीवर्दौ स्थिरौ भवतां। अक्षस्त्वी लुर्दृढो

चरति प्रजानन्॥ ययोर्ह स्तोमे विदथेषु देवाः सपर्यवो मादयंते सचायोः॥ ॥हे स्तोतः महे महत्यै दिवे द्युलोकदेवतायै महत्यै पृथिव्यै च महि
महत् स्तोत्रमर्चकुरु। मम मकामनो रथः सर्वान् भोगानिच्छन् चरति सर्वत्र वर्तते। आयोर्मनुष्यस्य विदथेषु यज्ञेषु द्यावापृथिव्योः स्तोमे स्तोत्रे
सपर्यवः पूजाकामाः देवाः स्तोतारो सचा मादयंते सह माद्यंति खलु। पृथिव्यै। उदात्तयणो हल्पूर्वादिति विभक्तेरुदात्तत्वं। सपर्यवः सपर्यामिच्छंती
त्यर्थे सुप आत्मनः क्यच्॥ ॥अथ तृतीया॥ ॥युवोर्ऋतं रोदसी सत्यमस्तु महे षु णः सुविताय प्र भूतं। इदं दिवे नमो अग्ने पृथिव्यै सपर्यामि प्रयसा
यामि रत्नं॥ ॥हे रोदसी द्यावापृथिव्यौ युवोर्युवयोः ऋतमानृशंस्यं सत्यं यथार्थमस्तु। युवं नो अस्माकं महे महते सुविताय अभ्युदयाय यज्ञस
माप्त्यर्थं सुष्ठु प्रभूतं प्रभवतं। हे अग्ने दिवे पृथिव्यै च इदं नमो अस्तु प्रयसा हविर्लक्षणेनान्नेन सपर्यामि परिचरामि रत्नमुत्तमं धनं। यामि
याचे। याचतिर्याच्ञाकर्मा। ईमहे इत्यादिषु पठितत्वात्। सुसंहितायां सूत्र इति वत्वं। नः संहितायां नश्च धातुस्थोरुषुभ्य इति णत्वं। सुविताय। इणगतौ
अधिकरणे क्तः। शोभनं गम्यते अस्मिन्निति तत्सुवितं। उर्वंद इत्यादेशः ... प्रभूतं। भवतेर्लोटि बहुलं छंदसीति शपो लुकि सूपधाय द्वाक्तां
दसे लुङि सिचो मातिस्थेति लुक्। निघातः। दिवे पृथिव्यै नमः स्वस्तीत्यादिना चतुर्थी। सपर्यामि कंड्वादिः परिचरणे वर्तते। प्रत्ययस्वरः। या
मि याते लटि रूपं। वाक्यभेदादनिघातः॥ ॥अथ चतुर्थी॥ ॥उतो हि वां पूर्व्या आविविद्र ऋतावरी रोदसी सत्यवाचः। नरश्चिद्वां समि
थे शूरसातौ ववंदिरे पृथिवि वेविदानाः॥ ॥उतो अपि च हे ऋतावरी ऋतं सत्यं तद्वत्यौ हे रोदसी द्यावापृथिव्यौ पूर्व्याः पूर्वे भवाः पुरातनाः
सत्यवाचो महर्षयः वां युवाभ्यां आविविद्रे हिततममपेक्षितमर्थं लेभिरे। युवयोर्माहात्म्यं वेति क्षन्यः जानंतः द्यावापृथिव्यौ ववंदिरे स्तुवंति।

आविविद्रे विदिर् लाभे इत्यस्य मुभयपदी। लिटि इरयोरे इति रेत्यादेशः। सह सुपेत्यत्र सहेति योगविभागात् सह समासः। समिथे। इण्
गतौ समीण्ङ् इति थक् प्रत्ययस्वरः॥ ॥अथ पंचमी॥ ॥को अद्धा वेद क इह प्र वोचद्देवां अच्छा पथ्या का समेति। ददृश्र एषामवमा सदां
सि परेषु या गुह्येषु व्रतेषु॥ ॥को वा अद्धा सत्यभूतं तमिदृशमर्थं वेद वेत्ति को वा इहास्मिन्नत्र तदर्थं वोचत्। ब्रवीति। किं तदुच्यते। देवा
नच्छाभिलक्ष्य का पथ्या पथि साधुः समीचीनः। को मार्गः समेति सम्यक् प्राप्नोतीति इत्यमर्थं न कश्चिज्जानाति न कोपि ब्रवीति। किं तदेवाचि
द्यते ... इत्याह। एषां दिवि स्थितानां नक्षत्ररूपाणां देवानामवमा अधोमुखानि स्थानानि ददृश्रे दृश्यंते तथापि परेषूत्तमेषु गुह्येषु स्थाने
षु व्रतेषु कर्मस्वनुष्ठितेषु च यानि देवस्थानानि लभ्यंते तत्र गंतुं को मार्ग इति वेदमंतरेण न कश्चिज्जानातीत्यभिप्रायः। अद्धा स्वरादिषु पठितो
दात्तत्वेन पठितत्वादंतोदात्तः। वोचत्। ब्रूञ् व्यक्तायां वाचि। लुङि अब्रुवो वचिरिति वच्यादेशः। अस्यतिवक्तिख्यातिभ्योऽङिति च्लेरङादेशः। व
च उम् इति उमागमः। निघातः॥ ॥इति तृतीयस्य तृतीये चतुर्विंशो वर्गः॥ ॥अथ षष्ठी॥ ॥कविर्नृचक्षा अभि षीमचष्ट ऋतस्य योना वि
घृते मदंती॥ नाना चक्राते सदनं यथा वेः समानेन क्रतुना संविदाने॥ ॥कविः क्रांतदर्शी नृचक्षाः नृणां द्रष्टा सूर्यः सी एने द्यावापृथिव्यौ
अभ्यचष्ट सर्वतः पश्यति ऋतस्य योना जलस्य स्थाने अंतरिक्षे मदंती हृष्यंतौ विघृते घृतमस्याः ... जलमुमुषुप्रा इत्येवंविधरसोपेतं समा
नेन समानमेव उदकं भुज्ञे इत्यव वाहभिः। भूमिं पर्जन्या जिन्वंति दिवं जिन्वंत्यग्नय इति परस्परप्रीणनस्य ... केन क्रतुना कर्मणा संविदाने पर
स्परमेकमत्यं प्राप्ते द्यावापृथिव्यौ नाना पृथग्भूतं सदनं स्थानं चक्राते। तथा च श्रुतिः इमौ वै लोकौ सहास्तां तौ व्येतामिति॥ तत्र दृष्टांतः वय

ऋ·सं·भा·३

थावंदेकुलायंनानाभवतितद्वत्। अचष्ट। चक्षिङ्व्यक्तायांवाचीत्यस्यलङि थासः संयोगाद्योरितिककारलोपः। निघातः। संविदाने। विद ज्ञाने इ-
त्यस्य समोगमृच्छ्यादिना आत्मनेपदे शानच्। चित्वादंतोदात्तः॥ ॥ अथ सप्तमी॥ ॥ समान्या वियुते दूरेअंते ध्रुवे पदे तस्थतु जागरूके॥ उत स्व-
सारा युवती भवंती आदु ब्रुवाते मिथुनानि नाम॥ ॥ समान्या समाने परस्पर प्रगण्रव्येन कर्मणा एकमत्यं गते वियुते वियुज्य वर्त्तमाने दूरे
अंते जरयंतौ वसानां च यो स्ते दूरे अंते अविनाशिन्यौ ते द्यावापृथिव्यौ जागरूके जागरणशीले सत्यौ ध्रुवे अविनाशिनि पदे तस्थाने तस्थ-
तुः तिष्ठतः। उतापि च युवती नित्यतरुणे स्वसारा भगिन्यौ एकस्मादात्मनो जाते इति भवती तस्थतुरित्यन्वयः। आदनंतरं मिथुनानि द्वंद्वा-
नि नाम उर्वी पृथ्वी बकुले दूरे अंते रोदसी पुरोहिते इत्यादीनि नामानि ब्रुवाते परस्परं ब्रूतः। इत्यादिभिर्द्वंद्वनामभिः द्यावापृथिव्यावुच्येते इत्यर्थः।
समान्या सुपां सुलुगिति विभक्तेर्डादेशः। दूरे अंते। दुरएगतौ। दुरीणोलोपश्चेति रक्प्रत्ययो धातोर्लोपश्च। रारीतिरेफलोपः। ढ्रलोपे इति दीर्घः।
अंतः शब्दे आमेरसिदसीत्यादिना तन्प्रत्ययांतः। सप्तम्युपमानेति बहुव्रीहिः। हलदंतत् अहलदंतादपि सप्तम्या अलुक् पूर्वपदस्वरः। जा-
गरूके। जागृ निद्राक्षये इत्यस्मात् जाग्रोऽरूक् इत्यूकप्रत्ययः। प्रत्ययस्वरः। स्वसारा। न षट् स्वस्रादिभ्य इति ङीपः प्रतिषेधः॥ ॥ अ- राम
थाष्टमी॥ ॥ विश्वेदेते जनिमा सं विविक्तो महो देवान्बिभ्रती न व्यथेते॥ एजद्ध्रुवं पत्यते विश्वमेकं चरत्पतत्रि विषुणं वि जातं॥ ॥ ते द्यावापृथि- १२२
व्यौ विश्वा एते जनिम सर्वाण्यपि भूतजातानि सं विविक्तः। अवकाशप्रदानेन पि सं विभज्य कुरुतः। किंच महतो देवान् इंद्रसूर्यादीन् सरित्
समुद्रपर्वतादीश्च बिभ्रती बिभ्राणे अपि तेन खिद्येते। किंच चरत् जगदात्मकं स्थावरात्मकं जगत्। एकस्थानं पृथिवीमपत्यते अभिग-

॥ इति द्वितीयस्य तृतीये मंडले चतुर्थोऽनुवाकः॥ ॥ पंचमेऽनुवाके नव सूक्तानि॥ ॥ इमं महे इति द्वाविंशत्यृचं प्रथमं सूक्तं त्रैष्टुभं वैश्वदेवं वि-
श्वामित्रपुत्रस्य वा कुपुत्रस्य वा प्रजापतेरार्षं इयमनुक्रमणिका। इमं महे षड्धिका कोगोत्रप्रजापतिर्हि वैश्वदेवं हेति। अस्मिन्सूक्ते आ-
द्याग्नेयी ततः परं सप्त वा द्यावापृथिव्याः ततः परा षड्देवताका दशमी। द्यावापृथिव्या एकादशी सावित्री ततः परस्तृतदिति त्वाष्ट्री आर्भवी वा विंद्-
ये च मारुती सारस्वती च ततः परं तिस्रो विंद्राग्निदेवताकाः। चदस्वेति आग्नेयीति एवं वैश्वदेवं सूक्तं। सूक्तविनियोगो लैंगिकः। अग्निप्र-
णयने राजन्यस्येमं महे इति प्रतिपत्। चमस्यां पौर्णमास्यामिष्ट्यत्र सूचितं। इमं महे विदथ्याय शूषमिति॥ ॥ तस्मिन्सूक्ते प्रथमा॥ ॥ इमं महे वि-
दथ्याय शूषं शश्वत्कृत्व ईड्याय प्र जभ्रुः॥ शृणोतु नो दम्येभिरनीकैः शृणोत्वग्निर्दिव्यैरजस्रः॥ ॥ महे महते विदथ्याय विदथे यज्ञे मंथने
न पाद्यमानाय ईड्याय स्तवैः स्तुत्याय अग्नये शूषं सुखकरमिमं स्तोमं शश्वत्कृत्वः भूयो भूयः प्र जभ्रुः प्रभरंति प्रकर्षेण धारयंति उच्चारयंत्य-
र्थः। सोऽग्निर्दम्येभिः परेषां दमनकुशलैरनीकैस्तेजोभिर्युक्तः सन् नोऽस्मदीयं इमं स्तोत्रं शृणोतु। दिव्यैर्दिवि भवैस्तेजोभिरजस्रः। निरंतरं यु-
क्तोऽग्निरिमं स्तोमं शृणोतु। शश्वत्कृत्व ईड्याय प्र जभ्रुरिति। स्वा नामैवेनं तच्छुष्मं गमयतीति ब्राह्मणानुसारेण महदादिगुणविशिष्ट यजमाना-
य भमाग्निं प्र जभ्रुः प्रहरंति ऋत्विज इति वा व्याख्येयं। उत्तरोऽर्धर्चः समान एव। विदथ्याय। तत्र भव इत्यर्थे भवे छंदसीति यत्। तित्स्वरः। ईड्या-
य। ईडवंदेत्यादिना उदात्तत्वं। दम्येभिः। तत्र साधुरिति यत्। यतोऽनावः। दिव्यैः। दिवमर्हतीत्यर्थे छंदसि चेति यप्रत्ययः। अजस्रः। जसु मोक्षणे।
नञ्पूर्वः। नमिकंपीत्यादिना ताच्छीलिको रप्रत्ययः। नञ्। समासे तस्य स्वरः॥ ॥ अथ द्वितीया॥ ॥ महि महे दिवे अर्चा पृथिव्यै कामो म इच्छं

शृणवन्नृतादिदं स्तोत्रं शृण्वंतु। शृण्वन्नु श्रु श्रवणे इत्यस्यालङडागमः। अग्निजिह्वाः त्रिचक्रादित्वाद्दंतोदात्तत्वं॥ प्रथानाः प्रथ प्रख्याने इत्यस्मा
कानचि रूपं त्रित्वाद्दंतोदात्तः॥ ॥इति तृतीयस्य तृतीये पंचविंशो वर्गः॥ ॥अथैकादशी॥ ॥हिरण्यपाणिः सविता सुजिह्वस्त्रिरा दिवो विदथे पत्य
मानाः॥ देवेषु च सवितः श्लोकमश्रेरादस्मभ्यमा सुव सर्वतातिं॥ ॥हिरण्यपाणिः दानार्थो हिरण्यं पाणौ हस्ते यस्य स तथोक्तः। यद्वा देवकर्तृ
कयागे सवितृ ऋत्विग्भूतस्य हस्ते प्राशित्रं भक्षणार्थं अध्वर्यवो ददुः तत्प्राशित्रं तस्य हस्तौ चिच्छेद ततो ध्वर्यवो हिरण्मयौ हस्तौ कृत्वा संद
धुः ततोयं हिरण्यपाणिः। तथा च कौषीतकं सवित्रे प्राशित्रं जह्रुः तस्य पाणी प्रचिच्छेद तस्मै हिरण्मयौ प्रतिदधुः तस्माद्धिरण्यपाणिरिति॥ सु
जिह्वः शोभनवाक् सविता विदथे यज्ञे त्रिः त्रिषु सवनेषु दिवो नभसः सकाशात् आपत्यमानः आगच्छन् सवनीति शेषः। पुरोधर्च्चः प्रत्ययः। हे
सवितस्त्वं देवेषु स्तोत्रं पृथुविधमानं शब्द्यते अनेनेति श्लोकः स्तोत्रं वदथे: प्राश्नुहि च आदेनंतरं सर्वतातिं सर्वमपेक्षितं फलं अस्मभ्यमा
सुव प्रेरय। हिरण्यपाणिः हिरण्यशब्दो यास्केन बहुधा निर्वक्ति। हिरण्यं कस्माद्ध्रियत आयम्यमानमिति का ह्रियात जनाज्जनमित्यादिना पा
णिशब्दं च निर्वचनः। पाणिः पणायतेः पूजाकर्मणः इति। हर्य कांतिगत्योः। हर्यतेः कन्यन् हिर च तिकन्यन् हिर इत्ययमादेशो धातोः नित्वा
दाद्युदात्तः। बहुव्रीहौ पूर्वपदस्वरः। पत्यमानः। पद गतौ। दिवादिरात्मनेपदी। देकारस्य तकारश्छांदसः। अश्रेः श्रिञ् सेवायामित्यस्य लङि
बहुलं छंदसीति शपो लुक्। चवायोगे प्रथमेति न निघातः। सुव षू प्रेरणे। तुदादिः। सर्वतातिं। सर्वदेवात्तातिल् स्वार्थिकः। लित्स्वरः॥ ॥अथ द्वा
दशी॥ ॥सुकृत्सुपाणिः स्ववाँ ऋतावा देवस्त्वष्टावसे तानि नो धात्। पूषण्वंत ऋभवो मादयध्वमूर्ध्वग्रावाणो अध्वरमतष्ट॥ ॥सुकृत् सुष्ठु जग

तः कर्ता सुपाणिः कल्याणपाणिः स्ववान् ऋतवा सत्यसंकल्पः त्वष्टा देवतानि पान्यस्माकमपेक्षितानि अवसे रक्षणाय नोस्मभ्यं धात् ददातु ऋभ
वः उरु भांतीति ऋभवः हे ऋभवः पूषण्वंतः पूष्णा सहिता यूयं मादयध्वं अस्मान् धनप्रदानेन हृष्टान् कुरुत ऊर्ध्वग्रावाणः सोमाभिषवार्थ
मुद्यतग्रावाणः संत ऋत्विजः यूयमस्मदीयमध्वरमतष्ट कुर्वंतु। अतष्ट। तक्षू त्वक्षू तनूकरणे। ऊदित्वादिडभावः। झलो झलीति सिचो लोपः।
स्कोः संयोगाद्योरिति ककारलोपः। बहुवचनस्यैकवचनं छांदसः॥ ॥अथ त्रयोदशी॥ ॥विद्युद्रथा मरुत ऋष्टिमंतो दिवो मर्या ऋतजाता
अयासः॥ सरस्वती शृणवन् यज्ञियासो धाता रयिं सहवीरं तुरासः॥ ॥विद्युद्रथाः विद्योतमानरथोपेताः ऋष्टिमंतः दीप्तिमंतः ऋष्टिरायु
धविशेषः तद्वंतो वा दिवो द्योतमानाः मर्याः शत्रूणां मारयितारः ऋतजाताः उदकाय यज्ञाद्वा प्रादुर्भूता यद्वा ऋतमुदकं जाते येभ्यः ते ऋ
तजाताः अयासः सततगमनशीलाः यज्ञियासः यज्ञार्हा मरुतः सरस्वती गद्यपद्यरूपेण प्रसरणमस्यास्तीति सरस्वती वाग्देवता च एते
सर्वे इमं मदीयमिमं स्तोमं शृणवन् शृण्वंतु। तुरासः अस्माकं फलप्रदाने त्वरणयुक्ताः हे मरुतः सुहवीरं पुत्रसहितं रयिं धनं धात अ
स्मभ्यं धत्त धात दधातेर्लोटि बहुलं छंदसीति शपो लुक्। तप्तनप्तनथनाश्चेति तनादेशः। पादादित्वादनिघातः। ननेपाः पित्वादनुदात्त
त्वे धातुस्वरः। तुरासः तुर त्वरणे। इगुपधलक्षणः कः। आमंत्रितत्वान्निघातः॥ ॥अथ चतुर्दशी॥ ॥विष्णुं स्तोमासः पुरुदस्ममर्का भगस्येव
कारिणो यामनि ग्मन्। उरुक्रमः ककुहो यस्य पूर्वीर्न मर्धंति युवतयो जनित्रीः॥ ॥स्तोमासः शस्यंते एभिरिति स्तोत्राणि अर्काः अर्चनाया
नि शस्त्राणि च भगस्येव धनस्येव कारिणः कर्तॄणीतस्त्विन्नोनिता नियामनि संततं प्रतापमाने स्मिन्यज्ञे पुरुदस्मं बहुकर्माणं यद्वा बहुद

दस्यति उपक्षयतीति पुरुदस्मः तं विष्णुं देवं मेनगा स्तुत। पृथिवी बृहद्दिवः जनित्रीः सर्वस्य जनयित्र्यः। युवतयः परस्परमसंकीर्णाः ककुभः ककुभ्यन्ते विस्तार्यन्त इति
ककुभो दिशः। यद्वा ककुभ् भुक्ष्यार्थः। उद्धृतोऽद्रुतिहि दिशो वृक्षावप्युपलभ्यमाना तिष्ठन्ति। एता दिशो विस्तारा ज्ञानमर्धयन्ति महिमं संतिविष्णुं रुरु
क्रमः पादविक्षेपो यस्य सः। त्रिविक्रमावतारे एकेनैव पादेन सर्वं जगदाक्रम्यातिष्ठत। मनगमेर्लुङि मंत्रे घसेत्यादिना च्लेर्लुक्। ककुभः पृषो
दरादित्वात् उपस्वरसिद्धिः॥ ॥अथ पंचदशी॥ ॥ इंद्रो विश्वैर्वीर्यैः पत्यमान उभे आ पप्रौ रोदसी महित्वा। पुरंदरो वृत्रहा धृष्णुषेणः संगृ
भ्यानः आ भरा भूरि पश्वः॥ ॥ सर्वैर्वीर्यैः सामर्थ्यैः पत्यमानः प्राप्यमाणः स इंद्रः पराभिभवनशीलसेनोपेतः संत्वं पश्चाप शत्रून् संगृह्य नोऽस्म
भ्यं भूरिप्रभूतं यथा भवति तथा आसर देहि। यद्वा पश्वः पशोर्भूरिबहुत्वं बहून् पशून् सं आयच्छेति। पुरंदरः दृ विदारणे इत्यस्य पुरू शब्दउपप
दे पूः सर्वयोर्दारिसहोरिति खच् प्रत्ययः। वाचंयमपुरंदरौ चेति निपातनात् पूर्वपदस्य समागमः। नित्वादंतोदात्तः धृष्णुषेणः पूर्वपदादिति
संहितायां षत्वं। पदाषत्वं न दारषाभ्यामिति षत्वं। ग्रहेर्ल्यपि स्थानिवद्भावात् संप्रसारणं। कृ ग्रहोर्भश्छंदसीति भत्वं। द्व्यचोतस्तिङ इति प्रत्ययात् पूर्वस्यो
दात्तत्वं। पश्वः पशुशब्दात् ङसः जसादिषु छंदसि वा वचनमिति सवर्णदीर्घाभावः॥ ॥ इति तृतीयस्य तृतीये षड्विंशो वर्गः॥ ॥ अथ षोडशी॥
॥नासत्या मे पितरा बंधुपृच्छा सजात्यमश्विनोश्चारु नाम॥ युवं हि स्थो रयिदौ नो रयीणां दात्रं रक्षेथे अकवैरदब्धा॥ ॥ हे नासत्यावश्विनौ
बंधुपृच्छा हविः प्रदातृत्वेन बंधून् अस्माना पप्रच्छितमर्थं पृच्छत इति बंधूनां पृष्टारौ युवामपि मे पितरौ पालयितारौ भवतं युवयोरश्विनोः सजात्येन भवं सं
गतं चारु नाम कमनीयं खलु हे अश्विनौ युवं युवां नोऽस्मभ्यं रयीणां धनानां नामध्येम पि दे उत्तमस्य धनस्य दातारौ स्थो हि भवथः खलु। किं च

तिन तथा च रक्षं च लोप शुज्जातं पत त्रि पक्षिजातं च विषुणं विष्वक् नानारूपं अनयोर्मध्ये स्थितिष्ठते यो ये क्रियाध्याहारः। विविक्तः विविरष्टयभावेजु
होत्यादिः निघातः। बिभ्रती। डुभृञ् धारणपोषणयो रित्यस्य शतरि अभ्यस्ताच्छनुरिति नुभावः। अभ्यस्तस्वरः। एजत् एजृ कंपने। शतरि रूपेप
त्यते पदगतो दिवादिरात्मनेपदी। दकारस्य तकारो व्यत्ययेन निघातः॥ ॥अथ नवमी॥ ॥ सना पुराणमध्येम्यारान्महः पितुर्जनितुर्जामि तन्नः।
देवासो यत्र पनितार एवैरुरौ पथि व्युते तस्थुरंतः॥ ॥ हे द्यो महो महत्या पितुः सर्वस्य पालयित्र्याः जनयितुः जनयित्र्याः स्तवसनोसनातनं पु
राणं पूर्वक्रमागतं। नोऽस्माकं तज्जामि जामित्वं सर्वमस्माज्जातमिति द्यौर्भगिनी भवति। तादृशं भगिनीत्वं तदारात् अधुना अध्येमि स्मरामि दिव
पितृत्वे जननीत्वे च मंत्रवर्णः। द्यौर्मे पिता जनिता नाभिरत्रेति। यत्र यस्यां दिवि अंतर्मध्ये उरौ विस्तीर्णे पथि तो विविक्ते स्तोत्रं शृण्वंतीति भावः॥
पुराणं पुराशब्दात् शेषिकार्थे सायंचिरमिति ट्युप्रत्ययः। पुराण प्राक्तेषु आह्नेण पुराणक्लोऽस्थितिनिपातनात् तुडभावः। निपातनादेवांतोदात्त
त्वं पतेः। इक्स्मरणे। अदादिः। लटि रूपं। निघातः। व्युते। वे अजूतंतुसंताने कर्मणि क्तः यजादित्वात् संप्रसारणं। गतिरनंतर इति। गते अक्रतिस्वरः।
तस्थुः तिष्ठतेर्लिटि रूपं। यत्र योगाद निघातः॥ ॥अथ दशमी॥ ॥ इमं स्तोमं रोदसी प्र ब्रवीम्यृदूदराः शृणवन्नग्निजिह्वाः। मित्रः सम्राजो वरु
णो युवान आदित्यासः कवयः पप्रथानाः॥ ॥ हे रोदसी द्यावापृथिव्यौ इमं युष्मदीयं स्तोत्रं प्रब्रवीमि प्रकर्षेण ब्रवीमि। ऋदूदराः ऋयुरुदरं
येषां ते ऋदूदराः। यद्वा मृयु उदरे सोमाय येषां ते ऋदूदराः। अग्निजिह्वाः अग्निर्जिह्वास्थानीयो येषां ते तस्योक्ताः संम्राजः सम्यग्दीप्यमानाः युवानो नित्यतरुणाः यद्वा यजमानानभिमतफलेर्मिश्रीकुर्वंतः कवयः क्रांतदर्शिनः पप्रथानाः स्वानि स्वानि कर्माणि प्रथयंतो मित्रादयो देवा

पुनर्वितित प्रत्ययस्य तयादेशः। गते। गम्लृ गतौ। सितनिगमि। मसिसिभ्यः विधा‌ऽकृशिभ्यस्तुगिति तुप्रत्ययः। नित्वादाद्युदात्तः। गातुः। गाया
हिभ्याश्चत्तितु प्रत्ययः॥ ॥ अथैकोनविंशी॥ ॥ देवानां दूतः पुरुध प्रसूतो ऽनागान्नो वोचतु सर्वताता॥ शृणोतु नः पृथिवी द्यौरुतापः सूर्यो नक्ष
त्रैरुर्व१न्तरिक्षं॥ ॥ पुरुधपुरुषु बहुषु देशेषु प्रसूतः अग्निर्होत्रार्थं विहृतः यद्वा पुरुभिर्यजमानैः प्रसूतः प्रेरितः यद्वा देवाह्वानार्थं प्रेरितो दे
वानां दूतः। तथा चैत्तिरीयकं। अग्निर्हि देवानां दूत आसीदिति। स हूतो ऽग्निः कर्मकर्तृसाधनत्वे गुणायेव सा परीधानत्वस्मादनागान् अनागसः सर्व
ताता सर्वत्रावो ऽनु ब्रवीतु। किं च। पृथिवी द्यौश्च उतापि चापः सूर्यश्च नक्षत्रैः उरु विस्तीर्णं अंतरिक्षं च। एते सर्वे देवा नो ऽस्मदीयां स्तुतिं शृण्व
न्तु। शृण्वेवंतु। प्रत्येकविवक्षयैकवचनं। प्रसूतः। षूं प्रेरणे। कर्मणि क्तः। गतिरनंतर इति गतेः प्रकृतिस्वरः। अनागान्। शसि सकारलोपश्छांदसः।
सवर्णदीर्घकृतेन तस्माच्छंद सोन इति नत्वं। वोचतु। वच परिभाषणे। व्यत्ययो बहुलमिति शापो ऽङादेशः। वच उम गुणः। निघातः। नक्षत्रैः
नक्ष गतौ। अमिनक्षियजिवधिपतिभ्यो ऽत्रन्निति अत्रन्प्रत्ययः। नित्वादाद्युदात्तः। यद्वा नक्षरतिनक्षीयेत इति वा न भ्राजेन या दितिनञः
प्रकृतिभावः। तत्रः स्वरः॥ ॥ अथ विंशी॥ ॥ शृण्वंतु नो वृषणः पर्वतासो ध्रुवक्षेमास इळया मदंतः॥ आदित्यैर्नो अदितिः शृणोतु यच्छंतु नो
मरुतः शर्म भद्रं॥ ॥ वृषणो ऽभिमतफलानां सचकामकृतः श्रूणं ति पूरयंति अर्थिनो कामानिति पर्वता ग्रावाभिमानिनो देवा ध्रुवक्षेमासः। निश्च
लोऽस्थानाः इळया हविर्लक्षणेनान्नेन मदंतः माद्यंतः संतः नो ऽस्मदीयां स्तुतिं शृण्वंतु। किं च। आदित्यैरपत्यभूतैरादित्यै रूपेनादितिर्नो ऽ
स्मदीयां स्तुतिं शृणोतु। मरुतश्च नो ऽस्मभ्यं भद्रं कल्याणकरं शर्म सुखं यच्छंतु ददतु। आदित्यैः। अदितेरपत्यानि। दित्यदित्यादित्यपत्युत्तरपदाण्ण्य इति अपत्यार्थे ण्यः। प्रत्य

यस्वरेणांतोदात्तः। सुपासेहेकादेशे कृते एकादेश उदात्तः। येवत्स्य न्यतमात्तः। सदा सुग इत्यत्र चं जपनूगच्छेत्। सूचितं च। सदा सुगः पितुमां अ
स्तु पंथा इति पंथानमवरुध्येति॥ ॥ सेषा सूक्ते एकविंशी॥ ॥ सदा सुगः पितुमाँ अस्तु पंथा मध्वा देवा ओषधीः सं पिपृक्त॥ भगो मे अग्ने सख्ये
न मृध्या उद्रायो अश्यां सदनं पुरुक्षोः॥ ॥ हे अग्ने अस्माकं पंथा मार्गः सदा सर्वदा सुगः सुखेन गंतुं शक्यः पितुमानन्नवं श्चास्तु। हे देवाः
मध्वा मधुपा पेतेनउदकेन ओषधीः संपिपृक्त संपर्चयत वा सवयतेत्यर्थः। हे अग्ने त्वया सख्ये सं जाते सति मे मम भगो धनं न मृध्या। न वि
नत्पतु। किं च रायो धनस्य पुरुक्षोः बहन्नस्य च सदनं स्थानमुदश्यां प्राप्नुयां। सदा स्वरादिषा आद्युदात्तत्वेन पाठो दाद्युदात्तः। पिपृक्त। लोटि
बहुलं छंदसीति शपः श्लुः। बहुलं छंदसीत्यभ्यासस्येत्वं मृध्याः। मृधि हिंसार्थः। लिङि इति ङेति ङ्भवंतीति तिपः सिप्॥ ॥ पशोः पुरोडाश
स्विष्टकृतः स्वदस्व हव्येति याज्या सूत्रितं च। स्वदस्व हव्या समिषो दिदीहीति पुरोडाशस्विष्टकृत इति॥ ॥ सेषा सूक्ते द्वाविंशी॥ ॥ स्वदस्व
हव्या समिषो दिदीह्यस्मद्र्य१क्सं मिमीहि श्रवांसि॥ विश्वाँ अग्ने पृत्सु ताञ्जेषि शत्रूनहा विश्वा सुमना दिदीहि नः॥ ॥ हे अग्ने हव्या हवनयो
ग्यानि हवींषि स्वदस्व स्वदय। अस्माकमिषो ऽन्नानि संदिदीहि सम्यक् प्रकाशय। स्वदस्व। स्वद आस्वादने। लोटि रूपं। थासो ऽत्र सार्वधातुकस्वरे धा
तुस्वरः। दिदीहि। दिवु क्रीडादावित्यस्य लोटि बहुलं छंदसीति विकरणस्य श्लुः। परत्वात्। हलि चेति दीर्घत्वे कृते श्वा दृलित्युलोपः। निघा
तः। अस्मद्र्यक्। अस्मानं चतीति अंचतेः क्विप्। विष्वग्देवयोश्चेति अद्रेरतिपणः स्वरितत्वं। मिमीहि। माङ् माने शब्दे च जुहोत्यादिः। तस्य लोटि व्यत्ययेन
परस्मैपदं। निघातः। सुमनाः सौमनसी त्युत्तरपदाद्युदात्तत्वं। दिदीहि। दिवेर्यङ्लुकि लोटि तुदादित्वादभ्यासस्येति दीर्घः॥ इति तृतीयस्य तृतीये सप्तविंशो वर्गः॥ ॥

ऋ·सं·भा·३

।उषसः पूर्वा इति द्वाविंशत्यृचं द्वितीयं सूक्तं। अत्रेयमनुक्रमणिका। उषसः पूर्वा द्व्यधिकेत्यनुक्रमणिका। प्रजापतेरार्षं वैश्वदेवं प्रजापतिर्हि वैश्वदेवं हेति॥ पूर्वसूक्ते ह
शब्दः प्रागात्। सूक्तविनियोगो लैंगिकः अथवा होषस्या। ततः परं नवर्चस्या देवता। नेतः पराहोशंसि देवताका तेन श्वनत्स्वारो हस्यापं चदश्री॥ घृ
निश्चौर्वीषोडशीदिग्देवताकाततः षळृचः चर्षतः इंद्रस्य केविदग्ने स्व पृश्नेति मन्यते॥ ॥तत्र प्रथमा॥ ॥उषसः पूर्वा अध यद्व्यूषुर्महद्वि जज्ञे
अक्षरं पदे गोः॥ व्रता देवानामुप नु प्रभूषन्महद्देवानामसुरत्वमेकं॥ ॥पूर्वा उदयकालात्प्राचीना उषसो यद्यदा व्युषुः। व्युच्छंति अथ तदानीं
अक्षरं न क्षरतीत्यक्षरं अविनाशि आदित्याख्यं। महत्यभूतं ज्योतिः। गोरुदकस्य पदे स्थाने समुद्रेन भसि वा वि जज्ञे उत्पद्यते। अथोदिते सूर्ये प्रभू
षन्नू अग्निहोत्रादि कर्म सु प्रभवितुमिच्छन्यजमानः व्रता कर्माणि देवानां नु क्षिप्रं उपसमीपं तिष्ठति। योग्यक्रियाध्याहारः। तदिदं देवानामेकं
मुख्यं असुरत्वमस्यति क्षिपति सर्वानित्यसुरः प्रबलः तस्य भावः। प्राबल्यं महदैश्वर्यं व्यूषुः उष पुष दाहे रसस्य विपूर्वस्य लिटि उसि रूपं स
हेति योगविभागात्समासः। यद्वृत्तयोगादनिघातः। प्रभूषन् भवते। सनि द्विर्वचनस्य छंदसि विकल्पितत्वादत्र द्विर्वचनाभावः। तदंताच्छ
तरि रूपं। प्रादिसमासः। शतुर्लसार्वधातुकस्वरे धातुस्वरः॥ ॥अथ द्वितीया॥ ॥मो षु णो अत्र जुहुरंत देवा मा पूर्वे अग्ने पितरः पदज्ञाः॥ पु
राण्योः सद्मनोः केतुरंतर्महद्देवानां०॥ ॥हे अग्ने अत्रास्मिन्काले देवा नोस्मान्नु सु सुष्ठु मो जुहुरंत माहिंसिषुः तथा पदज्ञाः कर्माण्यनुष्ठाय
देवपदमनुभवंतः पूर्वे पुरातनाः पितरः माहिंसिषुः यस्मात्केतुर्ज्ञानानां प्रज्ञापकः सूर्यः पुराण्योः पुरातनयोः सद्मनोः सीदंत्यनयोर्देवम
नुष्या इति सद्मनी रोदसी तयोरंतर्मध्ये उदेति तस्मादस्मान्माहिंसत्वित्यर्थः। महद्देवानामित्यादि पूर्ववत्। जुहुरंत। हृ प्रसह्यहरणे। लुङि उ

अदस्था केनाप्यतिरस्कृतो युवां दातारं विश्वां दातारं मां अकरवे रकुत्सितैः शोभनैः कर्मभिः रथे येथे पालयतो नासत्या। न ध्वारा नपा दृत्या दिभि
पातनान्नत्र प्रकृतिभावः॥ ॥अथ सप्तदशी॥ ॥महत्तद्वः कवयश्चारु नाम यद्ध देवा भवथ विश्व इंद्रे। सख ऋभुभिः पुरुहूत प्रियेभिरिमां
धियं सातये तक्षता नः॥ ॥हे कवयो मेधाविनो हे देवाः वो युष्माकं तन्नाम दृशं महत्त्वभूतं नाम कर्म नमनवा चारु मनोहरं खलु। यद्येन कर्मणा
विश्वे सर्वे पूर्वं यं इंद्रे इंद्रोपलक्षिते लोके देवा भवथ देवत्वं प्राप्नुथ खलु हे पुरुहूत बहुभिराहूत हे इंद्र त्वं प्रियेभिः प्रियतमैः ऋभुभिः ऋतेन
भवंतीति ऋतेन भांतीति वा ऋभुभिर्देवैः सखा सखि इंद्र सहिता ऋभवो यूयं इमामस्मदीयां धियं स्तुतिं नोस्माकं सातये धनादिलाभार्थं तक्ष
त स्वीकुरुत। सुपां सुलुगित्यादिना सुपो लुक्। भवथ। भवतेर्लटि रूपं। यद्वृत्तयोगादनिघातः। सख ऋभुभि ऋत्यस्य संहितायां। मृत्यकइ
ति प्रकृतिभावः॥ ॥ह्रस्वत्वं च॥ ॥अथाष्टादशी॥ ॥अर्यमा णो अदितिर्यज्ञियासो ऽदब्धानि वरुणस्य व्रतानि॥ युयोत नो अनपत्यानि गंतोः प्र
जावान्नः पशुमाँ अस्तु गातुः॥ ॥अर्यमा गच्छति सर्वदा गच्छति सर्व सर्यमा सूर्यः अदितिर्देवमाता यज्ञियासो यज्ञार्हा देवा यस्य वरुणस्य
व्रतानि कर्माणि यद्वा पतनेकारणेन भवति। पत्यत्यत दस्यास्य पत्यानि पातनकारणानि कर्माणि गंतोः सन्ध्याध्र युयोत पृथक्कुरुतायथा
लन्यहितानि कर्माणि न स्पृशंति तथा कुरुतेत्यर्थः। अथ मा तु गायं ति स्तुवंति इंद्रादीनां त्रतिगातुर्गृहं नोस्मदीयं गृहं पशुमानस्वादियु
क्तं प्रजावान् अपत्योपेतमस्तु अर्यमा ऋगतौ। जुउष प्रीहा। ल्युदत्नि त्यादिना निपातनाद्रूपसिद्धिः। अदितिः। दीङ् क्षय इत्यस्य कर्तरि क्ति
नि नञा समासः। अदितिरदीनेति यास्कः। छांदसं ह्रस्वत्वं। नञ् स्वरः। युयोत। यौतेरमिश्री भावकर्मणो लोटि बहुलं छंदसीति शपः श्लुः शम

ह

राम
२२६

तासु तरुणीष्वंतः ॥ अंतर्वतीः सुवते अप्रवीता महत्० ॥ ॥ पूर्वासु जीर्णास्वोषधीषु आक्षित् आ वर्तयमानाः तथा अपराः नद्या ओषधीरनू
रुता अनुरुंधन् उत्पद्यस्यानुरुंधत्येनानुतिष्ठन्नग्निः सूर्यो वा सद्यो जाता सुतदानीं सुत्पन्नासु तरुणीषु पल्लवितासु ओषधीष्वंतर्वर्तते ता
ओषधयः अप्रवीताः केनापि रूपेणानिषिक्तरेतस्का अनभ्याक्रांता अंतर्वतीः असिनी गर्भवत्यो भूत्वा सुवते फलपुष्पं चोत्पादयंति ॥ तदि
दं देवानामैश्वर्यं ॥ आक्षित् क्षि निवासगत्योः क्विप् ॥ अनूरुत् अनो रुध कामे अस्मान्नु क्विप् अनोषामपि दृश्यत इति दीर्घः ॥ कृत्स्वरः ॥ त
रुणीषु नञ्समीकवत्तरुणान्तलुनानामुपसंख्यानमिति ङीप् ॥ अंतर्वतीः तदस्यास्तीति मतुप् ... गर्भविमोचन इत्यस्य छांदि
पं ॥ निघातः ॥ ॥ इति तृतीयस्य तृतीये अष्टाविंशो वर्गः ॥ ॥ अथ षष्ठी ॥ ॥ शयुः परस्तादध नु द्विमाताबंधनश्चरति वत्स एकः ॥ मित्रस्य
ता वरुणस्य व्रतानि महत्० ॥ ॥ हे द्यावापृथिव्यौ मातरौ यस्य स द्विमाता यद्वा द्वयोर्लोकयोर्निमिता ॥ सूर्यः परस्तात् पश्चिमायां दिशि अस्तवे
लायां शयुः शयानः अव्याप्रियमाणो भवति ॥ अध नु अथोदयवेलायामेकः द्यावापृथिव्योः साधारणस्तयोरसादनो द्वन्द्वः पुत्रः अबंध
नः अप्रतिबंधगतिरनालंबनः एकः सन् चरति नभसि गच्छति ॥ तानीमानि मित्रावरुणयो व्रतानि कर्माणि ॥ शयुः शीङ् स्वप्ने ॥ भृमृशी
तृचरि त्यादिना उप्रत्ययः ॥ द्विमाता न घृतश्चेति प्राप्तस्य रूपः ॥ ततश्छंदसीति प्रतिषेधः ॥ ॥ अथ सप्तमी ॥ ॥ द्विमाता होता विदथेषु सम्राळ
न्वग्रं चरति क्षेति बुध्नः ॥ प्र रण्यानि रण्यवाचो भरंते महत्० ॥ ॥ द्विमाता द्वयोर्लोकयोर्निमिता ॥ विदथेषु यज्ञेषु होता देवतानामाह्वाता सम्राट्
यज्ञेषु सम्यग्राजमानोऽग्निः अग्रे दिवि चरति सूर्यभूतः सन् अर्वतीते ॥ बुध्नः सर्वस्य कर्मणो मूलभूतः सन् क्षेति ॥ भूमौ वसति ॥ यद्वाग्रे मुख्ये

भागं चरति ॥ क्षेति यद्वा नोग्रहे सु निवसति यद्वा बुध्नः प्रतिष्ठा अंते भागी स्विष्टकृद्रूपेण प्रतिष्ठा वै स्विष्टकृदिति श्रुतेः ॥ किंच रण्यवाचः र
मणीयवाचः स्तोतारः रण्यानि रमणीयानि स्तोत्राणि भरंते प्रणयंति कुर्वंति ॥ तदिदं देवानामैश्वर्यं चरति ॥ चादिलोप इति न निघातः ॥ ॥ अ
थाष्टमी ॥ ॥ शूरस्येव युध्यतो अंतमस्य प्रतीचीनं ददृशे विश्वमायत् ॥ अंतर्मतिश्चरति निःषिधं गोर्महत्० ॥ ॥ अंतमस्य समीपवर्तमा
नस्य दीप्यमानस्याग्नेः आयात् अभिमुखमागच्छत् विश्वं भूतजातं प्रतीचीनं पराङ्मुखं दृश्यते ॥ तत्र दृष्टांतः ॥ शूरस्येव ॥ यथा युध्यतो युद्धं कुर्वा
णस्य शूरस्य समर्थस्य राज्ञोऽभिमुखमागच्छत् परबलं पराङ्मुखं दृश्यते तद्वत् ॥ मतिः सर्वैर्ज्ञायमानः सोऽग्निः गोरुदकस्य निःषिधं हि
सिकां दीप्तिं मंतश्चरति ॥ अंत इ रियति ॥ युध्यतः ॥ युध संप्रहारे ॥ दिवादित्वात्तस्य शतरि रूपं ॥ अंतमस्य ॥ अंतशब्दादिति नि उनाविति
तन् ॥ अंतिकापयेनोतिक इत्यर्थे तमप् तमेतादेश्चेति तादिलोपः ॥ नित्वादाद्युदात्तः ॥ प्रतीचीनं ॥ प्रतिपूर्वस्यांचतेः क्विन् तस्माद्विभाषेत्यंदि
क् ॥ स्त्रियामिति श्च ईनादेशः प्रत्ययस्वरः ॥ आयत् या प्रापणे इत्यस्याङ्पूर्वस्य शतरि रूपं ॥ आङ्पूर्वस्य अप पपगता विद्यस्य शतरि रूपं
॥ वतिस्तुत्यत्व नवधारणादनवग्रहः ॥ ॥ अथ नवमी ॥ ॥ नि वेवेति पलितो दूत आस्वंतर्महाँश्चरति रोचनेन ॥ वपूंषि बिभ्रदभि नो वि चष्टे
महत्० ॥ ॥ पलितः पालयिता पूर्णो वा देवानां दूतोऽग्निः आस्वोषधीषु नि वेवेति नितरां व्याप्य वर्तते ॥ महान् सोऽग्निः ॥ रोचनेन सूर्येण सह अं
तः रोदस्योर्मध्ये चरति ॥ वपूंषि नानाविधानि रूपाणि बिभ्रत् सोऽग्निः नोऽस्मान् पश्यन् विचष्टे विशेषेणानुग्रहदृष्ट्या पश्यति ॥ वेवेति वीरो त्यादिषु
यङ्लुकि ईडभावे रूपं ॥ रोचनेन सहार्थे तृतीया ॥ बिभ्रत् डु भृञ् धारणपोषणयोरित्यस्य शतरि रूपं ॥ अभ्यस्तस्वरः ॥ ॥ अथ दशमी ॥ ॥

॥विष्णुर्गोपाः परमं पाति पाथः प्रिया धामान्यमृता दधानः॥ अग्निष्टा विश्वा भुवनानि वेद महद्दे०॥ ॥विष्णुर्व्याप्तः गोपाः सर्वस्य गोपायिता प्रि
ऋ॰सं॰भा॰३ याः प्रियतमानि अमृतानि क्षयरहितानि धामानि तेजांसि दधानः सोऽग्निः परमं पाथः स्थानं पाति रक्षति यद्वा धामानि लोकधारकाणि अमृ
तानि उदकानि दधानः सन् परमं पाथः उदकस्य स्थानं अंतरिक्षं पाति सोऽग्निः ततो निभुवनानि भूतजातानि वेद जानाति गोपाः। गोपाय
तेः क्विपि अतो लोपो। अग्निष्टा अत्र संहितायां युष्मत्तत्ततक्षुष्वंतः पाद इति षत्वं॥ ॥इति तृतीयस्य तृतीये एकोनत्रिंशो वर्गः॥ ॥अथैका
दशी॥ ॥नाना चक्राते यम्या वपूंषि तयोरन्यद्रोचते कृष्णमन्यत्॥ श्यावी च यदरुषी च स्वसारौ महद्दे०॥ ॥यम्या यमरूपे मिथुनभूते अ
हश्च रात्रिश्चेत्येते नानाविधानि वपूंषि शुक्लकृष्णादीनि रूपाणि चक्राते कुरुतः। श्यावी कृष्णवर्णा अरुषी शुक्ला तयो रोचमानायतयोः प
रस्परं स्वसारौ भवतः तयोर्मध्ये अन्यत् अर्जुनं अहः रोचते किरणसंबंधाद्दीप्यते। अन्यद्रात्रिलक्षणं कृष्णं तमः संबंधात्कृष्णवर्णमा
भाति यम्या। सुपां डादेशः। रोचते। एकान्याभ्यां समर्थाभ्यामिति न निघातः॥ ॥अथ द्वादशी॥ ॥माता च यत्र दुहिता च धेनू सबर्दुघे धापये
ते समीची॥ ऋतस्य ते सदसीळे अंतर्महद्दे०॥ ॥माता सर्वेषां निर्मातृत्वात् माता पृथिवी च दुहिता दूरे निहिता द्यौश्च। दुहिता दूरे हिता राम
दोग्धेर्वेति यास्कः। एते सबर्दुघे सबरः क्षीरं यस्याः क्षीररूपपयः क्षीररूपस्य दोग्ध्री अत एव धेनू जगत्प्रीणयित्र्यौ द्यावापृथिव्यौ अंतरि १२८
क्षे समीची परस्परं संगते सत्यौ धापयेते स्वकीयं रसमन्योन्यं पाययेते ऋतस्योदकस्य सदसि स्थानभूते तस्मिन्नंतरिक्षे अंतः स्थिते द्या
वापृथिव्यावीळे अहं स्तौमि। यद्वा दृष्टिलक्षणं रसं आकृतिलक्षणं रसं पृथिवी दिवं अन्योन्यं माता च दुहिता च भवतः ऋतस्य सदसि स्था

होत्यादित्वात् भृशुः। व्यत्ययेनात्मनेपदं। बहुलं छंदसीत्युत्वं। संज्ञापूर्वकस्य विधेरनित्यत्वात् दाताह आभावे अंतादेशः॥ ॥अथ तृतीया॥
॥वि मे पुरुत्रा पतयंति कामाः शम्यच्छा दीद्ये पूर्व्याणि॥ समिद्धे अग्नावृतमिद्वदेम महद्दे०॥ ॥हे अग्ने मम पुत्राः बहवः अभिलाषाः वि प
तयंति विविधं गच्छंति। अहमि अग्निष्टोमादिलक्षणं कर्माभिलक्ष्य अहं पूर्व्याणि पुरातनानि स्तोत्राणि तदर्थं दीद्ये दीपयामि पश्चाद्यज्ञार्थ
मग्नौ समिद्धे दीप्यमाने सति ऋतं सत्यमेव वदेम। अनृतवचने हि यज्ञवैगुण्यं स्यादिति। पुरुत्रा। देवमनुष्यपुरुषेत्यादिना त्रा प्रत्ययः। प
तयंति। पत गतौ। स्वार्थिको णिच्॥ ॥अथ चतुर्थी॥ ॥समानो राजा विभृतः पुरुत्रा शये शयासु प्रयुतो वनानु॥ अन्या वत्सं भरति क्षेति
माता महद्दे०॥ ॥समानः साधारणः सर्वेषां यद्वा एकरूप आदीप्यमानोऽग्निः पुरुत्रा बहुषु देशेषु विभृतः अग्निहोत्रार्थं विहृतो भवति
यद्वा राजा अभिषुतः सोमः सर्वेषु देशेषु यज्ञार्थं विहृतो भवति। स चाग्निः सोमो वा शयासु शेरते हविरादाय यास्विति अत्र शेते। वेद्यः ता
सु शयानो ज्ञाते निवसति। वनानु अनुवनं वनेषु अरणिरूपेषु काष्ठेषु प्रयुतोऽग्निर्वर्तते। सोमश्च द्रुघणेषु चमसेषु विभक्तो वर्तते। तस्यार्थमात
रौ द्यावापृथिव्यौ तयोरन्यैषां अन्या भूमिर्जायमानं तत्या वत्सं भूतमग्निं सोमं वा भरति दृष्ट्यादिरूपेण भरति पोषयति। माता च सुधा स्वेनेक
र्षेन निवासयति। विभृतः भृञ् हरणे कर्मणि क्तः पतिरनंतर इति गतेः प्रकृतिस्वरत्वं। पुरुत्रा। अधिकरणे आप्रत्ययः। शयासु शीङ् स्वप्ने। लोपस्त इति
तकारलोपः। शीङः सार्वधातुके गुणः। शयासु। शीङ् स्वप्ने। एरजित्यधिकरणे अच् भवति। भर भृञ् भरणे। भूवादिः। एकाज्भ्यां समर्थाभ्यामिति
पूर्वस्य निघातः। क्षेति क्षि निवासगत्योरित्यस्य बहुलं छंदसीति विकरणस्य लुक्॥ ॥अथ पंचमी॥ ॥आक्षित्पूर्वास्वपरा अनूरुत्सद्यो जा

त॰सं॰भा॰३

स्वस्वरः ॥ ॥ अथ पंचमी ॥ ॥ पदे इव निहिते दस्मे अंतस्तयोरन्यद्गुह्यमारन्यत् ॥ सध्रीचीना पथ्या३ सा विषूची महद्देवानां॰ ॥ ॥ पदे इव पद्येते ज्ञा
यते तन्न दस्मे साधारणसंगे । नान पदे अहश्च रात्री च श्लिष्येते दस्मे सर्वैर्दर्शनीये ते उभे अंतर्नभसि निहिते स्थापिते इव वर्तेते । तयोरहोरात्रयोरन्यद्रा
त्रिलक्षणं गुह्यं अप्रकाशमानतया गूढमिवास्ते अन्यदहः आविः सूर्यप्रकाशेन प्रकटं भवति । सर्वजना अहोरात्रयोर्वर्तंते । यद्वा पदे इव म
नुष्यादीनां स्थानस्थानभूते द्यावापृथिव्यौ । अंतरंतरिक्षे निहिते वर्तेते तयोरन्या द्यौः गुहा मनुष्यैरदृश्यमानतया गुहा वर्तते । अन्या पृथि
वी आविः सर्वैर्दृश्यमान प्रकटा भवति । सध्रीचीनेति पूर्ववत् ॥ सध्रीचीना सहप्रवृत्ते देवते । किंच सहस्य सध्रिरिति सध्र्यादेशः । विभाषा वेरदि
क्स्त्रियामिति स्वरः ॥ ॥ इति तृतीयस्य तृतीये त्रिंशो वर्गः ॥ ॥ अथ षोडशी ॥ ॥ आ धेनवो धुनयंतामशिश्वीः सबर्दुघाः शशया अप्रदुग्धाः ॥
नव्या नव्या युवतयो भवंतीर्महत्॰ ॥ ॥ धेनवः वृष्टिद्वारा सर्वस्य जगतः प्रीणयित्र्यः अशिश्वीः शिशुरहिताः यद्वा अशिशवः न भवंती
ति अशिश्वीः शशयाः नभसि शयाना वर्तमानाः केनाप्यप्रदुग्धाः अक्षीणरसाः सबर्दुघाः उदकलक्षणस्य दोग्ध्र्यः युवतयः परस्परमिश्र
णोपेताः नव्यानव्याः अतिशयेन नूतना भवंतीः दिशो मेघा वा आ धुनयंतां आदुहंतु । मेघपक्षे अशिश्वीः भवंतीरित्यत्र लिंगव्यत्ययः धु
नयंतां धूञ् कंपने । णिचि धूञ्प्रीञोर्नुग्वक्तव्य इति नुक् । ह्रस्वश्छांदसः । अशिश्वीः सख्यशिश्वीति भाषायामिति ङीप्प्रत्ययेन छंदसि भवति ।
॥ अथ सप्तमी ॥ ॥ यदन्यासु वृषभो रोरवीति सो अन्यस्मिन्यूथे नि दधाति रेतः ॥ स हि क्षपावान्स भगः स राजा महत्॰ ॥ ॥ वृषभः अपां
वर्षको यत् यः पर्जन्यात्मेंद्रः अन्यासु दिक्षु रोरवीति मेघद्वारा भृशं शब्दं करोति । स पर्जन्यः इंद्रः अन्यस्मिन्यूथे दिशां वृंदे रेत उदकं निद

धाति तत्र वर्षति लोके हि वृषभः कामुकि इंद्रः रेतः सेकार्थं रवं करोति । अन्यस्मिन् गोयूथे रेतः सिंचति । तद्वत् स इंद्रः क्षपावान् क्षिपयशत्रून्नुद
कं वा । क्षिपणेवान् यद्वा क्षपा रात्रिः । तथा रात्रिपर्यायया गानां स्तोत्राणां भागभूता या रात्रिः सोच्यते तद्वान् स भगवः सर्वभोजनीयः स रा
जा तत्तत्कर्मानुरूपफलप्रदानेन सर्वेषां राजा रवं रोरवीति । रु शब्दे इत्यस्य यङ्लुगंतस्य लटि रूपं । एकाभ्यां सामर्थ्याभ्यामिति प्रथमस्य नाति
घातः । यूथे । युमिश्रणे । तिथपृष्ठगूथयूथप्रोथा इति थक्प्रत्ययांतत्वेन निपातनाद्दीर्घः । रेतः । री उ क्षरणे इत्यस्मात् स्रुरीभ्यां तुट् च इत्य
सुन्प्रत्ययः । तुडागमश्च । नित्वादाद्युदात्तः ॥ ॥ अथाष्टादशी ॥ ॥ वीरस्य नु स्वश्व्यं जनासः प्र नु वोचाम विदुरस्य देवाः ॥ षोळ्हा युक्ताः पंच
पंचा वहंति महत्॰ ॥ ॥ हे जनाः वीरस्य शूरस्येंद्रस्य स्वश्व्यं शोभनाश्वोपेतं च नु क्षिप्रं प्रवोचाम प्रकर्षेण वदाम तथा देवा अपि अस्येंद्रस्य
स्वश्व्यत्वं विदुर्जानंति । किं तत्स्वश्व्यत्वं तदुच्यते । षोळ्हा मासानां द्वंद्वयोगकाले पोषाद्दृश्यमाना ऋतवो अश्वानि रूपयंते ते च षट्संख्याका ऋतवः
हेमंतशिशिरयोः समासेन पंच युक्ताः संतः कालात्मकमिंद्रमावहंति । तदिदमिंद्रस्य स्वश्व्यत्वं सद्भिरुद्दिष्टं । षोळ्हा षट्शब्दात्संख्याया वि
धार्थे धा इति धाप्रत्ययः षषउत्वं दतृदशधास्वुत्तरपदादेः ष्टुत्वं च इत्युत्वं धाप्रत्ययस्वरः ॥ त्वाष्टृपशोर्हविषोनुवाक्या देवत्वष्टेत्येषा । सूत्रितं च ।
देवस्त्वष्टा सविता विश्वरूपो नानाविधरूपः त्वष्टृनामको देवः पुरुधा बहुधा प्रजा जजान जनयति । प्रजाः तांश्च पुपोषयति । इमा इमानि
भुवनानि भूतजातानि च अस्य त्वष्टुः संबंधीनि विश्वरूपः । बहुव्रीहौ विश्वं संज्ञायामिति पूर्वपदांतोदात्तत्वं ॥ ॥ अथ विंशी ॥ ॥ मही
समैरच्चम्वा समीची उभे ते अस्य वसुना न्यृष्टे ॥ शृण्वे वीरो विंदमानो वसूनि महत्॰ ॥ ॥ मही महत्यौ समीची परस्परं संगते चम्वौ वर्तेते । अ

राम
१२९

दृंति। अनयोर्देवा मनुष्या इति। चम्वाय इति च म्यते। अद्यते भूत जाते रिति चम्वौ द्यावापृथिव्यौ सामरत्। इंद्रः प्रजाप श्चादिभिः सम्यगपाजयत्। तेउ
भे द्यावापृथिव्यौ अस्येंद्रस्य वसुना तेजसा धनेन वा अन्तृप्रे नितरां व्याप्ते भवतः। वीरः समर्थः स इंद्रः बस्रू निशत्रून भिभूत्य तदीयानि धनानि विंद
मानो लभमानः सन् शृण्वे सर्वैः श्रूयते। नवेदिदमभितश्लोकितेव स्वित्यादिषु दृष्टत्वात्। ऐरत्। ईर गतौ इत्यस्य लङि रूपं। शृण्वे ऋषीगतौ। क
र्मणि कः। गतिरनंतर इति गतेः स्वरः। शृण्वे। श्रु श्रवणे इत्यस्य यन् कर्मणि श्लु लोपस्त आत्मनेपदेष्विति तलोपः। विंदमानः। विद्लृ लाभे इत्यस्य
लटि शानचि रूपं। तस्य लसार्वधातुकस्वरः॥ ॥ अथैकविंशी॥ ॥ इमो वनः पृथिवी विश्वधाया उपक्षेति हितमित्रो न राजा॥ पुरःसदः शर्म
सदो न वीरा महत्त्वं॥ ॥ विश्वधायाः। विश्वधायाः विश्वस्य धाता सर्वान् लोकान् आस्माकं राजेंद्रः इमां पृथिवीमंतरिक्षं च उप। एतयोः समीपे क्षि
ति निवसति। तत्र दृष्टांतः। हितमित्रो न यथा कश्चित् हितोपदेष्टा स्तुहत्सामीपे निवसति तद्वत्। वीराः समर्थाः युधः सहाया मरुतः पुरः
सदः युद्धार्थं पुरतो निश्चयेन गंतारः इंद्रस्य शर्म सदो न न्वार्था। शर्मणि गृहे सीदंतश्च भवंति। यत्र यत्रासौ तत्र तत्र संनिधिं कुर्वंति
इंद्रेत्यर्थः। क्षेति। क्षि निवासगत्योरित्यस्य लटि बहुलं छंदसीति विकरणस्य लुक्। निघातः॥ ॥ अथ द्वाविंशी॥ ॥ निष्षिध्वरीस्त ओषधीरु
तापो रयिं त इंद्र पृथिवी बिभर्ति॥ सखायस्ते वामभाजः स्याम महद्देवानामसुरत्वमेकं॥ ॥ हे पर्जन्यात्मकेंद्र ओषधीरोषधयः ते निष्षि
ध्वरीः त्वत्कर्तृकसिद्धिमत्यः उत आपि च। आपस्त्वत्तो निःसृताः पृथिवी तव भोगायोग्यं रयिं धनं बिभर्ति। पुरू वसूनि पृथिवी बिभर्तीति हि
निगमः। ततस्ते तव सखायः हविः प्रदानेनोपकारकाः स्तोतारो वयं वामभाजः स्याम सर्वैर्वननीयधनभागिनो भवेम। तदेतद्देवानां महदेश्व

नेयज्ञासदने स्थितो हे। न तु भे स्तौमि। स वर्द्धु घासवः शाङ्गी न्हीरवाचीति संप्रदायविदश्चाहुः तस्मिन्नुपपादद्रुहप्रपूरणे इत्यस्य ण्यंतस्य लटि
निगेरणचलनार्थेभ्यश्चेति परस्मैपदे प्राप्ते पादिषु धेट उपसंख्यानमिति आत्मनेपदं। यद्वृत्तयोगादनिघातः॥ ॥ अथ त्रयोदशी॥ ॥ अन्यस्या
वत्सं रिहती मिमाय कया भुवा निदधे धेनुरूधः॥ ऋतस्य सा पयसा पिन्वतेळा महत्त्वं॥ ॥ अन्यस्याः पृथिव्या वत्सं मग्निं रिहती उदकधार
रूपया जिह्वया लिहंती द्यौः मिमाय मेघद्वारा ध्वनिं करोति। धेनुः प्रीणयित्री सा द्यौः कया जलवर्जित। या भुवा तत्र त्यं जलमादीयस्व की
य मूधो मेधरूपं निदधे उदकेन निहितमकरोत्। सा जलवर्जिता इळा पृथिवी। ऋतस्य सत्यभूतस्यादित्यस्य पयसा उदकेन आपिन्वत॥
पिवि सेचने। भुवादित्वात् आत्मनेपदी निघातः॥ ॥ अथ चतुर्दशी॥ ॥ पद्या वस्ते पुरुरूपा वपूंष्यूर्ध्वा तस्थौ त्र्यविं रेरिहाणा॥ ऋतस्य सद्म वि च
रामि विद्वान्महत्त्वं॥ ॥ पद्या जगत्स्रष्टुः परमेश्वरस्य पद्भ्यां जातत्वात् पद्या भूमिः। तथा च मंत्रवर्णः। पद्भ्यां भूमिरिति। यद्वा पादासंचरेस्मा
धुः पद्या भूमिः पुरुरूपा नानाविधस्य रूपाणि वपूंषि स्थावरजंगमात्मकानि रूपाणि वस्ते आच्छादयति। सैषा भूमिरूर्ध्वा उन्नरवेघात्मना
उत्तरा सती स्वराभूतेन हविषा त्र्यविं सार्धसंवत्सरवयस्कः वत्सस्त्र्यविरित्युच्यते। तत्प्राणमादित्यं त्रीन् लोकानवंतिस्रुवेजसा व्याप्नोतीति
त्र्यविरिति वा। रेरिहाणा लिहंती तस्थौ। ऋतस्य सत्यभूतस्यादित्यस्य सद्म स्थानं विद्वान् जानानो हे इंद्र विचरामि। अहं विभिन्नमादित्यं परि च
रामि। पद्या। पद शब्दाद् द्रावच्छंदसीति यत्। पद्यस्य न दर्थे इति पदस्य पद्भावः। यदा स्त्री सा धुरिति यत्। ततो नाव इत्युदात्तत्वं। त्र्यविं। अव
रक्षण इत्यस्मादौणादिक इः। अवि। अव रक्षणादिषु इत्रिती न प्रत्ययः। कृत्स्वरः। रेरिहाणा। लिह आस्वादने इत्यस्य यङ्लुकि शानचि रूपं। अभ्य

त॰सं॰भा॰४

मिनंति। मीङ् हिंसायामित्यस्य लटि मानोते र्निगम इति ह्रस्वः निघातः। वेधाभिः। वेदनमर्हंति। छंदसि वेति प्रत्ययः। निनामे। लघुप्रकृत्वं इत्यस्य कृत्या
र्थके प्रत्ययः। कृत्स्वरः॥ ॥ अथ द्वितीया॥ ॥ षड्भाराँ एको अचरन्बिभर्त्यृतं वर्षिष्ठमुप गाव आगुः॥ तिस्रो मही रुपरास्तस्थुरत्या गुहा द्वे निहि
ते दर्श्येका॥ ॥ अचरन् स्थावरः एकः संवत्सरः षट् संख्याकान् भारान् भ्रियंते पुष्पादिकार्यादियैरिति भाराः ऋतवः तान् वसंतादीन् बिभर्ति स्वय
बलेन धारयति। तथा कृतं वर्षिष्ठं वृद्धतरं भादेत्यात्मकं तमेव संगावो रश्मयः उपागुः प्राप्नुवंति। किं च अस्मिन्नेव संवत्सरे अत्या अतनशीला आ
गमापायिधर्मोपेता स्तिस्रो महीः त्रयो लोकाः उपर्युपरि वर्तमाना स्तस्थुः तिष्ठंति। लोकत्रयमेव दर्शयति। गुहा गुहायां स्वात्मनि द्वे भूमी द्योत
रिक्षं द्वे यौ तन्निहिते न दृश्यते। एकः भूमिः दर्शि सर्वभूताधारया दृश्यते। भारान्। डुभृञ् धारणपोषयोः इत्यस्मादधिकरणे घञ्। कर्षात्वितो घ
ञ इत्यंतोदात्तत्वं। निहिते। दधातेः कर्मणि निष्ठा। गतिरनंतर इति प्रकृतिस्वरत्वं। दर्शि। दृशिर प्रेक्षणे। कर्मणि लुङि चिणि चिणो लुगिति प्रत्य
यस्य लुक्। वाक्यभेदादनिघातः॥ ॥ अथ तृतीया॥ ॥ त्रिपाजस्यो वृषभो विश्वरूप उत त्र्युधा पुरुध प्रजावान्॥ त्र्यनीकः पत्यते माहिनावान्त्स
रेतोधा वृषभः शश्वतीनां॥ ॥ त्रिपाजस्यः ग्रीष्मवर्षाहेमंताख्यैस्त्रिभिर्ऋतुभिः पाजस्यमुरो यस्य स त्रिपाजस्यः उरस्क इत्यर्थः उरो व चनस्य राम
पाजस्य शब्दः। इंद्रस्य क्रोडोदित्यै पाजस्यमिति अश्वमेधमंत्रे उरः परतयाम्नानात्। पाजसि बालसारिति व्युत्पत्तेश्च। सर्वेषामंगानां मध्ये उरसो १३१
बलत्वात्। वृषभः स्वावयवभूतैर्वर्षैर्अपां वर्षकः। विश्वरूपः तत्वइव साधारणकार्यैः पुष्पविकाशादिभिः लिंगैर्नानारूपः। उतापि च त्र्युधा वसं
तशरद्धेमंताख्यैस्त्रिभिर्ऋतुभिः त्र्युधायस्य स त्र्युधा। प्रजावान्। प्रकर्षेण जायंत इति व्रीह्यादयः प्रजाः पुरुधा नाना प्रकारेण विद्यमान व्रीहि व पा

दिरूप प्रजावान्। किं च त्र्यनीकः त्रिभिरुष्णवर्षशीताख्यैरनीकैर्गणैरुपेतः माहिनावान् महत्त्ववान् संवत्सराभिमानी देवः पत्यते अवगच्छति। वृ
षभः सेवनसमर्थः स संवत्सरः शश्वतीनां बह्वीनां ओषधीनां पुष्पफलादिसंपन्नये रेतोधा रेतस उदकस्य धर्त्ता भवति। त्र्युधा बहुव्रीहौ ऊधसो
नङ् इत्यनङ्। सर्वविधीनां छंदसि विकल्पितत्वात्तस्य पि भवति। उकारस्य ह्रस्वश्छांदसः। उत्तरपदांतोदात्तप्रकरणे। त्रिचक्रादीनां छंदस्युप
संख्यानमित्युत्तरपदांतोदात्तत्वं॥ ॥ अथ चतुर्थी॥ ॥ अभीक आसां पदवीरबोध्यादित्यानामह्वे चारु नाम॥ आपश्चिदस्मा अरमंत देवीः पृथ
ग्व्रजंतीः परि षीमवृंजन्॥ ॥ संवत्सरः आसामोषधीनामभीके समीपे पदवीः पदानि तनिहन वि शिष्टपुष्पफलादीनि वेति प्र जनयंतीति प
दवीः सन् अबोधि बुध्यते सावधानो वर्तते तथा आदित्यामासाः संख्यासाम्यात्। यद्वा आदित्यसंक्रमणनिमित्तत्वादादित्यामासाः सेषादिस्थे
रवितरियो यो मासः पूर्यते चांद्रः चैत्राद्यः प्रजयति स्मृतेः। तेषां चैत्रादीनां मासानां चारु नाम मधुश्च माधवश्चेत्यादि नामधेयं अह्वे आह्वयामि
उच्चारयामीत्यर्थः। किं च देवीः द्योतनशीलाः पृथग्गितस्ततो व्रजंतीः गच्छंत्यः आपश्चित् आपोपि अस्मै संवत्सराय अरमंत संवत्सरसंबंधिमा
सचतुष्टये वृष्टिद्वारा रमंते। ता आपः सीमेनं संवत्सरं पर्यवृंजन् अपरेषु मासेषु परिवर्जयंति। पदवीः। वी गत्यादिषु। अबोधि बुध अवगमने
इत्यस्य लुङि दीपजनबुधपूरितायिप्यायिभ्योन्यतरस्यामिति कर्त्तरि चिण्। चिणो लुक्। निघातः। आदित्यानां आदित्यसंबंधिन इत्यर्थे दित्य
दित्यादित्यपत्युत्तरपदाण्ण्य इति ण्यः। अतो लोपः यलोपो। प्रत्ययस्वरः। अह्वे ह्वयतेर्लुङि सिच् आत्मनेपदेष्वन्यतरस्यामिति अङादेशः। गु
णः निघातः। अवृंजन्। वृजी वर्जने इत्यस्य लङि अमिरूपं। निघातः॥ ॥ अथ पंचमी॥ ॥ त्री षधस्था सिंधवस्त्रिः कवीनामुत त्रिमाता विदथे

पुसम्राट्॥ ऋतावरीर्योषणास्तिस्रो अप्यास्त्रिरा दिवो विदथे पत्यमानाः॥५॥ प्रजापतिः स्वविज्ञानसिंधूनां निवेदयति। हे सिंधवः आपः सर्वसा
ऋ॰सं॰भा॰४ क्षिण्योयूपं त्रीषधस्था त्रयो लोकाः। तव प्रत्येकं शूर्भवति। तथा त्रयो वा इमे त्रिवृतो लोका इति श्रुतिः। न घा व इंद्र ओजसा गांतरिक्षाणि वा त्रिपं
नवियथं तन्भूम इति प्रत्येकं बहुवचनाश्रवणात्। बहुवचनं च कपिंजलन्यायेन त्रित्वे पर्यवसितं ते च लोकाः कवीनो देवानो निवासस्थानानि भवं
ति। उताऽपि च त्रिमाता त्रयाणाममीषां लोकानां निर्माता संवत्सरः सूर्यो वा विदथेषु यज्ञेषु सम्राट् यजनीयतया सम्यग्दीप्यमानो वर्त्तते। तथा ऋ
तावरीः उदकवत्यः आप्यानभस्याप्रत्याः तिस्रो योषणाः त्रिसंख्याकाः इळा सरस्वतीत्येवं रूपाः परस्परमिश्रणोपेताः विदथे यज्ञे दिवः दिव
सस्त्रात्रिः त्रिषु सवनेषु आपत्यमाना आगछंत्यो भवंति। सधस्थापूर्वपदादिति संहितायां षत्वं। योषणाः पुष्य इति सौत्रो धातुः ल्युटि रूपे।
लित्स्वरः। तिस्रः। तिसृभ्यो जस इत्याद्युदात्तत्वं। अप्याः अप इत्यंतरिक्षनाम तत्र भवाः भवे छंदसीति यत्। यतो नाव इत्याद्युदात्तत्वं॥ अथ ष
ष्ठी॥ त्रिरा दिवः सवितर्वार्याणि दिवेदिव आ सुव त्रिर्नो अह्नः। त्रिधातु राय आ सुवा वसूनि भग त्रातर्धिषणे सातये धाः॥६॥ सवितः स
र्वस्य प्रेरक हे आदित्य दिवः द्युलोकादागत्य त्वं वार्याणि सर्वैः संभजनीयानि धनानि दिवेदिवे प्रतिदिनं त्रिरा सुव त्रिवारमस्मभ्यं प्रेरय प्रय राम
छेत्यर्थः। तद्वदेव हे भग सर्वैर्भजनीय त्रातः अस्माकं रक्षक हे आदित्य त्रिधातु त्रिधातून् निपशूकनकरत्नभेदेन त्रिप्रकाराणि वसूनि धना १३२
निरापो रंतिक्षीरादीनि इति रायो गोधनानि तानि च नो अस्मभ्यमह्नः संबंधिषु सवनेषु आ सुव प्रयछ। धिषणे माध्यमिके हे वाक् सातये ध
नलाभाय धाः अस्मान् कुरु। त्रिः द्वित्रिचतुर्भ्यः सुजिति सुच्। नित्स्वरः। सुव। षू प्रेरणे तुदादिः। लोटि रूपं। त्रिधातु डुधाञ् धारणपोषणयोरि

र्व्वा निषिद्धधरीः विसंराहृो। संपदादिलक्षणो भावे क्विप्। तदस्यास्तीत्यर्थे छंदसी वनिपाविति निप्। वनोर च इति ङीप् रेफश्च। निसास हसमासः॥ नि
सः सकारश्छांदसत्वादनीरत्य उपसर्गात्सुनोतीत्यादिना षत्वं। ऊ पः पिब्बादनुदात्तत्वे धातुस्वरः। बिभर्ति। डुभृञ् धारणपोषणयोः इत्यस्य लटि भृञा
मिदित्यभ्यासस्य चं निघातः। वामभाजः भज सेवायां भजो ण्विरिति ण्विः कृदुत्तरपदस्वरः॥ इति तृतीयस्य तृतीये एकत्रिंशो वर्गः॥ वेदार्थस्य
प्रकाशेन तमो हार्दं निवारयन्। पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥ इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीवीरबुक्क
भूपालसाम्राज्यधुरंधरेण सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये तृतीयाष्टके तृतीयोऽध्यायः॥ संपूर्णम्॥ यस्य नि
श्वसितं वेदा यो वेदेभ्योऽखिलं जगत्। निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं॥ न ता मिनंतीत्यष्टर्चं — सूक्तं विश्वामित्रस्य वाचः पुत्रस्य वा प्रजा
पतेरार्षं त्रैष्टुभं वैश्वदेवं। तथा चानुक्रमणिका। न ताष्टौ वैवीति। सूक्तविनियोगो लैंगिको देवतो तथ्यः। अस्मिन्सूक्ते प्रायेणादित्येः सहसंवत्सरः श्रूय
ते॥ तत्र प्रथमा॥ न ता मिनंति मायिनो न धीरा व्रता देवानां प्रथमा ध्रुवाणि। न रोदसी अद्रुहा वेद्याभिर्न पर्वता निनमे तस्थिवांसः॥ मायिनः
कपटबुद्धा मताः असुरा देवानामिंद्रादीनां प्रथमानि सृष्ट्यनंतरभावीनि ध्रुवाणि स्थिराणि केनापि चालयितुमशक्यानि तानि लोके प्रदानानि व्रतान्य
नानि लोकपालनादिकर्माणि न मिनंति न हिंसंति तथा धीरा विद्वांसो न हिंसंति। तथा अद्रुहा देवमनुष्यादिषु प्रजासु द्रोहवर्जितौ रोदसी द्यावापृथि
व्यौ वेद्याभिः स्वाश्रयतया सर्वैर्वेदनीयाभिः प्रजाभिः सहितानि कर्माणि न मिमीतः तदेतदुपपादयति। तस्थिवांसः भूपृथिव्या मूर्धतया स्थिताः पर्वताः
निनमे तिनमनीयान भवति। एतदुक्तं भवति। यद्देवचमनुष्यादीनां द्यावापृथिव्या धारकतथावस्थानं। तदिदं देवानां कर्म तत्र कोपि न व्यथयितुमर्हतीति

तुर्यसूक्तं। विश्वामित्र ऋषिः त्रिष्टुप्छंदः विश्वेदेवा देवता॥ अत्रानुक्रमणिका। प्रमेषळिति। सूक्तविनियोगो लैंगिकः॥ ॥ तत्र प्रथमा॥ ॥ प्र मे विवि

त·सं·भा·४

क्वाँ अविदन्मनीषां धेनुं चरंतीं प्रयुतामगोपां॥ सद्यश्चिद्या दुदुहे भूरि धासेरिंद्रस्तदग्निः पनितारो अस्याः॥ ॥ विविक्वान् विवेकवान् इंद्राग्नी वी

मे मम मनीषां देवताविषयां स्तुतिं न विदत्। प्रकर्षेण जानातु। तत्र दृष्टांतः। चरंतीं यमासइतस्ततो गच्छंतीं प्रयुतां पृथग्भूतामेकाकिनीं अगोपां

गोपरहितां यथाकामं चरंतीं धेनुं नावसूतिकां गामिव देवतानां प्रीणयित्रीं स्तुतिं मम विंदत्वित्याशयः। या स्तुतिरूपा धेनुः सद्यश्चिन्नदीमव

धारयति प्राणानेधीयते दीयतेऽर्थिभ्य इति वा धासिरन्नं कर्मणि षष्ठी भूरि बहु अन्नमपेक्षितं फलं दुदुहे दुग्धे। इंद्रोऽग्निरन्ये च देवा अस्याः स्तुति

रूपाया धेनोः तत्तस्या अभूतस्य पयसः पनितारः स्तोतारो भवंति। यद्वा इंद्राग्नी स्तोतारौ वयं च अस्या धेनोरन्यपयः प्राप्नुमः। विविक्वान् विविर

पृथग्भाव इत्यस्य क्वसौ रूपं। अविदत्। विद ज्ञाने इत्यस्य लङि बहुलं छंदसीति शपः लुक्। दुदुहे दुह प्रपूरणे इत्यस्य लिङि रूपं। यद्वृत्तयोगादनि

घातः प्रत्ययस्वरः। पनितार इत्यस्य तृचि रूपं॥ ॥ अथ द्वितीया॥ ॥ इंद्रः सु पूषा वृषणा सुहस्ता दिवो न प्रीताः शशयं दुदुह्रे॥ विश्वे यदस्यां

रणयंत देवाः प्र वोऽत्र वसवः सुम्नमश्यां॥ ॥ वसवः सर्वस्य वासयितारो देवाः इंद्रः पूषा च वृषणा अभिमतफलस्यासेक्तारौ सुहस्ता कल्याण

पाणी नासत्यौ मित्रावरुणौ वा राजाना मित्रावरुणा सुपाणी इत्यादिषु दृष्टत्वात् एते सर्वे देवाः नेति संप्रत्यर्थे इदानीं प्रीताः प्रीताः संतः शशयं

नभसि शयानं मेघं दिवो नभसः सकाशात् सुदुदुह्रे वृष्टिद्वारा अपेक्षितं फलं सुष्ठु दुहंति। यदस्माद्विश्वे सर्वे देवाः अस्यां वेद्यां रणयंत रमयंत वो

युष्माकं संबंधि नाम च लोके सुम्नं सुखकरमपेक्षितं फलं प्राश्यां प्राप्नुयां। सुहस्ता हसे हसि हसी त्यादिना तन्प्रत्ययः। नित्वादाद्युदात्तः। बहुव्री

हौ आद्युदात्तत्वं। द्व्यच्छंदसीत्युत्तरपदाद्युदात्तत्वं। दुदुह्रे। दुह प्रपूरणे इत्यस्य लटि इरयो रे। रणयंत रमु क्रीडायां। णिजंतस्य लङि रूपं। व

र्णव्यापत्तिः। अश्यां। अश व्याप्तावित्यस्य लङि बहुलं छंदसीति विकरणस्य लुक्। व्यत्ययेन परस्मैपदं॥ ॥ अथ तृतीया॥ ॥ या जामयो वृष्ण इ

च्छंति शक्तिं नमस्यंतीर्जानते गर्भमस्मिन्। अच्छा पुत्रं धेनवो वावशाना महश्चरंति बिभ्रतं वपूंषि॥ ॥ या जामयः जमंति वर्षाकाले प्रादुर्भवं

तीति जामय ओषधयः वृष्णे अपां वर्षकायेंद्राय शक्तिं सेचनसामर्थ्यमिच्छंति। नमस्यंतीः प्रह्वीभूयमानास्ता ओषधयो अस्मिन्निंद्रे गर्भं वृष्टिद्वारा पु

ष्पफलादिलक्षणं गर्भाधानादिसामर्थ्यं जानते जानंति। वावशानाः फलं कामयमाना धेनवः सर्वस्य प्रीणयित्र्य ओषधयः महः महांति नाना

प्रकाराणि वपूंषि रूपाणि बिभ्रतः व्रीहियवनीवारादिफललक्षणं तनयं अच्छाभिमुख्येन चरंति प्राप्नुवंति। लोके हि हंभारवं कुर्वाणा धेनवः व

त्समभिलक्ष्य गच्छंति तद्वत्। यद्वा जामयः जमंति सर्वत्र प्रसरंतीति जामयः सूर्यदीप्तयो वृष्णे अपां वर्षकाय स्वरश्मिभिः भौमान् रसानादाय पुन

१ र्वर्षतीति। वर्षकः सूर्यः आदित्याज्जायते वृष्टिरिति स्मृतेश्च तस्मै वर्षणशक्तिमिच्छंति। ता दीप्तयः अस्मिन्नादित्ये गर्भं यद्रूपगर्भाधानसामर्थ्यं

जानंति जामयः जमतिर्गतिकर्मणा जनिघसिभ्यामिणिति विधीयमानो बहुलवचनादस्मादपि भवति। नमस्यंतीः। नमसशब्दान्नमोवरिव

श्चित्रङः क्यजिति क्यच्। तदंतात् शतरि रूपं। प्रत्ययस्वरः। जानते। ज्ञा अवबोधने इत्यस्य लटि रूपं। अच्छा निपातस्य चेति संहितायां दीर्घः॥ ॥ अथ

चतुर्थी॥ ॥ अच्छा विवक्मि रोदसी सुमेके ग्राव्णो युजानो अध्वरे मनीषा॥ इमा उ ते मनवे भूरिवाराः ऊर्ध्वा भवंति दर्शता यजत्राः॥ ॥ अध्वरे यज्ञे

ग्राव्णः सोमाभिषवार्थमुपलान् युजानः प्रयुंजानोऽहं सुमेके सुरूपे रोदसी द्यावापृथिव्यौ मनीषा मनस ईषा स्तुतिलक्षणया वाचा अच्छाविव

राम
१३३

ऋ॰सं॰भा॰४ भिः अभिमुखेन स्तौमि॥ हे अग्ने ते तव भूरिवाराय जमानैर्बहुवारं वरणीयाः दर्शता कमनीयतया दर्शनीयाः यजत्राः पूज्या इमा दीप्तयः मनवे अनु
ष्ठानव्यवहारार्थमूर्ध्वमुखा भवंति॥ विवक्मि। वच परिभाषणे लेटि बहुलं छंदसीति शपः श्लुः। अर्त्तिपिपर्त्योश्च बहुलं छंदसीत्यभ्यासस्येत्वं। युक्तु
त्वं व्यत्ययेनायुजानः। युजिर्वद्दिदृशोः किन्नेति। आनन्नूकित्वाद्गुणः। चित्वादंतोदात्तः। मनीषा। सुपां डादेशः॥॥ अथ पंचमी॥॥ या ते जिह्वा मधु
मती सुमेधा अग्ने देवेषूच्यत उरूची॥ तयेह विश्वाँ अवसे यजत्राना सादय पायया चा मधूनि॥॥ हे अग्ने ते तव मधुमती उदकवती सुमेधाः शो
भनमेधा प्रज्ञा यस्याः सर्वस्य ज्ञापयित्री या जिह्वा ज्वाला उरूची बहुव्याप्तिः सती देवेषु मध्ये आह्वानार्थमुच्यते प्रेर्यते। तया जिह्वया यजत्रान्य
जनीयान् विश्वान्देवानिह कर्मणि अस्माकमवसे रक्षणाय आसादय उपवेशय। किं च तान विश्वान्देवान् मधूनि मदकराणि सोमान्पायय सुमेधाः
नित्यमसिच् प्रजामेधयोरित्यसिच् वृत उच्यते। वच परिभाषणे। कर्मणि यकि रूपं। यद्वृत्तयोगादनिघातः। उरूची। अंचतेः क्विन्। अंचतेश्चोपसंख्या
नमिति ङीप्। अनुदात्तस्य च यत्रोदात्तलोप इति ङीप् उदात्तत्वं। पायय। पायायस्य णौ परतः शाछासाह्वाव्यावेपां युगिति युक्। तिङ उत्तरत्वादनि
घातः॥॥ अथ षष्ठी॥॥ या ते अग्ने पर्वतस्येव धारा सश्चंती पीपयद्देव चित्रा॥ तामस्मभ्यं प्रमतिं जातवेदो वसो रास्व सुमतिं विश्वजन्यां॥॥ हे देव दी राम
प्यमान हे अग्ने चित्रा नानारूपा असश्चंती। अस्मादन्यत्र संगतिमकुर्वाणा या ते तव प्रमतिः प्रकृष्टा बुद्धिः पीपयत् अपेक्षितफलदानेनास्मा २३४
न्वर्धयति। तद्वत्। हे वसो सर्वस्य वासयितः जातवेदः जातप्रज्ञ हे अग्ने तां प्रमतिं अप्रतिहतकरणसमर्थां बुद्धिमस्मभ्यं रास्व देहि। तथा विश्वजन्यां स
र्वजनहितां सुमतिं शोभनां बुद्धिं दत्स्व। असश्चंती। सश्चतिर्गतिकर्मा शतरि उगितश्चेति ङीप्। नञा समासे नञ्स्वरः। पीपयत्। पापानेर्ण्यंतस्य

त्यस्मात् लिङ्नि गमिमसीत्यानुत्पत्ययः। धिषणे। आमंत्रितत्वान्निघातः॥॥ अथ सप्तमी॥॥ त्रिरा दिवः सविता सोषवीति राजाना मित्रावरुणा
सुपाणी॥ आपश्चिदस्य रोदसी चिदुर्वी रत्नं भिक्षंत सवितुः सवाय॥॥ सविता देवः दिवो दिवसस्य त्रिः त्रिषु कालेषु आ सोषवीति। धनान्यां ध
नानि आसुवतु प्रेरयतु। किं च राजाना राजानौ सुपाणी मित्रावरुणौ आपः आप्नोति सर्वं जगदिति आपोंतरिक्षं नित्यबहुवचनांतत्वात् ब
हुवचनं। चिदपि च उर्वी विस्तीर्णे रोदसी द्यावापृथिव्यौ एता देवताः सवितुः प्रेरकस्यास्य देवस्य सवाय सवेन प्रेरणेन रत्नं अपेक्षितमर्थं भि
क्षंत याचंते। सोषवीति। षू प्रेरणे इत्यस्य यङ्लुकि लटि रूपं। मित्रावरुणा देवताद्वंद्वे च। उभयपदप्रकृतिस्वरत्वं। भिक्षंत याचंते। भिक्ष याच्ञा
यामित्यस्य लङि रूपं। सवाय। नवं सवोचेति अजंतत्वेन निपातनादंतोदात्तत्वं॥॥ अथाष्टमी॥॥ त्रिरुत्तमा दूणशा रोचनानि त्रयो राजंत्य
सुरस्य वीराः॥ ऋतावान इषिरा दूळभासस्त्रिरा दिवो विदथे संतु देवाः॥॥ दूणशा दुर्नशा केनापि विनाशयितुमशक्यानि रोचनानि दीप्य
मानानि त्रीण्युत्तमानि स्थानानि संति एतेषु स्थानेषु असुरस्य क्षिपति सर्वमित्यसुरः कालात्मा संवत्सरः तस्य वीराः त्रयो अग्निवायुसूर्य
रूपा राजानि शोभंते तानेव विशिनष्टि। ऋतावानः ऋतं सत्यभूतमग्निहोत्रादिकं कर्म तद्वंतः। इषिराः। यज्ञार्थं शीघ्रगतिमंतः दूळभा
सः दुर्दभासः केनापि स्वतेजसातिरस्कर्तुमशक्याः एते सर्वे देवाः विदथे अस्मदीये यज्ञे दिवो अह्नः संबंधिषु त्रिषु सवनेषु आसंतु समंताद्भज
नीयतया भवंतु। उत्तमा उत्तमशब्दस्तमबंतः नित्यं छादिषु पाठादंतोदात्तत्वं। दूणशा। नशेरक्षेत्यर्थं खलु। दुरो दभेषूत्वं ष्टुत्वमिति रेकस्य
उत्वं। उत्तरपदादेः ष्टुत्वं। लित्स्वरः। दूळभासः। पूर्ववदुत्वष्टुत्वे॥॥ इति तृतीयस्य चतुर्थे प्रथमो वर्गः॥॥ प्र मे विविक्वाँ अविदन्मनीषामिति षळृचं

ष्टांतः। पितरेव। यथा पुत्राः पितरौ मातापितरावभिलक्ष्य गच्छंति तद्वत् अस्मदस्मत्तः प्रकाशात्। पणेर्मनीषां आसुरीं बुद्धिं विजयेथां विने
ऋ॰सं॰भा॰४ घेण नाशयतं युवोर्युवयोरव हविर्लक्षणमन्नं च कृणं कृणुतुः युवामर्वाक् अस्मदाभिमुख्येनायातं। सुयुक्। युजेः क्विप्। सुपां सुलुगि
ति सुपो लुक्। पितरेव पितामात्रे ति पितुः शेषः सुपां डादेशः। जरेथां जरूथवयोहानो एयं तस्य जनी जरूथ वयोहानौ एयं तस्य जनी तृषा कु
सुरां जामंताश्चेति मित्वा ह्रस्वभावः छंदस्युभयथेति आर्धधातुकत्वात् सिलोपः। शप् पित्वादनुदात्तत्वे धातुस्वरः॥ अथ तृतीया॥
सुयुग्भिरश्वैः सुवृता रथेन दस्राविमं शृणुतं श्लोकमद्रेः॥ किमंग वां प्रत्यवर्त्तिं गमिष्ठाहुर्विप्रासो अश्विना पुराजाः॥ हे अश्विनौ सुयु
ग्भिः सुष्ठु योजितैरश्वैः सुवृता पुनः पुनावर्त्तिना। इति वृत्तः शोभनचक्रोपेतेन रथेनागत्य दस्रौ शत्रूणामुपक्षपयितारौ युवां अद्रेः आ
द्रियते सर्वैरित्यद्रिभिः स्तोता तस्य श्लोकं स्तोत्रं शृणुतं। अंग हे अश्विनौ विप्रासो मेधाविनः पुराजाः पुरातना ऋषयः वां अस्माकं वर्त्ति
ह्यानिं प्रतिगविष्टा अतिशयेन गंतारा विति किमाहुः। कथयंती तिन कथयंतीत्यर्थः। प्रथमाष्टके ष्टमेध्याये सुवृता रथेनेत्यादिगतं। ग राम
मिष्टागंतृशब्दादुदिष्टनिरूपं॥ अथ चतुर्थी॥ आमन्येथामा गतं कच्चिदेवैर्विश्वे जनासो अश्विना हवंते। इमा हि वां गोऋजीका १२५
मधूनि प्र मित्रासो न ददुरुस्रो अग्रे॥ कच्चिदिति प्रश्ने हे अश्विनौ आमन्येथां इमां मदीयां स्तुतिं जानीतं किंच एतैर्गमनसाधनैरश्वैरा
गतं यज्ञं प्रत्यागच्छतं। विश्वे सर्वे जनासः स्तोतारः अश्विना अश्विनौ युवां हवंते स्तुतिलक्षणाभिर्वाग्भिराह्वयंति। किंच गोऋजीका ग
वां पयसा मिश्रणोपेतानि मधूनि मदकराणि सोमरसरूपाणीमानि हवींषि युवाभ्यां प्रददुः ध्यर्यादयः प्रयच्छंति तत्र दृष्टांतः। मित्रासोन

यथा मित्राणि मित्रेभ्योपेक्षितं ददति तद्वत्। उस्रः उस्र प्रसरितेन भसीति उस्रः सूर्यः अग्रे उषसोग्रे उदेति। तस्मादागच्छतमिति भावः। मन्येथां। मन
ज्ञाने दिवादिः। लोटि रूपं। इमा। सुपो डादेशः। गोऋजीका। प्रकृत्यांतः पादमित्येङः प्रकृतिभावः। ददुः दान इत्यस्य लिटि उसि रूपं। हियोगाद
निघातः। उस्रः वस निवासे स्फायितंचवंच्यादिना रक्। किल्वात् संप्रसारणं। शासिवसिघसीनां चेति षत्वाभावश्छांदसः॥ अथ पंचमी॥
तिरः पुरू चिदश्विना रजांस्यांगूषो वां मघवाना जनेषु। एह यातं पथिभिर्देवयानैर्दस्राविमे वां निधयो मधूनां॥ हे अश्विनौ पुरू चित् बहू
न्यपि रजांसि स्थानानि तिरः स्वतेजसा निस्तुवंतौ वां इह कर्मणि देवयानैः पथिभिः मार्गैः आयातं। मघवाना धनवंतौ। हे अश्विनौ जनेषु स्तो
तृषु वां युवयोरांगूषः आ समंतात् घोषणीयं स्तोत्रं वर्त्तते। दस्रौ शत्रूणामुपक्षपयितारौ हे अश्विनौ वां युवयोर्मधूनां मदकराणां सोमा
नां निधयः निधीयते त्र सोम इति निधयः पात्रविशेषाः सेति तस्मादागच्छतमिति भावः। आंगूषः। आङ्पूर्वाद्घुषेः कर्मणि घञ्। आघुष्यत
इत्याघोषः। घो इत्यस्य पृषोदरादित्वात् ऊ इत्यादेशः। आङोनुनासिकश्छंदसीत्यनस्यपि अनुनासिकश्छांदसः। यद्वा अगि गत्यर्थः। अ
स्मादांगूष इति सूत्रेणोषप्रत्ययांतो निपातितः। अगति गच्छति देवानिति आंगूषः स्तोत्रं। अंगूष एव आंगूषः। प्रज्ञादित्वात्स्वार्थिकोण्। प्रत्य
यस्वरः। एह यात सिद्धेर्वृद्धिरागमः॥ इति तृतीयस्य चतुर्थे तृतीयो वर्गः॥ आश्विने यामेतिरिक्तोक्थ्ये अच्छावाकशस्त्रे पुराणमोक इति
विकल्पेन याज्या। सूत्रितं च। यदिना धीया पुराणमोकः सख्यं शिवं वामिति। चतस्रो याज्या इति॥ सेषा सूक्ते षष्ठी॥ पुराणमोकः स
ख्यं शिवं वां युवोर्नरा द्रविणं जह्नाव्यां। पुनः कृण्वानाः सख्या शिवानि मध्वा मदेम सह नू समानाः॥ हे अश्विनौ वां युवयोः पुराणं पुरात

नंसरव्यं ० कः शोभनं शिवं कल्याणकरं भवति। किंच। नरो अस्मदीयस्य कर्मणो नेतारो युवोर्युवयोर्ईविलं धनं जह्नाव्यो जह्नुकुल आयां भव
ऋ॰सं॰भा॰४ ति शिवानि सुखकराणि युवयोः सख्यानि पुनः पुनः कृण्वानाः कुर्वंतः। समानाः हविःप्रदानेनोपकारकत्वात् मित्रभूता वयमद्य आमदकरेण सोमे
न वां युवां सह युगपत् न क्षि प्रमादमहपीयमसंख्यां सख्यु भविवृत्यर्थे सख्युर्य इति यप्रत्ययः। जह्नाव्यो जह्नोः संबंधिनी त्यर्थे तस्येद
मित्यण्। गुणाः। दूरूव्दीर्घीयाव्यत्ययः। मदेम। मदी हर्षइत्यस्यात्। लिङि लिङ्याशिषि इत्प्रत्ययः। निघातः॥ ॥अथ सप्तमी॥ ॥ अश्विनावा
युना युवं सुदक्षा नियुद्भिश्च सजोषसा युवाना॥ नासत्या तिरोअह्न्यं जुषाणा सोमं पिबतमस्रिधा सुदानू॥ ॥ सुदक्षा शोभनसामर्थ्योपे
तौ युवाना नित्यतरुणौ नासत्यान विद्यते असत्यं ययोस्तौ सुदानू शोभनफलस्य दातारौ हे अश्विनौ वायुना नियुद्भिश्च सजोषसा संग
तौ जुषाणा सोमविषयप्रीतियुक्तौ अस्रिधा अनुपक्षीणौ युवां तिरोअह्न्यं अह्नि तिरोहिते हूयमानमिमं सोमं पिबतं। नियुद्भिः। योतेर्हक्वि
प् तिरोअह्न्यं। अह्नि भवं अह्न्यं भावभूतं दर्शीयत्। तिरोभूते अह्न्यं यस्मिन्कालेसत्तिरोअह्न्यं। पूर्वपदप्रकृतिस्वरः॥ ॥ अथाष्टमी॥ ॥ अ
श्विना परि वामिषः पुरूचीरीयुर्गीर्भिर्यतमाना अमृध्राः॥ रथो ह वामृतजा अद्रिजूतः परि द्यावापृथिवी याति सद्यः॥ ॥ हे अश्विनौ पु राम
रूचीः पुरुभं चंति गच्छंतीति पुरूचीर्बहुतिर्दिषो हविर्लक्षणान्यन्नानि वां युवां परीयुः परितो गच्छंति। तथा अमृधानः केनाप्यतिरस्कृता यत १३६
मानाः कर्मणि प्रवर्तमानाः स्तोतारो गीर्भिः स्तुतिलक्षणाभिर्वाग्भिः युवां परिचरंति। ऋतजाः ऋतस्योदकस्य जनयिता ऋते यज्ञे प्रादुर्भ
वतीति वा अद्रिजूतः स्तोतृभिराक[illegible] [illegible] द्यावापृथिवी द्यावापृथिव्यौ सद्यस्तदानीमेव परियाति सर्वतः प्राप्नोति खलु। अश्वि

[illegible]स्योदात्तत्वं। यद्वृत्तयोगादनिघातः। अमति। नाहोदनिति कृत्यत्वात्। लित्तत्वात् प्रकृतिस्वर
त्वं। रस्वाराशने। व्यत्ययेनात्मनेपदं। लोटि रूपं। अमंत्रितस्याविद्यमानत्वान्निघाताभावः॥ ॥इति तृतीयस्य चतुर्थे द्वितीयो वर्गः॥ ॥धेनुः
प्रत्नस्येति नवर्चं पंचमं सूक्तं। वैश्वामित्रं त्रैष्टुभमाश्विनं। तथा चानुक्रांतं। धेनुर्नवाश्विनमिति। प्रातरनुवाके आश्विने क्रतौ त्रैष्टुभे छं
दस्याश्विनशस्त्रे चास्य सूक्तस्य विनियोगः। सूत्रितं च। धेनुः प्रत्नस्य कउ अवद्विति सूक्ते इति। व्यूल्हे दशरात्रे द्वितीये छंदोप्रउगे शस्त्रे अयमाश्वि
नस्तृचस्तृचः। द्वितीयस्याग्ने वृहति खंडे सूत्रितं। धेनुः प्रत्नस्य काम्यं दुहाना ब्रह्माण इंद्रोपयाहि विद्वानिति॥ ॥ तत्र प्रथमा॥ ॥ धेनुः
प्रत्नस्य काम्यं दुहानांतः पुत्रश्चरति दक्षिणायाः॥ आ द्योतनिं वहति शुभ्रयामोषसः स्तोमो अश्विनावजीगः॥१॥ धेनुः प्रीणयित्री दुग्धाः
प्रत्नस्य पुरातनस्याग्नेः काम्यं कमनीयं पयो दुहाना दोग्ध्री इति दक्षिणाया उषसः पुत्रः सूर्यः तस्याः अंतश्चरति। उषसोनंतरं शुभ्रयामा स्व
यंकिरणसंपर्काच्छुभ्रतयागमनया स्यासौ शुभ्रयामा दिवसः द्योतनिं सर्वस्य प्रकाशकं सूर्यमावहति बिभर्ति। अत उषसः पुरा अश्विनौ
स्तोतुस्ते - - - - - - - - - - दिरजीगः जागर्तिषु तिष्ठति। शुभ्रयामा। यापापणे। अतो मनिन्। बहुव्रीहौ पूर्वपदस्वरः। अजीगः। जागृ
निद्राक्षये। लङि तिपि अदादित्वाच्छपो लुक्। आकारस्य ईकारश्छांदसः। गुणो नातहन्यादिनीति यो लोपः॥ ॥अथ द्वितीया॥ ॥ सुयु
ग्वहंति प्रतिवामृतेनोर्ध्वा भवंति पितरेव मेधाः॥ जरेथामस्मद्वि पणेर्मनीषां युवोरवश्चकृमा यातमर्वाक्॥ ॥ हे अश्विनौ सुयुक्ताः सुष्ठुरथो
योजिता अश्वाः ऋतेन सत्यभूतेन रथेन वां प्रतिवहंति यज्ञं प्रत्यागमयं। धारयंति। मेधाय ज्ञाश्च ऊर्ध्वाः युष्मदभिमुखं अर्ध्वा भवंति। तत्र द

जनानित्यनया समिधमादध्यात् । सूत्रितं च । मित्रो जनान्यातयति ब्रुवाण इति समिदाधानमिति ॥ तत्र प्रथमा ॥ ॥ मित्रो जनान्यातयति
तृ.सं.भा.४ ब्रुवाणो मित्रो दाधार पृथिवीमुत द्यां । मित्रः कृष्टीरनिमिषाभि चष्टे मित्राय हव्यं घृतवज्जुहोत ॥ ॥ ब्रुवाणः श्रूयमाणः शब्दं कुर्वाणो मित्रः
प्रकर्षेण सर्वैर्मीयते तथा सर्वान् वृष्टिप्रदानेन त्रायत इति वा मित्रः सूर्यः जनान् कर्षकादिजनान् यातयति कृष्यादिकर्मसु प्रयत्नं कारय
ति तथा मित्र एव पृथिवीं उतापि च द्यां एतावुभौ लोकौ वृष्टिद्वारान्नं यागांश्च जनयन् दाधार धारयति तथा स मित्रः अनिमिषा अनिमिषेणानु
ग्रहदृष्ट्या कृष्टीः कर्मवतो मनुष्यानभि चष्टे सर्वतः पश्यति एतत्सर्वं ज्ञात्वा हे ऋत्विजः घृतवद्बहूपस्तरणाभिधारयुक्तं हव्यं हवनयो
ग्यं पुरोडाशादिकं तस्मै मित्राय देवाय जुहोत जुहुत प्रयच्छतेत्यर्थः । उक्तार्थं यास्को ब्रवीति मित्रो जनान्यातयति ब्रुवाणः शब्दं कुर्वन्
मित्राय हव्यं घृतवज्जुहोतेति व्याख्यातं जुहोतिर्दानकर्मेति यातयति यती प्रयत्न इत्यस्य ण्यन्तस्य लिटि रूपं । दाधार । तुजादीनामित्य
भ्यासस्य दीर्घः । जुहोत जुहोते लोटि प्रत्ययस्य तनबादेशः । गुणः । निघातः । देवसुवां हविःषु मित्रस्य प्र स मित्रेति याज्या । एषैव प्रा राम
तर्होमस्य कालात्ययनिमित्ते मैत्राचारो याज्या । सूत्रितं च । प्र स मित्र मर्तो अस्तु प्रयस्वानिति संस्थितायामिति च ॥ ॥ सैषा सूक्ते द्वितीया ॥ १२१
प्र स मित्र मर्तो अस्तु प्रयस्वान् यस्त आदित्य शिक्षति व्रतेन । न हन्यते न जीयते त्वोतो नैनमंहो अश्नोत्यन्तितो न दूरात् ॥ ॥ हे आदित्य
व्रतेन यज्ञेन युक्तो यो मनुष्यः ते तुभ्यं शिक्षति हविर्लक्षणमन्नं ददाति । हे मित्र स मर्तो मनुष्यः प्रयस्वान् अन्नवान् प्रास्तु प्रभवतु । त्वोतः
त्वया रक्षितः मनुष्यः केनापि न हन्यते न बाध्यते न जीयते नाभिभूयते च । एनं तुभ्यं हविर्दत्तवन्तं पुरुषं अंहः पापं अन्तितः समीपात् अश्नोति न

प्राप्नोति । दूरादपि । न प्राप्नोति शिक्षति दानकर्मा व्यत्ययेन परस्मैपदं । यद्वृत्तयोगादनिघातः । जीयते जयतेः कर्मणि यकि अकृत्सार्वधातुक
योर्दीर्घ इति दीर्घः । त्वोत त्वनीया कर्मणीति पूर्वपदस्वरः । अश्नोति । अशूङ् व्याप्तावित्यस्य व्यत्ययेन परस्मैपदं । देवसुवां हविःषु मित्र ॥ ॥ अथ
तृतीया ॥ ॥ अनमीवास इळया मदन्तो मितज्ञवो वरिमन्ना पृथिव्याः । आदित्यस्य व्रतमुपक्षियन्तो वयं मित्रस्य सुमतौ स्याम ॥ ॥ अनमी
वासः रोगवर्जिताः इळया अन्नेन मदन्तो माद्यन्तः पृथिव्याः वरिमन् विस्तीर्णे प्रदेशे आ मितज्ञवः मितजानुकाः आ यथाकामं सर्वत्र गच्छन्तः
आदित्यसंबंधि । व्रतं कर्म उपक्षियन्तः तस्य कर्मणः समीपे निवसन्तस्तदीयकर्म कुर्वाणा इत्यर्थः । तादृशा वयं मित्रस्यादित्यस्य सुमतौ शोभना
यामनुग्रहबुद्ध्यां स्याम भवेम । मदन्तः मदी हर्षे इत्यस्य शतरि व्यत्ययेन शप् । मितज्ञवः । जानुशब्दस्य ज्ञुः छंदसः । वरिमन् । उरुशब्दात्पृथ्
व्यादित्वादिमनिच् । प्रियस्थिरेत्यादिना वरादेशः । सुपां सुलुगिति सप्तम्या लुक् । व्यत्ययेनाद्युदात्तः ॥ ॥ अथ चतुर्थी ॥ ॥ अयं मित्रो नमस्यः सु
शेवो राजा सुक्षत्रो अजनिष्ट वेधाः ॥ तस्य वयं सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम ॥ ॥ अयं पूर्वमंत्रे प्रतिपादितो मित्रः सूर्यः नम
स्यः सर्वैर्नमस्करणीयः सुशेवः शोभनसुखः सुखेन सेव्य इत्यर्थः । राजा सर्वस्य जगतः प्रकाशप्रदानेन स्वामी सुक्षत्रः । क्षत्रशब्देन
बलमुच्यते शोभनबलो यतः । वेधाः सर्वस्य जगतो विधाता एवंगुणोपेतः सूर्यो जनि प्रादुरभूत् तस्य एवंविधगुणोपेतस्य यज्ञिय
स्य यज्ञार्हस्य सूर्यस्य सुमतौ शोभनायां बुद्धौ भद्रे कल्याणकारिणि सौमनसेऽपि यजमाना वयं स्याम भवेम । नमस्यः नमसि नाधः ।
तत्र साधुरिति यत् । नित्स्वरितः । अजनिष्ट । जनी प्रादुर्भावे इत्यस्य लुङि सिचि रूपं । सौमनसे । सुमनस इदमित्यर्थे तस्येदमित्यण् । प्र

ऋ॰सं॰भा॰४

पात्यस्वरः॥ ॥अथ पंचमी॥ ॥ महाँ आदित्यो नमसोपसद्यो यातयज्जनो गृणते सुशेवः॥ तस्मा एतत्पन्यतमाय जुष्टमग्नौ मित्राय हविरा जुहोत॥ ॥ योयमादित्यो महान्। अतएव नमसा नमस्कारेणोपसद्यः सर्वैरुपसदनीयः यातयज्जनः प्रातःस्वस्वकर्मणि प्रवर्तनीया जना येनेति स तथोक्तः। गृहतिस्तोत्रं कुर्वीत जनाय सुशेवश्च तस्मै पन्यतमाय जुष्टतमाय मित्राय आदित्याय जुष्टं प्रीतिविषयामेतद्धविः अग्नौ आजुहोत जुहुत। यातयज्जनः। अती प्रत्ययइत्यस्य एयेतस्य इति रिरूपं। बहुव्रीहौ पूर्वपदप्रकृतिस्वरे प्राप्ते मरुद्वृधादित्वात्पूर्वपदांतोदात्तत्वं। गृणते। शेङ् श्रानुरनुम इति विभक्तेरुदात्तत्वं। पन्यतमाय। पन्यायनंतर इत्यादित्वाद्यत्। यतोनाव इत्याद्युदात्तत्वं। जुष्टं। नित्यंमंत्रइत्याद्युदात्तत्वं॥ इति तृतीयस्य चतुर्थे पंचमो वर्गः॥ ॥ अभिप्लवषडहे दशरात्रे च सद्दशेऽक वित्यादिस्त्रीमे सति होत्रादिकर्तस्त्रैव आपस्थाने पंचसप्तादि संख्याका ऋच आवपनीयाः। तत्रमैत्रावरुणशस्त्रे मित्रस्य चर्षणीधृत इत्याद्यश्च तस्त्र आवाप्यर्थः। सूत्रितं च। मित्रस्य चर्षणीधृत इति मैत्र इति॥ ॥ अथ षष्ठी॥ ॥ मित्रस्य चर्षणीधृतोवो देवस्य सानसि। द्युम्नं चित्रश्रवस्तमं॥ ॥ चर्षणीधृतो मनुष्याणां वृष्टिप्रदानेन धारकस्य मित्रस्य देवसंबंधि अवो देवस्य सानसि सर्वैः संभजनीयं द्युम्नं ल्वदीयं धनं च चित्रश्रवस्तमं। अतिशयेन वायनीयकीर्तियुक्तं। सानसि। षणोतेः सानसिपर्णसीत्यादिना असिनुप्रत्ययांतत्वेन निपातनात्तूपधावृद्धिः। नित्वादंतोदात्तः। स्वमोरिति स्वमो लुक्॥ ॥ प्रातर्होमस्य कालात्यये त्रेष्टिः तस्यामभियो महिनेत्यनुवाक्या। सूत्रितं च। अभियो महिनादिवं प्रसमित्र मर्त्तो अस्तु प्रयस्वानिति॥ ॥ सैषा सूक्ते सप्तमी॥ ॥ अभियो महिना दिवं मित्रो बभूव सप्रथाः॥ अभिश्रवोभिः पृथिवीं॥ ॥ यो मित्रः महिनस्वकीयेन महिम्ना

राम
१३८

नो रथस्य वेगत्वेमं त्रेवर्णः। यद्वेमेश्विना मनसो अतीया चय्यः स्वयो विश आजिगातीति। अतः कारणादस्मदीयं यज्ञं प्रत्यागच्छतमिति भावः। ईयुः ईणगतावित्यस्य लिटि दीर्घइणः किंतीत्यभ्यासस्य दीर्घः पादादित्वादनिघातः। यतमानाः यती प्रयत्ने इत्यस्य शानचि रूपं। शपः पित्वादनुदात्तत्वे शान चो लसार्वधातुकस्वरेणानुदात्तत्वे धातुस्वरः। स्वतजाः जने र्लिङ्। विड्वनोरित्यात्वं। अद्रिकृतः। जूइति सौत्रो धातुः कर्मणि क्तः। तृतीया कर्मणीति पूर्वपदस्वरः॥ ॥ अथ नवमी॥ ॥ अश्विना मधुषुत्तमो युवाकुः सोमस्तंपातमागतं दुरोणे॥ रथो ह वां भूरिवर्पः करिक्रत्सुतावतो निष्कृतमागमिष्ठः॥ ॥ हे अश्विनो यः सोमः मधुषुत्तमः मधुरसमन्यतं प्रेरयन युवाकुर्युवां कामयमानो वर्त्तते। यद्वा युवाकुः वसतीवरीप्रभृतिभिर्मिश्रित इत्यर्थः। तमिमं सोमपीते पिबतं दुरोणे अस्माकं गृहे आगतमागच्छतं भूरिप्रभूतं वर्पो वारकं तेजः सर्वैर्वरणीयं धनं वा करिक्रत् पुनः पुनः कुर्वन्वां युवयो रथः सुतवतः सोमभिषुतवतो यजमानस्य निष्कृतं निरित्यपसमित्यत स्थानदूतियस्कः। संस्कारियद्वा संस्कृतं गृहमागमिष्ठः। अतिशयेनागन्ता भवति। युवाकुः योतेः। कटिकुषिभ्यां काकु इति बाकुलकादस्मादपि भवति। प्रत्ययस्वरेण मध्योदात्तः। करिक्रत्। करोतेर्यङ्लुकि दाधर्ति दर्धर्षीत्यादिना वुगागमाभावेयेणादेशः। कृते अंवास्यात कारांतत्वादभ्यासस्य रिगागमो न प्राप्नोतीति सोपि निपात्यते। अभ्यस्वरः। निष्कृतं। करोतेरादिकर्मणि क्तः। संस्कृतं प्रयत्नइत्यर्थः। तथादिस्वरः॥ ॥ इति तृतीयस्य चतुर्थे चतुर्थो वर्गः॥ ॥ मित्रो जनान्यातयतिब्रुवाण इति नवर्चं षष्ठं सूक्तं वैश्वामित्रं त्रैष्टुभं मित्रो मैत्रं च तुर्गायत्र्यं तमनुक्रमणिका। आदितः पंच त्रिष्टुभः शिष्टाश्च तस्रो गायत्र्यः मित्रो देवता। अग्निहोत्रार्थपयसि वर्षविदुपताने मित्रो

बा

वर्पसः सौधन्वना यज्ञियं भागमानश ॥ ॥ हे ऋभवः वो युष्माकं बंधुता बध्नंति फलेन संयोजयंतीति बंधवः कर्माणि तेषां भावो बंधुता। अ
ऋ०सं०भा०४ हेह सर्वमनसा सर्वेज्ञायते। नरः हे मनुष्याः ऋभवः उशिजः यज्ञभागं कामयमाना भवंतः वेदसा यज्ञभागप्रापककर्मविषयज्ञानेन तता
नि तादृशानि कर्माणि अभिजग्मुः प्राप्नुवंति। कानि तानि इमा याभिः मीयंते ज्ञायंते इति मायाः कर्माणि याभिर्मायाभिः यैः कर्मभिः प्रति
जूति वर्पसः प्रतिपक्षाभिभवनशीलतेजोयुक्ताः सौधन्वना आंगिरसः पुत्रः कश्चिदृषिः तस्य पुत्राः सौधन्वनाः। ते च त्रयः ऋभुर्वि
भ्वा वाज इति एतन्नामकाः यूयं यज्ञियं यज्ञार्हं भागं सोमपानादिलक्षणं आनश व्याप्ताः स्थ। तथा च मंत्रवर्णः। ऋभुर्विभ्वा वाजो देवाँ अ
गच्छत स्वपसो यज्ञियं भागमैतन इति। अयमर्थो ब्राह्मणे प्रभवो वै देवेषु तपसा सोमपीथमभ्यजयन्नित्युपाख्यानपूर्वकं स्पष्टम
भिहितः। यद्वा नरः कर्माणि नेतारो हे ऋभवः उशिजः कामयमाना देदसा हविर्लक्षणेन धनेन युक्ते स्थ नारः वो युष्माकं तानि च मम भक्ष
णादीनि कर्माणि बंधुता बंधुनया सर्वेण मनसा जग्मुरभिगच्छंति। कानीत्याशंकायामाह येभिश्चमसभक्षणादिभिः कर्मभिर्यज्ञार्हं
भागं यूयं प्राप्नुत तानि अभिगच्छंति। युष्माकं बुधि ने पुत्रा निविंतयंतीत्यर्थः। इहेहा नित्यवीप्सयोरिति द्विर्वचनं। परस्याम्रेडितं तस्यानुदा राम
त्तत्वे पूर्वपदस्वरः। बंधुता। बंध बंधने। सितन्नित्यादिना कर्तरि उन्प्रत्ययः। समूढ इत्यर्थे ग्रामजनबंधुसहायेभ्यस्तलिति तल्।
लित्स्वरः ॥ ॥ अथ द्वितीया ॥ ॥ याभिः शचीभिश्चमसाँ अपिंशत यया धिया गामरिणीत चर्मणः ॥ येन हरी मनसा निरतक्षत तेन देवत्व १२९
मृभवः समानश ॥ ॥ याभिः शचीभिः [illegible]भिश्चमसान् चतुरः अपिंशत विभक्तवंतः। यया धिया प्रज्ञया गां मृतामरिणीत चर्मणा योज

ना प्रापितवंतः स्थ। येन मनसा प्रज्ञानेन हरी [illegible] नामकाविंद्रस्याश्वौ निरतक्षत नितरामकुरुत। तथा च मंत्रवर्णः। य इंद्राय वचोयुजा ततक्षु
र्मनसा हरी इति। तेन सर्वेणानेन कर्मणा देवत्वं यज्ञभागार्हत्वलक्षणं देवभावं समानश सम्यक् प्राप्ताः स्थ। अपिंशत। पिश अवयवे
तुदादिः। तस्य लुङि मध्यमे रूपं यद्वृत्तयोगादनिघातः। अरिणीत री गतिरेषणयोः क्र्यादिः तस्य लङि रूपं। अत्रापि पूर्ववदनिघातः। नि
रतक्षत। तक्षू तनूकरणे लङि रूपं। पूर्ववदनिघाते तिङि चोदात्तवतीति गतेर्निघातः। आद्युदात्तः। आनश। अश्नोतेर्लिटि रूपं। नि
घातः ॥ ॥ अथ तृतीया ॥ ॥ इंद्रस्य सख्यमृभवः समानशुर्मनोर्नपातो अपसो दधन्विरे ॥ सौधन्वनासो अमृतत्वमेरिरे विष्ट्वी शमीभिः
सुकृतः सुकृत्यया ॥ ॥ मनोर्नपातः मनुष्यस्यांगिरसः पुत्राः अपसः यागादिलक्षणकर्मवंतः। ऋभवः इंद्रस्य सख्यं समानख्यानत्व
प्राप्तानशुः सम्यक् प्राप्नुवन् तथा इंद्रस्य सख्यं प्राप्तास्ते ऋभवः दधन्विरे। पूर्वं मनुष्यत्वेन मरणयोग्या अपि इदानीमिंद्रस्य सख्येन
प्राणान् धारयंति। तथा मंत्रः। अधारयंत वह्नयः इति। सौधन्वनासः सुधन्वनामस्य ऋषेः पुत्रा ऋभवः सुकृतः शोभनकर्माणः संतः
प्रभृतेः शमीभिः देवत्वप्राप्तिप्रतिबंधनिवारणहेतुभिः कर्मभिः सुकृत्यया शोभनेन कर्मणा च विष्ट्वी व्याप्य अमृतत्वमेरिरे देवत्वं प्राप्नुः
तथा च मंत्रांतमाम्नायते। मर्तासः संतो अमृतत्वमानशुरिति। नपातः। नभ्राण्नपादित्यादिना नञः प्रकृतिभावः। दधन्विरे धविर्गत्यर्थः। व्य
त्ययेनात्मनेपदं। लिटि रूपं। ईरिरे। ईर गतौ। मंत्रत्वादाम् न भवति। निघातः। सुकृत्यया। करोतेर्भावे कृञः शचेति क्यप्। त्वप्रत्ययस्य व्यत्यये
नोदात्तत्वं। समासे कृदुत्तरस्वरः ॥ ॥ अथ चतुर्थी ॥ ॥ इंद्रेण याथ सरथं सुते सचाँ अथो वशानां भवथा सह श्रिया ॥ न वः प्रतिमै सुकृता

ऋ॰सं॰भा॰४

निवाघतः सौधन्वना ऋभवो वीर्याणि च ॥ ३ ॥ हे ऋभवो यूयं इंद्रेण सचा सह रथं समानमेकं रथमारुह्य सुते अभिषुते सोमे वर्तिः यज्ञं याथ
गच्छथ। अथो अनंतरं इंद्रेण सह एकरथमारूढो यूयं वशानां वश्यते काम्यते यजमानेन स्वर्गादिलक्षणं फलमेभिरिति वशा मनुष्याः। तेषां धिया
स्तुतिहविरादिरूपेण ध्यानं च यथा सौधन्वनाः सुधन्वनः पुत्रा वाघतः अमृतत्वादिलक्षणं फलस्य वोढारो मेधाविनो वेति यास्कः। तादृशा हे ऋभ
वः वो युष्माकं सुकृतानि देवत्वस्य शापकाणि शोभनानि कर्माणि न प्रतिमे प्रतिमातुमियत्तया परिच्छेत्तुं न केनापि शक्यानि। तथा वीर्याणि
युष्माकं सामर्थ्यानि च नैव प्रतिमातुं शक्यानि। वशानां वशा कांतौ। वशिरण्योरुपसंख्यानमिति करणे अप्प्रत्ययः। प्रत्ययस्य पित्त्वादनुदात्तत्वे धा
तुस्वरः। वशाशब्दो वध्याच वत्ताघ्त्यंतोदात्तो भवति। वशा मेषा अवस्रष्टा सश्री इतादृति। वो युष्मच्छब्दस्य षष्ठीबहुवचने वसादेशः।
निघातः। प्रतिमे माङ् माने विचु प्रतिमाः मानं तस्य चतुर्थ्येकवचने आतो लोपः इष्टाद्यं दसः। एकादेशस्वरः। अभिप्लविके पंचमेहनि वैश्व
देवशस्त्रे इंद्र ऋभुभिरित्यार्भवतृचः। सूत्रितं च। इंद्र ऋभुभिर्वाजवद्भिः समुक्षितं इंद्रावरुणा सुतपाविमं सुतमिति ॥ सैषा सूक्ते
पंचमी ॥ इंद्र ऋभुभिर्वाजवद्भिः समुक्षितं सुतं सोममा वृषस्वा गभस्त्योः ॥ धियेषितो मघवन्दाशुषो गृहे सौधन्वनेभिः सह मत्स्वा नृभिः ॥
॥ हे इंद्र वाजवद्भिः वाजो नाम ऋभूणां भ्राता यद्वा वाजो अन्नं तत्सह ऋभुभिः सहितस्त्वं समुक्षितं समग्रसिक्तं ग्रावभिः सुतं सोमं गभस्त्योः
बाहुसत्योः दंत्यामामन्नमिति निरुक्तं तिपदार्थानामभ्यामिति वा गभस्ती बाहू तयोर्लक्षारावृषस्व आक्षारय ग्रहस्य गृहाणेत्यर्थः हे सोमं पिबे
त्यर्थः। हे मघवन् हे इंद्र धिया स्तोत्ररूपेण कर्मणा इषितः प्रेरितस्त्वं दाशुषो हविर्दत्तवतो यजमानस्य गृहे सौधन्वनाभिः सुधन्वनः पुत्रैर्नृभिर्म

दिवमंतरिक्षमभिभूर्वा विभवति। समित्रः सप्रथाः प्रथः प्रसिद्धिः कीर्तिः तत्सहितः श्रवोभिः कीर्तिद्वारा तुत्वादितरत्रैः पृथिवीमस्याभिभवति
बहुत्वयुक्तं करोतीत्यर्थः। सप्रथाः प्रथ प्रख्याने। असुन् वा पसर्जनस्येति सहस्य सभावः ॥ ७ ॥ अथाष्टमी ॥ मित्राय पंच येमिरे जना अ
भिष्टिशवसे। स देवान्विश्वान्बिभर्ति ॥ पंचजनाः निषादपंचमाश्चत्वारो वर्णाः अभिष्टिशवसे शत्रूणामभिगंतृबलयुक्ताय मित्राय
येमिरे हवींषि प्रयच्छंतीति सतादृशो मित्रः विश्वान्सर्वान्देवान्बिभर्ति स्वस्वरूपतया धारयति। अभिष्टिशवसे इषेमीत्र इषेत्यादिना
क्तिन्। तादौ च निती त्यभेदात्तत्वं। शकंध्वादित्वात्पररूपत्वं। बहुव्रीहौ पूर्वपदस्वरः ॥ ८ ॥ अथ नवमी ॥ मित्रो देवेष्वायुषु जनाय वृक्तबर्हिषे
इषइष्टव्रता अकः ॥ मित्रो भगवानादित्यो देवेषु द्योतमानादिगुणयुक्तेषु आयुषु मनुष्येषु मध्ये यो जनः वृक्तबर्हिषः वृक्तं लूनं बर्हिर्ये
न स आसादनपूर्वं हविषो दाता ऋत्विगित्यर्थः। तस्मै वृक्तबर्हिषे जनाय इष्टव्रताः इष्टानि कल्याणानि व्रतानि कर्माणि याभिः सिध्यंति ता इषः
अन्नानि अकः करोति तस्मै ददातीत्यर्थः। वृक्तबर्हिषे ओव्रश्चू छेदने कर्मणि निष्ठायां यस्य विभाषेतीट्प्रतिषेधः। बहुव्रीहौ पूर्व
पदस्वरः। अकः। करोतेर्लुङि मंत्रे घसेत्यादिना लुक्। सिपो हल्ङ्यादिलोपः। निघातः ॥ ९ ॥ इति तृतीयस्य चतुर्थे षष्ठो वर्गः ॥ इहेह
व इति सप्तर्चं सप्तमं सूक्तं वैश्वामित्रं जगतमृभुदेवताकं। अंत्यस्त्रिष्टुबिंद्रदेवताश्च। तथा चानुक्रांतं। इहेह सप्तार्भवं जागतं त्वं चो याएंद्र
श्चेति। सूक्तविनियोगो लैंगिकः। आद्याश्चतस्रः षष्ठेभिप्लवषडहे द्वितीये प्रथमेहनि वैश्वदेवशस्त्रे आर्भवनिविद्धानीयाः। सूत्रितं च। इ
हेह वो मनसेति च तस्त्र इति ॥ तत्र प्रथमा ॥ इहेह वो मनसा बंधुता नर उशिजो जग्मुरभि तानि वेदसा ॥ याभिर्मायाभिः प्रतिजूति

राम
१४०

ऋ॰सं॰भा॰४ स्यमित्ति प्रातरनुवाके उषः क्रतावाश्विनशस्त्रे च त्रैष्टुभे छंदस्येतस्य सूक्तस्य विनियोगः सूत्रितं च। उषो वाजेनेद मुदुत्यमिति॥ तत्र प्रथमा॥
॥ उषो वाजेन वाजिनि प्रचेताः स्तोमं जुषस्व गृणतो मघोनि॥ पुराणी देवि युवतिः पुरंधिरनु व्रतं चरसि विश्ववारे॥ वाजेन वाजिनी अन्नेना
न्नवती। तथा च मंत्रः। स वाजैर्वाजिनीवतीति। मघोनि। धनवति। हे उषः प्रचेताः प्रकृष्टज्ञानवती सती गृणतः तव स्तोत्रं कुर्वतः स्तोतुः स्तोमं स्तो
त्रं जुषस्व। यद्वा वाजेन हविर्लक्षणेनान्नेन सह स्तोमं जुषस्वेति संबंधः। विश्ववारे विश्वैः सर्वैर्वरणीये हे उषो देवि पुराणी पुरातनी युवतिरि
त्युपमा। तद्वत् शोभमानास्सु संकाशमानत्स्वेव योषिति वत्स पुरंधिः पुरुबहुधी स्तोत्रलक्षणं कर्म यस्याः सा बहुस्तोत्रवती पुरंधिर्बहुधी
रिति यास्कः। पुरंधिः शोभमाना वा एवंविधं गुणोपेता त्वं अनु व्रतं यज्ञकर्माभिलक्ष्य चरसि पश्चाद्व्याप्तवती वर्तसे। मघोनि। मघ शब्दान्मतुब
र्थे छंदसीवनिपाविति वनिप्। स्त्रियां ऋन्नेभ्यो ङीप् श्वयुवमघोनामतद्धित इति संप्रसारणे कृते गुणः सवर्णदीर्घः। मघशब्दो धननामसु पठितः। निघा
तः। पुराणशब्दः पुराणप्रोक्तेष्विति त्युटोन्तत्वेन निपातितः। टिड्ढाणञिति ङीप्। अनुदात्तस्य यस्योदात्तलोप इत्युदात्तत्वं। पुरंधिः पृषोद
रादित्वादुकारस्य अमादेशः ईकारस्य ह्रस्वश्च। आद्युदात्तप्रकरणे दिवोदासादीनां छंदस्युपसंख्यानमित्याद्युदात्तत्वं॥ अथ द्वितीया॥
उषो देव्यमर्त्या वि भाहि चंद्ररथा सूनृता ईरयंती॥ आ त्वा वहंतु सुयमासो अश्वा हिरण्यवर्णां पृथुपाजसो ये॥ हे उषो देवी अमर्त्या मरणध
र्मरहिता चंद्ररथा सुवर्णमयं रथोपेता सूनृताः प्रियासत्यरूपा वाचः ईरयंती उच्चारयंती। तथा च मंत्रः सूनृता वरी सूनृता ईरयंतीति। ता
दृशी त्वं विभाहि सूर्यकिरण संबंधादिशोभमाना दीप्यसे। पृथुपाजसः प्रभूतबलयुक्ताः अरुणवर्णा। ये अश्वा विधंते सुयमासः सुष्ठु नियंतुं श
राम
१४१

स्या रथे योजितास्ते अश्वाः हिरण्यवर्णां त्वां आ वहंतु सुयमासः परानरक्षणार्थे खलु छित्वरः॥ ॥ अथ तृतीया॥ ॥ उषः प्रतीची भुवनानि विश्वो
र्ध्वा तिष्ठस्यमृतस्य केतुः॥ समानमर्थं चरणीयमाना चक्रमिव नव्यस्या ववृत्स्व॥ हे उषो देवि विश्वाः सर्वाणि भुवनानि प्रतीची प्रत्यभि
मुखेन नीवति प्राप्नोतीति प्रतीची अमृतस्य मरणधर्मरहितस्य सूर्यस्य केतुः प्रज्ञापयित्री त्वं ऊर्ध्वा नभस्युन्नता तिष्ठसि नव्यसि पुनः पुन
र्जायमान तया नवतर हे उषो देवि अर्थं अर्थ्यात गम्यते। मार्गो स्मिन्निति अर्थः। नुदात्तनि कृन्निस्वरे णांतोदात्तः। केतुः। चायतेः ज्ञानि शाम न यो
रित्यस्मा चायः की चेति तुः की इत्यादेशः। अर्ध धातुकलक्षणो गुणः। अर्थ। अर्थेस्त प्रत्ययः। नव्यसि। नवशब्दादीयसुनि ङीपि रूपं ईकार
लोपश्छांदसः। ववृत्स्व। वृतु वर्तने। बहुलं छंदसीति विकरणस्य श्लुः॥ ॥ अथ चतुर्थी॥ ॥ अव स्यूमेव चिन्वती मघोन्युषा याति स्वसरस्य प
त्नी॥ स्वर्जनंती सुभगा सुदंसा आंताद्दिवः पप्रथ आ पृथिव्याः॥ ॥ येयमुषाः स्यूमेव वस्त्रमिव विस्तृतं तमो विचिन्वती अवचयमपक्षयं
प्रापयंती मघोनी धनवती स्वसरस्य सुष्टु अस्यति क्षिपति तम इति स्वसः सत्रः सूर्यो वा सारा च तस्य पत्नी सती याति गच्छति स्वः स्वकीयं तेजः जनं जन ती
यंती सुभगा सुधना सौभाग्ययुक्ता सुदंसाः शोभनाग्निहोत्रकर्मा सेयमुषा दिवो द्युलोकस्य आंतात् पृथिव्या आंतादवसानात पप्रथे प्रथते प्र
काशत इत्यर्थः। स्यूमेव षिवु तंतुसंताने। अविषि विशुषिभ्यः कि दिवि म प्रत्ययः। छ्वोः शूड् अनुनासिके च ऊठ् यणादेशः। सुपांसुलुगिति सालु
क्। नित्वाद्युदात्तः। चिन्वती। शतुरनुम इति ङीप उदात्तत्वं। जनंती। जन जनने इत्यस्य ण्यंतस्य शतरि रूपं। छंदस्युभयथेति तिप आर्धधातुक
त्वेन णिलोपः॥ ॥ अथ पंचमी॥ ॥ अच्छा वो देवीमुषसं विभातीं प्र वो भरध्वं नमसा सुवृक्तिं॥ ऊर्ध्वं मधुधा दिवि पाजो अश्रेत् प्र रोचना रुरुचे रण्व

ऋ·सं·भा·४

संदृक्॥ ॥हे स्तोतारो वो युष्माकं अच्छाभिलक्ष्य विभातीं शोभमानां उषो देवीं प्रति वो युष्माकं संबंधिना नमसा नमस्कारेण सह सुवृक्तिं शोभमानां स्तुति
प्रभरध्वं प्रकुरुत। मधुधा। मधुरा रतिः स्तुतिलक्षणानि वाक्यानि दधातीति मधुः स्तोमः ४ तं धारयतीति वा। यद्वा मधुन आदित्य धात्री। यद्वा
अवग्रहाभावाद् उत्पन्नाच्चावयवखंडाः मिदं सुषोनाम सेयमुषाः दिवि नभसि ऊर्ध्वं पाजः ऊर्ध्वाभिमुखं पाजसे जोषं अश्रेत् श्रयति। तथा रोच
ना रोचनशीला रण्वसंदृक् रमणीयदर्शना उषाः प्ररुरुचे। प्रकर्षेण दीप्यते। यद्वा रोचना लोकान् प्ररुरुचे प्रकर्षेण स्वतेजसा दीपयति।
तथा च मंत्रवर्णः युच्छंती हि रश्मिभिर्विश्वमाभासि रोचनमिति। रणे संदृक्। रणे गत्यर्थस्य च प्रत्ययः इदित्वान्नुमागमः संपूर्वात् दृशेः क्वि
न्। बहुव्रीहौ पूर्वपदप्रकृतिस्वरः॥ ॥अथ षष्ठी॥ ॥ऋतावरी दिवो अर्कैरबोध्या रेवती रोदसी चित्रमस्थात्। आयतीमग्न उषसं विभातीं वाम
मेषि द्रविणं भिक्षमाणः॥ ॥ऋतावरी सत्यवती येयमुषाः दिवो द्युलोकादर्कैः तेजोभिरबोधि। सर्वैर्ज्ञायते। ततो रेवती धनवती रियं रोदसी द्यावा
पृथिव्यौ चित्रं नानाविधिरूपयुक्तं स्था भवति। तथा अस्थात् सर्वतो व्याप्य तिष्ठति। हे अग्ने आयतीं त्वदभिमुखमागच्छंतीं विभातीं भास
मानां उषसं उषो देवीं भिक्षमाणो हवींषि याचमानस्त्वं वामं वननीयं द्रविणं अग्निहोत्रादिलक्षणं धनं एषि प्राप्नोषि। अबोधि बुध अवगमने क
र्मणि लुङि चिण् भावकर्मणोरिति चिण्। चिणो लुक्। रेवती रयिशब्दान्मतुप् छंदसीरः इति वत्वं। रायो मतौ बहुलमिति संप्रसारणं परपूर्व
त्वगुणः ४ उगितश्चेति ङीप्। उरः अग्रहाञ्चोपसंख्यानमिति मनुपद्य दात्तत्वं॥ ॥अथ सप्तमी॥ ॥ऋतस्य बुध्न उषसामिषण्यन्वृषा मही रोदसी
आ विवेश॥ मही मित्रस्य वरुणस्य माया चंद्रेव भानुं विदधे पुरुत्रा॥ ॥वृषा वृष्टिद्वारा प्रेरकः आदित्यः ऋतस्य अग्निहोत्रादिकर्मकरणस्य

राम
१४२

युष्मेः ऋभुभिः सह सामकं मत्स्व सोमपानेन हृष्टो भव समुक्षितं। उक्षसेचने। कर्मणि क्तः गतिरनंतर इति गतेः स्वरः। गभस्त्योः भस भर्त्सनदीप्त्यो
रत्यस्माद्भासराद्देतिसूत्रेण ति प्रत्ययो धातोर्गुडागमश्च गुडुध्यातेः पृषोदरादित्वादेवं नेयं। मत्स्व। मदि स्तुत्यादिषु। लोटि बहुलं छंदसीति
विकरणस्य लुक्। निघातः॥ ॥अथाष्टमी॥ ॥इंद्र ऋभुमान्वाजवान्मत्स्वेह नोऽस्मिन्त्सवने शच्या पुरुष्टुत। इमानि तुभ्यं स्वसराणि येमिरे
व्रता देवानां मनुषश्च धर्मभिः॥ ॥पुरुष्टुत बहुभिः स्तुत हे इंद्र ऋभुमान् ऋभुगणेन तद्वान् वाजवान् वाजेन ऋभोर्भ्रात्रा युक्तः शच्या इंद्रा
ण्या कर्मणा वा सहितः सन् नोऽस्माकमिह कर्मण्यस्मिन् तृतीयसवने मत्स्व। हृष्टो भव। हे इंद्र तुभ्यं त्वदर्थं इमानि स्वसराणि अहानि येमि
रे तव सोमपानार्थं त्रिषु सवनेषु नियतान्यासते। किंच देवानाममृतादीनां व्रतानि कर्माणि च मनुषो मनुष्यस्य धर्मभिः कर्मभिः साकं त्वदर्थं नि
यतान्यासते॥ ॥अथ सप्तमी॥ ॥इंद्र ऋभुभिर्वाजिभिर्वाजयन्निह स्तोमं जरितुरुप याहि यज्ञियं। शतं केतेभिरिषिरेभिरायवे सहस्रणी
थो अध्वरस्य होमनि॥ ॥हे इंद्र वाजिभिः वाजयुक्तैर्ऋभुभिः सहितस्त्वं वाजयन् स्तोतुर्वाजमन्नं कुर्वाणः इह यज्ञे यज्ञार्हं जरितुः स्तोमं स्तोत्रमु
पयाहि आगच्छ पुनः किंविशिष्टः केतेभिः केत्यात ज्ञायते सर्वमेभिरिति केताः प्रज्ञाः ते तैः शतसंख्याकैः इषिरेभिः इषिरैः गमनकुशलैर
श्वैः सहितः आयवे मनुष्याय यजमानाय सहस्रनीथः बहुप्रकारनयनोपेतः अध्वरस्य न विद्यते अध्वरो हिंसा यस्य तादृशस्य सोमस्य हो
मनि होमे आगच्छेति शेषः। वाजयन् वाजं करोतीति णिच्। णाविष्टवदिति इष्ठवद्भावात् टिलोपे मयस्थिति टिलोपः। केतेभिः कित ज्ञाने। धञू नित्वा
दाद्युदात्तः॥ ॥इति तृतीयस्य चतुर्थे सप्तमो वर्गः॥ ॥उषो वाजेनेति सप्तर्चमष्टमं सूक्तं वैश्वामित्रमुषोदेवताकं। तथा चानुक्रांतं। उषो नोष

ऋ॰सं॰भा॰४

युवांप्राप्तुंक्रमणशीलाः मन्यमानाः मन्यतिरर्चतिकर्मा युवामर्चयन्तः सुतावः युवाते युवाभ्यां सहग्राय अन्यस्मै दे[illegible]यमात्यन्तुभ्यांतुजा
निर्दानकर्मार्थः। प्रदेयामाभूवन्। शिष्टं समानं। मन्मयः। व मुत्र नवस्थाने अमेः संप्रसारणं चेति इन्प्रत्ययः संप्रसारणं च। व्यत्ययेनांतोदा
त्तत्वं। युवावते। युष्मदस्मद्भ्यां छंदसि ता इत्युपसंख्यानमिति। वतुप्। अविभक्तावपि युवादेशश्छांदसः। तुज्याः। तुज हिंसादानानिकेतनेषु
अआदयश्चेतियत्। यतोनावइत्याद्युदात्तत्वं। सिनं। षिञ् बंधने। इण्षिञ्जिदीङुष्यविभ्योनक्। व्यत्ययेनाद्युदात्तत्वं॥ ॥ अथद्विती
या॥ ॥ अयमुवां पुरुतमो रयीयंछश्वत्तममवसे जोहवीति॥ सजोषाविंद्रावरुणामरुद्भिर्दिवापृथिव्याशृणुतंहवंमे॥ ॥ हे इंद्रावरुणौ र
यीयन् रयिमात्मन इच्छन् अयं पुरुतमः वैदिककर्मप्रवृत्ततया अतिशयेन पुरुतमदानं यंयजमानः अवसे रक्षणाय शश्वत्तमं युवां शश्व
त्तमंसर्वदा जोहवीति। भृशमाह्वयति। मरुद्भिर्देवविशेषैः दिवापृथिव्या च सजोषौ संगतौ युवामेममहवं युष्मदीयमाह्वानंशृण्वंतं पुरुतमः
तमपोव्यत्ययेनाद्युदात्तत्वं। जोहवीति। ह्वयतेर्यङ्लुकि अभ्यस्तस्य चेति संप्रसारणं। ऋतेरूपं अुडिदमिति विभक्तेरुदात्तत्वं॥ पृथिव्याउ
दात्तयणोहल्पूर्वादित्युदात्तत्वं। हवं ह्वयतेर्भावे अनुपसर्गस्य त्वप्रत्ययस्य पित्वादनुदात्तत्वं॥ ॥ अथतृतीया॥ ॥ अस्मेतदिंद्रावरुणावसु
ष्यादस्मे रयिर्मरुतः सर्ववीरः॥ अस्मान्वरूत्रीः शरणैरवंत्वस्मान्होत्राभारतीदक्षिणाभिः॥ ॥ हे इंद्रावरुणौ अस्मे अस्मासु तदभिलषितं
नाद्दर्शंवसुधनंस्यात्भवतु। हे मरुतः सर्ववीरः सर्वकमसुवीरः समर्थरयिः पुत्रपश्वादिसंधः पश्वाचो विरयिरतितेत्तिरीयकं। सो अस्मे अस्माकं
भावतु। वरूत्रीः सर्वैः संभजनीयाः देवपत्न्यः शरणैः शृणातिशीतादिकं शामितिशरणानि गृहाः तैरस्मानवंतु। होत्रा आह्वयंत्यस्यां हवींषीतियज्ञ

राम
१४३

स्यवाग्उच्यते। वाचं यज्ञच्छति वाग्वै यज्ञ इति श्रुतेः होत्रा इडा भारती सरस्वती दक्षिणाभिः गोरूपाभिः यद्वा उदाराभिर्वाग्भिः अस्मान्पालयतु।
वसुष्यादित्यत्र संहितायां पूर्वपदादिति षत्वं। वरूत्रीः। असितस्कभितस्तभित इत्यादिनाईत्वेन निपातनादिष्टसिद्धिः। होत्रा ह्वादनो दानयोः। हु
यामाश्रुभसिभ्यस्त्रन्निति अधिकरणे त्रन्प्रत्ययः॥ ॥ अथचतुर्थी॥ ॥ बृहस्पते जुषस्वनोहव्यानिविश्वदेव्य॥ रास्वरत्नानिदाशुषे॥ ॥ विश्व
देव्य सर्वदेवहिता हे बृहस्पते नोऽस्मत्संबंधीनि हव्यानि हवनयोग्यानि पुरोडाशादीनि हवींषि जुषस्व सेवस्व। ततस्त्वं दाशुषे हविर्दत्तवते
यजमानाय महं रत्नानि उत्तमानि धनानि रास्व देहि। रास्वराद्दाने। व्यत्ययेनात्मनेपदं॥ ॥ अथपंचमी॥ ॥ शुचिमर्कैर्बृहस्पतिमध्वरेषुनम
स्यत॥ अनाम्योज आचके॥ ॥ हे ऋत्विजो यूयं अध्वरेषु शुचिं शुद्धं बृहस्पतिमर्कैरर्चनीयैः स्तोत्रैर्नमस्यत परिचरत। अनामि। अनमित।
शीलपरैरनभिभवनीयं उन तस्यबलमाचके सर्वतो याचे। बृहस्पतिं। वनस्पत्यादित्वादुभयपदप्रकृतिस्वरः॥ चके। कमेर्लिङ्युत्त
मम कारलोपश्छांदसः॥ ॥ इति तृतीयस्य चतुर्थे नवमो वर्गः॥ ॥ अथषष्ठी॥ ॥ वृषभं चर्षणीनांविश्वरूपमदाभ्यं॥ बृहस्पतिंवरेण्यं॥ ॥
॥ चर्षणीनां मनुष्याणां वृषभमभिमतफलवर्षकं विश्वरूपं व्याप्तरूपं। यद्वा विश्वरूपं नाम कोगावाहनोपेतं। तथा च मंत्रवर्णः। बृहस्प
तिर्विश्वरूपामुपाजत इति। अदाभ्यं। केनाप्यतिरस्कार्य। वरेण्यं सर्वैर्भजनीयं। बृहस्पतिं अभिमतफलं वचइति पूर्वेणान्वयः॥ विश्व
रूपं विश्वरूपा अस्य संतीति अर्शआदित्वादच्प्रत्ययः। मरुद्वृधादित्वात्पूर्वपदांतोदात्तत्वं। अदाभ्यं। अदमेश्रोतिवक्तेः ण्यमिति ण्यत्प्रत्ययः॥ ॥
अथसप्तमी॥ ॥ इयंते पूषन्नाघृणे सुष्टुतिर्देवनव्यसी॥ अस्माभिस्तुभ्यं शस्यते॥ ॥ आघृणे दीप्तिमन् हे पूषन् देवन व्यसी नवतरी इयं सु

स्तुतिः। शोभना स्तुतिरूपा वाक् यस्य तेन त्वत्संबंधिनी भवति। सैषा स्तुतिः अस्माभिर्वाणीस्तोतृभिः तुभ्यं त्वदर्थं शस्यते। तां जुषस्वेति उत्तरत्रान्वयः॥ ॥ अथा-
ष्टमी॥ ॥ तां जुषस्व गिरं मम वाजयंतीमवा धियं॥ वधूयुरिव योषणां॥ ॥ हे पूषन् स्तोत्रं कुर्वतो मम तां तादृशीं गिरं स्तुतिलक्षणां वाचं जु-
षस्व सेवस्व स्तुत्या प्रीतस्त्वं वाजयंतीं वाजमन्नमिच्छंतीं हर्षकारिणीं धियमिमां स्तुतिं अप्रति अवाभिगच्छ। तत्र दृष्टांतः। वधूयुरिव। यथा वधू-
युः स्त्रीकामः। योषणां स्त्रियं प्रत्यागच्छति तद्वत्। वाजयंतीं वाजशब्दादिच्छतीत्यर्थे क्यच्। तदंतात् शतरि रूपं। ङीपो नुदात्तत्वे प्रत्ययस्वरः। अ-
वा अवरक्षणादिष्विति अस्य लोटि रूपं॥ ॥ अथ नवमी॥ ॥ यो विश्वाभि विपश्यति भुवना सं च पश्यति॥ स नः पूषाविता भुवत्॥ ॥ यः पूषा वि-
श्वा भुवनानि सर्वा लोकान् अभिमुख्येन वै पश्यति। विशेषेण पश्यति। किंच। तानि संपश्यति। तद्वस्तु याथात्म्यं सम्यक् जानाति। स तादृशः
पूषा देवः नोस्माकमविता रक्षको भुवत्। विपश्यति। यद्वृत्तयोगादनिघातः। शपः पित्वादनुदात्तत्वे धातुस्वरः। तिङि चोदात्तवतीति गतेर्निघा-
तः। पश्यति। अकर्मकत्वात् परस्मैपदं। पूर्ववदनिघातः। भुवत्। भवतेर्लेट्यडागमः। भूसुवोस्तिङीति गुणप्रतिषेधे उवङादेशः। निघातः॥ राम
दशरात्रस्य षष्ठेहनि वैश्वदेवशस्त्रे तत्सवितुरिति तृचः। प्रतिपत्तस्य द्वितीयतृतीये सूत्रितं। तत्सवितुर्वरेण्यमिति द्वे आ विश्वदेवमिति॥ १४४
॥ सैषा सूक्ते दशमी॥ ॥ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्॥ ॥ यः सविता देवः नोस्माकं धियः कर्माणि धर्मा-
दिविषया बुद्धीः प्रचोदयात् तस्य देवस्य सवितुः सर्वान्तर्यामितया प्रेरकस्य जगत्स्रष्टुः परमेश्वरस्य वरेण्यं सर्वैरुपास्यतया ज्ञेयतया च संभजनी-
यं भर्गः अविद्यातत्कार्ययोर्भर्जनात् भर्गः। स्वयंज्योतिः। तेजः परब्रह्मात्मकं तेजः धीमहि वयं ध्यायामः। यद्वा तदिति भर्गोविशेषणं सवितुर्देवस्य

त्यभूतस्याह्नो बुध्नमूले उषसामिषण्यन् प्रेरणं कुर्वन् मही महत्यौ रोदसी द्यावापृथिव्यौ आ विवेश सर्वतः प्रविष्टवान् यद्वा पूषा वर्धिता इषण्य-
न् सर्वतो गच्छन् उषसं बंधी रश्मिसमूहो रोदसी द्यावापृथिव्यौ विष्टवानिति योजनीयं। तत उषाः मही महती मित्रावरुणयोः मायया प्रभारू-
पया सती चंद्रेव सुवर्णानि वभानुं स्वप्रभां पुरुत्रा बहुदेशेषु विदधे विधाति सर्वत्र प्रसारयति। मही। अत्र लोपश्छंदसः। पुरुत्रा। देवमनुष्येत्यादि-
नाधिकरणे त्रा प्रत्ययः॥ ॥ इति तृतीयस्य चतुर्थे षष्ठो वर्गः॥ ॥ इमा उ वामित्यष्टादशर्चं नवमं सूक्तं। अत्रेयमनुक्रमणिका। इमा उ द्वे ऐं-
द्रावरुणबार्हस्पत्यपौष्णसावित्रसौम्यमैत्रावरुणं तृचा अंत्यो जमदग्नेरार्षो वा चतुर्थ्याद्या गायत्र्य इति। कृत्स्नस्य विश्वामित्र ऋषिः। अंत्यस्य तृ-
चस्य जमदग्निर्वा। आद्यास्तिस्रस्त्रिष्टुभः। पंच गायत्र्यः। प्रथमस्य इंद्रावरुणौ देवता। द्वितीया बृहस्पतिः। तृतीयस्य पूषा। चतुर्थस्य सविता। पंचम-
स्य सोमः। षष्ठस्य मित्रावरुणौ। आभिप्लविके पृष्ठ्येषु तृतीयसवने स्तोमवृद्धौ सत्यां स्य शस्त्रे होत्रकाः। अंत्यस्तृचमवश्यं युक्तो मा तिशंस-
नार्थत्वाद्धि संख्या इत्यत्र आवापयेयुः। तत्र मैत्रावरुणस्यावापार्थमाद्यस्तृचः। सूत्रितं च। इमा उ वां भृमयो मन्यमाना इति चतस्र इति॥ ॥
॥ तत्र प्रथमा॥ ॥ इमा उ वां भृमयो मन्यमाना युवावते न तुज्या अभूवन्॥ क्व१त्यदिंद्रावरुणा यशो वां येन स्मा सिनं भरथः सखिभ्यः॥ ॥ हे
इंद्रावरुणौ वां युवयोः संबंधिन्यः मन्यमानाः बलिभिः शत्रुभिरभिमन्यमाना अत एव भृमयः भ्रमणशीलाः इमाः प्रजाः युवावते तृतीया-
र्थे चतुर्थी। यो वनवता बलिना शत्रुणा तुज्या हिंसा नाभूवन् न भवंतु। वां युवयोः भवत् तादृशं यशः क्व। अत्रास्तेयेन यशसा स्मा सखिभ्यो स्मभ्यं
सिनमन्नं भरथः संप्रदानं संपादयथः तत्क्वास्ति इत्यन्वयः। यद्वा। हे इंद्रावरुणौ वां युवयोः संबंधिन्यः इमा अस्माभिः क्रियमाणा भृमयः

तस्य योनिमासदं ॥ गातुवित् गातुमार्गः । तं जानन् सोमो जिगाति गच्छति गंतव्यं स्थानं । दर्शयति । देवानां निष्कृतं । निष्कृतं आसदं । सर्वैरासा
दनीयं ऋतस्य यज्ञस्य योनिं स्थानं हविर्धानाख्यं प्राप्नोति । जिगाति । गोत्स्कृतो जुहोत्यादि ॥ अथ चतुर्दशी ॥ सोमो अस्मभ्यं द्विपदे चतुष्प
दे च पशवे ॥ अनमीवा इषस्करत् ॥ सोमः स्तोतृभ्यो अस्मभ्यं तथा द्विपदे अस्मदीयेभ्यो द्विपाद्भ्यः । चतुःपदे च पशवे चतुःपाद्भ्यो गवादिपशु
भ्यश्च अनमीवाः रोगवर्जितानि इषो अन्नानि करत् करोतु । चतुःपदे । भसंज्ञायां पादस्य पद्भावः । इसुसोः सामर्थ्ये इति संहितायां सत्वं । आ
देशप्रत्यययोरिति षत्वं । बहुव्रीहौ पूर्वपदस्वरः । करत् । करोतेर्लेटि अडागमः । इषस्करदित्यत्र संहितायां कः करतीत्यादिना सत्वं ॥ अथ पं
चदशी ॥ अस्माकमायुर्वर्धयन्नभिमातीः सहमानः ॥ सोमः सधस्थमासदत् ॥ स सोमो देवः अस्माकमायुः अन्नं जीवनं च वर्धयन् वृद्
धिं प्रापयन् अभिमातीः कर्मविघ्नकारिणः शत्रून् सहमानः अभिभवन् अस्माकं सधस्थं हविर्धानाख्यं स्थानं असदत् । आसीदतु । सदेर्लेटि
रूपं । निघातः ॥ अग्निष्टोमे प्रातःसवने मैत्रावरुणशस्त्रे आ नो मित्रावरुणेति तृचः । वीति । दाक्षायणयज्ञे द्वितीये मासि कर्तव्ये तत्रेज्यामामावास्या
यां द्वितीये हनि मैत्रावरुणं । आ नो मित्रावरुणेति तस्यानुवाक्या । सूत्रितं च । आ नो मित्रावरुणाय हव्यं हिंसन्नातिविधे सुदानू इति ॥ सैषा सूक्ते राम
षोडशी ॥ आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतं ॥ मध्वा रजांसि सुक्रतू ॥ सुक्रतू शोभनकर्माणौ हे मित्रावरुणौ नो अस्माकं गव्यूतिं गवां मार्गं गो १४५
निवासस्थानं घृतैः लक्षणया धनैः पयोभिः आ उक्षतं । समंतात् सिंचतं । अस्मभ्यं दोग्ध्रीः गाः प्रयच्छतमिति भावः । रजांसि अस्मदीयवासस्थानानि म
ध्वा मधुरेण रसेन सिंचतं । गव्यूतिं गोर्यूतौ छंदसीति वा तादेशः । मध्वा सर्वविधीनां छंदसि विकल्पितत्वात् द्वेन नुमागमाभावः ॥ अथ सप्तदशी ॥

॥ उरुशंसा नमोवृधा मह्ना दक्षस्य राजथः ॥ द्राघिष्ठाभिः शुचिव्रता ॥ शुचिव्रता परिशुद्धकर्माणौ हे मित्रावरुणौ उरुशंसा उरुभिर्बहुभिः शं
सनीयौ यद्वा उरु महत् शंसः शस्त्रं ययोस्तौ नमोवृधा नमसा हविर्लक्षणेनान्नेन स्तोत्रेण वा वर्धमानौ द्राघिष्ठाभिः अत्यंतदीर्घाभिः स्तुतिभिः मि
प्रियस्थिरेत्यादिना द्राघिस्थादेशः । इष्ठनित्वादाद्युदात्तः । मैत्रावरुणस्याग्रहस्य याज्या । गृणाना जमदग्निनेत्येषा । सूत्रितं च । होतायक्षन्मित्रावरु
णा गृणाना जमदग्निनेति । अध्यायोपाकरणे मंडलाद्यंतहोमे गृणाना जमदग्निनेत्येषा ॥ सैषा सूक्ते द्वादशी ॥ गृणाना जमदग्निना योना
वृतस्य सीदतं ॥ पातं सोममृतावृधा ॥ हे मित्रावरुणौ जमदग्निना एतन्नामकेन महर्षिणा गृणाना स्तूयमानौ यद्वा जमदग्निना प्रज्वलिताग्नि
ना विश्वामित्रेण स्तूयमानौ युवां ऋतस्य यज्ञस्य योनौ । देवयजनाख्ये देशे सीदतं उपविशतं । ऋतावृधा ऋतस्य कर्मफलस्य वर्धयितारौ युवां
सोमं पातं पिबतं । गृणाना । गृ शब्दे । कर्मणि शानच् । प्वादीनां ह्रस्वः । सीदतं । सदेर्लोटि पाघ्रेत्यादिना सीदादेशः । पातं । पा पाने । बहुलं छंदसीति श
पो लुक् ॥ इति तृतीयस्य चतुर्थे एकादशो वर्गः ॥ इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये द्वाशतयां तृतीय
मंडले पंचमोनुवाकः ॥ समाप्तं मंडलं ॥ वामदेवश्चतुर्थे मंडले पंचमो नुवाकाः । तत्र प्रथमेनुवाके दश सूक्तानि । तेषु त्वां ह्यग्ने सदमिदिति विं
शत्यृचं प्रथमं सूक्तं । अत्रेयमनुक्रमणिका । त्वां ह्यग्ने विंशतिरष्टितिजगती धृतय आद्या उपाद्या अन्त्यस्था वारुण्यश्चेवेति मंडलद्रष्टा वामदे
वऋषिः प्रथमा चतुःषष्ट्यक्षरा अष्टिः द्वितीया द्विपंचाशदक्षरा अतिजगती तृतीया द्वाषष्ट्यक्षरा धृतिः चतुर्थ्याद्या अनादेशपरिभाषया
द्यास्सप्ता त्रिष्टुभः । केवलस्य सूक्तस्य मंडलादित्वादाग्नेयमिति परिभाषया अग्निर्देवता द्वितीयाद्यास्तिस्रो वरुणदेवत्याः । सूक्तविनियोगो लैं

भिकः। अध्यायोपाकरणे मंडलादिहोमे विनियुक्ता॥ ॥ सैषा सूक्ते प्रथमा॥ ॥ त्वां ह्यग्ने सदमित्समन्यवो देवासो देवमरतिं न्येरिर इति क्रत्वा न्येरिरे।
तृ·सं·भा·४ अमर्त्यं यजत मर्त्येष्वा देवमादेवं जनत प्रचेतसं विश्वमादेवं जनत प्रचेतसं॥ ॥ वामदेवस्तोति। हे अग्ने समन्यवः मन्युः स्पर्धा तेन तया सह वर्तमा
नाः समानेः स्पर्धमाना इत्यर्थः। देवासो देवनशीला इंद्रादयो देवं द्योतमानं अरतिं शीघ्रगंतारं त्वां सदमित् सदैव न्येरिरे हि स्पर्धमाना नितरामुद्वे प्रे
रयंति खलु इति शब्दो हेत्वर्थः। यस्माद्देवास्त्वां नितरां प्रेरयंति तस्माद्यजमानाः क्रत्वा श्रुतिलक्षणेन कर्मणा न्येरिरे यज्ञकर्मणि देवान् हविः
प्रापयितुं देवानां क्रतुना च त्वां नितरां प्रेरयंति खलु। यजत यजनीय हे अग्ने अमर्त्यं मरणधर्मरहितं। आ सर्वतो देवं द्योतमानं प्रचेतसं प्रकृष्ट
कर्मविषयं चेतो ज्ञानं यस्य तादृशं त्वां मर्त्येषु यागं कुर्वाणेषु मनुष्येषु आ देवं आगंतारं जनयंत। देवा हविः अपणार्थमजनयन् तथा प्रचेतसं
कर्माभिज्ञं आदेवं तत्र यज्ञे आगंतारं त्वां विश्वं जनत युगपज्जाना देशावस्थितेषु यज्ञेषु योगपद्येन हविरानयनार्थं व्याप्तं देवा अकुर्वन्। न्येरिरे।
ईरगतौ। लिटि मंत्रत्वादाम्भवति। सहेति योगविभागात्समासः। हियोगादनिघातः। क्रत्वा जसादिषु छंदसि वा वचनमिति नादेशाभावः।
यणादेशः॥ ॥ अथ द्वितीया॥ ॥ स भ्रातरं वरुणमग्न आ ववृत्स्व देवाँ अच्छा सुमती यज्ञवनसं ज्येष्ठं यज्ञवनसं। ऋतावानमादित्यं चर्षणीधृ राम
तं राजानं चर्षणीधृतं राजानं चर्षणीधृतं॥ ॥ हे अग्ने तादृशस्त्वं भ्रातरं एकस्थानवासेन भ्रातरं वरुणो व्युदकमिति वरुणः तं देवं यज्ञवनसं यज्ञे १४६
वननीयैर्हविर्भिः संभजनीयं यज्ञवनसं यज्ञैर्वननीयैर्हविर्भिः संभजनीयं यज्ञवनसं यज्ञस्य संभक्तारं ज्येष्ठं अतिशयेन प्रशस्यं ऋतावा
नानमयांस्वामिना वदेकवंतं सत्यवंतं वा आदित्यं अदितेः पुत्रं चर्षणीधृतं मनुष्याणामुदकप्रदानेन धारकं सुमती शोभनबुध्या हेतुना चर्षणी

तन्नादृशं भर्गो धीमहि। किं तदित्यपेक्षायामाह यद्वा ते लिंगव्यत्ययः यः अस्माकं धियः प्रचोदयात्। न ध्यायामेति समन्वयः। यद्वा सविता सूर्यः धि
यः कर्माणि प्रचोदयात् प्रेरयत्विति। तस्य सवितुः सर्वस्य प्रसवितुः देवस्य द्योतमानस्य सूर्यस्य तत्सर्वैर्दृश्यमानतया प्रसिद्धं वरेण्यं सर्वैः सं
भजनीयं भर्गः पापानां तापकं तेजोमंडलं धीमहि धारयामः। तस्याधारभूता भवेमेत्यर्थः। भर्गः शब्दस्यान्नपरत्वे व्यथर्वणवेदाम्नाये संदोऽसि स
वितुर्वरेण्यं भर्गो देवस्य कवयोन्नमाहुः कर्माणि धियस्तदुते प्रब्रवामि प्रचोदयात्सविता याभिरेतीति। भर्गं अस्तु याके। असुन्। अस्तोरोप
धयोरमन्यतरस्यामिति। उपधयो लोपः यमागमः। न्यंक्वादिपाठात् कुत्वं। धीमहि ध्यायते। लिङि बहुलं छंदसीति संप्रसारणं व्यत्ययेना
६आ त्मनेपदं। यद्वा धीङ् धारे लिङि बहुलं छंदसीति विकरणस्य लुक्। प्रचोदयात्। चोदयते लेटि आडागमः। यद्वृत्तयोगादनिघातः। आगमस्या
नुदात्तत्वे णिच्स्वरः॥ ॥ इति तृतीयस्य चतुर्थे दशमो वर्गः॥ ॥ अथैकादशी॥ ॥ देवस्य सवितुर्वयं वाजयंतः पुरंध्या॥ भगस्य रातिमीमहे
॥ वाजयंतः वाजमन्नमात्मन इच्छंतो वयं देवस्य द्योतमानस्य सवितुः पुरंध्या तद्विषयस्तुत्या प्रज्ञया भगस्य भजनीयस्य रातिं दानं ईमहे त्वं
ईमहे याचामहे। मंत्रे वृषेत्यादिना क्तिन् उदात्तत्वं॥ ॥ अथ द्वादशी॥ ॥ देवं नरः सवितारं विप्रा यज्ञैः सुवृक्तिभिः॥ नमस्यंति धियेषिताः॥ ॥
॥ नरः कर्मणो नेतारो विप्रा मेधाविनो धियेषिताः धिया इषिताः कर्मणा बुध्या वा प्रेर्यमाणाः संतः सवितारं देवं त्वाय यज्ञैः यजनीयैर्हविर्भिः सुवृक्ति
भिः शोभनस्तोत्रैश्च नमस्यंति नमो वरिवश्चित्रङः क्यच् इति क्यच्। अग्नीषोमाय प्रणयने सोमो जिगातीत्याद्या सूत्रितं। सोमो जिगाति
गातुविद्देवानां नमस्य शतावरुणस्तमम्षिनेत्यर्धर्चं आरामेदिति॥ ॥ सैषा सूक्ते त्रयोदशी॥ ॥ सोमो जिगाति गातुविद्देवानामेति निष्कृतं॥ ॥ ऋ

ऋ·सं·भा·४

रीति। अवभृथेष्ट्यांस्विष्टकृदर्थे अग्नावरुणौयष्टव्यौतत्रत्वंन्नोअग्नइतियाज्यानुवाक्येसूचितेतथा अग्नावरुणौस्विष्टकृदर्थेत्वंनोअग्नेव
रुणस्यविद्वानिति॥ हूइति अस्मानोयद्यग्निहोत्रंजुहुयात्तस्यग्निवारुणीइष्टिःस्यात्तएवयाज्यानुवाक्येतदाकुर्यआहिताग्निरुपक्रम्या
म्नातंतरयथाज्यानुवाक्येत्वंन्नोअग्नेवरुणस्यविद्वान्सत्वंन्नोअग्नेवमोभवोतीति॥ सैषासूक्तेचतुर्थी॥ ॥ त्वंनोअग्नेवरुणस्यविद्वान्दे
वस्यहेळोवयासिसीष्ठाः॥ यजिष्ठोवह्नितमःशोशुचानोविश्वाद्वेषांसिप्रमुमुग्ध्यस्मत्॥ ॥ हेअग्नेविद्वान्सर्वपुरुषार्थधनोपायज्ञस्त्वंदे
वस्यद्योतमानस्यवरुणस्यहेळःक्रोधान्नोस्मत्संबंधिनःवरुणकर्तृकान्याज्ञाग्रहणान्नसिसीष्ठाः अपनय। यजिष्ठोयष्टृतमोवह्नितमो
हविषामतिशयेनवोढाशोशुचानोतिशयेनदीप्यमानस्त्वंविश्वासर्वाणिद्वेषांसिपापानिद्वेष्टृणिरक्षांसिवास्मदस्मत्तःप्रमुमुग्धिप्रकर्षेण
मोचय। हेळः। हेडृ अनादरे। क्विप्। शसिरूपं। शसःवुध्यादनुदात्तत्वेधातुस्वरः। यासिसीष्ठाः। यासाएयतादासीर्लिङ्। यासिसीष्ठाव्यु
डागमः। छंदस्युभयथेतिलिङःसार्वधातुकत्वाभिलोपाभावः। अवपूर्वयासिर्विनाशेववर्तते। मुग्धि। मुचतेर्लोटिरूपं। बहुलंछंदसीति
शपःश्लुः॥ ॥ अथपंचमी॥ ॥ सत्वंनोअग्नेवमोभवोतीनेदिष्ठोअस्याउषसोव्युष्टौ॥ अवयक्ष्वनोवरुणंरराणोवीहिमृळीकंसुहवोनए
धि॥ ॥ हेअग्नेऊतीऊत्यारक्षणेनोस्माकंअवमःअर्वाचीनःप्रत्यासन्नःसन्अस्याउषसोव्युष्टौसूछानूप्रातःकालेअग्निहोत्रादिकर्मसि
ध्यर्थंनेदिष्ठोभवअतिशयेनास्मदंतिकस्थोभव। यद्वाऊत्यागमनेनास्माकमवमोरक्षकोभव। किंचनोस्माकंवरुणंवरुणकृतंजलोदर
दिरोगंआवरकंपापंवाअवयक्ष्वअवनाशयविनाशयेत्यर्थः। रराणःअस्मद्दत्तेहविषिरममाणः। यद्वायजमानोभ्यात्त्येतत्फलप्रदस्त्वंमृळीकंमु

राम
१४७

खकरंइदंहविःव्रीहिभक्षय। किंचनोस्माकंसुहवःशोभनाह्वानोपेतःएधिभव। नेदिष्ठः। अंतिकशब्दादिष्ठनि अंतिकबाधयोर्नेदसाधा
विति नेदइत्यादेशः। निपादाद्युदात्तः। रराणः। रमतेःकानच्चिमकारलोपःछांदसः। यद्वारातेर्व्यत्ययेनकानच्। अभ्यस्तानामादिः। एधि। अ
स्तेर्ध्वसोरेद्धावभ्यासलोपश्चेतिइत्यादेशः। तस्यासिद्धत्वात्कुमलभ्योहेर्धिः। निघातः॥ ॥ इतितृतीयस्यचतुर्थेद्वादशोवर्गः॥ ॥ अथषष्ठी॥ ॥
अस्यश्रेष्ठासुभगस्यसंदृग्देवस्यचित्रतमामर्त्येषु। शुचिघृतंनतप्तमघ्न्यायाःस्पार्हादेवस्यमंहनेवधेनोः॥ ॥ सुभगस्यसुष्ठुभजनीयस्या
स्यश्रेष्ठोअतिशयेनप्रशस्यासंदृक्संदृष्टिर्मर्त्येषुचित्रतमा अतिशयेनचायनीयापूजनीयाभवंतिस्पार्हाःसर्वैःस्पृहणीयाभवति। तत्रदृष्टांतः।
यथादेवस्यक्षीरंकामयामानंपुरुषस्यअघ्न्यायाःअहंतव्यायागोःशुचितेजोयुक्तंघृतंक्षरणयुक्तंक्षीरंस्पृहणीयंभवतितत्रैवदृष्टांतोंतरं
यथागोभिक्षमाणस्यमर्त्यस्यधेनोःदोग्ध्र्यागोःमंहनेवमंहति। दानकर्मा। दानंयथाप्रियकरंभवति। सुभगस्य। आद्युदात्तं। द्व्यच्छंदसी
त्युत्तरपदाद्युदात्तत्वं। स्पार्हा। कृत्वतोव्यंभोतउदात्तः। देवस्यदीव्यतीतिदेवस्यदीव्यतेःक्वांत्यर्थस्यपचाद्यचिरूपं॥ ॥ अथसप्तमी॥ ॥ त्रिरस्यता
परमासंतिसत्यास्पार्हादेवस्यजनिमान्यग्नेः। अनंतेअंतःपरिवीतआगाच्छुचिःशुक्रोअर्योरोरुचानः॥ ॥ अग्नेरस्यभिमानिनोस्यदे
वस्यत्रिःत्रीणिअग्निवायुसूर्यात्मनात्रीणितानोनिप्रसिद्धानियपरमाउत्तमानिसत्यायथार्थभूतानिजनिमानिजन्मानिस्पार्हासर्वस्यस्
हणीयानिसंति। यद्वाग्नेरेवत्रीणिजन्मानिदिवस्परिप्रथमंजज्ञेअग्निरितित्रीणिजानापरिभूषंत्यस्येत्येवमादिषुमंत्रेषुप्रसिद्धानिअनं
तेअपर्यंतेनभस्यंतर्मध्येपरिवीतःशुचिःसर्वस्यशोधकःशुक्रोदीप्तियुक्तःअतएवरोरुचानःभृशंदीप्यमानःअर्यःस्वामीतादृशोदेवः।

आगात् । अस्मदीयं यज्ञं प्रत्यागच्छतु । सख्या । शेश्छंदसि बहुलमिति । शेर्लुक् । परिवीतः । व्येञ् संवरणे । कर्मणि क्तः । यजादित्वात् संप्रसारणं । गतिरनंत
व·सं·भा·४ र इति गतेः प्रकृतिस्वरत्वं । अर्य ऋ गतौ । अर्यः स्वामिवैश्ययोरिति प्रत्ययो निपातितः । स्वामिन्यंतोदात्तः । त्वं तत्स्व मित्यंतोदात्तत्वं ॥ अथाष्ट
मी ॥ स दूतो विश्वेदभि वष्टि सद्मा होता हिरण्यरथो रंसुजिह्वः ॥ रोहिदश्वो वपुष्यो विभावा सदा रण्वः पितुमतीव संसत् ॥ देवानां दूतः हो
ता देवानामाह्वाता हिरण्यरथः सुवर्णमयरथोपेतः रंसुजिह्वः रमणीयशोभन—पेतः सतां दृश्यो अग्निः विश्वेत् सर्वाण्येव सद्म सद्म यजतस्था
नानि अभिवष्टि कामयते पुनश्च कीदृशः रोहिदश्वः रोहितवर्णा अश्वा यस्य स तथोक्तः वपुष्यः वपुषि रूपे साधुः विभावा कांतियुक्तः अतर
ण्व एव रमणीयो भवति । तत्र दृष्टांतः । पितुमतीव संसत् यथान्नादिवस्तु समृद्धं गृहं रमणीयं तद्वत् । रंसुजिह्वः रमतेरन्येभ्योपि दृश्यत इति वि
च् । बहुव्रीहौ पूर्वपदस्वरः । वपुष्यः तत्र साधुरिति यत् । तित्स्वरितः । विभावा । छंदसीवनिपाविति वनिप् ॥ अथ नवमी ॥ स चेतयन्मनुषो
यज्ञबंधुः प्र तं मह्या रशनया नयंति ॥ स क्षेत्यस्य दुर्यासु साधन्देवो मर्तस्य सधनित्वमाप ॥ यज्ञबंधुः यज्ञे अग्निहोत्रादौ बंधनं विनियोजनं राम
यस्य स तथोक्तः सोग्निः मनुषः कर्मणि प्रवृत्तान्मनुष्यान् चेतयन् जानाति । मह्या महत्या रशनया स्तुतिरूपतया रज्ज्वा युक्तं तं तादृशं अ
ग्निं प्रणयंति । उत्तरवेद्यादिषु अध्वर्यवः प्रक्षिपंति । मर्तस्य मनुष्यस्यास्य यजमानस्य दुर्यासु गृहेषु साधन् अभीष्टानि साधयन् सोग्निः क्षे १४८
ति वसति । स देवो द्योतमानोग्निः सधनित्वं यस्य गृहे निवसति । तेन धनिना साहित्यमाप प्राप्नोति । प्रभूतधनयजमानाय प्रदाय पित्वा ते
तेन सहितो भवदित्यर्थः । साधन् राध साध संसिद्धौ । ण्यंतस्य शतरि रूपं ॥ अथ दशमी ॥ स तू नो अग्निर्नयतु प्रजानन्नच्छा रत्नं देवभक्तं य

धर्तं चर्षणिभिर्वहद्भिर्धृतं त्वं राजानं राजंतं एतादृशं वरुणं देवं देवान् देवनशीलान् देवानच्छाभि आ ववृत्स्व आवर्तय अभिमुखी कुरु । ववृत्स्व
वृतु वर्तने लोटि बहुलं छंदसीति विकरणस्य श्लुः । निघातः । सुमती । मंत्रे वृषेत्यादिना क्तिन् उदात्तः । सुपां सुलुगिति तृतीयायाः पूर्वसवर्णदीर्घः ।
एकादेशस्वरः । ज्येष्ठं प्रशस्यस्येष्ठनि ज्य च इति ज्यादेशः । नित्वादाद्युदात्तः । एकादेशस्वरः । यज्ञवनसं । वन षण संभक्तौ । कर्मकर्तरि वा असुन्प्रत्ययः ।
गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं चेति पूर्वपदस्वरः ॥ पंचम्यभिप्लवे उत्तरस्मिन्पटले सखे सखायमित्येषा । सूत्रितं च । सखे सखायमभ्या
ववृत्स्वोर्ध्व ऊ षु ण ऊतय इति ॥ सैषा सूक्ते तृतीया ॥ सखे सखायमभ्या ववृत्स्वाशुं न चक्रं रथ्येव रंह्यास्मभ्यं दस्म रंह्या ॥ अग्ने मृळीकं वरुणे
सचा विदो मरुत्सु विश्वभानुषु ॥ सखे सखिभूत हे अग्ने त्वं तव सखायं वरुणं अस्मभ्यं अस्मदर्थं आ ववृत्स्व अभिमुखी कुरु । तत्र दृष्टांतः । र
थ्या रंहणे गते साधुभूतौ रथ्ये योजितावश्वौ यथा आशुं शीघ्रगंतं चक्रं लक्ष्यदेशं प्रत्यभिमुखी कुरुतः तद्वत् । हे अग्ने सचा तव सहायं वरुणे
मृळीकं सुखतरं हविः । विदः लब्धवानसि । तथा विश्वभानुषु सर्वतो व्याप्ततेजस्केषु मरुत्सु सुखकरं लब्धवानसि । अग्निर्वारुणमग्निमरुतयोः क
र्मणो ऽदृष्टवानसीत्यर्थः । शुशुचान दीप्यमान हे अग्ने तोकाय तुज्यते पीड्यते माता गर्भवासेनेति तोकः पुत्रः । तस्मै तुजे गच्छत्यनेनात्मीयं
पितेति तुक् पौत्रः । तस्मै शं सुखं कुरु । दस्म दर्शनीय हे अग्ने अस्मभ्यं शं कृधि सुखं कुरु । रथ्येव रथस्येमावित्यर्थे रथाद्यदिति यत् । सुपां सु
लुगिति सुपो डादेशः । रंह्या रंहः शीघ्रं तत्र साधुरिति यत्प्रत्ययः । यतोनाव इत्याद्युदात्तत्वं ॥ त्वं नो अग्न इत्येतदारभ्य दं सूक्ते उत्तराणि सूक्ता
नि च प्रातरनुवाके आग्नेये क्रतौ त्रैष्टुभे छंदसि आश्विनशस्त्रे च विनियुक्तानि । सूत्रितं च । त्वं नो अग्ने वरुणस्य विद्वानित्येतत्प्रभृतीनि च त्वा

ऋ·सं·भा·४ नभसि चरति। सोग्निरधुना कमीयोग्यतया जायत। आयातपादस्या लोपो हस्त्यादिभ्य इत्यकारलोपः समायंत॥ गूहमानः गुहू संवरणे। अ
चिकरणी शानविरूपे। शानचोल सार्वधातुकस्वरे कृते प्रत्ययस्वरः। आयोयुवानः युमिश्रणे। यङ्लुकि शानचि रूपं। अभ्यस्तस्वरेणाद्युदा
त्तः॥ ॥ अथ द्वादशी॥ ॥ प्रशर्ध आर्त प्रथमं विपन्याँ ऋतस्य योना वृषभस्य नीळे॥ स्पार्हो युवा वपुष्यो विभावा सप्त प्रियासोऽजनयंत वृष्णे॥
॥ हे अग्ने विपन्या स्तुत्या युक्ते ऋतस्योदकस्य योनौ स्थाने वृषभस्य वर्षणसमर्थस्य मघस्य नीळे स्थाने कुलाय भूते नक्षे वैद्युताग्नि
रूपेण त्वां वर्तमानं शर्धस्तेजः प्रथमं आर्त प्रवर्षेल्गच्छति। पश्चादग्निः स्पार्हः सर्वैः स्पृहणीयः युवा नित्यतरुणः वपुष्यः कर्मदीपः विभावा
दीप्तिमान् तस्मै वृष्णे अभिमतफलवर्षकाय प्रियाः सप्त होत्रकाः अजनत स्तोत्रं कुर्वन्। आर्त ऋगतौ। लङि व्यत्ययेनात्मनेपदं निघातः।
विपन्या। पन चेत्यस्य इ प्रत्ययः। कृदिकारादक्तिन इति ङीप् प्रत्ययस्वरेणांतोदात्तः। उदात्तयणो हल्पूर्वादिति विभक्तेरुदात्तत्वं॥ विपन्या
ऋतस्येत्यत्र इकोसवर्णे शाकल्यस्य ह्रस्वश्चेति अनिकोपि ह्रस्वः। अनुनासिकश्च॥ ॥ अथ त्रयोदशी॥ ॥ अस्माकमत्र पितरो मनुष्या
अभि प्र सेदुर्ऋतमाशुषाणाः॥ अश्मव्रजाः सुदुघा वव्रे अंतरुदुस्रा आजन्नुषसो हुवानाः॥ ॥ अत्र लोके मनुष्याः अस्माकं पितरोऽं राम
गिरसः ऋतस्य यज्ञमाशुषाणा अश्नुवानाः। संतः अभि प्रसेदुः अग्निमभिलक्ष्य प्रजग्मुः। अंगिरसः अग्निपरिचर्याबलात् अश्मव्र १५१
जाः पर्वतैः परिवृता वव्रे वरणेनाच्छादयतीति वव्रं पर्वतबिलं तदंतर्वर्तिनि तमसि तस्मिन्नंतर्मध्ये स्थिताः सुदुघाः सुष्टु दोग्ध्रीः उस्राः पणिभि
रपहृता गाः उदाजन् तस्माद्बिलान्निरगमयन्। किं कुर्वतः। तमसो विध्वंसिनीरुषसो देवीः प्रकारार्थं हुवानाः आह्वयंतः वव्रे वृणोतेरौणा

दिकः कः। अश्मादीनां घे भवत इति द्विवचनं॥ ॥ अथ चतुर्दशी॥ ॥ ते मर्मृजत ददृवांसो अद्रिं तदेषामन्ये अभितो वि वोचन्॥ पश्वयंत्रासो अ
भि कारमर्चन्विदंत ज्योतिश्चकृपंत धीभिः॥ ॥ ते अंगिरसः अमन्यादिं पणिभिरपहृतानां गवां निरोधकं पर्वतं ददृवांसो विदारयंतः संतः मर्मृज
त अग्निं पर्यचरन्। एषामंगिरसां तत्तादृशं कर्म अन्ये महर्षयः अभितः सर्वत्र जगति वि वोचन् विशेषेण कथयन्। पश्वयंत्रासः पशूनां निर्गमनार्था
नि यंत्राणि उपाया येषां ते अंगिरसः कारं अभिमतस्य प्रयोजनस्य कर्तारं अग्निमभ्यर्चन् अस्तुवन्। ततस्तमोपहं आदित्याख्यं ज्योतिर्विदंत
लभंत। ततो धीभिः बुद्धिभिश्चकृपंत यज्ञान कुर्वन्। मर्मृजत। मृजू शुद्धौ। यङ्लुकि लङि व्यत्ययेनात्मनेपदं। निघातः। चकृपंत कृपू सा
मर्थ्ये एयंतस्य लुङि चङि सत्वाद्भावश्छांदसः॥ ॥ अथ पंचदशी॥ ॥ ते गव्यता मनसा दृध्रमुब्धं गा येमानं परि षंतमद्रिं॥ दृळ्हं नरो व
चसा दैव्येन व्रजं गोमंतमुशिजो वि वव्रुः॥ ॥ नरः कर्मणां नेतारः उशिजः अग्निं कामयमानाः ते अंगिरसः गव्यता गा इच्छता मनसा दृध्रं ग
वां निर्गमनद्वारनिरोधकं उब्धं समुब्धं संहितं यद्वा तुभिः पूरणार्थः गोभिः पूरितं गाः यमानं नियच्छंतं परिसर्वतः संतं वर्तमानं दृळ्हं दृढं गोम
तं गोभिर्युक्तं व्रजं गवां निवासस्थानं अद्रिं पर्वतं दैव्येन अग्निविषयेण वचसा वेदात्मकेन स्तोत्रेण वि ववुः गोनिर्गमनार्थं उद्घाटित
वंतः उब्धं। उभ पूरणे इति हिंसासमानार्थः। यद्वा उभयं उभयं पूरणे। कर्मणि क्तः। येमानं यमेः कानचि इट्यत्वाभ्यासलोपौ। चित्वादंतोदात्तः।
परिषंतमित्यत्र संहितायामुपसर्गात्प्रादुर्भ्यामिति च्यरइति षत्वं॥ ॥ इति तृतीयस्य चतुर्थे चतुर्दशो वर्गः॥ ॥ अथ षोडशी॥ ॥ ते मन्वत
प्रथमं नाम धेनोस्त्रिः सप्त मातुः परमाणि विंदन्॥ तज्जानतीरभ्यनूषत व्रा आविर्भुवदरुणीर्यशसा गोः॥ ॥ हे अग्ने ते स्तोत्रं कुर्वाणा अंगि

ऋ॰सं॰भा॰४

रसः मातुर्जनन्या धेनोर्वाचः संबंधिना मस्त्कानि साधकं शस्त्रमात्रं प्रथमं पूर्वं मत्वत अज्ञानन पश्चात्तस्या वाचः ॥ संबंधिनि त्रिः सप्त एकविंशति
संख्याकनि स्तुतिसाधनानि छंदांसि तानि वेणा पश्चादीनि जगत्यंतानि विदन् अलभंत । एवंविध छंदांसि युक्तं मे त्रेरग्निमस्तु वन्नित्यर्थः । त
त्वतः जानतीः सर्वं जानाना प्राः आ इत्युपेलामउषसः अभ्यनूषत अस्तुवन् । अनंतरं गोः सूर्यस्य यशसा तेजसा सह अरुणीः अरुणवर्णा
षाः आविर्भुवत् आविरभूत् । यद्वा तेगिरसा प्रथमं पुरा नूतनं नाम एहि सुरभि गुग्गुलु गंधिनीति धेनोर्नामधेयं मत्वतो ज्ञारयामासुः मातु
र्भूम्याः स्वभूतानि पाणिभिः पदानि त्रिः सप्त त्रा अविंदन् । ऊचुरितं नाम जानं त्या गावो अभ्यनूषत सूहं भारवल्लक्षणं शब्दमकुर्वन्न् इदानीं
मुषाः आदुरभूदिति । जानती ॥ शतुरनुमो नद्य आदीदिति ङीपुदात्तत्वं । अनूषत । णु स्तुतौ । लुङि रूपं । कुटादित्वाद्गुणः । अरुणीः सो
रमापश्छांदसो गोरादि र्मिमायेति ॥ ॥ अथ सप्तदशी ॥ ॥ नेशत्तमो दुधितं रोचत द्यौरुद्देव्या उषसो भानुरर्त ॥ आ सूर्यो बृहतस्तिष्ठदज्रां ऋ
जु मर्त्तेषु वृजिना च पश्यन् ॥ ॥ ततः रात्रिकृतं ध्वांतं दुधि प्रेरणकर्म प्रातरग्निविरहणकाले उषसा प्रेरितं सत् नेशत् अनश्यत् । नद्यौरंत
रिक्षं रोचत अदीप्यत ततो दधादेवनशीलाया उषसो भानुः प्रभा उदार्त उदगच्छति । अथ सूर्यः बृहतो महतः अज्ञान् जरान् पर्वतान् गमन
शीलान् अश्मीत्या आतिष्ठदध्यतिष्ठत् । किं कुर्वन् मर्त्येषु मनुष्येषु विद्यमानम् ऋजु सत्कर्म वृजिना वृजिनानि असत्कर्माणि च पश्यन् । अध्य
तिष्ठदिति शेषः । नेशत् । णश अदर्शने लुङि लृदित्वादङ् । मन्योर् लिङि ... वक्तव्यमिति त्वं । शपः पित्वादनुदात्तत्वे धातुस्वरः । रोचत । रोचदी
प्तौ । लङि रूपं । वाक्यभेदादनिघातः ॥ ॥ अथाष्टादशी ॥ ॥ आदित्पश्चा बुबुधाना व्यख्यन्नादिद्रत्नं धारयंत द्युभक्तं ॥ विश्वे विश्वासु दुर्या राम १५०

दस्य ॥ धियाय द्विश्वे अमृता अकृण्वन् द्यौष्पिता जनिता सत्यमुक्षन् ॥ ॥ प्रजानन् सर्वं जानानः सोग्निः देवभक्तं देवैर्देवनशीलैः स्तोतृभिः
संभजनीयं अस्याग्नेः संबंधि यद्दुत्तमं धनमस्ति तद्रत्नं अक्षाभिमुख्येन पुक्षिप्रं नोस्मात्त्रय त्तुप्रापय । अमृता मरणधर्मरहिता श्व वि
श्वे सर्वे देवा धिया हविर्लक्षणेन कर्मणा हेतुना यत् यमग्निं अकृण्वन् हविषां प्रापयितारमकुर्वन् । यस्य चाग्नेः द्यौः पिता पालयित्री जनि
ता जनयित्री च अग्ने दिवः सूनुरसि प्रचेता इति श्रवणात् । यद्वा द्यौः देवनशीलः आदित्यः पिता जनयिता च आदित्यादग्रेराम्नानात्
सत्यं यथार्थभूतं तमग्निमुक्षन् घृताद्याहुतिभिरध्वर्यादयः सिंचंति । देवभक्तं । भज सेवायां । कर्मणि क्तः । तृतीया कर्मणीति पूर्वपदप्र
कृतिस्वरः । उक्षन् उक्ष सेचने । लुङि रूपं । बहुलं छंदसीत्या भावः ॥ ॥ इति तृतीयस्य चतुर्थे त्रयोदशो वर्गः ॥ ॥ स जायत प्रथमः पस्त्या
सु महो बुध्ने रजसो अस्य योनौ ॥ अपादशीर्षा गुहमानो अंता योयुवानो वृषभस्य नीळे ॥ ॥ सोग्निः प्रथम आहवनीयरूपतया श्रेष्ठः
सन् पस्त्यासु यजमानानां गृहे अजायत । आ कृत्य धिकारणतया संपद्यते । अथ महो महतो रजसो अंतरिक्षस्य बुध्ने मूलं पृथिव्यां
तत्रापि योनौ उत्तरवेदिस्थाने संपद्यते । सोग्निः अपात् पादवर्जितः । तदेवाह अंता आद्यंतपाद शिरसी गुहमानः गूहमानः । अविज्ञेय
पादशिरा इत्यर्थः । वृषभस्य वर्षणसमर्थस्याम्घस्य नीळे नलयेन भसि आयोयुवानः धूमकारेण तमानमायोयजन्चेर्तेत । यद्वायं प्र
थमो वैद्युताग्निः पस्त्यासु मरीषु बुध्ने अंतरिक्षे महो महतो रजस उदकस्य तेजसो वायोर्नो स्थाने च चरति । अपादशीर्षा पादशिरो वर्जि
- अंता आत्मनः पर्यंतप्रदेशान् स्वतेजसा गुहमान आच्छादयन् पुनः आयोयुवानः नितेजांसि त्वा तानि मिश्री कुर्वन् वृषभस्य नीळे स्थाने

सुदेवा मित्र धिये वरुण सत्यमस्तु ॥ ॥ आदित्सूर्योदनंतरं बुबुधानाः पणिभिरपहृता निरोधान्निर्गता गाः जानानाः अंगिरसः पश्चात्पृथग्दे
शेषु व्यख्यान् अशेषेण ता गा अपवृण्वन् तथा आदिदनंतरं द्युभक्तं दीप्तियुक्तं देवैः संभक्तं वा रत्नं पणिरपहृतं धनं च धारयंत धारयन्तु लब्ध
गोधना नाम अंगिरसां विश्वासु दुर्यासु सर्वेषु गृहेषु विश्वे यजनीयाः सर्वे देवा आजग्मुः हे मित्र मित्रभूत हे वरुण उपद्रवाणां वारक हे अग्ने
धिये कर्मणां कर्त्रे स्तोत्रे च यजमानाय सत्यमस्तु । यदेतन्न वा उपद्रववारणसामर्थ्यं तद्यथार्थभूतमस्तु । पश्वा पश्वा वष्ठं दसीति निपातितः
बुबुधानाः बुधेर्लिटि कानच् विरूपं । नित्वादंतोदात्तः । द्युभक्तं । भज सेवायां । कर्मणि क्तः । तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरः ॥ ॥ अथै
कोनविंशी ॥ ॥ अच्छा वोचेय शुशुचानमग्निं होतारं विश्वभरसं यजिष्ठं । शुच्यूधो अतृणन्न गवामंधो न पूतं परिषिक्तमंशोः ॥१॥ हे अग्ने
शुशुचानं भृशं दीप्यमानं । होतारं देवानामाह्वातारं विश्वभरसं आहुतिद्वारा वृष्टिप्रदानेन विश्वस्य पोषकं यजिष्ठं यष्टृतमं अग्निं त्वा अ
अभिलक्ष्य वोचेय स्तवानि गवामूधः शुचिं शुधयंतः नातृणत् तृणा वा बाहुल्यपर्ये यजमानो न दोग्धि अंशोः सोमलताखंडस्य संबंधि
अंधो रसात्मकमन्नं पूतं दशापवित्रेण शोधितं सवनपरिषिक्तं गृहेषु न प्रक्षिप्तं किं तेन यजमानेन केवलं स्तुतिरेव न क्रियते । वोचेय ।
ब्रूञ आशीर्लिङि ब्रुवो वचिः लिङ्याशिष्यङ् छंदस्युभयथेति सार्वधातुकत्वात् सुट् सलोपः । अतृणत् । उतृदिर् हिंसानादरयोः
दोहनमेव अंधो हिंसनं परिषिक्तं सिंचतेः कर्मणि क्तः । उपसर्गात्सुनोतीति संहितायां षत्वं । गतिरनंतर इति गतेः स्वरः ॥ ॥ अथ विंशी ॥
॥ विश्वेषामदितिर्यज्ञियानां विश्वेषामतिथिर्मानुषाणां ॥ अग्निर्देवानामव आवृणानः सुमृळीको भवतु जातवेदाः ॥२॥ ॥ अयमग्निर्विश्वे

ऋ॰सं॰भा॰४

षां सर्वेषां यज्ञियानां यज्ञार्हाणां देवानामदितिः अदितिर्देवमाता तद्वद्देवानां पोषक इत्यर्थः। यद्वा विश्वेषां देवानामदितिः भूस्थानीयः
आधारभूत इति यावत्। अयं वा अग्निर्वैश्वानर इति श्रुतेः। तथायमग्निर्विश्वेषां मानुषाणामतिथिः अतिथिवत्पूज्यो भवति देवानां देवन
शीलानां स्तोतृणामवो रक्षं हविरावृणानः संभजन् जातवेदाः जातं सर्वं वेत्तीति जातवेदाः सोग्निरेषां स्तोतृणां सुमृळीकः सुखकरो भ
वतु। अतिथिः अतसातत्यगमने सतन्योजीत्यादिना अतन्प्रत्ययः। नित्वादाद्युदात्तः। मानुषाणां। मनोरपत्यानीत्यर्थे मनोर्जाताव
ञ्यतौ षुक् चेति अञ्प्रत्ययः। ञित्वादाद्युदात्तः॥ ॥ इति तृतीयस्य चतुर्थे पंचदशो वर्गः॥ ॥ योमर्त्येष्विति विंशत्यृचं द्वितीयं सूक्तं वामदेव
स्यार्षं त्रैष्टुभमाग्नेयं योमर्त्येष्वित्यनुक्रमणिका। अस्य सूक्तस्य प्रातरनुवाकाश्विनशस्त्रयोः पूर्वसूक्त एव विनियोगयुक्तः॥ तत्र प्र
थमा॥ ॥ योमर्त्येष्वमृत ऋतावा देवो देवेष्वरतिर्निधायि॥ होता यजिष्ठो मह्ना शुचध्यै हव्यैरग्निर्मनुष ईरयध्यै॥ ॥ अमृतः मरण
धर्मरहितो योग्निः मर्त्येषु मनुष्येषु ऋतावा सत्यवान् निधायि निहितः यद्वा मर्त्येषु मनुष्यसंबंधिषु वागादींद्रियेषु निहितः वाग्भू
त्वा मुखं प्राविशदिति श्रुतेः। देवो देवशीलो योग्निः इंद्रादिषु देवेषु अरतिरभिगंता शत्रूणां। यद्वा देवलोके गंता निधायि निहितः सर्वहो
ता देवानामाह्वाता यजिष्ठो यष्टृतमोग्निः मह्ना स्वकीयेन महता तेजसा शुचध्यै दीपितुं उत्तरवेद्यां निहितः किंच हव्यैर्हवनीयैरा
ज्यपुरोडाशादिभिर्हेतुभिर्मनुषो मनुष्यस्य यजमानस्य ईरयध्यै स्वर्गं प्रति प्रेरणाय निहितः। अरतिः। ऋ गतौ। वहिवस्यर्तिभ्यश्चित् इति
अतिप्रत्ययः। चित्वादंतोदात्तः। निधायि दधातेः कर्मणि लुङि रूपं। परादिश्छंदसीत्युत्तरपदाद्युदात्तत्वं। शुचध्यै। शुच दीप्तौ। तुमर्थे ध्ये

राम
१५२

न्यतिरवीतिकर्मणि नसः। सुपां सुलुगिति पंचम्या आकारः। युजानः। युजिर्योगे। युजि बुधि दृशः क्सिश्चेति। आनच्प्रत्ययः। चित्वादंतोदात्तः।
 ॥ अथ चतुर्थी ॥ ॥ अर्यमणं वरुणं मित्रमेषामिंद्राविष्णू मरुतो अश्विनोत। स्वश्वो अग्ने सुरथः सुराधा एदु वह सुहविषे जनाय ॥ ॥ हे अ
ग्ने स्वश्वो शोभनाश्वोपेतः सुरथः सुराधाः शोभनधनोपेतः त्वं एषां मर्त्यानां मध्ये सुहविषे शोभनहविष्काय यजमानाय। अर्यमादीन् नो
चयक्ष्यमाण आवाह। इदु। इंद्राविष्णू। ऋत्वो इत्यादिनिपातनादिङ् शब्दः। अश्विनोत। युवादानः। देवताद्वंद्वे चेत्युभयपदप्रकृतिस्वरत्वं। सुहवि
षे इत्यत्र नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं ॥ ॥ अथ पंचमी ॥ ॥ गोमाँ अग्नेविमाँ अश्वी यज्ञो नृवत्सखा सदमिदप्रमृष्यः। इळावाँ एषो अ
सुर प्रजावान्दीर्घो रयिः पृथुबुध्नः सभावान् ॥ ॥ हे असुर बलवन् हे अग्ने मदीयो यं यज्ञः गोमान् गोभिस्तद्वान् अविमान् अवयोस्त्या
स्तीत्यास्तद्वान्। अश्वी। अश्वोपेतश्चास्त्वान् नृवत्सखा नरः कर्मणां नेतारो यथा दिव्यस्तद्वत् सखायो अनुष्ठातारो यजमानाय स्य सततोक्तः।
सदमित्सर्वदैव अप्रमृष्यः अप्रधृष्यश्चास्तु तथा इळावान् इळा इति अन्ननाम अन्नंतद्वान् प्रजावान् पुत्रपौत्रादियुक्तश्चास्तु दीर्घः। अविच्छि
न्नानुष्ठानोपेतः रयिर्धनवान् लुप्तमत्वर्थीयः। पृथुबुध्नः पृथूनि बहुलानि बुध्नानि धनादीनि रणानि यस्य स तथोक्तः। सभावानु
पद्रष्टृरूपसभायुक्तश्चास्तु। नृवत्सखा। नरो येषां संतीति नृवत्। मतुप्। तसौ मत्वर्थे इति भत्वं। ह्रस्वनुड्भ्यां मतुबिति मतुपः उदात्तत्वं। बहुव्रीहौ
पूर्वपदस्वरः ॥ ॥ इति तृतीयस्य चतुर्थे षोडशो वर्गः ॥ ॥ अथ षष्ठी ॥ ॥ यस्त इध्मं जभरत्सिष्विदानो मूर्धानं वा ततपते त्वाया। भुवस्तस्य
स्वतवाँ पायुरग्ने विश्वस्मात्सीमघायत उरुष्य ॥ ॥ हे अग्ने त्वदर्थं यः पुमान् सिष्विदानः स्विन्नदानः स्वद्यमानगात्रः सन् इध्मं त्वत्समिध

नार्थं काष्ठभारं जभरत् आहरति। यो वा त्वाया त्वत्कामनया मूर्धानं मस्तकं ततपते काष्ठभारेण तापयति तस्य तादृशस्य पुंसः स्वतवान् धनवि
त्ताख्यकारकेण धनवान् भुवः भव सि पालयितासि। सीं एनं विश्वस्मात् अघायतः अघं पापं इच्छतः पुरुषात् उरुष्य रक्ष। जभरत्। हर
तेर्लुङि चङि रूपं। चङ्यन्यतरस्यामिति चङः पूर्वस्योदात्तत्वं। सिष्विदानः। ष्विदा गात्रप्रक्षरणे। कानचि रूपं। संहितायामादेशप्रत्यययोरि
ति धातुकारस्य षत्वं। त्वाया। त्वामात्मन इच्छतीत्यर्थे क्यच्। प्रत्ययोत्तरपदयोश्चेति मपर्यंतस्य त्वादेशः। दकारस्य छांदसमाद्यं। क्यजं
ताद्भावे अप्रत्ययादित्यकारप्रत्ययः। सुपां सुलुगिति तृतीया आकारः। एकादेशस्वरः। भुव। भवतेर्लेट्यडागमे रूपं। भूसुवोस्तिङीति
गुणप्रतिषेधः। आगमस्यानुदात्तत्वे स्वरः। स्वतवान्पायुरित्यत्र संहितायां स्वतवान्पायाविति नकारस्य रुत्वं। अत्रानुनासिकः पूर्वस्य
तु वेति सकारोनुनासिकः पूर्वस्य तु वेति आकारोनुनासिकः। रेफस्य विसर्जनीयः। कुप्वोः क्ष्पौ चेति ष्व इत्यादेशः। अघायतः अघमात्म
न इच्छतीत्यर्थे सुपः आत्मनः क्यच्। अश्वाघस्यादित्यात्वं। तदंतात् छंदसि शतृप्रत्ययः। शतुरनुम इति विभक्तेरुदात्तत्वं। उरुष्य। उरुस शब्दः कण्ड्वादिर्लो
टि रूपं। निघातः ॥ ॥ अथ सप्तमी ॥ ॥ यस्ते भरादन्नियते चिदन्नं निशिषन्मंद्रमतिथिमुदीरत्। आ देवयुरिनधते दुरोणे तस्मिन्रयिर्ध्रुवो
अस्तु दास्वान् ॥ ॥ हे अग्ने यः पुमान् अन्नियते ते तुभ्यं हविर्लक्षणं पुरोडाशादिकं भरात्। दानु बिभ्रिया। ता विदितिवार्थयश्च मंद्रं मद
करं सोमं निशिषत् नितरां प्रयच्छति यश्च अतिथिं अतिथिवत्पूज्यं त्वां उदीरत उत्तरवेद्यां प्रणयति। आ अपि च यश्च देवयुः देवत्वं काम
यमानः दुरोणे स्वकीये गृहे इनधते त्वां समिद्भिः समिंधते। तस्मिन्नेतस्मिन्पुरुषे पुत्रः ध्रुवः अस्ति क्व लुब्ध्या वैदिके मार्गे निश्चलोस्तु। तथा

ऋ॰ सं॰ भा॰ ४ श्चानऋदीर्घोपेतआस्य भरात् । डुभृञ् धारणपोषणयोरित्यस्य लेट्याडागमे रूपं । यद्वृत्तयोगादनिघातः । अभ्रियते अन्नमात्मनमिछेन
स्य वस्य चीत्वं । ऊस्वश्छांदसः । निशिशत् । शासु अनुशिष्टौ । लुङि सर्तिशास्त्यर्तिभ्यश्चेति च्लेरङादेशः । शास इदङ्हलोरितीत्वं । उदीरत् । ई
रगतौ । लेटि व्यत्ययेन परस्मैपदं । अडागमः । आगमस्यानुदात्तत्वे धातुस्वरः । तिङ्ङतिङ इति निघातः । इन्धते । ञिइन्धी दीप्तौ । ले
टि व्यत्ययेन शप् । रुधादित्वात् श्नम् । श्नान्नलोप इति धातुनकारलोपः । क्ङित्परत्वाभावात् । श्नसोरल्लोपः प्राप्त्यभावः । यद्वृत्तयोगादनिघा
तः । श्रमः स्वारदाश्वान् । दासृ दाने । संपदादिलक्षणो भावे क्विप् । तदस्यास्तीति मतुप् । मादुपधाया इति वत्वं । प्रत्ययस्य पित्त्वादनुदात्तत्वे धा
तुस्वरः ॥ ॥ अथाष्टमी ॥ ॥ यस्त्वा दोषा य उषसि प्रशंसात्प्रियं वा त्वा कृणवते हविष्मान् । अश्वो न स्वे दम आ हेम्यावान् तमंहसः पीपरो दाश्वां
सं ॥ हे अग्ने यः पुमान् दोषा दोषायां रात्रौ त्वां प्रशंसात् संस्तुयात् य उषसि प्रातःकाले त्वां प्रशंसेत् । हविष्मान् संभृतहविष्को यो
वा यजमानः त्वा त्वां प्रियं हविर्भिः प्रीतं कृणवते कुर्वीत । आ अथ दाश्वांसं हविर्दत्तवन्तं यजमानं स्वे दमे स्वकीये गृहे हेम्यावान् सुवर्णनिर्मि
तकक्ष्यावान् अश्वो न अश्व इव संचरत्वं अंहसः पापरूपाद्दारिद्र्यात् पीपरः पारं नयते स्मै यजमानाय बहुधनं प्रयच्छेत्यर्थः । दोषा । सप्तम्या राम
आकारः । प्रशंसात् । शंसु स्तुतौ । लेट्याडागमे रूपं । कृणवते । कृवि हिंसाकरणयोरित्यस्य लेटि धिन्विकृण्व्योरच्चेत्यु प्रत्ययः । लेटो १५२
ऽडाटावित्यडागमः । यद्वृत्तयोगादनिघातः ॥ ॥ अथ नवमी ॥ ॥ यस्तुभ्यमग्ने अमृताय दाशद्दुवस्त्वे कृणवते यतस्रुक् । न स राया शशमानो
वि योषन्नैनमंहः परि वरदघायोः ॥ ॥ हे अग्ने यो यजमानः अमृताय मरणधर्मरहिताय तुभ्यं दाशत् हवींषि प्रयच्छेत् । यतस्रुक् यतस्र

प्रत्ययः । कित्त्वाद्गुणः । प्रत्ययस्वरः । ईरयध्यै । ईरयते । तुमर्थे शध्यै प्रत्ययः । शित्त्वेन सार्वधातुकत्वाण्णिलोपाभावः ॥ ॥ अथ द्वितीया ॥ ॥ इह
त्वं सूनो सहसो नो अद्य जातो जाताँ उभयाँ अन्तरग्ने । दूत ईयसे युयुजान ऋष्व ऋजुमुष्कान्वृषणः शुक्रांश्च ॥ हे सहसः सूनो बलस्य
पुत्राग्ने अद्यास्मिन्दिवसे नो अस्माकं इह कर्मणि जातः आधानेपवमानेष्टिभिः संस्कृतः त्वं जातान् उत्पन्नान् उभयान् देवमनुष्यान् अन्तः तेषां
मध्ये दूतः हवींषि देवान् आपयितुं ईयसे गच्छसि । किं कुर्वन् हे ऋष्व दर्शनीय ऋजुमुष्कान् मुष्कशब्देन मांसलो भिधीयते । ऋजवः प्रसा
धकाः ऋजवश्च ते मुष्काश्चेति ऋजुमुष्काः तान् वृषणः सेचनसमर्थान् शुक्रादीन् दीप्यमानान् अश्वान् युयुजानः स्वरथे योजयन्नीयसे ।
यद्वा ऋष्व महन्नग्ने युयुजानः हविर्वहनेति । युज्यमानस्त्वं वृषणः हविः सेचनसमर्थ यजमानान् दीप्तान् देवांश्च ईयसे । सूनो सहसः
परमपि छंदसीति सहसः पराङ्गवद्भावात् । द्वयोः सर्वानुदात्तत्वं । ईयसे । ईङ् गतौ । दिवादिः । निघातः । युयुजानः । युजेर्वर्तमाने लिटि का
नचि रूपं । ऋष्व । संहितायामृत्यक इति प्रकृतिभावः । ऋजुमुष्कान् समासस्वरः ॥ ॥ अथ तृतीया ॥ ॥ अत्या वृधस्नू रोहिता घृतस्नू ऋत
स्य मन्ये मनसा जविष्ठा । अन्तरीयसे अरुषा युजानो युष्मांश्च देवान्विश आ च मर्तान् ॥ ॥ हे अग्ने ऋतस्य भूतस्य नवे संबंधिनो मनसो
ऽपि जविष्ठा वेगवत्तमो वृधस्नू वर्धयन्तीति वधमन्नं तत्स्राविणौ घृतस्नू घृतमुदकं तत्स्रवंतौ रोहितौ रोहितवर्णौ अत्या अश्वो मन्ये स्तोमि । अ
रुषा आरोचमानौ तावश्वौ युजानो रथे युञ्जानस्त्वं युष्मान् देवेष्वग्रे अन्तर्भवितुं जनीयरूपेण कीर्तनं युष्मान् यष्टव्यान् देवान् विशः परिचा
रकान् मर्त्यान् मनुष्यान् च तः षष्ठ्यर्थे द्वितीया । तेषां मध्ये आ समन्तात् दीप्यसे हविः स्वीकर्तुं यजमानान् गच्छसि । सविः प्रदातुं देवान् गच्छति । मन्ये म

यजमानः। त्वे त्वयि दुवः परिचर्यां कृणवत् करोति। आशमानः स्तोत्रं कुर्वाणः स यजमानः रायो धनेन वियोषत् न पृथग् भवेत्। सदा धनयु
क्तो भवेदित्यर्थः। अघायोः पापमिच्छतो हिंसकस्य संबंधि। अंहः। आहननं एनं यजमानं न परिवरत् न परिवृणुयात्। न स्पृशेदित्य
र्थः। दाशत्। दाशृ दाने। लेटि अडागमे रूपं। सुपां सुलुगिति सप्तम्याः शे इत्यादेशः। कृणवते। यद्वृत्तयोगादनिघातः। योषत्। युमिश्रणे
लेटि सिब्बहुलमिति सिप्। अडागमः। निघातः। वरत्। वृञ् वरणे। लेटि रूपं।।। अथ दशमी।।। यस्य त्वमग्ने अध्वरं जुजोषो देवो मर्त
स्य सुधितं रराणः।। प्रीतेदसद्धोत्रा सा यविष्ठासाम यस्य विधतो वृधासः।।। हे अग्ने रराणो देवो दीप्यमानस्त्वं यस्य मर्त्यस्य मनुष्य
स्य संबंधि सुधितं त्वदर्थं सुष्ठु निहितं अध्वरमनुपहतं हविर्लक्षणमन्नं जुजोषः सेवसे। हे यविष्ठ युवतम सहोत्रा स होता यजमानः प्री
तेदसत् प्रीत एव भवेत्। असाम यस्य यजमानस्य संबंधिनो भवेम। यस्य विधतः अग्निं परिचर्यां कुर्वतो यजमानस्य होत्रादयो वृधासः
यज्ञस्य वर्धयितारो भवंति। जुजोषः जुषी प्रीतिसेवनयोः। रस्य बहुलं छंदसीति श्लुः। अडागमः। अभ्यस्तस्वरः। सुधितं। दधातेर्निष्ठा
यां सुधितवसुधितेति निपातनात् ध्यादेशः। गतिरनंतर इति गतेः स्वरः। असाम। अस्तेर्लोटि आडुत्तमस्य पिच्चेत्याडागमः। उत्तमस्य
पिद्वद्भावादनुदात्तत्वे धातुस्वरः। विधतः। विध विधाने। तुदादिः। शतुरनुम इति विभक्तेरुदात्तत्वं।।। इति तृतीयस्य चतुर्थे सप्तदशो व
र्गः।।। अथैकादशी।।। चित्तिमचित्तिं चिनवद्वि विद्वान्पृष्ठेव वीता वृजिना च मर्तान्।। राये च नः स्वपत्याय देव दितिं च रास्वादितिमुरु
ष्य।।। विद्वान् प्राणिनो पुण्यपापरूपाणि कर्माणि जानानः सोऽग्निः चित्तिं ज्ञातव्यं पुण्यं अचित्तिमनुपादेयत्वेन तनीयं पापं। यद्वा चित्त

ऋ॰सं॰भा॰४

ज्ञानमज्ञानं विविनक्तु विचिनोतु पृथक्करोतु। तत्र दृष्टान्तः। पृष्ठेव यथाश्वपालोऽश्वानां वीतानां तानि वृजिना दुर्वहाणि वपृष्ठा पृष्ठानि निश्चयो
पदितयत्वेन पृथक्करोतीति तद्वत्। किंच मर्त्तान्मनुष्यान्कृतपुण्यकृतश्च मनुष्यान्पृथक्करोतु। हे देवाग्ने स्वपत्याय शोभनपुत्रोपेताय राये ध
नाय नोऽस्मान्कुरु। दितिं दातारं रास्व देहि। अदितिं पंचम्यर्थे द्वितीया अदातुः सकाशादुरुष्य रक्ष। रा दाने। लेटि व्यत्ययेनात्मनेपदं। च
वायोगे प्रथमेति न निघातः॥ ॥अथ द्वादशी॥ ॥कविं शशासुः कवयो दब्धा निधारयंतो दुर्यास्वायोः। अतस्त्वं दृश्याँ अग्न एतान्प
ड्भिः पश्येरद्भुताँ अर्य एवैः॥ ॥हे अग्ने आयोर्मनुष्यस्य दुर्यासु गृहेषु अदब्धाः केनाप्यतिरस्कृताः निधारयंतः। निवसंतः कवयः
क्रान्तदर्शो देवाः कविं मेधाविनं त्वा शशासुः होता भवेति शशासुः। अतः कारणात् अर्य यज्ञस्य स्वामी त्वं दृश्यान्दर्शनायाद्भुतानाश्च
र्यरूपोपेतानिज्यादानेतान्देवानेवैर्गमनशीलैः पड्भिः पादैः स्वतेजोभिः पश्येः जानीयाः। दृश्यन्। दृशिर् प्रेक्षणे। ऋदुपधाच्चाक्लृपिचृ
तेरिति कर्मणि क्यप्। कित्वाद्गुणः। नित्त्वादनुदात्तत्वे धातुस्वरः॥ ॥अथ त्रयोदशी॥ ॥त्वमग्ने वाघते सुप्रणीतिः सुतसोमाय विधते य राम
विष्ठ॥ रत्नं भर शशमानाय घृष्वे पृथु श्चन्द्रमवसे चर्षणिप्राः॥ १५४

ऽजनी प्रादुर्भावे। लिङि झल्जनोर्जैतिजादेशः। वेधसः॥ डुधाञ् धारणपोषणयोरित्यस्माद् द्धिधात्रोर्वेधवेधवेत्यसि प्रत्ययः॥ धातोर्वेधइत्या
ऋ॰सं॰भा॰४ देशः॥ दिवश्चुचाइत्यत्र संहितायां षष्ठ्याः॥ पतिपुत्रेति विसर्जनीयस्य रुत्वं। रुजेमा। रुच्येजोभंगो। अदादिः लिङि रूपं॥ इति तृतीयस्य चतु
र्थः स्यादशीव र्गः॥ ॥अथ षोडशी॥ ॥अधा यथा नः पितरः परासः प्रत्नासो अग्न ऋतमाशुषाणाः॥ शुचीदयं दीधितिमुक्थशासः क्षा
माभिंदंतो अरुणीरप व्रन्॥ ॥हे अग्ने अधापि च परासः श्रेष्ठाः प्रत्नासः पुराणाः ऋतं सत्यभूतं यज्ञं यथा यथावदाशुषाणाः अश्नुवाना
नोस्माकं पितरोंगिरसः शुचीत् दीप्तं स्थानमयन् अगच्छन् तथा दीधितिं तेजश्चागच्छन् किंच उक्थशासः उक्थानां शास्त्राणां शंसितारः क्षा
मक्षयकारणं तमः पापं वा भिंदंतो विनाशयंतोंगिरसः अरुणीः अरुणवर्णाः पणिभिरपहृता गाः उषसो गो अपव्रन्। अपवृण्वन्। प्रका
शितवंत इत्यर्थः। अपव्रन् इणगतौ। लङि इणो यणिति यण् व्यत्ययेन अडागमः। दीधिति दीधीङ् दीप्तिदेवनयोरित्यस्मात् क्तिनि ह्रस्व
श्छांदसः। नित्वादाद्युदात्तः। उक्थशासः उक्थशब्द उपपदे शंसु स्तुतावित्यस्मात् मंत्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन्निति ण्विन्। नकार
लोपश्च निपातनादेव पदकाले ह्रस्वः छांदसः। अरुणीः गौरादि ङीष्। एकादेशस्वरः। व्रन् वृणोतेर्लुङि मंत्रे घसेत्यादिना च्लेर्लुक् अनि
घातः॥ आग्नयणे आग्नेइस्य हविषः सुकर्माण इति याज्यास्तिस्रो वा सुकर्माणः सुरुचो देवयंतो विश्वेदेवाः स आगतेति॥ ॥सेषा सूक्ते
सप्तदशी॥ ॥सुकर्माणः सुरुचो देवयंतो यो न देवा जनिमा धमंतः॥ शुचंतो अग्निं ववृधंत इंद्रमूर्वं गव्यं परिषदंतो अग्मन्॥ ॥सुकर्माणः राम ९५५
सुष्ठु नुष्ठितयागादिकर्माणः सुरुचः शोभनदीप्तयः देवयंतो देवान् कामयमानाः देवा देवनशीलाः स्तोतारः जनिम स्वकीयं मानुषं जनि

मा धमंतः यागादिलक्षणेन कर्मणा निर्मलीकुर्वंतः। तत्र दृष्टांतः। अयो न यथा कर्माराः अयो भस्त्रेण धमंति तद्वत् तादृशा अग्निं शुचयंतो ह
विर्भिः दीपयंत इंद्रं च वृधंतः वृधु वर्धने। व्यत्ययेन परस्मैपदं। शपः श्लुः। गव्यं समूहम् इत्यर्थं खलगोरथादिति यः। अग्मन्। लुङि च्लेर्लुकि
रूपं॥ ॥अथाष्टादशी॥ ॥आ यूथेव क्षुमति पश्वो अख्यद्देवानां यज्जनिमांत्युग्र॥ मर्तानां चिदुर्वशीरकृप्रन्वृधे चिदर्य उपरस्यायोः॥ ॥उ
ग्र तेजस्विन् हे अग्ने देवानामंगिरसां संबंधि यं जनिम गोसंघं निपर्वतस्य समीपे अख्यत् आसमंताद्दृष्टोपश्यत्। तत्र दृष्टांतः। यूथे
व। यथा पश्वः पशून् गवां यूथा निक्षुमति अन्नवत्याग्रहे वर्तमानानि। पश्यंति जनास्तद्वत्। यद्वा हे अग्ने तव परिचारकोंगिरसो गणः
देवानामिंद्रादीनां यत् जनिम यो यं जनः अंति समीपे दंति के पश्वः पणिभिरपहृतान् पशून् अख्यत् अपश्यत्। तत्र दृष्टांतः। यथा सुमति श
ब्दं कुर्वाणा गावः यथा यूथेव पशून् पश्यंति तद्वत्। मर्तानां चित् मनुष्याणां उर्वशीः गुरुभ्यां मश्नुवानाः प्रजाः अभ्याभकृत् इति यास्कः। प्रजाः अ
कृप्रन्। ताभिरानीताभिर्गोभिः कृप्राः समर्था अभवन्। विदपि च अर्यस्वामिलब्धगोधन उपरस्य उप्तस्य निषण्णस्यासदत्यस्य वृधे वर्ध
नाय समर्थो भवति। तथा आयोर्मनुष्यस्य भृत्यादेश्च पोषणे समर्थो भवति यूथेव। शसः सप्तम्या वा डादेशः। क्षुमति। क्षुरित्यन्नाम
यद्वा क्षुत् शब्दो भावे क्विप् छांदसः तकारलोपः। तदस्यास्तीति मतुप्। ह्रस्वनुड्भ्यो मतुबिति मतुप उदात्तत्वं। अख्यत्। ख्या प्रकथ
ने। लुङि परस्य तिवः क्विरख्यातिभ्योङित्यङादेशः। आतो लोपः। जनिमा जनि प्रादुर्भावे कृजनिभ्यामिन् त्रिति इमन् प्रत्ययः। नित्वादाद्युदा
त्तः। अकृप्रन्। कृपू सामर्थ्ये लङि बहुलं छंदसीति विकरणस्य लुक्। रुडागमः॥ ॥अथैकोनविंशी॥ ॥अकर्म ते स्वपसो अभूम ऋतमव

स्वनुषसो विभातीः॥ अनूनमग्निं पुरुधा सुश्चंद्रं देवस्य मर्मृजतश्चारु चक्षुः॥ ॥ हे अग्ने ते तव परिचरणमकर्म कुर्मः। तेन कर्मणा स्वपसः
ऋ॰सं॰भा॰४ शोभनकर्माणो भूम। विभातीः। व्युच्छंतीरुषसः ऋतं तेजो वस्त्रं। आच्छादयंति। धारयंतीत्यर्थः। तथा उषस अनूनं संपूर्णं पुरुधा बहुधा सुश्चंद्रं
सुष्ठु आह्लादकारिणं यद्वा सुहिरण्यं अग्निं धारयंति। किंच देवस्य द्योतमानस्य तव चारु मनोहरं चक्षुः तेजो मर्मृजतः परिचरंतो वयं। स्वपसो भूम
इति पूर्वेण न्वयः। अकर्म। करोतेर्लुङि बहुलं छंदसीति विकरणस्य लुक्। मर्मृजतः मृजू शुद्धौ। यङ्लुकि शप्निको चलुकीति। अभ्यासस्य
रुगागमः। आतरि नाभ्यस्तात् शतुरिति नुमभावः। अभ्यस्तस्वरः॥ ॥ अथ विंशी॥ ॥ एता ते अग्न उचथानि वेधो वोचाम कवये ता जुषस्व। उच्छोच
स्व कृणुहि वस्यसो नो महो रायः पुरुवार प्रयंधि॥ ॥ वेधो विधातः हे अग्ने कवये मेधाविने ते तुभ्यं एता एतानि उचथानि उक्थानि शस्त्राणि अ
वोचाम। त्वं तानि जुषस्व। सेवस्व। किंच त्वं उच्छोचस्व उद्दीप्यस्व नोस्मान् वस्यसः अतिशयेन धनयुक्तान् कृणुहि। कुरु। तदेवोच्यते। पुरु
वार पुरुभिर्बहुभिर्वरणीय महो रायो महद्धनं प्रयंधि। अस्मभ्यं प्रयच्छ। अवोचाम वच परिभाषणे। लुङि तरं उमादेशः। पादादित्वादनिघातः।
कृणुहि। कृवि हिंसाकरणयोः इत्यस्य लोटि रूपं। निउउदात्तत्वादनिघातः। वस्यसः। वसुशब्दादीयसुनि विन्मतोर्लुगिति मतुपो लुकि राम
टिलोपे च कृते ईकारलोपश्छांदसः। यंधि। यमेर्लोटि बहुलं छंदसीति विकरणस्य लुक्। वा छंदसीति। हविकल्पेन पित्वादङि तास्त्वात्तिधि १५६
रादेशः॥ ॥ इति तृतीयस्य चतुर्थे एकोनविंशो वर्गः॥ ॥ आ वो राजानमिति षोडशर्चं तृतीयं सूक्तं वामदेवस्यार्षं त्रैष्टुभमाग्नेयं आवः षोडशे
त्यनुक्रांतं। प्रातरनुवाकाश्विनशस्त्रयोर्विनियोग उक्तः॥ ॥ तत्र प्रथमा॥ ॥ आ वो राजानमध्वरस्य रुद्रं होतारं सत्ययजं रोदस्योः॥ अग्नि

॥ अथ चतुर्दशी॥ ॥ अधा ह यद्वयमग्ने त्वाया पड्भिर्हस्तेभिश्चकृमा तनूभिः॥ रथं न क्रंतो अपसा भुरिजोर्ऋतं येमुः सुध्य आशुषाणाः॥ ॥ हे
अग्ने इह अथ खलु वयं त्वाया त्वत्कामनया पड्भिः पादैः हस्तेभिर्हस्तैश्च तनूभिरन्यैश्चावयवैश्च चकृम यत्। यस्मात्कारणात्कर्म सिध्य
र्थं त्वामुपपादयामः। सुध्यः सुकर्माणः आशुषाणाः कर्माणि व्याप्नुवंतः ते अंगिरसः ऋतं सत्यभूतं त्वां भुरिजोर्बिभृतः कर्मकरणसाम
र्थ्यपदार्थत्वेति भुरिजोर्बाह्वोः अपसा मथनाख्येन कर्मणा येमुः उद्यच्छंति। तत्र दृष्टांतः। रथं न यथा क्रांतः कारवः शिल्पिनः क्रामंतो ध
नाद्वा बाहस्तयोर्यथा रथमुद्यच्छंति। तद्वत्। यद्वा भुरिजोः देवान्मनुष्यांश्च बिभृत इति भुरिजौ द्यावापृथिव्यौ। तयोर्मध्ये अपसा परिचर
णकर्मणा सत्यभूतं तमग्निं येमुः उद्यच्छंति। अध। संहितायां निपातस्य चेति दीर्घः। क्रंतः। करोतेः शतरि बहुलं छंदसीति विकरणस्य लु
क्। प्रत्ययस्वरः। भुरिजोः। डुभृञ् धारणपोषणयोः। भृञ ऊच्चेति जिप्रत्यय धातोरुकारस्वर परः। प्रत्ययस्वरः॥ ॥ अथ पंचदशी॥ ॥
अधा मातुरुषसः सप्त विप्रा जायेमहि प्रथमा वेधसो नॄन्॥ दिवस्पुत्रा अंगिरसो भवेमाद्रिं रुजेम धनिनं शुचंतः॥ ॥ वामदेवोन्यैः षड्भि
रंगिरोभिः सह ब्रूते। अध अपि च मातुरुषसः सकाशात् सप्त सप्तसंख्याका विप्राः प्रजावयं स्मः प्रथमाः श्रेष्ठा वयं वेधसोग्नेः परिचारकान्
नॄन् वेधसो विधातुः नेतॄन् रश्मीन् वा जायेमहि वयं जनयामः देवो द्योतमानस्यादित्यस्य पुत्रा वयमंगिरसो भवेम। भूतिमंतः स्याम। शुचंतो दी
प्यमाना वयं धनिनमुदकवंतं मेघं रुजेम वर्षार्थं भिंद्याम। यद्वा धनिनं पणिनामकासुरापहृतं गोधनयुक्तमद्रिं पर्वतं रुजेम। अंगि
रसामादित्यपुत्रत्वमेवमाम्नायते। तथा यद्रेतः प्रथममुदीप्यत। तदसावादित्योभवदित्युपक्रम्य येंगारा आसंस्तेंगिरसोभवन्निति। जायेम

ऋ॰सं॰भा॰४

नः अभ्रूत्वे। क्रोत्राकर्णनपराय अदृपिताय अदृशाय अप्रमत्ताय नृचक्षसे नृणां शक्रे सुमृळीकाय सुसुखाय अमृताय मरणध
र्मरहिताय देवाय तस्मा अग्नये मन्त्रोत्रं शक्ति शस्त्रं च शंस मधुषुत् सुकरस्य सोमस्य सोमतत्र दृष्टांतः। ग्रावेव यथा ग्रावा सोमस्य मा
तानद्धत्। सोमाभिषवं कुर्वाणो यजमानाय मग्निमीळे स्तौति तस्मै शंसेति समवयः। यद्वा मधुषुत् सोमसुद्यजमानः। अग्निमीळे स्तौ
ति तत्र दृष्टांतः। यथा ग्रावा सोमस्य सोता शब्दं करोति। प्रैते वदंतु प्र वयं वदाम ग्रावभ्य इत्यत्र ग्राव्णां कर्तृत्वश्रुतमिति। आशृण्वते। शृ
णु रनुम इति विभक्तेरुदात्तः। ईळे। ईड स्तुतौ। लट् लोपस्त आत्मनेपदेष्विति तलोपः। यद्वालिङ्गितशब्दस्य शादेशः कृते रूपं॥ ॥ अथ च
तुर्थी॥ ॥ त्वं चिन्नः शम्या अग्ने अस्या ऋतस्य बोध्यृतचित्स्वाधीः। कदा त उक्था सधमाद्यानि कदा भवंति सख्या गृहे ते॥ ॥ हे अग्ने त्वं
चित् त्वामेव शम्येत्र शब्दः कर्मनाम अस्याः शम्येनोस्मत्संबंधिनो स्य कर्मणः देवता भवसि। हे ऋतचित् सम्यग्ज्ञ हे अग्ने स्वाधीः सुकर्मा
सुध्यानो वा त्वं ऋतस्य बोधि अस्मदीयस्तोत्रं बुध्यस्व। ते तव सधमाद्यानि सह मदनिमित्तानि उक्थ शस्त्राणि कदा कस्मिन्काले भविष्यं
ति। तथा अस्मदीये गृहे ते त्वया सह सख्यानि कदा भविष्यंति। सधमाद्यानि मादयने ऍयंतस्मा वोयदितियत्। सधमादस्थयोरिति सह
स्य सधादेशः भवत्यर्थ विभाषा कदा गर्ह्योरिति भविष्यदर्थे लट्॥ ॥ अथ पंचमी॥ ॥ कथा ह तद्वरुणाय त्वमग्ने कथा दिवे गर्हसे कन्न आगः
कथा मित्राय मीळ्हुषे पृथिव्यै ब्रवः कदर्यम्णे कद्भगाय॥ ॥ हे अग्ने त्वं तत अस्मदीयं पापं वरुणीय गर्हसे कन हेतुना गर्हा पूर्वं मां वेत्सयः। हे
ति पूरणः। दिवे द्युलोकाय द्योतमानाय सूर्याय वा कथा। कथं तत्पादमावेदयः। नो स्माक मागः कुत्यायं कथा किं ते किमसि त्वत्परिचरणा

चास्तीत्यर्थः। तथा मीळ्हुषे अभिमतफलस्य सेक्त्रे मित्राय पृथिव्यै च कथा ब्रवः कथमागो ब्रूयाः। अर्यम्णे देवाय भगाय एतन्नामकाय च देवाय त
त्कथं ब्रूयाः कथा किं शब्दात् शाच्छ्कथा। हनो च छंदसीति थाः प्रत्ययः। प्राग्दिशो विभक्तिरिति विभक्तिसंज्ञायां किमः कद्भृति कादेशः। मीळ्हुषे
मिह सेचने। कसेोदाश्वान साह्वानमाढ्वांश्चेति निपातितः। ब्रुवः। ब्रूञ् व्यक्तायां वाचि। लेटि लेटोऽडाटावित्यडागमः। पादादित्वादनिघातः।
आगमस्यानुदात्तत्वाद्धातुस्वरः॥ ॥ इति तृतीयस्य चतुर्थे विंशो वर्गः॥ ॥ अथ षष्ठी॥ ॥ कद्धिष्ण्यासु वृधसानो अग्ने कद्वाताय प्रत
वसे शुभंये॥ परिज्मने नासत्याय क्षे ब्रवः कदग्ने रुद्राय नृघ्ने॥ ॥ हे अग्ने धिष्ण्यासु आग्नीध्रीयादिधिष्ण्येषु वृधसानः घृताद्याहु
तिभिर्वर्धमानस्त्वं तत्कथं ब्रूयाः प्रतिवसे प्रकृष्टबलाय शुभंये। शुभं ये शुभस्य प्रापयित्रे। परिज्मने परितो गन्त्रे नासत्यस्य नेत्र यद्वा
न विद्यते असत्यं यस्य तस्मै वाताय यद्वा नासत्या येति वचनव्यत्ययः नासत्याभ्यामश्विभ्यां क्षे इति पृथिवीमाह। क्षियन्ति निवसंत्यस्यां
प्राणिन इति तस्यै क्षे पृथिव्यै च कत्कथं ब्रूयाः। हे अग्ने ऋक्षे नृणां पापकृतां हंत्रे रुद्राय देवाय कत्कथमागो ब्रूवो ब्रूयाः। वृधसानः वृधु
र्धातोः। असानिजित्यनुवृत्तौ ऋञ्जिवृधिमंदिसहिभ्यः कित्। इत्यसानप्रत्ययः। कित्वाद्गुणाभावः। चित्वादंतोदात्तः। शुभंये। या प्रापणे। विचि। त
त्पुरुषे कृति बहुलमिति पापा अप्यलुक्। कृत्स्वरः। क्षे क्षि निवासगत्योः अन्येभ्योपि दृश्यत इत्यधिकरणे डः। नञ्लोपः। चतुर्थ्येकवचने
आतो धातोरित्यत्र आत इति योगविभागादकारलोपः। नृघ्ने। हन हिंसागत्योः। बहुलं छंदसीति क्विप्॥ ॥ अथ सप्तमी॥ ॥ कथा महे पुष्टिं
भराय पूष्णे कद्रुद्राय सुमखाय हविर्दे॥ कद्विष्णव उरुगायाय रेतो ब्रवः कदग्ने शरवे बृहत्यै॥ ॥ हे अग्ने महते पुष्टिं धारकाय पूष्णे

राम
१५७

ऋ॰सं॰भा॰४

तन्नाम कायदेवाय कथा केन हेतुना पापं ब्रवीथाः सुमखाय सुपूजनीयाय सुयज्ञाय वा हविर्दे अग्निरूपो देवानां हविर्दात्रे यद्वा स्विष्टकृत्वा
घृविषो दात्रे रुद्राय कत्कथं ब्रूयाः तथा उरुगायाय उरुभिर्बहुभिर्गीयमानाय यद्वा प्रभूतकीर्तये विष्णवे रेतः क्षयहेतुं कथं वदः शर्याम्र
णाति पक्षा प्रधीरिति शरुः शतसंवत्सरः यद्वा हिंसिकायै निर्ऋतिर्वि बृहत्यै महत्यै शरवे निर्ऋत्यै वा कत्कथं पापं ब्रवः ब्रूयाः पुष्टि
भराय पुष्टेर्धारणपोषणयोः संज्ञायां भृतॄवृजीत्यादिना खच् अरुर्द्विषदजंतस्येति मुमेपूर्वपदस्य ह्रस्वत्वादंतोदात्तः समासे कृ
त्स्वरः हविर्दे अनुदात्तस्य च यत्रोदात्तलोप इति सुपउदात्तत्वं शरवे शृ हिंसायां शृस्वृस्निहित्रप्यसीत्यादिना उ प्रत्ययः निदित्य
नुवृत्तेराद्युदात्तः ॥ ॥ अथाष्टमी ॥ ॥ कथा शर्धाय मरुतामृताय कथा सूरे बृहते पृच्छ्यमानः। प्रति ब्रवोऽदितये तुराय साधा दिवो जात
वेदश्चिकित्वान् ॥ ॥ हे अग्ने ऋताय गात्रे सत्यभूताय वा मरुतां शर्धाय बलभूताय गणाय कथा केन हेतुना मदीयमागः प्रतिब्रूयाः ते
न पृच्छ्यमानः सन् तस्मै बृहते सूर्याय कथा कथं वदः तथा अदितये देव्यै तुराय त्वरितगमनाय वायवे अदितये अदीनाय तुराय वा प्र
ति ब्रवः मदीयमागः कथं ब्रूयाः यस्मादेवं तस्मात् हे जातवेदोऽग्ने चिकित्वान् भूतं सर्वं जानानस्त्वं दिवो दीप्तान् देवान् साधस्य साधय य
ज्ञं यद्वा दिवो द्युलोकस्य यज्ञवहनलक्षणं कार्यं साधकुरु सूरे सर्वविधीनां छंदसि विकल्पितत्वात् ङेर्यत्वाभावः अतो गुण इति पर
रूपत्वं पृच्छ्यमानः पृच्छ ज्ञीप्सायां कर्मणि यक् ग्रहिज्यादिना संप्रसारणं शानचो लसार्वधातुकानुदात्तत्वे यकः स्वरः साध राध साध संसि
द्धौ अंतर्भावितण्यर्थस्य लोटि व्यत्ययेन शपो ॥ ॥ अथ नवमी ॥ ॥ ऋतेन ऋतं नियतमीळ आ गोरामा सचा मधुमत्पक्वमग्ने। कृष्णा
सती रुशता धासिनैषा जामर्येण पयसा पीपाय ॥ ॥ हे अग्ने ऋतेन सत्यभूतेन यज्ञेन नियतमनुस्यूतमृतमुदकं गोर्धेनोः पयः एतेऽ

राम
१५८

पुरा तनयित्नोरचित्ताद्धिरण्यरूपमवसे कृणुध्वं ॥ ॥ हे ऋत्विग्यजमानाः अध्वरस्य यज्ञस्य राजानमधिपतिं होतारं देवानामाह्वातारं रुद्रं
रोरूयमाणं द्रवंतं ज्वलंतं वा यद्वा एषा वा अग्नेस्तनूर्यद्रुद्र इति रुद्रात्मकं रोदस्योर्द्यावापृथिव्योः सत्ययजं सत्यस्य यज्ञस्य दाता
रं यद्वा सत्ययजं सत्येन हविषा देवान्यजंतं यद्वा रोदस्योर्व्याप्त वर्तमानं हिरण्यरूपं सुवर्णप्रभमेवंविधमग्निं वो युष्माकमवसे रक्षणा
य तनयित्नोः स्तनयित्नुरशनिः सह्याकस्मिकः तस्माद्दशाद चित्तात् चिन्नास्त्न विद्यते चित्तं यस्मिन् तदचित्तं चित्तोपलक्षितसर्वेंद्रियोपसंहा
रोपरमाणमितियावत् तन्मरणात् पुरा प्रागेव आकृणुध्वं अभिमुखं समंताद्धविर्भिरग्निमजध्वं रुद्रं रोदयातेरोदस्मि रुतिरक् प्रत्ययः तन
यित्नोः तनिः शब्दार्थः पुरादिरदंतः स्तनिहृषिपुषिगदिमदिभ्यो णेरित्नुजिति इत्नुच् प्रत्ययः चितः स्वरः विनरणांतोदात्तः सुपासहे कादशा एकादे
शस्वरः कृणुध्वं कृवि हिंसाकरणयोः लोटि रूपं ॥ ॥ अथ द्वितीया ॥ ॥ अयं योनिश्चकृमा यं वयं ते जायेव पत्य उशती सुवासाः। अर्वाची
नः परिवीतो नि षीदेमा उ ते स्वपाक प्रतीचीः ॥ ॥ हे अग्ने त्वदर्थं यमुत्तरवेदिलक्षणं प्रदेशं वयं चकृम कुर्मः अयं योनिस्तव स्थानं करोतित
द्वत् स्वपाक स्वपत्य सुकर्मन् अग्ने त्वं परिवीतः यष्टव्यदेवैस्तेजोभिर्वा परिवीतः अर्वाचीनोऽस्मदभिमुखः सन् निषीद तत्राधिष्ठाय उपविश
तत्र स्थिते त्वयि इमा ज्वालो कृता वा प्रतीची स्तुतिः अभिमुखाः प्रवर्त्तंते चकृम करोतेर्लिटि रूपं वाक्यभेदादनिघाताभावः अर्वाचीनः वि
भावो वेर्ऋदिकागति स्वरः परिवीतः वेञ् तंतुसंवरणे कर्मणि निष्ठा यजादित्वात् संप्रसारणं गतिरनंतर इति गतेर्गतिनेः स्वरः ॥ ॥ अथ तृतीया ॥ ॥
आशृण्वते अदृपिताय मन्म नृचक्षसे सुमृळीकाय वेधः। देवाय शस्तिममृताय शंस ग्रावेव सोता मधुषुद्यमीळे ॥ ॥ स्तोतॄणां कर्त्तः हे स्तो

अस्कभानः प्रसदमित्यस्य वितवे दधन्युः॥ ॥ अग्ने अमृता अमरणहेतवः अस्मत्कारकाः प्रभृतिभिरबाधितामधुमद्भिर्माधुर्योपेतैरर्चि
तं·सं·भा·४ भिः उक्थैर्युक्तादेवी दैव्यानद्यः ऋतेन सत्येन यज्ञेन वा हेतुना आपः आस्ता याः सत्यः सदमित् सदैव स्ववितवे अवनाय प्रदधन्युः प्रगच्छंति
तत्र दृष्टांतः। वाजीन। यथा सर्गेषु प्रेरणेषु प्रस्तुभानः प्रस्थमानो श्वः प्रगच्छति। तद्वत्। आपः अप्यापो। आप्नोतेः क्विप् ह्रस्वश्चेति कर्मणि
क्विप्। अपृभित्यादिना नसि दीर्घः। अस्कभानः स्तोभतिः सर्ववतिकर्मा॥ ॥ अथ त्रयोदशी॥ ॥ मा कस्य यक्षं सदमिद्धुरो गा मा वेशस्य प्र
मिनतो मापेः। मा भ्रातुरग्ने अनृजोर्ऋणं वेर्मा सख्युर्दक्षं रिपोर्भुजेम॥ ॥ हे अग्ने ह्रुरो स्माकं हिंसकस्य कस्यचिदपि जंतो यक्षं यज्ञं सदमित्
सदैव मा गाः कदाचिदपि मा गच्छ। प्रमिनतो हिंसकस्य वेशस्य यज्ञं मा गाः। तथा आपेर्मद्व्यतिरिक्तस्य बंधोर्यज्ञं मा गच्छ। तथा अनृजोः
कुटिलचित्तस्य भ्रातुः ऋणं ऋणवद्देयं हविः मावेः मा कामयेथाः। तव यमपि सख्युर्मित्रस्य रिपोः शत्रोर्दत्तं भोगसमर्थं धनं मा भुमन भुं
जीमहि। किंतु त्वया दत्तं धनं भुंजीमहि। ह्रुरः ह्रु प्रसह्यकरणे क्विप्। व कुलं छंदसीत्यत्वं। सावेकाच इति विभक्तिरुदात्तत्वं। भुजेम
भुज पालनाभ्यवहारयोः आशीर्लिङि व्यत्ययेन परस्मैपदं। लिङ्याशिष्यङिति अङ् प्रत्ययः॥ ॥ अथ चतुर्दशी॥ ॥ रक्षाणो अग्ने तव राम
रक्षणेभी रारक्षाणः सुमख प्रीणानः। प्रति ष्फुर वि रुज वीड्वंहो जहि रक्षो महि चिद्वावृधानं॥ ॥ सुमख सुयज्ञ सुधानति वा हे अग्ने १५९
रक्षाणः भृशमस्माकं रक्षिता प्रीणानः हविर्भिः प्रीतस्त्वं तव रक्षणेभिः त्वदीयै रक्षणैर्नोस्मान् रक्षयाय प्रतिस्फुर अस्मान् प्रतिदीप्यस्व। वी
- दुढमंहः पापं विरुज विशेषेण भाङ्क्षय। किंच महि महांतं वावृधानं वर्धमानं वृद्धं वा बाधकं रक्षो जहि। नन्नश्च धातुरस्को रूपमभ्य इति सं

हिंसाया गणत्व रक्षाणः। रक्षेर्युङ् किंवा। नहि रूपं जहि। हन हिंसागत्योः। लोटि हंतेर्ज इति जादेशः। आभाक्ष्वी स्त्रीयस्यासिद्धत्वादतो
हेरिति लुङ् भवति॥ ॥ अथ पंचदशी॥ ॥ एभिर्भव सुमना अग्ने अर्कैरिमान्स्पृश मन्मभिः शूर वाजान्। उत ब्रह्माण्यंगिरो जुषस्व सं
ते शस्तिर्देववाता जरेत॥ ॥ हे अग्ने एभिर्भदनीयैरर्कै रचनीयैः शस्त्रैः सुमनाः शोभनमनस्को भव। हे शूर इमानस्मदीयान् हविर्ल
क्षणान् वाजान्मन्मभिः स्तोत्रैः सह स्पृश प्रतिगृहाण। उतापि च अंगिरः। अंगतहवींषि प्राप्नोतीत्यंगिराः। अग्निः यद्वा। येंगारा आसंस्ते
ऽगिरसो भवन्निति ब्राह्मणे। तेषामंगिरसां कारणत्वादग्नेरंगिराः। स्त्वेतत्कारणे च मंत्रः। ये अंगिरसः सूनवस्ते अग्नेः परिजज्ञिरे इ
ति। तादृश हे अग्ने ब्रह्माणि मंत्रान् जुषस्व सेवस्व। देववाता देवतीर्थंगता देवान्नृप्तो तुं प्राप्नेत्यर्थः। तादृशी शस्तिः शंसनं ते शंसनं त्वां
संजरेत संवर्धयतु। स्पृश संस्पर्शने तुदादिः। देववाता। वा गतिगंधनयोः। गत्यर्थाकर्मकेति कर्तरि क्तः। दिवः पवाद्यजंतः के चेति च
तुर्थ्यंतस्य पदस्य प्रकृतिस्वरः॥ ॥ अथ षोडशी॥ ॥ एता विश्वा विदुषे तुभ्यं वेधो नीथान्यग्ने निण्या वचांसि॥ निवचना कवये काव्यान्य
शंसिषं मतिभिर्विप्र उक्थैः॥ ॥ वेधो विधातर्हे अग्ने विदुषे कर्मविषयज्ञानवते कवये क्रांतदर्शिने एता विश्वा एतानि सर्वाणि वचांसि
वाक्यानि मतिभिर्मननीयैः स्तोत्रै रुक्थैः शस्त्रैश्च सहितः विप्रः प्राज्ञोऽहमशंसिषमवोचं तानि सेवस्वेत्यर्थः॥ ॥ इति तृतीयस्य च
तुर्थे द्वाविंशो वर्गः॥ ॥ कृणुष्वेति पंचदशर्चं चतुर्थं सूक्तं वामदेवस्यार्षं त्रैष्टुभं रक्षोहाग्निदेवताकं। कृणुष्व पंचोना रक्षोघ्नमित्य
नुक्रमणिका। प्रातरनुवाकाश्विनशस्त्रयोः सूक्तविनियोगः। प्रवर्ग्यमिष्टवे कृणुष्व पाज इत्याद्याः पंच वर्गविनियुक्ताः। सूत्रितं च। कृ

कृणुष्व पाजः प्रसितिं न पृथ्वीमिति पंचर्चं वैति ॥ तत्र प्रथमा ॥ कृणुष्व पाजः प्रसितिं न पृथ्वीं याहि राजेवामवाँ इभेन ॥ तृष्वीमनु प्रसितिं द्रूणा
ऋ॰सं॰भा॰४ नोऽस्तासि विध्य रक्षसस्तपिष्ठैः ॥ हे अग्ने पाजः तेजः संघं कृणुष्व कुरुष्व विस्तारय । तत्र दृष्टांतः । प्रसितिं न । यथा मृगयुः पृथ्वीं विस्ती
र्णां प्रसितिं प्रकर्षेण सीयते बध्यते इति प्रसितिं वागुरा नाडीं प्रसिनोति पक्षिग्रहणार्थं वनगहने प्रसारयति तद्वत् । त्वमपि रक्षांसि हं
तुं महत् बलमग्ने ततस्तु धइभेन गतभयेन तेजः संघेन युक्तस्त्वं याहि रक्षांसि हंतुं गच्छ । तत्र दृष्टांतः । राजेव । यथा अमवान् राजा सह
वर्त्तत इति इमो मत्यः । तद्वान् यद्वा अमा अमवद्भिर्न रोगः शत्रूणां कर्त्तव्ये रोगे स्ततद्वान् शत्रूणां रोग भूत इत्यर्थः । राजा इभेन गजेन युक्तः
सन् परबलं प्रतिगच्छति । तद्वत् । किं च तृष्वीमिति क्षिप्रनाम क्षिप्रगामिनीं प्रसितिं प्रकृष्टां सेनामनु द्रूणानः अनुगच्छन् यद्वा तृष्वीमि
ति तृतीयार्थे द्वितीयां तृष्व्या क्षिप्रया प्रसित्या अनुबद्धया संततया गत्या द्रूणानः परसेनां हिंसन् अस्ता शत्रूणां क्षेप्तासि तपिष्ठैस्तप्त
तमैस्तेजोभिः रक्षसे रक्षसाविध्य ताडय । अत्र निरुक्तं । कृणुष्व पाजः पाजः पालनात् प्रसितिमिव पृथ्वीं प्रसितिः प्रसहनात् तंतुर्वा जालं
वा याहि राजेवामात्यवनेभ्यवनवानुस्ववान्चेरावतागणेनगतभयेन हस्तिनेतिवा तृष्व्यानु प्रसित्या द्रूणान तृष्वीति क्षिप्रनाम तत्र तें राम
त्वरतेर्वास्तासि विध्य रक्षसस्तपिष्ठैस्तप्ततमैस्तपिष्ठतमैरितिवेति । कृणुष्वाकृविहिंसाकरणयोः लोटि धिन्विकृण्व्योर चेत्युप्रत्ययः । व्यत्यये
नात्मनेपदं । विकरणस्वरस्तु सति शिष्टोपि लसार्वधातुकस्वरं न बाधत इति लसार्वधातुकस्वरः ॥ ॥ अथ द्वितीया ॥ ॥ तव भ्रमास आशुया पतं १६०
त्यनु स्पृश धृषता शोशुचानः ॥ तपूंष्यग्ने जुह्वा पतंगानसंदितो वि सृज विष्वगुल्काः ॥ हे अग्ने तव भ्रमासः भ्राम्यतः आशुया शीघ्रगतयः

यावेसा त्रादि हविरर्थं । अयं पयः लोये । वयस्य मेशथ आमा अपक्वा सा गोः मधुमन्माधुर्यपितं पक्वं पयः स चासद्धारयति । कृष्णा कृष्ण
वर्णा सती एषा गौः रुशता धामिना शालिना धारकेण जामर्येण जायते इति जा प्रजा आत्मा जामर्येण जायते इति जाः । प्रजा आत्मा जामर्येणेति मि
तेन तेन पयसा पीपाय प्रजा प्याययति । तवैष महिमा यदसावपक्वा पयस्ते व करोषि । पीपाय । प्यायतेर्लिटि लिड्यङोश्चेति पी भावः ॥
अथ दशमी ॥ ॥ ऋतेन हि ष्मा वृषभश्चिदक्तः पुमाँ अग्निः पयसा पृष्ठ्येन ॥ अस्पंदमानो अचरद्वयोधा वृषा शुक्रं दुदुहे पृश्निरूधः ॥ वृ
षभः अभिमतफलवर्षकः पुमान् श्रेष्ठः सोऽग्निः ऋतेन सत्यभूतेन पृष्ठ्येन धारकेण पयसा मुक्तः सिक्तो भवति । हि स्म चित्त त्रयः पूरणाः
वयोधाः अन्नदः सोऽग्निः अस्पंदमानः एकत्रावस्थितः सन्नपि सत्यानरन् सर्वत्र तेजसा चरति । तथा वृषा यां वर्षकः पृश्निः सूर्यः शुक्रं पयः ऊ
धोतरिक्षं मधं वा दुदुहे दोग्धि । अक्तः । अंजू व्यक्तिम्लक्षणकांतिगतिषु कर्मणि निष्ठा दुदुहे । द्विकर्मकोऽयं धातुः ऊधः अकथितं चेति कर्म सं
ज्ञा ॥ ॥ इति तृतीयस्य चतुर्थे एकविंशो वर्गः ॥ ॥ अथैकादशी ॥ ॥ ऋतेनाद्रिं व्यसन्भिदंतः समंगिरसो नवंत गोभिः ॥ शुनं नरः परि ष
दन्नुषसमाविः स्वरभवज्जाते अग्नौ ॥ ॥ अंगिरसः मेधातिथिः प्रभृतयः ऋतेन यज्ञेन हेतुना गवां निरोधकमद्रिं पर्वतं भिदंतो विदा
रयंतः व्यसन् प्रक्षिपन् ततस्ते अंगारेभ्यः सन्नवंत समगच्छन् । नरः कर्मणां नेतारस्ते शुनं सुखेन उषसं परिषदन् परितः प्राप्नुवन् ततः
स्वः सूर्यः प्रादुरभवत् अग्नौ त्वयि जाते मथनेन मित्याद्विते सत्याभूत इति । असन् । अस्यतेर्लुङि लृदित्यस्य तिवर्तमानादिना अङादेशः ।
अनित्यमागमानुशासनमिति युगभावः ॥ ॥ अथ द्वादशी ॥ ॥ ऋतेन देवीरमृता अमृक्ताः अर्णोभिरापो मधुमद्भिरग्ने ॥ वाजी न सर्गेषु

ऋ॰सं॰भा॰४

लङि बहुलं छंदसीति शपः श्लुः बहुलं छंदसीति तिपि ईडागमः। निघातः॥ ॥अथ चतुर्थी॥ ॥ उदग्ने तिष्ठ प्रत्यातनुष्व न्य१मित्राँ ओष
तात्तिग्महेते॥ यो नो अरातिं समिधान चक्रे नीचा तं धक्ष्यतसं न शुष्कं॥ ॥ तिग्महेते तिग्मा तीक्ष्णा हेतयो ज्वाला यस्य तथोक्तः। तादृश
हे अग्ने उत्तिष्ठ रक्षोहननार्थमुद्यतो भव। शत्रून्प्रति आतनुष्व संघं विस्तारय स्वतेजः संघैः अमित्रान् शत्रून् ओषतात् नितरां दह हे
समिधान समिद्भिर्दीप्यमानाग्ने यः पुमान् नोस्माकमरातिं भावप्रधानो निर्देशः अरातित्वं शात्रवं च चक्रे कुरुते अरातिं सदनं वा कुरुते तं पु
मांसं नीचा न्यग्भूतं सन्क्षिप्रं दह। तत्र दृष्टांतः। अतसं न यथा शुष्कमनार्द्रतमं काष्ठं दहसि तद्वत्। ओषतात् उपदाहे लोटि हेस्तुह्यो
रिति तातङ् देशः। धक्षि दहेर्लोटि बहुलं छंदसीति शपो लुक्। दादेर्घ इति घत्वं भष्भावः। षढोः कः सीति कत्वं निघातः॥ ॥अथ पंचमी॥ ॥
ऊर्ध्वो भव प्रति विध्याध्यस्मदाविष्कृणुष्व दैव्यान्यग्ने॥ अव स्थिरा तनुहि यातुजूनां जामिमजामिं प्रमृणीहि शत्रून्॥ ॥ हे अग्ने ऊ
र्ध्वो भव। रक्षोहननार्थमुद्युक्तो भव। अस्मत् अस्मत्तः अधिकान् राक्षसान् प्रतिविध्य प्रत्येकं ताडय। दैव्यानि तेजांसि वा विष्कृणु
ष्व आविष्कुरु। एतत्त्रयं विधाय यातुजूनां यातयितुं प्राणिनः क्लेशयितुं ये जवं कुर्वंति तेषां यातुधानानां स्थिरा दृढानि धनूंषि अव
तनुहि अविगतज्यानि कुरु। किंच जामिं जामिमबंधुं शत्रून्प्रमृणीहि प्रजहि यद्वा जामियः पूर्वप्रकृतः तं जामिं पूर्वमप्रकृतं ए
वंभूतान् शत्रून् जहि। प्रकृतोयमित्ययेत्यक्षां मा कृथाः आविष्कृणुष्वेत्यत्र संहितायामिदुदुपधस्य चाप्रत्ययस्येति षत्वं। तनु
हि। तनोतेर्लोटि उतश्च प्रत्ययाच्छंदसि वा वचनमिति हेर्लुगभावः। यातुजूनां। जु गतौ। क्विब्वचीत्यादिना क्विप् दीर्घो आमि छंदसो नुम् राम २६१

मृणीहि। मृङ् प्राणत्यागे। अंतर्भावितण्यर्थस्य लोटि बहुलं छंदसीति विकरणस्य श्ना। निघातः॥ ॥ इति तृतीयस्य चतुर्थे त्रयोविंशो
वर्गः॥ ॥अथ षष्ठी॥ ॥ स ते जानाति सुमतिं यविष्ठ य ईवते ब्रह्मणे गातुमैरत्॥ विश्वान्यस्मै सुदिनानि रायो द्युम्नान्यर्यो वि दुरो
अभि द्यौत्॥ ॥ यविष्ठ युवतम यद्वा देवानां हविर्भिर्मिश्रयितृतम हे अग्ने यः पुमान् ईवते गमनवते कल्याणहेतुभूतगमनाय ब्र
ह्मणे परिवृढाय तुभ्यं गातुं गीयते उच्चार्यत इति गातुं स्तोत्रं तदैरत् प्रेरयति। स पुमान् ते तव सुमतिं कल्याणकरीं मनुग्रहात्मिकां
बुद्धिं जानाति लभत इत्यर्थः। अस्मै स्तोत्रं कृतवते यजमानाय तदर्थो विश्वानि सुदिनानि शोभनानि दिनानि रायो धनानि द्युम्नानि द्यो
तंति रत्नकनकादीनि दुरः गृहान् अभि अभिलक्ष्य अर्यो यज्ञानां स्वामी त्वं विद्योतत् विशेषेण द्योतस्व। केचिदत्र वाक्यभेदमंगीकुर्व
ते। स्तोत्रं कृतवते यजमानाय विश्वानि सुदिनानि अभ्युदयकारीणि भवंति। रायः रांति क्षीरादीनीति रायो गावः धनानि द्युम्नानि द्योत
मानानि कनकादीनि चास्मै भवंति। अर्यः कर्मणामनुष्ठाता यजमानः। दुरः गृहानभिद्योतत् विशेषेण द्योतते। ईवते। इण् गतौ। क्विप्
तदस्यास्तीति मतुप् छंदसीर इति मतुपो वत्वं। ऐरत्। ईर गतौ। अर्यः ऋ गतौ। अर्यः स्वामिवैश्ययोरिति यत्प्रत्ययांतो निपातितः। स्वामि
न्यंतोदात्तत्वं। द्योतत्। द्युत दीप्तौ। छांदसे लुङि च्लेरङ्। लुदिद्भ्यो लुङि परस्मैपदं। बहुलं छंदसीत्यडभावः॥ ॥अथ सप्तमी॥ ॥ सेदग्ने अस्तु सुभ
गः सुदानुर्यस्त्वा नित्येन हविषा य उक्थैः॥ पिप्रीषति स्व आयुषि दुरोणे विश्वेदस्मै सुदिना सासदिष्टिः॥ ॥ हे अग्ने यः पुमान् नित्ये
न यावज्जीवं संकल्पितेनाग्निहोत्रादिसाधनभूतेन हविषा त्वा त्वां पिप्रीषति प्रीणयितुं इच्छति। यश्च उक्थैः शस्त्रैः प्रीणयितुं इच्छति।

ऋ·सं·भा·४

सेत् । स एव पुमान् । सुभगः शोभनधनसौभाग्यवान् । सुदानुः शोभनदानोपेतश्चास्तु कृतिं च दुरोणे दुरोणेन कृच्छ्रलभ्ये स्वकीये आयुषि श
तवर्षाख्ये जीवने निमित्ते सति यस्त्वां प्रीणयति । अस्तु सुभगोऽस्तु यद्वा यस्त्वां प्रीणयति स्वकीये गृहे स्वे आयुषि शतवर्षाख्ये जीवने
तिष्ठतु । अस्मै यजमानाय विश्वा सर्वाणि सुदिना शोभनानि दिनानि भवन्तु । असदिष्टिः स यज्ञः असत्फलसाधनसमर्थो भवति । पि
प्रीषति स्व आयुषीति । प्रीङ् तर्पणे धातोः कर्मणि इति सन् । असत् अस्तेर्लेट्यडागमः । मंत्रे वृषेत्यादिना क्तिन्नुदात्तः ॥ ॥ उरवसे भर
णी । यष्टो अग्नेः क्षत्रभृतो वाचमिति द्वितीया ज्यास्तु ऋतं च । अर्चामिति सुमतिं घोष्य वर्गान्तिरिदं प्रभृति वर्मणा इति ॥ ॥ सेषाष्टमी ॥ ॥ अ
र्चामि ते सुमतिं घोष्यर्वाक् सं ते वावाता जरतामियं गीः ॥ स्वश्वास्त्वा सुरथा मर्जयेमास्मे क्षत्राणि धारयेरनु द्यून् ॥ हे अग्ने ते तव सुम
तिं अनुग्रहकरीं शोभनां बुद्धिं अर्चामि पूजयामि वावाता पुनःपुनस्त्वामभिगच्छन्तीयमुच्यमाना गीः वाक् घोषि घोषयुक्तं तथा भवति
तथा अर्वाक् त्वदभिमुखे ते त्वां संजरतां स्तौतु । वयमपि स्वश्वाः शोभनाश्वोपेताः सुरथाश्च उपलक्षणमेतत् पुत्रपौत्रादिभिः सहि
ताः सन्तस्त्वां मर्जयेम । अलंकुर्वीमपरिचरेमेति यावत् । त्वं तु अनुद्यून् त्वं ह अस्मे अस्मासु क्षत्राणि धनानि धारयेः निधेहि । घोषि
घुषशब्दनात्पादिक इन्निति वादाद्युदात्तः । वावाता । वा गतिगन्धनयोरित्यस्य यङ्लुगन्तस्य रूपं । मर्जयेम ॥ ॥ अथ नवमी ॥ ॥ इ
ह त्वा भूर्या चरेदुप त्मन् दोषावस्तर्दीदिवांसमनु द्यून् ॥ क्रीळन्तस्त्वा सुमनसः सपेमाभि द्युम्ना तस्थिवांसो जनानां ॥ ॥ इहास्मिंल्लोके पु
रुषः दोषावस्तः रात्रावहनि च दीदिवांसं दीप्यमानं त्वा अनुद्यून् अन्वहं त्मन् आत्मना स्वयमेव उपसमीपे भूरि भूयिष्ठं यथा भवति । तथा

राम
१६२

रश्मयः पतन्ति सर्वतः प्रसरन्ति । शोशुचानः भृशं दीप्यमानस्त्वं धृषता अभिभवसमर्थेन तेजःसंघेन शत्रूननुक्रमेण स्पृश दह । दहनोपायं
दर्शयति । असंदितः परैरनिरुद्धस्त्वं धृषिता तापकानि तेजांसि पतंगान् पतनशीलान् विस्फुलिंगान् उल्काश्चेति एतत्त्रितयं जुह्वा कृ
यतेऽस्यामाहुतय इति जुह्वा ज्वालया विष्वक् सर्वतो विसृज प्रसारय । आशुया । आशुशब्दात्तृतीयायाः सुपां सुलुगिति याजादेशः । चित्स्व
रः । धृषता । ञिधृषा प्रसहने । चुरादिराधृषीयः । व्यत्ययेन शः । शतुरनुम इति विभक्तेरुदात्तत्वं । जुह्वा । जुहोतेर्दीर्घश्चेति । क्विप् द्विर्वचनं दीर्घ
त्वं । उदात्तयणो हल्पूर्वादिति विभक्तेरुदात्तत्वस्य नोङ्धात्वोरिति प्रतिषेधे उदात्तस्वरितयोर्यण इति स्वरितत्वं । असंदितः । दो अव
खंडने । कर्मणि निष्ठा । द्यति स्यतीतीत्वं । न आसमासे । तस्य स्वरः ॥ ॥ अथ तृतीया ॥ ॥ प्रति स्पशो वि सृज तूर्णितमो भवा पायुर्विशो अस्या
अदब्धः ॥ यो नो दूरे अघशंसो यो अन्त्यग्ने माकिष्टे व्यथिरा दधर्षीत् ॥ ॥ हे अग्ने तूर्णितमः त्वरिततमस्त्वं स्पशः परबाधकान् रश्मी
तया रक्षासत्यानृतविवेकार्थं विसृज शत्रून् प्रति विशेषेण प्रेरय । अदब्धः केनाप्यहिंसितस्त्वं अस्याः त्वदीयाया विशः अस्मदादिका
याः प्रजायाः पायुः पालको भव । कस्मात्तद्रक्षणमित्यपेक्षायामाह । नोऽस्माकं दूरे योऽघशंसः अघं पापात्मकं शंसनमभिलाषः कीर्तनं
वा यस्यासावघशंसः अंति अस्माकं समीपे तिष्ठति । तस्मादुभयविधाच्चोरात् पालको भव । किंच ते तव संबंधिनोऽस्मान् माकिः न कश्चिदपि
व्यथिः बाधको राक्षसः आदधर्षीत् आधर्षयतु । अस्माकं कश्चिदपि परिभवं मा करोत्वित्यर्थः । अंति । अंतिकस्य कादिलोपमाद्युदा
त्तत्वं च । अग्ने पादादित्वादाष्टमिकमाद्युदात्तत्वं । माकिष्ट इति संहितायां युष्मत्तत्ततक्षुःष्वन्तःपादमिति षत्वं । दधर्षीत् । ञिधृषा प्रसादने

देवानामाह्लादयिता यविष्ठ युवतम सुक्रतो शोभनप्रज्ञ हे अग्ने वचोभिः स्वदुद्देशेन कृतैः स्तोत्रैः समुपजातयेयं बंधुता बंधुभावः। तया बंधु
तया महो महतो रक्षमाणान् रुजामि भुनज्मि। ननोदृशंसो वात्मकं वचः पितुर्हन्तादधितुर्गोतमाद्धवेः सकाशान्मां वामदेवं मामश्विया
याद्भूमादौ तन्मनादन मनावाशक्नुणमुपक्षयिता वा तादृश स्त्वं नोस्मदीयस्यास्य वचसस्तो आत्मकमेतत् वा स्य चिकिद्धि जानी
हि। चिकिद्धि कित ज्ञाने। जुहोत्यादिक लोट्रूपं होतः पादादित्वात्पाष्टिकमाद्युदात्तत्वं। इतरयोस्तु आमंत्रितत्वे समानाधिकरणादि
ति प्रथमस्याविद्यमानकत्वात्पिषेधादयाक्तादित्वेन नित्वेन निघातः॥ ॥अथ द्वादशी॥ ॥ अस्य प्रजज्ञस्तरण्यः सुशेवा अतंद्रासो
वृका अश्रमिष्ठाः। ते पायवः सध्र्यंचो निषद्याग्ने तव नः पांत्वमूर॥ ॥अमूर अमूढ सर्वज्ञ यद्वा अमूर अप्रतिहतगते हे अग्ने
अस्य प्रजज्ञः आगरूका इतियावत् तरुणायः सततगमनस्वभावः। अपि इमस्तारका वा सुशेवाः सुसुखाः अतंद्रासः अतंद्राः अन
लसाः सर्वदा युक्ताः आरकाः अहिंसकाः अश्रमिष्ठाः। अश्रांततमाः सध्र्यंचः परस्परं संमताः पायवो रक्षकास्ते तादृशास्तरण
यः निषद्यास्मद्यज्ञे निषण्णा भूत्वा नोस्मान्पातु। अस्व प्रजज्ञः स्वपि इदृशो नेजिकुः प्रत्ययः मध्ये वग्रहश्छांदसः। सध्र्यंचः सहपूर्वा
दंचतेः क्विप्। सहस्य सध्रिरिति सहस्य सध्र्यादेशः। सध्र्यादेशस्यांतोदात्तत्वनिपातनाद्यणादेशे उदात्तस्वरितयोरिति स्वरितत्वं। अमूर। मुह
वैचित्ते निष्ठायां दकारस्य रेफश्छांदसः। यद्वा मूड बंधने ॐ त्वादिरक्॥ ॥अथ त्रयोदशी॥ ॥ये पायवो मामतेयं ते अग्ने पश्यंतो अंधं दुरि
तादरक्षन्॥ ररक्ष तान्सुकृतो विश्ववेदा दिप्संत इद्रिपवो नाह देभुः॥ ॥अत्रेयमितिहासिकी कथा उचथ्यस्य भार्या ममता नाम धेयाभा राम

र्यां तदनुजो बृहस्पतिर्निरुध्य रेतस्कः सम्वरतो रूपं गर्भं शशाप यज्जात्यंधत्वं तत्पदं दीर्घतमः प्राप्नुहीति ततस्सां दीर्घतमा अजनिष्ट स चांध्यप १६३
रिहाराया ग्निं स्तुत्वा चक्षुरलभतेति तदिदानीमाह॥ हे अग्ने पायवः रक्षकाः पश्यंतः अंधोयमिति कृपादृष्ट्या पश्यंतः ते तव ये रश्मयः मा
मतेयं ममतायाः पुत्रं अंधं चक्षुर्हीनं दीर्घतमसं दुरितात् आंध्यलक्षणात्। अरक्षन् चक्षुःप्रदानेनापालयत्। विश्ववेदाः विश्वप्रज्ञो भवा
न् सुकृतः शोभनचक्षुःप्रदानादिकर्मकृत् तान् रश्मीन् ररक्ष आदरेण परिगृह्य पालयतीति ते चापरिग्रह सिध्रिरभिधीयते। दिप्संत
इत् दंभितुं परिभवितुमिच्छंत एव रिपवः शत्रवः एनं दीर्घतमसं नाह देभुः नैव परिभवंति खलु मामतेयं ममतायाः अमन्यमित्यर्थे स्त्रीभ्योढ
कादिप्संतः दंभुदंभे। सनीदंतर्धत्यादिना इड्भावः दंभ उद्घोत्। कारः। देभुः। अथि ग्रंथि दंभिस्वंजीनामुपसंख्यानमिति लिटः कित्वादु
पधालोपः॥ ॥अथ चतुर्दशी॥ ॥त्वया वयं सधन्यस्त्वोतास्तव प्रणीत्यश्याम वाजान्॥ उभा शंसा सूदय सत्यतातेनुष्ठुया कृणुह्यह्रया
ण॥ ॥अह्रयाण अलक्षितागमन अह्रयाण ह्री तयानद्रुतियास्कः। तादृश हे अग्ने वयं स्तोतारः सधन्यः त्वत्प्रसादात्समानधनाः
त्वोताः त्वया रक्षिताः वयं तव प्रणीती प्रणीत्या तव प्रेरणेनानुज्ञया वा जान् अन्नानि अश्याम प्राप्नुयामहे। सत्यताते सत्यं तनोतीति वा।
सततं तापते यस्मिन्निति वा सत्यतातिः। हे सत्यताते शंसपापानां शंसितारो उभो। आसन्नविप्रकृष्टो शत्रून्सूदय जहि अनुष्टुया अनुक्र
मेण कृणुहि अस्मिन्सूक्ते प्रतिपादितमर्थं कुरु। सधन्यः धनमेषामस्तीति छंदसी च निपाताविति ईप्रत्ययः एरनेकाच इति यणादेशः उदा
त्तस्वरितयोरिति स्वरितत्वं। अनुष्ठुया अप ढुः सुपुष्ठ इति विधीयमानः कुप्रत्ययः वहुलवचनादनुपूर्वस्यापि भवति। सुपांसु लुगिति त नी

ऋ॰सं॰भा॰४

यायायाज्यादेशः। अह्रयाण। ङीलज्वायी। बहुलं छंदसीति शपः श्लुभावः। अनित्यमागमशासनमिति मुगभावः॥ ॥ अथ पंचदशी॥
॥ या ते अग्ने समिधा विधेम प्रति स्तोमं शस्यमानं गृभाय॥ ॥ दहाशसो रक्षसः पाह्यस्मान् द्रुहो निदो मित्रमहो अवद्यात्॥ ॥ हे अग्ने या अ
नया समिधा दीप्त्या स्तुत्या विधेम परिचरेम। अस्माभिः शस्यमानमिमं स्तोत्रं प्रतिगृभाय। प्रतिगृहाण। अशसः शंसंति स्तुवंतीति शंसाः स्तो
तारः तेन भवंतीति अशसो नृशंसाः तान् रक्षसो दह भस्मसात्कुरु। हे मित्रमहः मित्रैः पूजनीय हे अग्ने द्रुहो द्रोग्धॄन् निदः निंदकान् अव
द्यात् गर्ह्यात् अस्मान् पाहि रक्ष मित्रमहो अवद्यादित्यत्र संहितायां आप्याद्वद्यादिति एवः प्रकृतिभावः॥ ॥ इति तृतीयस्य चतुर्थे
पंचविंशो वर्गः॥ ॥ छ॥ ॥ इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणा
चार्यविरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये तृतीयाष्टके चतुर्थोध्यायः॥४॥ ॥ छ॥ ॥ श्रीमंगलमाहेश्वरी शुभं भवतु।

राम
१६४

आचारन्नपरिचरंति। तस्माद्दमेपि स्वजनानां शत्रूणां द्युम्नानि धनानि। अभितस्थिवांसः त्वत्प्रसादादात्मसात्कुर्वंति। अत एव चक्री
डंतः। स्वके स्वे गृहे पुत्रपौत्रादिभिः सह संक्रीडमानाः तथा सुमनसः शोभनमनस्काः संतः त्वां सपेम परिचरेम। यद्वा दोषवस्तरिति संबुधि
दोषायां रात्रिकृतस्य तमसो वस्तः आच्छादितः निवारयितः। त्मन्। आत्मन् शब्दस्य तृतीयायाः सुपां सुलुगिति डुक्। मंत्रेष्वाङ्यादेरात्म
न इत्याकारलोपः। दोषावस्तः। द्वंद्वपक्षे कालीकाअपादयश्चेति पूर्वपदप्रकृतिस्वरः। संबुधिपक्षे आमंत्रितस्य पादादित्वात् षाष्ठिक
माद्युदात्तत्वं। सपेम। षप समवाये। लिङि रूपं। निघातः॥ ॥ अथ दशमी॥ ॥ यस्त्वा स्वश्वः सुहिरण्यो अग्न उपयाति वसुमता रथेन॥ ॥ त
स्य त्राता भवसि तस्य सखा यस्त आतिथ्यमानुषग्जुजोषत्॥ ॥ हे अग्ने यः पुमान् स्वश्वः शोभनाश्वोपेतः सुहिरण्यः यागयोग्य
धनोपेतः वसुमता व्रीह्यादिधनयुक्तेन रथेन सहितः सन् उपयाति परिचरणार्थं तव समीपं गच्छति। तस्य पुंसः त्राता सर्वदुरितेभ्यो र
क्षको भवसि। यश्च पुमान् ते तव आतिथ्यं अतिथियोग्यां पूजां आनुषक् अनुक्रमेण जुजोषत् जोषयति। तस्य पुंसः सखा तदुपाचित
फलप्रदानेनोपकर्ता भवसि। उपयाति। सहसुपेत्यत्र योगविभागात् समासः। तिपः पित्वादनुदात्ते धातुस्वरः। तिङि चोदात्तवतीति ग
तेर्निघातः। आतिथ्यं। अतिथिशब्दात् तादर्थ्ये इति ण्यप्रत्ययः। प्रत्ययस्वरः। जुजोषत्। जोषयति। लेटि बहुलं छंदसीति शपः श्लुः। छंदस्यु
भयथेति तिप आर्धधातुकत्वात् णिलोपः। अभ्यस्तानामादिरित्याद्युदात्तः॥ ॥ इति तृतीयस्य चतुर्थे चतुर्विंशो वर्गः॥ ॥ अथैकादशी॥
॥ महो रुजामि बंधुता वचोभिस्तन्मा पितुर्गोतमादन्वियाय॥ त्वं नो अस्य वचसश्चिकिद्धि होतर्यविष्ठ सुक्रतो दमूनाः॥ ॥ हे होतः

ऋ॰सं॰भा॰५ मेतत् अमृतः अमरणस्वभावः। नेताः विशिष्टप्रज्ञः वैश्वानरः विश्वैर्नरैराहवनीयादिरूपेण। नृतमः नेतृतमः फलादीनां यद्वा महान् महन्नामैतत्।
अग्निः अंगमादिगुणविशिष्टः। तादृशमग्निं स्तुतेति भावः॥ ॥ अथ तृतीया॥ ॥ साम द्विबर्हा महि तिग्मभृष्टिः सहस्ररेता वृषभस्तुविष्मान्॥ पदं
न गोरपगूळ्हं विविद्वानग्निर्मह्यं प्रेदु वोचन्मनीषां॥ ॥ द्विबर्हा द्वयोर्मध्यमोत्तमयोः स्थानयोः परिवृढः। तिग्मभृष्टिः तीक्ष्णतेजाः सहस्ररेताः बहु-
विधहिरण्यरेतस्कः रेतःशब्दः सारवाची प्रभूतसारो वा वृषभः कर्षिता कामानां तुविष्मान् बहुधनः ईदृशोयमग्निः अत्यंतमागोपितं गोः पदमि-
व अपगूढं अत्यंतरहस्यं मनीषां। शब्दो ज्ञानवाची सत्यप्रज्ञातव्ये वर्तते। मनीषां ज्ञातव्यं महिमहत् पूज्यं साम। अस्मदभिमतं स्तोत्रं विविद्वान् विशे-
षेण जानन्। प्रेदु वोचत् प्रैव ब्रवीतु॥ ॥ अथ चतुर्थी॥ ॥ प्र तां अग्निर्बभसत्तिग्मजंभस्तपिष्ठेन शोचिषा यः सुराधाः॥ प्र ये मिनंति वरुणस्य धा-
म प्रिया मित्रस्य चेततो ध्रुवाणि॥ ॥ योग्निः सुराधाः शोभनधनः स तिग्मजंभः तीक्ष्णदंष्ट्रः सन् तपिष्ठेन शोचिषा अतिशयेन शत्रूणां तापकेन
तेजसा तान् वक्ष्यमाणान् द्विष्टान् प्रबभसत्। प्रकर्षेण भर्त्सयन् दहत्वित्यर्थः। भस भर्त्सनदीप्त्योः। लेटि इतश्च लोप इतीकारलोपः। लेटोडाटावित्यडा- राम
गमः। तान् इत्युक्तं के ते इत्याह। ये चेततः आततः एतदुभयविशेषणं मित्रस्य वरुणस्य च प्रिया प्रियाणि ध्रुवाणि स्थिराणि दृष्टाः। धाम धामा-
नि तेजःस्थानानि कर्माणि वा प्रमिनंति प्रकर्षेण हिंसंति। मीञ् हिंसायां। मीनातेर्निगमे इति ह्रस्वत्वे विकरणस्वरः॥ ॥ अथ पंचमी॥ ॥ अभ्रात-
रो न योषणो व्यंतः पतिरिपो न जनयो दुरेवाः॥ पापासः संतो अनृता असत्या इदं पदमजनता गभीरं॥ ॥ अभ्रातरः भ्रात्रादिबंधुरहिताः योषणो
न गतं भर्तृकायोषित इव वा पूर्वस्य निगम इति। विकल्पेनाम्भुद्दीर्घः। ता यथा भर्तृगृहात् पितृगृहं प्रत्यायंति तद्वत् गच्छंतः यज्ञादीन् परिहाय अमार्ग-

वर्तमाना इत्यर्थः। तथा पतिरिपो न जनयो न यतिद्विषः स्त्रिय इव दुरेवाः दुष्टगतयः दुराचाराः। अत एव पापासः पापाः संतः अनृताः मानससत्यर-
हिताः असत्याः वाचिकसत्यरहिताः मनसा वाचा मिमभजमानाः इदं पापिभिरनुभूयमानं तथा प्रसिद्धं गभीरं अगाधं पदं नरकस्थानं अजनयंत
उत्पादयंति। लङि अजनेरं तभावित्यर्थः छांदस्यये नैकवचनं॥ ॥ इति तृतीयस्य पंचमे प्रथमो वर्गः॥ ॥ अथ षष्ठी॥ ॥ इदं मे अग्ने कियते पावकामि-
नते गुरुं भारं न मन्म॥ बृहद्दधाथ धृषता गभीरं यह्वं पृष्ठं प्रयसा सप्तधातु॥ ॥ हे पावक शोधक अग्ने कियते अयल्पाय गुरुं भारं नावा तु माशक्यं भा-
रमिव तं यथा भर्तुमसहमानः पातयति। तद्वत्। त्वदीयं कर्म अमिनते अहिंसते अय जते मे मह्यं इदं ज्ञातव्यत्वेन प्रसिद्धं बृहत्प्रभूतं मन्म मदनीयं
धनं दधाथ देहि तदेव विशेष्यते। धृषता शत्रूणां धर्षकेण प्रयसा अन्ननामैतत्। अन्नेन युक्तं गभीरं अन्यैरनवगाह्यं यह्वं महत् पृष्ठं स्पृष्टुं योग्यं
सप्तधातु ग्राम्यारण्यभेदेन सप्तप्रकारं। सप्त ग्राम्याः पशवः सप्त आरण्या इति श्रुतेः। ईदृग्धनं देहीत्यर्थः। गुरुं भारं तं अन्यदीये भारं यथान्यस्मै ददा-
ति तद्वदस्माकं दातव्यं धनं देहीति वाक्योऽर्थः॥ ॥ अथ सप्तमी॥ ॥ तमिन्न्वेव समना समानमभि क्रत्वा पुनती धीतिरश्याः॥ ससस्य चर्मन्नधि चारु पृ-
श्नेरग्रे रुप आरुपितं जबारु॥ ॥ अग्निविद्युदादित्यास्त्रयोपि मतभेदेन वैश्वानरशब्दाभिधेया इति यास्केनोक्तत्वात् अत्रादित्यात्मना वैश्वानरः स्तूयते।
तमित् तमेव वैश्वानरं घस्थाने। सर्वेषामेकरूपं समानं समना सदृशी तद्योग्या पुनती अस्मान् शोधयत्री धीतिर्मतिः अस्मदीया स्तुतिः क्रत्वा तद्वितेन
कर्मणा त्विव क्षिप्रमेवाश्याः अभिप्राप्नुयात् भादित्यर्थः। अश्नोतेर्लिङि बहुलं छंदसीति विकरणस्य लुक्। व्यत्ययेन परस्मैपदं प्रथमपुरुषत्वं च। पू-
र्वत्र तच्छब्दश्रुतेर्यच्छब्दश्रुतेर्यच्छब्दोध्याहार्यः। यस्य द्युस्थानस्य वैश्वानरस्य जबारु जवमानरोहि वारुदीप्तं मंडलं। जवारु जवमाणरोहीति वा जवमा-

नरो हीति। वनिया स्कः। अग्ने पुरस्तात् पूर्वस्यां दिशि रूपः॥ आरोपयति। स्वात्मनि सस्यादीनि रुविति भूमिरुच्यते तस्याः सकाशात्। ससस्य लुप्तोपमे
ऋ॰सं॰भा॰२ ततः स्वपत इव निश्चलस्य पृश्ने घुनामेतत्स्वः पृश्निरिति द्युलोकादित्ययोः साधारणनाम सुपा बात् ज्योतिरादित्यस्य रूपमानस्य द्युलोकस्य अधि
उपरि चर्मन्नूवरणपञ्चरे रोगणादिको मनिन्नु सुपां सुलुगिति चतुर्थ्या लुक्। आरुपितं देवैर्नमस्यं इति पूर्वत्रान्वयः॥ ॥अथाष्टमी॥ ॥प्रवाच्यं वचसः
किं मे अस्य गुहा हितमुप निणिग्वदंति॥ यदुस्रियाणामप वारिव व्रन्पाति प्रियं रूपो अग्रं पदं वेः॥ ॥मेमदीयस्य अस्य वक्ष्यमाणस्य वचसो वाक्यस्य
किं प्रवाच्यमस्ति हृष्यमेवोच्यतइत्यर्थः। किं तद्वदिदमुच्यते। उस्रियाणां गोनामेतत्। क्षीरादिस्राविणीनां गवां संबंधि यत् क्षीरं। वारिउदकमिव
तद्यथा सेकेनाविष्कुर्वंति। तथा अपवव्रन् अपवृण्वंति। दोग्धारः। निणिक् नितरां नेनेक्ति शोधयतीति निणिक् क्षीरमुच्यते ताद्दृक् क्षीरं अनेन वैश्वा
नरेण गुहा गुहायां उपहितं उपनिहितं वदंति। वेः आरः किं वायं वेर्व्यामोयाः रूपः भूम्याः प्रियं सर्वेषामाधारत्वेन प्रियभूतं अग्रं श्रेष्ठं पदं स्थानं याति
रक्षति॥ ॥अथनवमी॥ ॥इदमु त्यन्महि महामनीकं यदुस्रिया सचत पूर्व्यं गौः॥ ऋतस्य पदे अधि दीद्यानं गुहा रघुष्यद्रघुयद्विवेद॥ ॥इदमु इदमेव त्य राम
त्यसिद्धमहिमहत् पूज्यं महामहतां देवानामनीकं सम्यूहरूपं सूर्यमंडलं वैश्वानरएवेति शेषः। पूर्व्यं पूर्वकालीनं तत् पूरकं वायन्मंडलं उस्रिया क्षीरा
स्राविणी गौः अग्निहोत्रार्थं सचत सेवते। ऋतस्योदकस्य पादस्थाने अंतरिक्षे अधि अधिकं यद्वा अधीति सप्तम्यर्थानुवादः। दीद्यानं द्योतमानं गुहा
गुहायां रघुष्यत् शीघ्रं स्यंदमानं रघुयत् शीघ्रं गच्छत् सूर्यमंडलं विवेद वैश्वानरमवेति ज्ञानवानस्मि॥ ॥अथदशमी॥ ॥अध द्युतानः पित्रोः सचासाम
नुत गुह्यं चारु पृश्नेः॥ मातुष्पदे परमे अंति षद्गोर्वृष्णः शोचिषः प्रयतस्य जिह्वा॥ ॥अध अथा द्युतानो दीप्यमानः पित्रोर्द्यावापृथिव्योः सचा सह मध्ये या २

श्रीविघ्नेशाय नमः॥ ॥यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्॥ निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं॥१॥ इह तृतीयानुवाकः अश्व तुर्यो ध्या
यस्यादशात्। व्याख्यातः सायणाचार्यो पंचमो व्याकरिष्यति॥ चतुर्थमंडले नुवाके दश सूक्तानि वैश्वानरायमिति विनियोगो लैंगिकः॥ ॥तत्र प
थमा॥ ॥वैश्वानराय मीळ्हुषे सजोषाः कथा दाशेमाग्नये बृहद्भाः॥ अनूनेन बृहता वक्षथेनोप स्तभायदुपमिन्न रोधः॥ ॥सजोषाः। सजोषसः समा
नप्रीतियुक्ता। वयमृत्विग्यजमानाः वैश्वानराय संबंधिन एतन्नामकाय मीळ्हुषे अभिमतवर्ष्यादिसेक्त्रे बृहत् बृहते महते भाः भासमानायाग्नये
देवाय कथा कथं केन प्रकारेण दाशेम दद्याम सामर्थ्याद्धविरिति गम्यते। अथवा बृहद्भा इत्येतदत्र योज्यं कथा दाशेमेत्युक्तं। किं तत्राधिक्यमि
ति तदुच्यते। योग्निः बृहन्महद्भाः भासमानश्च सन् अनूनेन अविकलेन संपूर्णेन अतएव बृहता प्रभूतवक्षथेन वोढ्यनस्वशरीरेण उपस्तभा
यत्। उपस्तभ्नाति सामर्थ्याद्द्यामिति शेषः। द्युलोकः स्तत्र दृष्टांतः। उपमित् न रोधः। उपसमीपे मीयते क्षिप्यत इत्युपमित् स्थूणा सा यथा तृणाच्छा
दनादिनिरोधकं वंशादिकमुपस्तभ्नाति तद्वत्। यद्वा वक्षथनउक्तलक्षणेन फलादिवाहकेन स्तोत्रेण सह द्युलोकमुपस्तभायत्। स्तंभुः
सौत्रो धातुः। छंदसि शायजपीति श्नः शायजादेशः। बहुलं छंदसीत्यडभावः। किंच उपमिन्नरोधः उपसमीपे मीयत इत्यु
पमिदुदकं कूलमिव॥ ॥अथ द्वितीया॥ ॥मा निंदत य इमां मह्यं रातिं देवो ददौ मर्त्याय स्वधावान्॥ पाकाय गृत्सो अमृतो विचेता वैश्वानरो नृत
मो यह्वो अग्निः॥ ॥हे हा ज्ञादयः अमुं वैश्वानरमग्निं मानिंदत निंदां मा कुरुत स्तुत्येत्यर्थः। यो देवो दीप्यमानोग्निः स्वधावान् अस्मद्दत्तेन हविर्लक्ष
णेनान्नेन तद्वान् सनमर्त्याय परिपक्वप्रज्ञाय मह्यं यजमानाय इमां दीयमानप्रकारतरां रातिं ददौ दत्तवान् सविशेष्यते। गृत्सः मेधावी। मेधाविना

ऋ·सं·भा·५

र्मणि कर्तृप्रत्ययः॥ नागन्म न प्राप्नुमः॥ ॥ अथ त्रयोदशी॥ ॥ कामं यदीदावयुना कद्धवाममच्छा गमेम रघवो न वाजं॥ कदा नो देवीरमृतस्य प
त्नीः सूरो वर्णेन ततनन्नुषसः॥ ॥ काममर्यादा काप्रीत्यादिव्यवस्थाकाव वयुना प्रज्ञानं पदार्थविषयं किं च वाममवननीयं पादार्थजातं एतत्सर्वं
कदा कस्मिन्काले नोस्माकं व्यवहाराय देवीः देव्यः द्योतमानाः अमृतस्यामरणधर्मस्यादित्यस्य पत्नीः पत्न्यः पालयित्र्यः सूरः प्रसवितुः
उषसवर्णेन प्रकाशेन ततनन विस्तारयेयुः। एवं सूर्यसंबंधिनः उषसः कृत्या सर्वात्मनो वैश्वानरस्य कृतिरवगंतव्या। ततनो तनोतेर्लेटि बहुलं छंदसी
ति विकरणस्य लुः। द्विर्भावहलादिशेषौ॥ ॥ अथ चतुर्दशी॥ ॥ अनिरेण वचसा फल्ग्वेन प्रतीत्येन कृधुनातृपासः॥ अधा ते अग्ने किमिहा
वदंत्यनायुधास आसता सचंतां॥ अनिरेण इरा अन्नं तद्रहितेन फल्ग्वेन तुच्छेन प्रतीत्येन प्रतिगंतव्येन आरोप्येणेत्यर्थः। कृधुना ह्रस्वेन कृ
धुरिति ह्रस्वनाम कृधुकः अल्पकः इति तन्नामसु पठितत्वात्। एवं विधेन वचसा अतृपासः अतृप्ताः जनाः अध अधुना इहास्मिन्लोके हे अग्ने ते त्वां किं व
दंति निर्हविष्केण वचसा न किं विलुभ्यंत इत्यर्थः। किंतु अनायुधासः आयुधशब्दः साधनं लक्षयति। हविरादिसाधनरहिताः सं असता दुःखेन
सचंतां संगच्छंतां॥ ॥ अथ पंचदशी॥ ॥ अस्य श्रिये समिधानस्य वृष्णो वसोरनीकं दम आरुरोच॥ रुशद्वसानः सुदृशीकरूपः क्षितिर्न राया पुरु
वारो अद्यौत्॥ ॥ समिधानस्य कर्मणि कर्तृप्रत्ययः। वृष्णो वर्षितुः फलस्य वासयितुः अस्याग्नेरनीकं तेजः संधः दमे यागगृहे आरुरोच सर्वतो
दीप्यते। किमर्थं श्रिये श्रयसे यजमानानां। सोग्निः रुशद्वर्णनामैतत् दीप्तं तेजो वसानः आच्छादयन् अत एव सुदृशीकरूपः सुष्ठु दर्शनीयरूपः पु
रुवारः बहुभिः ऋत्विग्भिर्यजमानैर्वरणीयः सन् अद्यौत् द्योतते। किमिव राया आढ्यादिधनेन क्षितिर्नराजादिरिव क्षितिरिति मनुष्यनाम॥ ॥ इति तृती

राम

२

यस्य पंचमे तृतीयो वर्गः॥ ॥ ऊर्ध्व ऊ षु णो अध्वरस्य होतरग्ने तिष्ठेति एकादशर्चं सप्तमं सूक्तं वामदेवस्यार्षं त्रैष्टुभमाग्नेयं ऊर्ध्व ऊ षु इत्येकादशेत्यनु
क्रांतं। प्रातरनुवाकाश्विनशस्त्रयोराग्नेये क्रतौ त्रैष्टुभे छंदसीदं सूक्तं। तथा च सूत्रितं ऊर्ध्व ऊ षु ण स सस्य यद्धि युतेति पंचेति॥ ॥ तत्र प्रथमा॥ ॥ ऊर्ध्व ऊ षु णो
अध्वरस्य होतरग्ने तिष्ठ देवताता यजीयान्॥ त्वं हि विश्वमभ्यसि मन्म प्र वेधसश्चित्तिरसि मनीषां॥ ॥ हे अध्वरस्य होतः यागसंबंधिनां देवानामाह्वातः
अग्ने होतरित्यत्र कृत्यं प्रातरनुवाका हे होमनिष्पादक अग्ने यजीयान् यष्टृतमस्त्वं नोस्माकं ऊर्ध्वः ऊ षु तिष्ठ ऊर्ध्व एव तिष्ठ नित्य उन्नतो भवेत्यर्थः।
कुत्रेति तदुच्यते। देवताता। तो देवतायां ते विस्तार्यंत इति देवताता देवतातिर्यज्ञः। तस्मिन् त्वं हि त्वं खलु विश्वं सर्वं महन्मं हननीयं शत्रूणां धनमभ्यसि अ
भिभवसि। किं च वेधसः श्चित् वित् पूजायां स्तोतुर्यजमानादेर्मनीषां मतिं कृतिप्रतिरसि प्रवर्धयसि। अपूर्वस्तिरतिर्वर्धनार्थः॥ ॥ अथ द्वितीया॥ ॥
॥ अमूरो होता न्यसादि विक्ष्वाग्निर्मंद्रो विदथेषु प्रचेताः॥ ऊर्ध्वं भानुं सवितेवाश्रेन्मेतेव धूमं स्तभायदुप द्यां॥ ॥ अमूरः अमूढः प्राज्ञ इत्यर्थः।
होता होमनिष्पादकः इंद्रो मंहवनीयः मादयिता वा प्रचेताः प्रकृष्टज्ञानोग्निः देवो विक्षु ऋत्विग्भूयासु प्रजासु मध्ये विदथेषु यागेषु निमित्तभूते
षु न्यसादि नितरां स्थापितः अथ तथाभूतोग्निः भानुं दीप्तिं सवितेव उदितः सूर्य इव ऊर्ध्वमाश्रेत ऊर्ध्वमुखमाश्रयति। किं च मेतेव स्तंभनवान् यथा स्वा
धिष्ठितं वेश्मादिकं स्तभ्नाति तद्वद्यमाग्निर्धूममाश्रितं द्यामुप द्युलोकस्यापरिस्तभायत् स्तभ्नाति॥ ॥ अथ तृतीया॥ ॥ यता सुजूर्णी रातिनी घृता
ची प्रदक्षिणिद्देवतातिमुराणः॥ उदु स्वरुर्नवजा नाक्रः पश्वो अनक्ति सुधितः सुमेकः॥ ॥ यता संयता सुजूर्णिः शोभनजवा सुष्टु जीर्णा पुराणा
वा घृतमंचतीति। घृताची जुहू रातिनी राति धनं हविर्लक्षणं धनवती आज्यपूर्णा भवतीत्यर्थः। देवतातिं यज्ञं तथा उराणः उरु कुर्वाणो ध्वं

युरग्निर्वह्निर्दक्षिमेजी विप्रदक्षिणात् प्रदक्षिणागमनो भवति। अकारलोपः। श्वांदसः। नवजातः तदानीमेवोत्पादितः। स्वरुर्नयूपशकलवाची स्वरु
ऋ.सं.भा.५ शरुः पूर्वं क्षयति स्वपालवं तः स्वरवः पृथिव्यामित्यादिषु स्वरुशब्देन यूपाभिधानाच्चकारः समुच्चये यूपोपि उद्गुपसर्गाः श्रुतेर्योग्यक्रियाध्या
हारः। उन्नतो भवसि। किं च अक्तः आक्तमितासुमेकः। सुदीप्तः। सुधितः सुधितिरित्यर्थः। सोपि पश्वः। पशून् अनक्तिग इति। यद्वा। सुधितः स्वरु
रेव उद्गूर्णः। पश्वः पशून् अनक्ति स्वरुणा पशुमनक्तीति श्रुतेः॥ ॥ अथ चतुर्थी॥ ॥ स्तीर्णे बर्हिषि समिधाने अग्ना ऊर्ध्वो अध्वर्युर्जुजुषाणो अस्था
त्। पर्यग्निः पशुपा न होता त्रिविष्ट्येति प्रदिव उराणः॥ ॥ बर्हिषि वेद्यां स्तीर्णे आस्तृते सति। अग्नावाहवनीयादिके समिधाने समिध्यमाने सत्य
ध्वर्युरध्वरस्य नेता जुजुषाणो देवान् प्रीणयन् ऊर्ध्वो स्थात् तिष्ठति होता होमनिष्पादकः। प्रदिवः पुराणः नामैतत्। पुरातन उराणः स्वल्पमपि हविर्देवयो
ग्यत्वं संपादः नेनोरुकुर्वाणः। उराण उरु कुर्वाण इति निरुक्तं। यद्देवैर्जोषतह विस्तः हि प्रिमात्रं वर्धत इति। श्रुतेरग्निरुरुकरणमुचितं ईदृशोऽग्निः प
शुपा न पशूपान पशूनापालक इव पशून् त्रिविष्टि त्रिरा इत्यपर्येति। त्रिर्हि पर्यग्निः क्रियते॥ ॥ अथ पंचमी॥ ॥ परि त्मना मितद्रुरेति होताग्नि
र्मन्द्रो मधुवचा ऋतावा। द्रवन्त्यस्य वाजिनो न शोका भयन्ते विश्वा भुवना यदभ्राट्॥ ॥ उक्तमेवार्थं स्पष्टयति। अयं होता होमनिष्पादकोऽग्निः त्म राम
ना आत्मना स्वरूपेणोवमितद्रुः परिमितगतिः सन् पर्यति परितो गच्छति। पशुकीदृशोऽयं मंद्रो मादनीयः मोदयिता वा मधुवचाः मधुरवचनः ऋ
तावा यज्ञवान् वाजिनो हविष्मतोस्याग्नेः शोकाः न दीप्तयोपि न ऊः अश्वा इव द्रवंति गच्छंति परितः। यद्वा नकार उपमार्थीयः। वाजिनो न अश्वा इव द्र
वंतीति योज्यं। यद्यस्मादयं अभ्राट् आजत्तस्मात् विश्वा भुवनानि सर्वाणि भूतजातानि भयन्ते भीतानि भवन्ति॥ ॥ इति तृतीयस्य पंचमे चतुर्थो वर्गः॥ ॥
४

मदृष्टान्। पृश्नेर्गोः संबंधि वारु रमणीयं गुह्यं कृधसि निगूढपदं आसास्यकीनास्येन अमनुतया नाया बुध्यते। उक्तमेवार्थं विवृणोति। मातुः क्षीरादि
निर्माणोः परमे पदे उत्कृष्टस्थाने कृतुधो लक्षणे अंतिसन् समीपे विद्यमानं क्षीरं दृष्टं फलानां वर्षितुः गोविषादीस्तस्य प्रयतस्याहवनीयादि
रूपेणानीतस्य वैश्वानरस्य जिह्वायानुमिकंतीति शेषः॥ ॥ इति तृतीयस्य पंचमे द्वितीयो वर्गः॥ ॥ अथैकादशी॥ ॥ ऋतं वोचे नमसा पृच्छ्यमान
स्तवाशसा जातवेदो यदीदं। त्वमस्य क्षयसि यद्ध विश्वं दिवि यदु द्रविणं यत्पृथिव्यां॥ ॥ अहं यजमानः नमसा स्तह पृच्छ्यमानः अन्यैरनुय
ज्यमानः सन् ऋतं वोचं सत्यं ब्रवीमि। किं तदिति उच्यते। हे जातवेदः जातानां वेदितः जातः प्रज्ञवा प्रेत वशात्सा ल्वत् कृत्या साधनेन यदीदं। धनं
लब्धमस्माभिः स्यात्। अस्य धनस्य त्वं। क्षयसि त्वमेवेश्वरो भवसि। तस्य यज्ञादिद्वारा ग्र्यर्थत्वो दितिभावः। अत्यल्पमिदमुक्तं यद्ध विश्वं यत्सर्व
लोके लब्धं धनमजित स्यापी त्वाषे। विश्वमिति सामान्येन यदुक्तं तदेव विशदयति। दिवि द्युलोके यदु द्रविणं यदेव धनं यच्च पृथिव्यां धनं तस्य सर्वस्य च
मीश्वरो भवसि। यज्ञार्थं। द्रव्यमुत्पन्नमिति स्मरणात् अग्निव्यतिरेकेण यज्ञसंभवादिति भावः॥ ॥ अथ द्वादशी॥ ॥ किं नो अस्य द्रविणं कद्ध रत्नं वि
नो वोचो जातवेदश्चिकित्वान्। गुहाध्वनः परमं यन्नो अस्य रेकु पदं न निदाना अगन्म॥ ॥ पूर्वमंत्रेणास्य धनस्याग्निस्वामित्वमुक्तं अस्य किं द्र
विणं किं साधनभूतं नोस्मभ्यं विवोचः विब्रूहि। यद्वा किं दातव्यं द्रविणमस्ति अस्मद्रविणदानाय कद्ध रत्नमिति योज्यं। अस्या धनः धनप्राप्तिमार्गस्य
यत् तद्दातव्यं धनमस्ति कद्ध रत्नं किं च रमणीयं हितकरं धनमस्ति तद्धनं हे जातवेदः जातधनोसि चिकित्वान् चेतनावानभिज्ञस्त्वं नोस्मभ्यं ब्रू। यत् गुहा
गुहायां निहितं गूढं परममुत्कृष्टं प्राप्तव्यमस्ति तदपि नोस्मभ्यं विवोचः। वयं रेकु रिक्तं पदं गंतव्यं स्थानं गृहादिकं निदानाः अन्यैः निंद्यमानाः क

त्यसंबंधिनोश्वाः। देवताति अस्मदीयं यागं प्रति आह्वं तन्ऋत्विग्भिराह्वयते। लुङि सिबिह्वः श्वेत्यादेशः। कीदृशाः। घृतस्नाः घृतस्नुतः बलातिशया
तृ॰सं॰भा॰५ त्पायुत्यादिस्थानेभ्य उदकं क्षरंतः रोहितासो रोहिताः लोहितवर्णाः ऋज्वंचः ऋजु अकुटिलं अंचंति गच्छंतीति ऋज्वंचः सुष्ठु गच्छंतः। अरुषसः अ
रोचमानाः वृषणः युवानः वर्षितारो वा बाधपूर्वस्य निगमः इति विकल्पेन दीर्घविधानादत्र दीर्घाभावः ऋजुमुष्काः साधतमुष्काः दस्माः दर्शनी
याः॥ ॥अथ दशमी॥ ॥ये ह त्ये ते सहमाना अयासस्त्वेषासो अग्ने अर्चयश्चरंति। श्येनासो न दुवसनासो अर्थं तुविष्वणसो मारुतं न शर्धः॥
॥हे अग्ने ये ह खलु ये प्रसिद्धाः सहमानाः शत्रूनभिभवंतः अयासो गमनशीलाः त्वेषासो दीप्ताः युवसानाः परिचरणीयाः। त्वदीया अर्ची
यो रश्मयः श्येनासो न श्वा इव अर्थं गंतव्यं चरंति गच्छंति कीदृशाः। मारुतं शर्धो न मरुत्संबंधी गण इव तुविष्वणसः तुविष्वनाः अधिकध्व
नयो भवंति॥ ॥अथैकादशी॥ ॥अकारि ब्रह्म समिधान तुभ्यं शंसात्युक्थं यजते व्यू धाः॥ होतारमग्निं मनुषो नि षेदुर्नमस्यंत उशिजः शं
समायोः॥ ॥हे समिधान समिध्यमानाग्ने तुभ्यं त्वदर्थं ब्रह्म स्तोत्रं अकारि अस्माभिः कृतं होता उक्थं शस्त्ररूपं स्तोत्रं शंसाति। शंसु स्तुतौ। ले राम
टोडाटावित्यडागमः त्वं यजते अतः कारणात् अस्मभ्यं धनं विधाः व्यधाः विधेहि दधाते छांदसे लुङि बहुलं छंदसीत्यडागमः उ इति पादपू
रणाः। किंच आयोर्मनुष्यस्य शंसं शंसनीयं होतारं देवानामाह्वातारं अग्निं धानमस्यंतः पूजयंतः उशिजः पश्वादिलक्षणं धनकामयमानाः श्र
मनुषो मनुष्या ऋत्विजः निषेदुः उपाविशन् सेवंत इत्यर्थः॥ ॥इति तृतीयस्य पंचमे पंचमो वर्गः॥ ॥अयमिहेत्येकादशर्चं सप्तमं सूक्तं वामदे
वस्यार्षं आग्नेयं आद्या जगती पंचानुष्टुभः शिष्टास्त्रिष्टुभः। तथा चानुक्रांतं। अयमिहेत्यादौ जगती पंचानुष्टुभ इति सूक्तविनियोगो लैंगिकः॥
५

अग्निप्रणयने अयमिहेति वैश्यस्य प्रतिपत्। तथा च सूत्रितं। अयमिह प्रथमो धायि धातृभिरिति। पुरा जन्यवैश्ययोगघेति॥ ॥तत्र प्रथमा॥
॥अयमिह प्रथमो धायि धातृभिर्होता यजिष्ठो अध्वरेष्वीड्यः। यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्रं विभ्वं विशेविशे॥ ॥धातृभिर्यज्ञार्हकर्मकु
र्वद्भिः अध्वर्युभिः इहास्मिन् यज्ञे होता देवानामाह्वाता यजिष्ठः अतिशयेन यष्टा अध्वरेषु यागेषु ईड्यः ऋत्विग्भिः स्तूयमानः प्रथमः सर्वेषां दे
वानां मुख्यः अयं आहवनीयादिस्थानेषु प्रत्यक्षेणोपलभ्यमानोग्निः धायि अधायि निहितः। दधातेः कर्मणि लुङ् बहुलं छंदसीत्यमाङ्यो
ग इत्यडभावः। तिङ् तिङ् इति निघातः। अयमग्निरित्युक्ते कोसावग्निरित्यत आह। अप्नवानः भृगुसंबंधी कश्चिदृषिः स च अन्ये भृगवः अ
वनेष्वरण्येषु विचित्रं दावाग्निरूपेण बहुधा दर्शनीयं विशेविशे वीप्सया सर्वजनयाग्निर्ग्रहते सर्वस्या विशः प्रजायाः विभ्वं विभुं ईश्वरं यं देवानां
हकं तेन दीप्तियुक्तं कृत्स्नायामिति यच्छब्दस्य अयमितीदंशब्देन संबंधः। अग्ने कदात इति प्रातरनुवाकाश्विनशस्त्रयोराग्नेये क्रतावानुष्टुभे
छंदसि अग्ने कदात इत्याद्याः पंचर्चः सूत्रितं च। अग्ने कदात इति पंचेति तासां॥ ॥प्रथमा सूक्ते द्वितीया॥ ॥अग्ने कदा त आनुषग्भुवद्देव
स्य चेतनं। अधा हि त्वा जगृभ्रिरे मर्तासो विक्ष्वीड्यं॥ ॥हे अग्ने अधातः कारणात् देवस्य द्योतमानस्य ते तव संबंधि चेतनं तेजः कदा त आनुषक्
अनुषक्तं भुवत् भवेत्। लेट्यडागमः। बहुलं छंदसीति विकरणस्य लुक्। भूसुवोस्तिङीति गुणप्रतिषेधः अतः कारणादित्युक्तं कस्माद्धेतोरित्य
त आह। हि यस्मात्कारणात् मर्तासो मनुष्याः विक्षु॥ ॥अथ तृतीया॥ ॥ऋतावानं विचेतसं पश्यंतो द्यामिव स्तृभिः॥ विश्वेषामध्वराणां हस्कर्तारं
दमेदमे॥ ॥ऋतावानं मायिनं विचेतसं विशिष्टज्ञानं स्तृभिर्नक्षत्रैः परिवृतं द्यामिव विस्फुलिंगैः समेतं विश्वेषां सर्वेषां अध्वराणां यज्ञानां हस्क

ऋ.सं.भा.५

तोरत्वाग्निं प्रयंतं ऋत्विगादयः दमेदमे सर्वेष्वपि यज्ञगृहेषु जगृभ्रिरइति पूर्वेणासंबंधः॥ ॥अथ चतुर्थी॥ ॥ आशुं दूतं विवस्वतो विश्वा यश्चर्षणीर
भि॥ आ जभ्रुः केतुमायवो भृगवाणं विशेविशे॥ ॥ योग्निः विश्वाः चर्षणीः सर्वाः प्रजाः अभिभवति आयवो मनुष्याः आयव इति मनुष्यनाम।
आयवः यद्व इति मनुष्यनामसु पाठात्॥ आशुं क्षिप्रगामिनं विवस्वतो मनुष्यस्य यजमानस्य दूतं विवस्वत इति मनुष्यनामं दे केतुं प्रज्ञापकं।
भृगवाणं भृगुवद्भावरंतं दीप्यमानमित्यर्थः सर्वप्रातिपदिकेभ्यः क्विब्वा वक्तव्य इति क्विप्। तदंतात्स्वार्थे व्यत्ययेन शानच्। अदुपदेशात् लसार्वधातु
कानुदात्तत्वे धातोः स्वरः आदेशानतिगणत्वादाद्युदात्तत्वं। तमग्निं विशेविशे विशो सर्वस्यै प्रजायै आजभ्रुः आजह्रुः हृग्रहोर्भ इति भत्वं॥ ॥अथ पंचमी॥
॥ तमीं होतारमानुषक् चिकित्वांसं नि षेदिरे॥ रण्वं पावकशोचिषं यजिष्ठं सप्त धामभिः॥ ॥ ऋत्विगादयो मनुष्याः आनुषक् आनुपूर्व्येण होतारं देवाना
माह्वातारं चिकित्वांसं ज्ञानवंतं कित ज्ञाने लिटः क्वसुः द्विर्भावहलादिशेषचुत्वदीर्घाः प्रत्ययस्वरः। तमीं तमिममग्निं निषेदिरे निषादयंति स्म कीदृ
शं रण्वं रमणीयं। पावकशोचिषं शोधकदीप्तिं यजिष्ठं यष्टृतमं सप्त सप्तभिर्धामभिस्तेजोभिर्युक्तं॥ ॥ इति तृतीयस्य पंचमे षष्ठो वर्गः॥ ॥
॥अथ षष्ठी॥ ॥ तं शश्वतीषु मातृषु वन आ वीतमश्रितं॥ चित्रं संतं गुहा हितं सुवेदं कूचिदर्थिनं॥ ॥ शश्वतीषु बह्वीषु मातृषु अप्सु ताः स
र्वस्यादिनिर्माणकत्वान्मातृकवन्निरुच्यंते। वने आरण्ये समूहे च अकारस्थार्थे सितं विद्यमानं वीतं आश्रितं प्राणिभिर्दाहभयात्। असेवितं दूरा
सदमित्यर्थः। चित्रं चायनीयं गुहा गुहायां हितं निहितं सुवेदं सुविज्ञानं सुधनं वा कूचिदर्थिनं क्वापि हविषि अर्थितं समिदाज्यपुरोडाशादि ह
विः स्वीकुर्वंतं। छंदस्य वकारस्य छांदसे सं- नोरणोपरि पूर्वस्वेव हल इति दीर्घत्वं। एवंभूतमग्निं निषेदिरे इति पूर्वेणासंबंधः॥ ॥प्रातरनुवाकाग्नि

राम

॥अथ षष्ठी॥ ॥ भद्रा ते अग्ने स्वनीक संदृग्घोरस्य सतो विषुणस्य चारुः॥ न यत्ते शोचिस्तमसा वरंत न ध्वस्मानस्तन्वी रेप आ धुः॥ ॥ हे स्वनीक शो
भनज्वालाग्ने घोरस्य भीतिजनकस्यापि सतः विषुणस्य विष्वक् सर्वतो व्याप्तस्य ते तव चारुः रमणीया भद्रा कल्याणी वा मूर्त्तिः संह
क् संदृष्टिः सम्यक् दृश्या भवतीत्यर्थः यद्यस्मात्ते शोचिर्दीप्तिं तमसा अंधकारेण न वरंत न वारयंति निघ्नाः यस्माच्च ध्वस्मानो ध्वंसकाराक्षसादयः।
तत्ते तव शरीरे पापं ध्वंसनादिरूपं नाधुः न कुर्वंति। अतः संदृगिति संबंधः॥ ॥अथ सप्तमी॥ ॥ न यस्य सातुर्जनितोरवारि न मातरापितरा नू चि
दिष्टौ। अधा मित्रो न सुधितः पावको ऽग्निर्दीदाय मानुषीषु विक्षु॥ ॥ जनितोर्जनयितुः उत्पादकस्य यस्य वैश्वानरस्य सातुः सनिः पश्वादि
लक्षणं दानं दीप्तिर्वा न। वारि केनापि न वार्यते। किं च मातापितरा मातापितरौ द्यावापृथिव्यौ यस्येष्टौ प्रेषणे नूचित् क्षिप्रमेव न प्रभवतः उतापि च
मित्रो न सखेव सुधितः सुतृप्तः पावकः शोधकोऽग्निः मानुषीषु मनोः संबंधिनीषु विक्षु प्रजासु दीदाय दीप्यते। दीपी दीप्तौ यकारलोपश्छांदसः। व्य
त्ययेन परस्मैपदं। लिटि अभ्यासस्य ह्रस्वे कृते तुजादित्वाद्दीर्घत्वं॥ ॥अथाष्टमी॥ ॥ द्विर्यं पंच जीजनंत्संवसानाः स्वसारो अग्निं मानुषीषु विक्षु॥
उषर्बुधमथर्यो न दंतं शुक्रं स्वासं परशुं न तिग्मं॥ ॥ मानुषीषु मानोः संबंधिनीषु विक्षु प्रजासु संवसानाः संवसानाः द्विपंच दश स्वसारः
अंगुलयः यमग्निं जीजनन् मंथने न उदपादयन्। जनी प्रादुर्भावे लुङि छांदसत्वाद्द्वित्वभावः कीदृशं अथर्यो न स्थिर इव उषर्बुधं उषसि बुध्यमा
नं दंते। हविषां भक्षकं शुक्रं शुभ्रं भिर्दीप्यमानं स्वासं शोभनास्यं तिग्मं तीक्ष्णं परशुं न परशुमिव रक्षसां दंतातमिति शेषः॥ ॥अथ नवमी॥ ॥ तव
त्ये अग्ने हरितो घृतस्ना रोहितास ऋज्वंचः स्वंचः॥ अरुषासो वृषण ऋजुमुष्का आ देवतातिमह्वंत दस्माः॥ ॥ हे अग्ने त्ये ते प्रसिद्धाः तव हरितः

तृ॰सं॰भा॰५

नस्यते तव संबंधी अग्ने ते॰मन्शब्देन गमनमार्ग उच्यते। एमवर्त्म कृष्णं कृष्णवर्णं भवति भाः तव संबंधिनी दीप्तिः पुरः पुरस्ताद्भवति। चरिष्णुसं
वरणशीलं अर्चिः त्वदीयं तेजः वपुषां वपुष्मतां रूपवतां तेजस्विनामित्यर्थः। एकमित् मुख्यमेव भवति यत् यदा अप्रवीता अनुपगता यज
मानाः। गर्भं त्वज्जननहेतुमरणिं दधते धारयंति खलु। सद्यश्चित्सद्य एव जातः उत्पन्नः सन् दूतो भवसी हद्यजमानस्य दूतो भवस्ये
व॥ ॥अथ दशमी॥ ॥सद्योजातस्य ददृशानमोजो यदस्य वातो अनुवाति शोचिः। वृणक्ति तिग्मामतसेषु जिह्वां स्थिरा चिदन्ना दयते वि जंभैः॥
॥सद्योजातस्य अरणिनिर्मथनादनंतरमेव उत्पन्नस्याग्नेः ओजः तेजः ददृशानं ऋत्विगादिभिर्दृश्यमानं भवतीति शेषः। वातो वायुः यत्रूप
दायस्याग्नेः शोचिः दीप्तिं अनुलक्ष्यीकृत्य वाति गच्छति तदा सोयमग्निः अतसेषु वृक्षसंघेषु तिग्मां तीक्ष्णां जिह्वां ज्वालां वृणक्ति संयोजय
ति। स्थिरा चित् स्थिराण्यपि अन्नान्यन्नरूपाणि काष्ठादीनि जंभैः तेजोभिः वि दयते विखंडयति भक्षयतीत्यर्थः॥ ॥अथैकादशी॥ ॥तृषु य
दन्ना तृषुणा ववक्ष तृषुं दूतं कृणुते यह्वो अग्निः। वातस्य मेळिं सचते निजूर्वन्नाशुं न वाजयते हिन्वे अर्वा॥ ॥यत यदाग्निः तृषु क्षिप्रमेव अन्ना
अन्नानि काष्ठानि तृषुणा क्षिप्रेण रश्मिसमूहेन ववक्ष वहति दहतीत्यर्थः। यह्वः महान् सोग्निः तृषु आत्मानं दूतं कृणुते यजमानं दूतं क
रोति। निजूर्वन् काष्ठानि निःशेषेण दहन्नग्निः वातस्य वायोः मेळिं बलं सचते सेवते आशुं न अश्वसादी यथा अश्वं तथा अर्वा गमनशीलोग्निः
स्वरश्मीन् वाजयते। वाजिनं बलवंतं करोति। हिन्वे प्रयति च॥ ॥इति तृतीयस्य पंचमे सप्तमो वर्गः॥ ॥दूतं व इत्यष्टर्चमष्टमं सूक्तं वामदेवस्यार्षं गा
यत्रं छंदस्कं अग्निदेवताकं। तथा चानुक्रम्यते। दूतं वोष्टौ गायत्रं त्विति। व्यूल्हे दशरात्रे प्रथमे छंदोमे इदं सूक्तं जातवेदस्यनिविद्धानीयं। तथा च सू

राम

त्रितं। अग्ने पावक दूतं व इति सूक्ते इति॥ ॥तत्र प्रथमा॥ ॥दूतं वो विश्ववेदसं हव्यवाहममर्त्यं। यजिष्ठमृंजसे गिरा॥ ॥हे अग्ने विश्ववेदसं विश्वं स
मस्तं वेदो धनं यस्यासौ विश्ववेदाः तं सर्वविदं वा हव्यवाहं देवेभ्यो हविषां वोढारं अमर्त्यममरणधर्माणं यजिष्ठं अतिशयेन यष्टारं दूतं देवानां
वः त्वां गिरा स्तुतिरूपया वाचा ऋंजसे जयमानोहं प्रसाधयामि वर्धयामीत्यर्थः। ऋंजतिः प्रसाधनकर्मेति यास्कः॥ ॥अथ द्वितीया॥ ॥स हि वे
दा वसुधितिं महाँ आरोधनं दिवः॥ स देवाँ एह वक्षति॥ ॥स हि प्रसिद्ध एवाग्निः वसुधितिं यजमानाभीष्टफलरूपधनस्य वेद वेत्ति महान् प्रभू
तोग्निः दिवः आरोधनं आरोहणं देवानां स्थानं वेत्ति सोग्निः इहास्मिन्यज्ञे देवानिंद्रादीन् आवक्षति आवहतु। वहेर्धातोर्लिङर्थे लिङ्‌ इति लेट्। त
स्य तिप्। सिब्बहुलं लोटीति सिप्। लेटोडाटावित्यडागमः। आहाद इति ढत्वं ढत्वकत्वषत्वानि। तिङ्ङतिङ इति निघातः॥ ॥अथ तृतीया॥ ॥स वे
द देव आनमं देवाँ ऋतायते दमे॥ दाति प्रियाणि चिद्वसु॥ ॥देवो द्योतमानः सोग्निः आनमं यजमानादीनां नमयितुं नमस्कारयितुं देवानिंद्राद
न् वेद क्रमेण वेत्ति। दाम यज्ञगृहे ऋतायते ऋतं यज्ञमिच्छते यजमानाय प्रियाणि चित् अभीष्टान्यपि वसु वसूनि पश्वादीनि धनानि दाति ददाति
प्रयच्छति॥ ॥अथ चतुर्थी॥ ॥स होता सेदु दूत्यं चिकित्वाँ अंतरीयते॥ विद्वाँ आरोधनं दिवः॥ ॥सोग्निः होता देवानामाह्वाता भवति। स दूत्य
वाग्निः दूत्यं देवानां दूतकर्म चिकित्वान् जानन् दिवः स्वर्गस्य आरोधनं आरोहणं आरोहणार्थं देवानां स्थानं च विद्वान् जानन् अंतः द्यावापृथिव्योर्म
ध्ये ईयते गच्छति। ईङ्‌ गतौ। दिवादिभ्यः श्यन्। तिङ्ङतिङ इति निघातः॥ ॥अथ पंचमी॥ ॥ते स्याम ये अग्नये ददाशुर्हव्यदातिभिः॥ य ईं पुष्यंत इंध
ते॥ ॥ते वयं छमानाः स्यामः भूयामेत इत्युक्तं। के इति उच्यते। यजमानाः अग्नये हविर्दातिभिः हविर्दानैः ददाशुः प्रीतिं कुर्वंति। इमेनमग्निं पुष्यंतो वर्ध

ऋ॰सं॰भा॰५

यंतोयेयजमानाः इंधतेसमिद्धिद्दीप्तियुक्तंकुर्वंति॥ ॥अथषष्ठी॥ ॥तेरायातेसुवीर्यैःससवांसोविशृण्विरे। येअग्नादधिरेदुवः॥ ॥येयजमानाः
अग्नाअग्नौसुपांसुलुगित्याकारः। दुवःपरिचर्यांदधिरेधारयंति। कुर्वंतीत्यर्थः। ससवांसः अग्निंसंभजमानाः रायायआदिलक्षणेनधनेन
विशृण्विरेविश्रूयंतेप्रख्यायंतेतेसुवीर्यैः शोभनवीर्योपेतैःपुत्रादिभिश्चविश्रूयंते॥ ॥अथसप्तमी॥ ॥अस्मेरायोदिवेदिवेसंचरंतुपुरुस्पृहः॥ अ
स्मेवाजासईरतां॥ ॥दिवेदिवेपुरुस्पृहऋत्विगादिभिरभिलक्ष्यमाणारायःपश्वादिधनानि अस्मेअस्मासुयजमानेषुदिवेदिवेप्रतिदिनंसं
चरंतुप्रचरंत्योभवंतुदिवुअस्मेइत्युभयत्रसप्तम्याः सुपांसुलुगित्यादिनाडादेशः। उदात्तत्वं। नित्यंनीप्सयोरितिद्विर्भावेसति
उत्तरभागस्यानुदात्तत्वं। वाजासः अन्नानिचअस्मेअस्मान्ईरतांप्रेरयंतु॥ ॥अथाष्टमी॥ ॥सविप्रश्चर्षणीनांशवसामानुषाणां॥ अतिक्षि
प्रेवविध्यति॥ ॥विप्रः मेधावीविप्रइतिमेधाविनाम। विप्रधीरइतितन्नामसुपाठात्। सोग्निःशवसाबलेनाशवइतिबलनामसुपाठात्। मा
नुषाणांमनुसंबंधिनांचर्षणीनांक्षिप्रेवक्षेथारायेवविनाशयतुसर्वाणिदुरितानीतिशेषः। अतिविध्यतिअतिविध्यतु अतिशयेननाशयतु
॥इतितृतीयस्यपंचमेष्टमोवर्गः॥ ॥अग्नेमृळेत्यष्टर्चंनवमंसूक्तंवामदेवस्यार्षंगायत्रीछंदस्कमग्निदेवताकं। अनुक्रांतंच। अग्नेमृळे
त्याग्निमारुतइति॥ ॥तत्रप्रथमा॥ ॥अग्नेमृळमहाँअसियईमादेवयुंजनं॥ इयेथबर्हिरासदं॥ ॥हेअग्नेमृळसुखयअस्मान्सुखयसत्वंमहा
नसियस्त्वमीमिमंदेवयुंदेवानांकामयितारंजनंयजमानंबर्हिर्दर्भंआसदंयज्ञआसत्तुंआइयेथ। आगच्छसि॥ ॥अथद्वितीया॥ ॥सामा
नुषीषुदूळभोविक्षुप्रावीरमर्त्यः॥ दूतोविश्वेषांभुवत्॥ ॥दूळभोदुर्दभाराक्षसादिनादुर्हिंसः मानुषीषुमनुसंबंधिनीषुविक्षुप्रजासुप्रावीः प्र

नराश्रयोस्त्रेषुभेक्षंदसीससस्ययद्वियुतेत्याद्याः पंचर्चः सूक्तितंद्। ससस्ययद्वियुतेतिपंचेति॥ ॥सैषासूक्तेसप्तमी॥ ॥ससस्ययद्वियुतासस्मिं
न्नूधन्नृतस्यधामन्रणयंतदेवाः॥ ॥महाँअग्निर्नमसारातहव्योवेरध्वरायसदमिदृतावा॥ ॥यंतयग्निंदेवाः स्तोतारःससस्यस्वप्नस्यवियुता
वियुतेउषसीत्यर्थः। ऋतस्यसोदकस्यधामन्धामनिसस्मिन्सर्वस्मिन्नूधन्ऊधनियज्ञेरणयंतरमयंतिस्तोत्रैरितिशेषः। महान्प्रभूतः न
मसानमस्कारेणरातहव्यः दत्तहविष्कः सतावासत्यवान्सोग्निः सदमित्सदैवाध्वरायाध्वरंयजमाने कर्तव्ययज्ञंसुपांसुणेभवति। तिवक्तव्यमि
तिवचनात्। अत्रद्वितीयार्थेचतुर्थी। वेः वेत्तिजानाति। यद्वादेवाइंद्रायः ससस्यऋत्विग्भिःससस्ययतयस्याग्नेवियुताविशिष्टेसस्मिन्भजनीये
ऋतस्यसत्यस्यधामन्धामनियोनौऊधन्ऊधनियज्ञेरणंतरमयंतामहान्प्रभूतः न—साहविषारातहव्योदत्तहविष्कः ऋतावासत्यवान्
सोग्निअध्वराययज्ञार्थंसदमितसादवगंताभवति। अध्वरायज्ञंवः कामयमानेवा॥ ॥अथाष्टमी॥ ॥वेरध्वरस्यदूत्यानिविद्वानुभेअंता
रोदसीसंचिकित्वान्॥ दूतईयसेप्रदिवउराणोविदुष्टरोदिवआरोधनानि॥ ॥हेअग्नेविद्वान्सर्वज्ञानानस्त्वंअध्वरस्ययज्ञस्यसंबंधीनिदू
त्यानिदूतकर्माणिविद्वान्जानन्उभेरोदसीउभयोरोदस्योर्द्यावापृथिव्योरंतर्मध्येस्थितमंतरिक्षंसंचिकित्वान्सम्यक्जानन्प्रदिवपुराणः पुराण
नामेदंप्रत्नंप्रदिवइतिपुराणनामसुपाठात्। उराणः उरुलोकमपिहविरुरुबहुकुर्वाणः उराणउरुकुर्वाणः। इतियास्केनोक्तत्वात्। विदुष्टरः
विद्वत्तरः देवानांदूतः त्वंदिवः स्वर्गस्यआरोधनानिआरोहणानिआरोहणानिहविर्लिस्थानानीत्यर्थः। देवानांहविःप्रापयितुमीयसेगच्छसि॥ ॥अ
थनवमी॥ ॥कृष्णंतएमरुशतः पुरोभाश्चरिष्ण्वर्चिर्वपुषामिदेकं॥ यदप्रवीतादधतेहगर्भंसद्यश्चिज्जातोभवसीदुदूतः॥ ॥हेअग्नेरुशतः रोचमा

राम

ऋ॰सं॰भा॰५

नसा धनं हविश्च जुषस्व। अस्माकमस्मदीयं हवमाह्वानं रूपं स्तोत्रं च श्रृणुधि श्रृणु। श्रृणोतेर्लेटि मध्यमैकवचने सिपूतस्य हिरादेशः श्रुवः श्र
चेति धातोः श्रु प्रत्ययः। श्रृ भावश्च। सुश्रृणु ऋ एभ्यश्छंदसीति हेर्धिरादेशः॥ ॥ अथाष्टमी॥ ॥ परि ते दूळभो रथोऽस्माँ अश्नोतु विश्वतः। ये
न रक्षसि दाशुषः॥ ॥ हे अग्ने त्वं येन रथेन विश्वतो विश्वासु सर्वासु दिक्षु गच्छन् दाशुषो हविः प्रदातॄन् यजमानान् रक्षसि विघ्नेभ्यः पालयसि
त्वदीयो दूळभो दुःसरथः अस्मान् त्वन्नमानान् परिपरितः सर्वतः अश्नोतु व्याप्नोतु। अश्नोतेर्व्यत्ययेन परस्मैपदं॥ ॥ इति तृतीयस्य पंचमे नव
मो वर्गः॥ ॥ अग्ने तमद्येत्यष्टर्चं दशमं सूक्तं। वामदेवस्यार्षं। तथा चानुक्रमणिका। अग्ने तमद्याष्टौ पदपंक्तिः पंचमी महापदपंक्तिरंत्योष्णिक् च
तुर्थी षष्ठ्युष्णिग्वा सप्तम्याः पंचको मुख्यो। तृतीयः सप्तमो नवकश्चाष्टम्यां पंचकः पादः चतुष्कः सप्तकस्त्रिष्टुभ इति। इदं तु त्वमपि सूक्तं प
दपंक्तिच्छंदस्कं पंचकाश्चत्वारः षट्कश्चैकः चतुर्थश्चतुष्को वा पदपंक्तिरित्युक्तलक्षणत्वात्। नवमी तव स्वादिष्ठेत्येषा महापदपंक्तिः षट्काश्चैक इति
लक्षणसद्भावात्। अंत्या शिवानः सखेत्येषोष्णिक्छंदस्का चतुर्थी षष्ठी सप्तम्यः आभिष्टे अद्य घृतेन पूते। उक्तविधिष्वेत्येतो ष्णिक्त्र उष्णिक्
पदपंक्त्या वा। अत्र सप्तम्यष्टम्योः पदपंक्त्युष्णिहोः परिभाषोक्तपादविच्छेदापवादाप्रकारांतरेण विच्छेदः कृतः। दशमे अहनि दंसूक्तमाज्यश
स्त्रं सूत्रितं च। अग्ने तमद्याश्वं न स्तोमैरित्याज्यमिति। पिंड पितृयज्ञे अग्ने तमद्येत्यनयाग्निप्रयाग छेत् सूत्रितं च। अग्निर्त्यवाग्ने तमद्याश्वं
न स्तोमैरिति। योनराधेयिक्यां स्विष्टकृति एषैव याज्या। सूत्रितं च। अग्ने तमद्याश्वं न स्तोमैरिति संयाज्ये इति॥ ॥ तत्र प्रथमा॥ ॥ अग्ने तमद्याश्वं
न स्तोमैः क्रतुं न भद्रं हृदिस्पृशं। ऋध्यामा त ओहैः॥ ॥ हे अग्ने अद्यास्मिन्नहनि वयम् विगादयः। ओहैः वहनैः प्रापकैः स्तोमैः स्तोत्रैः सम्

हैः तं प्रसिद्धं त्वा ऋध्याम समर्धयामः। कीदृशं। ओंअश्वं न नोदारमश्वमिव तथा हविषो वाहकं क्रतुं न कर्तारमित्यर्थः। तथा भद्रं भजनीयं हृ
दिस्पृशं हृदयंगमं अतिशयेन प्रियमित्यर्थः। पौनराधेयिक्यामिष्टौ प्रधानस्याग्नेरियेषानुवाक्या। एभिर्नो अर्कैरिति तस्याः स्विष्टकृतोऽनुवा
क्या। आभिष्टे अद्येति प्रधानस्य याज्या। सूत्रितं च। अधा ह्यग्ने क्रतोर्भद्रस्य आभिष्टे अद्य गीर्भिर्गृणंत एभिर्नो अर्कैरिति॥ ॥ सैषा सूक्ते द्वि
तीया॥ ॥ अधा ह्यग्ने क्रतोर्भद्रस्य दक्षस्य साधोः॥ ॥ रथीरृतस्य बृहतो बभूथ॥ ॥ अधा हि इदानीमेवाह अग्ने त्वं क्रतोः अस्मदीयस्य यागस्य
रथीर्नेता बभूथ भवसि छंदसि लुङ्लङ्लिट इति भवतेर्वर्तमाने लिटि सिपस्थल। आर्धधातुकस्येड्वलादेरिति इडागमे प्राप्ते बभूथाततंथे
ति निपातनादिडाभावः। कीदृशस्य यागस्य दक्षस्य प्रवृद्धस्य साधोः अभीष्टफलानां साधकस्य ऋतस्य सत्यभूतस्य बृहतो महतः॥ ॥ अ
थ तृतीया॥ ॥ एभिर्नो अर्कैर्भवा नो अर्वाङ् स्वर्ण ज्योतिः। अग्ने विश्वेभिः सुमना अनीकैः॥ ॥ हे अग्ने ज्योतिर्ज्योतिष्मान् स्वर्ण सूर्य इव तथा
विश्वेभिर्विश्वैः समस्तैरनेकैस्तेजोभिः सुमनाः शोभनमनस्कस्त्वं नोऽस्मदीयैरेभिरेत्यैरर्कैरर्चनीयैः स्तोत्रैर्नोऽस्माकमर्वाङभिमुखो भव॥ ॥ अ
थ चतुर्थी॥ ॥ आभिष्टे अद्य गीर्भिर्गृणंतोऽग्ने दाशेम॥ प्र ते दिवो न स्तनयंति शुष्माः॥ ॥ अद्यास्मिन् दिवसे हे अग्ने आभिर्गीर्भिः स्तुतिरूपा
भिर्वाग्भिः गृणंतः त्वां स्तुवंतो वयमृत्विग्यजमानादयः। ते तुभ्यं दाशेम हवींषि दद्याम दिवो न सूर्यस्मा इवायइव ते त्वदीयाः शुष्माः शोधका ज्वालाः
प्रस्तनयंति प्रकर्षेण शब्दायंते यद्वा दिवा न मेघा इव त्वदीया ज्वालाः शब्दायंते॥ ॥ अथ पंचमी॥ ॥ तव स्वादिष्ठाग्ने संदृष्टिरिदा चिदह्न इदा चिद
क्तोः॥ श्रिये रुक्मो न रोचत उपाके॥ ॥ हे अग्ने स्वादिष्ठा स्वादुतमा प्रियतमा तव त्वदीया संदृष्टिर्दीप्तिः अह्नः इदा चित् दिवसस्येदानीं च अक्तोरिदा

चित्। अक्तुरिति रात्रिनाम। शर्वरी अक्तुः शर्मेति रात्रिनामसु पाठात्। रात्रेरिदानीं च अहोरात्रे इत्यर्थः। अंजेर्यक्तिः ऊलकोतिगतेत्यस्माधा
ऋ०सं०भा०५ तोः। कि त्रिभ्याण्यदिक्षसूत्रेण प्रत्ययः। तस्य किद्भावश्चानि तु त्रेतीदप्रतिषेधः। आनिदितां त्युपधानकारलोपः। चोः कुरिति कुत्वं। रुक्मेण न अ
लंकार इव श्रिये माश्रयितुं उपाके अंतिके उपाक इत्यंतिकनाम। आके उपाके इति तन्नामसु पाठात्। रोचते राजते॥ ॥अथ षष्ठी॥ ॥घृतं न पूतं तनू
रेपाः शुचि हिरण्यं॥ तत्ते रुक्मो न रोचत स्वधावः॥ ॥हे स्वधावः स्वधाशब्दोऽन्नवाची अन्नवन्नग्ने पूतं शोधितं घृतावन् आज्यमिव ते तनूः
त्वदीया मूर्तिः अरेपाः पापरहिता भवति। शुचिः शुद्धं हिरण्यं हितरमणीयं तेत्वदीयं तत् असिद्धं तेजः रुक्मेण भूषणमिव रोचत रोचते भासते।
॥अथ सप्तमी॥ ॥कृतं चिद्धि ष्मा सनेमि द्वेषोऽग्न इनोषि मर्तात्॥ इत्था यजमानादृतावः॥ ॥हे ऋतवः सत्यवन्नग्ने कृतं चित् यजमानेन कृतमपि
सनेमि चिरंतनं। सनेमीति पुराणनाम। सनेमी पूर्व्यमिति पुराणनामसु पाठात्। द्वेषः पापान्मनुष्याद्यजमानात्। इत्था सत्यं। इत्थेति सत्यनामेतत्।
इत्था अधेति तन्नामसु पाठात्। इनोषि स्म हि प्रेरयस्येव खलु नाशयसीत्यर्थः। ॥अथाष्टमी॥ ॥शिवा नः सख्या संतु भ्रात्राग्ने देवेषु युष्मे। राम
सा नो नाभिः सदने सस्मिन्नूधन्॥ ॥हे अग्ने नोऽस्मदीया नि सख्या सख्यानि भ्रात्रा भ्रात्राणि भ्रातृसंबंधीनि कर्माणि देवेषु द्योतमानेषु युष्मे
युष्मासु। सुपां सुलुगिति सप्तमीबहुवचनस्य शे आदेशः। शिवा शिवानि संतु मंगलानि भवंतु। सा सखित्वभ्रातृकर्मसंततिः सदने देवानां स्था
ने सस्मिन्नूधनि यज्ञे नोऽस्माकं नाभिर्बंधनं भवति॥ ॥इति तृतीयस्य पंचमे दशमो वर्गः॥ ॥इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थ
प्रकाशे दाशतय्यां चतुर्थमंडले प्रथमोऽनुवाकः॥ ॥द्वितीयेऽनुवाके एकादश सूक्तानि॥ तत्र भद्रं त इति षडृचं प्रथमं सूक्तं वामदेवस्यार्षं

कर्षणगंता अमर्त्यः अमरणधर्मा सोऽग्निः विश्वेषां सर्वेषां देवानां दूतो भवत्। भवतु॥ ॥अथ तृतीया॥ ॥स सद्म परि णीयते होता मंद्रो दिविष्टिषु॥
उत पोता नि षीदति॥ ॥सोऽग्निः सद्म यज्ञगृहं परिणीयते अभिपरितो नीयमानः सन् दिविष्टिषु यागेषु मंद्रो मदनीयः स्तुत्यः सोऽग्निः होता च भवति॥
उतापि च पोता सन्निषीदति। यज्ञगृहे उपविशति॥ ॥अथ चतुर्थी॥ ॥उत ग्ना अग्निरध्वर उतो गृहपतिर्दमे॥ उत ब्रह्मा नि षीदति॥ ॥उतापि चाग्निः
अध्वरे यागे ग्नाः देवपत्नीर्यजति। नेष्टा भवतीत्यर्थः। यद्वा ग्नाः गच्छन्नध्वर्युर्भवति। उतो अपि च सोऽग्निः दमे यज्ञगृहे गृहपतिर्यजमानस्य भ
वति। उतापि च ब्रह्मा ब्राह्मणाछंदसी सन्निषीदति। उपविशति॥ ॥अथ पंचमी॥ ॥वेषि ह्यध्वरीयतामुपवक्ता जनानां॥ हव्या च मानुषाणां॥ ॥अध्व
रीयतां यज्ञमिच्छतां मानुषाणां मनुसंबंधिनां जनानां हव्यानि हवींषि हे अग्ने वेषि हि कामयसे खलु उपवक्ता अध्वर्युप्रभृतीनां सर्वेषां कर्मणां अनुज्ञ
ार्थं मा प्रणयेत्यादिरूपस्य वाक्यस्य वक्तासन् ब्रह्मा चासि। ब्रह्मा त्वो वदति जातविद्यामिति श्रुतेः। उपवक्ता सर्वेषां कर्मणां अवेक्षार्थं उप
द्रष्टा सदस्योऽसि। स हि सप्तदशः कर्मणां उपद्रष्टा भवतीत्यापस्तंबोक्तत्वात्॥ ॥अथ षष्ठी॥ ॥वेषीद्वस्य दूत्यं यस्य जुजोषो अध्वरं॥ हव्यं म
र्तस्य वोळ्हवे॥ ॥हे अग्ने त्वं मर्त्यस्य मनुष्यस्य यस्य यजमानस्य अध्वरं यागं हव्यं हविः। वोढवे वोढुं वहेर्धातोस्तुमर्थे सेसेनसे इति तवेप्रत्ययः।
नित्यादिर्नित्यमित्याद्युदात्तत्वं। जुजोषः सेवेथाः। जुषी प्रीतिसेवनयोः। लेट्। बहुलं छंदसीति शपः श्लुः। द्विर्भावश्च। लेटोऽडाटावित्यडागमः।
अस्य यजमानस्य दूत्यं दूतकर्म वेषीद्वा कामयस एव॥ ॥अथ सप्तमी॥ ॥अस्माकं जोष्यध्वरमस्माकं यज्ञमंगिरः॥ अस्माकं शृणुधी हवं॥ ॥
॥हे अग्ने त्वं अस्माकं अध्वरं अस्मदीयं यागं जोषि जुषस्व। अस्माकं अस्मदीयं यज्ञं यजमानसाधनं हविश्च जुषस्व। अस्माकमस्मदीयं यज्ञं यज

ऋ०सं०भा०५

इति॥ ॥सैषा सूक्ते तृतीया॥ ॥त्वदग्ने काव्या त्वन्मनीषास्त्वदुक्था जायंते राध्यानि॥ त्वदेति द्रविणं वीरपेशा इत्थाधिये दाशुषे मर्त्याय॥ ॥
॥हे अग्ने काव्ये काव्यानि हविर्वहनादेवतानयनादीन्यग्निसंबंधीनि कर्माणि आधर्यवाणि कर्माणि। वा त्वद्भवतो जायंते उत्पद्यंते। मनीषा
अति रूपा वाचः त्वदेव जायंते राध्यानि राधुयोग्यानि उक्थानि शास्त्राणि त्वत्तः त्वत्तो जायंते। इत्थाधिये धीरिति कर्मनाम इत्थेति सत्यनाम सुपां सुलु
क्। सत्यकर्मणे दाशुषे हविः प्रदत्तवते मर्त्याय मनुष्याय यजमानाय वीरपेशा पेश इति रूपनाम इदं विकांतरूपं अत्र लिंगव्यत्ययेन वीरपेशा इति
रूपं द्रविणं पश्चादिधनं त्वत्तः एति निर्गच्छति उत्पद्यत इत्यर्थः॥ ॥अथ चतुर्थी॥ ॥त्वद्वाजी वाजंभरो विहाय अभिष्टिकृज्जायते सत्यशुष्मः॥
त्वद्रयिर्देवजूतो मयोभुस्त्वदाशुर्जूजुवाँ अग्ने अर्वा॥ ॥हे अग्ने वाजी बलवान् वाजंभरः हविर्लक्षणान्नस्य वाहकः। अन्नेर्वा भरं इत्येष
त्वादिकी संज्ञा। संज्ञायां भृ तृ वृजीति वाजशब्दे कर्मण्युपपदे खच् प्रत्ययः अरुर्द्विषदजंतस्येति मुमागमः। वित इत्यंतोदात्तत्वं। विहायाः मह
न् अभिष्टिकृत् यज्ञकृत् अभ्येषणात् यज्ञः सत्यशुष्मः सत्यबलः पुत्रः त्वत्तो जायते उत्पद्यते। देवजूतो देवैः प्रेरितः मयोभुः सुखप्रदः म
य इति सुखनामैतत् रयिर्धनं त्वत्त जायते। आशुः शीघ्रगामी अप्रतिहतगमन इत्यर्थः। जूजुवान् वेगेन गच्छन् अर्वा अश्वः त्वद्भवतो जायते॥ ॥अथ
पंचमी॥ ॥त्वामग्ने प्रथमं देवयंतो देवं मर्त्ता अमृत मंद्रजिह्वं॥ द्वेषोयुतमा विवासंति धीभिर्दमूनसं गृहपतिममूरं॥ ॥हे अमृत अमरणशीला
ग्ने देवयंतो देवान् इच्छंतो मर्त्या मनुष्या यजमानाः त्वां धीतिभिः स्तुतिभिः कर्मभिर्वा आविवासंति समंतात् परिचरंति। कीदृशं त्वां प्रथमं देवाना
माद्यं देवं द्योतमानं मंद्रजिह्वं देवानां मादयित्री जिह्वा यस्य तं द्वेषोयुतं द्वेषसां पापानां पृथक्कर्तारं दमूनसं रक्षसां दमनकरणमनसोपेतं दमूनसं श

राम

ब्दस्य कथमयमर्थ इति दमूनाः दममना वा दांतमना वा अपि वा दम इति गृहनाम तन्मनाः स्यादिति यास्केनोक्तत्वादिति। दमु उपशमने। दमेरुनसि
रित्यौणादिक उनसि प्रत्ययः। गृहपतिं गृहाणां पालयितारं अमूरं अमूढं प्रागल्भमित्यर्थः। स्वस्त्ययन्यो आरे अस्मदिति स्वस्तिमतोग्न्येर्या ज्यास्तु
ति तेव॥ ॥अथ षष्ठी॥ ॥आरे अस्मदमतिमारे अंह आरे विश्वां दुर्मतिं यन्निपासि॥ दोषा शिवः सहसः सूनो अग्ने यं देव आ चित्सचसे स्वस्ति॥
॥हे सहसः सूनो बलस्य पुत्र मथ्यमानो ह्यग्निर्मथनकारिणां हि बलेन जायत इत्यग्नेर्बलपुत्रत्वं। हे अग्ने दोषा रात्रौ शिवः शिवकरः देव द्यो
तमान त्वं यं यानस्मान् स्वस्ति अविनाशाय आ सचसे परितः सेवसे। चिदिति पूरणः यस्मात्कारणात् निपासि यजमानांस्तान् पालयसि तेभ्यो
स्मत् अस्मत्तः अमतिं पापरूपामशनेच्छां आरे दूरे कुरु अशनाया वै पाप्ममतिरिति ब्राह्मणं आरे दूरे अस्मत्तः अंहः पापं कुरु। आरे इति दूरनामैतत्
अस्मत्तः आरे दूरे दुर्मतिं दुर्मनस्त्वं कुरु॥ ॥इति तृतीयस्य पंचमे एकादशो वर्गः॥ ॥यस्त्वामग्न इति षट् ऋचं द्वितीयं सूक्तं वामदेव ऋषिस्त्रिष्टुभो
निर्देवता यस्त्वमित्यनुक्रांतं प्रातरनुवाकाश्विनशस्त्रयोः पूर्वसूक्तेन सहोक्तो विनियोगः॥ ॥तत्र प्रथमा॥ ॥यस्त्वामग्न इनधते यतस्रुक्त्रिस्ते
अन्नं कृणवत्सस्मिन्नहन्॥ स सुद्युम्नैरभ्यस्तु प्रसक्षत्तव क्रत्वा जातवेदश्चिकित्वान्॥ ॥हे अग्ने यतस्रुक् स्रुचा संबंधः यो यजमानः त्वां इंध
ने दीप्तियुक्तं कुर्यात् यः सस्मिन्नहन् सर्वस्मिन्नहनि ते तुभ्यं त्रिः त्रिवारं सवनीये अन्नं हविर्लक्षणमन्नं कृणवत् कुर्यात्। हे जातवेदो जातानां वे
दितः अग्ने तव त्वां पोषकेण क्रत्वा इंधनादिहेतुना कर्मणा प्रसक्षत् प्रसहमानं चरीयंते जः चिकित्वान् जानन् स यजमानः द्युम्नैर्धनैर्यशोभिर्वा सि
अत्यंतं अभ्यस्तु शत्रूनभिभवतु॥ ॥अथ द्वितीया॥ ॥इध्मं यस्ते जभरच्छश्रमाणो महो अग्ने अनीकमा सपर्यन्॥ स इधानः प्रति दोषामुषासं

पुष्यंरयिंसचतेघ्नन्नमित्रान्॥२॥ हेअग्नेयोयजमानःतेतुभ्यंइध्मंहोमसाधनंसमिज्जातंजभरत्। आहरेत्। हृञ्हरणेलिङर्थेलेट्। तस्यति

ऋ॰सं॰भा॰५ पञ्चतश्चलोपइतीकारलोपः। बहुलंछंदसीतिशपःश्लुः। द्विर्वचनादिकार्यं। लेटोडाटावित्यडागमः। हृग्रहोर्भइतिभत्वं। शश्रमाणःइध्माधा

हरणेश्राम्यन्महोमहत्त्वानीकंआकारअर्थेतेजश्चसपर्यन्परिचरन्यजमानःदोषांप्रतिरात्रिंलक्ष्मीकृत्यउषसंप्रतिउषःकालंचलक्ष्मी

कृत्यकालद्वयेपीत्यर्थः। इधानःइधानःत्वांदीपयन्नलंकरोतिपुष्यन्प्रजाभिःपशुभिश्चपुष्टःसन्याजमानःअमित्रान्शत्रून्घ्नन्हिं

सन्रयिंधनंसचतेसेवतेसर्वदापश्वादिधनसमृद्धोभवतीत्यर्थः॥ ॥उरवासभरणीयेष्टिवाम्नःक्षत्रभृत्योनुवाक्या। तथाचसूत्रितं। अ

ग्निरीशेबृहतःक्षत्रियस्याचमिनेसुमतिंघोषवाइति॥ ॥सैषासूक्तेतृतीया॥ ॥अग्निरीशेबृहतःक्षत्रियस्याग्निर्वाजस्यपरमस्यरायः॥

दधातिरत्नंविधतेयविष्ठोव्यानुषङ्मर्त्यायस्वधावान्॥३॥ अग्निर्बृहतोमहतःक्षत्रियबलस्यईशेईश्वरोभवतिवर्त्तमानेर्थेलिट्। किंच अ

ग्निःपरमस्योत्कृष्टस्यवाजस्यान्नस्यरायःपश्वादेर्धनस्यचेशे। यविष्ठोयुवतमःस्वधावान्तेजस्वीचाग्निःविधतेपरिचरते। विधतिःपरि

चरणकर्मणिक्विप्ः। मर्त्यायमनुष्याययजमानायरत्नंरमणीयंधनंआनुषक्अनुषक्तंविदधातिकरोति॥ ॥अथचतुर्थी॥ ॥यच्चिद्धि

तेपुरुषत्रायविष्ठाचित्तिभिश्चकृमाकच्चिदागः। कृधीष्वस्मां अदितेरनागान्व्येनांसिशिश्रथोविष्वगग्ने॥ ॥हेयविष्ठयुवतमाग्नेयच्चि

द्धियद्यपित्वत्तुतेत्वदीयेपुरुषेआपस्थानिकेअचित्तिभिःअज्ञानैःकच्चिदागःकिंचिदपिपापंवयंचकृमतथापि। हेअग्नेअस्मान्अदितेर्भूमे

रनागान्अनागसःपापरहितानत्वंकृधिकुरु। हेअग्नेविष्वक्सर्वतोविद्यमानान्येनांसिअस्माभिःकृतानिपापानिविशिश्रथःविश्लथय

राम

१२

त्रिष्टुप्छंदस्कंअग्निदेवताकंभद्रंषळित्यनुक्रमणिका। प्रातरनुवाकाश्विनशस्त्रयोराग्नेयेक्रतौत्रैष्टुभेछंदसिइदमादिकेद्वेसूक्तेविनियुक्ते। त

थासूत्रितंभद्रंतेअग्नइतिसूक्तेइति॥ ॥तत्रप्रथमा॥ ॥भद्रंतेअग्नेसहसिन्ननीकमुपाकआरोचतेसूर्यस्य॥ रुशद्दृशेददृशेनक्तयाचिदरू

क्षितंदृशआरूपेअन्नं॥ ॥हेसहसिन्बलवन्नग्नेत्वदीयंअनीकंतेजःसूर्यस्यउपाकेसमीपभूतेदिवसइत्यर्थः। आरोचतेसमंताद्दीप्यते। रु

शत्रोचमानंदृशेदर्शनीयंतेजःनक्तयाचिद्रात्रावपिददृशेदृश्यते। आइत्ययंशब्दःनत्यर्थेवर्त्तते। आ किंच आरूक्षितंस्निग्धंदृशेदर्शनीयं

तेअन्नंपुरोडाशादिरूपंहविःरूपेरूपवतित्वयिऋत्विगादिभिर्दत्तंभवति॥ ॥अथद्वितीया॥ ॥विषाह्यग्नेगृणतेमनीषांखंवेपसातुविजातस्त

वानः॥ विश्वेभिर्यद्वावनःशुक्रदेवैःतन्नोरास्वसुमहोभूरिमन्म॥ ॥हेतुविजातमथनापारणिद्वारायज्ञादिकर्मसुबहुजन्मन्नग्नेस्तवानऋत्वि

गादिभिःस्तूयमानस्त्वं। वेपसायज्ञादिकर्मणावेपइति। कर्मनामवेपावेषः। विष्ट्वीतिकर्मनामसुपाठात्मनीषांस्तुतिंगृणतेकुर्वतेयजमानाय

खंयजमानेभ्यःस्वस्यपुण्यलोकस्यद्वारंविषाहिविष्यविवृणुइत्यर्थः। षोत्यकर्मणि। तस्माद्धातोःलोटिमध्यमपुरुषैकवचनंसिप्। तिङ्ङतिङइतिनि

घातः। हेशुक्रदीप्यमानाग्नेत्वंविश्वेभिःविश्वैःसर्वैः। बहुलंछंदसीतिभिसऐसभावः। देवैरिन्द्रादिभिःसहयत्पश्वादिधनंववनःयजमानेभ्यःप्र

यच्छसि। वनतेर्लेटि इतश्चलोपइतीकारलोपः। बहुलंछंदसीतिविकरणस्यश्लुः। श्लावितिद्विर्वचनं। हलादिशेषः। लेटोडाटावित्यडागमः। यद्वृ

त्तान्नित्यमितिनिघाताभावः। हेसुमहःशोभनतेजस्काग्नेभूरिप्रभूतंमननीयंतद्धनंनोस्मभ्यंरास्वदेहि॥ ॥महापितृयज्ञेस्विष्टकृतोग्नेःक

व्यवाहनोयष्टव्यःतस्यहे अनुवाक्ये तत्र त्वदग्नेकाव्याइतिद्वितीयानुवाक्या। तथाचसूत्रितं। त्वदग्नेकाव्यात्वन्मनीषात्वंप्रत्नथासहसाजायमान

ऋ॰सं॰भा॰५

मसे विपृचे ध्रुवक्षेमा अनवस्यंतो अर्थं ॥ तं सूर्यं हरितः सप्त यह्वीः स्पशं विश्वस्य जगतो वहंति ॥ ध्रुवक्षेमाः स्थिरनिवासाः सृष्टिकर्तारो देवासस्
वतः तमसे तमसः विपृचे पृथक्करणाय अर्थं जगत्कृत्स्नं कार्यं । अनवस्यतः अविरमंतः कुर्वंत एवं यं सूर्यं अकृण्वन् असृजन्नित्यर्थः ॥ यद्वा म
हत्यः सप्तसंख्याकाः हरितोऽश्वाः विश्वस्य समस्तस्य जगतः प्राणिसमूहस्य स्पशं प्रेरकत्वेन ज्ञातारं तं सूर्यं वहंति धारयंति ॥ अथ चतुर्थी ॥
वहिष्ठेभिर्विहरन्यासि तंतुमवव्ययन्नसितं देव वस्म ॥ दविध्वतो रश्मयः सूर्यस्य चर्मेवावाधुस्तमो अप्स्वंतः ॥ हे देव द्योतमान सूर्य त्वं ज
गन्निवहिकस्यादानार्थं तंतुं रश्मिसमूहं विहरन् निस्सारयन् असि । तं कृष्णवर्णं वस्मन् कं चराणां निवासभूतां रात्रिं अवव्ययन् अर्वाचीनं यथा
भवति तथा अकृण्वन् तिरस्कुर्वन्नित्यर्थः । वहिष्ठेभिर्वोढुमत्यंतं शक्यैरश्वैर्यासि गमनमार्गं गच्छसि । अस्यामृचि पूर्वार्धे सूर्यस्य संबंधिनो र
श्मयः किरणाः अप्स्वंतरिक्षे आप इत्यंतरिक्षनाम । आकाशं आपः पृथिवी तन्नामसु पाठात् । अंतर्मध्ये वमवत्यास्ततं तमः अंधकारं अवाधुः
तिरस्कुर्वंतीत्यर्थः ॥ ॥ अथ पंचमी ॥ ॥ अनायतो अनिबद्धः कथायं न्यङ्ङुत्तानोऽव पद्यते न ॥ कया याति स्वधया को ददर्श दिवः स्कंभः समृतः पा
ति नाकं ॥ ॥ अनायतः आयतो दूरवाची तद्विपरीतोऽनायतः आसीनः सन्नयं प्रत्यक्षेणोपलभ्यमानो मंडलाभिमानी सूर्यः अनिबद्धः केनापि बद्धो
न क्रियात् । अपि वायं सूर्यः न्यङ् अवाङ्मुखः सन् केनचित् कथा कथं नावपद्यते न हिंस्यते किं वायं उत्तानः ऊर्ध्वमुखत्वेन तिष्ठन् कथा स्वध
या केन बलेन याति गच्छति । स्वधाशब्दोऽन्नवाची अन्नत्कार्यं बलं लक्षयति । अपि च दिवो द्युलोकस्य स्कंभः स्कंभः समृतः न केन नासम वेत
र्न नाकं स्वर्गं याति पालयति को ददर्श तत्त्वतः पश्यति । न कोऽपि जानातीत्यर्थः ॥ ॥ इति तृतीयस्य पंचमे त्रयोदशो वर्गः ॥ ॥ प्रत्यग्निरुषस इति
पंचर्चं चतुर्थं सूक्तं वामदेवस्यार्षं त्रैष्टुभमाद्यं मात्रं कार्णिकोद्देवतं वा तथा चानुक्रांतं । प्रत्यग्निरिति लिंगोक्तदेवतं त्विति तु शब्दादस्या विसूक्तस्य राम

९३

लिंगोक्तदेवतात्वं । विनियोगो लैंगिकः ॥ ॥ तत्र प्रथमा ॥ ॥ प्रत्यग्निरुषसो जातवेदा अख्यद्देवो रोचमाना महोभिः ॥ आ नासत्योरुगाया रथेनेमं
यज्ञमुप नो यातमच्छ ॥ ॥ देवो द्योतमानः जातवेदाः जातधामाग्निः महोभिस्तेजोभिः रोचमानाः दीप्यमानाः उषसः प्रतिप्रति लक्ष्मीकृत्य अख्यत्
प्रबुद्धो भवति उरुगाया प्रभूतगमनौ हे नासत्यावश्विनौ रथेनोस्मदीयं इमं यज्ञं अच्छाभिमुखं उपयातं उपगच्छतं ॥ ॥ अथ द्वितीया ॥ ॥ ऊर्ध्वं के
तुं सविता देवो अश्रेज्ज्योतिर्विश्वस्मै भुवनाय कृण्वन् ॥ आप्रा द्यावापृथिवी अंतरिक्षं वि सूर्यो रश्मिभिश्चेकितानः ॥ ॥ विश्वस्मै सर्वस्मै भुवनाय
लोकाय ज्योतिस्तेजः कृण्वन् कुर्वन् सविता प्रेरको देवः ऊर्ध्वं सन्मुखं केतुं प्रकाशकं भानुं अश्रेत् आश्रयति । विचेकितानः सर्वं विशेषेण पश्यन्स
र्यः रश्मिभिः स्वकीयैः किरणैः द्यावापृथिवी द्युलोकभूलोकौ अंतरिक्षं च आप्राः समंतात् पूरयत् ॥ ॥ अथ तृतीया ॥ ॥ आवहंत्यरुणीर्ज्योति
षागान्मही चित्रा रश्मिभिश्चेकिताना ॥ प्रबोधयंती सुविताय देव्युषा ईयते सुयुजा रथेन ॥ ॥ आवहंती धनानि धारयंती अरुणीररुणव
र्णा प्रथमे कवचनेन द्वितीया बहुवचनं छांदसं । ज्योतिषा तेजसा युक्ता मही महती रश्मिभिः किरणैः चित्रा दर्शनीया चेकिताना जानती उषा
आगात् आगच्छत । किं च प्रबोधयंती सुप्तेत प्रबुद्धान् कुर्वती देवी द्योतमाना उषाः सुयुजा शोभनयुक्तेन रथेन सुविताय सुखप्राप्त्यै ईयते गच्छ
ति ॥ ॥ अथ चतुर्थी ॥ ॥ आ वां वहिष्ठा इह ते वहंतु रथा अश्वास उषसो व्युष्टौ ॥ इमे हि वां मधुपेयाय सोमा अस्मिन्यज्ञे वृषणा मादयेथां ॥ ४
हे अश्विनौ इह यागे वहिष्ठाः । हे अश्विनौ इह यज्ञे वां युवां वोढृतमा धातप्रसि धारयाः रंहणीः गंतारः अश्वासः अश्वा वायु वा उषसः उषो
देवतायाः व्युष्टौ व्युष्टकाले वहंतु समंतान्नयंतु हि यस्मात्कारणात् हे वृषणा वृषणौ कामानां वर्षितारौ हे अश्विनौ इमे सोमाः वां युवां मधुपे
यामांधाः सोमस्य पानाय अस्मिन् यज्ञे मादयेथां वर्षयेथां ॥ ॥ अथ पंचमी ॥ ॥ अनायत इति ॥ ॥ इयमृक् पूर्वं व्याख्याता ॥ ॥ इति तृतीयस्य पंचमे

चतुर्दशो वर्गः॥ ॥ अग्निर्होतेति दशर्चं पंचमं सूक्तं वामदेवस्यार्षं गायत्रं। अत्रेयमनुक्रमणिका॥ अग्निर्होता दश गायत्रमृषिर्बोधादिति द्वाभ्यां
ऋ॰सं॰भा॰५ सोमकं साहदेव्यमभ्यवदत्पराभ्यामस्याश्विनौ वायुरबोधवतेति बोधयद्दिति द्व्यृचेन सोमराजा श्रूयते। एवमाश्विनी द्व्यृचेनाश्विनोः। शिष्टाभिः तदु
राग्निः श्रूयते॥ अतस्ता एव देवताः। सूक्तविनियोगो लैंगिकः। पशौ पर्यग्निकरणे अग्निर्होता न इति आद्यस्तृचोनुवचनीयः। तथा च सूत्रितं।
अग्निर्होता न इति तिस्रः पर्यग्नये स्वाहेति प्रातरनुवाके आग्नेये क्रतौ गायत्रे छंदस्याश्विनशस्त्रे चायं तृचो विनियोगः। तथा च सूत्रितं। अग्नि
र्होता नो अध्वर इति॥ ॥ तत्र प्रथमा॥ ॥ अग्निर्होता नो अध्वरे वाजी सन्परि णीयते। देवो देवेषु यज्ञियः॥ ॥ होता देवानामाह्वाता होमनिष्पादको
वाग्निः नोस्मदीये अध्वरे यागे वाजीत्येतच्छ्लेषेयमार्कं वाजी शीघ्रगामी वोढा अश्व इव तथा देवेभ्यो हविर्वहिकः सन्परिणीयात परितः समंतान्नीय
ते। तथा च ब्राह्मणं भवति। वाजी सन्परिणीयत इति वाजिनमिव ह्येनं संतं परिणयंतीति। कीदृशोग्निः देवेषु द्योतमानेषु इंद्रादिषु मध्ये देव द्योतमा
नः यज्ञियो यष्टार्हः॥ ॥ अथ द्वितीया॥ ॥ परि त्रिविष्ट्यध्वरं यात्यग्नी रथीरिव। आ देवेषु प्रयो दधत्॥ ॥ देवेषु द्योतमानेष्विंद्रादिषु। प्रयः इ
त्यन्ननामैतत्। प्रयः यजमानैर्दत्तं अविरूपमन्नमादधत् आ समंताद्धारयन् अग्निः अंगनादिगुणविशिष्टोग्निः त्रिविष्टि त्रिवारसवनत्रयेपीत्यर्थः।
परि परितः समंतादध्वरं यजमानैः कृतं यागं याति गच्छति। एष गमने दृष्टांतः रथीरिव रथवान्पुरुषो यथा शीघ्रं याति तद्वत्। तथा च ब्राह्मणं। प
रि त्रिविष्ट्यध्वरं यात्यग्नी रथीरिवेत्येष हि रथीरिवाध्वरं पर्येतीति॥ ॥ अथ तृतीया॥ ॥ परि वाजपतिः कविरग्निर्हव्यान्यक्रमीत्। दधद्रत्नानि दा
शुषे॥ ॥ वाजानामन्नानां पतिः पालकः परि वाजपतिः कविरित्येष हि वाजानां पतिरिति ब्राह्मणं। कविः क्रांतदर्शी मेधावी वा। दाशुषे हविर्दत्तवते
यजमानाय रत्नानि रमणीयानि धनानि दधत् प्रयच्छन् अग्निर्हव्यानि हवींषि पर्यक्रमीत् परितः क्रमते व्याप्नोति॥ ॥ अथ चतुर्थी॥ ॥ अयं यः सृं

राम

१४

थिली कृत्स्॥ ॥ अथ पंचमी॥ ॥ महश्चिदग्न एनसो अभीक ऊर्वाद्देवानामुत मर्त्यानां। मा ते सखायः सदमिद्रिषाम यच्छा तोकाय तनयाय शं योः॥ ५॥
अभीके हे अग्ने देवानामिंद्रादीनां अभीके अंतिके इत्यंतिकनामैतत्। अस्माभिर्यत्त्यायं कृतं महश्चिन्महतोपि ऊर्वाद्धिंसकात् तादृशादेनसः पापात् त्वदीयाः
सखायो मित्रभूताः स्तोतारो वयं सदमित् सर्वदैव मा रिषाम मा हिंसिता भूम। हे अग्ने त्वं तोकाय पुत्राय तनयाय पौत्राय शं पापरूपोपद्रवाणां शांति
युयोः सुकृतोत्पादितं सुखं च यच्छ देहि॥ ॥ अथ षष्ठी॥ ॥ यथा ह त्यद्वसवो गौर्यं चित्पदि षिताममुंचता यजत्राः। एवो ष्व१स्मन्मुंचता व्यंहः प्र तार्य
ग्ने प्रतरं न आयुः॥ ॥ यजत्रा यजनीयाः पूजार्हा हे वसवो निवासयितारः अग्नेयः यूयं यथा ह यथैव त्यत् त्यां तां पदि पादे सितां बद्धां गौर्यं चित् गौरीं गा
मपि अमुंचत। व्यक्तवीतां भूयास्त। एवो एवमेव अस्मदस्मत्तः अंहः पापं सु अत्यंतं वि मुंचत। विमुक्तं कुरुत। व कुरु वचनं पूजार्थं हे अग्ने त्वं च प्रत
रं प्रकृष्टं नोस्मदीयमायुः प्रतारि प्रवृद्धं क्रियतां॥ ॥ इति तृतीयस्य पंचमे द्वादशो वर्गः॥ ॥ प्रत्यग्निरिति पंचर्चं तृतीयं सूक्तं वामदेवस्यार्षं त्रिष्टुभ
मैयं। तत्रेमं चवाणी भिधेयाः प्रभृति देवतं वा। तथा चानुक्रांतं। प्रत्यग्निः पंच लिंगोक्तदैवतं त्वेक इति। लैंगिको विनियोगः॥ ॥ तत्र प्रथमा॥ ॥ प्र
त्यग्निरुषसामग्रमख्यद्विभातीनां सुमना रत्नधेयं। यातमश्विना सुकृतो दुरोणमुत्सूर्यो ज्योतिषा देव एति॥ ॥ अत्र प्रत्यपात् सुमनाः शोभनम
नस्कोग्निः विभातीनां व्युच्छंतीनामुषसां उषोदेवतानां रत्नधेयं रत्नधानं धनप्रकाशकमित्यर्थः॥ ॥ अथ द्वितीया॥ ॥ ऊर्ध्वं भानुं सविता देवो अश्रेद्द्र
प्सं दविध्वद्गविषो न सत्वा। अनु व्रतं वरुणो यंति मित्रो यत्सूर्यं दिव्यारोहयंति॥ ॥ सविता प्रेरको देवः ऊर्ध्वमुन्मुखं भानुं आ अश्रेत् आश्रयति। यद्यदा रश्मि
यः सूर्यं दिवि द्युलोके आरोहयंति आरोहणं कारयंति तदा वरुणो रात्र्यभिमानी देवः अन्ये देवाश्च व्रतेन तत्सर्वं धिकर्म अनुयंति। अनुगच्छंति। अनुग
मने दृष्टांतः उच्यते। द्रप्सं पार्थिवं रजो दविध्वत् धुन्वन् विकिरन्नित्यर्थः। गविषो गाः इच्छन् सत्वा न वृषभ इव तद्वत्॥ ॥ अथ तृतीया॥ ॥ यं सीमकृण्वन्त

ऋ॰सं॰भा॰५

पगम्याश्वावेनस्मात्त्वत्(ष्णी)प्रीनेमवादित्यर्थः॥ ॥ अथनवमी॥ ॥ एषवांदेवावश्विना कुमारःसाहदेव्यः॥ दीर्घायुरस्तु सोमकः॥ ॥ देवौ द्योतमा
नौहेअश्विनाअश्विनौवां युवांतर्पकःसाहदेव्यःसहदेवस्य पुत्रः कुमारःसोमकः सोमकाभिधानः एषराजादीर्घायुरस्तु। शतायुष्कोभवतु
एतमुहैवप्रोचतुःपर्वतनारदौसोमकायेत्यादिना सर्वंहैवमहाराजानःआसुरित्यनेन ब्राह्मणेनसोमकस्याजत्वंस्पष्टीकृतं॥ ॥ अथदश
मी॥ ॥ तंयुवंदेवावश्विनाकुमारंसाहदेव्यं॥ दीर्घायुषंकृणोतन॥ ॥ हे देवावश्विनाद्योतमानावश्विनौयुवंयुवांसाहदेवस्य पुत्रंकुमारंसोम
काख्यंराजानंदीर्घायुषंशतायुष्कंकृणोतन कुरुतं। अनन्तरेणास्य कुमारस्यादीर्घायुरश्विनोरु पिरपचेतेत्यर्थः॥ ॥ इतितृतीयस्यपंचमे
षोडशोवर्गः॥ ॥ आसत्योयातुमघवां ऋजीषीद्रवंत्वस्यहरयउपनः॥ तस्माइदंधःसुषुमासुदक्षमिहाभिपित्वंकरतेगृणानः॥ ॥ आस
त्योयात्वित्येकविंशत्यृचंषष्ठंसूक्तंत्रैष्टुभमैंद्रं। अत्रेयमनुक्रमणिका॥ आसत्यःसैकेद्रमिति। तत्रेंद्रमित्युक्तत्वादष्यधिकारेनिवृत्तइद
त्यवगम्यते। चतुर्विंशेहनिमाध्यंदिनसवनेमैत्रावरुणशस्त्रेइदंद्वितीयमहीनसूक्तं। तथाचसूत्रितं॥ आसत्योयात्वित्यहीनसूक्तंद्विती
यंमैत्रावरुणइति। अमूल्हेदशरात्रेनवमेहनिनिष्केवल्यशस्त्रमिति॥ ॥ तत्रप्रथमा॥ ॥ आसत्योयात्विति॥ ॥ ऋजीषीऋजीषीशब्देनगि
ष्ठोविगतसारःसोमोभिधीयते। तद्वानसत्यःसत्यवान्मघवान्धनवानिंद्रोनोस्माकंउपसमीपेआयातुआगच्छतु। किंचअस्येंद्रस्यहर
योश्वाःनोस्माकंउपसमीपेद्रवंतुआगच्छंतु। वयंयजमानइहास्मिन्यज्ञेतस्माइंद्रायसुदक्षंशोभनबलंसारोपेतमित्यर्थः। इत्इदंप्रत्य
क्षेणपरिभ्यमानमंधःअन्नरूपंसुषुमअभिषुतंकुर्यामः गृणानःअस्माभिःस्तूयमानइंद्रःअभिपित्वंअस्मदपिमतप्राप्तिंकुरुतेकरोतु॥ ॥

२५

अथद्वितीया॥ ॥ अवस्यशूराध्वनोनांतेस्मिन्नोअद्यसवनेमंदध्यै॥ शंसात्युक्थमुशनेववेधाश्चिकितुषेअसुर्यायमन्म॥ ॥ हेशूरशत्रूणा
मभिभवसमर्थेंद्र अद्येदानींअस्मिन्सवनेमाध्यंदिनाख्येमदाध्यैत्वांमादयितुंनोस्मान्अवस्यविमुंच। तत्रदृष्टांतः। अध्वनोगंतव्यस्यमा
र्गस्यांतेसमीपेपश्वात्रमप्राप्ताययथाश्वंमुंचंति। तद्वत्उशनेवकाव्यइववेधाःशंसितायजमानः। हेइंद्रचिकितुषेसर्वंजानतेअसुर्यायअसुराणां
हिंसकायतुभ्यंमन्ममननीयंउक्थंशस्त्ररूपंस्तोत्रंशंसातिशंसनंकरोति॥ ॥ अथतृतीया॥ ॥ कविर्ननिण्यंविदथानिसाधन्वृषायत्सेकं
विपिपानोअर्चात्॥ दिवइत्थाजीजनत्सप्तकारूनह्नाचिच्चक्रुर्वयुनागृणंतः॥ ॥ कविर्मेधावीनिण्यंनिण्यमित्यंतर्हितनामैतत्। अंतर्हि
तंगूढमर्थमिव दिवथानिवेदनीयानिकार्यजातानिसाधन्वृषाकामानांवर्षितेंद्रःयद्यदासेकंसेवनीयंसोमंविपिपानःअत्यर्थंपिबन्अ
र्चात्विशेषेणअर्चतिसोमपानेश्रद्धांकरोतीत्यर्थः। तदानींदिवोमुष्यात्लोकात्इत्थासत्यमेवसप्तसप्तसंख्याकान्कारून्रश्मीन्जीजन
त्अजीजनत्जनयति। गृणंतःस्तूयमानारश्मयः। वयुनावयुनानि। मनुष्याणांज्ञानानिअह्नाचित्। दिवसेनापिचक्रुःकृतवंतः॥ ॥ अ
थचतुर्थी॥ ॥ स्वर्यद्वेदिसुदृशीकमर्कैर्महिज्योतीरुरुचुर्यद्धवस्तोः॥ अंधातमांसिदुधिताविचक्षेनृभ्यश्चकारनृतमोअभिष्टौ॥ ॥ यद्य
यदास्वर्लोकमहिमहत्प्रभूतंज्योतिस्तेजोरूपंयत्स्वःयोद्युलोकः अर्कैःरश्मिभिःसुदृशीकंसुष्ठुदर्शनीयंवेदिअवेदिज्ञायतेतदानींदेवाःत
स्मिन्स्वर्गवस्तोर्निवासार्थंरुरुचुर्दीप्तियुक्ताबभूवुः नृतमोनेतृतमःसूर्यःअभिष्टौअभ्यागमनेनृभ्योनृणांविचक्षेविशेषेणदर्शनाय
अंधाअंधकाररूपाणिविज्ञानितमांसिदुधितानिनाशितानिचकार। कृतवान्॥ ॥ अथपंचमी॥ ॥ ववक्षइंद्रोअमितमृजीष्यु१भेआ

राम

ऋ॰ सं॰ भा॰ ५

पप्रौ रोदसी महित्वा॥ अतश्चिदस्य महिमा वि रेच्यभि यो विश्वा भुवना बभूव॥ ऋजीषी ऋजीषं शोषं येन निष्पीडिते विगतसारः सोमोऽभिधी
यते तद्वानिंद्रः परमैश्वर्ययुक्तः॥ अमितं इयत्तारहितं महिमानं ववक्षे उवाह॥ किं च महित्वा महत्त्वेन स्वेन महिम्ना उभे रोदसी उभे द्यावापृथिव्यौ आ
पप्रौ समंतादपूरयत्॥ य इंद्रः विश्वा भुवना सर्वाणि भुवनानि अभिबभूव तिरस्कार॥ अतश्चिदेभ्योऽपि विश्वेभ्यो भुवनेभ्यः अस्येंद्रस्य महि
मा विरेचि अतिरिरिचे॥ अधिको बभूवेत्यर्थः॥ इति तृतीयस्य पंचमे सप्तदशो वर्गः॥ अथ षष्ठी॥ विश्वानि शक्रो नर्याणि विद्वानपो
रिरेच सखिभिर्निकामैः॥ अश्मानं चिद्ये बिभिदुर्वचोभिर्व्रजं गोमंतमुशिजो वि वव्रुः॥ विश्वानि समस्तानि नर्याणि मनुष्याणां हितानि वृ
ष्ट्यादीनि कार्याणि विद्वान् जानन् शक्रः समर्थ इंद्रः निकामैः निकामयमानेभ्यः सखिभिर्मित्रभूतेभ्यो मरुद्भ्यः व्यत्ययेन चतुर्थ्यर्थे तृतीया॥
अपो वृष्टिलक्षणान्युदकानि रिरेच रिक्तीचकार॥ इंद्रः सस्यादिफलसिद्ध्यादिफलसिद्ध्यर्थं मेघस्थान्युदकानि मरुद्भ्यो दत्तवानित्यर्थः॥ यद्वा
निकामैर्निकामयमानैः सखिभिर्मरुद्भिः सहितः सन् अपो नभसः सकाशात् दप इत्यंतरिक्षनामैतत्। अत्र विभक्तिव्यत्ययः। रिरेच यातिरि
क्तीबभूव। ये मरुतः वचोभिर्वर्षरूपै ध्वनिभिः अश्मानं चित् पर्वतमिति मेघं। ग्रावमेघनामैतत्। बिभिदुः आभेदुः उशिजः कामयमानास्ते मरु
तः गोमंतं गोभिरुपेतं व्रजं अंगिरसां संबंधिगोस्थानं विवव्रुः आच्छादयामासः॥ अथ सप्तमी॥ अपो वृत्रं वव्रिवांसं पराहन्प्रावत्ते वज्रं
पृथिवी सचेताः॥ प्रार्णांसि समुद्रियाण्यैनोः पतिर्भवं छवसा शूर धृष्णो॥ हे इंद्र प्रावत राक्षसादित्य प्रकर्षेण लोकान् पालयित्वा ते
त्वदीयं वज्रं आपो वृष्टिलक्षणान्युदकानि वव्रिवांसं आवरकं वृत्रं मेघं पराहन् प्रकर्षेण प्रेरयति स्म पृथिवी भूमिः सचेताः चेतनावतीव या

राम

जये पुरो दैववाते समिध्यते॥ द्युमाँ अमित्रदंभनः॥ यः प्रसिद्धो यं प्रक्षेपेणोपलभ्यमानोऽग्निः दैववाते दैववातस्य सूनौ संजये संजयो नाम कश्चि
त्सोमयाजी तस्मिन् निमित्तभूते समितिद्यागार्थमित्यर्थः। संजयस्य यष्टृत्वं तैत्तिरीया आमनंति। वासिष्ठो ह सात्यहव्यो देवभागं पप्रच्छ। यत्सृंजयान्
बहुयाजिनोऽपीयजत इति। पुरः पूर्वस्यां दिशि स्थितायामुत्तरवेद्यां समिध्यते सम्यक् दीप्यते अमित्रदंभनः शत्रूणां हिंसकः सोऽग्निः द्युमान् दीप्ति
मान् भवतीति शेषः॥ अथ पंचमी॥ अस्य घा वीर ईवतोऽग्नेरीशीत मर्त्यः॥ तिग्मजंभस्य मीळ्हुषः॥ वीरः ऋत्विक् ईवतः गंतुः मर्त्यो मरणधर्मा य
जमानः तिग्मजंभस्य तीक्ष्णतेजसः मीळ्हुषः अभिलषितफलानां सेक्तुः ईवतो गमनवतो अस्याग्नेः ईशीत ईश्वरो भवेत्। घेति पादपूरणः। एतेन
यजमानस्य आत्माभीष्टफलं कारयितुं समर्थो भवतीत्यर्थः॥ इति तृतीयस्य पंचमे षोडशो वर्गः॥ अथ षष्ठी॥ तमर्वंतं न सानसिम
रुषं न दिवः शिशुं॥ मर्मृज्यंते दिवेदिवे॥ यजमानाः अर्वंतं न अश्वमिव सानसिं संभजनीयं दिवः शिशुं न द्युलोकस्य पुत्रभूतं सूर्यमिव अ
रुषं आरोचमानं तमग्निं दिवेदिवे प्रतिदिनं मर्मृज्यंते भृशं परिचरणं कुर्वंति॥ अथ सप्तमी॥ बोधद्यन्मा हरिभ्यां कुमारः साहदेव्यः॥ अच्छा न
हूत उदरं॥ साहदेव्यः सहदेवो नाम राजा कुमारः सोमकाभिधो राजा हरिभ्यां अश्वाभ्यां मां यदा बोधयत् बोधयामास। इमौ न वा अश्वा
वितितदाहं अच्छाभिमुख्येन कुमारेण हूतः सन् नोदरं तावत्प्रापलब्धान् निर्गतवानस्मि॥ अथाष्टमी॥ उत त्या यजता हरी कुमारात्साह
देव्यात्॥ प्रयता सद्य आ ददे॥ उत अपि च साहदेव्यात् सहदेवस्य पुत्रात् कुमारात् सोमकाद्राज्ञः यजता पूजनीयौ प्रयता प्रयतौ दत्तौ न्यासौ तौ प्रसि
द्धौ हरी अश्वौ सद्यः यस्मिन् दिने तौ आहूतः तस्मिन्नेव दिने आददे आदत्तवानस्मि मंत्रद्रष्टा ऋषिः बोधदित्यृग्द्वयेन कुमारमश्वयाच्ञया भु

ऋ॰सं॰भा॰५

जघानं॥ तदनंतरमतिप्रीत्यानयोः सख्यमभवत्॥ सख्यानंतरमिंद्र एनमपि स्वकीयं गृहं प्रापयामास॥ तत्र शचींद्रपत्नी आगता सती तौ समा
नरूपौ दृष्ट्वा अयमिंद्रः अयं कुत्स इति विवेकाभावेन संशयं चकारेति। अनयाख्यायिकया प्रतिपाद्यमानोर्थोऽत्र प्रतिपाद्यते। हे इंद्र दस्युघ्नाद
स्यूनां शत्रूणां हंता मनसा युक्तस्त्वं अस्तं कुत्सस्य गृहं अपप्तमिति गृहनामैतत्॥ आयाहि आगाः तुझ्यं ओ॒ तु कुत्सश्च तेन तव सं वोधिनि स
ख्यं निकामः नितरां कामयमानो भुवदभवत्॥ तास्तौ युवां स्वो योनौ स्वकीये स्थाने निषदतं न्यसीदतं उपविष्टावभूतं। ऋतचित्सत्यदर्शिना
री इंद्रस्य भार्या शची सरूपा सरूपौ समानरूपौ युवां विचिकित्सन् संशयं चकार॥ इति तृतीयस्य पंचमे षष्ठो वर्गः॥ अथैकादशी॥
॥ यासि कुत्सेन सरथमवस्युः तोदो वातस्य हर्योरीशानः॥ ऋज्रा वाजं न गध्यं युयूषन् कविर्यदहन्पार्याय भूषात्॥ हे इंद्र अवस्युः कुत्स
स्य रक्षणमिच्छन्। छंदसि क्यच परेच्छायामपि दृश्यते। तोदस्तोदकः शत्रूणां हिंसकः वातस्य वायुसंज्ञयो वेगवतो हर्योरश्वयोरीशान ईश्व
रस्त्वं कुत्सेन कुत्साख्येन राजर्षिणा सरथं यासि गच्छसि। गध्यं युयूषन्नित्यपि निगमो भवतीति निरुक्तं। वाजं न अन्नमिव ऋज्रा ऋ
जुगामिनावश्वौ युयूषन्। स्वकीये रथे योजयेत्। कविः प्राज्ञः कुत्सः यत् अस्मिन्नहनि दिवसे पार्याय परेणाय आपन्निस्तारणाय भूषात् प्रभ
वते अस्मिन्नेव दिने कुत्सेन सरथं यासीति पूर्वेणसंबंधः॥ ॥ अथ द्वादशी॥ ॥ कुत्साय शुष्णमशुषं नि बर्हीः प्रपित्वे अह्नः कुयवं सहस्रा॥
सद्यो दस्यून्प्र मृण कुत्स्येन प्र सूरश्चक्रं वृहतादभीके॥ शुष्णपिपुमित्यस्यामृचि प्रतिपादितोर्थः कुत्सायेत्यनेन ऋकद्वयेन स्पष्टीक्रिय
ते। हे इंद्र त्वं कुत्साय कुशार्थं अशुषं शुष्णमिति सुखनामैतत् तद्रहितं अत्र दीर्घाभावः॥ शुष्णं शुष्णनामानमसुरं निबर्हीः न्यबर्हीः अवधीः। त

१७

थादिवसस्य प्रपित्वे प्रक्रमे पूर्वाह्णे कुयवं कुयवनामानमसुरं च हतवानसि। तथा सद्यः सहस्रा सहस्रेण बहुभिः परिजनैः सह सद्याय
स्मिन्काले कुयवमवधीः तस्मिन्काले एव कुत्स्येन कुत्स इति वज्रनामैतत्। कुत्स एव कुत्स्यं वज्रं तेन दस्यून् शत्रून् प्रमृण जहि मृते र्थे लोट
हितवानसि। तथा सूरः प्रेरकस्य सूर्यस्य चक्रमायुधं च अभीके समीपे संग्रामे वा प्रवृहतात् प्रकर्षेण छिन्नवासि॥ ॥ अथ त्रयोदशी॥ ॥ त्वं पिप्रुं
मृगयं शूशुवांसमृजिश्वने वैदथिनाय रंधीः॥ पंचाशत्कृष्णा नि वपः सहस्रात्कं न पुरो जरिमा वि दर्दः॥ ॥ हे इंद्र त्वं पिप्रुं पिप्रुनामानमसुरं शु
शुवांसं प्रवृद्धं मृगयं मृगयनामानं चासुरं च हतवानसि। किं च सत्त्वं वैदथिनाय विदथिनः पुत्राय ऋजिश्वने ऋजिश्वनाम्ने राजे रंधीः वशम
नयः। पंचाशतं पंचाशत्संख्याकानि सहस्रा सहस्राणि कृष्णा कृष्णवर्णानि रक्षांसि नि वपः न्यवपः अवधीः। तथा सत्त्वं जरिमा जरा अत्कं न व
यो विशेषं रूपमिव पुरः शंबरस्य नगराणि विदर्दः दारितवानसि॥ ॥ अथ चतुर्दशी॥ ॥ सूर उपाके तन्वं१ दधानो वि यत्ते चेत्यमृतस्य वर्पः॥
मृगो न हस्ती तविषीमुषाणः सिंहो न भीम आयुधानि बिभ्रत्॥ ॥ हे इंद्र सूरः प्रेरकस्य सूर्यस्य उपाके समीपे त्वं त्वदीयं शरीरं यद्दा दाद
धानो धरतो भव। तदा अमृतस्य मरणरहितस्य तेत्वदीयं वर्पो रूपं विचेति विशेषेण भासमानं च भवेत्यर्थः। अपि चा
हे इंद्र हस्ती मृगेन गजविशेषो मृग इव तविषीं परेषां बलं मुषाणो ददन् आयुधानि वज्रादीनि शस्त्राणि बिभ्रद् बिभ्राणस्त्वं सिंहो न सिंह इव भी
मो भयंकरो भूः॥ ॥ अथ पंचदशी॥ ॥ इंद्रं कामा वसूयंतो अग्मन्त्स्वर्मीह्ळे न सवने चकानाः॥ श्रवस्यवः शशमानास उक्थैरोको न रण्वा सु
दृशीव पुष्टिः॥ ॥ कामाः राक्षसादिभयनिवारणार्थं इंद्रं कामयमाना वसूयंतः पश्वादिधनमिच्छंतः स्तोतारः परमैश्वर्ययुक्तं अग्मन् आगमन्

राम

शब्दं तिवर्त्तमानेर्थे छंदसो लुङ् कीदृशाः स्तोतारः स्वमीळ्हे न युधे इव सवने यज्ञे वक्तारः प्रीयमानाः अवस्यो वाजकामोः उक्थैः स्तोत्रैः शशमा
 नासः शंसमाना रुरुवंतः तदा सायुमिंद्रः शुष्णकोनसोत्पणामावासदृव भवति प्रवारमणीया सुदृशीव पुष्टिः शोभनदर्शना लक्ष्मीरिव भवति॥
॥ इति तृतीयस्य पंचमे एकोनविंशो वर्गः॥ ॥ अथ षोडशी॥ ॥ तमिद्व इंद्रं सुहवं कृणवेम यस्मा चकार नर्या पुरूणि। यो मावते जरित्रे गध्यंचि
न्मक्षू वाजं भरति स्पार्हराधाः॥ ॥ यः इंद्रः नर्याणि मनुष्यहितानि पुरूणि बहूनि मातानि प्रसिध्यानि कर्माणि चकार अकरोत् किंच। स्पा
र्हराधाः स्पृहणीयधनो य इंद्रः मावते मम सदृशाय जरित्रे स्तोत्रे गध्यं चित् ग्राह्यं संयोजनीयमपि वाजं अन्नं इक्षु शीघ्रं भरति आहरति
वयं स्तोतारः हे यजमानाः वो युष्मभ्यं तमित् तमेवेंद्रं सुहवं शोभनमाह्वानं यथा भवति तथा कृणवेम आह्वयामि॥ ॥ अथ सप्तदशी॥ ॥
तिग्माय दंतरशनिः पताति कस्मिंश्चिच्छूर मुहुके जनानां॥ घोरा यदर्य समृतिर्भवात्यध स्मा नस्तन्वो बोधि गोपाः॥ ॥ हे शूर विक्रांत इं
द्र यदा कस्मिंश्चिदपि जनानां मनुष्याणां मुहुके मोहके युद्धे अंतः अस्माकं मध्ये तिग्मा तीक्ष्णा अशनिः पताति पतेत्। हे अर्य स्वा
मिन्निंद्र यद्यदा अस्माकं शत्रुभिः सह घोरा भीमरूपा समृतिर्युद्धं भवाति भवेत्। अध तदानीं नोस्मदीयस्य तन्वः शरीरस्य गोपाः रक्षकः
बोधि स्म अबोधि शत्रुभ्यः सकाशादस्मान् रक्षकत्वेन बुद्धवानसि खलु॥ ॥ अथाष्टमी॥ ॥ भुवोविता वामदेवस्य धीनां भुवः सखावृको राम
वाजसातौ। त्वामनु प्रमतिमाजगन्मोरुशंसो जरित्रे विश्वध स्याः॥ ॥ हे इंद्र त्वं वामदेवस्य वामदेवाख्यस्य मे मम संबंधीनीनां धीनां
कर्मणां अविता रक्षिता भुवो भव। अवृको हिंसारहितस्त्वं वाजयुधे सखा मे मम सुहृत् भुवः भव। हे इंद्र वयं प्रमतिं प्रकृष्टज्ञानं त्वामनु लक्षीकृ

१८

संगता बभूव रुक्मोत्सर्पणी इति ल हे शूर विक्रांतेंद्र त्वं उरुशंसा बलेन पतिर्भवन लोकानां पालकः सन् समुद्रियाणि समुद्रसंबंधीनि अर्णांसि भासि:
स्थितानि उदकानि प्रेणोः प्रेरको बभूव॥ ॥ अथाष्टमी॥ ॥ अपो यदद्रिं पुरुहूत दर्दराविर्भुवत्सरमा पूर्व्यं ते। स नो नेता वाजमा दर्षि भूरिं गोत्रा रुज
न्नंगिरोभिर्गृणानः॥ ॥ हे पुरुहूत बहुभिः राहूतेंद्र यद्यदा अपः प्राप्ति वृष्टिलक्षणान्युदकानि लक्षीकृत्य अद्रिं मेघं दर्दः विदारितवानसि सर
मा देवशुनी पूर्व्यं पुरातनं तुभ्यं पणिभिः राहृतं धनं गोधनं आविर्भुवत् प्रकाशयामास। अंगिरोभिः ऋषिभिः गृणानः स्तूयमानः सन् गोत्रा
गोत्राण्यपणिभिः जन् नो अस्मान् भूरिं प्रभूतं वाजं अन्नं तेता प्रापयिता सत्वं आदर्षि आदरं कृतवानसि॥ ॥ अथ नवमी॥ ॥ अच्छा कविं नृमणो गाः
अभिष्टौ स्वर्षाता मघवन्नाधमानं। ऊतिभिस्तमिषणो द्युम्नहूतौ निमायावान ब्रह्मा दस्युरर्त॥ ॥ हे द्युतन् धनवन् इंद्र नृमणः नृभिर्मनु
ष्यैर्मन्यत इति नृमणः स्व कविं मेधाविनं कुत्सं अच्छ गाः अभ्यगाः किंच स्वर्षाता स्वर्षं न तस्य सानो दानेन निमित्ते अभिष्टौ रवेरभिगमे सति ना
धमानं सुखार्थं त्वां याचमानं कुत्सं ऊतिभिः शत्रुकृतोपद्रवपरिहाररूपैः रक्षणैः प्रेरितवानसि। मायावान् कपटवान् अब्रह्मा ऋत्विग्भिः
क्रियमाणसर्वकर्मजातमनुज्ञारूपेण जानन् ऋत्विग्भिः द्रोषी ब्रह्मशब्देनोच्यते। स न विद्यते यस्य सो दब्रह्मा वेदोक्तकर्मस्वास्तिक्यरहित इ
त्यर्थः दस्युः कुत्सस्य शत्रुः हतवानित्यर्थः॥ ॥ अथ दशमी॥ ॥ आदस्युघ्ना मनसा याह्यस्तं भुवत्ते कुत्सः सख्ये निकामः॥ स्वे योनौ निषदतं
सरूपा वि वां चिकित्सदृतचिद्ध नारी॥ ॥ अत्र काचिदाख्यायिका श्रूयते कयं रुरुनामकः कश्चिद्राजर्षिः तस्य पुत्रः कुत्साख्यो राजर्षिरासीत
स च कदाचिच्छत्रुभिः सह युयुत्सुः संग्रामे स्वयमशक्तः सन् शत्रूणां हननार्थमिंद्रस्याह्वानं चकार। स चेंद्रः कुत्सस्य गृहमागत्य तस्य शत्रून्

ऋ॰सं॰भा॰५

चेसप्तमंसूक्तं॥ अत्रेयमनुक्रमणिका। त्वंमहाँ असि त्र्यूना मवपादप्ति असि त्र्यूनायजमानानांहोतेत्येकपदाविराट् शिष्टाविंशतिः त्रिष्टुभः।
इंद्रोदेवता समूळ्हे दशरात्रे षष्ठेहनि निष्केवल्ये इदं सूक्तं विनियुक्तं तथासूत्रितं। त्वंमहाँ इंद्र तुभ्यमिति निष्केवल्यमिति॥ ॥ तस्मिन्सूक्ते प्र
थमा॥ ॥ त्वंमहाँ इंद्र तुभ्यं हक्षा अनुक्षत्रं मंहना मन्यत द्यौः॥ त्वं वृत्रं शवसा जघन्वान्त्सृजः सिंधूँरहिना जग्रसानान्॥ ॥ हे इंद्र त्वं महान्
प्रभूतो भव। क्षाः पृथिवी क्षा इति पृथिवीनामैतत्। महनाम हत्त्वेन युक्तं असती तुभ्यं हत्वदर्थं भव क्षत्रं त्वदीयं बलं अनुमन्यत अन्वमन्य
त अनुमतीं चकार। अहिना वृत्रेण जग्रसानान् जग्रहाणान् ग्रस्तान् ग्रसतेर्लिटः कानजादेशः सिंधून् सृजः असृजः सृष्टवानसि॥ ॥
॥ अथ द्वितीया॥ ॥ तव त्विषो जनिमन्रेजत द्यौ रेजद्भूमिर्भियसा स्वस्य मन्योः॥ ऋघायंत सुभ्वः पर्वतास आर्दन्धन्वानि सरयंत आपः॥
॥ हे इंद्र त्विषो दीप्यमानस्य त्वदीये जनिमन् जन्मनि सति द्यौरंतरिक्षं स्वस्य त्वदीयात् मन्योः कोपात् पंचम्यर्थे षष्ठी भियसा जातभयेनार
वत् अरेजत। अकंपयत्। भूमिश्चारेजत्। कंपमाना बभूव। सुभ्वो महांतः पर्वतासः पर्वताः मेधाः धन्वानि उदकारहिता आपः अपः सर
यंति गमयंति॥ ॥ अथ तृतीया॥ ॥ भिनद्गिरिं शवसा वज्रमिष्णन्नाविष्कृण्वानः सहसान ओजः॥ वधीद्वृत्रं वज्रेण मंदसानः सरन्नापो ज राम
वसा हतवृष्णीः॥ ॥ सहसानः शत्रूणामभिभवन् ओजस्तेजः आविष्कृण्वानः आविष्कुर्वन्निंद्रः वज्रमिष्णन् प्रेरयन् शवसा बलेन
सर्वजातं भिनत् अभिनत्। बिभेद। किंच मंदसानः सोमेन मोदमान इंद्रः वज्रेण वृत्रं वृत्रनामानमसुरं वधीत्। जघान ततः आपः वृत्रेण रुता
न्युदकाः हतवृष्णीः हतो रक्षिता यासां ताः हतवृष्ण्यः ताः वृत्रघातानंतरं निवारणरहिताः अन्यः जवसा वेगेन सरन् अगच्छन्॥ ॥ अथ चतुर्थी॥

१९

॥ सुवीरस्ते जनिता मन्यत द्यौरिंद्रस्य कर्ता स्वपस्तमो भूत्॥ य ईं जजान स्वर्यं सुवज्रमनपच्युतं सदसो न भूम॥ ॥ हे इंद्र यः प्रजापतिस्त्व
यं ऋत्विगादिभिः श्रुत्यं सुवज्रं शोभनवज्रोपेतं सदसः स्वकीयात् स्वर्गाद्यात् स्थानात् अपच्युतं विचाररहितं चानति समुद्धृत्यार्थे भूम।
भूम्ना महत्त्वेन युक्तं ईं एनं त्वां जजान। अजीजनत्। जनजनने इति धातुः। द्यौ द्योतमानः ते तव जनिता जनयिता स प्रजापतिः सुवीरः शो
भनपुत्रवान् अहमस्मीति मन्यत। अमन्यत। किंच इंद्रस्य कर्ता इंद्रस्य जनयिता प्रजापतिः स्वपस्तमः अत्यंतं शोभनकर्मा भूत्॥ ॥ अथ
पंचमी॥ ॥ य एक इच्च्यावयति प्र भूमा राजा कृष्टीनां पुरुहूत इंद्रः॥ सत्यमेनमनु विश्वे मदंति रातिं देवस्य गृणतो मघोनः॥ ॥ कृष्टीनां स
वसोः प्रजानां राजप्रभुः पुरुहूत बहुभिराहूतः एक इत् देवानां मध्ये मुख्य एव। य इंद्र भूम भूमं निष्पन्नं शत्रुभ्यो भयं च्यावयति। प्रकर्षेण
नाशयति। विश्वे सर्वे यजमानाः मघोनः मघवतः हविर्लक्षणधनवत इत्यर्थः। देवस्य इंद्रस्य मयात् द्योतमानस्य गृणतः स्तुवतः रातिं बंध
मेनमिंद्रं अनु लक्ष्य सत्यमेव वदंति स्तुवंति॥ ॥ इति तृतीयस्य पंचमे एकविंशो वर्गः॥ ॥ अथ षष्ठी॥ ॥ सत्रा सोमा अभवन्नस्य विश्वे सत्रा
मदासो बृहतो मदिष्ठाः॥ सत्राभवो वसुपतिर्वसूनां दत्रे विश्वा अधिथा इंद्र कृष्टीः॥ ॥ विश्वे सर्वे सोमाः अस्य इंद्रस्य सत्रा सत्रेति सत्यना
मैतत्। सत्यमेव प्रभूता अभवन्। किंच मदा सोमदाः मदकराः सोमाः बृहतो महतो स्येंद्रस्य मदिष्टाः मादयितृतमाः सत्रा सत्यमेवाभवन्।
हे इंद्र त्वं वसुपतिर्धनपतिः न केवलं धनपतिः किंतु वसूनां सर्वेषां पश्वादीनां धनानां पतिः सत्रा सत्यमेव भवाभवसि। हे इंद्र त्वं दत्रे धास
निमित्तभूते सति विश्वाः सर्वाः कृष्टीः स्तोत्रीः प्रजाः अधाधारयसि॥ ॥ अथ सप्तमी॥ ॥ त्वमध प्रथमं जायमानोमे विश्वा अधिथा इंद्र कृष्टीः।

ऋ॰सं॰भा॰५

त्वं प्रतिप्रवत आशयानमहिं वज्रेण मघवन्वि वृश्चः॥ ॥ अध अपि च प्रथममेव जायमानस्त्वं अमेव वृत्रनिमित्ते भये सति विश्वाः सर्वाः कृष्टीः
प्रजाः अधिथाः रक्षकत्वेन धारयसि। हे मघवन् धनवन्निंद्र त्वं प्रतिप्रवतः प्रतिप्रवणात् उदकवातदेशान् लक्षीकृत्य आशयानं अ
पां निरोधकं अहिं वृत्रनामानमसुरं वज्रेण विवृश्चः॥ छिन्नवानसि॥ ॥ इंद्रस्य वृत्रघ्नः पशोः सत्राहणमिति हविषोनुवाक्या सूत्रितं च। स
त्राहणं दाधृषिं तुम्रमिंद्रं सहदानुं पुरुहूत क्षियंतमिति॥ ॥ सैषा सूक्तेऽष्टमी॥ ॥ सत्राहणं दाधृषिं तुम्रमिंद्रं महामपारं वृषभं सुवज्रं॥
हंता यो वृत्रं सनितोत वाजं दाता मघानि मघवा सुराधाः॥ ॥ सत्राहणं बहूनां शत्रूणां हंतारं दाधृषिं अत्यंतं धर्षकं तुम्रं तुमिः प्रेरणधर्मा
शत्रूणां प्रेरकं महां महांतं अपारं परिमाणरहितं नाशरहितमित्यर्थः। वृषभं कामानां वर्षितारं सुवज्रं शोभनेन वज्रेणोपेतं इंद्रं वयं स्तोतारः
सुमेति शेषः। यः इंद्रः वृत्रनामानमसुरं हंता हिंता भवति तमिंद्रं सुमेति पूर्वेणान्वयः। अत्र सर्वत्र तृन्नंतत्वात् न लोकाव्ययेति षष्ठीप्रतिषेधे स
ति द्वितीये भवति॥ ॥ अथ नवमी॥ ॥ अयं वृत्रश्चातयते समीचीर्य आजिषु मघवा शृण्व एकः। अयं वाजं भरति यं सनोत्यस्य प्रियासः
सख्ये स्याम॥ ॥ मघवा धनवान् य इंद्रः आजिषु संग्रामेषु एक मुख्य एव शृण्वे श्रूयते। अयमिंद्रः समीचीः संगताः वृत्रः इ एवं ति आच्छा
दयति लोकानिति वृत्रः शत्रुसेनाः तांश्चातयते नाशयति। अयमिंद्रः यं वाजं अन्नं सनोति यजमानाय ददाति। तं वाजं भरति यजमानस्य त
दत्रं दातुं बिभर्ति। स्तोतारः वयं अस्य एवंभूतस्य इंद्रस्य सख्ये सखित्वे प्रियासः प्रियाः स्याम भवेम॥ ॥ अथ दशमी॥ ॥ अयं शृण्वे अध जयन्नु
त घ्नन्नयमुत प्रकृणुते युधा गाः॥ यदा सत्यं कृणुते मन्युमिंद्रो विश्वं दृळ्हं भयत एजदस्मात्॥ ॥ अधापि च अयमिंद्रः जयन् शत्रून् एव श्रू

राम

२०

त्य अजः॥ आगछाम। स त्वं विश्वध सर्वदा जरित्रे स्तोत्रे उरुशंसः महता शंसनेन युक्तः स्याः भवेः॥ ॥ अथैकोनविंशी॥ ॥ एभिर्नृभि
रिंद्र त्वायुभिष्ट्वा मघवद्भिर्मघवन्विश्व आजौ॥ द्यावो न द्युम्नैरभि संतो अर्यः क्षपो मदेम शरदश्च पूर्वीः॥ ॥ हे मघवन् धनवन् विश्वे विश्व
स्मिन्नाजौ संग्रामे त्वायुभिः शत्रुजयार्थं त्वां कामयमानैः मघवद्भिः स्वदुर्थं दीयमानं हविर्लक्षणं धनैः रूपेतैः एभिः प्रत्यक्षेणोपलभ्यमा
नैः नृभिः पुत्रपौत्रादिभिः परिजनैः सहिता वयं यजमानाः सर्वकाले स्तोत्रैरिंद्रं दर्शयितीत्यर्थः॥ ॥ अथ विंशी॥ ॥ एवेदिंद्राय वृषभाय वृष्णे
ब्रह्माकर्म भृगवो न रथं॥ नू चिद्यथा नः सख्या वियोषदसन्न उग्रोऽविता तनूपाः॥ ॥ यथा इंद्रो नो अस्मदीयानि संख्या संख्यानि कर्माणि नू
चित्। वियोषत् न पृथक् कुर्यात्। उग्र तेजस्वी तनूपाः शरीराणां पालकः इंद्रः यथा नो अस्माकं अविता रक्षिता असत् भवति तथा वयं यजमाना
एवेत् एवमेवोक्तप्रकारेण इंद्राय वृषभाय कामानां वर्षित्रे वृष्णे नित्यतरुणाय ब्रह्म ब्रह्मस्तोत्रं अकर्म अकुर्म। तत्र दृष्टांतः। भृगवो दीप्तास्
क्षाणः रथं न रथमिव तद्वत्। यजमानेभ्यो यथा इंद्रोऽभीप्सितफलप्रदो भवति। रथेंद्र यजमाना स्तुवतीत्यर्थः॥ ॥ अथैकविंशी॥ ॥ नू ष्टुत इं
द्र नू गृणान इषं जरित्रे नद्यो न पीपेः॥ अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः॥ ॥ हे इंद्र नु क्षिप्रं स्तुतः पूर्वैर्ऋषिभिः संस्तुतः
सुक्षिप्रं गृणानः अस्माभिः स्तूयमानश्च इषमन्नं जरित्रे स्तोत्रे मह्यं नद्यो न अद्भिर्नदी इव पीपेः प्यायय प्रवृद्धं कुरु। हे इंद्र हरिवः हरिवन् हरि
संज्ञकाश्वोपेत इंद्र ते तुभ्यं नव्यं नवतरं ब्रह्म स्तोत्रमकारि अस्माभिः क्रियते रथ्यः रथवंतो वयं धिया प्रज्ञया रूपया स्तुत्या सदासाः सर्वदा भज्य
मानाः तदर्थं हविरूपधनस्य दातारो वा स्याम भूयास्म॥ ॥ इति तृतीयस्य पंचमे विंशो वर्गः॥ ॥ त्वं महाँ इंद्र तुभ्यमित्येकविंशत्यृ

ऋ॰सं॰भा॰५

वमेवं जनं अक्षियंतं धनेन अक्षियमाणं कृणोति करोति। अकिंचनः कश्चित्पुरुषः इंद्र त्वा धनसमृद्धो भवतीत्यर्थः॥ अशनिमान् अशनि
नायुक्तः द्यौरिव तरिक्षमिव विभंजनुः शत्रूणां विशेषेण भंजकः मघवेंद्रः समोहं समूहं रेणुं पापं इयर्ति रेणोः सकाशात्प्रेरयति। ततस्ता
पि च मघवा धनवानिंद्रः स्तोतारं वसौ धने धात्। अधात् निदधाति॥ ॥अथ चतुर्दशी॥ ॥अयं चक्रमिषणत् सूर्यस्य न्येतशं रीरमत्ससृमाणं।
आ कृष्ण ईं जुहुराणो जिघर्ति त्वचो बुध्ने रजसो अस्य योनौ॥ ॥प्रैतशं सूर्ये पस्पृधानमित्यत्र पूर्वं कथिताख्यायिका सूचिता। अत्राप्ययं
चक्रमिति पूर्वार्धे श्रूयते। स्वश्वनामा कश्चिद्राजा आस स च पुत्रार्थं सूर्यः पुत्ररूपेण स्वयमेव तत्रोत्पन्नः स तु एतशाख्येन महर्षिणा सार्धं युद्धं चकार।
तदानीं स ऋषिः युद्धे आर्तः इंद्रं तुष्टाव स इंद्रः तेन स्तूयमानः सन् स्वश्वपुत्रस्य सूर्यस्य संबंधिनः संग्रामादेनमपालयदिति। अयमिंद्रः
सूर्यस्य चक्रमायुधं इषणत् प्रेरयत् ससृमाणं युद्धार्थं सरंतं गच्छंतं एतशनामानमृषिं निरीरमत्। जुहुराणः कुटिलं यथा भवति तथास्मै
चरन् कृष्णः कृष्णवर्णोऽसुरः त्वचो ज्योतिषो बुध्ने मूलभूते रजसोऽस्य उदकस्य योनौ स्थाने अंतरिक्षे स्थितं ईं एनमिंद्रं आ जिघर्ति आसिंचति श
त्रूणां प्रेरिता वृत्रादिः तस्मै रक्षेमित्यर्थः॥ ॥अथ पंचदशी॥ ॥असिक्न्यां यजमानो न होता॥ ॥एकपदीयमृक्॥ पूर्वं च सह इत्येतत्त्वेन
संबध्यते। असिक्न्यां रात्रौ यजमानो न यजमान इव होतारमाह्वातारमग्निं द्वितीयार्थे प्रथमा। सोमेनासिंचति तद्वदेषः इंद्रमासिंचती
त्यर्थः॥ ॥इति तृतीयस्य पंचमे त्रयोविंशो वर्गः॥ ॥अथ षोडशी॥ ॥गव्यंत इंद्रं सख्याय विप्रा अश्वायंतो वृषणं वाजयंतः॥ जनीयंतो जनिदा
मक्षितोतिमा च्यावयामोवते न कोशं॥ ॥गव्यंतः गा इच्छंतः अश्वायंतः अश्वानिच्छंतः वाजयंतः वाजमन्नमिच्छंतः जनीयंतः जायां वेच्छंतः विप्रा मेधा

२२

राम

विनः स्तोतारो वयं सख्याय इंद्र संबंधिने सखित्वाय वृषणं कामानां वर्षितारं जनिदां जायाप्रदं अक्षितोतिं अक्षीणरक्षं सर्वदा रक्षाकरमित्य
र्थः॥ ॥अथ सप्तदशी॥ ॥त्राता नो बोधि ददृशान आपिरभिख्याता मर्डिता सोम्यानां॥ सखा पिता पितृतमः पितॄणां कर्तेमु लोकमुशते वयो
धाः॥ ॥हे इंद्र आपिः आप्तः ददृशानः सर्वपालकत्वेन पश्यन् त्वं नोऽस्माकं त्रातारक्षको भव। किंच। अभिख्याता अभिद्रष्टा मर्डिता सुखयिता सो
म्यानां सोमार्हाणां यजमानादीनां सखा प्रजापतिना समानख्यातिः पिता पालकः केवलं पालको न। किंतु पितॄणां पालकानां मध्ये पितृतमः अ
तिशयेन पालकः कर्ता ईमु पितॄणां स्रष्टा च त्वं लोकं उशते कामयमानाय स्तोत्रे वयोधाः वय इत्यन्ननाम तत्र अन्नप्रदो भव॥ ॥अथाष्टादशी॥
॥सखीयतामविता बोधि सखा गृणान इंद्र स्तुवते वयो धाः॥ वयं ह्या ते चकृमा सबाध आभिः शमीभिर्महयंत इंद्र॥ ॥हे इंद्र त्वं सखीयतां स
खित्वमिच्छतामस्माकं अविता रक्षिता बोधि भव। तथा गृणानः स्तूयमानस्त्वं सखा भव। हे इंद्र स्तुवते स्तुतिं कुर्वते मह्यं वयः अन्नं धाः अधाः।
प्रयच्छ। सबाधः सहिता वयं हि वयं खलु ते त्वां आ चकृम आक्षयामः किं कुर्वंतः आभिः प्रत्यक्षेणोपलभ्यमानैः शमीभिः स्तुतिरूपैः कर्मभिः म
हयंतः॥ ॥इंद्राय वृत्रघ्ने पुरोडाशस्य स्तुत इंद्र इति याज्यानुवाक्ये च। इंद्रो मघवायन्त्व इंद्रः सत्यः सम्राडिति॥ ॥सैषा सूक्ते एकोनविंशी॥ ॥स्तु
त इंद्रो मघवा यद्ध वृत्रा भूरीण्येको अप्रतीनि हंति॥ अस्य प्रियो जरिता यस्य शर्मन्नकिर्देवा वारयंते न मर्ताः॥ ॥यद्ध यदा मघवा धनवा
निंद्रः स्तुतः अस्माभिः स्तुतो भवति। तदा इंद्रः एकः असहाय एव भूरीणि बहूनि अप्रतीनि अप्रतिगमनानि अभिगमनयुक्तानीत्यर्थः। वृ
त्राणि शत्रून् हंति हिनस्ति यस्य इंद्रस्य शर्मन् शर्मणि अपाश्रये वर्तमानं स्तोतारं देवा नकिर्वारयंते निवारणं न कुर्वंति। मर्ताश्च न निवारयंते।

ऋ.वे.भा.५

विधारणं कुर्वंति। मनोश्चन निवारयंते। अस्येंद्रस्य जरिता स्तोता प्रियो भवति॥ ॥ अग्निमारुतशस्त्रे एवा न इंद्र इति परिधानीया सूक्तितं चाए
वा न इंद्रो मघवा विरप्शी त्विपरिदध्यादिति॥ ॥ सेषास्मिन्सूक्ते विंशी॥ ॥ एवा न इंद्रो मघवा विरप्शी करत्सत्या चर्षणीधृदनर्वा। त्वं राजा जनुषां धे
ह्यस्मे अधि श्रवो माहिनं यज्जरित्रे॥ ॥ विरप्शी बहुविधशब्दवान् चर्षणीधृत् सर्वासां प्रजानां धारयिता। अनर्वा अप्रत्यृतः केनापि प्रतिकू
लेन न प्राप्त इत्यर्थः॥ मघवा धनवानिंद्र एवं वस्मरूभिः स्तुतः सन् नोस्माकं सत्यासत्यरूपाण्यभिमतानि फलानि करत् करोतु हे इंद्र
नुषां जन्मवतां सर्वेषां राजा प्रभूतं माहिनं महिम्नोपेतं यच्छ्रवः यशो जरित्रे स्तोत्रे देयं तद्यशः अस्मे अस्मासु अधि अधिकत्वेन धेहि। एवा न इंद्रो
मघवा विरप्शीत्यादि ब्राह्मणं॥ ॥ अथैकविंशी॥ ॥ नू ष्टुत इंद्र नू गृणान इति॥ ॥ व्याख्याता॥ ॥ इति तृतीयस्य पंचमे चतुर्विंशो वर्गः॥ ॥ अ
यं पंथा इति त्रयोदशर्चं सप्तमं सूक्तं त्रैष्टुभं अत्रानुक्रमणिका। अयं पंथाः सप्तोना संवाद इंद्रादितिवामदेवानामिति। यस्य वाक्यं स ऋषिर्या
तेनोच्यते सा देवतेति परिभाषितत्वात् ऋषिदेवते तत्र तत्र ज्ञातव्ये अस्मिन्सूक्ते इंद्रादितिवामदेवसंवादरूपिणी काचिदाख्यायिका श्लोकरूपे
ण सूच्यते॥ ॥ गर्भस्थो ज्ञानसंपन्नो वामदेवो महामुनिः। मतिं चक्रे न जायेय योनिदेशात्तु मातृतः॥१॥ किंतु पार्श्वादितश्चेति ज्ञात्वा तु जननी त्वि राम
दं। दध्यौ शोकेन शचीं देवीमदितिं चेंद्रमातरं॥२॥ अदितिस्त्विंद्रसहिता गर्भिणीमभ्यगाद्धने। आदितींद्रौ वामदेवः संवादमथ चक्रिरे॥३॥ संवाद इ
सूक्तेन कथा सेषा च सूच्यते। नोक्तो विशेषोत्र न्युपदेशो ह्यनुक्तितः॥४॥ अर्थतस्त्ववगंतव्यो व क्रमभेद इति स्थितिः। इंद्रादितिर्ऋषिश्चास्मिन्नूमिथः
सूक्ते समूदिरे॥५॥ गर्भे शयानं सुचिरं मातुर्गर्भाद्विनिर्गतिं। वामदेवं प्रति ब्रूत अयं पंथा यथा व्रात ऋतुः॥६॥ ह्रुतीयादिभिरर्धर्चैर्ऋषिराह पंचभिः। नहीन्व

२२

यत सर्वोपि प्रख्यातो भवति। तनापि च घ्नन् शत्रून्हिंसन्नुसरेव श्रूयते। तनापि च युध्या युद्धेन गाः पशून् अप्रकृणुते। शत्रूणां सकाशादाहरति। किं चेंद्रो
यदा मन्युं कोपं सत्यमेव कृणुते द्विषद्दर्थं करोति। तदानीं दृढं स्थावररूपं एजत् कंपमानं जंगमरूपं च विश्वं समस्तं जगत् अस्मादिंद्राद्धयते बि
भेति॥ ॥ इति तृतीयस्य पंचमे द्वाविंशो वर्गः॥ ॥ अथैकादशी॥ ॥ सामिंद्रो गा अजयत्सं हिरण्या समश्विया मघवा यो ह पूर्वीः। एभिर्नृभिर्नृत
मो अस्य शाकै रायो विभक्ता संभरश्च वस्वः॥ ॥ यो ह यः खलु मघवा धनवानिंद्रः गाः असुराणां समजयत् सम्यक् जितवान् भवति। किं च हिर
ण्यानि हितरमणीयानि शत्रुसंबंधीनि धनानि समजयत्। अश्विया अश्वियानि शत्रुसंबंधिनोश्वसमूहान् सम्यक् जयति स्म। तथा पूर्वी
र्बह्वीः शत्रुसेनाः समजयत्। इंद्रः सर्वाञ्छत्रून्जित्वा सकलमपि श्वादि धनमपहृतवानित्यर्थः। नृतमो नेतृतमः पश्वादीनामतिशयेन निव
हकः स इंद्रः एभिर्नृभिः स्तोतृभिः स्तुतः सन् अस्य रायः पश्वादिधनस्य रूपस्य विभक्ता स्तोतृभ्यो विभागस्य कर्ता दाता भवतीत्यर्थः। किं च
वस्वो वसुनो धनस्य संभरश्च संभर्ता धारकश्च भवति॥ ॥ अथ द्वादशी॥ ॥ कियत्स्विदिंद्रो अध्येति मातुः कियत्पितुर्जनितुर्यो जजान। यो अस्य
शुष्मं मुहुकैरियर्ति वातो न जूतः स्तनयद्भिरभ्रैः॥ ॥ य इंद्रः सवितुर्जनयितुः यस्मात्प्रजापतेः सकाशात् इंद्रः दृश्यमानं प जगत् जजान। अजन
यत। य इंद्रस्तस्मात्प्रजापतेः सकाशादस्य जगतः शुष्मं यावत् बलं मुहुकैर्मुहुर्मुहुः इयर्ति प्रेरयति। सूनर इंद्रः गर्जद्भिरभ्रैर्मेघैः जूतः प्रेरि
ततो वातो न वायुरिव तथा स इंद्रस्तोतृभिर्जूतः प्रेरितः हविः प्रदानार्थं माद्यन्तो भवति॥ ॥ अथ त्रयोदशी॥ ॥ क्षियंतं त्वमक्षियंतं कृणोतीय
र्ति रेणुं मघवा समोहं। विभंजनुरशनिमाँ इव द्यौरुत स्तोतारं मघवा वसौ धात्॥ ॥ मघवा नू धनवानिंद्रः क्षियंतं धनराहित्येन क्षीयमाणं त्वम

तैत्तिरीयेः त्वष्टा हतपुत्रो वीन्द्रं सोममाहरदित्यनुवाके महता प्रबंधेन प्रपंचितः॥ ॥ अथ चतुर्थी॥ ॥ किं स ऋध क्कृणवद्यं सहस्रं मासो जभार श
रदश्च पूर्वीः॥ नही न्वस्य प्रतिमानमस्त्यंतर्जातेषूत ये जनित्वाः॥४॥ ॥ अदितिः यमिंद्रं सहस्रं बहून् मासान् मासात् नास्मन् पूर्वीः बह्वीः शरदश्च सं
वत्सरांश्च जभार बभार बिभर्ति बिंदं रूपं। गर्भे स्थितं इंद्रः बहुषु संवत्सरेषु अदितिं कुक्षिगतवानित्यर्थः। एवंभूतो स इंद्रः कियत् किमपि सर्वमपीत्यर्थः
ऋध कु विरुधं कर्म स्कृणवत् अकरोत्। इंद्रस्याक्षेपमसहमानादितिः इंद्रमाता एवं प्रतिब्रूते। हे वामदेव जातेषु अन्येषु अंतर्मध्ये अस्येंद्रस्य प्रतिमा
नं नहि अस्ति न विद्यते खलु। हि इति पादपूरणार्थः। उत अपि च ये देवादयः जनित्वाः जनयितव्या जनयिष्यमाणाः तेषु मध्ये अस्येंद्रस्य प्रतिमानं ना
स्ति॥ ॥ अथ पंचमी॥ ॥ अवद्यमिव मन्यमाना गुहाकरिंद्रं माता वीर्येणा न्यृष्टं। अथोदस्थात् स्वयमत्कं वसान आरोदसी अपृणाज्जायमानः॥५॥
गुहा गुहा योगरूढरूपे सूतिकागृहे जातमिंद्रं अवद्यमिव मन्यमाना जानती माता इंद्रजननी अदितिः वीर्येण सामर्थ्येन न्यृष्टं नितरां प्राप्तमकः
अकरोत्। अथानंतरं यजमान उत्पद्यमान इंद्रः स्वयमेव अत्कं तेजः वसानः आच्छादकः सन् दधान इत्यर्थः। उदस्थात् उत्कर्षेणातिष्ठत्। किंच
रोदसी द्यावापृथिव्यौ अपृणात् असमंतात् पूरयामास॥ ॥ इति तृतीयस्य पंचमे पंचविंशो वर्गः॥ ॥ अथ षष्ठी॥ ॥ एता अर्षंत्यललाभवंतीर्ऋता
वरीरिव संक्रोशमानाः। एता वि पृच्छ किमिदं भनंति कमापो अद्रिं परिधिं रुजंति॥ ॥ अललाभवंतीः अललेत्येवंरूपं शब्दं कुर्वत्यः ऋतावरीरिव उ
दकवत्य एता नद्यः संक्रोशमानाः इंद्रमहत्त्वप्रतिपादकौ द्वौ तेन हर्षेण बहुविधं शब्दायमानाः सत्यः अर्षंति गच्छंति। एवंभूता नद्यः इदं किं भनंति। श्री
अद्या हे शब्दायमानं किं वदंतीति इममर्थं हे ऋषे त्वं एता नदीः विपृच्छ विशेषेण पृष्ट्वा नु भव। एवं संपृच्छ विचारिते सति एतच्छब्दायमानं इंद्रमहात्म्यमे
व वचनं भवतीत्यर्थः। किंच आपः उदकानि परिधिं आवरकं अद्रिं कमिंद्रं कमेघं रुजंति भजंति। आपः कमपि मेघं च भजंति। किंतु इंद्रो मम पुत्र एव उदका

वरकं मेघं भंक्त्वा अपः प्रवर्तयतीत्यर्थः॥ ॥ अथ सप्तमी॥ ॥ किमु ष्विदस्मै निविदो भनंतेंद्रस्यावद्यं दिधिषंत आपः। ममैतान् पुत्रो महता वधेन वृत्रं जघन्वाँ
असृजद्वि सिंधून्॥ ॥ यदा इंद्रो वृत्रासुरं हतवान् तदा शाश्वती ब्रह्महत्या प्राप्तवान् इति वामदेवस्याभिप्रायमुक्त्वादितिराह। मरुत्वतीयशस्त्रे प्र
युज्यमाना निमरुत्वांत्वो मरुत्वान् इत्यादीनि इंद्रस्तुतिप्रतिपादकानि निवित्पदानि निवित्छब्देनोच्यंते। ततो निविदः अस्मै इंद्रं वृत्रं निमित्तं ब्रह्महत्या
यं प्राप्नुवंते इंद्रं किमु स्विदनु भनंत भनंति। किं वदंतीति चेत्। तर्हि पापरहितं मत्वा निविदः स्तुवंति। कथं इंद्रस्य पापरहितत्वमुच्यते॥ आपः केन रूपेण
अस्येंद्रस्य अवद्यं ब्रह्महत्यादिरूपं पापं दिधिषंते धारयंति मम पुत्रो मदीयः पुत्रो इंद्रः महता प्रभूतेन वधेन वध इति वज्रनामैतत् वज्रेण वृत्रं जघ
न्वान् हतवान्। ततः एतान् सिंधून् उदकानि व्यसृजत् विशेषेण स्थिरत्वेन संसृष्टवान् इंद्रेण सृष्टा आपः तस्य पापं जगृहुरित्यर्थः॥ ॥ अथाष्टमी॥
ममच्चिदापः शिशवे ममृड्युर्मम च्चिदिंद्रः सहसोदतिष्ठत्॥ ॥ सूक्ते विशेषेण ऋषिरिंद्रो
ति॥ हे इंद्र मम च्चन मत्त्वा एव प्रमत्ता वित्यर्थः। युवतिस्त्वदीया माता अदितिः त्वां त्वां परासपरा विक्षेप किंच कुषवानाम्नी राक्षसी मम च्चन प्रमत्तेव त्वा
त्वां जगार गिरति स्म। हे इंद्र मम च्चित् प्रमाद्येत्य एव आपः शिशवे जाताय तुभ्यं ममृड्युः सुखयांचक्रुः मम च्चित् माद्यंत्येवेंद्रः साहसत्वेन वीर्येण सह
उदतिष्ठत् सूतिकागृहात् राक्षसीं बाधमानः सन् उत्केन वीर्येणातस्थौ॥ ॥ अथ नवमी॥ ॥ मम च्चन ते मघवन्व्यंसो निविविध्वाँ अप हनू जघान।
अधा निविद्ध उत्तरो बभूवाञ्छिरो दासस्य सं पिणग्वधेन॥ ॥ हे मघवन् धनवन् इंद्र मम च्चन प्रमाद्यन् व्यंसो नाम राक्षसः निविविध्वान् प्रविध्यन्
ते नहनत्वदीये हनू मुखपार्श्वे अपजघान। अपहतवान्। अध अथानंतरं हे इंद्र राक्षसेनताडितस्त्वं उत्तरः व्यंसादधिकबलः बभूव। भूत्वा च भूतः स
न् दासस्य क्षीणस्य व्यंसस्य शिरो वधेन वज्रेण संपिणक् पिष्टवानसि॥ ॥ अथ दशमी॥ ॥ गृष्टिः ससूव स्थविरं तवागामनाधृष्यं वृषभं तुम्रमिंद्रं॥

राम

अरीलृहं वत्सं चरथाय माता स्वयं गातुं तन्व इच्छमानं ॥ ॥ गृष्टिः कावित्रोः वत्सं यथा सुसूव सुषुवे न तथा माता इंद्रजननी अदितिः वत्सं चरथाया स्वेच्छया
यासंचरणाय इंद्रं सुसूव सुषुवे। कीदृशं इंद्रं स्थविरं वयसा प्रवृद्धं तेन बाणोप्रवृद्धबलं अनाधृष्यं शत्रुभिरनभिभाव्यं वृषभं सेचनसमर्थं तुविं प्रेरकं अ
रील्हं शत्रुभिरनभिभूतं स्वयं गातुं अन्यनिरपेक्षगमनं तन्वे शरीरे इच्छमानं इच्छंतं ॥ ॥ अथैकादशी ॥ ॥ उत माता महिषमन्ववेनदमी त्वा जहति
पुत्र देवाः ॥ अथाब्रवीद्वृत्रमिंद्रो हनिष्यन्त्सखे विष्णो वितरं वि क्रमस्व ॥ ॥ उतापि च हमदीय पुत्रं इंद्र अमी वक्ष्यादयो देवाः त्वां जहति त्यजंति
इत्युक्तवती इंद्रस्य माता अदितिः इंद्रं महिषं महांतं महिष इति महन्नामैतत् अन्ववेनत् अयाचत। अथानंतरं। हे विष्णो व्यापनशील हे सखे मित्र
भूत हे स्वे वृत्रं हनिष्यन् हंतुमिच्छन् वितरं विक्रमस्व अतिपराक्रमी भव इतींद्रः विष्णुं अब्रवीत् उवाच ॥ ॥ अथ द्वादशी ॥ ॥ कस्ते मातरं विधवामच
कच्छयुं कस्त्वामजिघांसच्चरंतं ॥ कस्ते देवो अधि मार्डीक आसीद्यत्प्राक्षिणाः पितरं पादगृह्य ॥ ॥ हे इंद्र यस्मात्कारणात् पितुः सकाशाज्जनिष्यमा
णात्संतीतस्त्वं त्वदीयं पितरं पादगृह्य पादेषु गृहीत्वा प्राक्षिणाः प्रकर्षेणावधीः तस्मात्कारणात् त्वत्तोन्यः को देवः मातरं स्वकीय जननीं विधवां पतिव
र्धेनयतिरहितां अचकृत् अकरोत् कः अन्योन्यः शयुं शयानं चरंतं जाग्रतं वा अजिघांसत् हंतुमैच्छत् नेत्युत्तरोन्यः को देवः मार्डीके प्रजानां सुखक
रणे अधि अधिक आसीत्। अयमर्थः। अदक्षामवेदेवेभ्य इत्यनुवाके यज्ञो दक्षिणामभ्यध्यायदित्यादि ब्राह्मणेनेंद्रो इत्येके वर्त्कुधाप्रपंचितः ॥ ॥
अथ त्रयोदशी ॥ ॥ अवर्त्या शुन आंत्राणि पेचे न देवेषु विविदे मर्डितारं ॥ अपश्यं जायाममहीयमानामधा मे श्येनो मध्वाजभार ॥ ॥ अनया वाम
देवः शुनकसंबंधीनि आंत्राणि पुरीतंति पेचे अपचं देवेषु द्योतमानेषु वह्न्यादिमध्ये इंद्रादन्यं मर्डितारं सुखयितारं न विविदे न लभे। किंच जायां स्व
कीयां भार्यां अमहीयमानां अश्लाघनीयां अपश्यं अद्राक्षं अध अथानंतरं श्येनः श्येनवच्छीघ्रगामी इंद्रः मे मह्यं मधुरोपेतमुदकमाजभार आजहार ॥१३॥

स्येति सप्तमसूक्तस्यर्धर्चा अदितेर्वचः। ७ यमस्त्वनत्वात्स्तुतिरित्यूचः एतवैमुनेः। दौर्गत्यशांतिमत्राह वामदेवस्तथांत्यया ॥ ८ ॥ एवमप्यृषिं कद्रिंद्र इति बह्वृ
चशास्त्रनं। अर्थो विवेकस्पष्टत्वादुपदेशोऽत्र पुनेरितः ॥ ९ ॥ ऋषिदेवतासिद्ध्यर्थं विवेकादर्थ ईरितः ॥ ॥ तत्र प्रथमा ॥ ॥ अयं पंथा अनुवित्तः पुराणो यतो दे
वा उदजायंत विश्वे ॥ अतश्चिदा जनिषीष्ट प्रवृद्धो मा मातरममुया पत्तवे कः ॥ ॥ पुराणः अनादिः अयं प्रत्यक्षेणोपलभ्यमानः पंथा योनिनिर्ग
मनरूपो मार्गः अनुवित्तः आनुपूर्व्येण वित्तः सर्वैर्जायमानैर्लब्धः यतो यस्माद्योनिमार्गात् विश्वे सर्वे देवाः उदजायंत उत्कर्षेणोत्पन्ना भवंति तस्माद्योनिमा
र्गात् मनुष्या उत्पन्ना भवंति। किमु वक्तव्यं। अतश्चित् यस्माद्योनिमार्गाद् देवप्रवृद्धः गर्भे प्रकर्षेण वृद्धिंगतो वामदेवः एवमुक्तवंतमिंद्रं प्रत्याह ॥ ॥
अथ द्वितीया ॥ ॥ नाहमतो निरया दुर्गहैतत्तिरश्चता पार्श्वान्निर्गमाणि ॥ बहूनि मे अकृता कर्त्वानि युध्यै त्वेन सं त्वेन पृच्छै ॥ ॥ अहं अतो योनिमार्गा
त् न निरयाणि न निर्गच्छानि। एतद्योनिनिर्गमरूपं वर्त्म दुर्गहा एवं दुःखेन ग्राह्यं न प्राप्यं भवतीत्यर्थः। किंतु तिरश्चता तिरश्चीनात् पार्श्वात् निर्गमाणि
निर्गच्छानि। योनिदेशाद्व्यतिरिक्तोहं पार्श्वं भित्वा निर्गच्छानीत्यर्थः। अन्यैरकृतमिदमेव न केवलं मया क्रियते किंतु अन्यैरकृतानि बहूनि कर्माणि क
र्त्वानि कर्तव्यानि संति। त्वेन एकेन सपत्नेन विवदमानेन सह युध्यै युधं करवाणि। त्वेन एकेन बुभुत्सुना संपृच्छै सम्यक्पृच्छानि ॥ ॥ अथ तृतीया ॥ ॥ प
रायतीं मातरमन्वचष्ट न नानु गान्यनु नू गमानि ॥ त्वष्टुर्गृहे अपिबत्सोममिंद्रः शतधन्यं चम्वोः सुतस्य ॥ ॥ मयि गर्भे स्थिते सति इंद्रं मदीयां मातरं
परायतीं परेतां म्रियमाणां अन्वचष्ट अनुब्रवीतु। एवमपीदानीं गर्भे स्थितोहं पुराणं पंथानं न नानु गानि तान्नु गच्छानीति नु। किंतु नु क्षिप्रं अनुगमा
नि अनुगच्छान्येव। वामदेवः स्वकीयमकृत्यकारित्वं परिहृत्य इंद्रस्याकृत्यकारित्वं उत्तरार्धर्चेन प्रतिपादयति। इंद्रः चम्वोः सोमाभिषवफलकयोः सुतस्य
सोमं सुतवतोभिषुतस्य त्वष्टुः संबंधिनि गृहे अनुपकृत। सन् शतधन्यं बहुधनेन क्रीतं सोमं अपिबत् बलात्कारेण सोमस्य पानं कृतवान्। अयमर्थः।

ऋ०सं०भा० ५

कं लक्षीकृत्य परिशयानं परितः समंतात् शयनं कुर्वंतं अहिं दासुरं अहन् अवधीः। विश्वधेनाः विश्वस्य प्रीणयित्र्यः वर्त्तनीः सर्वत्र प्रवर्त्तिका
प्रारदः प्रकर्षेण विलिपन्न कृतवानसि। इंद्रः हे इंद्र त्वं हत्वा तेनाहिना निरुद्धानि प्रवाहरूपेण वर्त्तयतीत्यर्थः॥ ॥अथ तृतीया॥ ॥अतृप्णुवंतं वियतम
बुध्यमबुध्यमानं सुषुपाणमिंद्र॥ सप्त प्रति प्रवत आशयानमहिं वज्रेण वि रिणा अपर्वन्॥ ॥हे इंद्र त्वं अतृप्णुवंतं भोगेषु अतृप्णुवंतं वियतं शि
थिलांगं अबुध्यं दुर्विज्ञानं अबुध्यमानं किमप्यजानंतं सुषुपाणं सुप्तं सप्त सर्पणस्वभावाः प्रवतः अपः आशयानं आहत्य तिष्ठंतं अहिं वृत्रं अ
पर्वन् अपर्वणि पौर्णमास्यां वज्रेण विरिणाः व्यरिणाः विशेषेण हतवानसि। पौर्णमास्यां वृत्रवधः त्वष्टा हतपुत्र इत्यनुवाके घ्नंति वा एनं पौर्णमास
अमावास्यायां वाप्याययंतीति तैत्तिरीयश्रुतेः॥ ॥अथ चतुर्थी॥ ॥अक्षोदयच्छवसा क्षाम बुध्नं वार्ण वातस्तविषीभिरिंद्रः। दृळ्हान्यौभ्नादुशमान
ओजोऽवाभिनत्ककुभः पर्वतानां॥ ॥इंद्रः परमैश्वर्ययुक्तः शवसा बलेन बुध्नमंतरिक्षं क्षाम क्षाणोदकं अक्षोदयत् संपिपेष। तत्र दृष्टांतः। वातो
वायुः तविषीभिर्बलैः वार्न उदकमिव नद्दत्। किंच ओजो बलं उशमानः कामयमान इंद्रः दृळ्हानि दृढानि स्थिराण्यपि अभ्राणि औभ्नात् अभांसी
त्तथा पर्वतानां गिरीणां ककुभः पृक्षान् अवाभिनत् अत्यंतमभैत्सीत्॥ ॥अथ पंचमी॥ ॥अभि प्र दद्रुर्जनयो न गर्भं रथा इव प्र ययुः साकमद्र
यः। अतर्पयो विसृत उब्ज ऊर्मीन् त्वं वृताँ अरिणा इंद्र सिंधून्॥ ॥हे इंद्र त्वां अद्रयो मरुतः जनयो जनन्यः गर्भं न पुत्रमिव अभिप्रदद्रुः अभिज
ग्मुः किंच रथा इव रंहणशीला रथा यथा वृत्रवधार्थं त्वया साकं प्रययुः प्रकर्षेण यातासिषुः हे इंद्र त्वं विसृतः विसरणशीला नदीः अतर्पयः अद्रिरपू
रयः तथा कुम्भीन मेघानुब्जः अवधीः तथा त्वं वृतान् सिंधून् अपः अरिणाः प्रेरयः॥ ॥इति तृतीयस्य षष्ठे प्रथमो वर्गः॥ ॥अथ षष्ठी॥ ॥त्वं मही

राम

२५

मवनिं विश्वधेनां तुर्वीतये वय्याय क्षरंतीं॥ अरमयो नमसैजदर्णः सुतरणाँ अकृणोरिंद्र सिंधून्॥ ॥हे इंद्र त्वं महीं महतीं विश्वधेनां विश्वस्य प्रीणयि
त्रीं तुर्वीतये तुर्वीतिनाम्ने राज्ञे वय्यनाम्ने च क्षरंतीं अभीष्टान् कामान् दुहंतीं अवनिं भूमिं नमसा अन्नेन एजत् एजत् अवलत् अर्णः अस्यसा उदके
न च अरमयः रमयासि। इंद्रः पृथिवीं अन्नोदकसमृद्धां करोतीत्यर्थः। किंच हे इंद्र त्वं सिंधून् जलानि सुतरणान् सुखतरणानि अकृणोः अकरोः॥
॥अथ सप्तमी॥ ॥प्राग्रुवो नभन्वो३ न वक्वा ध्वस्रा अपिन्वद्युवतीर्ऋतज्ञाः। धन्वान्यज्राँ अपृणक्तृषाणाँ अधोगिंद्रः स्तर्यो३ दंसुपत्नीः॥ ॥इंद्रः न
भन्वः शत्रूणां हिंसकाः वाकान् सेना इव ध्वस्राः क्षतानां ध्वंसिकाः युवतीः अद्भिर्मिश्रिताः ऋतज्ञाः ऋतस्यान्नस्य जनयित्रीः अपुनः अग्रुव इति
नदीनामैतत् अग्रगामिनीनदीः आपिन्वत् प्रकर्षेण पूरयत् तथा अपि धन्वानि निर्जलान् उन्नतान् देशांश्च तृष्णया अपृणक् अपूरयत्। तथा अज्रान् गार्ग
स्यगं इंत्व तृषाणान् पिपासया युक्तान् पुरुषान् अपृणक् अपूरयत् किंच इंद्रः दंसुपत्नीः दस्युहतपरा असुराः सुष्णयतो यासां ताः स्तरीः निवृत्तप्रस
वाः अधोक् अधुक्षत्। इंद्रः राक्षसैः कृतनिरोध दुःस्था निरुद्धप्रसवा अपि गा विमुच्य सप्रसवा अकारेत्यर्थः॥ ॥अथाष्टमी॥ ॥पूर्वीरुषसः
शरदश्च गूर्त्ता वृत्रं जघन्वाँ असृजद्वि सिंधून्॥ परिष्ठिता अतृणद्बद्बधानाः सीरा इंद्रः स्रवितवे पृथिव्या॥ ॥वृत्रं वृत्राख्यमसुरं जघन्वान् हतवानिंद्रः
पूर्वीः तमिस्रयागीर्णाः पूर्वीः बह्वीः उषसः शरदश्च संवत्सरांश्च व्यसृजत् विशेषेण ससर्ज। तथा सिंधून् वृत्रेण हतान्युदकानि व्यसृजत्। किंचाकिं
परिष्ठिताः मेघेषु परितः स्थिताः बद्बधानाः वृत्रेण परितः बध्यमानाः सीराः नदीः सीरा इति नदीनामैतत्। पृथिव्याः पृथिवीरूपेण मार्गेण स्रवि
तवे स्रवितुं गमनार्थं अतृणत् अविध्यत्॥ ॥अथ नवमी॥ ॥वम्रीभिः पुत्रमग्रुवो अदानं निवेशनाद्धरिव आ जभर्थ। व्यंधो अख्यदहिमाददा

ऋ·सं·भा·६

नोनिर्भृतं दुःखस्थितमरंतपर्व ॥ ॥ हे हरिवः हरिसंज्ञाश्वोपेतेंद्र त्वं वम्रीभिः उपजिह्विकाभिः अदानं अद्यमानं अग्रुवः अग्रुर्नाम कश्चित् तस्याः पुत्रं निर्व
नात् वल्मीकाख्यात् स्थानात् आजभर्थाः आहृतवानसि। आददानः इंद्रेण क्रियमाणः अग्रुवः पुत्रः अंधः पूर्वं अंधः सन् अहिं सर्पं व्यख्यत। विशेषे
णापश्यत्। तव निर्भृत् वल्मीकान्निर्गतो भूत्। उखच्छित् वल्मीकाख्याया उषाया छेदकानि पर्वपर्वाणि अस्य सर्वाणि। अंगानां शिथिलानि पर्वाणि स
मरंत समगच्छंत उपजिह्विकाभिः शिथिलीकृतानि अग्रुवः पुत्रस्य पर्वाणि इंद्रेण समधीयंतेत्यर्थः ॥ ॥ अथ दशमी ॥ ॥ प्रेतपूर्वाणि करणानि विप्रा
विद्वाँ आह विदुषे करांसि ॥ यथा यथा वृष्ण्यानि स्वगूर्तापांसि राजन्नर्याविवेषीः ॥ ॥ हे राजन् राजमानेंद्र हस्त्या निवर्षणयोग्यानि स्वगूर्तानि स्व
गूर्तानि स्वयमुद्गीर्णानि नर्यानि नर्याणि मनुष्या हितानि अपांसि त्वत्संबंधीनि कर्माणि यथा यथा अविवेषीः व्याप्नोः अकार्षीः इति यावत् तथा तथा
ह विप्रः प्राज्ञ इंद्र विदुषे विदुषः सर्वं जानतः तेत्वत्संबंधीनि पूर्वाणि पुरातनानि कर्माणि अविद्वान् आसमंतात् राजन् वामदेवः करांसि त्वदीयानि क
र्माणि प्रकर्षेणाह ब्रवीति ॥ ॥ अथैकादशी ॥ ॥ नू ष्टुत इंद्र नू गृणान० ऋक् ॥ ॥ हे इंद्र नु क्षिप्रं स्तुतः पूर्वैः ऋषिभिः संस्तुतः नु क्षिप्रं गृणानः अ
स्माभिः स्तूयमानस्त्वं इषमन्नं जरित्रे मह्यं नद्यो न अद्रीन् दारिवापीपेः प्यायय प्रवृद्धं कुरु। हे हरिवः हरिसंज्ञकाश्वोपेतेंद्र ते तुभ्यं नव्यं नवतरं ब्रह्म
स्तोत्रं अकारि अस्माभिः क्रियते रथ्यः रथवतो वयं धिया प्रज्ञारूपया स्तुत्या सदासाः सदा त्वां सर्वदा भजमानाः त्वदर्थं हवीरूपस्यान्नस्य दातारो वा स्याम भूया
स्म ॥ ॥ इति तृतीयस्य षष्ठे द्वितीयो वर्गः ॥ ॥ आ न इंद्र इत्येकादशर्चं दशमं सूक्तं वामदेवस्यार्षं त्रैष्टुभमैंद्रं। आ न इत्यनुक्रमणिका। पृष्ठ्याभिप्लवषडह
योः प्रथमेहनि निष्केवल्ये एतन्निविद्धानीयं सूत्रितं च। आ न इंद्र इति निष्केवल्यमिति महाव्रते प्येतत् संपातसूक्तं। तथैव पंचमारण्यके सूत्रितं च। आ न

राम

२६

॥ इति तृतीयस्य पंचमे षष्ठो वर्गः ॥ ॥ वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ॥ पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥ ॥ इति श्रीमद्राजाधिराज
परमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये तृतीया
ष्टके पंचमोऽध्यायः संपूर्णः ॥ ॥ श्री भारती कृष्णायनमः ॥ ॥ ॐ ॥ यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ॥ निर्ममे तमहं वंदे विद्याती
र्थमहेश्वरः ॥ ॥ व्याख्यातः पंचमोऽध्यायस्तृतीयाष्टक आदरात् ॥ धीमता सायणाख्येन षष्ठोऽध्यायोथ वर्ण्यते ॥ चतुर्थमंडले द्वितीये नुवाकेऽ
ष्ट सूक्तानि व्याख्यातानि ॥ एवा त्वामिंद्र इत्येकादशर्चं नवमं सूक्तं। तस्य मंडलादिपरिभाषया वामदेव ऋषिः। अनादेशपरिभाषया त्रिष्टुप् छंदः। इं
द्रो देवता। तथा चानुक्रांतं। एवैकादशेति। अग्निष्टोमे माध्यंदिनसवने मैत्रावरुणस्येंद्र सूक्तं। सूत्र्यते हि। एवा त्वामिंद्र वज्रिन्नत्र सुषुमणः सुमना उपाक इति
याज्येति। पृष्ठ्याभिप्लवषडहयोः प्रथमेहनि मैत्रावरुणशस्त्रे अहीनसूक्तं तस्थाने त्रीसंपातसूक्तानि तत्रेदं प्रथमं सूक्तं। सूत्रितं च। एवा त्वामिंद्र य
म इंद्र इति ॥ ॥ तत्र प्रथमा ॥ ॥ एवा त्वामिंद्र वज्रिन्नत्र विश्वे देवासः सुहवास ऊमाः ॥ महामुभे रोदसी वृद्धमृष्वं निरेकमिद्वृणते वृत्रहत्ये ॥ ॥ तत्रास्मि
न् वज्रिन् हे वज्रिन्निंद्र सुहवासः सुहवाः शोभनाह्वानाः ऊमाः रक्षकाः विश्वे देवासः सर्वे देवाः उभे रोदसी द्यावापृथिव्यौ च एवमुक्तप्रकारेण अ
यमानं महांतं प्रभूतं वृद्धं गुणैः प्रवृद्धं ऋष्वं दर्शनीयं त्वां एकमित एकमेव वृत्रहननार्थं निवृणते निःशेषेण संभजंते ॥ ॥ अथ द्वितीया ॥ ॥ अवासृ
जंत जिव्रयो न देवा भुवः सम्राळिंद्र सत्ययोनिः ॥ अहन्नहिं परिशयानमर्णः प्रवर्तनीररदो विश्वधेनाः ॥ ॥ हे इंद्र देवाः जिव्रयो न जीर्णाः वृद्धाः पि
तरः पुत्रानिव अवासृजंत असुरवधार्थं प्रेरयंत। ततः हे इंद्र सत्ययोनिः सत्यानिवासस्त्वं सम्राट् सर्वेषां लोकानामधीश्वरो भुवः। अर्णः उद

ऋ॰सं॰भा॰६

मनस्कः। त्वं तु पाके समीपे नोस्मान् उ अस्तु अत्यंतं कामयमानः सन् सुषुतस्य सुष्टु अभिषुतं प्रतिभृतस्य संभृतं मध्वः मादकस्य सोमस्य सोमे
नुक्षिप्रमेवं याः पिब। पृष्ठ्येन पृष्ठ्यशब्देन माध्यंदिनसवने उक्थाभिः ऋक्षीयमानं स्तोत्रमुच्यते। तत्संबंधिना संअधसा पीतेन सोमेन सममदः हृ
ष्टो भव॥ ॥ अथ पंचमी॥ ॥ वि यो ररप्श ऋषिभिर्नवेभिर्वृक्षो न पक्वः सृण्यो न जेता॥ मर्यो न योषामभिमन्यमानो ऽच्छा विवक्मि पुरुहूतमिंद्रं॥ ॥ अ
पक्वः पक्वफलः वृक्षो वृक्ष इव अत्र रुणि अस्त्रो कुशवाची। तेनायुधमात्रं लक्ष्यते। सृण्यः आयुधकुशलः जेता न शत्रुविजयी वीरपुरुषः नवेभिः
नवैर्नूतनैः ऋषिभिः विररप्श विविधं अभिमन्यमानः मदीयेयं योषिदित्यभिजानन् अयं मंत्रः याषांनस्तामिचत हत्॥ ॥ इति तृतीयस्य षष्ठे
तृतीयो वर्गः॥ ॥ अथ षष्ठी॥ ॥ गिरिर्न यः स्वतवाँ ऋष्व इंद्रः सनादेव सहसे जात उग्रः॥ आदर्ता वज्रं स्थविरं न भीम उद्नेव कोशं वसुना न्यृष्टं॥
गिरिर्न पर्वत इव स्वतवान् स्वयं बद्धवृ ऋष्वो महान् ऋष्व इति महन्नाम महत् ब्रध्नः ऋष्व इति तत्राममुपाठात्। उदकेन जलया त्रमिव
वसुना तेजसा न्यृष्टं निगतं स्थाविरं दृहतूं वज्रं नवज्रेणेति चार्थे आवर्त्ता आहर्ता वा आसीत्॥ ॥ अथ सप्तमी॥ ॥ न यस्य वर्त्ता जनुषा न्वस्ति न रा
धस आमरीता मघस्य॥ उद्वावृषाणस्तविषीव उग्रास्मभ्यं दद्धि पुरुहूत रायः॥ ॥ हे इंद्र यस्य तव कश्चित् जनुषा जन्मना स्वत एव ऋतं सत्यं
वर्त्ता वारयिता नास्ति राधसः यज्ञादिकर्मणां साधकस्य मघवस्य त्वयादीयमानस्य धनस्य आमरीता कश्चिदपि नाशयिता नास्ति। हे तविषी
वः बलवन् उग्र तेजस्विन् हे पुरुहूत बहुभिराहूतेंद्र तु उद्वावृषाणः अभीष्टान् कामान् वर्षुकः त्वं रायः पश्वादिधनानि अस्मभ्यं स्तोतृभ्यः द्धि दे
हि॥ ॥ अथाष्टमी॥ ॥ ईक्षे रायः क्षयस्य चर्षणीनामुत व्रजमपवर्त्तासि गोनां॥ शिक्षानरः समिथेषु प्रहावान्वस्वो राशिमभिनेतासि भूरिं॥ ॥ हे इंद्र राम

त्वं चर्षणीनां प्रजानां रायः धनस्य ईक्षे ईशे यस्य ईक्षिता पि ध गोनां गवां व्रजं समूहं अपवर्त्ता अपवारको कोसि निरोधकेभ्यो गवां मोचयिता सीत्य
र्थः। किंच हे इंद्र शिक्षानरः शिक्षया नेता प्रजानां शासकः समिथेषु युद्धेषु प्रहावान् प्रहरणवान् त्वं भूरिं प्रभूतं वस्वो धनस्य राशिं समूहं अभि
नेतासि प्रापयिता च भवसि॥ ॥ अथ नवमी॥ ॥ कया तच्छृण्वे शच्या शचिष्ठो यया कृणोति मुहु का चिदृष्वः॥ पुरु दाशुषे विचयिष्ठो अंहोथा
दधाति द्रविणं जरित्रे॥ ॥ शचिष्ठः अतिशयेन प्राज्ञः तदिति लिंगव्यत्ययः तत्स इंद्रः कया शच्या कया प्रज्ञया शची इति प्रज्ञानामैतत् शृण्वे
श्रूयते। ऋष्वो महान् मुहुः पया प्रज्ञया का चित् कानि चित् कर्माणि कृणोति। स इंद्रो दाशुषे हविर्दत्तवते यजमानाय पुरु भूयिष्ठं अंहः पापं विचयि
ष्ठः अतिशयेन नाशको भवति। अथापि च जरित्रे स्तोत्रे द्रविणं पश्वादि धनं दधाति ददाति॥ ॥ अथ दशमी॥ ॥ मा नो मर्धीरा भरा दद्धि तन्नः प्र दा
शुषे दातवे भूरि यत्ते॥ नव्ये देष्णे शस्ते अस्मिन्त उक्थे प्र ब्रवाम वयमिंद्र स्तुवंतः॥ ॥ इंद्र त्वं नोस्मान् मामर्धीः मा हिंसीः किंतु त्वं आभर योषाकाभव।
हे इंद्र ते त्वदीयं भूरि बहु यत् प्रियं तन्नेदाशुषे हविर्दत्तवते यजमानाय दातवे दातुं प्रभवती तिशेषः नोस्मभ्यं तद्धनमाहृत्य दद्धि देहि। हे इंद्र त्वां स्तुवंतो
वयं अस्मिन् नुक्थे अस्मिन् अस्मिन्निष्क्वे व्याख्य शस्त्रे तेत्वदर्थं नव्ये नूतने शस्त्रे देष्णे दातव्ये हविषि सति निमित्त भूते सति प्रब्रवाम प्रकर्षेण त्वां वदाम।
॥ अथैकादशी॥ ॥ नू ष्टुत इंद्र नू गृणान॥ ॥ पूर्वं व्याख्यात॥ ॥ इति तृतीयस्य षष्ठे चतुर्थो वर्गः॥ ॥ आ याहींद्र इत्येकादशर्चं एकादशं सूक्तं
वामदेवस्यार्षं त्रैष्टुभमैंद्रं आयाह्वित्यनुक्रांतं। पृष्ठ्याभिप्लवषडहयोः पंचमेहनि तन्निविधानीयं सूक्तं तत्र। आयाह्विंद्रावस इति मरुत्वतीयमिति॥
॥ तत्र प्रथमा॥ ॥ आ याह्विंद्रो वस उप न इह स्तुतः सधमादस्तु शूरः॥ वावृधानस्तविषीर्यस्य पूर्वीर्द्यौर्न क्षत्रमभिभूति पुष्यात्॥ ॥ स इंद्रः नोस्माकं

ऋ०सं०भा०६

अवसेरक्षणाय उपायातु उपागछतु यइंद्रः इहास्मिन्यज्ञे स्तुतः। शूरो विक्रांतः वावृधानः प्रवृद्धः अयमिंद्रः समादस्तु अस्माभिः सहमाद्यन्भवतु
यस्येंद्रस्य तविषीः तविष्यः बलानि स्ववगः पूर्व्यो बह्वीः संतीति शेषः। द्यौः द्युः योर्न द्योतमानः सूर्य इव अभिभूतिपरकीयं बलमभिभावकं क्षत्रं स्व
कीयं बलं तेजो वा पुष्यात् पुष्यतु। सइंद्र उपायात्विति पूर्वेण संबंधः॥ ॥अथ द्वितीया॥ ॥तस्येदिह स्तवथ वृष्ण्यानि तुविद्युम्नस्य तुविराधसो नॄ
न्॥ यस्य क्रतुर्विदथ्यो न संम्राट् साह्वान्तरुत्रो अभ्यस्ति कृष्टीः॥ ॥तुविद्युम्नस्य बहुकीर्तेः तुविराधसः बहुधनस्य तस्य तत्तस्येंद्रस्य वृष्ण्या
नि बलभूतानि नेतॄन्मरुतः हे स्तोतारो यूयं इहास्मिन्यज्ञे। स्तवथ स्तुत साह्वान् शत्रूनभिभावुकः तरुत्रः अस्मानापद्भ्यस्तारकः यस्येंद्रस्य क्रतुः
कर्म कृष्टीः शत्रुसंबंधिनीः प्रजाः अभ्यस्ति अभिभवति। तत्र दृष्टांतः। विदथ्यो न संम्राट् विदथ्याहे नियज्ञार्हः सम्राट् सकलानां लोकानामधिपति
रिव तद्वत् तस्य वृष्ण्यानीति पूर्वेण संबंधः॥ ॥अथ तृतीया॥ ॥आयात्विंद्रो दिव आ पृथिव्या मक्षू समुद्रादुत वा पुरीषात्॥ स्वर्णरादवसे नो मरु
त्वान्परावतो वा सदनादृतस्य॥ ॥मरुत्वान् मरुद्भिः सहित इंद्रः नोस्माकं अवरक्षणाय दिवः स्वर्गालोकात् आयातु आगछतु। पृथिव्याः भूलो
कात् मक्षू शीघ्रं आयातु उत वा अथवा समुद्रात् अंतरिक्षलोकाच्च आयातु। समुद्र इत्यंतरिक्षनाम। सरंगसमुद्रः अरद्दति तत्रास मुषाहता राम
अथवा पुरीषात् उदकात् आयातु। पुरीषमित्युदकनाम मधु पुरीषं पिप्पलमिति तन्नामसु पाठात्। आयातु पुरीषमित्युदकनाम स्वर्णरात्
स्वरादित्यः नरो नेता यस्य तस्माल्लोकाद्वा आयातु परावतो वा दूराद्वा आयातु। ऋतस्य दकस्य सनात् स्थानात् मघलोकाद्वा आयातु॥ ॥अथ च
तुर्थी॥ ॥स्थूरस्य रायो बृहतो य ईशे तमु ष्टवाम विदथेष्विंद्रं॥ यो वायुना जयति गोमतीषु प्र धृष्णुया नयति वस्यो अछ॥ ॥इंद्रः स्थूरस्य स्थूलस्य

२८

इंद्रो दूरादान आसादिति संपात इति। तत्र प्रथमा॥ ॥आ न इंद्रो दूरादा न आसादभिष्टिकृदवसे यासदुग्रः॥ ओजिष्ठेभिर्नृपतिर्वज्रबाहुः संगे सम
त्सु तुर्वणिः पृतन्यून्॥ ॥अभिष्टिकृत् यजमानसंबंधि अभिष्टानां कर्ता उग्रस्तेजस्वी इंद्रः नोस्माकमवसा रक्षणाय दूरात् आयातु आगछतु। अपिच
आसात् आसन्नात् अंतिकाच्च नोस्माकमवसे रक्षणाय आयासत् आयातु। कीदृशः समत्सु संग्रामेषु संगे शत्रुभिः संयोगे सति पृतन्यून् शत्रून् तुर्वणिः हिं
सन् वज्रबाहुः वज्रहस्तः नृपतिः वृष्टिद्वारा नृणां मनुष्याणां पालकः ओजिष्ठेभिः अतिशयेन तेजस्विभिर्मरुद्भिर्युक्त इति शेषः॥ ॥अथ द्वितीया॥ ॥
आ न इंद्रो हरिभिर्यात्वछार्वाचीनो वसे राधसे च॥ तिष्ठाति वज्री मघवा विरप्शीमं यज्ञमनु नो वाजसातौ॥ ॥अर्वाचीनः अस्मदभिमुख इंद्रः अवसे
अस्मदीयाय रक्षणाय राधसे च धनाय च नोछ अस्मानभिमुखीकृत्य हरिभिरश्वैः सह। आयातु आगछतु। किंच वज्री वज्रवान् मघवा धनवान् वि
रप्शीति महन्नामसु पाठात्। अस्मदीयस्य कर्मणो द्वेष्टृभिः असुरादिभिः सहनोस्माकं वाजसातौ युद्धे प्राप्ते सति इममस्मदीयं यज्ञं अनु लक्ष्यति
ष्ठातीति शेषः॥ ॥अथ तृतीया॥ ॥इमं यज्ञं त्वमस्माकमिंद्र पुरो दधत्सनिष्यसि क्रतुं नः॥ श्वघ्नीव वज्रिन्त्सनये धनानां त्वया वयमर्य आजिं ज
येम॥ ॥हे इंद्र त्वं नोस्मान् पुरो दधत् पुरस्तात् कुर्वन् नः क्रतुं क्रियमाणमिमं यज्ञं सनिष्यसि संभजिष्यसि। अपिच श्वघ्नीव मृगयुर्मृगानिवा हवान्
नुव ज्रिन् इंद्र त्वया अर्य अरयः। स्तोतारो वयं धनानां सनये लाभाय आजिं शत्रुसंबंधिनं संग्रामं मा जयस्व संजायास्म॥ ॥अग्निष्टोमे माध्यंदिनस
वने मैत्रावरुणस्योशन्नुषुण इति शस्त्रुषुण इति शस्त्र इति याज्यास्तृतीतं च। उशन्नुषुणः सुमना उपाके इति याज्येति॥ ॥सेयास्तृतेर्वतुर्थी॥ ॥उश
न्नुषुणः सुमना उपाके सोमस्य नु सुषुतस्य स्वधावः॥ या इंद्र प्रतिभृतस्य मध्वः समंधसा ममदः पृष्ठ्येन॥ ॥हे स्वधावः अन्नवन्निंद्र सुमनाः शोभन

ष्टिकामानां वर्षितुरिंद्रस्य संबंधी इमेषः शुष्मो बलं स्तुत। तत्स्तोत्रं तुर्वत यजमानान्सिषक्ति। स च तद्वितियावतस्त्रा सत्यमेव इमे तद्बलं औशिजस्य यज
ऋ॰सं॰भा॰६ मानस्य भराय भर्तुर्गुहा गुहायां गुहाकरूरे हृदये प्रवतीति यत् तत्सत्यं यजमानस्य गोहे गृहे धिये कर्मणे प्रपवत्तीति यत् तत्सत्यं अयसे गमना
यकामानां प्राप्तये मदाय हर्षयितत्रय द्रूलं प्रेरे बितत्सत्य इंद्रस्य बलं यजमानं सर्वदा पालयतीत्यर्थः॥ ॥ अथाष्टमी॥ ॥ वियद्वरांसि पर्वतस्य
वृण्वे पयोभिर्जिन्वे अपां जवांसि॥ विदद्गौरस्य गवयस्य गोहे यदी वाजाय सुध्यो वहंति॥ ॥ इंद्रः पर्वतस्य मेघस्य वरांसि द्वाराणि विवृण्वेति वि
वृतानि कृतवानिति यत् अपां उदकानां जवांसि वेगात् पयोभिः जालैः जिन्वेत्यायतीति यत् यदि च सुध्यः शोभनकर्माणो यजमानाः नजायात्रा
वदंति इंद्रं प्राप्नुवंति। तदा गोहे गृहे गोरस्य गोमृगस्य गवयस्य गवयमृगस्य च विंदत लोह्येय शूलभत इति यत् तत्सर्वं इंदृश्येति पूर्वत्र संबंधः
अभ्युदयेष्टाविंद्रस्य प्रदातुः भद्रा ते हस्तेति याज्या सूत्रितं च। दीर्घस्ते अस्त्वंकुशो भद्रा ते हस्ता सुकृतोत पाणी इति॥ ॥ सेषा सूक्ते नवमी॥ ॥ भद्रा
ते हस्ता सुकृतोत पाणी प्रयंतारा स्तुवते राध इंद्र॥ का ते निषत्तिः किमु नो ममत्सि किं नोदुदु हर्षसे दातवा उ॥ ॥ हे इंद्र ते त्वदीयौ भद्रा भद्रौ कल्या
णौ हस्तौ सुकृता सुकृतौ शोभनकर्माणौ भवतः। उत अपि च पाणी त्वदीयौ हस्तौ स्तुवते स्तोत्रे यजमानाय राधो धनं प्रयंतारा प्रयंतारौ प्रदातारौ राम
भवतः हे इंद्र इति त्वदीया निषत्तिर्निषदनं स्थितिः का त्वं अस्मान् किमु किमर्थं नो ममत्सि न मादयसि। किमु दुदु किमर्थमेव दातवे अस्माकं धनं दा
तुं न हर्षसे हृष्टो न भवसि। एंद्रस्य वार्त्रघ्नस्य पशोदेवा वस्व इति हविषो याज्या सूत्रितं च। एवा वस्व इंद्रः सत्यः सम्राड्यद्वाग्वृदस्य विचेतना
नि॥ ॥ सेषा सूक्ते दशमी॥ ॥ एवा वस्व इंद्रः सत्यः सम्राड्ढंता वृत्रं वरिवः पूरवे कः॥ पुरुष्टुत क्रत्वा नः शग्धि रायो भक्षीय तेवसो दैव्यस्य॥ ॥ एव

एवमुक्तप्रकारेण स्तूयमानः सत्यः सत्यवान् वस्वो धनस्य सम्राट् ईश्वरः वृत्रं वृत्रनामानमसुरं हंता हंसि तेंद्रः पूरवे मनुष्याय यजमानाय व
रिवो धनं कः करोति ददातीत्यर्थः॥ क्रत्वा कर्मणा श्रुतिहेतुना हे पुरुष्टुत बहुभिर्यजमानैः स्तुतेंद्र त्वं नो अस्मभ्यं रायो धनानि शग्धि देहि। तत्वया
दीयमानस्य देवस्य देवसंबंधिनः अवसानस्य कर्मणि वच्छी भक्षीय अहं भजेयं॥ ॥ अथैकादशी॥ ॥ नू ष्टुत इंद्र नू गृणानः॰॥ ॥ पूर्वं व्याख्याता॥
॥ इति तृतीयस्य षष्ठे षष्ठो वर्गः॥ ॥ इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे दाशतय्यां चतुर्थमंडले द्वितीयोनुवाकः॥ ॥ तत्र
तृतीयेनुवाके एकादश सूक्तानि॥ तत्र यन्न इंद्र इत्येकादशर्चं प्रथमं सूक्तं वामदेवस्यार्षं त्रैष्टुभमैंद्रं यन्न इंद्र इत्यनुक्रमणिका। पृष्ठ्याभिप्लवय
रुहयोः प्रथमेहनि माध्यंदिनसवने मैत्रावरुणशस्त्रे द्वितीयमिदं संपातसूक्तं सूत्रितं च। एवा त्वामिंद्र यन्न इंद्र इति॥ ॥ तत्र प्रथमा॥ ॥ यन्न इं
द्रो जुजुषे यच्च वष्टि तन्नो महान्करति शुष्म्या चित्॥ ब्रह्म स्तोमं मघवा सोममुक्था यो अश्मानं शवसा बिभ्रदेति॥ ॥ इंद्रो नोस्मदीयं यद्धविर्ल
क्षणं आदिकं जुजुषे सेवते। यच्च हविरादिकं वष्टि कामयते। महान्प्रभूतः शुष्मी बलवानिंद्रः चिदिति चार्थे ब्रह्म चित् हविर्लक्षणं पुरोडा
शादिकं मेनं वस्तोत्रं समुहं च सोमं अभिषुतं सोमं च उक्थानि शस्त्राणि चेत्येवभूतं तद्वस्त्रादिचतुष्टयं आकरोति। आकरोतु। स्वीकरोतु। म
घवा धनवान् शावत्त्वा वा यो अश्मानं वज्रं बिभ्रत् धारयन् शवसा बलेन युक्तो य इंद्रः एति आगच्छति। स इंद्रः स्वीकरोत्विति पूर्वेण संबंधः॥
॥ अथ द्वितीया॥ ॥ वृषा वृषंधिं चतुरश्रिमस्यन्नुग्रो बाहुभ्यां नृतमः शचीवान्॥ श्रिये परुष्णीमुषमाण ऊर्णां यस्याः पर्वाणि सख्याय विव्ये॥ ॥
वृष्टिकामानां वर्षिता वृषंधिं मेघभेदनधारेण वर्षं कुर्वंतं चतुरश्रिं चतसृभिरश्रिभिर्धाराभिरुपेतं वज्रं बाहुभ्यां अस्यन् शत्रुषु प्रक्षिपन् उग्र उद्गूर्ण

तृ॰सं॰भा॰६

बलः नृतमः शवीयान् कर्मवानिंद्रः ओर्णं आछादिकां परुष्णीं पर्वतां नदीं श्रिये आश्रयणार्थं उपमाणां सेवमानो भवति। यस्या नद्याः पर्वाणि
भिन्नान् देशान् संख्याय सर्वा कर्माणि विव्ये संदृतवान्॥ ॥अथ तृतीया॥ ॥यो देवो देवतमो जायमानो महो वाजेभिर्महद्भिश्च शुष्मैः॥ दधानो
वज्रं बाह्वोरुशंतं द्यामभेन रेजयत्प्र भूम॥ ॥देवो दीप्यमानः देवतमो दातृतमः जायमानः उत्पद्यमानो य इंद्रः महो महद्भिर्वाजेभिरन्नैः मह
द्भिः शुष्मैर्बलैश्च युक्तो भवदिति शेषः॥ स इंद्रः बाह्वोर्हस्तयोरुशंतं कामयमानं वज्रं दधानो धारयन् अमेन बलेन द्यां द्युलोकं भूम भूलोकं च प्रर
जयत् प्रकंपयति स्म॥ ॥अथ चतुर्थी॥ ॥विश्वा रोधांसि प्रवतश्च पूर्वीर्द्यौरृष्वाज्जनिमन्रेजत क्षाः॥ आ मातरा भरति शुष्म्या गोर्नृवत्परि
ज्मन्नोनुवंत वाताः॥ ॥विश्वा विश्वानि रोधांसि रोधः उच्छ्रितेन उन्नतप्रदेशाः उच्यते उन्नतप्रदेशाः प्रवतः पूर्वीः सुबहूनि प्रवतः प्रवणानि समुद्राद्ये
त्यर्थः। द्यौः द्युलोकः क्षाः पृथिवी च जनिमन् इंद्रस्य जन्मनि सति ऋष्वात् महतस्तस्मादिंद्रात् रेजत अरेजत अकंपंत॥ किंच शुष्मी बलवानिं
द्रः गोर्मातृः सूर्यस्य मातरा मातरौ माता पितरौ भूतो द्यावापृथिव्यौ च इति वार्थं आभरति आसमंतात् बिभर्ति नृवत् मनुष्या इव वाताः इंद्रेण प्रेरिता
वायवश्च परिज्मन् अंतरिक्षे नोनुवंत शब्दायंते॥ ॥अथ पंचमी॥ ॥ता तू त इंद्र महतो महानि विश्वेष्वित्सवनेषु प्रवाच्या॥ यच्छूर धृष्णो धृष राम
ता दधृष्वानहिं वज्रेण शवसाविवेषीः॥ ॥हे इंद्र महतः प्रभूतस्य ते त्वदीयानि तानि कर्माणि तु क्षिप्रं महानि महांति भवंति। सर्वेष्वेव सव
नेषु प्रातःसवनादिकर्मसु त्वदीयानि प्रवाच्यानि स्तोतृभिः प्रकर्षेण वक्तुं योग्यानि स्तुत्यानि वा यत् हे धृष्णो प्रगल्भ हे शूर विक्रांत इंद्र दधृष्वान्
पाल्लकत्वेन लोकानुधारयन् शवसा बलेन युक्तः त्वं धृषता धर्षकेण वज्रेणाहिं असुरं अविवेषीः अवधीः रतीयत् एतदादीनि कर्माणि महांति

३०

इहतो महतः रायो धनस्य ईशे ईष्टे॥ विदथेषु यज्ञेषु विदथ इति यज्ञनामैतत्। तमिंद्रमेवं स्तोतारः स्तवाम। य इंद्र वायुना प्राणरूपेण बाल गोमती
षु सनासु जयति शत्रून् विजयते। धृष्णु धाधृष्णुः प्रगल्भो य इंद्रः स्तोतृन् वस्यः वसीयः श्रेष्ठं पश्वादि धनं अच्छाभिप्रणयति प्रापयति। तामवं इंद्र स्त
दामेति पूर्वेणासंबंधः॥ ॥अथ पंचमी॥ ॥उपयो नमो नमसि स्तभायन्नियर्ति वाचं जनयन्यजध्यै॥ ऋंजसानः पुरुवार उक्थैरेंद्रं कृण्वीत सदनेषु
होता॥ ॥उपस्तभायन् लोकानुपस्तंभयन् यजध्यै यष्टुं वाचं गर्जितलक्षणां वाचं जयत् प्रजनयन् ऋंजसानः प्रसाध्यमानः ऋंजतिः प्रसाधनक
र्मेति यास्कः। उक्थैः शस्त्रलक्षणैः स्तोत्रैः पुरुवारः बहुभिः संभजनीयो य इंद्रः नमसि नमः इत्यन्ननामैतत् यजमानैर्दत्ते हविषि नमः यजमान
भ्यो यज्ञादिसाधनमन्नं इयर्ति प्रेरयति इंद्रः हविषि तृप्तः सन् वृष्टिद्वारा अन्नं प्रयच्छतीति तेन चान्नेन पुनर्यज्ञः प्रतायत इत्यर्थः। अस्मदीय होमस
दनेषु यज्ञगृहेषु तमिंद्रं आकृण्वीत अभिमुखी करोतु॥ ॥इति तृतीयस्य षष्ठे पंचमो वर्गः॥ ॥अथ षष्ठी॥ ॥धिषा यदि धिषण्यंतः सरण्यान्सद
न्तो अद्रिमौशिजस्य गोहे॥ आ दुरोषाः पास्त्यस्य होता यो नो महान्त्संवरणेषु वह्निः॥ ॥धिषण्यंतः धिषणामिंद्रविषयां स्तुतिमिच्छंतः। उशिजस्य
उशिजः कामयमाना ऋत्विजः तद्धिषा संबंधी उशिजो यजमानः तस्य गोहे सदंतो निषीदंतो ऊनाः अद्रिं अदृणाति शत्रून् नित्यादृणिरिंद्रः। तमिंद्रं
धिषा स्तुत्या यदि पदा रण्यात् उपागछेयुः तदा स इंद्रः आयातु नोस्माकं संवरणेषु शत्रुसंबंधिषु निरोधेषु वह्निर्वोढा आ दुरोषाः स्यस्य पास्त्यस्य गृहव
सतो यजमानेन होता आह्वाता दुरोषाः दुरस्तक्रोधः य इंद्रः महान् प्रभूतो भवति स आयात्विति॥ ॥अथ सप्तमी॥ ॥सत्रा यदीं भार्वरस्य वृष्णः सि
षक्ति शुष्मः स्तुवते भराय॥ गुहा यदीमौशिजस्य गोहे प्र यद्धिये प्रायसे मदाय॥ ॥भार्वरस्य भर्वरो जगद्भर्ता प्रजापतिः तस्य पुत्रो भार्वरः तस्य वृ

ऋ॰सं॰भा॰६

आसक्रेसहोसि॥ अस्मभ्यंवृत्रासुहनानिरंधिजहिवधर्वनुषोमर्त्यस्य॥ ॥हेसक्रेसहनी। लद्वंसत्रासर्वदासहोसि। शत्रूनभिभावुका
निवर्षिष्ठा। वर्षिष्ठानिप्रवृद्धानिज्येष्ठाज्येष्ठानिप्रशस्तानिप्रवासानिनृम्णानिबलानिअस्मेअस्मभ्यंकृणुहि। कुरु। हेइंद्रत्वंअस्मात्यंहनोनि
त्रोभनवधानिवृत्रावृत्राणिशत्रूनरंधिरंधयवशंनय। किंचवनुषोहिंसकस्यमर्त्यस्यमरणशत्रोःसंबंधिवधःहननसमायुधंजहि। ना
शय॥ ॥अथदशमी॥ ॥ अस्माकमित्सुशृणुहित्वमिंद्रास्मभ्यंचित्राँउपमासिवाजान्॥ अस्मभ्यंविश्वाइषणःपुरंधीरस्माकंसुमघवन्बोधि
गोदाः॥ ॥अस्मदीयाएवस्तुतीःसुष्ठुशृणुहि। हेइंद्रत्वंचित्रान्चायनीयानिवाजानअन्नानिअस्मभ्यंउपसंस्कि। किंचअस्मभ्यंविश्वास
र्वाःपुरंधीर्बुद्धीरिषणः। प्रेरय। अपिचाहेमघवन्धनवन्निंद्रअस्माकंगोदाःगवांदातासुष्ठुबोधिभव॥ ॥अथैकादशी॥ ॥ नूष्टुतइंद्र
नूगृणानः०॥ ॥ पूर्वव्याख्याता॥ ॥ इतितृतीयस्यषष्ठेऽष्टमोवर्गः॥ ॥ कथामहामित्येकादशर्चंद्वितीयंसूक्तंवामदेवस्यार्षंत्रैष्टुभमैंद्रं।
ऋतस्यहिआद्यास्तिस्रःऋदेवताकाः। तथाचानुक्रांतं। कथोपांत्यास्तिस्रऋतदेव्योवेति। आभिप्लविकेहनिदशरात्रेप्रथमेहनिमाध्यंदि
नसवनेमैत्रावरुणशस्त्रेआहीनसूक्तस्यस्थानेइदंतृतीयंसंपातसूक्तं। सूत्रितंच। कथामहामिंद्रःपूर्भिद्यएवइंद्रइतिमहाव्रतेनिष्केवल्य
एतंतथैवपंचमारण्यकेशौनकेवलसूत्रितंच। कथामहामवृधत्कस्यहोतुरितिसंपातइति॥ ॥तत्रप्रथमा॥ ॥ कथामहामवृधत्कस्यहो
तुर्यज्ञंजुषाणोअभिसोममूधः॥ पिबन्नुशानोजुषमाणोअंधोववक्षऋष्वःशुचतेधनाय॥ ॥महांमहांतंगुणैःप्रवृद्धमिंद्रंकथाकथंकेन
प्रकारेणअवृधत्वर्धयेत्। अस्मात्वेरितास्तुतिरितिशेषः। उपसर्गश्रुतेरुचितक्रियाध्याहारः। किंचकस्यहोतुःउद्गतमविप्रवृद्धंसोममधःसोम

३१

लक्षणमन्नंपिबन्आस्वादयन्उशानःतद्देवत्वंकामयमानःजुषाणःसेवमानश्चऋष्वोमहानिंद्रःशुचतेदीप्तायधनायहिरण्यार्थलक्ष
णायउत्कलक्षणेधनेकस्मैयजमानायदातुंववक्षवहतिपीमवान्नंजठरेधारयतिअनेनेवाक्यद्वयेनेंद्रस्याचिंत्यचरितत्वंख्यापितंभवति।
॥अथद्वितीया॥ ॥कोअस्यवीरःसधमादमापसमानंशसुमतिभिःकोअस्य॥ कदस्यचित्रंचिकितेकदूतीवृधेभुवच्छशमानस्ययज्योः॥
॥अस्येंद्रस्यसंबंधिनंसधमादंसहमाद्यंतिइतिसधमादःसंग्रामःसंसहसोमयागंवावीरःशत्रूणाममित्राणांवावीरयिताकःपुमान्
आपप्राप्नोति। कश्चेंद्रस्यसुमतिभिःशोभनाभिरनुग्रहबुद्धिभिःसमानंशसंगच्छते। कश्चिद्वाजास्यइंद्रस्यचित्रंचायनीयंधनंचिकेतप्रज्ञा
यते। तस्यदानसमर्थंतत्कोपिजानातीत्यर्थः। कदूतीःकदावाशशमानस्यस्तुवतःयज्योर्यष्टुर्यजमानस्यवृधेवर्धनायकत्यारक्षयाभुवत्भवेत्।
॥अथतृतीया॥ ॥कथाशृणोतिहूयमानमिंद्रःकथाशृण्वन्नवसामस्यवेद॥ काअस्यपूर्वीरुपमातयोहकथैनमाहुःपपुरिंजरित्रे॥ ॥
इंद्रःपरमैश्वर्ययुक्तःहूयमानान्नमाह्वाययतःस्तोतारंकथाकथंशृणोतितिस्रोत्राणिशृण्वन्अस्यस्तोतुःसंबंधीनिअवसाकथाकथंचवेद
---- वेत्तिपूर्वीःपुरातनानिअस्येंद्रस्यसंबंधीनिउपमातयोकाहकासंनीविशेषःतानिदातानिजरित्रेस्तोतुः ---- संबंधिनोकामा
नांपपुरिंतारमेतमिंद्रंकथाकथंचकुःवदंति॥ ॥अथचतुर्थी॥ ॥ कथासबाधःशशमानोअस्यनशदभिद्रविणंदीध्यानः॥ देवोभुवन्नवेदा
मऋतानांनमोजगृभ्वाँअभियज्जुजोषत्॥ ॥ सबाधःसपत्नानांयोअसहितःशशमानःइंद्रविषयांस्तुतिंकुर्वन्दीध्यानःकर्मभि
दीप्यमानोयजमानःअस्येंद्रस्यसंबंधिद्रविणंपश्वादिधनंकथाकथंअभिनशत्। अभिप्राप्नोति। नमःहविर्लक्षणमन्नंजगृभ्वान्गृही

राम

ऋ॰सं॰भा॰६

तवानिंद्रः यद्यदा अभिजुहोपत् मामभित्सवेतदा देवौ दीप्यमानौ इंद्रः मेमदीयानी ऋतानांस्तोत्राणां नवेदाः अतिशयेन ज्ञाता भवतु तत्र निपातस्थोक
रोतियथावी ॥ ॥अथपंचमी॥ ॥कथाकदस्या उषसो व्युष्टौ देवो मर्त्तस्य सख्यं जुजोष॥ कथाकदस्य सख्यं सखिभ्यो य आस्मिन्कामं सुयुजं
ततस्रे॥ ॥देवो द्योतमानः इंद्रः अस्या उषसः व्युष्टौ प्रभाते मर्त्यस्य मनुष्यस्य स्तोतुः से बंधि सख्यं सखिकर्म कथाकथं केन प्रकारेण कल्क
दा जुजोषसेवेह॥ यस्तोतारः अस्मात्रि इंद्रः सुयुजं सुष्ठु प्रयुज्यमानं कामं कामनीयं हविः स्तोत्रं च सस्रे वितेनिरे। अस्य इंद्रस्य सख्यं सखिभ्यः
स्तेभ्यः स्तोतृभ्यः कथाकथं कल्कदा चित्र भवेदितिशेषः॥ ॥इतितृतीयस्य षष्ठे नवमो वर्गः॥ ॥अथषष्ठी॥ ॥किमादमत्रं सख्यं सखिभ्यः
कदा नु ते भ्रात्रं प्रब्रवाम॥ श्रिये सुदृशो वपुरस्य सर्गाः स्वर्णं चित्रतममिषआ गोः॥ ॥हे इंद्र वयं यजमानाः तेत्वदीयं अमत्रं शत्रूनभिभावकं
सख्यं सुकर्म सखिभ्यः स्तोतृभ्यः किमात् कस्वित् प्रब्रवाम प्रकर्षेण वदेम तेत्वदीयं भ्रात्रं भ्रातृकर्म च कदा नु कदा खलु प्रब्रवाम सुदृशः शोभ
नदर्शनस्यास्येंद्रस्य संबंधिनः सर्गाः उद्योगाः श्रिये सर्वेषां स्तोतॄणां श्रेयसे भवतीति शेषः स्वर्णं सूर्यो यथा दर्शनीयस्तत्तः तथा गो गंतुरिंद्रस्य
चित्रंतमं दर्शनीयतमं वपुः शरीरं एषे आसमंतात्सर्वैरिष्यते॥ ॥अथसप्तमी॥ ॥द्रुहं जिघांसन्ध्वरसमनिंद्रां तेतिक्ते तिग्मा तुजसे अनीका।
ऋणा चिद्यत्र ऋणया न उग्रो दूरे अज्ञाता उषसो बबाधे॥ ॥अयमिंद्रः द्रुहं द्रोहं कुर्वंतीं ध्वरसं हिंसिकां अनिंद्रां इंद्रमजानंतीं राक्षसीं जि
घांसन्हंतुमिच्छन् तिग्म तिग्मानि पूर्वं भवती क्ष्णानि अनीकान्यायुधानि तुजसे तद्धायतेति केअत्यर्थं तीक्ष्णीकरोति। यत्र यस्मिन्
प्रेः सुतद्रुपलक्षितेऽहः सुऋणाचित् ऋणान्यपि सोम्य आर्भंत इतिशेषः ता उषसश्च उग्र उद्गूर्णबले ऋणया ऋणस्य हंता इंद्रः या तिर्वधकर्मा

३२

राम

निपूर्वेण संबंधः। अत्र अविवेषीरितिवधकर्मा॥ ॥इतितृतीयस्य षष्ठे सप्तमो वर्गः॥ ॥अथषष्ठी॥ ॥ता हूत ते सत्या तुविनृम्ण विश्वा प्रधेनवः
सिस्रते वृष्ण ऊध्नः॥ अधा ह त्वद्वृषमणो भियानाः प्र सिंधवो जवसा चक्रमंत॥ ॥हे तुविनृम्ण अधिकबलेंद्र ते त्वदीयानि विश्वानि तानि कर्मा
णि नु क्षिप्रं सत्यानि भवंति। हे इंद्र वृष्णः कामानां वर्षितुस्तवते भवात् धेनवो गावः ऊध्नः स्वकीयाद् आपीनात् प्रसिस्रते प्रकर्षेण क्षीरं क्षरंति अ
धापि च वृषमनः कामानां वर्षणपरमनस्कं इंद्र सिंधवो नद्यः त्वत् त्वत्तो भियानाः बिभ्यत्यः सत्यः जवसा वेगेन प्रचक्रमंत प्रकर्षेण गच्छंति खलु।
अथ खलु॥ ॥अथसप्तमी॥ ॥अत्राह ते हरिवस्ता उ देवीरवोभिरिंद्र स्तवंत स्वसारः। यत्सीमनु प्र मुचो बद्बधाना दीर्घामनु प्रसितिं स्यंदय
ध्यै॥ ॥हे इंद्र त्वं यद्यदा बद्बधानाः वृत्रेण बध्यमानाः सीमनु एना नदीः रुद्ध इयदीर्घा अत्यधिकां प्रसितिं बंधनमनुस्यंदयध्यै यथाकामं स्यंद
तुं प्रसवः प्रकर्षेण मोचयः। हे हरिवः हरिवन्निंद्र अत्राह अत्रैव मोचनावलायां ता उ ताः प्रसिद्धाः एव देवीः देव्यो द्योतमानाः स्वसारो नद्यः अ
त्रस्तवः शद्रोनदीवाची अवोभिः त्वत्कृतै रक्षणैः तेत्वां स्तवंत स्तावयति नदी घरणादिभिः कर्मभिः जना इंद्रं स्तुवंतीत्यर्थः॥ ॥अथाष्टमी॥ ॥पि
पीळे अंशुर्मद्यो न सिंधुरा त्वा शमी शशमानस्य शक्तिः॥ अस्मद्र्यक् शुशुचानस्य यम्या आशुर्न रश्मिं तुव्योजसं गोः॥ ॥हे इंद्र मघानी द
पिता अंशुः सोमः पिपीळे आपीड्यत। अभ्यभूषतेत्यर्थः। नेति संप्रत्यर्थे न इदानीं सिंधुः स्यंदमानः सामधात्वो अगम्याः आय छन्त्सु शुशु
चानस्य दीप्यमानस्य स्तुवतः संबंधिन्याः के अस्मदभिमुखं शमी शमनं शक्तिः श्रुति कर्म च आसहतु। तत्र दृष्टांतः। आशुः शीघ्रगामश्वतागो
र्गंतुरश्वस्य तुव्योजसं बहुबलं दृढमित्यर्थः। रश्मिं न अश्ववंधनयज्ञामिव तद्वत्॥ ॥अथनवमी॥ ॥अस्मे वर्षिष्ठा कृणुहि ज्येष्ठा नृम्णानि स

रोडाशादीनूपचानूपचनं कुर्यात् । उतापिचयः धानाः भर्जनयोग्यातेवयवान् अन्नवाचीधानाशब्दः तद्योग्यंचयमाव्रेलक्ष्यति । भ्रज्ञातिभ्रज
तै॰सं॰भा॰६ तृ भर्जनंकुर्यात् । इंद्रमनायोः स्कृतिमिच्छतो यजमानस्य उक्थानिस्तोत्राणिप्रतिहर्यन् प्रतिकामयमानः सन्तृत स्मिन्यजमाने वृषणं कामान्
वर्षणसमर्थं शुष्मी बलं दधत धारयन् ॥ ॥ अथाष्टमी ॥ ॥ यदासमर्यंत्यचे दद्यावादीर्घयदाजिमभ्यख्यदर्यः ॥ अचिक्रदद्वृषणंपत्न्यच्छादुरो
ण आनिशितं सोमसुद्भिः ॥ ॥ यदा दद्यावान् शत्रूणांहिंसक इंद्रः समर्यं सहमन्तव्यं शत्रुं च्यवेत च्यावयेत् । विशेषेण जानीयात् यदीअर्यः स्वा
मी इंद्रः दीर्घमत्यधिक आजिसंग्रामे अभ्यख्यत् अभिपश्यत् तदातस्येंद्रस्य पत्नी दुरोणे यज्ञगृहे सोमसुद्भिः सोमं ल्वद्भिः ऋत्विग्भिः निशितं नी
क्ष्णीकृतं सोमपानेनोत्साहवंतमित्यर्थः ॥ वृषणं कामानां वर्षितारमिंद्रं अच्छ अभि आ अचिक्रदत् आक्रंदन्याह्वयते ॥ ॥ अथनवमी ॥ ॥ भूयसाव
स्नमवरत्कनीयोविक्रीतोअकानिषं पुनर्यन् ॥ सभूयसाकनीयोनारिरेचीद्दीनादक्षाविदुहंति प्रवाणं ॥ ॥ अत्र रूक्कृदये संप्रदायविद्भिः पूर्वा
चार्यैः केचित् श्लोकाः पठ्यंते तएव लिख्यंते ॥ ॥ वल्ल्येयःपरिगृह्णाति मूल्यंपर्याप्तेन भूयसा । सक्रेतारं पुनर्गच्छन् नसविक्रीतवान्पुरा । इति राम
य ब्रुवन्कामतेपुनर्मूल्यस्य पूरणं सवित्रे तापुनर्मूल्यं भूयसानप्रपूर्यते । २ । हीनेनलभतेवस्तुं याविक्रीतवान्पुरा । यथासमयमेवस्याताया
नपुनरन्यथा ॥ इत्यर्थं विक्रयएवेतिसमयश्चकुतोभवेत् । अथमूल्यार्थमितस्यामविचार्यैवनिश्चयिः ॥ धत्र अन्येवसमयोकारितदामूल्यंप
पूर्यतिं तस्मादादौ मयाकार्यः समायांत्रेतिचिंतायत् । वामदेवऋषीकृत्यत्राऽर्कं स्तोत्रेण भूयसा ॥ विक्रीणन्समये चक्रे इंद्रं इंद्रमित्यृचि दृश्य
तश्च द्धावरकार्थं भूयसावस्नमित्यर्थमिति । अयमर्थः प्रतिपाद्यते । कश्चित् भूयसा भूयसापल्येतद्रव्येण कनीयोल्पतरं वस्नं वसु मूल्यं धनमव

२४

हूरेश्रज्ञाताः अननुभूताः सतीर्बवाधे अपीडयत् । ऋतपेयनाप्येका । हेमरुत्वतीयनिष्केवल्यशस्त्रयोनिर्विद्वान्पुरस्तात् ऋतस्यहीत्येतदादिके
ऋचो क्रमेण शंसनीये सूचितं वऋतस्यहि शुरुधः संतिपूर्वीरितिसूक्तमुखेइति ॥ ॥ सेषास्सूक्तेपूर्वी ॥ ॥ ऋतस्यहिशुरुधः संतिपूर्वीऋतस्यधी
तिर्वृजिनानिहंति ॥ ऋतस्यश्लोकोबधिराततर्दकर्णाबुधानः शुचमानः आयोः ॥ ॥ अत्र ऋतशब्देनेंद्रोवादित्योवासत्यंवायज्ञोवाभिधीयते । ऋत
स्य ऋतदेवस्य संबंधिन्यः पूर्वीर्बह्व्यः शुरुधः आपः संतिहिभवंतिखलु ऋतस्य ऋतदेवस्यसंबंधिनी श्लोकः श्रुतिरूपावाक् आयोर्मनुष्य
स्यसंबंधिनोकर्णकिर्णोततर्दहृणतिकीदृशः श्लोकः बुधानोबुध्यमानः शुचमानोदीप्यमानः ॥ ॥ अथनवमी ॥ ॥ ऋतस्यदृल्हाधरुणानिसंति
पुरूणिचंद्रावपुषेवपूंषि ॥ ऋतेनदीर्घमिषणंतपृक्षऋतेनगावऋतमाविवेशुः ॥ ॥ वपुषेवपुष्मतः पद्यर्थेचतुर्थी । ऋतस्य ऋतदेवस्यसंबंधि
निदृल्हादृढानिधरुणानिधारकाणि बहूनि चंद्राचंद्राणि आल्हादकानिवपूंषिरूपाणिसंतिभवंति ऋतेन ऋतदेवेन दीर्घं अत्यधिकं पृक्षः अन्नं
इषणंतस्तोतरइच्छंति ऋतेन ऋतदेवेन गावोधेनवः ऋतंयज्ञं दक्षिणात्वेन आविवेशुः प्रविशंति । यद्वागावोरश्मयः ऋतमुदकं आविवेशुः ॥ ॥
अथदशमी ॥ ॥ ऋतंयेमान ऋतमिद्वनोत्यृतस्यशुष्मस्तुरयाउगव्युः ॥ ऋताय पृथ्वीबहुलेगभीरे ऋतायधेनूपरमेदुहाते ॥ ॥ ऋतंऋतदेवं
येमानोनियच्छन् स्तुतिभिर्वशीकुर्वन् स्तोता ऋतमित् ऋतदेवमेव । वनोतिसंजते ऋतस्य ऋतदेवस्यसंबंधि शुष्मोबलं तुरयाउगव्युः ऊ इतिशा
र्थं जलकामश्च भवति । बहुले विस्तीर्णे गभीरे दुरवगाहे पृथ्वीद्यावापृथिव्यो ऋताय ऋतदेवायभवतः । धेनूप्रीणयित्र्यौ परमेउत्कृष्टे द्यावापृथिव्यो
ऋताय ऋतदेवायेव दुहाते दोहनं कुर्वातो ॥ ॥ अथैकादशी ॥ ॥ नूष्टुतइंद्रनूगृणानः ॥ ॥ पूर्वंव्याख्याता ॥ ॥ इतितृतीयस्यषष्ठेदशमोवर्गः ॥ ॥

।कासुष्टुतिरित्येकादशर्चं सूक्तं।वामदेवस्यार्षमैंद्रं दशमनुष्टुप् शिष्टास्त्रिष्टुभः।तथा चानुक्रमणिका।कासुष्टुतिरूपांत्यानुष्टुबिति।विनियोगो लैं
ऋ॰सं॰भा॰६ गिकः॥ ॥तत्र प्रथमा॥ ॥कासुष्टुतिः शवसः सूनुमिंद्रमर्वाचीनं राधस आववर्तत्॥ ददिर्हि वीरो गृणते वसूनि स गोपतिर्निःषिधां नो जनासः॥
॥काकीदृशी सुष्टुतिः शवसः सूनुं बलस्य पुत्रं अतिबलिमित्यर्थः॥ अर्वाचीनं अस्मदभिमुखं इंद्रं परमैश्वर्यं राधासः धनाय अस्मभ्यं धनं दातुं आ
ववर्तत् आवर्तयेत् हे जनासो जना यजमानाः वीरो विक्रांतः गोपतिः पश्वादिधनस्य पालकः स इंद्रः निःषिधां निषेत्॥ णां संबंधीनि वसूनि धना
नि गृणते गृणद्भ्यः स्तोतृभ्यः नोस्मभ्यं ददिर्हि दाता खलु भवति॥ ॥अथ द्वितीया॥ ॥स वृत्रहत्ये हव्यः स ईड्यः स सुष्टुत इंद्रः सत्यराधाः॥ स या
मन्ना मघवा मर्त्याय ब्रह्मण्यते सुष्वये वरिवो धात्॥ ॥स इंद्रः वृत्रहत्ये वृत्राणां शत्रूणां हत्ये हनने निमित्तभूते सति यामन् युद्धे हव्यः आह्वातव्यो
भवति।स इंद्र ईड्यः स्तुत्यो भवति।स इंद्रः सुष्टुतः सन् सत्यराधाः यजमानेभ्यो दातुं सत्यधनो भवति मघवा नु स इंद्रः ब्रह्मण्यते स्तोत्रमिच्छते सु
ष्वये सोमं सुन्वते मर्त्याय मनुष्याय यजमानाय वरिवो धनं वरिव इति धननामैतत्॥ आसमंताद्ददाति॥ ॥अथ तृतीया॥ ॥तमिन्नरो विह्वयंते
समीके रिरिक्वांसस्तन्वः कृण्वत त्रां॥ मिथो यत्त्यागमुभयासो अग्मन्नरस्तोकस्य तनयस्य सातौ॥ ॥नरो नेतारो मनुष्याः समीके युद्धे तमित् तमेवें
द्रं विह्वयंते विविधमाह्वानं कुर्वते।तन्वः स्वकीयानि शरीराणि रिरिक्वांसः प्रसेचयंतो यजमानाः तमेवेंद्रं त्रातारं कृण्वत कृण्वते कुर्वते।यद्यदा
मिथः परस्परं संगताः उभयासः उभये यजमानाः स्तोतारश्च त्यागं कर्तारं दातारं इंद्रमग्मन्नुपगच्छंति।तदा तारः उभयविधमनुष्याः तोकस्य पु
त्रस्य च सातौ लाभे निमित्तभूते सति तमेवेंद्रं त्रातारं कुर्वंतीति संबंधः॥ ॥अथ चतुर्थी॥ ॥क्रतूयंति क्षितयो योग उग्राशुषाणासो मिथो अर्णसातौ॥
राम

३२

संयद्विशो ववृत्रंत युध्मा आदिन्नेम इंद्रयंते अभीके॥ ॥हे उग्र उद्गूर्णबलेंद्र आशुषाणासो व्याप्नुवंतः क्षितयो मनुष्याः क्षितय इति मनुष्यनामैत
त्॥ अर्णसातौ सस्यादिफलसिध्यर्थमुदकलाभे निमित्ते सति मिथः परस्परं योगे संबंधे सति क्रतूयंति क्रतून् कर्माणीच्छंति।यद्यदा युध्माः यो
धयित्र्यो विशः प्रजाः अभीके युद्धे अभीक इति संग्रामनामैतत्॥ समतः सं तत्र संवर्तंते।परस्परं संगच्छंते आदित् तदानीमेवातमेवातमेकतमाप्य
वंतो याधकाः इंद्रयंते युद्धे इंद्रमिच्छंति॥ ॥अथ पंचमी॥ ॥आदिद्ध नेम इंद्रियं यजंत आदित्पक्तिः पुरोळाशं रिरिच्यात्॥ आदित्सोमो वि पपृ
च्यादसुष्वीनादिज्जुजोष वृषभं यजध्यै॥ ॥आदित्तदानीमेव युद्धकाले नेमे च नेमे अन्ये योधाः इंद्रियं बलवंतमिंद्रं यजंते ह पूजयंते खलु।क
श्चित् आदिदनंतरमेव पुरोळाशं पृष्ठरूपं हविः पंक्तिः पचनं रिरिच्यात् नुधातः आदिदनंतरमेव कश्चिद्वृषभं कामानां वर्षितारमिंद्रं यजध्यै यष्टुं जु
जोष सेवते॥ ॥इति तृतीयस्य षष्ठे एकादशो वर्गः॥ ॥अथ षष्ठी॥ ॥कृणोत्यस्मै वरिवो य इत्थेंद्राय सोममुशते सुनोति॥ सध्रीचीनेन म
नसाविवेनं तमित्सखायं कृणुते समत्सु॥ ॥यो यजमानः सोमं उशते कामयमानाय इत्था अमुत्र स्वर्गलोके स्थिता।य इंद्राय सुनोति अ
भिषवं करोति।इंद्रोपि अस्मै यजमानाय वरिवो धनं कृणोति करोति।सध्रीचीनेन संगतेन मनसा प्रवणेन चित्तेन अविवेनं वेनतिः कांतिक
र्मा विवेनो विगतो विगतेच्छः।तदन्यः अविवेनः आत्मानं कामयमानं तमित्तमेव तं यजमानं सखायं मित्रं समत्सु संग्रामेषु इंद्रः कृणोति क
रोति॥ ॥अथ सप्तमी॥ ॥य इंद्राय सुनवत्सोममद्य पचात्पक्तीरुत भृज्जाति धानाः॥ प्रति मनायोरुचथानि हर्यंतस्मिन्दधद्वृषणं शुष्ममिंद्रः॥
॥यस्मिन्नह्नि दिवसे यो यजमानः इंद्राय परमैश्वर्ययुक्ताय देवाय सोमं सोमलक्षणमन्नं सुनवत् अभिषवं कुर्यात्॥ तथा यः पक्तीः पक्तव्यान् अपू

ऋ·सं·भा·६

त्मानमृषिस्तुष्टावेंद्रो वात्मानं परान् वाष्टौ वा त्र्यृचेन स्तुतिरिति। अत्राहं मनुरित्याद्याभिस्तिसृभिरात्मानमिंद्ररूपेण वामदेवः स्तुतवान्। यद्वा इंद्र ए
वात्मानं स्तुतवान्। अतो वामदेववाक्यत्वाद्वामदेव ऋषिः इंद्रो देवता इंद्रवाक्यत्वादिंद्र ऋषिः परमात्मा देवता। त्रिष्टुप् छंदः। अवशिष्टानां वामदेव ऋ
षिः। अवशिष्टाभिरुत्तरसूक्ते नव सुपर्णात्मा ब्रह्म स्तूयते। अतस्तासां परब्रह्म देवता। श्येन नाम्न्येकाहे माध्यंदिनसवने मरुत्वतीयशस्त्र इ
दं सूक्तं। श्येनाजिराभ्यामपि चरन्त्या जेताहं मनुर्गर्भे नु सन्निति।। तत्र प्रथमा।। अहं मनुरभवं सूर्यश्चाहं कक्षीवाँ ऋषिरस्मि विप्रः। अहं
कुत्समार्जुनेयं न्यृंजेहं कविरुशना पश्यता मा।। इदमादिमंत्रत्रयं गर्भे वसन्वामदेवः उत्पन्नतत्त्वज्ञानः सन् सर्वात्मत्वानुभवं मन्वादिरूपे
ण प्रदर्शयन्नाह। अहं वामदेवः मनुरभवं। सर्वस्य मंता प्रजापतिरस्मि। अहमेव सूर्यश्च सर्वस्य प्रेरकः सविता चास्मि। विप्रो मेधावी कक्षीवान् दीर्घ
तमसः पुत्र एतत्संज्ञक ऋषिरप्यहमेवास्मि। उक्तमुपलक्षणं परमार्थदृष्ट्या कृत्स्नमप्यहमेवास्मीत्यर्थः। हे जनाः मां सर्वात्मकं पश्यत यूयमप्येव
मेवंस्वरूपमनुभवतेत्युक्तं भवति।। अथ द्वितीया।। अहं भूमिमददामार्यायाहं वृष्टिं दाशुषे मर्त्याय। अहमपो अनयं वावशाना मम देवासो
अनु केतमायन्।। अहं वामदेवः इंद्रो वा आर्याय मनवे भूमिं पृथ्वीं अददां दत्तवानस्मि। दाशुषे हविर्दत्तवते मर्त्याय मनुष्याय यजमानाय वृष्टिं स
स्याद्यभिवृद्ध्यर्थं वृष्टिलक्षणमुदकं अहमेव अददां। किंच। अहं वावशानाः शब्दायमानाः अपः उदकानि अनयं सर्वमपि प्रदेशमगमयं। देवा
सो वह्न्यादयो देवाः मम केतं मदीयं संकल्पं अन्वायन् अनुयंति।। अथ तृतीया।। अहं पुरो मंदसानो व्यैरं नव साकं नवतीः शंबरस्य। शतत
मं वेश्यं सर्वताता दिवोदासमतिथिग्वं यदावं।। अहं वामदेवः इंद्रो वा मंदसानः सोमेन माद्यन् नव नवसंख्याकाः नवतीर्नवतिसंख्याकाः शंब

राम

३६

उत्प्राप्नोति। पुनर्यन्नक्रेता त्वं पुनर्गच्छन् स विक्रेता अयमर्थो मया विक्रीत इति ब्रुवन्। अकोनिष्ठं मूल्यमूर्नं कामयते वात्यये नोत्तमपुरुषः सवि
क्रेता भूयसा धनेन कनीयोऽल्पतरं मूल्येन रिरेचीत्। ऋणुः सकाशात् न रिक्तीकरोति। न लभत इत्यर्थः। दीनाः असमर्थाः दक्षाः समर्थाः प्रवाणं
वचनं वि दुहंति। यथोक्तं यत्कालेन तथैव लभंते।। अथ दशमी।। क इमं दशभिर्ममेंद्रं क्रीणाति धेनुभिः। यदा वृत्राणि जंघनदथैनं मे पुन
र्ददत्।। ममदीयं इमं स्वभूतमिंद्रं धेनुभिः प्रीणयित्रीभिः दशभिर्दशसंख्याकाभिः कः क्रीणाति। रूपयं करोति। तदानीं हे क्रेतारो युष्माकं मध्ये
एवमपि समयः क्रियते। यदायमिंद्रः वृत्राणि त्वदीयान् शत्रून् जघनत् हन्यात् अथानंतरमेव एतमिंद्रं मे मह्यं पुनर्ददत् पुनर्दद्यात्।। अथै
कादशी।। नू ष्टुत इंद्र नू गृणानः०।। पूर्वं व्याख्याता।। इति तृतीयस्य षष्ठे द्वादशो वर्गः।। को अद्येत्यष्टर्चं चतुर्थं सूक्तं वामदेवस्या
र्षं त्रैष्टुभमैंद्रं। तथा चानुक्रांतं। को अद्याष्टाविति। दशरात्रे चतुर्थेहनि माध्यंदिने सवने स्तोमवृद्धौ मैत्रावरुणशस्त्रे आरंभणीयायां उपरिष्टादि
दं सूक्तं। आवपनीयं च। स्तोमे वर्धमाने को अद्य नर्य इति।। तत्र प्रथमा।। को अद्य नर्यो देवकाम उशन्निंद्रस्य सख्यं जुजोष।। को वा महे वसे
पार्याय समिद्धे अग्नौ सुतसोम ईट्टे।। अद्यास्मिन् दिवसे नर्यो मनुष्येभ्यो हितः। देवकामो देवान् इच्छन् उशन् कामयमानः इंद्रस्य सख्यं सखित्वं जु
जोष सेवते। किंच सुतसोमः अभिषुतसोमः को वा यजमानः अग्नौ समिद्धे प्रज्वलिते सति महे महते पद्रशाय पार्याय पारमहासे अवसे अर्प
णाय ईट्टे स ईट्टे।। अथ द्वितीया।। को नानाम वचसा सोम्याय मनायुर्वा भवति वस्त उस्राः।। क इंद्रस्य युज्यं कः सखित्वं को भ्रात्रं वष्टि कव
ये क ऊती।। को यजमानः वचसा वाग्रूपया स्तुत्या सोमम्हि। यदिंद्राय ननाम नमति प्रह्वो भवति को वा इंद्राय मनायुः भवति। स्तुतिकामो स्ति

त॰सं॰भा॰६

कः उस्राः इंद्रे प्रदत्ता गाः वस्ते आच्छादयति। धारयतीत्यर्थः। कः इंद्रस्य युज्यं साहाय्यं वष्टि इच्छति। कवये क्रांतदर्शिने। इंद्राय ऊतीं कृत
ये तर्पणाय को भयतीति शेषः॥ ॥ अथ तृतीया॥ ॥ को देवानामवो अद्या वृणीते क आदित्यां अदितिं ज्योतिरीट्टे॥ कस्याश्विना विंद्रो अ
ग्निः सुतस्यांशोः पिबंति मनसा विवेनं॥ ॥ अद्यास्मिन् दिने को यजमानः देवानां द्योतमानानां इंद्रादीनां अवः रक्षणं वृणीते प्रार्थयते। कः आ
दित्यान् देवान् अदितिं देवमातरं च ज्योतिरुदकं च ईट्टे। याचते। अश्विनौ अश्विदेवौ इंद्रश्च अग्निश्च मनसा स्तुत्या प्रीताः संतः अविवेनं अविग
तकामं यथाकाममित्यर्थः। कस्य यजमानस्य संबंधिनः सुतस्य अभिषुतस्य अंशोः सोमस्य सोममित्यर्थः। पिबंति पानं कुर्वंति॥ ॥ अथ चतु
र्थी॥ ॥ तस्मा अग्निर्भारतः शर्म यंसज्ज्योक् पश्यात्सूर्यमुच्चरंतं॥ य इंद्राय सुनवामेत्याह नरे नर्याय नृतमाय नृणां॥ ॥ भारतः हविषो भ
र्त्ता अग्निः प्राणो भूत्वा प्रजापारयत्। भरेत् इति वा सनेयर्के। अग्निः तस्मै यजमानाय शर्म सुखं यंसत् यच्छेत्। किं च अयमग्निः ज्योक् चिर
कालं उच्चरंतं उद्यंतं सूर्यं पश्यात् पश्येत्। यो यजमानः इंद्राय सुनवामेत्याह। इंद्रार्थं सोमाभिषवं कुर्यामिति ब्रवीति। कीदृशायेंद्राय न
रे नेत्रे नर्याय परिहिताय नराणां नेतृणां आधून्तमायाम नृतमाय॥ ॥ अथ पंचमी॥ ॥ न तं जिनंति बहवो न दभ्रा उर्वस्मा अदितिः शर्म यंसत्॥ राम
प्रियः सुकृत्प्रिय इंद्रे मनायुः प्रियः सुप्रावीः प्रियो अस्य सोमी॥ ॥ दभ्राः अल्पाः बहवो पि प्रभूताः। तं यजमानं न जिनंति न हिंसंतु
य इंद्राय सुनवामेत्याह। हे इंद्राय सुकृत शोभनयागादीनां कर्त्ता यजमानः प्रियो भवति। सुप्रावीः सुष्टु प्रपिता सुष्टु प्रगच्छन् उपगच्छता
यजमानः अस्येंद्रस्य प्रियो भवति। सोमी सोमवान् यजमानः अस्येंद्रस्य प्रियो भवति॥ ॥ इति तृतीयस्य षष्ठे त्रयोदशो वर्गः॥ ॥ अथ षष्ठी॥

॥ सुप्राव्यः प्राशुषाळेष वीरः सुष्वेः पक्तिं कृणुते केवलेंद्रः॥ नासुष्वेरापिर्न सखा न जामिर्दुष्प्राव्योवहंतेदवाचः॥ ॥ प्राशुषाट् शत्रूणां प्रकर्ष
ण शीघ्रमभिभविता दीरो क्रांत एषा इंद्रः सुष्व्यः सुष्टु उपगच्छतः हविर्भिः सुष्टु प्रतर्पयितुर्यो सुष्वेः सुष्वतो यजमानस्य संबंधिनीं केवलाकेव
लां असाधारणां पक्तिं। कृणुते आत्मनः कुरुते किं चेंद्रः असुष्वेः असुन्वतो यजमानस्य आपिर्व्याप्तो न भवति। इंद्रः अयजमानस्य सखा न भव
ति। जामिर्बंधुश्च न भवति। अपि च दुष्प्राव्यः दुरुपगमनस्य अवाचः स्तुतिरहितस्य पुरुषस्य अवहंता इत् हिंसित भवति॥ ॥ अथ सप्तमी॥ ॥ न
रेवता पणिना सख्यमिंद्रोसुन्वता सुतपाः संगृणीते॥ आस्य वेदः खिदति हंति नग्नं वि सुष्वये पक्तये केवलो भूत्॥ ॥ सुतपाः अभिषुतं सोमं पि
बन्निंद्रः रेवता धनवता पणिना वणिजा लुब्धेन असुन्वता सोमाभिषवमकुर्वता अयजमानेन सह सख्यं सख्यत्वेन संगृणीते न संगोति। ना
नुमन्यत इत्यर्थः। किं च अस्यायजमानस्य नग्नतिरर्थकं वेदो धनं ज्ञानं वा आखिदति उद्धरति हंति हिनस्ति च। अपि च सुष्वये सोमं सुन्वते पक्त
ये हवींषि पचते यजमानाय केवलः असाधारणः सन् विभूत् विभवति॥ ॥ अथाष्टमी॥ ॥ इंद्रं परे वरे मध्यमास इंद्रं यांतोवसितास इंद्रं। इंद्रं क्षि
यंतं उत युध्यमाना इंद्रं नरो वाजयंतो हवंते॥ ॥ परे उत्कृष्टाः अवरे निकृष्टाः जनाः इंद्रं हवंते आह्वयंति। मध्यमाः सोम ध्य मासश्च इंद्रमेव हवंते॥
यांतः कार्यसिध्यर्थं गच्छंतो जनाः इंद्रमेव ह्वयेति। अवसितासः निविष्टाश्च इंद्रमेवाह्वयंति क्षियेतो गृहे निवसंतो जनाः इंद्रमेव हवंते। उतापि
च युध्यमानाः युद्धं कुर्वाणा जनाः जयार्थमिंद्रमेवाह्वयंति। वाजयंतः वाजमन्नमिच्छंतो नरो नेतारो मनुष्याः इंद्रमेव हवंते॥ ॥ इति तृतीयस्य
षष्ठे चतुर्दशो वर्गः॥ ॥ अहं मनुरिति सप्तर्चं पंचमं सूक्तं वामदेवस्यार्षं। अत्रेयमनुक्रमणिका। अहं मनुः सप्ताद्या भिस्तिस्त्रभिरिंद्र मिवा

ऋ॰सं॰भा॰६

क्षणम् अन्नमादाय आदानं कृत्वा अभरत् अहरत्। आजहार। अत्रास्मिन् सोमे आहृते सति पुरंधिः पुरंधीः बहुकर्मा अमूरः अमूढः प्राज्ञ इंद्रः सोम
स्य संबंधिनि मदे हर्षे सति भूरा ढाः अरातीः शत्रून् अजहात् अत्यजत् अत्यजत जघानेत्यर्थः। अत्रारातिशब्दः स्त्रीलिंगः॥ ॥ इति तृ
तीयस्य षष्ठे पंचदशो वर्गः॥ ॥गर्भे न्विति पंचर्चं षष्ठं सूक्तं वामदेवस्यार्षं त्रैष्टुभं अंत्या शक्वरी पंचाशदक्षरा। श्येनो देवता। पूर्वसूक्ते
आद्ये वेत्युक्तत्वादंत्याया इंद्रो वा देवता। तथा चानुक्रांतं॥ गर्भे नु पंचांत्या शक्वरीति श्येने निर्बन्ध्याश्च इद्रं सूक्तं सूक्तं तु पूर्वमुदाहृतं।
॥तत्र प्रथमा॥ ॥गर्भे नु सन्नन्वेषामवेदमहं देवानां जनिमानि विश्वा। शतं मा पुर आयसीररक्षन्नध श्येनो जवसा निरदीयं॥ ॥अत्रेषः श्लो
कः पच्यते। श्येनः भावसमान्तकायग भो द्योगेन निस्सृतः। ऋषिर्गर्भे शयानः सन्नब्रूते गर्भे नु सन्निति। गर्भे नु गर्भ एव सन् विद्यमानो ऽहं वा
मदेवः एषाम् इंद्रादीनां देवानां विश्वा विश्वानि सर्वाणि जनिमानि जन्मानि अन्ववेदं आनुपूर्व्येणाभिषं। परमात्मनः सकाशात्सर्वे देवा
जाता इत्यावेदिषमित्यर्थः। इतः पूर्वं शतं बह्वीनि आयसीः आयोमयान्यभेद्यानि पुरः शरीराणि मामां आरक्षन् अपालयन्नूपयाहं
शरीराद्युत्पत्तिरिक्तं आत्मानं न जानीयां तथा मां अरक्षन्नित्यर्थः। पुरुषे ह वा अयमादितिः खंडे गर्भ एवैतच्छयानो वामदेवः एवमुवाचेत्यादिना
अयमर्थः सम्यग् उपनिपादितः॥ ॥अथ द्वितीया॥ ॥न घा स मामप जोषं जभाराभीमास त्वक्षसा वीर्येण। ईर्मा पुरंधिरजहादरातीरुत वातां
अतरच्छूशुवानः॥ ॥स गर्भं मां वामदेवं जोषं पर्याप्तं न घ नैव अपजभार। अपजहार। गर्भे पिब सतो मम मोहो मा भूदित्यर्थः। अहं तु इंद्रं गर्भस्थं
दुःखे चक्षसा तीक्ष्णेन वीर्येण ज्ञानसामर्थ्येन अभ्यासमभ्यभवं। ईर्मा सर्वस्य प्रेरकः पुरंधिः पुरां धारकः परमात्मा अरातीः गर्भसंश्रिता नूत्रा राम

२१

त्रूर् अजहात्। जघान। उतापि च शशुवानः वर्धमानः परिपूर्णः परमात्मा भवात्। गर्भक्लेशकरान् वायून् अतरत् अतारीत्॥ ॥अथ तृतीया॥ ॥
अव यच्छ्येनो अस्वनीदध द्योर्वि यद्यदि वात ऊहुः पुरंधिं॥ सृजद्यदस्मा अव ह क्षिपज्ज्यां कृशानुरस्ता मनसा भुरण्यन्॥ ॥अथ तदानीं सोमा
हरणकाले यथा यदा श्येनः द्योः द्युलोकात् अस्वनीत्। अवा शब्दमकरोत्। यदि वा यदा वाताः वर्य्योय तत् यं पुरंधिं सोमं अतो स्मा श्येनात्
ऊहुः सोमपाला विक्षिपवंतः। यद्यदा अस्ता शराणां क्षेपणा ज्ञानशामनो वेगेन भुरण्यन् गंतुमिच्छन् कृशानुः एतन्नामके सोमपाल ज्यां धनुषः
कोटिमो वीक्षिपत् दविक्षेप खलु। अस्मै श्येनाय अवा अवासृजत् व्यक्तवान्। तथा च ब्राह्मणं तस्या अनुविसृज्य कृशानुः सोमपालः सव्य
स्य पदो नखमच्छिनदित्यादि दीपदां सोमपालाः इच्छमि ऊर्ध्वं चकुः तदा श्येनः सोममाजहारेत्येवोत्तरयोः संबंधः॥ ॥अथ चतुर्थी॥ ॥ऋजि
प्य ईमिंद्रावतो न भुज्युं श्येनो जभार बृहतो अधि ष्णोः। अंतः पतत्पतत्र्यस्य पर्णमध यामनि प्रसितस्य तद्वेः॥ ॥ऋजिप्यः ऋजुगामी श्ये
नः इंद्रवतः इंद्रो रक्षको यस्य तस्मात् बृहतो महतो अधिष्णोः उपरिस्थितात् द्युलोकात् ईम् एनं सोमं जभार आजहार। तत्र दृष्टांतः। इंद्रवतः इंद्र
समर्थः तद्वतो देशात् भुज्युं न भुज्युं न भुज्युं नामकं राजानं यथा अजहुः तद्वत्। अथ तदानीं यामनि युद्धे प्रसितस्य कृशानोरस्त्रेर्बद्धस्य वे
र्गन्तुरस्य अंतः मध्ये स्थितं पतत्र पतत् पतनशीलं तत्पर्णं पतत् अपतत्॥ ॥अथ पंचमी॥ ॥अध श्वेतं कलशं गोभिरक्तमापिप्यानं मघवा शुक्रमंधः।
अध्वर्युभिः प्रयतं मध्वो अग्रमिंद्रो मदाय प्रति धत्पिबध्यै शूरो मदाय प्रति धत्पिबध्यै॥ ॥अथाधुना शूरो विक्रांतः मघवा इंद्रः
श्वेतं शुभ्रं कलशे द्रोणपात्रे स्थितं गोभिर्गव्येन पयसा अक्तं सिक्तं आपिप्यानं आप्यायितं शुक्रं सोमोपेतं अध्वर्युभिः प्रयतं अंधः सोमलक्षणमन्नं

ऋ·सं·भा·६

मधोर्मधुरस्य सोमराजस्य अग्रं अग्रे मदार्थं पिबध्यै पातुं प्रतिधत् प्रतिदधातु पुनरुक्तिरादरार्थ्या ॥ ॥ इति तृतीयस्य षष्ठे षोडशो वर्गः ॥
॥त्वायुजेति पंचर्चं सप्तमं सूक्तं वामदेवस्यार्षं त्रैष्टुभमैंद्रासोमदेवताकं । अनुक्रांतं च त्वायुजेंद्रासोमम् इति विनियोगो लैंगिकः ॥ ॥तत्र प्रथमा॥
॥त्वायुजा तव तत्सोम सख्य इंद्रो अपो मनवे सस्रुतस्कः ॥ अहन्नहिमरिणात्सप्त सिंधूनपावृणोदपिहितेव खानि ॥ ॥हे सोम तव त्वदी
ये तत् तस्मिन् सख्ये सखित्वे सति त्वा त्वया युजा सहायेन इंद्रः सस्रुतः सरणशीला अपो वृष्टिलक्षणान्युदकानि मनवे मनुष्येभ्यः कः अ
करोत् । किंच । अहिं वृत्रमसुरं अहन् हतवान् सप्त सर्पणशालाः सिंधूनपः अरिणात् प्रेरयत् । अपिहितेव अपिहितानीव वृत्रेणातिरो
हितानि च अन्नेव द्वारार्थं खानि स्रोतांसि द्वाराणि अपावृणोत् उद्घाटितवान् ॥ ॥ अथ द्वितीया ॥ ॥त्वायुजा नि खिदत्सूर्यस्येंद्रश्चक्रं स
हसा सद्य इंदो ॥ अधि ष्णुना बृहता वर्तमानं महो द्रुहो अप विश्वायु धायि ॥ ॥हे इंदो सोम इंद्रः सद्यः अपदि त्वया युजा सहायेन सूर्यस्य
प्रेरकस्य सवितुः संबंधिनः पूर्वं हि चक्रस्यैकं चक्रं सहसा अभिनाभिनुकेन बलेन निखिदत् आछिनत् आछिनत् कीदृशं अधि उपरि ष्णु
ना स्थितेन बृहता महता अंतरिक्षेण वर्तमानं । किंच । महो महतः प्रभूतस्य द्रुहो द्रोग्धुः सूर्यस्य संबंधि विश्वायु सवितागंतृ चक्रं अपधायि इं राम
द्रेणापहारि ॥ ॥ अथ तृतीया ॥ ॥ अहन्निंद्रो अदहदग्निरिंदो पुरा दस्यून्मध्यंदिनादभीके ॥ दुर्गे दुरोणे क्रत्वा न यातां पुरू सहस्रा शर्वा नि ब
र्हीत् ॥ ॥ हे इंदो सोम अभीके संग्रामे दस्यून् शत्रून् इंद्रः अहन् अवधीत् अग्निः कांश्चिच्छत्रून् अदहत् दग्धवान् कीदृशौ इंद्राग्नी मध्यंदिना
न्मध्याह्नात् पुरा पुरस्तात् पूर्वाह्ने तव यागात् ...बलविशेषः यातं गच्छतामसुराणां पुरु पुरूणि बहूनि सर्वाणि निरवशेषाणि सहस्रा

३८

रस्य । एतन्नामकस्यासुरस्य संबंधीनि पुरः पुराणि शतं युगपदेव ध्येरं यं शततमं वेश्यं शतसंख्यापूरणं पुरं वेश्यं दिवोदासनाम्ने प्रवेशार्हं अक
रवं । सर्वताता सर्वतातौ यज्ञे अतिथिग्वं अतिथिनोमभिगंतारं दिवोदासं दिवोदासनामकं राजर्षिं यदा आवः अपालयः । तदा पूर्वोक्तसंबंधः ॥ ॥ अ
थ चतुर्थी ॥ ॥ प्र सु ष विभ्यो मरुतो विरस्तु प्र श्येनः श्येनेभ्य आशुपत्वा ॥ अचक्रया यत्स्वधया सुपर्णो हव्यं भरन्मनवे देवजुष्टं ॥ ॥ अथैतदा
दिभिः श्येनः सूयते । हे मरुतः । गवेन मरुत्सदृशाः पक्षिणः प्रसिध्यः श्येनाख्यो विः पक्षी विभ्यः पक्षिभ्यो युष्मत्तः प्रास्तु बलेन प्रकृष्टो भवतु ।
२× सुपर्णः शोभनपतनः यद्यदा श्येनः अचक्रया चक्रवर्जितया स्वधया रथेन देवजुष्टं देवैः सेवितं हव्यं सोमलक्षणं हविः भरत् अहरत् द्युलोकसकाश ×
१× किंच श्येनेभ्यः शंसनीयगमनेभ्यः स्वसमानजातिभ्यः पक्षिभ्यः सकाशात् आशुपत्वा आशुपतनः शीघ्रगामी श्येनः प्रकृष्टो भवतु ×१ शात्स्याहृ ३
२ तवान् अत्र स्वधाशब्दो न वाची अचक्रया स्वधया वर्तमानमित्यादौ दर्शनात् ॥ ॥ अथ पंचमी ॥ भरद्यदि विरतो वेविजानः पथोरुणा मनोजवा अ
सर्जि ॥ तूयं ययौ मधुना सोम्येनोत श्रवो विविदे श्येनो अत्र ॥ ॥ यदि यदा विः पक्षी श्येनः अतोमुष्मात् द्युलोकात् वेविजानः सोमकामान् भीषयन्
भरत् अहरत् । सोममाहृतवान् यदा उरुणा विस्तीर्णेन पथा अंतरिक्षमार्गेण मनोजवाः मनोवद्वेगयुक्तः सन् असर्जि संसृष्ट आसीत् । सोम्ये
न सोममयेन मधुना अन्नेन सह तूयं क्षिप्रं ययौ । जगाम । उतापि च अत्रास्मिन् लोके श्येनः सुपर्णः श्रवः सोमाहरणनिमित्तं यशः विविदे लभे ॥
॥ अथ षष्ठी ॥ ॥ ऋजीपी श्येनो ददमानो अंशुं परावतः शकुनो मंद्रं मदं ॥ सोमं भरद्दादृहाणो देवावान्दिवो अमुष्मादुत्तरादादाय ॥ श्येनः शं
सनीयगमनः पक्षी सवान्सवान्तं । यज्ञानां सहस्रं सहस्रसंख्याकं अयुतं च अयुतसंख्याकं अपरिमितसंख्याकमित्यर्थः । साकं सह सामल

ऋ॰ सं॰ भा॰ ६

मानोय इंद्रः वीरैः शूरैर्मरुद्भिः सह संमदति। संहमाद्यत्येव। स इंद्रः आगछत्विति पूर्वेण संबंधः॥ ॥अथतृतीया॥ ॥आवयेदस्य कर्णा
वाजयध्यै जुष्टामनु प्रदिशं मंदयध्यै॥ उद्वावृषाणो राधसे तुविष्मान्करन्न इंद्रः सुतीर्थाभयं च॥ ॥हे स्तोतस्त्वं अस्येंद्रस्य संबंधिनो कर्णा
कर्णौ वाजयध्यै इंद्रं बलिनं कर्तुं जुष्टामनुदिशं सेवितासु सर्वासु दिक्षु प्रमंदयध्यै प्रकर्षेण इंद्रं मादयितुं श्रावयं स्तोत्राणि आवयादि
ति पूरणः उद्वावृषाणः स्तोमैर्नोत्सिच्यमानः तुविष्मान्बलवानिंद्रः नोस्माकं राधसे धनार्थं सुतीर्था सुमनानि तीर्थानि अभयं च करतु
करोतु॥ ॥अथचतुर्थी॥ ॥अछायो गंता नाधमानमूती इत्था विप्रं हवमानं गृणंतं॥ उपत्मनि दधानो धुर्याशूंत्सहस्राणि शतानि वज्र
बाहुः॥ ॥वज्रबाहुर्वज्रहस्तो य इंद्रः त्मनि आत्मनि स्थितानामश्वानां सहस्राणि सहस्रसंख्यान् शतानि शतसंख्याकान् आ
शून् शीघ्रगामिनोश्वान् धुरि रथवहनप्रदेशे उपधानः संस्थापयन् ऊती रक्षणार्थं नाधमानं याचमानं विप्रं मेधाविनं हवमानं आ
ह्वयंतं इत्था इत्थमनेन प्रकारेण गृणंतं स्तुवंतं यजमानं अछ आभिमुख्येन गंता गमनशीलो भवतीति शेषः। स इंद्रः सुतीर्थाभयं च
करोत्विति पूर्वेण संबंधः॥ ॥अथपंचमी॥ ॥त्वोतासो मघवन्निंद्र विप्रा वयं ते स्याम सूरयो गृणंतः॥ भेजानासो बृहद्दिवस्य राय आ   राम
काय्यस्य दावने पुरुक्षोः॥ ॥हे मघवन् धनवन्निंद्र त्वोतासः त्वया रक्षिताः विप्रा मेधाविनः गृणंतस्त्वां स्तुवंतः सूरयः स्तोतारो वयं बृ
हद्दिवस्य महद्दीप्तिः आकाय्यस्य आसमंतात्स्तुत्यस्य पुरुक्षोः बहुन्नस्य बहुकीर्तेर्वा ते त्वदीयस्य रायो धनस्य दावने दाननिमित्ते सति
भेजानाः संभजमानाः स्याम भवेम॥ ॥इति तृतीयस्य षष्ठे अष्टादशो वर्गः॥ ॥नकिरिंद्रेति चतुर्विंशत्यृचं नवमं सूक्तं वामदेवस्या

अ

र्षं गायत्रं अष्टमी चतुर्विंशी च बृहत्यौ अनुष्टुभौ इंद्रो देवतादि वक्ष्यंते इत्यस्य ऋच उषोदेवताकं इंद्रदेवताकः श्व। तथा चानुक्रांतं। नकिश्व चतुर्विंश
तिर्द्वे बृहत्यौ तृचं उषस्यं गायत्रं अष्टम्यंत्ये चानुष्टुभाविति। अतिरात्रे तृतीये पर्याये मैत्रावरुणशस्त्रे इदं सूक्तं। तथा च सूत्रितं च। नकिरिंद्र त्वदु
त्तर इत्युत्तमामुधरेदिति॥ ॥तत्र प्रथमा॥ ॥नकिरिंद्र त्वदुत्तरो न ज्यायाँ अस्ति वृत्रहन्॥ नकिरेवा यथा त्वं॥ ॥हे वृत्रहन्निंद्रस्य ना
शके इह लोके एकोपीति शेषः। त्वत् त्वत्तः उत्तरः उत्कृष्टतरो नकिरस्ति न भवति। त्वत्तः ज्यायान् प्रशस्यतरः एकोपि नास्ति। हे इंद्र त्वं लोके
यथा प्रसिद्धो भवसि तथाविध एकोपि नकिरेवास्ति नैव भवति। कश्चिदपि लोके इंद्रसदृशो नास्तीत्यर्थः॥ ॥अथद्वितीया॥ ॥सत्रा ते
अनु कृष्टयो विश्वा चक्रेव वावृतुः॥ सत्रा महाँ असि श्रुतः॥ ॥हे इंद्र कृष्टयः प्रजाः ते त्वामनुलक्षीकृत्य सत्रा सत्यमेव वावृतुः वर्तंते। तत्र
दृष्टांतः। विश्वा विश्वानि यानि चक्रेव चक्राणि यथा चक्राणि शकटमनुवर्तंते तद्वत्। हे इंद्र महांस्त्वं सत्रा सत्यमेव श्रुतो विश्रुतो
सि गुणैः प्रख्यातो भवसि॥ ॥अथतृतीया॥ ॥विश्वे चनेदना त्वा देवास इंद्र युयुधुः॥ यदहा नक्तमातिरः॥ ॥हे इंद्र विश्वे चन इत्सर्व
एव देवासो असुरा विजिगीषवो देवाः अना अप्राणेन रूपेण बलेन त्वा त्वां असहायं नत्वा युयुधुरिति पूर्वेण संबंधः॥ ॥अथचतुर्थी
॥यत्रोत बाधितेभ्यश्चक्रं कुत्साय युध्यते॥ मुषाय इंद्र सूर्यं॥ ॥यत्र यस्मिन् युद्धे उत अपि च हे इंद्र त्वं बाधितेभ्यः कुत्ससहायेभ्यः
युध्यते युद्धं कुर्वते कुत्साय च सूर्यं सूर्यसंबंधि चक्रं मुषायः अमुष्णाः अपहृतवानसीत्यर्थः। तस्मिन्युद्धे प्रावः शचीभि
रेताश्मिति परेण संबंधः॥ ॥अथपंचमी॥ ॥यत्र देवाँ ऋघायतो विश्वाँ अयुध्य एक इत्॥ त्वमिंद्र वनूँरहन्॥ ॥हे इंद्र त्वं एक इत् अ

ऋ॰सं॰भा॰६

सहायस्थ यत्र यस्मिन्संग्रामे देवानिंद्रादीन्‌ ऋघायतो बाधमानान्‌ सर्वांस्त्रासमादीन्युध्मः युद्धमकरोः तथा बहून्हिंसकान्‌ अहन्नवधीः
॥ इति तृतीयस्य षष्ठे एकोनविंशो वर्गः ॥ ५ अथ षष्ठी ॥ १ यत्रोत मर्त्याय कमरिणा इंद्र सूर्यं ॥ प्रावः शचीभिरेतशं ॥ १ यत्र यस्मिन्‌ सं
ग्रामे उतापि च हे इंद्र त्वं मर्त्याय मनुष्याय एतशाख्याय ऋषये सूर्यमरिणा ६ अहिंसीः कमिति पूरणः तदानीं शचीभिर्युद्धकर्मभिः ए
तशं एतत्संज्ञकमृषिं प्रावः प्रकर्षेण रक्षः ॥ ६ ॥ अथ सप्तमी ॥ १ किमादुतासि वृत्रहन्मघवन्मन्युमत्तमः ॥ अत्र ह दानुमातिरः ॥ १ हे वृत्रह
न्‌ वृत्राणामावरकाणां तमसां हंतः मघवन्‌ धनवन्निंद्र त्वं आत्‌ अनंतरमेव उतापि च किमिति प्रश्ने मन्युमत्तमोऽसि किमित्यत्यंतं क्रोधा
धवानसि । अत्रास्मिन्नंतरिक्षे अह एवं दानुं दानाः पुत्रं वृत्रमातिरः ॥ असमंतादहिंसीः ॥ ७ ॥ अथाष्टमी ॥ १ एतद्घेदुत वीर्यमिंद्र चकर्थ
पौंस्यं ॥ स्त्रियं यद्दुर्हणायुवं वधीर्दुहितरं दिवः ॥ १ हे इंद्र उतापि च यत्त्वं परस्तादुपलक्षितं पौंस्यं बलं वीर्यं सामर्थ्योपेतं च कर्थ कृतवा
नसि । घ इदिति पूरणौ किं च दुर्हणायुवं दुष्टहननमिच्छंतीं दिवो दुहितरं द्युलोकसकाशादुत्पन्नां स्त्रियमुषसं वधीः अवधीः ॥ ८ ॥ अ
थ नवमी ॥ १ दिवश्चिद्घा दुहितरं महान्महीयमानां ॥ उषासमिंद्र संपिणक्‌ ॥ १ हे इंद्र महान्त्वं दिवो दुहितरं द्युलोकस्य पुत्रीं महीय
मानां पूज्यमानां उषसं उषो देवीं संपिणक्‌ । चिच्चूर्णितवानसि खलु ॥ ९ ॥ अथ दशमी ॥ १ अपोषा अनसः सरत्संपिष्टादह बिभ्युषी ॥
नि यत्सीं शिश्नथद्वृषा ॥ १ वृषा कामानां वर्षितेंद्रः यद्यदा सीं एषात्‌ उषसः संबंधि शकटं निशिश्नथत्‌ न्यवबधीत्‌ तदा उषा उषो दे
वता बिभ्युषी इंद्रसकाशाद्भीता सती संपिष्टात्‌ इंद्रेण संचूर्णिता दनसः शकटात्‌ अपासरत्‌ अपजगाम । अहेति पूरणः ॥ १० ॥ इति तृ

राम

४०

सहस्राणि अपरिमितानि निबर्हीः तदिंद्रः अवधीत्‌ । तत्र दृष्टांतः दुरोणे दुर्गमने राक्षसिनुमशक्ये दुर्गे दुरवगाहे देशे कृत्वा नकर्मणा स्वकीयं का
र्यमुद्दिश्य गच्छतः पथिकान्यथा धनलोलुपाश्चोरा हंति ॥ ॥ अत्र ऋकुत्ख्याने गतः ॥ ॥ अथ पंचमी ॥ १ एवा सत्यं मघवाना युवं तदिंद्र
श्च सोमोर्वमश्व्यं गोः ॥ आदर्दृतमपिहितान्यश्ना रिरिचथुः क्षाश्चित्ततृदाना ॥ १ हे सोम त्वं चेंद्रश्चेति युवामुभौ उर्वं महांतं अश्व्यं अश्वसमूहं
गोः गवां समूहं च आदर्दृतं आदरयतं अपिहितानि पाणिभिराच्छादितानि क्षाश्चित्‌ पणीनां भूमीश्च अश्ना अश्नेन परेण पलेन रिरिचथुः रि
क्तवंतौ । हे मघवानौ धनवंताविंद्रासोमौ तत्तदाना शत्रूणां हिंसकौ युवां एव एवमुक्तप्रकारेण यत्कृतवंतौ तत्सर्वं सत्यमेव ॥ ॥ इति तृती
यस्य षष्ठे सप्तदशो वर्गः ॥ १ आ न स्तुत इति पंचर्चं चतुर्थमष्टमे सूक्तं वामदेवस्यार्षं त्रैष्टुभमैंद्रं आ न स्तुत इत्यनुक्रमणिका विनियोगो लैंगिकः ।
॥ तत्र प्रथमा ॥ १ आ न स्तुत उप वाजेभिरूती इंद्र याहि हरिभिर्मंदसानः ॥ तिरश्चिदर्यः सवना पुरूण्यांगूषेभिर्गृणानः सत्यराधाः ॥
॥ हे इंद्र स्तुतस्त्वं वाजेभिर्वाजैरन्नैः सह तिरश्चित्‌ प्राज्ञानितिरः सत इति प्राप्तस्येति यास्कः पुरूणि पूर्णानि सवनानि सवनानि नोऽस्मदीयान्‌
उप प्रति ऊती ऊत्या नोऽस्माकं रक्षणार्थं हरिभिरश्वैरायाहि आगच्छ । कीदृशः मंदसानो मोदमानः । अर्यः स्वामी आंगूषेभिः स्तोत्रैर्गृणानः स्तू
यमानः सत्यराधाः सत्यधनः ॥ १ ॥ अथ द्वितीया ॥ १ आ हि ष्मा याति नर्यश्चिकित्वान्हूयमानः सोतृभिरुप यज्ञं ॥ स्वश्वो यो अभीरुर्मन्यमानः
सुष्वाणेभिर्मदति सं ह वीरैः ॥ १ नर्यो नृभ्यो हितः चिकित्वान्‌ सर्वं जानन्‌ सोतृभिः सोममभिषुण्वद्भिः ऋत्विग्भिः हूयमानः इंद्रः अस्मदीयं
यज्ञमुप प्रति आयाति आगच्छतु । हि स्मेति पूरणौ स्वश्वः शोभनाश्वोपेतः अभीरुः निर्भयशीलः सुष्वाणेभिः सुन्वद्भिर्यजमानैर्मन्यमानः स्तूय

क्रतुःत्यंतंप्रसिद्धंअग्रुवःएतन्नाम्न्याःपुत्रंपरावृक्तंएतन्नामकंउक्थेषुउक्थेषुआभजत्भागिनंकृतवान्अयमर्थोविप्रेभिःपुत्रमग्रुवइत्यस्यां
तृ॰सं॰भा॰६ ऋचिप्रतिपादितइति॥ ॥अथसप्तदशी॥ ॥उतत्यातुर्वशायदूअस्नातारा शचीपतिः॥ इंद्रोविद्वाँअपारयत्॥ ॥उतापिचअस्नातारौअ
नारौययाति।स्नापादनमभिषिक्तौतावेतौप्रसिद्धौतुर्वशायदूतुर्वशनामानंयदुनामकंचराजानौशचीपतिःकर्मणांपालकःयद्वाशचीइत्यभि
धत्तिस्याःपतिर्भर्ताविद्वान्सकलमपिजानन्इंद्रःअपारयत्अभिषेकार्हावकरोत्॥ ॥अथाष्टादशी॥ ॥उतत्यासद्यआर्यासरयोरिंद्र
पारतः॥ अर्णाचित्ररथावधीः॥ ॥उतापिचसद्यःसद्यःसपदिहेइंद्रत्वंत्यात्यौआर्यावभिमानिनौसंतावपिइंद्रविषयभक्तिश्रद्धारहि
तावित्यर्थःसरय्वाःसरय्वाःपारतःपारेतीरेवसंतौअर्णाचित्ररथाअर्णनामकंचित्रनामकंचराजानौअवधीःअहिंसीः॥ ॥अथैकोन
विंशी॥ ॥अनुद्वाजहितानयोंधंश्रोणंचवृत्रहन्॥ नतत्तेसुम्नमष्टवे॥ ॥हेवृत्रहन्वृत्रस्यहिंसकइंद्रत्वंजहिताजहितौसर्वैर्बंधु
भिस्त्यक्तौअंधंचक्षुर्हीनंनामकंश्रोणंचएतौद्वौअनुनयःअंधश्रयंगुत्वपरिहारेणानुनीतवानसि।हेइंद्रत्वयादत्तंतत्सुम्नंसुखंअष्ट
वेव्याप्तुंकोपिनभवतीतिशेषः॥ ॥अथविंशी॥ ॥शतमश्मन्मयीनांपुरामिंद्रोव्यास्यत्॥ दिवोदासायदाशुषे॥ ॥इंद्रःअश्मन्मयी
नांपाषाणैर्निर्मितानांपुरांशंबरस्यसंबंधिनीनांनगराणांशतंशतसंख्याकंदिवोदासायएतन्नामकायदाशुषेहविर्दत्तवतेयजमा
नायव्यास्यत्व्याक्षिपत्॥ ॥इतितृतीयस्यषष्ठेद्वाविंशोवर्गः॥ ॥अथैकविंशी॥ ॥अस्वापयद्दभीतयेसहस्रात्रिंशतंहथैः॥
दासानामिंद्रोमायया॥ ॥इंद्रःमाययास्वकीययाप्रज्ञयादासानांशत्रूणांउपक्षपितॄणांराक्षसादीनांत्रिंशतात्रिंशत्संख्याकानिसह

राम

४१

स्रासहस्राणिदभीतयेदभीतिनामकस्यार्थायहथैर्हननसाधनैरायुधैरस्वापयत्अवधीत्॥ ॥अथद्वाविंशी॥ ॥सघेदुतासिवृ
त्रहन्त्समानइंद्रगोपतिः॥ यस्ताविश्वानिचिच्युषे॥ ॥उतापिचहेइंद्रयस्त्वंतातानिविश्वानिसमस्तान्शत्रून्चिच्युषे।प्राच्यावयः।
हेवृत्रहन्वृत्राणांशत्रूणांहिंसकेंद्रगोपतिर्गवांपालकःसचसमानःसर्वेषांयजमानानांसमःसन्प्रख्यातोसि।घेदितिपूरणौ॥ ॥
॥अथत्रयोविंशी॥ ॥उतनूनंयदिंद्रियंकरिष्याइंद्रपौंस्यं॥ अद्यानकिष्टदामिनत्॥ ॥उतापिचहेइंद्रयत्पौंस्यंत्वदीयंबलंइंद्रियं
सामर्थ्योपेतं।नूनंकरिष्याःकृतवानसिखलु।अद्यतनःकश्चित्तद्बलंनकिरामिनत्।नहिंस्यात्॥ ॥अथचतुर्विंशी॥ ॥वामंवामं
तआदुरेदेवोददात्वर्यमा॥ वामंपूषावामंभगोवामंदेवःकरूळती॥ ॥हेआदुरेशत्रूणांदारयितरिंद्रतेतववामंवामंयद्यद्वननीयं
संभजनीयंधनमस्ति।तत्तद्वामंवसुअर्यमाअरीणांनियमयितातन्नामकोदेवःददातुप्रयच्छतु।तथाकरूळती।कृत्तदंतःपूषा
पोषकोदेवःवामंधनंददातु।भगोपिधनंददातु।अनुकरूळतीत्येतत्संनिहितत्वाद्भगवत्त्वेनसंबंधनीयं।अथवाअर्यमादीनांत्रया
णामपिविशेषणत्वेनभाव्यं।कथंपूष्णोविशेषणंस्यादितिसाकांक्षत्वात्।नसाध्याकांक्षयासोद्वयोरपियोग्यतासंतरेणान्वयपोगात्।
तस्मात्पूषाभागादंतकोहीत्यादिश्रुतिषुपूषणएवादंतकत्वेनप्रसिद्धेर्व्यवहितस्यापितस्यैवविशेषणत्वंयुक्तंवामंवननीयंभव
तीत्यादिनिरुक्तमत्रद्रष्टव्यं॥ ॥इतितृतीयस्यषष्ठेत्रयोविंशोवर्गः॥ ॥कयानइतिपंचदशर्चंनवमंसूक्तंवामदेवस्यार्षमैंद्रंगाय
त्रं।अभीषुणइत्येषापादनिचृत्नामगायत्री।त्रयःसप्तकाःपादनिचृदितितल्लक्षणायुक्तत्वात्।तथाचानुक्रमणिका।कयापंचोना

त॰सं॰भा॰६

भीषुणादनिहृदिति सूक्तविनियोगो लैंगिकः अग्निष्टोमे चातुर्विंशिके हेनि च माध्यंदिने सवने मैत्रावरुणस्य कयानइत्याद्यस्तृचः स्तो
त्रियः। सूत्रितं च। होत्रकाणां कया नश्चित्र आभुवदिति। वरुणप्रघासेषु का यस्य हविषो नुवाक्या कया न इत्येषा। तथा सूत्रितं। कया
नश्चित्र आभुवद्धिरण्यगर्भः समवर्त्तताग्र इति॥ ॥तत्र प्रथमा॥ ॥कया नश्चित्र आ भुवदूती सदावृधः सखा॥ कया शचिष्ठया वृता
॥सदावृधः सदा वर्धमानः चित्रश्चायनीयः पूजनीयः सखा मित्रभूत इंद्रः कया ऊती ऊत्या तर्पणेन नोस्मान् आ भुवत् अभिमुखो
नाभवत्। शचिष्ठया प्रज्ञावत्तमया प्रज्ञासहितमनुष्ठीयमानेन कया वृता केन वर्तनेन कर्मणा च अभिमुखो भवेत्॥ ॥अथ द्विती
या॥ ॥कस्त्वा सत्यो मदानां मंहिष्ठो मत्सदंधसः॥ दृळ्हा चिदारुजे वसु॥ ॥मंहिष्ठः पूजनीयः सत्यः सत्यभूतः मदानां मादयितॄणां
मध्ये को मदकरः अंधसः सोमस्य रसः दृळ्हा चित् दृढान्यपि वसू वसूनि शत्रूणां धनानि आरुजे आ समंताद्भंक्तुं हे इंद्र त्वा त्वां
मत्सत् मादयत्॥ ॥अथ तृतीया॥ ॥अभी षुणः सखीनामविता जरितॄणां॥ शतं भवास्यूतिभिः॥ ॥हे इंद्र त्वं सखीनां समानख्या
तीनां जरितॄणां स्तोतॄणां अविता रक्षिता नो त्वं शतं शतेन बह्वीभिरूतिभिः रक्षाभिः सह नोस्माकं सु सुष्टु अभि भवासि। अभिमुखो
भव॥ ॥अथ चतुर्थी॥ ॥अभी न आ ववृत्स्व चक्रं न वृत्तमर्वतः॥ नियुद्भिश्चर्षणीनां॥ ॥हे इंद्र त्वं वृत्तं चक्रं वर्तमानं चक्रमिव अर्व
तः उपमं हृत्नोस्मान चर्षणीनां अस्मदीयानां मनुष्याणां नियुद्भिः स्तुतिभिः अभ्याववृत्स्व अभ्यावर्तस्व॥ ॥अथ पंचमी॥ ॥प्रवता
हि क्रतूनामा हा पदेव गछसि॥ अभक्षि सूर्ये सचा॥ ॥हे इंद्र त्वं क्रतूनां कर्मणां यजमानानां संबंधिनः प्रवता प्रवणात् देशात् पदेव पा

राम

४२

तीयस्याष्टमे विंशो वर्गः॥ ॥अथैकादशी॥ ॥एतदस्या अनः शये सुसंपिष्टं विपाश्या॥ ससार सीं परावतः॥ ॥सुसंपिष्टं इंद्रेण सुष्टु सं
चूर्णितं अस्या उषसः संबंधि एतत् अनः शकटं विपाशि विपाट् आख्यान दी तस्यां तत्तीरे। आ शये आ समंतात् छेते। आ शेत्। सीमियमुषा देवता
शकटे ग्रेसति परावतो दूर देशात् ससार॥ ॥अथ द्वादशी॥ ॥उत सिंधुं विबाल्यं वितस्थानामधि क्षमि॥ परि ष्ठा इंद्र मायया॥ ॥हे इं
द्र उतापि च विबाल्यं विगतबाल्यावस्थां तं पूर्णजलां वितस्थानां वितिष्ठमानां सिंधुं नदीं अधि क्षमि क्षमायां मायया प्रज्ञया परिष्ठाः
पर्यस्थाः सर्वतः स्थापनं कृतवानसि॥ ॥अथ त्रयोदशी॥ ॥उत शुष्णस्य धृष्णुया प्र मृक्षो अभि वेदनं॥ पुरो यदस्य संपिणक्॥ ॥उतापि
च हे इंद्र धृष्णुया धर्षक स्त्वं शुष्णस्य शुष्णनाम्नो सुरस्य संबंधि वेदनं वित्तं अभि अभितः सर्वतः प्र मृक्षः प्रकर्षेण बाधथाः यद्यदा अ
स्य शुष्णस्य पुरः पुराणि नगराणि संपिणक् संपिष्टवानसि तदा प्रमृक्ष इति संबंधः॥ ॥अथ चतुर्दशी॥ ॥उत दासं कौलितरं बृह
तः पर्वतादधि॥ अवाहन्निंद्र शंबरं॥ ॥उतापि च हे इंद्र त्वं दासमुपक्षपयितारं कौलितरं कुलितरनाम्नो पत्यं शंबरमसुरं बृहतो मह
तः पर्वतादद्रेः अधि उपरि अव अवाचीनं कृत्वा अहन् हनवानसि॥ ॥अथ पंचदशी॥ ॥उत दासस्य वर्चिनः सहस्राणि शतावधीः॥
अधि पंच प्रधींरिव॥ ॥उतापि च हे इंद्र त्वं प्रधीनिव चक्रस्य परितः स्थितान् शंकूनिव हिंसकात् पंच शतेति पंच शत संख्याकात् दा
सस्य लोकानामुपक्षपयितुर्वर्चिनः वर्चिनामकस्यासुरस्य संबंधिनो नुचरात् पुरुषात् अधि अधिकं अवधीः हतवानसि॥ ॥इति
तृतीयस्याष्टमे एकविंशो वर्गः॥ ॥अथ षोडशी॥ ॥उत त्यं पुत्रमग्रुवः परावृक्तं शतक्रतुः॥ उक्थेष्विंद्र आभजत्॥ ॥उतापि च शत

तृ·सं·भा·६

नयंतु ॥ इति तृतीयस्य षष्ठे पंचविंशो वर्गः ॥ ॥ अथैकादशी ॥ ॥ अस्माँ इहा वृणीष्व सख्याय स्वस्तये ॥ महो राये दिवित्मते ॥ ॥ हे इंद्र त्वं
इहास्मिन्यज्ञे अस्मान्यजमानान् सख्याय सखिभावाय स्वस्तये अविनाशाय च महो महते दिवित्मते दीप्तिमतिशयेन धनाय च वृणीष्व
संभजस्व ॥ ॥ अथ द्वादशी ॥ ॥ अस्माँ अविड्ढि विश्वहेंद्र राया परीणसा ॥ अस्मान्विश्वाभिरूतिभिः ॥ ॥ हे इंद्र त्वं विश्वहा सर्वदा हः सु
परीणसा महता राया धनेन अस्मान्यजमानान् अविड्ढि रक्ष किं च विश्वाभिः सर्वाभिरूतिभी रक्षाभिः अस्मान विड्ढि ॥ ॥ अथ त्रयोद
शी ॥ ॥ अस्मभ्यं तां अपा वृधि व्रजाँ अस्तेव गोमतः ॥ नवाभिरिंद्रोतिभिः ॥ ॥ हे इंद्र त्वं नवाभिर्नूतनाभिरूतिभी रक्षाभिः अस्तेव क्षेप्ता श
रदुव गोमतो गोभिर्युक्तान्नूतान् प्रसिद्धान् व्रजान् गोनिवासान् अस्मभ्यं अपा वृधि उत्पादय ॥ ॥ अथ चतुर्दशी ॥ ॥ अस्माकं धृष्णुया
रथो द्युमाँ इंद्रानपच्युतः ॥ गव्युरश्वयुरीयते ॥ ॥ हे इंद्र धृष्णुया धृष्णुः शत्रूणां धर्षकः द्युमान् दीप्तिमान् अनपच्युतः विनाशरहितः
गव्युर्गाः कामयमानः अश्वयुरश्ववान् अस्माकं अस्मत्संबंधी रथ ईयाते सर्वत्र गच्छतु ॥ तेन रथेनास्मान्रक्षेत्यर्थः ॥ तस्मात्त्वं अस्माकमुत्त
मं कृधीत्यनया आदित्यं दृष्ट्वा रथमवरोहेत तथा च सूत्रितं ॥ अस्माकमुत्तमं कृधीत्यादित्यमीक्षमाणो जपित्वावरोहेदिति ॥ ॥ सैषा राम
पंचदशी ॥ ॥ अस्माकमुत्तमं कृधि श्रवो देवेषु सूर्य ॥ वर्षिष्ठं द्यामिवोपरि ॥ ॥ हे सूर्य सर्वस्य प्रेरक इंद्र हे आदित्य वा त्वं देवेषु द्योतमाने
षु वदान्यादिषु मध्ये अस्माकमस्मत्संबंधी श्रवो यशः उत्तममुत्कृष्टं कृधि कुरु ॥ तत्र दृष्टांतः ॥ वर्षिष्ठं अतिशयेन प्रवृद्धं सेचनसम
र्थं वा द्यामिव द्युलोकं यथा सर्वेषां लोकानामुपरि स्थितमुत्कृष्टमकरो ॥ ॥ इति तृतीयस्य षष्ठे षड्विंशो वर्गः ॥ ॥ आ तू न इंद्रेति चतुर्वि

४२

॥ स्य २ तुथ ॥ ॥ वयमिंद्र त्वेरावयं त्वाभिनोनुमः ॥ अस्माँ अस्माँ इदुदव ॥

शत्यृचमेकादशं सूक्तं वामदेवस्यार्षं गायत्रमैंद्रं अंत्ये द्वे मीनके च आदिके हे इंद्रस्याश्व देवताके तथा चानुक्रांतं आ तू नश्चतु
र्विंशतिरंत्याभ्यामिंद्राश्वौ स्तुताविति ॥ गतो विनियोगः ॥ ॥ तत्र प्रथमा ॥ ॥ आ तू न इंद्र वृत्रहन्नस्माकमर्धमा गहि ॥ महान्महीभिरू
तिभिः ॥ ॥ हे वृत्रहन् वृत्राणां शत्रूणां हिंसक इंद्र त्वं नोस्मान् प्रति तु क्षिप्रं आगच्छतु ॥ हे इंद्र महान् प्रभूतस्त्वं महीभिर्महतीभिरूति
भी रक्षाभिः सह अस्माकमर्धं समीपे आ गहि आगच्छ ॥ ॥ अथ द्वितीया ॥ ॥ भृमिश्चिद्घासि तूतुजिरा चित्र चित्रिणीष्वा ॥ चित्रं
कृणोष्यूतये ॥ ॥ हे चित्र चायनीय पूजनीय इंद्र त्वं भृमिश्चित् भ्रमणशीलोपि तूतुजिर्घासि अस्मदभीष्टप्रदाता भवसि ॥ आकारश्चार्थे चित्रि
णीषु चित्रकर्मयुक्तासु अस्मद्रूपासु प्रजासु चित्रं चायनीयं धनं कृतये रक्षणाय आ कृणोषि आ समंतात्करोषि ॥ ॥ अथ तृतीया ॥ ॥ दभ्रे
भिश्चिच्छशीयांसं हंसि व्राधंतमोजसा ॥ सखिभिर्ये त्वे सचा ॥ ॥ हे इंद्र त्वं दभ्रेभिः अल्पैरपि सखिभिर्यजमानैः सह शशीयांसं शाश्वतं गतो
उत्प्लवमानं व्राधंतं महांतमपि शत्रुं ओजसा बलेन हंसि ॥ नाशयसि ॥ ये यजमानाः त्वे त्वयि सचा सहाताः स्म वयं त्वा अभि नुमः अतिश
येनाभिष्टुमः हे इंद्र त्वमपि अस्मानस्मानित् सर्वानस्मानेव उदव उत्कर्षेण रक्ष ॥ ॥ अथ पंचमी ॥ ॥ स नश्चित्राभिरद्रिवोनवद्याभिरूतिभिः ॥
अनाधृष्टाभिरा गहि ॥ ॥ हे अद्रिवः वज्रवन्निंद्र सत्वं चित्राभिश्चायनीयाभिः अनवद्याभिरनिंदिताभिः अनाधृष्टाभिः शत्रुभिरप्रधर्षिताभिः
रूतिभिः रक्षणैः सहितः नोस्मादीना गहि आगच्छ ॥ ॥ इति तृतीयस्य षष्ठे सप्तविंशो वर्गः ॥ ॥ अथ षष्ठी ॥ ॥ भूयामो षु त्वावतः सखाय
इंद्र गोमतः ॥ युजो वाजाय घृष्वये ॥ ॥ हे इंद्र त्वावतः त्वत्सदृशस्य गोमतो गोभिर्युक्तस्य देवस्य संबंधिनः सखायः स्तोतारो वयं घृष्वये महते

वाजाया आयुजः संयुक्ताः सुष्ठु भूयास्मो भवामैव ॥ ॥ अथ सप्तमी ॥ ॥ त्वं ह्येक ईशिष इंद्र वाजस्य गोमतः ॥ स नो यंधि महीमिषं ॥ ॥ हे
इंद्र हि यस्मात्कारणात्त्वं एव गोमतो गोभिर्युक्तस्य वाजस्यान्नस्य ईशिषे । प्रभवसि । अतः कारणात् स त्वं नोस्मभ्यं महीं महतीं इषमन्नं यंधि
प्रयच्छ ॥ ॥ अथाष्टमी ॥ ॥ न त्वा वरंते अन्यथा यद्दित्ससि स्तुतो मघं ॥ स्तोतृभ्य इंद्र गिर्वणः ॥ ॥ हे इंद्र गिर्वणः गिरां संभक्तः स्तुतोस्माभिः सं
स्तुतः यद्यदा स्तोतृभ्योस्मभ्यं मघं धनं दित्ससि । दातुमिच्छसि तदा त्वा त्वां अन्यथा प्रकारांतरेण न वरंत न निवारयंति । किंतु किंतु सर्वे यजमाना
एव भवंति ॥ ॥ अथ नवमी ॥ ॥ अभि त्वा गोतमा गिरानूषत प्र दावने ॥ इंद्र वाजाय घृष्वये ॥ ॥ हे इंद्र त्वा त्वां अभिलक्ष्य गोतमाः एतन्नाम
का ऋषयः गिरा स्तुतिरूपया वाचा दावने धनदानार्थं प्रानूषत प्रकर्षेण स्तुवंति । घृष्वये महते वाजाय अन्नाय प्रस्तुवंति ॥ ॥ अथ दशमी ॥ ॥
प्र ते वोचाम वीर्या३ या मंदसान आरुजः ॥ पुरो दासीरभीत्य ॥ ॥ हे इंद्र मंदसानः सोमेन मोदमानस्त्वं दासीः । शत्रुरसुरस्य स्वभूताः
याः पुरः पानि नगराणि आसीत्याभिगम्य आरुजः आ समंतादभांक्षीः हे इंद्र ते त्वदीयानि तत्त्यानि वीर्याणि वयं स्तोतारः प्रवोचाम प्र
कर्षेण वदाम ॥ ॥ इति द्वितीयस्य षष्ठे षड्विंशो वर्गः ॥ ॥ अथैकादशी ॥ ॥ ता ते गृणंति वेधसो यानि चकर्थ पौंस्या ॥ सुतेष्विंद्र गिर्वणः ॥ ॥
॥ हे इंद्र गिर्वणः गिरां स्तुतिरूपाणां वाचां संभक्तः त्वं यानि पौंस्या पौंस्यानि बलानि चकर्थ कृतवानसि । हे इंद्र वेधसः प्राज्ञाः सुतेष्वभिषुतेषु
सोमेषु त्वदीयानि तानि बलानि गृणंति कीर्तयंति ॥ ॥ अथ द्वादशी ॥ ॥ अवीवृधंत गोतमा इंद्र त्वे स्तोमवाहसः ॥ ऐषु धा वीरवद्यशः ॥ ॥
॥ स्तोमवाहसः स्तोमानां स्तोत्राणां वोढारः गोतमाः [illegible] ॥ हे इंद्र त्वे त्वां अवीवृधंत स्म अवर्धयंति । त्वं एषु गोतमेषु वीरवत्पुत्रपौत्रादियुक्तं

दानि स्वकीयानि स्थानानीव आगच्छसि हि आ गंतेत्यर्थः । खलु हेति पूरणः ॥ हे इंद्र त्वां अहं सूर्येण सचा सह अभक्षि भजे ॥ ॥ इति द्वि
तीयस्य षष्ठे चतुर्विंशो वर्गः ॥ ॥ अथ षष्ठी ॥ ॥ संपन्न इंद्र मन्यवः सं चक्राणि दधन्विरे ॥ अध त्वे अध सूर्ये ॥ ॥ हे इंद्र ते त्वदर्थं मन्य
वः स्तुतयः यद्यदा सं दधन्विरे । अस्माभिरनुमन्यंते । चक्राणि चंक्रमणानि कर्माणि च सं दधन्विरे । अध तदानीं तानि स्तुतयः तानि क
र्माणि च ते त्वयि भवंति अध तत् तदनंतरं सूर्ये न भवंति ॥ ॥ अथ सप्तमी ॥ ॥ उत स्मा हि त्वामाहुरिन्मघवानं शचीपते ॥ दातारमविदी
धयुं ॥ ॥ हे शचीपते कर्मपालक इंद्र उताऽपि च मघवानं धनवंतं दातारं स्तोतृभ्यो भीष्टप्रदं त्वा त्वां अविदीधयुं अविदीधयुः अदीप्यमानः न
विदीधयुरविदीधयुः तं दीप्यमानमाहुः स्म प्रवदंति खलु । हि इति द्वयं पूरणार्थं ॥ ॥ अथाष्टमी ॥ ॥ उत स्मा सद्य इत्परि शशमानाय
सुन्वते ॥ पुरू चिन्मंहसे वसु ॥ ॥ उताऽपि च हे इंद्र त्वं सद्य इत्सद्य एव शशमानाय स्तुतिं कुर्वते शशमानः शंसमान इति यास्केनो
क्तत्वात् । सुन्वते सोमाभिषवं कुर्वते यजमानाय पुरूचित्पुरूणि बहून्यपि वसु वसूनि धनानि परिपरितो मंहसे स्म प्रयच्छस्येव खलु ।
॥ अथ नवमी ॥ ॥ नहि ष्मा ते शतं चन राधो वरंत आमुरः ॥ न च्यौत्नानि करिष्यतः ॥ ॥ हे इंद्र आमुरः वधकारा राक्षसादयः । ते त्वदीयं
शतं चन शतपरिमितमपि राधो धनं नहि वरंते स्म रणन्न वरयंति खलु । किं च शत्रूणां हिंसनं करिष्यतः ते तव च्यौत्नानि बलानि न वार
यंति ॥ ॥ अथ दशमी ॥ ॥ अस्माँ अवंतु ते शतमस्मान्त्सहस्रमूतयः ॥ अस्मान्विश्वा अभिष्टयः ॥ ॥ हे इंद्र ते त्वदीयाः शतं शतसंख्याको
ऊतयो रक्षाः अस्मानवंतु रक्षंतु सहस्रसंख्याकास्त्वदीया रक्षाः अस्मानवंतु विश्वाः सर्वाणि अभिष्टय स्त्वदीयान्यभिगमनानि अस्मा

ऋ॰सं॰भा॰६

भूरिदा भूरि देहि नो मा दभ्रं भूर्या भर ॥ भूरि घेदिंद्र दित्ससि ॥ हे इंद्र भूरिदाः बहुप्रदस्त्वं भूरि बहु धनं नोस्मभ्यं देहि प्रयच्छ किंतु दभ्रम
ल्पं धनं मा प्रयच्छ भूरि बहुलं धनमस्मभ्यमाभर आहर । किं च भूरि इत् एव धनं दित्ससि घ अस्मभ्यं दातुमिच्छसि खलु ॥ अ
थैकविंशी ॥ भूरिदा ह्यसि श्रुतः पुरुत्रा शूर वृत्रहन् ॥ आ नो भजस्व राधसि ॥ हे वृत्रहन् वृत्रस्य हिंसक शूर विक्रांत इंद्र भूरिदाः बहु
प्रदस्त्वं पुरुत्रा पुरुषु बहुषु यजमानेषु श्रुतोसि हि विख्यातोसि खलु । राधसि धनेनास्मान् आभजस्व आ समंताद्भाविनः कुरु ॥ अथद्वा
विंशी ॥ प्र ते बभ्रू विचक्षण शंसामि गोषणो नपात् ॥ माभ्यां गा अनु शिश्रथः ॥ हे विचक्षण प्राज्ञ इंद्र ते त्वदीयौ बभ्रू बभ्रुवर्णौ विश्वौ प्रशं
सामि प्रकर्षेण स्तौमि । हे गोतमः गवां सनितः हे नपात् न पातयितः स्तोतॄन् विनाशयितः किंतु पालयितरित्यर्थः । हे इंद्र इमौ आभ्यां त्वदी
याभ्यामश्वाभ्यां गा अनु अस्मदीया गाः लक्षीकृत्य मा शिश्रथः विनष्टा मा काषीः । गावो श्वदर्शनाद्विश्लिष्यंते तत्तथा मा भूदित्यर्थः ॥ अथ
त्रयोविंशी ॥ कनीनकेव विद्रधे नवे द्रुपदे अर्भके ॥ बभ्रू यामेषु शोभेते ॥ विद्रधे विदृढे नवे जाते अर्भके द्रुपदे द्रुमाख्यस्थाने स्थि
ते कनीनके व कमनीये शालभंजिके इव हे इंद्र बभ्रू बभ्रुवर्णौ त्वदीयावश्वौ यामेषु पक्षे शुभ्रौ भेते कांतियुक्तौ भवतः । कनीनके कन्यके क
न्याकमनीया भवति । कयं नेतव्येति वा कमनेनानुमीयत इति वा कनतेर्वा स्यात् कांतिकर्मण इत्यादि निरुक्तं ॥ अथ चतुर्विंशी ॥ अरं म उस्र
याम्णेरमनुस्रयाम्णे ॥ बभ्रू यामेष्वस्रिधा ॥ हे इंद्र अस्रिधा अस्रिधौ बभ्रू बभ्रुवर्णौ त्वदीयावश्वौ यामेषु प्राप्तेषु सत्सु उस्रयाम्णे उ
स्राभ्यामनडुद्भ्यां युक्तेन रथेन यातीत्युस्रयामा तस्मै मम ह्यं अरमलं पर्याप्तिकारिणो भवतां । अनुस्रयाम्णे पद्भ्यामेव गच्छते मह्यं पर्याप्त
कारिणो भवेतां ॥ इति तृतीयस्य षष्ठे विंशो वर्गः ॥ वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ॥ पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥ राम

४५

॥ इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्यविरचिते माधवीये वेदा
र्थप्रकाशे ऋक्संहिताभाष्ये तृतीयाष्टके षष्ठोध्यायः ॥ ६ ॥ ॥ दाशतय्यां चतुर्थमंडले तृतीयेनुवाके ३ ॥ ॥ यस्य निश्वसितं वेदा यो
वेदेभ्योखिलं जगत् ॥ निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥ १ ॥ ॥ चतुर्थेनुवाके त्रयोदश सूक्तानि ॥ तत्र प्र ऋभुभ्य इत्येकादशर्चं प्रथ
मं सूक्तं वामदेवस्यार्षं त्रैष्टुभं तुह्यादि परिभाषयादमादिसूक्तपंचकमृभुदेवताकं । अत्रानुक्रमणिका । प्र ऋभुभ्य एकादशार्भवं वा इति ।
पृष्ठ्ये दशरात्रे चतुर्थेहनि वैश्वदेवशस्त्रे आर्भवनिविद्धानीयमिदं । तथा च सूत्रितं । प्र ऋभुभ्यः यज्ञकेतिति वैश्वदेवमिति ॥ तत्र प्रथमा ॥
॥ प्र ऋभुभ्यो दूतमिव वाचमिष्य उपस्तिरे श्वैतरीं धेनुमीळे ॥ ये वातजूतास्तरणिभिरेवैः परि द्यां सद्यो अपसो बभूवुः ॥ तत्र ऋभूणां पू
र्वमनुष्याणामेव सतां तपसा देवत्वप्राप्तिः आर्भवं शंसत्यभवो वै देवेभ्य इत्यत्र ब्राह्मणे स्पष्टमाम्नातः । केचन ऋभवो नाम रश्मय इत्या
चक्षते । अहं यजमानः ऋभुभ्य उरु भासमानेभ्य एतन्नामकेभ्यो देवेभ्यो वाचं स्तुतिरूपां प्रेष्य प्रेरयामि किमिव दूतमिव दूतं स्वार्थं प्रतिप्रेष
यति तद्वत् । किं च उपस्तिरे सामीप्यस्तरणाय श्वेतरीं पयोयुक्तां श्वेतरीं धेनुं ईळे याचामि । ऋभून् । ये ऋभवो वातजूताः वातसमानगत
यः अपसः जगदुपकारिकर्माणः संतः तरणिभिः तारकैः एवैर्गमनशीलैरश्वैः द्यां अंतरिक्षं सद्यः तदानीमेव परिबभूवुः परिभवंति । सर्वतो
व्याप्नुवंति । अथ रश्मय एव ऋभव इत्युक्तत्वात् आदित्यं वा रश्मयः परितो व्याप्नुवंति ॥ ॥ अथ द्वितीया ॥ ॥ यदारमक्रन्नृभवः पितृभ्यां परि
विष्टी वेषणा दंसनाभिः ॥ आदिद्देवानामुप सख्यमायन्धीरासः पुष्टिमवहन्मनायै ॥ ॥ यदा यस्मिन्काले ऋभवः पितृभ्यां मातापितृभ्यां

ऋ॰सं॰भा॰३

परिविष्टीपरि।वेषणेनपरिचर्यवेषणानेषणेनव्याप्तायद्धानंतरायवदेवानामिंद्रादीनांसख्यंसखित्वंसमानख्यानत्वं।देवतत्वमृणाय
नूत्र्प्रागमनूः।ऋभवश्चीकर्मत्वेतिदेवप्राप्तकोक्तांतत्वेनदेवेंरकत्वादिभावः॥किंचधीरासोधीराबुधिमंतस्तेषांपुष्टिंगावादिविषयांमनावेऋ
तेऋतेयजमानायत्र्प्रवहन्नूवहंतिधारयंति।यद्वासविषयांपुष्टिंमनायेमनसेप्रकृष्टमनस्कत्वायत्र्प्रवहन्नू॥॥अथतृतीया॥॥पुनर्ये
चक्रुःपितरायुवानासनायूपेवजरणाशयाना॥तेवाजोविभ्वाँऋभुरिंद्रवंतोमधुप्सरसोनोवंतुयज्ञं॥॥येऋभवःपितरामातापितरो
यूपेवाष्टिन्नस्थाप्रूवजरणजीर्णोशयानेपुनःसनासदायुवानायुवानोचक्रुःनित्यतरुणावकुर्वन्नू।तेवाजोविभ्वाँऋभुश्चएतन्ना
मकाह्यस्यःसुधन्वनत्र्प्रांगिरसस्यपुत्राऋषयःइंद्रवंतोत्र्प्रनुग्राहणेइंद्रेणवद्वंतःमधुसरसोमधुरस्यसोमरसंभक्षयितारोमनोहररू
पवात्र्प्रस्मदीयंयज्ञमवंतुरक्षंतुगच्छंतुवा॥॥अथचतुर्थी॥॥यत्संवत्समृभवोगामरक्षन्यत्संवत्समृभवोमामपिंशन्॥यत्संवत्समभरन्भासो
दस्यास्ताभिः॥॥संवत्सरंवसंतिभूतान्यस्मिन्निति संवत्सरपर्यंतंमृतवोगोमृतामक्षरन्नपालयन्नूसमामथ्थादितियत्तदेतत्कर्मास्तितथा
संवत्सरमृभवोगामस्यास्त्वमपिंशन्नूअवयवानूकुर्वन्निनितिचत्।किंचसंवत्सरंसंवत्सरपर्यंतंत्र्प्रस्याःभासोभरन्नूदीप्तिरवयववशोभात्र्प्रकु
र्वन्निनितियत्ताभिमृतायागोर्नविकिरणविषयेःकर्मभिरमृतत्वमाशुःदेवत्वंप्राप्ताःधेनुःकर्त्वेतिदेवत्वप्राप्तिसाधनत्वेनदेवेभ्यःश्रुतिश्रुत
त्वात्।यद्वात्र्प्रसंवत्सरमित्येतद्वसनेनसहमितिव्याख्येयं॥॥अथपंचमी॥॥ज्येष्ठत्र्प्राहचमसाद्वाकरेतिकनीयांत्रीनूकृणवामेत्याह॥
कनिष्ठत्र्प्राहचतुरस्करेतित्वष्टऋभवस्तत्पनयद्वचोवः॥॥एकंचमसंचतुरःक्षणोतेतितादेवइतोग्निःऋभून्नहेदेवत्वप्राप्तुकव्यनदेव

यज्ञोत्रंत्र्प्राधाःनिधेहि॥॥अथत्रयोदशी॥॥यच्चिद्धिशश्वतामसींद्रसाधारणस्त्वं॥तंत्वावयंहवामहे॥॥हेइंद्रत्वंयच्चिद्धियद्यपि
खलुशश्वतांबहूनांसर्वेषांयजमानानांसाधारणोसिसामान्योभवसितथापितमेवत्वांवयंस्तोतारःहवामहेत्र्प्राह्वयामः॥॥अथचतुर्दशी॥
॥अर्वाचीनोवसोभवास्मेसुमत्स्वांधसः॥सोमानामिंद्रसोमपाः॥॥हेवसोयज्ञेनिवासकेइंद्रत्वंत्र्प्रस्मेत्र्प्रस्मासुयजमानेषुत्र्प्रर्वाचीनोभिमुखो
भवतथाहेसोमपाःसोमानांत्वंत्र्प्रंधसोन्नेनसुखुसुमत्स्वमादय॥॥अथपंचदशी॥॥त्र्प्रस्माकंत्वामतीनामास्तोमइंद्रयच्छतु॥त्र्प्रर्वागा
वर्तयाहरी॥॥मतीनांस्तोतृणांमन्यतेःकर्त्तरिक्तिचु।त्र्प्रस्माकंसंबंधिस्तोमस्तोत्रंहेइंद्रत्वात्वांत्र्प्रायच्छतुत्र्प्रस्मासुनियच्छतुत्वमपिहरी
त्वदीयावश्वोत्र्प्रर्वागस्मदभिमुखंत्र्प्रथाभवतितथावर्तयपरिवर्त्तनंकुरु॥॥अथषोडशी॥॥पुरोळाशंचनोघसोजोषयासेगिरश्चनः
वधूयुरिवयोषणां॥॥हेइंद्रत्वंनोस्मदीयंपुरोडाशंचपुरोडाशरूपमन्नंघसः त्र्प्रद्धितथानस्मदीयागिरश्चस्तुतिरूपावाचश्चजोष
यासेच्चस्वातत्रदृष्टांतः।वधूयुरिव।स्त्रीकामोयथायोषणांगिरःसेवते।तद्वत्॥॥इतितृतीयस्यषष्ठेएकोनत्रिंशोवर्गः॥॥अथसप्त
दशी॥॥सहस्रंव्यतीनांयुक्तानामिंद्रमीमहे॥शतंसोमस्यखार्यः॥॥वयंस्तोतारःइंद्रंपरमैश्वर्ययुक्तंयुक्तानांशिक्षितानांव्यतीनां
गमनवतामश्वानांसहस्रंसहस्रसंख्याकाःखारीरीमाहेः।त्र्प्रत्रमानविशेषवाचिनाखारीशब्देनद्रोणकलशउपलक्ष्यते।त्र्प्रपरिमित
द्रोणकलशानूबहून्यज्ञान्याचामहइत्यर्थः॥॥अथाष्टादशी॥॥सहस्रातेशतावयंगवामाच्यावयामसि॥त्र्प्रस्मत्रा राधएतुते॥॥हेइं
द्रत्वदीयानिगवांसहस्रसंख्याकानिशतशतसंख्याकानिचव्याच्यावयामसित्र्प्राच्यावयामःत्र्प्रस्मदभिमुखंकुर्मःतथात्र्प्रस्मत्रात्र्प्रस्मदीयं
राधोधानंएतुत्र्प्रागच्छतु॥॥अथैकोनविंशी॥॥दशतेकलशानांहिरण्यानामधीमहि॥भूरिदात्र्प्रसिवृत्रहन्नू॥॥ऋकृत्यक्ता॥॥अथविंशी॥॥

त·सं·भा·७

नः स्ववसः स्वपसः सुहस्ताः॥ आपो ह्येषामजुषंत देवा अभि क्रत्वा मनसा दीध्यानाः॥ ॥ये ऋभवः सुवृतं सुचक्रं सुष्ठु वर्तमानं वा न
रेष्ठां नेतरि रक्षके वर्तमानं रथं चक्रुः। ये च विश्वजुवं विश्वस्य प्रेरकयित्रीं विश्वरूपां बहुरूपां बहुरूपां एतन्नामिकां वा गां चक्रुः कुर्वन् बृहस्पति
विश्वरूपामुपाजतेति श्रुतेः ते महांत ऋभवो ऽस्माकं रयिं धनमा तक्षंतु सर्वतो निष्पादयंतु। कीदृशास्ते ऋभवः स्वपसः सुकर्माणः स्व
पसः शोभनान्नोपेताः सुहस्ताः शोभनहस्ताः॥ ॥अथ नवमी॥ ॥आपो ह्येषामजुषंत देवा अभि क्रत्वा मनसा दीध्यानाः॥ वाजो देवा
नामभवत्सुकर्मेंद्रस्य ऋभुक्षा वरुणस्य विभ्वा॥ ॥एषां ऋभूणामयो अश्वरथादिनिर्माणादिरूपं कर्म देवा इंद्रादयो ऽजुषंत असेवंत इंद्रो ह
री युयुजे अश्विना रथमित्यादिमंत्रोक्तप्रकारेण कृतवंत इत्यर्थः। कीदृशास्ते क्रत्वा वरप्रदानरूपेण कर्मणा मनसा शोभनेन चिंतेन
अनुग्रहयुक्तेनाभिदीध्यानाः दीप्यमानाः तेवतामनुग्रहेण किमित्याह। सुकर्मा शोभनव्यापारो वाजः कनीयान् देवानां सर्वेषां संबंधी
भवति। तथा इंद्रस्य संबंधी ऋभुक्षा ऋभुज्येष्ठः विभ्वा मध्यमो वरुणस्य संबंधी भवत॥ ॥अथ दशमी॥ ॥ये हरी मेधयोक्था मदंत इंद्राय च
क्रुः सुयुजा ये अश्वा। ते रायस्पोषं द्रविणान्यस्मे धत्त ऋभवः क्षेमयंतो न मित्रं॥ ॥ये ऋभवः हरी अश्वौ मेधया उक्थानि उक्थैः स्तुतिभिः राम
मदंतो हर्षयंतश्च क्रुः। ये च नो सुयुजौ सुयोजमानौ अश्वौ इंद्राय इंद्रार्थं चक्रुः कुर्वन्। हे ऋभवस्ते यूयं रायस्पोषं धनपुष्टिं द्रविणानि गवा २११
दिधनानि चक्षुरवाणि शास्मा अस्मासु धत्त धारयत। किमिव क्षेमयंत क्षेममिच्छंतो मित्रं न मित्रमिव अत्र यद्यप्येक एव ऋभुर्नाम त
त्संबंधात्। इष्टं रिष्ट ऋभव उच्यंते प्राणभन्यायेन॥ ॥अथैकादशी॥ ॥इदाह्नः पीतिमुत वो मदं धुर्न ऋते श्रांतस्य सख्याय देवाः॥ ते नून

४७

मस्मे ऋभवो वसूनि तृतीये अस्मिन्त्सवने दधात॥ ॥तदानीं चमसादिनिर्माणानंतरं अह्नः सुत्याहः संबंधिनः तृतीयसवने पीति
सोमपानं उत अपि च मदं तज्जनितं वो युष्माकं धुः दधुः देवाः श्रांतान्नयो युक्तायते सख्याय सखित्वाय न भवंति देवाः। यतएते श्रांताय
तो दधुरित्यर्थः। हे ऋभवः महांतो यूयं नूनं निश्चयमस्मे अस्मासु अस्मिन् तृतीयसवने वसूनि धनानि दधात धारयत॥ ॥इति तृ
तीयस्य सप्तमे द्वितीयो वर्गः॥ ॥ऋभुर्विभ्वेत्येकादशर्चं द्वितीयं सूक्तं वामदेवस्यार्षं त्रैष्टुभमार्भवं ऋभुर्विभ्वेत्यनुक्रमणिका।
व्युढे दशरात्रे पंचमे ऽहनि वैश्वदेवशस्त्र आर्भवनिविद्धानीयमिदं ऋभुर्विभ्वा स्तुषेजनामिति सूत्रितत्वात्॥ ॥तत्र प्रथमा॥ ॥ऋभुर्वि
भ्वा वाज इंद्रो नो अच्छेमं यज्ञं रत्नधेयोप यात। इदा हि वो धिषणा देव्यह्नामधात्पीतिं सं मदा अग्मता वः॥ ॥ऋभुर्विभ्वा वाज इंद्रश्च
ते देवा नोस्मदीयमिदं ऋभुर्विभ्वय यज्ञं अच्छाभिमुखं रत्नधेया अस्मभ्यं रत्नधानाय उपयात उपगच्छत। ननु इंद्रः सोमस्वामी त्वादागच्छतु
कथमेषाय ज्ञप्राप्तिरिति चेत् उच्यते। इदा हि वो इदानीं खलु वो युष्माकं धिषणा वाक् देवाः प्रजापतेः संबंधिनी अह्नां सोमाभिषवे
संबंधिनां पीतिं सोमपानं अधात्। स प्रजापतिरब्रवीत् सवितारं तव वा इमे तेव त्वमेवैभिः संपिबस्वेति ब्राह्मणं यस्मादेवं तस्मान्मदा
श्च वो युष्मान् समग्मत संगताः। यद्वा वामदेवैः संगताः॥ ॥अथ द्वितीया॥ ॥विदानासो जन्मनो वाजरत्ना उत ऋतुभिर्ऋभवो मादय
ध्वं॥ सं वो मदा अग्मत सं पुरंधिः सुवीरामस्मे रयिमेरयध्वं॥ ॥हे वाजरत्नाः सोमलक्षणेनान्नेन राजमानाः ऋभवो यूयं जन्मनो जन
नस्य देवत्वलक्षणस्य देवत्वप्राप्तिं विदानासो जानंतः। यद्वा विदानासः सोमप्राप्तिं जानंतः। जन्मनः पूर्वं मनुष्या जन्मवंतश्च संतः उत

८

ऋ॰सं॰भा॰७

ग्रादृश्यार्थे ऋतुभिर्देवैः सह मादयध्वं। वो युष्मानू मदाः सोमपानजनिताः समग्मत संगताः पुरंधिः श्रुतिरपि समगच्छत ते यूयमस्मे अ
स्माकं सुवीरां शोभनैर्वीरैरुपेतां रयिमेरयध्वं प्रेरयत॥ ॥अथ तृतीया॥ ॥अयं वो यज्ञ ऋभवोऽकारि यमा मनुष्वत्प्रदिवो दधिध्वे॥
प्र वोऽच्छा जुजुषाणासो अस्थुरभूत विश्वे अग्रियोत वाजाः॥ ॥हे ऋभवो युष्मदर्थं अयं यज्ञोऽकारि यं यज्ञं मनुष्वत् मनुष्यवत् प्रदिवः
प्रकर्षेण द्योतमानाः संतः आदधिध्वे धारयत। अवरे तदर्थं वो युष्मान् अच्छाभिमुख्ये जुजुषाणासः सेवमानाः सोमाः अस्थुः प्रति
ष्ठंते। उतापि च धारयित्वा च हे वाजाः ऋभवो विश्वे यूयमग्रिया अग्र्याहीः अग्रत्वसंपादिनो वा अभूत भवथ॥ ॥अथ चतुर्थी॥ ॥
अभूदु वो विधते रत्नधेयमिदा नरो दाशुषे मर्त्याय॥ पिबत वाजा ऋभवो ददे वो महि तृतीयं सवनं मदाय॥ ॥हे नरो नेतार ऋभवो यु
ष्माकमनुग्रहात् इदानीं तृतीये सवने रत्नधेयं दातव्यं न्नं विधे विधतिः परिचरणकर्मा अस्य त्यापरिचरते। दाशुषे हवींषि दत्तवते यजमाना
यमर्त्यम भूद्भवतु। तदर्थं हे वाजाः हे ऋभवः एवद्वयं विभ्वानामकस्याप्युपलक्षणं। इतरापेक्षया प्रत्येकं बहुवचनं। यूयं पिबत तदर्थं वो द
दे किं महि महत् प्रभूतं तृतीयं सवनं तत्संबंधिनं सोममित्यर्थः। किमर्थं मादाय हर्षाय तृप्तये वा॥ ॥अथ पंचमी॥ ॥आ वाजा यातोप न
ऋभुक्षा महो नरो द्रविणसो गृणानाः॥ आ वः पीतयोऽभिपित्वे अह्नामिमा अस्तं नवस्व इव ग्मन्॥ ॥हे देवाः ऋभुक्षाः नरो यूयं न उपयात।
तां किं कुर्वंतः। महो महतः द्रविणसो धनस्य कर्मणि षष्ठ्यौ महतो द्रविणं गृणानाः स्तुवंतः किंच अह्नां अभिपित्वेऽभिपतने दामाऽऽस्रोत तृती
यसवन इत्यर्थः। वो युष्मानिमाः पीतयः पानान्यगमन् आगच्छंति। तत्र दृष्टांतः। अस्तं नाम गृहं नवस्वा नवप्रसवा गाव इव॥ २॥ ७॥

राम

२१२

मु

सेनतदातेषु मध्ये एको ज्येष्ठ ऋभुरितरावाह किमिति। उच्यते। चमसा द्वा करेति एकमेतं संतं द्वौ कृणवामेति कनीयानतदेतरो विभ्वाख्यो
न् कृणवाम करवामेत्याह तदेवं चतुःकरणरूपं हे ऋभवस्त्वष्टा युष्मत्कृतं पनयत् अस्तौत् अंगीचकारेत्यर्थः॥ ॥इति तृतीयस्याष्टमे
प्रथमो वर्गः॥ ॥अथ षष्ठी॥ ॥सत्यमूचुर्नर एवा हि चक्रुरनु स्वधामृभवो जग्मुरेतां॥ विभ्राजमानांश्चमसाँ अहेवावेनत्त्वष्टा चतुरो ददृश्वा
न्॥ ॥नरो मनुष्यरूपा ऋभवः सत्यमूचुः सत्यमेवाब्रुवन्। हि यस्मादेत एवेदं चक्रुः। चतुरो कुर्वन् यथोक्तं तथैव कृतवान्त् इत्यभिप्रायः।
अनु पश्चात् स्वधां करणानंतरमेतां तृतीयसवनगतां स्वधां सोमाख्यममृतम् भवो जग्मुः। एकं चमसं चतुरः कृणोतन साकं देवे यज्ञियासो
भविष्यथेति श्रुतत्वात्। अथ त्वष्टा देवो विभ्राजमानान् अहानीव दीप्यमानान्। चमसांश्चतुरो ददृश्वान् दृष्टवान् सन् अवेनत् दमयत अंगीचका
रेत्यर्थः॥ ॥अथ सप्तमी॥ ॥द्वादश द्यून्यदगोह्यस्यातिथ्ये रणन्नृभवः ससंतः॥ सुक्षेत्राकृण्वन्ननयंत सिंधून्धन्वातिष्ठन्नोषधीर्निम्नमा
पः॥ ॥तत्र रश्मय एव ऋभव इत्युक्तत्वात् तद्रूपेण श्रूयंते। यद्यदा द्वादश द्यून् दिवसान् आर्द्रादिऋक्षद्वादश वृष्टिनक्षत्राणि इत्यर्थः॥ अगोह्य
स्य गोपयस्यादित्यस्य गृहे आतिथ्ये अकस्मादागतोऽतिथिः तदुचितं तत्कारकरूपं कर्म आतिथ्यं तदर्थं ससंतः स्वपंतः सुखेन निवसंत ऋभ
वः रणन् रमते। अगोह्यस्य पदं तत्तस्य नाम गृह इत्युक्तं तदानीं सुक्षेत्रा कृण्वन् अरिष्टानि शस्यानि क्षेत्राणि वृष्ट्या तस्यादि समृद्धान्यकुर्वन्
सिंधून्नदीरनयंत अप्रेरयन्। तस्मिंश्च काले ओषधीरोषधयो धन्व निरुदकस्थानमाश्रित्यातिष्ठंन् निम्नं नीचस्थानमापोऽतिष्ठन् उदकं त
स्मा अकृणोतनात्तलं निविष्टपद इत्युक्तं॥ ॥अथाष्टमी॥ ॥रथं ये चक्रुः सुवृतं नरेष्ठां ये धेनुं विश्वजुवं विश्वरूपां॥ त आ तक्षंत्वृभवो रयिं

८

त·सं·भा·७

कृतीधेनुंततक्षुर्ऋभवोयेअश्वा॥येअंसत्रायऋधग्रोदसीयेविभ्वोनरःस्वपत्यानिचक्रुः॥ ॥येऋभवःअश्विनाअश्विनोकृतीकृत्या
क्रिययानिमीलरूपाअप्रीणयन्॥येचपितरावपितरौततक्षुःततक्षणेनसमयापादयन्॥जीर्णौसंतौकृतीकृत्यायुवानौचक्रुःयेचधे
नुंततक्षुःमृतायाःपुनर्नवकरणेनयेवाअश्वाअश्वौततक्षुःनिश्चर्मणोगामरिणीतधीतिभिर्याजरंतायुवशाताकृणोतनेत्याद्युक्तं।ये
वांसत्राणिकवचयवानिदेवेभ्यश्चक्रुर्नेअग्रेपाइत्युक्तरसंबंधः॥ ॥अथदशमी॥ ॥येगोमंतंवाजवंतंसुवीरंरयिंधत्तवसुमंतंपुरु
क्षुं॥तेअग्रेपाऋभवोमंदसानाअस्मेधत्तयेचरातिंगृणंति॥ ॥हेऋभवोयूयंगोमंतंगोहितंवाजवंतंसुवीरंशोभनपुत्रोपेतंवसुमंतं
निवासयोग्यगृहादिधनोपेतंपुरुक्षुंबह्वन्नंरयिंधनंधत्तधारयथमघवद्भ्यइहऋभवः।तेयूयंअग्रेपाःप्रथमंपातारःमंदसानाः
माद्यंतःसंतःअस्मेअस्मभ्यंधत्तऋषिर्येचयूयंरातिंदानंदत्तंसोमंवागृणंतिस्तुवंतितेधत्त।यद्वायेचरातिंगृणंतियजमानास्तेभ्योपि
धत्त॥ ॥अथैकादशी॥ ॥नापाभूतनवोतीततृषामानिःशस्ताऋभवोयज्ञेअस्मिन्॥समिंद्रेणमदथसंमरुद्भिःसंराजभीरत्नधेयाय
देवाः॥ ॥नापाअपरक्ताःनभवतावयंचवोयुष्मान्नातीततृषाम।अत्यंततर्षितान्माकरवाम।अतोहेदेवाःअनिशस्ताःअनिंदिताःसं
तोस्मिन्यज्ञेइंद्रेणसंमदथ।राजभिराजमानैरन्यैर्देवैःसंमदथतृप्ताभवथ।किमर्थंरत्नधेयायरमणीयायधनदानाय॥ ॥इतितृती
यस्यसप्तमेचतुर्थोवर्गः॥ ॥इहोपयातेतिनवर्चंतृतीयंसूक्तंवामदेवस्यार्षंत्रैष्टुभमार्भवं।इहोपनवेत्यनुक्रमणिका।तृतीय
सवनेमैत्रावरुणस्येदमुक्थ्यमानसूक्तं।सूत्रितंचआत्वावहंत्वसावदिवमिहोपयातेत्यनुसवनमिति॥ ॥तत्रप्रथमा॥ ॥इहोपया

राम
२२३

४

तशवसोनपातःसौधन्वनाऋभवोमभूत॥अस्मिन्हिवःसवनेरत्नधेयंगमंत्विंद्रमनुवोमदासः॥ ॥हेशवसोनपातोबलस्यपुत्राःत
स्यनिपातयितारोवाहेसौधन्वनाःसुधन्वनःपुत्राःहेऋभवोयूयमिहोपयातअस्मिन्तृतीयस्यसवनेउपगच्छत।माआभूतअपगतानभव
तअस्मिन्सवनेरत्नधेयंरमणीयधनस्यदातारमिंद्रंअनुसृत्यवोयुष्मान्मदाःसोमकृताःसोमाःगमंतुगच्छंतुअन्वितिक्रियायाः
संबध्यते।इंद्रंयुष्मांश्चात्रागच्छंत्वित्यर्थः।हिपूरणः॥ ॥अथद्वितीया॥ ॥आगन्नृभूणामिहरत्नधेयमभूत्सोमस्यसुषुतस्यपीतिः॥सु
कृत्ययायत्स्वपस्ययाचएकंविचक्रचमसंचतुर्धा॥ ॥ऋभूणांयुष्माकमिहतृतीयसवनेरत्नधेयंरत्नदानमागमन्आगच्छतुमत्वा॥य
द्वायुष्माकमेवसोमाख्यंरत्नमागमत्।यस्मात्सोमस्यसुषुतस्यपीतिःपानमभूत्।प्रजापतिनालब्धमित्यर्थः।तदपिकुतइतिचेत्उ
च्यते।यद्यस्मात्सुकृत्ययाशोभनहस्तव्यापारेणस्वपस्यया।शोभनरथनिर्माणादिकर्मेच्छयाचएकंसंतंचतुर्धाविचक्रकृतवंतः॥ ॥अ
थतृतीया॥ ॥व्यकृणोतचमसंचतुर्धासखेविशिक्षेत्यब्रवीत॥अथैतवाजाअमृतस्यपंथांगणंदेवानामृभवःसुहस्ताः॥ ॥हे
ऋभवःवोयूयं।अमृतस्यामरणधर्मकस्यस्वर्गस्यपंथांपंथानमभिलगच्छत।किंतदमृतमिति।देवानामिंद्रादीनांगणंसंघातंएत॥ ॥
॥अथचतुर्थी॥ ॥किंमयःस्विच्चमसएषआसयंकाव्येनचतुरोविचक्र॥अथासुनुध्वंसवनंमदायपातऋभवोमधुनःसोम्यस्य॥ ॥
किंमयःस्वित्किमात्मकश्चमसःस्वित्प्रश्नोपचमसकमेकंसंतंकाव्येनकवीनांसंबंधिनाकर्मणानिकोशाल्लेनचतुरोविचक्रकृतवंतः।अथ
अधुनासवनंश्रूयतइतिसवनासोमःसंमदायहर्षायसुनुध्वंहेऋत्विजःहेऋभवोयूयंचसोम्यस्यसोमसंबंधिनःमधुनोमधुनरसंपा

तपिबत॥ ॥अथपंचमी॥ ॥शच्याकर्तपितरायुवानाशच्याकर्तचमसंदेवपानं॥शच्याहरीधनुतरावतष्टेंद्रवाहाऋभवोवाजरत्नाः॥
॥हेवाजरत्नाःरमणीयसोमान्नाः हेऋभवोयूयंशच्याकर्मणापितरामातापितरौयुवानायुवानौअकर्तअकुरुततथाशच्या
चमसंदेवपानार्हमकर्तचित्तुर्धाकुरुतेत्यर्थः॥शच्याहरीअतष्टततक्षणेनसंपादितवंतः॥कीदृशौहरीधनुतरौशीघ्रगंतृतरौइंद्रवा
हाइंद्रवोढारौ॥ ॥इतितृतीयस्यसप्तमेपंचमोवर्गः॥ ॥अथषष्ठी॥ ॥योवःसुनोत्यभिपित्वेअह्नांतीव्रंवाजासःसवनंमदाय॥
तस्मैरयिमृभवःसर्ववीरमातक्षतवृषणोमंदसानाः॥ ॥हेऋभवोवाजसान्नवंतोवोयुष्मभ्यंयोयजमानःअह्नामभिपित्वे
अभिपतनेतृतीयसवनइत्यर्थः॥तस्मिन्नंतरसवनंसवनंश्रूयतइतिसवनः॥सोमःमदायसुनोतितस्मैसर्ववीरंबहुपुत्रो
पेतंरयिंधनं।हेवृषणःफलवर्षितारःमंदसानाःमोदमानाःसंतःआतक्षतसंपादयतेत्यर्थः॥ ॥अथसप्तमी॥ ॥प्रातःसु
तमपिबोहर्यश्वमाध्यंदिनंसवनंकेवलंते॥समृभुभिःपिबस्वरत्नधेभिःसखीयाँइंद्रचकृषेसुकृत्या॥ ॥हेहर्यश्वहरितैर्व
र्णैरश्वोपेतइंद्रप्रातःसवनेसुतमभिषुतंसोममपिबःमाध्यंदिनंसवनंकेवलंतेपरंतवैवनान्येषांसवनद्वयस्यपृथगभिधाना राम
तृतीयसवनंपरिशिष्यते।तृतीयसवनेरत्नधेभिःरमणीयदानैःऋभुभिःसंपिबस्व।हेइंद्रयान्भूनकृत्याशोभनकर्मणास २१४
खीन्सरकृषेअकरोः॥ ॥अथाष्टमी॥ ॥येदेवासोअभवतासुकृत्याश्येनाइवेदधिदिविनिषेद॥तेरत्नंधातशवसोनपातःसौध
न्वनाअभवतामृतासः॥ ॥हेऋभवोयेयूयंसुकृत्याशोभनकर्मणादेवासोदेवाःअभवतभूतश्येनाइवतशंसनापगतयोगविश्व

५०

इतितृतीयस्यसप्तमेतृतीयोवर्गः॥ ॥अथषष्ठी॥ ॥आनपातःशवसोयातनोपेमंयज्ञंनमसाहूयमानाः॥सजोषसःसूरयोयस्य
चस्थमध्वःपातरत्नधाइंद्रवंतः॥ ॥हेशवसोनपातःबलस्यनपातःपितारःतस्यपुत्रावाबलवंतइत्यर्थः॥यूयंनमसास्तोत्रेणहूयमा
नाःआकारिताःसंतःइमंयज्ञमुपायात।तेनउपागच्छत।कीदृशायूयंसजोषसःइंद्रेणसहप्रीताःसूरयोमेधाविनःइंद्रस्यचेषांचकःप्र
संगइत्युच्यते।यस्यचस्थचेतिप्रसिद्धोयस्येंद्रस्यसंबंधिनोयूयंभवथतद्धितैतास्थनिर्माणमित्यभिप्रायःअस्मादेवंतस्मादिंद्रवंतः
कीर्तितेनेंद्रेणतद्वंतोरत्नधाःरमणीयधनानांदातारोयूयंमध्वःमधुरंसोमंपातपिबत॥ ॥अथसप्तमी॥ ॥सजोषाइंद्रवरुणेनसोमंसजोषाः
पाहिगिर्वणोमरुद्भिः॥अग्रेपाभिर्ऋतुपाभिःसजोषाग्नास्पत्नीभीरत्नधाभिःसजोषाः॥ ॥हेइंद्रत्वंवरुणेनराज्ञ्यभिमानिदेवेनसजो
षाःसमानप्रीतिःसन्सोमंपाहिपिबहेगिर्वणःगीर्भिर्वननीयसंभजनीयेंद्रत्वंमरुद्भिःसजोषाःसंगतःसन्सोमंपाहिपिबकिंचअग्रे
पाभिःप्रथममाऋभिःऋतुपाभिःऋतुयाजदेवैःश्चग्नायत्रीभिःस्त्रीलोपालयित्र्योग्नाःपत्न्यःताभिःमेनाग्नाइतिस्त्रीणामितिनिरुक्तं
रत्नधाभिःरमणीयधनदात्रीभिर्ऋतुभिःसहपिब।यद्वैततग्नाःपत्नीभिरित्यस्यविशेषणं।ताभिर्वासजोषाःसोमंपिब॥ ॥अथाष्टमी॥
॥सजोषसआदित्यैर्मादयध्वंसजोषसऋभवःपर्वतेभिः॥ ॥सजोषसोदैव्येनासवित्रासजोषसःसिंधुभीरत्नधेभिः॥ ॥हेऋभवःआदित्यैः
सजोषसोयूयंमादयध्वंतथापर्वतेभिःपर्ववद्भिःपर्वण्युच्यमानैर्देवविशेषःसजोषसोमानयध्वंतथादैव्येनदेवेभ्योहितेनसवित्रासजो
षसःरत्नधेभिःरत्नानांदातृभिःसिंधुभिःस्यंदस्वभावैःनद्यभिमानिदेवैश्चसजोषसोमादयध्वं॥ ॥अथनवमी॥ ॥येअश्विनायेपितराय

तृ·सं·भा·७ ॥तद्वोवाजाऋभवःसुप्रवाचनंदेवेषुविभ्वोअभवोचेन्महित्वनं॥जिव्रीयत्संतापितरासनाजुरापुनर्युवानाचरथायतक्षथ॥ हेवाजा
ऋभवःहेविभ्वःविभवः इतरापेक्षापरस्परंबहुवचनं। हेऋभवोयुष्माकंअभिहितत्वनंमहत्वंमाहात्म्यंदेवेषुमध्येअवाचनंप्रवाच्यंतद्
युक्तंयदित्याह जिव्रीहृष्टोसंतोअनाजुरासदाजीर्णौसातापितरापितरोपुनर्युवानामित्यतरणोचरथायचेष्टंसंचरणायतत्संपादितं
तः॥॥अथचतुर्थी॥॥एकंविचक्रचमसंचतुर्वयंनिश्चर्मणोगामरिणीतधीतिभिः॥अथादेवेष्वमृतत्वमानशश्रुष्टीवाजाऋभवस्तद्वउ
क्थ्यं॥॥हेऋभवःएकंचमसंएकमेवसंतंपानसाधनंचमसंचतुर्वयंपयाःशाखाःचतुःशाखंचतुरवयवंचविचक्रव्यकुरुत।तथाधी
तिभिःकर्मभिःचर्मणःमृतनांगांनिरिरिणीतसस्कुरुत।निरित्येवसमित्यतस्यस्थानेअथअतःकारणात्देवेषुमध्येअमृतत्वंआनश
प्राप्नुत।हेवाजाःहेऋभवःतत्तादृशंवोयुष्माकंकर्मश्रुष्टीतिक्षिप्रनामैतत्क्षिप्रमुक्थ्यंस्तुत्यंभवति॥॥अथपंचमी॥॥ऋभुतोरयिः
प्रथमश्रवस्तमोवाजश्रुतासोयमजीजनन्नरः॥विभ्वतष्टोविदथेषुप्रवाच्योयंदेवासोवथासविचर्षणिः॥॥ऋभुतःऋभूणांसकाशात्
यमःश्रवस्तमःप्रथमम्मरव्यमतिशयितप्रपन्नयशोवायस्यधनस्यतद्रयिधनंअस्माकंभवतिविशेषःवाजश्रुतासोवाजैःसदृशिरव्या
ताःनरोनेतारोऋभवोयरयिमजीजनन्उत्पादितवंतःविभ्वःतष्टोविभ्वभिर्ऋभुभितष्टस्तक्षणसंपन्नःचमसोऽश्विनोःरथोवाविद रा
थेषुप्रवाच्यःप्रकर्षेणश्रुत्यः।हेदेवासोतमानात्सर्यंयंरथंवाअवथरधक्षथ।सविचर्षणिःविविधंद्रष्टाभवति।द्रष्टव्योभवतीत्यर्थः॥ २१५
इतितृतीयस्यसप्तमेसप्तमोवर्गः॥॥अथषष्ठी॥॥सवाज्यर्वासऋषिर्वचस्ययासशूरोअस्तापृतनासुदुष्टरः॥सरायस्पोषंससुवी
र्यंदधेयंवाजोविभ्वाँऋभवोयमाविषुः॥॥वाजीवेजनवान्बलवान्सनअर्वाअरणकुशलोभवति।ऋषिऋतीन्द्रियोज्ञानीसन्वचस्य

५१

यास्तुत्याभवति।सशूरोविक्रांतःसन्अस्ताक्षेप्ताशत्रूणांभवति।स्वयंचपृतनासुसपृतनासुसंग्रामेषुदुष्टरानाभिभाव्योभवति।
सदातरायस्पोषंधनपुष्टिंदधेधत्तेससुवीर्यंसुवीरत्वंदाधधत्ते।यमनुष्यवाजोविभ्वाऋभवश्चाविषुःअरक्षनूसएवामर्षभवत्तीतिअ
त्यस्यबहुवचनेईशास्त्रयाणाम्भुर्थवहारप्रासुर्याभिप्रायः॥॥अथसप्तमी॥॥श्रेष्ठंवःपेशोअधिधायिदर्शतंस्तोमोवाजाऋभ
वस्तंजुजुष्टन॥धीरासोहिष्ठाकवयोविपश्चितस्तान्वएनाब्रह्मणावेदयामसि॥॥श्रेष्ठमत्युत्कृष्टंअतएवदर्शनंदर्शनीयंवोयुष्माकं
पेशोरूपंअधिधायिअधिनिहितअतस्तुविनेयःस्तोमःस्तोत्रमस्मत्कृतमस्तिहेवाजाःऋभवःतंस्तोमंस्तोत्रंजुजुष्टनासेवध्वं
यूयंधीरासोहिधीमंतःप्रसिद्धाःकवयोमेधाविनोविपश्चितोज्ञानवंतस्थतानोयुष्मान्एनाएनेनब्रह्मणामंत्रेणशस्त्रात्मकेनावे
दयामसि।अथवाऋक्लक्षणविपश्चितोस्तोतारोयान्स्तुवंतीतिशेषः।तान्ब्रह्मणावेदयामःप्रज्ञापयामो॥॥अथाष्टमी॥॥यूयम
स्मभ्यंधिषणाभ्यस्परिविद्वांसोविश्वानर्याणिभोजना॥द्युमंवाजंवृषशुष्ममुत्तममानोरयिमृभवस्तक्षतावयः॥॥हेऋभवोयूयम
स्मभ्यंधिषणाभ्यस्परीतिश्रुतिभ्योनिमित्तभूताभ्यःपरीतिपंचम्यर्थानुवादीषद्वांस्मन्मतिभ्योहितानिविश्वासर्वाणिभोजनाभोग्या
निविद्वांसोजनंतःअतसमाकंचद्युमंतंदीप्तिमंतंहिरण्यादिरूपंवाजंबलवंतंवृषशुष्मंसेक्तृणाबलवतांशोषकंउत्तमंरयिंनोस्माकं
वयोन्नंचअतक्षतहेऋभवः॥॥अथनवमी॥॥इहप्रजामिहरयिंरराणाइहश्रवोवीरवत्तक्षतानः॥येनवयंचितयेमात्यन्यान्तं
वाजंचित्रमृभवोददानः॥॥नोस्माकमिहयज्ञेरराणाःरयिंवतक्षत।इहैवयज्ञेश्रवोयशःवीरवद्वीरैर्भृत्यादिभिःरूपेतंतक्षत।

ऋ॰सं॰भा॰७

किं च वयं येन शत्रुणेन अन्यानस्मत्समानान् अतिचितयेम अतिक्रम्य ज्ञायेमहि। तं चित्रं चायनीयं वाजमन्नं हे ऋभवो नो दत्त अस्मभ्यं दत्त॥ ॥ इति
तृतीयस्य सप्तमे ऽष्टमो वर्गः॥ ॥ उपनो वाजा इत्यष्टर्चं पंचमं सूक्तं वामदेवस्यार्षं आर्भवं त्रैष्टुभं पंचम्याद्याश्चतस्रो ऽनुष्टुभः॥ तथा चानुक्रांतं
उपनोष्टौ वनुरनुष्टुबंतमिति। सूत्रे दशरात्रे षष्ठे ऽहनि वैश्वदेवशस्त्रे आद्याश्चतस्रो ऽनुष्टुभः॥ उपनो वाजा इति तृचो द[?]ामे वि वतस्त्रथेति हि सू
त्रितं॥ ॥ तत्र प्रथमा॥ ॥ उप नो वाजा अध्वरमृभुक्षा देवा यात पथिभिर्देवयानैः॥ यथा यज्ञं मनुषो विक्ष्वा३सु दधिध्वे रण्वाः सुदिनेष्वह्नां॥
हे वाजाः हे ऋभुक्षाः ऋभवो हे देवाः नो अध्वरं यागं उपयात उपगच्छत। देवयानैर्देवैर्गंतव्यैः पथिभिः मार्गैः। यथा येन प्रकारेण मनुषो मनोः संबं
धिनीष्वासु विक्षु प्रजासु यजमानेषु मध्ये हे रण्वाः रमणीया ऋभवः अह्नां सुदिनेषु सुदिनत्वमिति नेषु यज्ञमस्मदीयं दधिध्वे धारयथ येन प्रका
रेण यज्ञमागत्य सुदिनत्वं कुरुथ॥ तथा यज्ञमायातेति॥ ॥ अथ द्वितीया॥ ॥ ते वो हृदे मनसे संतु यज्ञा जुष्टासो अद्य घृतनिर्णिजो गुः॥ प्र वः सुता
सो हरयंत पूर्णाः क्रत्वे दक्षाय हर्षयंत पीताः॥ ॥ अद्यास्मिन्यागदिने एते यज्ञाः यागसाधनाः सोमाः वो हृदयाय मनसे तत्प्रीतये संतु भवंतु
अद्यास्मिन्दिने जुष्टासः पर्याप्ताः सोमाः घृतनिर्णिजः मिट्रेण द्रव्येणादीप्तरूपाः गुः गच्छंतु युष्मान् हृदयं सुतासो ऽभिषुताः समरणेषु पूरणाः
वो युष्मदर्थं प्रहरयंत प्रक्रियंते। यद्वा हर्यतिः कांतिकर्मा इदं रूपं प्रकर्षेण वो युष्मान् कामयंते। क्रत्वे क्रतवे कर्मणे दक्षाय उत्साहाय पीताः हर्ष राम
यंत हर्षयंतु॥ ॥ अथ तृतीया॥ ॥ त्र्युदायं देवहितं यथा वः स्तोमो वाजा ऋभुक्षणो ददे वः॥ जुह्वे मनुष्वदुपरासु विक्षु युष्मे सचा बृहद्दिवेषु २१६
सोमं॥ ॥ त्र्युदायं त्र्युदयं सवनत्रयगमनोपेतं देवहितं सोमाख्यमन्नं देवेभ्यो हितं देवैर्वा हितं तृतीयसवनस्थमित्यर्थः। तद्यथा वो युष्मान्

५२

याइव दिवि द्युलोके अधिनिषेद। अधिनिषण्णाः हे शवसो नपातो बलवंतस्ते यूयं रत्नं धनं धात प्रयच्छत। हे सोधन्वनाः अमृतासात्र
मृता देवा अभवत॥ ॥ अथ नवमी॥ ॥ यत्तृतीयं सवनं रत्नधेयमकृणुध्वं स्वपस्या सुहस्ताः॥ तदृभवः परिषिक्तं व एतत्सं मदेभिरिंद्रि
येभिः पिबध्वं॥ ॥ हे सुहस्ताः शोभनहस्ता ऋषयः रत्नधेयं रमणीयसोमदानवंतं तृतीयसवनमकृणुध्वं प्रसाधितवंतः स्वपस्या
शोभनकर्मेच्छया तत्सवनं सवनगतं सोमद्रव्यं परिषिक्तं परिषेचनवंतं वो युष्माकं संबंधिभिः मदेभिर्मादयितृभिः इंद्रियैः सं पिबध्वं यद्य
पिबध्वं। यद्यपि वदनमेव मा पानसाधनं तथापि चक्षुःश्रोत्रादीनामपि दर्शनश्रवणादिना तृप्तिसद्भावात् पातृत्वमुपचर्यते॥ ॥ इति तृ
तीयस्य सप्तमे षष्ठो वर्गः॥ ॥ अनश्वो जात इति नवर्चं चतुर्थं सूक्तं आर्भवं ऋषिर्वामदेवः अंत्या त्रिष्टुप्॥ शिष्टास्त्रिष्टुबंतपरिभाषया
जगत्यः। अनश्वो जातः पराचनो यद्वितिवैश्वदेवमिति॥ ॥ तत्र प्रथमा॥ ॥ अनश्वो जातो अनभीशुरुक्थ्यो३ रथस्त्रिचक्रः परि वर्तते
रजः॥ महत्तद्वो देव्यस्य प्रवाचनं द्यामृभवः पृथिवीं यच्च पुष्यथ॥ ॥ अश्विनोः संबंधि युष्मदत्तो रथः अनश्वो जातः वाहनाश्वनिरपे
क्षः संपन्नः तथा अनभीशुः प्रग्रहरहितः उक्थ्यः स्तुत्यः त्रिचक्रः चक्रत्रययुक्तः सन् रजो ऽंतरिक्षं परिवर्तते परिभ्रमति। महत्प
भूतं तद्रथनिर्माणरूपं कर्म वो युष्माकं देव्यस्य देवत्वस्य प्रवाचनं प्रकर्षेण ख्यापकं यत्त्वयेन कर्मणा द्यां पृथिवीं च पुष्यथ पुष्टीः कुरुथ॥ ॥
॥ अथ द्वितीया॥ ॥ रथं ये चक्रुः सुवृतं सुचेतसो ऽविह्वरंतं मनसस्परि ध्यया॥ तां ऊ न्वस्य सवनस्य पीतय आ वो वाजा ऋभवो वेदयामसि॥ ॥
सुचेतसः शोभनविज्ञाय ऋभवः सुवृतं सुवर्तनं चक्रं अविह्वरंतं अकुटिलं रथं मनसः परिध्याय मनसो ध्यानेन प्रयत्नेन शोभनं विता
यच्चक्रुः। तांउ तांश्च एवार्थतानेवास्य सवनस्य पीतये तत्रत्यं सोमं पातुं हे वाजाः हे ऋभवः वो युष्मानावेदयामसि आवेदयामः॥ ॥ अथ तृतीया॥

ऋ·सं·भा· जा ऋभुक्षणा इंद्र नासत्या रयिं ॥ समश्वं चर्षणिभ्य आ पुरु शस्त मघत्तये ॥ ॥ अनया स्तुतिमुपसंहरतीति समताम् आशास्ते । हे वाजाः हे ऋभुक्षणः
ऋभवः हे इंद्र हे नासत्या अश्विनौ ते यूयं नोस्मभ्यं चर्षणिभ्यः मनुष्येभ्यः स्तोतृभ्यः तं पुरुषभूतं रयिं धनम् अश्वं च पुरु प्रभूतं मघत्तये मघ
नाय मघाय शस्त सम्यगाशासनं कुरुत ॥ ॥ इति तृतीयस्य सप्तमे द्वात्रिंशो वर्गः ॥ ॥ उतो हि वामिति दशर्चं षष्ठं सूक्तं वामदेव ऋषिः त्रिष्टु
प् छंदः दधिक्रा देवता । आद्या द्यावापृथिव्यौ अत्रानुक्रमणिका । उतो हि दश दाधिक्रं हि द्यावापृथिव्येति विनियोगो लैंगिकः ॥ ॥ तत्र प्र
थमा ॥ ॥ उतो हि वां दात्रा संति पूर्वा या पूरुभ्यस्त्रसदस्युर्नितोशे ॥ क्षेत्रासां ददथुरुर्वरासां घनं दस्युभ्यो अभिभूतिमुग्रं ॥ ॥ उतो इति पू
रणः । अस्या द्यावापृथिव्याव उत हा वकतहावशब्दाभावे पित एवं संबोध्ये । हे द्यावापृथिव्यौ वां युवाभ्यां सकाशात् दात्राणि कर्त्रीभ्यो रु कु
त्सेन त्रसदस्युना लब्धानि पूर्वाणि पूर्व्याणि पुरातनानि पूरुकाणि वा धनानि संति । या यानि धनानि पूरुभ्यो ऽर्थिभ्यो ऽर्थिमनुष्येभ्यः त्रसदस्युः राजा नि
तोशे न्यतोशत । दत्तवान् क्षेत्राणि सर्वा भूमीः सनोति क्षेत्रसाः अश्वं ददत् तथा उर्वरासां उर्वरासां उर्वरास उर्वरा सर्वस्याद्या भूः तासां सनो
ती सुर्वरासाः पुत्रस्तं ददथुः । घनं ताम् अर्हं मायुधं दस्युभ्यो दस्यूनां वधार्थं च ददथुः । कीदृशम् आयुधं । अभिभवितारम् उग्रं उद्गूर्णं बलं य
द्वा उत्तराधं एवं वा व्याख्येयं दातव्यानि धनानि उक्तलक्षणं पुत्रं च ददथुः । दत्तवत्यौ स्थः । तानि मह्यमपि दद्याथामित्यर्थः ॥ ॥ अथ द्वितीया ॥ ॥
उत वाजिनं पुरुनिःषिध्वानं दधिक्रामु ददथुर्विश्वकृष्टिं ॥ ऋजिप्यं श्येनं प्रुषितप्सुमाशुं चर्कृत्यमर्यो नृपतिं न शूरं ॥ ॥ उतापि च वाजिनं
गमनवंतं अश्वरूपं वा देवं अग्ने अश्वरूपस्येव दधिक्राव्णो देवस्य तद्रूपत्वं ब्राह्मणे समाम्नातं तान् अग्निरश्वो भूत्वा यद्वदिति । पुरुनिःषिध्वा

५२

राम
२२१

नं पुरूणां बहूनां शत्रूणां निषेद्धारं दधिक्रां दधत् अन्यं धारयन् क्रामतीति दधिक्राः तमेकं देवं उः पूरणः । विश्वकृष्टिं । विश्वाः कृष्टयो मनुष्य
णीयाः सेवकाः मनुष्याय स्यतं ऋजिप्यं ऋजु आप्नोति गच्छतीति ऋजिप्यं । श्येनं शंसनीयं गमनं प्रुषितप्सुं दीप्तरूपं आशुं व्याप्तं शीघ्रगाम
नं वा अर्यः आरः च कृत्यं कर्तव्यं शीलं शूरं नृपतिं नराजानम् इव स्थितं देवं द्यावापृथिव्यौ ददथुः धारयतः ॥ ॥ अथ तृतीया ॥ ॥ यं सीमनु प्रवते
व द्रवंतं विश्वः पूरुर्मदति हर्षमाणः ॥ पड्भिर्गृध्यंतं मेधयुं न शूरं रथतुरं वातमिव ध्रजंतं ॥ ॥ यः दधिक्रां विश्वः पूरुः सर्वोपि मनुष्यो हर्षमाणः हृ
ष्यन् हर्षयन् वा मदति स्तौति । तं देवं द्यावापृथिव्यौ ददथुरिति संबंधः । स देवो विशिष्यते । सीं सर्वतः प्रवता प्रवणवहानि निम्नेन मार्गेणोदकमिव अ
नुक्रमेण द्रष्टव्यं तं यद्भिः पादैः गृध्यंतं अभिकांक्षंतं दिशो लंघितुं । तत्र दृष्टांतः मेधयुं तं शूरं संग्रामे युद्धं शूरमिव । यद्वा यज्ञ क्रमाणं युद्धमध्यादि
कमिव रथं तुरं रथेन गच्छंतं वातमिव ध्रजंतं शीघ्रगं वायुमिव उक्तविशेषणविशिष्टानुदकं शूरं वायुं तथा सर्वे जनः स्तौति यं देवं स्तौति तं द
दथुरित्यर्थः ॥ ॥ अथ चतुर्थी ॥ ॥ यः स्मारुंधानो गध्या समत्सु सनुतरश्चरति गोषु गच्छन् ॥ आविर्ऋजीको विदथा निचिक्यत्तिरो अरतिं पर्या
प आयोः ॥ ॥ यः स्म यः खलु देवो गध्यां गध्यानि गृध्यानि मिश्रीभावकर्मेति निरुक्तं । मिश्रयितव्यानि फलानि समत्सु संग्रामेषु आरुंधानः स
र्वतो निरोधयन् सनुतरः संभक्ततरो गोषु सर्वासु दिक्षु गोषु वा निमित्तभूतेषु गच्छन् आविर्ऋजीकः आविर्भूतगमनसाधन आविर्भूतमुष्को वा वि
दथानि ज्ञातव्यानि निचिक्यत् पश्यति कर्मेतत् जानन् । अरतिं अरणं दुःखमभिगंतारं परिपरि सर्वतः तिरस्करोति । कस्य अरतिं मतिं । आयोर्वा म
स्य स्तोतुरायोर्मनुष्यस्य यजमानस्य ॥ ॥ अथ पंचमी ॥ ॥ उत स्मैनं वस्त्रमथिं न तायुमनु क्रोशंति क्षितयो भरेषु ॥ नीचायमानं जसुरिं न श्ये

ऋ·सं·भा·७ नेअचस्थापशुमच्चयूथं॥ ॥उतस्म अपिखलु एनं दधिक्रां भरेसंग्रामेषु वस्त्रमथिं न तायुं न वस्त्रमाथिनं तस्करमिव तं दृष्ट्वा क्षितयो मनुष्य
यथा क्रोशंति तद्वद्वैरिणोऽनुक्रोशंति किंच नीचायमानं नीचैः अयमानं गच्छंतं जसुरिं न श्येनं क्षुधितं श्येनं पक्षिणमिव यथा दृष्ट्वा पक्षिणः पला
यंते तद्वत् श्रवोऽन्नं कीर्तिं वा पशुमच्च यूथं चाभिलक्ष्य गच्छंतमेनमनुक्रोशंतीति संबंधः अपिस्मैनं वस्त्रमथिमिव दृष्ट्वा मथिनमित्यादिनिहक्ते
मत्रानुसंधेयं॥ ॥इति तृतीयस्य सप्तमे एकादशो वर्गः॥ ॥अथ षष्ठी॥ ॥उतस्मासु प्रथमः सरिष्यं निवेवेति श्रेणिभी रथानां॥ स्रजं
कृण्वानो जन्यो न शुभ्वा रेणुं रेरिहत् किरणं ददश्वान्॥ ॥उतस्म अपि च खलु आसु असुरसेनासु सरिष्यन् संसर्तुमिच्छन् प्रथमः प्रतन
उत्कृष्टतमो मुख्यः सन् रथानां श्रेणिभिः रजिभिर्युक्तः सन् निवेवेति नितरां गच्छति। इतस्ततो धावति। कद्वेति उच्यते। स्रजं स्रज्यते। उत्पा
द्यते रूपमनयेति स्रक् अलंकृतिः। तां कृण्वानो जन्यो न जनेभ्यो हितो रथ इव शुभ्वा सुष्टु भवतीति शुभ्वा शोभमानः किरणं आस्यगत
खलीनं ददश्वान् दशन् रेणुं स्वपातघातजनितं रेरिहत् भृशं लेढि॥ ॥अथ सप्तमी॥ ॥उत स्य वाजी सहुरिर्ऋतावा शुश्रूषमाणस्तन्वा स
मर्ये॥ तुरं यतीषु तुरयन्नृजिप्योऽधि भ्रुवोः किरते रेणुमृंजन्॥ ॥उत अपि च स उक्तलक्षणो वाजी वेजनवान् गमनवान् समर्थे समरणे सहु राम
रिः सहनशीलः शत्रूणां ऋतावा अन्नवान् तन्वा अस्यावयवेन खुरादिना स्वतनु शुश्रूषमाणः तुरं यतीषु त्वरगामिनीषु असुरसेनासु तुर २१९
यन् ऋजिप्यः ऋजुगामी रेणुं धूलिं ऋंजन् प्रसाधयन् तामेव रेणुं भ्रुवोरधि उपरि किरते विक्षिपति॥ ॥अथाष्टमी॥ ॥उत स्मास्य तन्यतो
रिव द्योर्ऋघायतो अभियुजो भयंते॥ यदा सहस्रमभि षीमयोधीद्दुर्वर्तुः स्मा भवति भीम ऋंजन्॥ ॥उतापि च खलु दादीप्यमानो तन्यतो

५४

ददे धारयति। उपरासु उपदेवयजनसमीपे रमंत इत्युपराः तासु विक्षु प्रजासु बृहद्दिवेषु प्रभूतदीप्तिषु देवेषु मध्ये मनुष्वत मनुरिव युष्मेयुष्म
दर्थं स्वासह अनेकगृहेषु प्रस्थितं सुदक्षं जुहोमि सोमं॥ ॥अथ चतुर्थी॥ ॥पीवो अश्वाः शुचद्रथा हि भूतायःशिप्रा वाजिनः सुनिष्काः॥ इंद्र
स्य सूनो शवसो नपातोऽनु वश्चेत्यग्रियं मदाय॥ ॥हे वाजिनः ऋभवः यूयं वो अश्वाः पीवानो स्थूला येषां ते तादृशाः तथा शुचद्रथाः सप्तरथाः अ
यःशिप्राः शिप्रे हनू नासिके वा अयो वा सारभूत शिप्राः सुनिष्काः शोभनधनाः भूत भवत। हे इंद्रस्य सूनोः सूनवः पुत्रवत् दक्षणीयाः हे श
वसो नपातो बलस्य पुत्रा बलिनो वो युष्मभ्यं मदाय अनुचेति अनुज्ञापि देवेषु अग्रियं अग्रे भवं तृतीयसवनं॥ ॥अथ पंचमी॥ ॥ऋभुमृभुक्ष
णो रयिं वाजे वाजिंतमं युजं॥ इंद्रस्वंतं हवामहे सदासातममश्विनं॥ ॥हे ऋभुक्षणः ऋभवः ऋभुं उरु तासमानं रयिं धनरूपेण हेतुभूतत्वात
तादृशं वाजे संग्रामे वाजितमं अत्यंत बलवंतं युजं परस्पर योगोपेतं इंद्रस्वंतं इंद्रवंतं इंद्रियवंतं सदासातमं सर्वदा दातृतमं अश्विनं अश्वैर्भ
वंतां गणं हवामहे आह्वयामि॥ ॥इति तृतीयस्य सप्तमे नवमो वर्गः॥ ॥अथ षष्ठी॥ ॥सेदृभवो यमवथ यूयमिंद्रश्च मर्त्यं॥ स धीभिरस्तु स
निता मेधसाता सो अर्वता॥ ॥हे ऋभवो यूयमिंद्रश्च यं मर्त्यं अवथ रक्षथ। स तस एव भवतु नान्यः श्रेष्ठो भवतीत्यर्थः स एव धीभिः सनिता संभ
क्ता भवतु। मेधसाता मेधसातौ यज्ञे स एव अर्वता अरणवताश्वेन युक्तो भवतु॥ ॥अथ सप्तमी॥ ॥वि नो वाजा ऋभुक्षणः पथश्चितन यष्टवे॥
अस्मभ्यं सूरयः स्तुता विश्वा आशास्तरीषणि॥ ॥हे वाजाः हे ऋभुक्षणः ऋभवो नोऽस्माकं पथो मार्गान् यष्टवे यष्टुं यज्ञमार्गान् वि चितन विचेतय
त प्रज्ञापयतेत्यर्थः अस्मभ्यं हे सूरयो मेधाविनो यूयं स्तुताः संतो विश्वा आशाः तरीषणि तरीतुं सामर्थ्यं वितरत इति शेषः॥ ॥अथाष्टमी॥ ॥तं नो वा

ऋ·सं·भा·७ ष्टवाम दिवस्पृथिव्या उत चर्किराम ॥ उच्छंतीर्मामुषसः सूदयंत्वति विश्वानि दुरिता निपर्षन् ॥ ॥ आशुं शीघ्रगामिनं तमश्वं तमेव दधिक्रां देवं नु क्षि
प्रस्तवाम उत अपि च ॥ दिवः पृथिव्याश्च सकाशात् दस्य वासं च चर्किराम विक्षिपाम । उच्छंती तमो विवासयंती उषसो मां प्रति तमदयंतु । फलानि विश्वा
नि दुरितानि अतिनिपर्षत् अतिनिपारयंतु । अन्यदेवताकेषु च एषु अन्यदेव निपातमक्रमात्र विरुध्यते ॥ ॥ अथ द्वितीया ॥ ॥ महश्चर्कर्म्यर्वतः क्रतु
प्रा दधिक्राव्णः पुरुवारस्य वृष्णः ॥ यं पूरुभ्यो दीदिवांसं नाग्निं ददथुर्मित्रावरुणा ततुरिं ॥ ॥ क्रतुप्राः कर्मणां पूरकोऽहं रस्य च वृष्णिभिर्वरणीय
स्य वृष्णो वर्षकस्य दधिक्राव्णः स्तुतिं चर्कर्मि । अयमर्थं करोमि । हे मित्रावरुणा मित्रावरुणौ युवां ततारं दिवसेनाग्निं दीप्यमानमग्निमिव स्थि
तं पूरुभ्यो मनुष्येभ्यस्तेषामुपकराय दद्यः धारयथः ॥ ॥ अथ तृतीया ॥ ॥ यो अश्वस्य दधिक्राव्णो अकारीत्समिद्धे अग्ना उषसो व्युष्टौ ॥
अनागसं तमदितिः कृणोतु स मित्रेण वरुणेना सजोषाः ॥ ॥ यजमानोऽश्वस्याश्व— पस्य वाशस्य वा दधिक्राक्रस्तु । तमुखसो व्युष्टौ प्रभाते स
ति अग्नौ समिद्धे सति अकारीत् अकार्षीत् । मित्रेण वरुणेन च अहोरात्राभिमानिदेवाभ्यां सजोषाः समानप्रीतिरदितिरखंडनीया दधिक्राः तं
यजमानमनागसं कृणोतु करोतु ॥ ॥ अथ चतुर्थी ॥ ॥ दधिक्राव्ण इष ऊर्जो महो यदमन्महि मरुतां नाम भद्रं ॥ स्वस्तये वरुणं मित्रमग्निं ह राम
वामह इंद्रं वज्रबाहुं ॥ ॥ इषोऽन्नस्य धकस्योर्जो बलस्य धापकस्य महो महतो दधिक्राव्णो देवस्य मरुतां स्तोतॄणां स्वभूतं कल्याणं — मनामस्तू २१९
पमस्ति । तदमन्महि स्तुमः ॥ किंचात्र निपातभाजा वरुणादीन्स्वस्तये क्षेमाय हवामहे ॥ ॥ अथ पंचमी ॥ ॥ इंद्रमिवेदुभये विह्वयंत उदीरा
णाय यज्ञमुपप्रयंतः ॥ दधिक्रामु सूदने मर्त्याय ददथुर्मित्रावरुणा नो अश्वं ॥ ॥ इंद्रमिवैनं दधिक्रामुदीराणाः युद्धायोद्योगं कुर्वंतो यज्ञमुप

५५

क्रम्य प्रवर्तमानो अश्वो भये विह्वयंते आह्वयंति । यं मर्त्याय मर्त्यस्य सूदनं प्रेरकमश्वमश्वरूपं दधिक्रां देवं हे मित्रावरुणा नोऽस्माकं मर्त्याय ददथुः
धारयथः । तं विह्वयंते । उभय इत्यत्रोक्तोत् शंसिनृमेदेन चोभयविधत्ववगंतव्यं ॥ ॥ दधिक्राव्णो अकारिषमित्याग्नीध्रीये दधिद्रप्सान्भ
क्षयंतीति सूत्रितत्वात्तत्रा वक्तु ॥ ॥ सेषा षष्ठी ॥ ॥ दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः ॥ सुरभि नो मुखा करत्प्रण आयूंषि तारिषत् ६
॥ दधिक्राव्णो देवस्य स्तुतिं अकारिषं करवाणि । जिष्णोर्जयशीलस्य अश्वस्य व्यापकस्य वाजिनो वेगवतः स देवोऽस्माकं मुखा मुखानि च
क्षुरादींद्रियाणि सुरभि सुरभीणि करत करोतु । नोऽस्मभ्यमायूंषि प्रतारिषत् प्रवर्धयतु । प्रपूर्वस्तिरतिर्वर्धनार्थः ॥ ॥ इति तृतीयस्य सप्तमे त्रयो
दशो वर्गः ॥ ॥ दधिक्राव्ण इति पंचर्चमष्टमं सूक्तं वामदेवस्यार्षं दाधिक्रं आद्या त्रिष्टुप् शिष्टा जगत्यः हंसः शुचिषदित्येका सूर्यदेवताका ।
तथा चानुक्रमणिका । दधिक्राव्णः पंच चतस्रोंत्या जगत्यों त्यासौरीति । सूक्त विनियोगो लैंगिकः ॥ ॥ तत्र प्रथमा ॥ ॥ दधिक्राव्ण इदु नु चर्कि
राम विश्वा इन्मामुषसः सूदयंतु ॥ अपामग्नेरुषसः सूर्यस्य बृहस्पतेरांगिरसस्य जिष्णोः ॥ ॥ दधिक्राव्ण ईं इदु एतन्नामकस्य देवस्यैव स्तुतिं तु
क्षिप्रं चर्किराम भृशं करवाम । मां विश्वा इदुषसः सर्वा अपि ताः सूदयंतु कर्मसु प्रेरयंतु । सह मस्य वादिदेवतानां स्तुतिं करवाणीति शेषः । तासा
मपि निपातभाक्त्वात्स्तुतिरविरुद्धः ॥ ॥ अथ द्वितीया ॥ ॥ सत्वा भरिषो गविषो दुवन्यसच्छ्रवस्यादिष उषसस्तुरण्यसत् ॥ सत्वो द्रवो द्रवरः
पतंगरो दधिक्रावेषमूर्जं स्वर्जनत् ॥ ॥ सत्वा गंता भरिषो भरकुशलः गविषो गवां प्रेरकः सत्वा दुवन्यस्यत् दुवः प[illegible]रिचरणमिच्छतो दुवन्याः
जेषु सीदतीति दुवन्यसत् इषः इध्यमानाया उषसः संबंधिनि काल इत्यर्थः । यद्वा इषा एषणीयेन वा । श्रवस्यात् श्रवस्य अन्नमिच्छेत् । किं

ऋ॰ सं॰ भा॰ ७

वा। अश्वत्यः सत्सु तायमानः इवोर्गताइवरः प्रकृष्टवेगवान् पतंगरः मतनेनोत्पवनेन पतनं पतंगः तद्वान् पतंगरः॥ उत्क्रक्षणे दधिक्रावा देवः इषे
अन्नमूर्जं बलं स्वः स्वर्गं च जनत् जनयेत्। उत्पादयेत्॥ ॥ अथ तृतीया॥ ५ उत स्मास्य द्रवतस्तुरण्यतः पर्णं न वेरनु वाति प्रगर्धिनः॥ श्येनस्येव
ध्रजतो अंकसं परि दधिक्राव्णः सहोर्जा तरित्रतः॥ ५ उत स्म अपि च खलु द्रवतो गच्छतः तुरण्यतः त्वरमाणस्य प्रगर्धिनः प्रकर्षेणाभिकांक्ष
तोऽस्य देवस्य गतिवेगं तु पक्षिणः पर्णं गमनं यत्रं वा तु तस्तगय था वांत्ये पक्षिणस्तद्वदनुवाति। सर्वो वेगवान् जनः। सर्वेषामपि शीघ्रगामी त्य
र्थः। किं च ध्रजतो गच्छतात रित्रतः तारयतोन्यान् अंतर्भावितण्यर्थोयं। श्येनस्येव अंकसं पादं धारमुपप्रदेशं वा परितः ऊर्जा बलेन निमित्तेन अत्रा
र्थे वा सहर्षकीभूय संघेन गच्छंतीति शेषः॥ ॥ अथ चतुर्थी॥ ५ उत स्य वाजी क्षिपणिं तुरण्यति ग्रीवायां बद्धो अपि कक्ष आसनि॥ क्रतुं दधिक्रा अनु
संतवीत्वत् पथामंकांस्यन्वापनीफणत्॥ ॥ उतापि च स्यः स वाजी वेजनवान् स्वरूपो देवो ग्रीवायां गरणसाधनायां कंठे बद्धोपि कक्षे कक्षप्रदेशे आ
सनि आस्ये च बद्धः बद्धपल्ययं कस्योक्तेषु स्थानेषु पाशा बद्धाः संभवंति। एतं बद्धः क्षिपणिं क्षेपणमनु तुरण्यति त्वरयितुं गंतुं। किं चायं दधिक्रा
देवः क्रतुं कर्म प्रज्ञां वा अनुसृत्य संतवीत्वत् प्रवृद्धः बलवान् सन् पथां मार्गाणां अंकांसि कुटिलानि अनुसृत्य आपनीफणत्। सर्वतो भृशं ग
तिफणतेर्गत्यर्थस्य यङ्लुकीदं रूपं। आपिस्सवाजी वेजनवानित्यादि निरुक्तमनुसंधेयं॥ ॥ दशरात्रे षष्ठेहनि तृतीयसवने मैत्रावरुणशस्त्रे हंसः शु
चिषदित्येषा आह्वयमुरोहणरोहति हंसः शुचिषदिति पच्छो र्धर्चशः इति सूत्रं स्मार्तं विनियोगमाह शौनकः हंसः शुचिषदित्यृचा शुचिरीक्ष्य
दिवाकरं अंतकाले जपन्निति। अश्नुता सप्तशाश्वतमिति॥ ॥ सैषा पंचमी॥ ॥ हंसः शुचिषद्वसुरंतरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्॥ नृषद्वरस
स

राम
२२०

५६

शाद्वे पितुरशनेरिव अघयेनोहिंसितोऽस्य अस्माद्देवात् आभियुजो आभियोक्तारोऽसुराः भयंते बिभ्यति। किं चायं यदा सर्वतः सहस्रमभ्य
योधात्। संप्रहरेत्। तदा अजनूवसाधयन् आत्मानं भीमो भयहेतुर्दुर्वर्तुर्दुर्वारश्च भवति॥ ॥ अथ नवमी॥ ५ उत स्मास्य पनयंति जना जूतिं कृष्टि
प्रो अभिभूतिमाशोः॥ उतैनमाहुः समिथे वियंतः परा दधिक्रा असरत् सहस्रैः॥ ॥ उत स्म अपि च खलु अस्य दधिक्राव्णो अभिभूतिं अभिभावित्रीं जू
तिं पराभिभूतिं चेत्युक्तं यं वाजनाः य नयंति स्तुवंति कीदृशस्यास्य कृष्टिप्रोः कृष्टयो मनुष्याः तेषां पूरकस्य आशोः व्याप्तस्य आवेगवतो वा। उतापि
चैनं समिथे संग्रामे वियंतो विविधं गच्छंतो जनाः अयं दधिक्रो देवः सहस्रैः अनुचरैः परिवृतः परासरदिति आहुः। अस्मा विशायान्यान् हंतुं गतवानित्याहुः।
यद्वा। एनमेवमाहुः। वियंतः शत्रवः पर भतीति शेषः। दधिक्रा सहस्रैः सरत्। गच्छतीति॥ ॥ परित्रेष्ठा शाद्दधिक्रा इति दधिक्राव्णो याज्या। तथा
च सूत्रितं। दधिक्राव्णो अकारिषमा दधिक्राः शवसा पंच कृष्टीरिति॥ ॥ सैषा दशमी॥ ॥ आ दधिक्राः शवसा पंच कृष्टीः सूर्य इव ज्योतिषापस्त
तान॥ सहस्रसाः शतसा वाज्यर्वा पृणक्तु मध्वा समिमा वचांसि॥ ॥ यो दधिक्रा देवः शवसा बलेन पंच कृष्टीः पंचजनान् देवमनुष्यासुररक्षःपि
तृयज्ञकान् निषादपंचमान् चतुरो वर्णान् सूर्यो ज्योतिषा तेजसा यथा जगदापृणोति तद्वत् अपउदकानि आततान आतनोति। सहस्रसाः। शतानां
सहस्राणां च दाता वाजी वेजनवान् अर्वा अरणकुशलः स देवो मध्वा मधुनाम मधुरेण फलेन इमानि मान्युक्तानि वचांसि संपृणक्तु। संयोजयतु॥
॥ इति श्री तृतीयस्य सप्तमे द्वादशो वर्गः॥ ॥ आ शुं दधिक्रामिति षळृचं सप्तमं सूक्तं आदितः पंच त्रिष्टुभः। षष्ठी अनुष्टुप्। ऋषिर्वामदेवः पूर्व
सूक्ते हि स्तुतत्वाद्देवता दधिक्राः। तथा चानुक्रांतं। आशुं षळंत्यानुष्टुबिति। सूक्तविनियोगो लैंगिकः॥ ॥ तत्र प्रथमा॥ ॥ आशुं दधिक्रां तमु तु

हृतसद्व्योमसदब्जागोजाऋतजाअद्रिजाऋतं॥ ११॥ अनयासोर्यवार्यएषोंतरादित्येहिरण्मयः पुरुषोदृश्यतेहिरण्यश्मश्रुत्युक्तोमंडलाभि
मानीदेवोस्ति। यश्चसर्वप्राणिचित्तेषूपस्थितः परमात्मा। यश्चनिरस्तसमस्तोपाधिकंपरब्रह्मतत्सर्वमेकमेवेतिप्रतिपाद्यते। हंसः हंतिगच्छतीत्यर्थः।
सर्वत्रसर्वदागंतायोहंसोसावित्यादिश्रुत्युक्तप्रकारेणएकीकृत्योपास्यपरमात्ममंत्रप्रतिपाद्यआदित्यस्यचशुचौदीप्तेद्युलोकेसीदतीति
शुचिषत्। अथयदतः परोदिवोज्योतिर्दीप्यतइत्यादिश्रुतेः। अनेनद्युस्थानआदित्यः प्रतिपादकः। सएवमध्यस्थानोवायुरित्याह। वसुःस
र्वस्यवासयितावायुःसचांतरिक्षसत्। अंतरिक्षसंचारी। अथतस्यैवक्षितिस्थानवैदिकाग्निरूपतामाह॥ होतादेवानामाह्वाताहोमनिष्पाद
कोवावेदिषत्। वेद्यांगार्हपत्यादिरूपेणस्थितः। अतिथिः। अतिथिवत्सर्वदापूज्योग्निः। दुरोणसत्। दुरोणंगृहनामतत्रपाकादिसाधनत्वेन
स्थितं। अनेनलौकिकाग्न्यात्मकत्वमुक्तं। नृषत् नृषुमनुष्येषुचित्स्वरूपेणासीदतीतिनृषत्। अनेनपरमात्मरूपत्वमुक्तं। पुनरप्यादित्यात्मनामा
ह। वरसत्। वरेवरणीयेमंडलेसीदतीतिवरसत्। आदित्यः। वरंवाएतत्स्वर्गानांयस्मिन्नेषआसन्नस्तपतीतिहिश्रूयते। ऋतंसत्यंब्रह्मयज्ञंवातत्र
सीदतीतिऋतसत्। अग्निः। व्योमांतरिक्षंतत्रसीदतीतिव्योमसत् वायुः। इदानीमादित्यतोच्यते। अब्जाः। उदकेषुजातः उदकमध्येखल्वयंजा
यते। गोजाः। गोषुरश्मिषुजातः। ऋतंसत्यंसर्वैर्दृश्यत्वेनसत्यजातः। नह्यसाविंद्रादित्यपरोक्षोभवति। यद्वोदकेस्रुवेघृतरूपेणवावडवत्त
पेणवाजातः। अद्रिजाः अद्रावुदयाचलेजातः। एवंमहानुभावआदित्यः ऋतंसत्यंअबाध्यंसर्वाधिष्ठानंब्रह्मतत्त्व[illegible]इत्योह्यसावादित्यस्या
त्मरूपत्वंहंसःशुचिषदित्येषहंसःशुचिषदिनाब्राह्मणेसमाम्नातं॥ ॥इतितृतीयस्यसप्तमेचतुर्दशोवर्गः॥ ॥ इंद्रा[illegible]वामितिबकर्वीमि

ऋ॰सं॰भा॰७

एकादशर्चं नवमं सूक्तं। वामदेवस्यार्षं त्रैष्टुभमैंद्रावरुणं। अत्रानुक्रमणिका। इंद्रा को वामेकादशैंद्रावरुणं त्विति। अभिप्लवेषूक्थेषु तृतीय
सवने मैत्रावरुणशस्त्रे स्तोमवृध्यावावापार्थमेतदादिसूक्तद्वयमिंद्रा को वामिति सूक्ते सूत्रितत्वात्॥ ॥ तत्र प्रथमा॥ इंद्रा को वां वरुणा सु
म्नमाप स्तोमो हविष्मां अमृतो न होता॥ यो वां हृदि क्रतुमां अस्मदुक्तः पस्पर्शदिंद्रावरुणा नमस्वान्॥ हे इंद्र हे वरुणा हे वरुणौ परस्प
रापेक्षया द्विवचनं। वां युवयोः सुम्नं सुखं कः स्तोमो हविष्मान् हविर्भिरुपेतः सोमाज्यादिप्रदेयद्रव्योपेतं कन्ममेत्स्तोत्रं सुम्नमाप फलकत्वेन
प्राप्नुयादित्यर्थः। वां युवयोः सुम्नं सुखं कः स्तोमो हविष्मान् हविर्भिरुपेतः सोमाज्या यद्वा हविष्मानित्येतदुत्तरत्र योज्यं। हविष्मान् हविर्युक्तोमृ
तोमरणलक्षणः स्वर्गसाधनो होताग्निरिव स यथा तथा अयं स्तोमो हे मित्रावरुणौ वां युवयोः हृद हृदये क्रतुमान् प्रज्ञोपेतोस्मत्सकाशादुक्तो हि
तेन मस्वान् हविषान्नमस्कारेणोपेतो वा पस्पर्शत् स्पृशेः हृदयंगमो भवेत् सकृदिति स्तोमप्रशंसा॥ ॥ अथ द्वितीया॥ ॥ इंद्रा ह यो वरुणा चक्र आपी देवौ
मर्त्तः सख्याय प्रयस्वान्॥ स हंति वृत्रा समिथेषु शत्रूनवोभिर्वा महद्भिः स प्रशृण्वे॥ ॥ इंद्रावरुणा इंद्रावरुणौ देवौ यो मर्त्यो मरणधर्मा प्रयस्वा
न् हविर्लक्षणान्नवान् सख्याय सखित्वाय आपीनं धूवं चक्रे अमृतौ वृत्रा आवरकाणि पापानि हंति। तथा समिथेषु संग्रामेषु शत्रून् हंति। वा
शब्दश्चार्थे महद्भिरवोभी रक्षणैः शमनरः प्रशृण्वे प्रकृष्टं श्रूयति विख्यातो भवति॥ ॥ अथ तृतीया॥ ॥ इंद्रा ह रत्नं वरुणा धेष्ठेत्था नृभ्यः शश राम
मानेभ्यस्ता॥ यदी सखाया सख्याय सोमैः सुतेभिः सुप्रयसा मादयैते॥ ॥ इंद्रावरुणौ ताहेति प्रसिद्धौ तौ खलु देवौ इत्थाइत्थं नृभ्यो मनुष्येभ्यः २२१
शशमानेभ्यः स्तोतृभ्यो रत्नं रमणीयं धनं। धातृतमौ भवतमिति शेषः। यदसखवायापरस्परस्य जमानस्य वा सखिभूतौ सख्याय सखिकर्म

७

ऋ·स·भा·३

पादपूरणः युवामेव पूर्व्याय पुरातनाय युवाभ्यां कृताऽवसे रक्षणाय वृणीमहे इति संबंधः। परिप्रभूतौ प्रभवंतौ स्वापी शोभनबंधुभूतौ आपिरि
ति बंधुपर्यायः सुष्टु आपानशीलौ शूरौ विक्रांतौ मंहिष्ठा अतिशये पूज्यौ युवां संख्याय समानख्यानाय धियाय च परिवृणीमहे परितः प्रार्थयामहे।
शोभनं सुखस्य भावयितारौ पितरौ पुत्राय तद्वत्॥ ॥अथाष्टमी॥ ॥ता वां धियोऽवसे वाजयंतीराजिं न जग्मुर्युवयूः सुदानू। श्रियेन गाव उप सोममस्थु
रिंद्रं गिरो वरुणं मे मनीषाः॥ ॥हे देवौ वां युवां वाजयंतीः अन्नमिच्छंत्यो धियः स्तुतयो जग्मुः गच्छंति युवयः युवां कामयमानाः पेरूपे आजिं संग्राममि
व। किंच श्रिये दध्यादिश्रपणाय गावः सोममिवेंद्रं वरुणं च मे मदीया मनीषा मनस ईश्वरा गिरः स्तुतयः उपास्थुः उपतिष्ठंति प्रीणयंतीत्यर्थः॥ ॥अथ
नवमी॥ ॥इमा इंद्रं वरुणं मे मनीषा अग्मन्नुप द्रविणमिच्छमानाः। उपेमस्थुर्जोष्टार इव वस्वो रघ्वीरिव श्रवसो भिक्षमाणाः॥ ॥इंद्रं वरुणं च मे
मम मनीषाः स्तुतयो द्रविणमिच्छमानाः संतः उपाग्मन् उपगच्छंति जोष्टारः सेवकाः वस्वो धनस्य लाभाय अधिकं स्वामिनामिव रघ्वीरिव जध्यद्व
श्रवसोऽन्नस्यान्नं भिक्ष्यमाणा एनं इंद्रावरुणौ चापास्थुः उपतिष्ठंते॥ ॥अथ दशमी॥ ॥अश्व्यस्य त्मना रथ्यस्य पुष्टेर्नित्यस्य रायः पतयः स्या
म। ता चक्राणा ऊतिभिर्नव्यसीभिरस्मत्रा रायो नियुतः सचंताम्॥ ॥अश्व्यस्याश्वसमूहस्य रथ्यस्य रथरूपस्य रथार्हस्य वा पुष्टेः पोषस्य नि
त्यस्याविचलितस्य रायो धनस्य पतयः स्याम। ततो देवौ चक्राणा चक्रममाणौ गंतारौ अवतमिति शेषः नव्यसीभिः नूतनाभिः ऊतिभी रक्षाभिर
स्मत्रास्मासु नियुतो अश्वाः रायो धनानि च सचंतां सेवतां॥ ॥अथैकादशी॥ ॥आ नो बृहंता बृहतीभिरूती इंद्र यातं वरुण वाजसातौ। यद्दिद्यवः
पृतनासु प्रक्रीळांत तस्य वां स्याम सनितार आजेः॥ ॥हे बृहंता महांतौ हे इंद्र हे वरुण बृहतीभिर्महतीभिरूतिभिरक्षाभिः सहायातमागच्छतं वा

राम
२२२

५८

जसातौ संग्रामे अन्नलाभनिमित्तभूते वा यत्र यस्मिन्नाजौ संग्रामे पृतनासु सेनासु दिद्यवः आयुधनामैतत् आयुधानि शत्रुसंबंधीनि प्रक्रीळान्
प्रक्रीडंते तस्य तादृशस्याजेः सनितारः संभक्तारः स्याम भवेम वा युवयोरनुग्रहात्॥ ॥इति तृतीयस्य सप्तमे षोडशो वर्गः॥ ॥मम द्वितेति दशर्चं
दशमं सूक्तं पुरुकुत्सस्य पुत्रस्त्रसदस्यू राजर्षिः आद्यासु षट्स्वात्मनः स्तुत्यत्वात्तदात्मा देवता अवशिष्टानां चतसृणामिंद्रावरुणौ देवता त्रिष्टुप् छंदः।
अत्रानुक्रमणिका। मम द्विता दश त्रसदस्युः पौरुकुत्स्यः षडाद्या आत्मस्तवं द्वि। उक्तो विनियोगः पूर्वसूक्ते॥ ॥तत्र प्रथमा॥ ॥मम द्विता राष्ट्रं क्षत्रि
यस्य विश्वायोर्विश्वे अमृता यथा नः। क्रतुं सचंते वरुणस्य देवा राजामि कृष्टेरुपमस्य वव्रेः॥ ॥क्षत्रियस्य जात्युक्तत्रस्य विश्वायोः कृत्स्नमनुष्या
धीशस्य ममेत्यात्मनो निर्देशः। द्विता क्षितिः स्वर्गभेदेन द्वित्वापत्रं राष्ट्रं मम त्रसदस्योः विश्वे सर्वे अमृता देवा यथा नोऽस्माकं भवंति तथा राष्ट्रं प्रजाश्चे
त्यर्थः। वरुणस्य वारकस्य वरुणात्मनो वा कृष्टेर्मनुष्यस्य तद्भूतो वा उपमस्य अंतिकनामैतत्। सर्वेषामंतिकतमस्य वव्रेः [illegible] रूपवतो
मम क्रतुं कर्म सचंते सेवंते देवाः सर्वेऽपि अहं च राजामि राजतिरैश्वर्यकर्मा सर्वेश्वरो भवामि। यद्वा उपमस्य वव्रेः रूपे राजासीति योज्यं॥ ॥अथ द्विती
या॥ ॥अहं राजा वरुणो मह्यं तान्यसुर्याणि प्रथमा धारयंत। क्रतुं सचंते वरुणस्य देवाः०॥ ॥अहमेव च राजा वरुणो भवामि। मह्यं मदर्थमे
व प्रथमा पुराण्यानि तानि प्रसिद्धानि असुर्याणि असुरविधातकानि बलानि धारयन्। देवाः शिष्टं गतं॥ ॥अथ तृतीया॥ ॥अहमिंद्रो वरुण
स्ते महित्वोर्वी गभीरे रजसी सुमेके। त्वष्टेव विश्वा भुवनानि विद्वान्समैरयं रोदसी धारयं च॥ ॥अहं त्रसदस्युरिंद्रः इंद्रोऽस्मि अहं वरुणश्चात
महित्वा महित्वेनो वी विस्तीर्णे गभीरे दुरवगाहे अवकाशं वा त्यो वा सुमेके सुरूपे रजसा द्यावापृथिव्यौ धारयं च धृतवानस्मि॥ ॥अथ चतुर्थी।

ऋ·स·भा·३

अहमपो अपिन्वमुक्षमाणा धारयं दिवं सदन ऋतस्य॥ ऋतेन पुत्रो अदितेर्ऋतावोत त्रिधातु प्रथयद्वि भूम॥ ॥ अहमेवोक्षमाणाः सिंचंती
रपो पिन्वं असेवयं तथा ऋतस्योदकस्यादित्यस्य वा सदने स्थाने निमित्ते सति दिवं द्युलोकं धारयं। यद्वोदकं धारेण [illegible]नेदिव्यमादित्यं धारयं।
अहमेव ऋतेनोदकेन निमित्तेन। दितेः अऋतावान् भूर्वं उतापि च भूम व्याप्तमाकाशं त्रिधातु त्रिःकारं विशेषेण प्रथयत्। समर्थमेवाक्षित्यादि
लोकत्रयमकार्षमित्यपरमेश्वरः॥ ॥ अथ पंचमी॥ ॥ मां नरः स्वश्वा वाजयंतो मां वृताः समरणे हवंते॥ कृणोम्याजिं मघवाहमिंद्र इयर्मि रेणुमभि
भूत्योजाः॥ ॥ मां मामेव स्वश्वाः शोभनाश्वाः वाजयंतः संग्राममिछंतो नरो नेतारो भटाः अनुगछंतीति शेषः। मामेव वृताः सतः समरणे संग्रामे हवंत
आह्वयंति युद्धार्थं मघवा धनवानहमिंद्रः सन्नाजिं कृणोमि करोमि अभिभूत्योजाः रेषामभिभाविबलोहं रेणुमियर्मि प्रेरयामि॥ ॥ इति तृतीय
स्य सप्तमे सप्तदशो वर्गः॥ ॥ अथ षष्ठी॥ ॥ अहं ता विश्वा चकरं नकिर्मा दैव्यं सहो वरते अप्रतीतं॥ यन्मा सोमासो ममदन्यदुक्थोभे भयेते रजसी
अपारे॥ ॥ अहं [illegible]त्रसदस्युस्ता तानि प्रसिद्धानि सर्वाणि चकरं आकर्षं अप्रतीतमप्रतिगतं मामा दैव्यं सहो देवसंबंधि सहो बलं च नकिर्वरते नैव
वारयति। यद्यस्मात् सोमासः। सोमाः मामा ममदन् अमदयन् पयोक्था शस्त्राण्यपि ममदन्। तस्मान्मत्त अपारे अदूरे पारे उभे रजसी द्यावापृथि
व्यौ भवेते चलतः॥ ॥ अथ सप्तमी॥ ॥ विदुष्टे विश्वा भुवनानि तस्य ता प्र ब्रवीषि वरुणाय वेधः॥ त्वं वृत्राणि शृण्विषे जघन्वान्त्वं वृताँ अरिणा इं
द्र सिंधून्॥ ॥ इतः परमिंद्रावरुणायोः स्तुतिः। हे वरुण तस्यात्त कर्माणि षष्ठी तं त्वा विश्वा सर्वाणि तानानि भुवनानि भूतजातानि विदुर्जानंति। हे वेधः
स्तोत्नामेतत्। हस्तोतः वरुणाय प्र ब्रवीषि वरुण[illegible] इंद्र त्वं वृत्राणि वैरिणो जघन्वान् हतवानिति शृण्विषे श्रूयसे त्वं च हे इंद्र त्वं वनानां [illegible]

राम

२२२

५८

णो सुक्षित्याय सुतेभिरभि सुतैः सोमैः सुप्रयसा [illegible] भग[illegible]अन्नवानोमादयैते तर्हि रत्नानां दातारो भवतः॥ ॥ अथ चतुर्थी॥ ॥ इंद्रा युवं वरुणा
दिद्युमस्मिन्नोजिष्ठमुग्रा नि वधिष्टं वज्रं॥ यो नो दुरेवो वृकतिर्दभीतिस्तस्मिन्मिमाथामभिभूत्योजः॥ ॥ हे इंद्र इंद्रावरुणौ हे तु उग्रावुग्रौ। अत्र सर्वत्र प
रस्परापेक्षया द्विवचनं प्रमित्रयोर्वरुणयोरितिवत्। यद्वास्मत्कादशो वाद्युवां हितस्यानरुं। अस्मिन् शत्रदिद्युदात्र। ओजिष्ठमितिशायेन तेजोवंत
वस्त्रमायुधं निवधिष्टं वधार्थं प्रेरयतमित्यर्थः। यः शत्रुर्नोस्माकं दुरेवो दुःप्रापः वृकतिरतिशायेन अन्नदाता दभीतिर्हिंसकः शत्रूणां तस्मिन् शत्रावं
भिभूय अभिभावुकमोजो बलं मिमाथां कुरुतमित्यर्थः॥ ॥ अथ पंचमी॥ ॥ इंद्रा युवं वरुणा भूतमस्या धियः प्रेतारा वृषभेव धेनोः॥ सा नो दुहीय
द्यवसेव गत्वी सहस्रधारा पयसा मही गौः॥ ॥ इंद्रावरुणा युवं युवामस्या धियः स्तुत्याः प्रेतारा प्रीणयितारौ भूतं भवतं वृषभा सेक्तारौ वृषभौ
धेनोरिव सा स्तुतिरूपा धेनुर्नोस्माकं दुहीयत् दुह्येत् कामान् पूरयेत् यवसात्तृणादिघासेन निमित्तेन गत्वी गत्वा यथा सा सहस्रधारा मही मह
ती गौरिव॥ ॥ इति तृतीयस्य सप्तमे पंचदशो वर्गः॥ ॥ अथ षष्ठी॥ ॥ तोके हिते तनय उर्वरासु सूरो दृशीके वृषणश्च पौंस्ये॥ इंद्रा नो अत्र वरुणा स्या
तामवोभिर्दस्मा परितक्म्यायां॥ ॥ इंद्रावरुणौ देवौ नो हिते तोके पुत्रे तनये तत्पुत्रे च उर्वरासु रस्याद्यासु भूमिषु निमित्तभूतासु सूरः। प्रेरकस्य सू
र्यस्य दृशीके चिरकालदर्शनाय चिरजीवनायेत्यर्थः। सन्तु कर्मन्यपौंस्ये पुंस्त्वाय च पुनरपि प्रजननसामर्थ्याय च दस्मा शत्रूणां हिंसकौ संतौ नोस्मा
कमवोभी रक्षणैः सह परितक्म्यायां परितनके निमित्तभूते सति यद्वा नामैतत्। रात्रौ हिंसकानां वधाय स्यातां भवेतां॥ ॥ अथ सप्तमी॥ ॥ युवामिध्य
वसे पूर्व्याय परि प्रभूती गविषः स्वापी॥ वृणीमहे सख्याय प्रियाय शूरा मंहिष्ठा पितरेव शंभू॥ ॥ हे मित्रावरुणौ गविषो [illegible]तो वयं युवामिद्धीति

ऋ॰सं॰भा॰७ ॥ कउश्रवदितिसप्तर्चंएकादशंसूक्तं। सुहोत्रपुत्रोपुरुमीह्ळाजमीह्ळावृषी। त्रिष्टुप्छंदः। अश्विनौदेवता। अत्रानुक्रमणिका। कउश्रवत्सप्तपु
रुमीह्ळाजमीह्ळौसौहोत्रौआश्विनंहि। प्रातरनुवाकाश्विनेक्रतौ त्रैष्टुभेछंदसिदशमादिकेद्वेसूक्ते धिनुःप्रत्नस्येतिद्वे प्रवदितिसूत्रितत्वात्॥
॥तत्रप्रथमा॥ ॥ कउश्रवत्कतमोयज्ञियानांवंदारुदेवःकतमोजुषाते॥ कस्येमांदेवीममृतेषुप्रेष्ठांहृदिश्रेषामसुष्टुतिंसुहव्यां॥ ॥यज्ञिया
नांयज्ञार्हाणांदेवानांमध्येकउदेवःशृणुयात्श्रुतिंकतमोदेवोवंदारुवंदनशीलंस्तोत्रंकतमोदेवोजुषातेसेवातेकस्यहृदिइमांप्रेष्ठांप्रियतरां
देवींद्योतमानांसुहव्यांशोभनोह्वानोपेतांशोभनैर्हविर्भिर्युक्तांअमृतेषुश्रेषामश्लेषयेमआश्रयेमवा। अश्विनावंतरेणकेतेःकोदेवःस्वामीभवेदिति॥
॥अथद्वितीया॥ ॥कोमृळातिकतमआगमिष्ठोदेवानामुकतमःशंभविष्ठः॥ रथंकमाहुर्द्रवदश्वमाशुंयंसूर्यस्यदुहितावृणीत॥ ॥कोमृ
ळातिकोदेवोमृळातिमृळायदस्मान्कतमोदेवःआगमिष्ठआगंतृतमोस्मद्यज्ञंप्रतिदेवानामुदेवानांमध्येकतमोदेवःशंभविष्ठःसुखस्य
भावयितृतमःएवमुक्तगुणविशिष्टःकोभवेत्। अश्विनावंतरेणाभावः। कंरथंद्रवदश्वमाशुमाहुःब्रूते। येरथंसूर्यस्यदुहितासूर्यस्यपुत्री
अवृणीतसमभजत्।तंकंरथं।वर्तमानमाहुः॥ ॥अथतृतीया॥ ॥मक्षूहिष्मागछथईवतोद्यूनिंद्रोनशक्तिंपरितक्म्यायां॥ दिवआजाता राम
दिव्यासुपर्णाकयाशचीनांभवथःशचिष्ठा॥ ॥मक्षूशीघ्रंहिस्मेतिपूरणाईवतोगमनवतःआगामिमोद्यून्दिवसान्तुल्यासंबंधिनःप्र २२४
तिगछथः। इंद्रःशक्तिंनस्वकीयांशक्तिंयथापरितक्म्यायांरात्रावतीतायांप्रदर्शयतीतिशेषः।तुल्योहन्युवःकालेइंद्रोयथागछतितद्वत्
युवागछतमित्यर्थः। दिवोद्युलोकादाजाताआगतौदिव्यौदिविभवौसुपर्णाशोभनगमनौयुवांशचीनांयुष्मत्संबंधिनीकर्मणांशक्तीनांवा

मध्येकयाशच्याशचिष्ठाशक्तिमत्तरौशोभनकर्मवंतौवाभवथः॥ ॥अथचतुर्थी॥ ॥कावांभूदुपमातिःकयानआश्विनागमथो
हूयमाना॥ कोवांमहश्चित्त्यजसोअभीकउरुष्यतंमाध्वीदस्रानऊती॥ ॥वांयुवयोःकाउपमातिःउपसमीपेमातिर्माननंगुणानांपरिछि
त्तिर्यस्यांसास्तुतिःकाभूत्अभवेत्। कयाकृत्याहूयमानौआहूयमानौसंतौनोस्मानागमथःआगछथः।वांयुवयोरभीकेआसन्नेदेशेमहश्चिन्म
हतस्त्यजसःत्यज्यतेपरित्यज्यतेसर्वैरितित्यजःक्रोधस्तस्यसोढाकोभवेत्। हेमाध्वीमधुरसस्योदकस्यस्रष्टारौहेदस्राशत्रूणामुपक्षयित
रौअश्विनौनोस्मानूतीऊत्यारक्षणयाउरुष्यतंरक्षाकर्मैतत्।रक्षतं॥ ॥अथपंचमी॥ ॥उरुवांरथःपरिनक्षतिद्यामायत्समुद्रादभिवर्त
तेवां॥मध्वामाध्वीमधुवांप्रुषायन्यत्सीवांपृक्षोभुरजंतपक्वाः॥ ॥हेअश्विनौवांरथःद्यांद्युलोकस्यपरितःउरुप्रभूतंनक्षति।तद्यस्माद
र्वाक्समुद्रात्समुद्द्रवणसाधनादंतरिक्षाद्वांप्रतिअभिवर्त्तते।आभिमुख्येनगछति।हेमाध्वीउक्तलक्षणौमध्वामधुरेणपयसामधुम
धुरंसोमरसंप्रुषायन्सिंचंत्यध्वर्यवः।यस्मात्सींसर्वतोवांपृक्षःयुवयोःसोमंपक्वाःयवाभुरजंतप्राप्नुवंति।तस्माद्भिवर्त्ततेवामिति॥ ॥अथष
ष्ठी॥ ॥सिंधुर्हवांरसयासिंचदश्वान्घृणावयोरुषासःपरिग्मन्॥ तदूषुवामजिरंचेतियानंयेनपतीभवथःसूर्यायाः॥ ॥वामश्वान्सिंधुः
स्यंदमानोमेघउदकंवारसयारसेनासिंचदसेचयत्।घृणादीप्तावयःपक्षिसदृशावेतारोवाअश्वाअरुषासःआरोचमानाःसंतःपरिपरितः
गमन्गछंति।वांयानंगमनसाधनंप्रसिद्धोरथःअजिरंक्षिप्रनामैतत्।सुष्ठ्वेतिज्ञायते।येनरथेनसूर्यायाःपतीपालकौदारौवादारौभवथः।स
रथोस्त्वितीति॥ ॥अथसप्तमी॥ ॥इहेहयद्वांसमनापपृक्षेसेयमस्मेसुमतिर्वाजरत्ना॥ उरुष्यतंजरितारंयुवंहश्रितःकामोनासत्यायुवद्रिक्॥

ऋ॰सं॰भा॰१ हे अश्विनौ यद्यस्मात् यथ वां सुमत्या इह इह अस्मिन्ने वयज्ञे समानमनस्कौ स दृशाविवेत्यर्थः। तौ वां युवां सुमत्या पप्रक्षितस्तुत्या संयोजयामि
सेयमिदानीं क्रियमाणा सुमतिः। शोभनस्तुतिः अस्मे अस्माकमेव फलवती भवत्विति शेषः। हे वाजरत्नौ रमणीयान्नौ अन्नं वै वाज इति श्रुतेः।
युवं युवां जरितारं गरितारं स्तोतारं मां कृ दक्षतं रक्षतं। हे नासत्य अश्विनौ कामो स्मदीयः युवद्रिक् युवामेव गच्छन् अश्रितः प्राप्नुः॥ ॥ इति तृतीय
स्य सप्तमे एकोनविंशो वर्गः॥ ॥ तं वां रथमिति सप्तर्चं द्वादशं सूक्तं पुरुमीळ्हाजमीळ्हावृषी त्रिष्टुप्छंदः। अश्विना देवता त्रितं वा मि
वा त्यनुक्रांतं प्रातरनुवाके आश्विने शस्त्रे चायोरुक्तो विनियोगः॥ ॥ तत्र प्रथमा॥ ॥ तं वां रथं वयमद्या हुवेम पृथुज्रयमश्विना संगतिं गोः॥ यः सूर्यां व
हति वंधुरायुर्गिर्वाहसं पुरुतमं वसूयुं॥ ॥ हे अश्विनौ युवां युवयोः रथं स्तोतारः। अद्य सुत्याहनि हुवेम। आह्वयाम। कीदृशं तं पृथुज्रयं प्रथि
तवेगं गोः संगतिं संगमयितारं यो रथः सूर्यां वहति धारयति। वंधुरायुः रथे निवासो धारभूतः काष्ठो वंधुरं तद्वान्। तं गिर्वाहसं गिरां स्तुतीनां वो
ढारं पुरुतमं प्रभूततमं वसूयुं वसुमंतं॥ ॥ अथ द्वितीया॥ ॥ युवं श्रियमश्विना देवता तां दिवो नपाता वनथः शचीभिः॥ युवोर्वपुरभि पृक्षः सचं
ते वहंति यत्ककुहासो रथे वां॥ ॥ हे दिवो नपाता आदित्यस्य पुत्रस्थानीयौ द्युलोकस्य वा न पातयितारौ अश्विनौ युवं युवां देवता द्रविभ राम
क्त्यव्यत्ययः समिधे ता प्रसिद्धां श्रियं शचीभिः कर्मभिः शक्तिभिर्वा वनथः संभजेथ॥ यद्वा वनतिर्दानार्थः। युवोः युवयोर्वपुः शरीरं पृक्षो अ २२५
नि सोमलक्षणानि अभिसचंते। यत् यदा रथे तौ हर्वतिककुहासो महांतो अश्वाः युष्मत्स्तु तयो वां युवां रथे वहंति॥ ॥ अथ तृतीया॥ ॥ को वाम
द्या करते रातहव्य ऊतये वा सुतपेयाय वार्कैः॥ ऋतस्य वा वनुषे पूर्व्यायमानो अश्विना ववर्तत्॥ ॥ को यजमानो द्य वां युवयोः करते कुर्यात् ऊ

नानुसिंधूनस्यंदनस्वभावान्नपस्तुताः रिणाः अगमयः॥ ॥ अथाष्टमी॥ ॥ अस्माकमत्र पितरस्त आसन्त्सप्त ऋषयो दौर्गहे बध्यमाने॥
त आयजंत त्रसदस्युमस्या इंद्रं न वृत्रतुरमर्धदेवं॥ ॥ पुरुकुत्सस्य महिषी दौर्गहे बंधनस्थिते। अपितराजकं दृष्ट्वा राष्ट्रं पुत्रस्य लिप्सया। यद्
छया समायातान् सप्तर्षीन् पर्यपूजयत्। ते च प्रीता पुनः प्रोचुः यजेंद्रावरुणौ भृशं। ते इंद्रावरुणौ विशिष्टात् त्रसदस्युमजीजनत्॥ इतिहासमभिमं
जानन्नृषिरुक्तेत्यृचा वदति। अथास्माकमत्रास्मिन्राजनि अदे शोत्य्या पृथिव्यां वा पितरः पालयितारः उत्पादकास्ते आसन्नभवन्। एते सप्तर्षयः अ
सिध्याः दौर्गहे दुर्गहस्य पुत्रे पुरुकुत्से बध्यमाने हस्तपाशे यस्मादस्या अस्य पुरुकुत्सान्यै त्रसदस्युमायजंत पादुरिंद्रावरुणयोरनुग्रहा
त्। कीदृशं तं वृत्रतुरं वृत्रस्य शत्रोर्हंतारमर्धदेवं देवानां मध्ये समीपे वर्तमानं। यद्वा देवानामर्धभूतं इंद्रमिव स्थितं पुत्रं दत्तवंतः यत्सर्वेषा
मिंद्रः प्रति तस्मादिंद्रो देवतानां भूयिष्ठा भाक् मइतितेन्नैरीयकं॥ ॥ अथ नवमी॥ ॥ पुरुकुत्सानी हि वामदाशद्धव्येभिरिंद्रावरुणा नमोभिः॥
अथा राजानं त्रसदस्युमस्या वृत्रहणं ददथुरर्धदेवं॥ ॥ हे इंद्रावरुणौ पुरुकुत्सानी पुरुकुत्सस्य पत्नी ऋषिप्रेरिता वां युवां अदाशि हविष्प्र
यति खलु। हव्येभिः हविर्भिर्नमोभिः स्तुतिभिश्च। अथ राजानं त्रसदस्युं वृत्रहणमर्धदेवमुक्तलक्षणं पुत्रमस्यै अस्य पुरुकुत्सान्यै ददथु
र्दत्तवंताविति॥ ॥ अथ दशमी॥ ॥ राया वयं ससवांसो मदेम हव्येन देवा यवसेन गावः॥ तां धेनुमिंद्रावरुणा युवं नो विश्वाहा धत्तमनपस्फुरं
तीं॥ ॥ राया धनेन मदेम ससवांसः युवां संभजमानाः वयं हव्येन देवा मोदंत यवसेन गावः॥ तां धेनुं प्रीणयित्रीं। हे इंद्रावरुणौ विश्वाहा विश्वस्य हेतोः
युवं युवां नो अस्माकं धत्तं। कीदृशीं अनपस्फुरंतीं अनवहिंसितां यद्वा विश्वाहेत्यस्य सर्वदेत्यर्थः॥ ॥ इति तृतीयस्य सप्तमे द्वादशो वर्गः॥ ॥

सं॰तृती॰भा॰१

स्यत्रिष्टुबंतामिति ह्यनुक्रांतं। प्रातरनुवाकाश्विनशस्त्रयोर्जगतिच्छंदसीदं शस्यं। तथा च सूत्रितं। अबोध्यग्निरेष स्य भानुरिति॥ ॥तत्र प्रथ
मा॥ ॥एष स्य भानुरुदियर्ति युज्यते रथः परिज्मा दिवो अस्य सानवि॥ पृक्षासो अस्मिन्मिथुना अधि त्रयो दृतिस्तुरीयो मधुनो विरप्शते।
॥एष पुरतो दृश्यमानः स्यः सः भानुर्दीप्तिमानादित्यः उदियर्ति ऊर्ध्वं गच्छति पुरस्तात् रथश्च युवयोः संबंधी परिज्मा परितो गंता अस्य दिवो
द्योतमानस्यादित्यस्य सानुनि सानौ समुच्छ्रितप्रदेशे उदियर्तीति विपरिणत इति वा संबंधनीयं। अस्मिन् रथे अधि उपरिमाणा मिथुनाः मि
थुनीभूताः स्त्रयः त्रिविधाः त्रेधा विहितं वा अत्र इदमन्नमशनं पानं स्वाद्यं चेति त्रिस्कृतं। त्रिष्वपि यथार्थं मिथुना द्वाद्वात्मिन्नियपु दृश्यते माता
पिता पुत्रश्च देवतन्मिथुनमिति दृतिस्तुरीयः सद्व्याधारः पदार्थश्चर्ममयो दृतिरित्युच्यते। मधुनः सोमरसस्य संबंधी मधुपूर्णश्चतुर्थ
विरप्शते विविधं राजते॥ ॥अथ द्वितीया॥ ॥उद्वां पृक्षासो मधुमंत ईरते रथा अश्वास उषसो व्युष्टिषु॥ अपोर्णुवंतः स्तम आपरीवृतं स्वा
र्णशुक्रं तन्वंत आरजः॥ ॥पृक्षास्त्रिविधान्नवंतो मधुमंतः सोमरसोपेताः अश्वासो अश्वयुक्ताः वां युवयो रथाः यद्वा मधुमंतः पृक्षा रथाः अ
श्वासो अश्वा उषसो व्युष्टिषु व्युच्छनेषु सत्सु उदीरते उन्मुखं गच्छंति। किं कुर्वंतः परावृतं परितो व्याप्तं तमः आसर्वतः अपोर्णुवंतः अपाकुर्व
तः स्वर्न आदित्य इव शुक्रं दीप्तं तेजः तेजश्च तन्वंतः आकारस्यार्थे सह आरजो अंतरिक्षं शुक्रं दीप्तं तन्वंतः॥ ॥अथ तृतीया॥ ॥मध्वः पिबतं मधु राम
पेभिरासभिरुत प्रियं मधुने युंजाथां रथं॥ आ वर्तनिं मधुना जिन्वथस्पथो दृतिं वहेथे मधुमंतमश्विना॥ ॥मध्वो मधुरं सोमरसं मधुपाः २२६
सोमपानार्हैः आसभिः आस्यैः पिबतं। उतापि च प्रियं रथं मधुने मधुलाभाय युंजाथां अश्वैर्युक्तं कुरुतं। वर्तनिं यजमानगृहं गच्छंतमिति शेषः।

६२

अपो गमनमार्गात्। मधुना जिन्वथः प्रीणयतं। यद्वैकं वाक्यं। यथो वर्तनिमाकाशं जिन्वथः इतिमधुमंतं हे अश्विनौ वयेथे धारयथः॥
॥अथ चतुर्थी॥ ॥हंसासो ये वां मधुमंतो अस्रिधो हिरण्यपर्णा उहुव उषर्बुधः॥ उदप्रुतो मंदिनो मंदिनिस्पृशो मध्वो न मक्षः सवनानि
गच्छथः॥ ॥हंसासो ध्वनिशीघ्रगंतारः मधुमंतः माधुर्यपिताः अस्रिधः अहिंस्याः हिरण्यवर्णाः हितरमणीयवर्णाः उहुवः वोढारः
उषर्बुधः उषसि बुध्यमानाः उदप्रुतः उदकस्य प्लावयितारः मंदिनो हर्षयितारः मंदिनिस्पृशः मंदिनं सोमं स्पृशंतः एवंलक्षणा अश्वाः संति
तैरश्वैर्मध्वो न मधुनि व मक्षो मक्षिकाः सवनान्यस्मदीयानि गच्छतः॥ ॥अथ पंचमी॥ ॥स्वध्वरासो मधुमंतो अग्नय उस्रा जरंते प्रति वस्तोर
श्विना। यन्निक्तहस्तस्तरणिर्विचक्षणः सोमं सुषाव मधुमंतमद्रिभिः॥ ॥स्वध्वरासः शोभनयागसाधनाः मधुमंतो होतव्यासोमवंतः अग्न
यो गार्हपत्यादयः उस्रा सदनि वसंतो अश्विनौ प्रति वस्तोरहरहमुषःकाले जरंते स्तुवंति यद्यदा निक्तहस्तः सम्यक् शोधितहस्तः
तरणिः कर्मणस्तारयिता विचक्षणो विविधं द्रष्टाध्वर्युः सोमं मधुमंतमद्रिभिः ग्रावभिः सुषाव अभिषुतवान् तदानीमग्नयः स्तुवंतीति तस्मादागच्छत
मित्यर्थः॥ ॥अथ षष्ठी॥ ॥आकेनिपासो अहभिर्दविध्वतः स्वर्ण शुक्रं तन्वंत आरजः॥ सूरश्चिदश्वान्युयुजान ईयते विश्वाँ अनु स्वधया चेतथ
स्पथः॥ ॥आकेनिपासः अंतिके निपातंतीत्याकेनिपाः रश्मयः ते वा हभिः अहोभिर्दविध्वतः कंपयंतो वातमांसि स्वरादित्य इव दीप्तं रजः आ
तन्वंतो भवंत्यनोरश्वाः। सूरश्चित्सूर्यश्चाश्वान्युयुजानो योजयन्नीयते गच्छति हे अश्विनौ युवां विश्वान्पथः आगमनमार्गाननुक्रमेण स्वध
या अन्नेन सोमलक्षणेन चेतथः अश्वनपथः प्रज्ञापयथः॥ ॥अथ सप्तमी॥ ॥प्र वामवोचमश्विना धियंधा रथः स्वश्वो अजरो यो अस्ति। येन सद्यः

तृ·सं·भा·१

वृषिराजोसियाथो हविष्मंतं तरणिं भोजमच्छ॥ ॥धियंधाः कर्मणां धारको हे हे अश्विनावां प्रवोचं प्रब्रवीमि स्तौमि स्वश्वः अजरः अजीर्णो
नित्यभूतनो अजरयिता वा रथो यो स्ति। येन रथेन सद्यस्तदानीमेव रजोसि लोकान् परियाथः तेन रथेन हविष्मंतं सोमादिहर्युक्तं तरणिंता
रकं शीघ्रगामिनं भोजं भोजयितारमस्मद्यागं अच्छाभिमुखं आगच्छतमिति शेषः॥ ॥इति तृतीयस्य सप्तमे एकविंशो वर्गः॥ ॥इति सायणा
चार्यविरचिते माधवीये वेदार्थप्रकाशे दाशतय्यां वामदेवे चतुर्थमंडले चतुर्थोनुवाकः॥ ॥पंचमेनुवाके त्रयोदश सूक्तानि। तत्राग्रं पिबेति
सप्तर्चं प्रथमं सूक्तं वामदेवस्यार्षं गायत्रं अंत्यस्तृचमिंद्रवायुदेवताकं। आद्याः केवलवायव्याः। तथा चानुक्रांतं। अग्रं वायव्याद्यैंद्रवायवं तु गा
यत्रमिति सूक्तविनियोगो लैंगिकः॥ अच्छेद्रेषी इंद्रवायवग्रहस्य याज्या। तथा च सूत्रितं। अग्रं पिबा मधूनामिति याज्या अनवानमिति॥ ॥तत्र
प्रथमा॥ ॥अग्रं पिबा मधूनां सुतं वायो दिविष्टिषु। त्वं हि पूर्वपा असि॥ ॥हे वायो त्वमग्रं इंद्रादिभ्यः पूर्वं मधूनां मधुररसानां सोमानां संबं
धिनं सुतमभिषुतं रसं पिब। कुत्रेति तदुच्यते। दिविष्टिषु दिवेषु स्वर्गस्य प्रापकेषु यज्ञेषु यद्वास्माकं दिवः स्वर्गस्य एषणेषु निमित्तेषु त्वं हि त्वं ख
लु पूर्वपा असि हि शब्दो देवेषु पूर्वपेयमित्यादिमंत्रांतरप्रसिद्धिद्योतनार्थः वायो रग्रपानं लब्धवान्॥ ॥अथ द्वितीया॥ ॥शतेना नो अभिष्टि
भिर्नियुत्वाँ इंद्रसारथिः॥ वायो सुतस्य तृंपतं॥ ॥हे वायो नियुत्वान् नियुद्भिः संहितान् इंद्रस्य रथी इंद्रसहायः सन् त्वं शतेनापरिमितेरभिष्टि
भिरभिलषणीयैः कामैर्निमित्तभूतैरागच्छेदिति शेषः। आगत्य च सुतस्य सुतमभिषुतं सोमं तृंपतं पिबतं। त्वमिंद्रश्च इंद्रस्य साहित्यं ब्रा
ह्मण इवोक्तं। न तुरीयभागिंद्रो भवति भाग्वायुरिति तुरीयहैव संग्रहीतारो वदंते मुनेवानूकाशेन यदद इंद्रः सारथिरिव भूत्वोदजयत इति

राम
२२७

६३

तिनाकं॥ भक्तिः रातहव्यो दत्तसोमः उत ये वा रक्षणाय च वा सुते पेयाय सोमपयानाय वा अत्तस्योदकस्य यज्ञस्य वा पूर्व्याय पुराणाय वसुषे सं
भजनाय हे अश्विना नमो यमानः नमस्कारं कुर्वाणः कः आववर्तति आवर्तयति यजंप्रति॥ ॥अथ चतुर्थी॥ ॥हिरण्ययेन पुरुभू रथेनेमं
यज्ञं नासत्योपयातं॥ पिबाथ इन्मधुनः सोम्यस्य दधथो रत्नं विधते जनाय॥ ॥हे पुरुभू बहु भवंतौ नासत्यौ इमं यज्ञं हिरण्ययेन रथेनोपया
तं सोमस्य सोमसंबंधिनो मधुनो मधुरस्य कर्मण्याद्यो सोमरसं पिबाथः विदधते परिचरते जनाय यजमानाय रत्नं रमणीयं धनं दधाथ। धार
यथः दधते र्वा नार्थस्य लेटि रूपं॥ ॥अथ पंचमी॥ ॥आ नो यातं दिवो अच्छा पृथिव्या हिरण्ययेन सुवृता रथेन॥ मा वामन्ये नियमंदेवयंतः
संयद्ददे नाभिः पूर्व्या वां॥ ॥नोस्मानच्छाभि प्राप्तुं दिवो द्युलोकात् पृथिव्याः सकाशाद्वा आयातं। केन साधनेन हिरण्ययेन हितरमणीयेन सुवृता
शोभनावर्तनेन रथेन वां युवां अन्ये देवयंतो देवो युवामिच्छमानाः मा नियमन् नियमनं मा कुर्वन् यद्यस्मात् पूर्व्या पूर्वी हविरितरयजमानेभ्यः पू
र्वभाविनी नाभिर्बंधिका स्तुतिः संददे संबध्नाति तस्मादायातं॥ ॥अथ षष्ठी॥ ॥नू नो रयिं पुरुवीरं बृहंतं दस्रा मिमाथामुभयेष्वस्मे॥ नरा यद्वा
मश्विना स्तोममावंसत् सधस्तुतिमाजमीळ्हासो अग्मन्॥ ॥नु क्षिप्रं नोस्माकं रयिं धनं पुरुवीरं बहुपुत्रोपेतं बृहंतं महांतं धनं। हे दस्रौ अ
श्विनौ मिमाथां कुरुतं। उभयेषु पुरुमीळ्हाजमीळ्हेषु अस्मे अस्मासु यद्यदा नरा नेतारः ऋत्विजः पुरुमीळ्हसंबंधिनो वां युवयोः स्तोमं स्तो
त्रं मा अवंसन् गमन्नु प्राप्ताः तथा सधस्तुति सह स्तुति आजमीळ्हेसो अजमीळ्हसंबंधिनो पितैः सहाग्मन्। इति हेहे तिगतं॥ ॥इति तृतीयस्य सप्त
मे विंशो वर्गः॥ ॥एष स्य भानुरिति सप्तर्चं त्रयोदशं सूक्तं आदितः षट् जगत्यः सप्तमी त्रिष्टुप् मंडलद्रष्टा वामदेव ऋषिः अश्विनौ देवता एष

ऋ·सं·भाष्य १

मा॥ ॥वायो शुक्रो अयामि ते मध्वो अग्रं दिविष्टिषु। आ याहि सोमपीतये स्पार्हो देव नियुत्वता॥ ॥हे वायो तुभ्यं शुक्रो व्रतचर्यादिना दी
प्तो हं मध्वः मधुरं सोमरसं कर्मणि षष्ठी। अग्रं इतरेभ्यः पूर्वं अयामि। आययामि। अयतिरंतर्भावितण्यर्थः। किमर्थं दिविष्टिषु। दिवो द्युलो
कस्येष्टकरणेषु सत्सु हे देव वायो स्पार्हः स्पृहणीयस्त्वं नियुत्वता नियुधाख्यः प्रतिनियतोश्वस्तेन साधनेन आ याहि। सोमपीतये सोमपानाय। इंद्रश्चेत्यादि
स्त्वो दशरात्रे चतुर्थेहनि। ऐंद्रवायवाद्वितीयः सूचितं च। इंद्रश्च वायवेषां सोमानामाचिकितान सूक्ते तु इति॥ ॥तत्र प्रथमा सूक्ते द्विती
या॥ ॥इंद्रश्च वायवेषां सोमानां पीतिमर्हथः। युवां हि यंतींदवो निम्नमापो न सध्र्यक्॥ ॥हे वायो त्वमिंद्रश्चैषां गृहीतानां सोमानां पीतिं पा
नेर्हथः। युवां खलु इंदवः सोमा यंति प्राप्नुवंति। निम्नं अवनतप्रदेशं आपो न सध्र्यक् उदकानि यथा सह गच्छंति तद्वत् सर्वे सोमा युवां हि यं
ति॥ ॥अथ तृतीया॥ ॥वायविंद्रश्च शुष्मिणा सरथं शवसस्पती॥ नियुत्वंता न ऊतय आ यातं सोमपीतये॥ ॥हे वायो त्वमिंद्रश्च हे शवस
स्पती बलस्य पती शुष्मिबलवंतौ नियुत्वंता नियुत्वंतौ अश्ववंतौ युवां सरथं समानमेव रथमारुह्येति शेषः। नः ऊतये रक्षणाय सोमपीतये
सोमपानाय आयातमागच्छतं। यद्वा सरथमधितिष्ठतं आरुह्य आयातमिति वा वाक्यद्वयं॥ ॥अथ चतुर्थी॥ ॥या वां संति पुरुस्पृहो नियु
तो दाशुषे नरा॥ अस्मे ता यज्ञवाहसेंद्रवायू नि यच्छतं॥ ॥हे नरौ नेतारौ हे यज्ञवाहसा यज्ञवाहकाविंद्रवायू याः पुरुस्पृहो बहुभिः स्पृहणी
याः नियुतः संति ता अस्मे अस्मभ्यं दाशुषे हविर्दत्तवते यजमानाय मदर्थं ता नियुतो नियच्छतं॥ ॥इति तृतीयस्य सप्तमे त्रयोविंशो वर्गः॥ ॥
विहि होत्रा इति पंचर्चं तृतीयं सूक्तं वामदेव्यं वायव्यं। अनुक्रमणिका। विहि पंच वायव्यमिति। सूक्तविनियोगो लैंगिकः। अथ दशरात्रे

राम
२४८

चतुर्थेहनि प्रउगशस्त्रे वायव्यतृचस्य द्वितीया। तथा च सूचितं। विहि होत्रा अवीता वायो शतं हरीणामिति॥ ॥सैषा सूक्ते प्रथमा॥ ॥वि
हि होत्रा अवीता विपो न रायो अर्यः॥ वायवा चंद्रेण रथेन याहि सुतस्य पीतये॥ ॥हे वायो विहि वीहि भक्षय होत्राः होमसाधिकाः सोमा
हुतीरवीता अन्यैः पूर्वमभक्षिताः विपो न शत्रूणां वेपयिता राजेव किं चार्यस्त्वं तु मम रायो धनानि संपादयेति शेषः। हे वायो चंद्रेण ह्लादके
न रथेन याहि सुतस्य पीतये पानाय॥ ॥अथ द्वितीया॥ ॥निर्युवाणो अशस्तीर्नियुत्वाँ इंद्रसारथिः॥ वायवा चंद्रेण रथेन याहि सुतस्य पी
तये॥ ॥हे वायो त्वमशस्तीः अभिशस्तीः निर्युवाणः निःशेषेण नियोजयन् नियुत्वान् नियुत्संज्ञकाश्ववान् इंद्रसारथिः इंद्रसहायः सन्नाया
हि॥ ॥अथ तृतीया॥ ॥अनु कृष्णे वसुधिती येमाते विश्वपेशसा॥ वायवा चंद्रेण रथेन याहि सुतस्य पीतये॥ ॥कृष्णे कृष्णवर्णे वसुधिता
वसूनां धात्र्यौ विश्वपेशसा विश्वरूपे द्यावापृथिव्यौ मनु येमाते अनुगच्छतः॥ ॥अथ चतुर्थी॥ ॥वहंतु त्वा मनोयुजो युक्तासो नवतीर्नव॥ वा
यवा चंद्रेण रथेन याहि सुतस्य पीतये॥ ॥हे वायो ते त्वां मनोयुजो मनःसमानगतयो युक्ताः सः परस्परसंयुक्ताः भवंति नवनवोत्तरन
वतिसंख्याका अश्वाः वहंतु धारयंतु॥ ॥अथ पंचमी॥ ॥वायो शतं हरीणां युवस्व पोष्याणां॥ उत वा ते सहस्रिणो रथ आ यातु पाजसा॥
॥ ॥वायो शतमिति पंचमी पूर्वोक्त एव तृचे तृतीया सूत्रं पूर्वमेवोक्तं। तत्राह [illegible]॥ वायो शतमिति। हे वायो त्वं पोषणां पोषणीयानां हरीणां श
तं युवस्व यज्ञं रथे उत वा ते सहस्रिणः सहस्रसंख्यापूरका अश्वाः तैर्युक्तो रथः पाजसा बलेन यातु आगच्छतु॥ ॥इति तृतीयस्य सप्तमे चतु
र्विंशो वर्गः॥ ॥इदं वामास्य इति षळृचं चतुर्थं सूक्तं विनियोगो लैंगिकः॥ ॥तत्र प्रथमा॥ ॥इदं वामास्ये हविः प्रियमिंद्राबृहस्पती॥ उ

ऋ·सं·भा·७

स्थं मदश्च शस्यते॥ ॥ हे इंद्राबृहस्पती वामास्ये इदं प्रियं हविः सोमरूपं प्रक्षिपामीति शेषः। उक्थं शस्त्रं च मदो मदजनकं शस्यते॥ ॥ अथ
द्वितीया॥ ॥ अयं वां परिषिच्यते सोम इंद्राबृहस्पती॥ चारुर्मदाय पीतये॥ ॥ हे इंद्राबृहस्पती वामास्ये सोमः अयं सोमः परिषिच्यते परितो
दीयते मदाय हर्षाय पीतये पानाय च। ऐंद्राबार्हस्पत्यायामिष्टौ प्रधानस्यानु इंद्रेति तृतीयानुवाक्या उत्तराया याज्या सूत्रितं च। आ न इंद्रा
बृहस्पती अस्मे इंद्राबृहस्पती इति॥ ॥ सेषा सूक्ते तृतीया॥ ॥ आ न इंद्राबृहस्पती गृहमिंद्रश्च गच्छतं॥ सोमपा सोमपीतये॥ ॥ हे इंद्र बृहस्प
ती अथ विविच्योच्यते हे बृहस्पते। त्वं च इंद्रश्च सोमपौ सोमपौ युवां सोमपीतये सोमपानाय गृहमस्मदीयं यागसंबंधिनं आगच्छतं॥ ॥ अथ च
तुर्थी॥ ॥ अस्मे इंद्राबृहस्पती रयिं धत्तं शतग्विनं॥ अश्वावंतं सहस्रिणं॥ ॥ अस्या विनियोगः पूर्वमंत्रेण सहोक्तः। हे इंद्राबृहस्पती अस्मे
अस्मभ्यं रयिं धनं दत्तं। कीदृशं रयिं शतग्विनं शतसंख्याकाभिर्गोभिर्युक्तं। अश्वावंतं अश्ववंतं सहस्रिणं सहस्रसंख्यायुक्तं॥ ॥ अथ पंच
मी॥ ॥ इंद्राबृहस्पती वयं सुते गीर्भिर्हवामहे॥ अस्य सोमस्य पीतये॥ ॥ सुते सोमे अभिषुतेभिः स्तुतिभिः शिष्टं गतं॥ ॥ अथ षष्ठी॥ ॥ सोममि
द्राबृहस्पती पिबतं दाशुषो गृहे॥ मादयेथां तदोकसा॥ ॥ हे इंद्राबृहस्पती वां दाशुषे हविर्दातुर्यजमानस्य तदोकसा तदेवयजमानगृहं उ राम
को निवासस्थानं ययोस्तौ तादृशौ संतौ सोमं पिबतं। पीत्वा च मादयेथामिति॥ ॥ इति तृतीयस्य सप्तमे पंचविंशो वर्गः॥ ॥ यस्तस्तंभेत्येकादशर्चं ३२१
पंचमं सूक्तं वामदेवस्यार्षं त्रिष्टुभं दशमी जगती दशम्येकादश्यावैंद्राबृहस्पतिदेवताके शिष्टा नव बार्हस्पत्यः। अत्रानुक्रमणिका। यस्तस्तं
भेकादश बार्हस्पत्यमंत्येऽलं द्यावोपांत्या जगती। आभिप्लविके पृष्ठ्ये च तृतीयसवने ब्राह्मणाच्छंसिनः सामतृचादिदं सूक्तमावापार्थं। तथा

६५

वा॥ ॥ अथ तृतीया॥ ॥ आ वां सहस्रं हरय इंद्रवायू अभि प्रयः॥ वहंतु सोमपीतये॥ ॥ हे इंद्रवायू वां युवां सहस्रं हरयः सहस्रसंख्याका
अश्वाः प्रयोन्नं प्रति त्वरयंतः संति। अत्र हरिशब्दो अश्वसामान्यवचनः। ते सोमपीतये आवहंतु॥ ॥ अथ चतुर्थी॥ ॥ रथं हिरण्यवंधुरमिंद्रवायू स्व
ध्वरं॥ आ हि स्थाथो दिविस्पृशं॥ ॥ हे इंद्रवायू हिरण्यवंधुरं हिरण्मयनिवासाधारकाष्ठोपेतं दिविस्पृशं द्युलोकस्पर्शिनं स्वध्वरं शोभनाध्व
रवंतं रथं आस्थाथो हि स्थः खलु। यस्मादेवं तस्मादागच्छतमित्यर्थः। स्वध्वरं प्रत्यास्थाथ इति वाख्यायेयं। रथेन पृथ्व्यादिकस्तृचो दशरात्रे
पंचमेहनि प्रउगशस्त्रे ऐंद्रवायवस्तृतीयः। सूत्रितं च। रथेन पृथुपाजसा बहवः सूर चक्षस इति॥ ॥ सेषा तृचे प्रथमा सूक्ते पंचमी॥ ॥ र
थेन पृथुपाजसा दाश्वांसमुपगच्छतं॥ इंद्रवायू इहागतं॥ ॥ हे इंद्रवायू पृथुपाजसा प्रभूतबलेन दाश्वांसं दातारं यजमानमुपगच्छतं। तद
र्थमिहास्मिन्यज्ञे आगच्छतं॥ ॥ अथ षष्ठी॥ ॥ इंद्रवायू अयं सुतस्तं देवेभिः सजोषसा॥ पिबतं दाशुषो गृहे॥ ॥ इंद्रवायू अयं सोमः सुतोभिषु
तः तं सोमं देवेभिर्देवैः सजोषसा समानप्रीतौ दाशुषो हविर्दातुर्गृहे यागशालायां पिबतं॥ ॥ अथ सप्तमी॥ ॥ इह प्रयाणमस्तु वामिंद्रवायू
विमोचनं॥ इह वां सोमपीतये॥ ॥ हे इंद्रवायू वां युवयोः इहास्मिन्यज्ञे प्रयाणं गमनमस्तु। इहास्मिन्नेव यज्ञे वां सोमपीतये विमोचनमश्वा
नामस्तु। पर्यवसानतः एकार्थी त्वथादरार्थत्वादविरोधः॥ ॥ इति तृतीयस्य सप्तमे द्वाविंशो वर्गः॥ ॥ वायो शुक्र इति चतुर्ऋचं द्विती
यं सूक्तं आनुष्टुभं वामदेवस्यार्षं ऐंद्रवायव्याद्या केवलवायव्या। अत्रानुक्रमणिका। वायो चतुष्कमानुष्टुभमाद्या वायव्येति। सूक्तविनियो
गो लैंगिकः॥ आद्य दशरात्रे चतुर्थेहनि प्रउगशस्त्रे वायव्यतृचे प्रथमा। वायो शुक्रो अयामि त इति होत्रा अवीता इति सूत्रितं॥ ॥ तत्र प्रथ

मोविवासयंतामघोनीर्धनवत्यः उषसो भोजान्भोजयितॄन्यजमानान्तेषां राधो देयाय सोमादि धनदानाय चितयंत प्रज्ञापयंति। अचि
त्रे अचायनीये तमसो तिमध्ये अत्यंतगाढांधकार इत्यर्थः। तत्र पणयो वणिज इव दातारो बुध्यमानाः ससंतु स्वपंतु॥ (१) अथ चतुर्थी॥ कुवित्स
देवीः सनयो नवो वा यामो बभूयादुषसो वो अद्य। येना नवग्वे अंगिरे दशग्वे सप्तास्ये रेवती रेवदूष॥ हे देवीर्द्योतमाना उषसो वो युष्माकं सनयः
पुराणो नवो वा यामो गमनसाधनः रथो अद्यास्मिन्यागदिने कुवित् बहुवारं बभूयात् भवेत् गच्छेदित्यर्थः। येन रथेन हे रेवती धनवत्यो यूयं नव
ग्वे दशग्वे सप्तास्ये सप्तछंदो युक्तमुखे अंगिरे अंगिरोगणे त्येहेत तत्रयेष्यंगिरसः तेषां गणे नवग्वा दशग्वाः। अंगिरसस्तम इति बहुत्वं
द्रष्टव्यं भवति तथा ऊषविभातं ऋतवत्यः वेसेयुष्ठ नकर्मणो लिरामध्यमव कुव चनस्येदं रूपं॥ अथ पंचमी॥ यूयं हि देवीर्ऋतयुग्भिरश्वैः
परिप्रयाथ भुवनानि सद्यः। प्रबोधयंतीरुषसः ससंतं द्विपाच्चतुष्पाच्चरथाय जीवं॥ हे देवीर्द्योतमाना उषसो यूयं हि खलु ऋतयुग्भिर्य
ज्ञगामिभिरश्वै भुवनानि सद्यः परिप्रयाथ परितः प्रकृष्टं गच्छथ। किं कुर्वत्यः ससंतं स्वयंतं द्विपाच्चतुष्पान्मनुष्यगवादिलक्षणं जीवं च
रथाय चरणाय गमनादि व्यवहाराय प्रबोधयंतीः प्रबोधयंत्यः सत्यः परिप्रयाथ॥ इति तृतीयस्याष्टमे प्रथमो वर्गः॥ अथ षष्ठी॥
क्व स्विदासां कतमा पुराणी यया विधाना विदधुर्ऋभूणां। शुभं यच्छुभ्रा उषसश्चरंति न विज्ञायंते सदृशीरजुर्याः॥ आसां उषसां मध्ये क्व
स्विद् भूदद्य कतमा पुराणी पुरातनी यया ऋभूणां सेधाति निधानाचमसादि निर्माणानि विदधुरकुर्वन्नृभवः यतया श्चोषसः शुभ्राः दी
प्ताः शुभं चरंति शोभां दीप्तिं कुर्वंति भाः अजुर्याः अजीर्णा नित्यनूतना विज्ञायंते यथा सदृशीः सदृश्यः सर्वेष्वपि दिवासपेक रूपाः अतो द्यत

६८

राम
२३२

न्यएना एताः पुराण्य इति न ज्ञायंते उषासदृश्यं सदृशी इरिदुश्च इत्यत्र प्रतिपादितं॥ अथ सप्तमी॥ ता घा ता भद्रा उषसः पुरासुरभिष्टि
द्युम्ना ऋतजातसत्याः॥ यास्वीजानः शशमान उक्थैः स्तुवंछंसं द्रविणं सद्य आप॥ ता घ इति प्रसिद्धोताः स्वरूपकारिण्य ताभद्राः क
ल्याण्याः स्तुत्या वा उषसः पुरा पूर्वमासुरभवन् अभिष्टिद्युम्नाः अभिगमनमात्रेण द्युम्नं यासां ताः ऋतजातसत्याः ऋतार्थं यज्ञार्थं जाता
श्च ताः सत्याः सत्यफलाश्च ताः दृश्यः यासूषस्सु ईजानो यागं कुर्वाणः उक्थैः शस्त्रैः शशमानः शंसमानः स्तुवन्सामभिः स्तोत्रं तिष्ठादयन्
शंसन् शस्त्राणि कुर्वन्द्रविणं धनं सद्य आप प्राप्नोति ता भद्रा इति संबंधः॥ अथाष्टमी॥ ता आ चरंति समना पुरस्तात्समानतः समना प
प्रथानाः॥ ऋतस्य देवीः सदसो बुधाना गवां न सर्गा उषसो जरंते॥ ता उषसः आसर्वतश्चरंति। समानाः पुरस्तात्पूर्वस्यां दिशि समानाद्दे
शाद्दंतरिक्षात् समना पप्रथानाः प्रथमानाः ऋतस्य यज्ञस्य सदसः सदः तत्र त्यम्ऋत्विग्व शादिकमित्यर्थः। बुधानाः बोधयन्त्यः अंतर्भा
वितण्यर्थो यो बुधिं महानुभावा उषसः जरंते स्तूयंते गवां सर्गा न उदकानां सृष्टय इव भावो सर्वान् रमय इति हे ऋतेता यथा सर्वत्र प्रसं
गादुपकारत्वात्स्तूयंते तद्वत्॥ अथ नवमी॥ ता इन्न्वे३व समना समानीरमीतवर्णा उषसश्चरंति॥ गूहंतीरभ्वमसितं रुशद्भिः शुक्रा
स्तनूभिः शुचयो रुचानाः॥ ता एवोषसः इदिति पूरणः नु अद्य असमना समान एकधेत्यर्थः। समानी एकरूपाः अमीतवर्णाः अपरि
मितवर्णा वा उषसश्चरंति सर्वतः किं कुर्वत्यः अभ्वं महन्नामैतत् अतिमहअसत कृष्णं रूपं गूहंतीः गोपयंत्यः रुशद्भिः रोचमानैः तनूभिः
स्वशरीरैः शुक्राः दीप्ताः शुचयः शुद्धाः रुचानाः रोचमानाः रोचयंत्यो वा॥ अथ दशमी॥ रयिं दिवो दुहितरो विभातीः प्रजावंतं यच्छतास्मा

ऋ॰सं॰भा॰८ सुदेवीः॥ स्योना दावः प्रतिबुध्यमानाः सुवीर्यस्य पतयः स्याम॥ ॥ हे दिवो दुहितः द्योतमानस्यादित्यस्य दुहितृस्थानीयाः विभातीः विभात्यः
विशेषेण भानं कुर्वत्यः अस्मासु प्रजावंतं रयिं पुत्रोपेतं धनं यच्छत दत्त। हे देवीदेव्यः स्योनात् सुखात् निमित्तभूतात् वो युष्मान् प्रति
बुध्यमानाः प्रतिबोधयंतो वयं सुवीर्यस्य पतयः स्याम पुत्रादिसहितस्य धनस्य पालको भवेम॥ ॥ अथैकादशी॥ ॥ तद्वो दिवो दुहितरो
विभातीरुप ब्रुव उषसो यज्ञकेतुः॥ वयं स्याम यशसो जनेषु तद्द्यौश्च धत्तां पृथिवी च देवी॥ ॥ युष्टायां जपेत्॥ हे दिवो दुहितरः हे उषसः
विभातीः वो युष्मान् तत् उत्तरार्धे प्रथमपादेन वक्ष्यमाणं फलं यज्ञकेतुः यज्ञस्य केतुः प्रज्ञापकोऽयं स्यतादृशोऽहं उप ब्रुवे धत्त्री धारयंते॥ ॥
इति तृतीयस्याष्टमे द्वितीयो वर्गः॥ ॥ प्रति ष्या सप्तर्चं सप्तमं सूक्तं गायत्रमुषोदेवताकं प्रति ष्या सप्त गायत्रमित्यनुक्रमणिका॥ प्रातरनुवा
क उषस्ये क्रतौ गायत्रे छंदस्याश्विन शस्त्रे चेदं शस्यां रथो स्यः प्रति ष्या सूनरीति हि सूत्रितं॥ ॥ तत्र प्रथमा॥ ॥ प्रति ष्या सूनरी जनी व्यु
च्छंती परि स्वसुः॥ दिवो अदर्शि दुहिता॥ ॥ स्या सा सा स्तूयमाना सूनरी सुष्ठु प्राणिनां नेत्री जनी जनयित्री फलानां स्वसुः स्वसृस्थानीय
योरात्रेः परि उपरि भागरात्रिपर्यवसानकाले व्युच्छंती तमो विवासयंती स्वसा स्वस्रे ज्यायस्याभित्युक्तेः दिवो द्योतमानस्यादित्यस्य दुहि राम
तोषाः प्रत्यदर्शि प्रतिदृश्यते सर्वैः॥ ॥ अथ द्वितीया॥ ॥ अश्वेव चित्रारुषी माता गवामृतावरी॥ सखाभूदश्विनोरुषाः॥ ॥ अश्वेव चित्रा चा २३२
यनीया अरुषी रोचमाना गवां रश्मीनां माता निर्मात्री ऋतावरी यज्ञवत्युषाः अश्विनोः सखा समानख्याना सह स्तूयमाना भूत् भव
ति अश्विनोरुषा उषसः सह स्तूयमानत्वात् सखित्वं परस्परं॥ ॥ अथ तृतीया॥ ॥ उत सखास्यश्विनोरुत माता गवामसि॥ उतोषो वस्व

६९

॥ श्रीशिवादिगुरवे नमः॥ ॥ यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्॥ निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं॥ ॥ अथाष्टमव्याख्यानमार
भते॥ इदमु त्यदिति एकादशर्चं षष्ठं सूक्तं वामदेवस्यार्षं त्रैष्टुभमुषोदेवताकं। इदमु पंचोनेत्यनुक्रांतं। प्रातरनुवाके उषस्ये क्रतौ त्रैष्टुभे छंदस्या
श्विन शस्त्र इदं सूक्तं सूत्रितं च। उषो वाजेनेदमु त्यदिति॥ ॥ तत्र प्रथमा॥ ॥ इदमु त्यत्पुरुतमं पुरस्ताज्ज्योतिस्तमसो वयुनावदस्थात्॥ नू
नं दिवो दुहितरो विभातीर्गातुं कृणवन्नुषसो जनाय॥ ॥ इदमु पुरतो दृश्यमानमेदं त्यत् अस्माभिस्तुत्यं सर्वप्रसिद्धं पुरुतमं अत्यंतप्रभूतं
ज्योतिस्तेजो वयुनावत् वेनन्कांति कर्मणः इदं प्रकृष्टकांतिमत् अथवा वयुनमिति प्रज्ञानाम प्रज्ञोमेतं सर्वस्य प्रज्ञापकमित्यर्थः। कीदृक्ते
जः पुरस्तात् पूर्वस्यां दिशि तमसोंधकारस्य दस्थात् उदतिष्ठत् एवं सति नूनं सत्यं दिव आदित्यस्य दुहितरो दुहितृस्थानीया विभाती
र्विभानं कुर्वतीरुषसो जनाय ज्ञानानां गातुं गमनादिव्यापारसामर्थ्यं कृणवन् कुर्वते॥ ॥ अथ द्वितीया॥ ॥ अस्थुरु चित्रा उषसः पुरस्तान्मि
ता इव स्वरवो ध्वरेषु॥ व्यू व्रजस्य तमसो द्वारोच्छंतीरव्रंछुचयः पावकाः॥ चित्राश्चायनीया उषसः पुरस्तात् पूर्वस्यां दिशि अस्थुस्तिष्ठंति व्याप्ता
इत्यर्थः॥ तत्र दृष्टांतः अध्वरेषु मिताः रवाता स्वरवो यूपा इव तेद्यथा देव्याः पुरतो भासते तद्वत्। यद्यापि स्व तु शब्दो यूप छेदयति तत्प्रथमश
कलवाचीयः प्रथमः शकलः परायते स्वरुः कार्य इत्युक्तत्वात् तथाप्यत्र मित शब्दश्रवणात् चषालवंतः स्वरव इत्यादोत द्यादर्शनाद्वा होत्र यू
पवसनः ताः व्रजस्य कारकस्य तमसो द्वारा द्वाराणि व्युच्छंतीः शुचयो दीप्ताः पावकाः शोधिकाः अत्रन्न्या वृण्वन्॥ ॥ अथ तृतीया॥ ॥ उच्छ
ती रद्य चितयंत भोजान् राधोदेयायोषसो मघोनीः॥ अचित्रे अंतः पणयः ससंत्व बुध्यमानास्तमसो विमध्ये॥ ॥ अद्यास्मिन् दिने उच्छंतीस्त

वृणीमहे प्रार्थयामः। असुरस्य असुर्बलं तद्वतः प्रचेतसः प्रकृष्टतमः देवस्येति संबंधः। येन धनेन युक्तः सन् छर्दिर्गृहन्नामैतत् गृहोपल
क्षितं धनं आ तं दाशुषे हविर्दत्तवते यजमानाय त्मना आत्मनैव यच्छति। तच्छर्दिर्महान् देवः सविता अक्तुभिः रात्रिभिः एतदह्नामप्युपल
क्षणं सर्वैर्दिवसैः सर्वेषु दिवसेषु नोऽस्माकं उद्यथात्। उद्यच्छतु करोत्वित्यर्थः। यद्वा छर्दिरिति। तेजो नाम तत्तेजः उद्यच्छत्विति॥ ॥अथ द्वि
तीया॥ ॥दिवो धर्त्ता भुवनस्य प्रजापतिः पिशंगं द्रापिं प्रति मुंचते कविः॥ विचक्षणः प्रथयन्नापृणन्नुर्वजीजनत्सविता सुम्नमुक्थ्यं॥ ॥दिवो
द्युलोकस्य धर्त्ता धारकः न केवलं दिव एव अपितु भुवनस्य कृत्स्नस्यापि लोकस्य धर्त्ता प्रजापतिः प्रजानां प्रकाशवृष्ट्यादिना पालयिता
कविः प्राज्ञो देवः पिशंगं द्रापिः हिरण्मयं कवचं प्रति मुंचते आच्छादयति प्रत्युदत्युदयं विचक्षणः विविधं द्रष्टा स एव देवः प्रथयन् प्रख्या
पयन् तेजः आपृणान् आपूरयन् परितः उरु प्रभूतं सुम्नं सुखं उक्थ्यं श्लाघ्यं अजीजनत् उत्पादयति॥ ॥अथ तृतीया॥ ॥आप्रा रजांसि दि
व्यानि पार्थिवा श्लोकं देवः कृणुते स्वाय धर्मणे॥ प्र बाहू अस्राक्सविता सवीमनि निवेशयन्प्रसुवन्नक्तुभिर्जगत्॥ ॥अयं देवः सविता दिव्या
नि द्युसंबंधीनि पार्थिवा रजांसि लोकान्। तिस्रः पृथिवीस्तिस्रो भूमीर्धारयन् त्रीरुत द्यूनिति हि श्रुतं। आ अप्राः आपूरयति। स्वाभिर्भाभि
र्दैवः स्वीय धर्मणे कर्मणे स्वकीयधारणाय श्लोकं प्रशस्तिं कृणुते करोति। सविता सवीमनि प्रसवे अनुज्ञानं यां निमित्तायां बाहू स्वीयौ प्रास्राक्
सृजति प्रसारयतीत्यर्थः। किं कुर्वन् अक्तुभिः कांतिभिः जगत् विवेशयन् स्वस्वकार्ये स्थापयन् प्रसुवन्। प्रेरयन्। अथवा अक्तुभिरिति रा
त्रिनाम तदुपलक्षितैः सर्वैर्वासरैः सर्वेष्वपि दिनेष्वेव करोतीत्यर्थः॥ ॥अथ चतुर्थी॥ ॥अदाभ्यो भुवनानि प्रचाकशद्व्रतानि देवः सविताभि

रक्षते॥ प्रास्राग्बाहू भुवनस्य प्रजाभ्यो धृतव्रतो महो अज्मस्य राजति॥ ॥सविता देवः अदाभ्यैरन्यैरहिंसितः सन् भुवनानि प्रचाकशत्
दापयन् व्रतानि कर्माणि प्राणिनामभिरक्षते। भुवनस्य लोकस्य प्रजाभ्यस्तत्प्रत्याभ्यो बाहू स्वीयौ प्रास्राक् प्रसारयति स्वस्वकर्मण्यनुजा
नातीत्यर्थः। सर्वव्यापाराणां सूर्याधीनत्वात् सविता वै प्रसवानामीशे इति हि श्रुतिः। धृतव्रतो धृतकर्मा सन् तथा कुर्वन् महो महतः अस्य
स्य जगतो राजति ईश्वरो भवति॥ ॥अथ पंचमी॥ ॥त्रिरंतरिक्षं सविता महित्वना त्री रजांसि परिभूस्त्रीणि रोचना। तिस्रो दिवः पृथिवी
स्तिस्र इन्वति त्रिभिर्व्रतैरभि नो रक्षति त्मना॥ ॥अयं सविता त्रिः त्रिभेदमंतरिक्षं अंतराक्षानं भवति जगदित्यंतरिक्षं परिभूः परिभविता
सन् महित्वेन इन्वति व्याप्नोति। वायुविद्युद्धरणाख्यास्त्रयो लोका अंतरिक्षभेदाः सवायुलोकं सवरुणलोकमित्यादिश्रुतेः। त्रीरजां
सि रंजनात्मकानि त्रीणि क्षित्यंतरिक्षद्युलक्षणान् त्रीन् लोकानिन्वति। पूर्वमंतरिक्षस्यैवावांतरभेद उक्तः इह तु सामान्याकारेणेत्यपु
नरुक्तिः। त्रीणि रोचना रोचनानि रोचमानानामग्निवाय्वादित्यानामुक्तस्थानत्रयरूपाणि चेन्वति। पूर्वमंतरिक्षस्यावांतरभेद उक्तः अथ द्यावापृ
थिव्योरवांतरभेद उच्यते। तिस्रोऽग्नेर्दिवः इंद्रप्रजापतिसत्याख्यान् त्रीन् लोकानिन्वति तथा तिस्रः पृथिवीरिन्वति। क्षित्यवांतरभेदाँल्लोका
निन्वति एवं सर्वत्र व्याप्तो देवः त्रिभिर्व्रतैः कर्मभिः उष्णवर्षहिमाख्यैर्नोऽस्मान् त्मना आत्मनैव स्वीयानुग्रहबुद्ध्यैवाभिरक्षति अभिरक्षतु
परिपालयतु॥ ॥अथ षष्ठी॥ ॥बृहत्सुम्नः प्रसवीता निवेशनो जगतः स्थातुरुभयस्य यो वशी॥ स नो देवः सविता शर्म यच्छत्वस्मे क्षयाय
त्रिवरूथमंहसः॥ ॥यो बृहत्सुम्नः प्रभूतधनः प्रभूतसुखो वा प्रसविता प्रकर्षेणानुज्ञानकर्मणां निवेशनः सर्वैर्गंतव्यः जगतो जंगमस्य स्था

राम
२३४

ऋ·सं·भा·८ — नुः स्थावरस्योभयस्य यो वशी स महान् स सविता देवो नोस्मभ्यं सुखं शर्म यच्छतु कीदृशं शर्म त्रिवरूथं त्रीणि वरूथानि गृहाणि स्थानानि क्षित्या
दीनि यस्य तत्तादृशं अस्मे अस्माकं अंहसः पापक्षयाय भवत्विति शेषः। राजक्रय आगं देव इत्येषानुवचनीया सूत्रितं च। आगं देव ऋतुभि
र्वर्धतु क्षयमेत्यर्धर्च आरदिति॥ ॥सैषा सप्तमी॥ ॥आगं देव ऋतुभिर्वर्धतु क्षयं दधातु नः सविता सुप्रजामिषं॥ स नः क्षपाभिरहभिश्च
जिन्वतु प्रजावंतं रयिमस्मे समिन्वतु॥ ॥देवः सविता ऋतुभिः सह आगन् आगच्छतु। गमेर्लङि रूपं किं च क्षयं गृहं वर्धतु वर्धयतु। नोस्मा
कं सुप्रजां शोभनपुत्रां इषमन्नं दधातु ददातु। स एव नोस्मान् क्षपाभी रात्रिभिः अहभिश्च सर्वेषु दिनेष्वित्यर्थः जिन्वतु प्रीणयतु ध
नानि अस्मे अस्मासु प्रजावंतं रयिं समिन्वतु व्याप्नोतु प्रापयत्वित्यर्थः॥ ॥इति तृतीयस्याष्टमे चतुर्थो वर्गः॥ ॥अभूद्देव इति षळृचं नवमं
सूक्तं वामदेवस्यार्षं सवित्रं अंत्यात्रिष्टुप् शिष्टास्त्रिष्टुबंत परिभाषया जगत्यः। तथानुक्रमणिका। अभूद्देवः षट्त्रिष्टुबंतमिति। अग्निष्टो
मो वैश्वदेवशस्त्रे सावित्री नाविद्धानमिदं। तथा सूत्रं। अभूद्देवस्सकया वदत्राभिश्च स्वभूतेदिति आद्या सावित्रग्रहस्य तथा च सूत्रं। सा
वित्रेण ग्रहेण वरंत्य भूद्देवः सविता वंद्यो नु न इति॥ ॥सैषा सूक्ते प्रथमा॥ ॥अभूद्देवः सविता वंद्यो नु न इदानीमह्न उपवाच्यो नृभिः॥ वि
यो रत्ना भजति मानवेभ्यः श्रेष्ठं नो अत्र द्रविणं यथा दधत्॥ ॥स सविता देवः अभूत् आदुरासीत्। आतानुक्षिप्रमेव नोस्माकं वंद्यो वंदनीयो
भवति। इदानीं यागकाले अह्नस्तृतीयसवने नृभिरस्मदीयैर्होतृभिः उपवाच्यः स्तुत्यो भवति। यो देवो मानवेभ्यो मनोरपत्येभ्यो यजमानेभ्यः
तेषामर्थाय रत्नारमणीयानि धनानि विभजति स देवः श्रेष्ठं प्रशस्यं द्रविणं गवादिलक्षणं धनं नोस्मभ्यं अत्रास्मिन्कर्मणि यथा दधत् द
न

राम
२३५
७१

ईशिषे॥ ॥उतापि वा श्विनोः सखा सखिभूतापि च गवां रश्मीनां माता निर्मात्री तद्धेतुत्वादुषसः। वस्वो धनस्येशिषे ईश्वरो भवसि॥ ॥अथ चतुर्थी॥
॥यावयद्द्वेषसं त्वा चिकित्वित्सूनृतावरि॥ प्रति स्तोमैरभुत्स्महि॥ ॥यवयद्द्वेषसं पृथक्कुर्वन्ति शत्रून् यया तां त्वां चिकित्वित् ज्ञापयंतीं प्रथ
क्कुर्वंती द्वेषांसि च नयंती शत्रोर्हननाय युक्ता हि उषःकाले हि पलायंते तादृशीं। चिकित्वित् ज्ञापयंती त्वां सूनृतावरि सूनृते प्रिया
सूनृत इति दिविस्तोमैः स्तुतिभिः प्रत्यभुत्स्महि प्रतिबोधयामः स्तुम इत्यर्थः॥ ॥अथ पंचमी॥ ॥प्रति भद्रा अदृक्षत गवां सर्गा न रश्मयः॥
ओषा अप्रा उरु ज्रयः॥ ॥भद्राः स्तुत्याः रश्मयः प्रत्यदृक्षत प्रतिदृश्यंते। गवामुदकानां सर्गा वर्षधारा इव हे उषः उरु ज्रयो महत्ते
जः आ अप्राः आपूरयत्॥ ॥अथ षष्ठी॥ ॥आपप्रुषी विभावरि व्यावर्ज्योतिषा तमः॥ उषो अनु स्वधामव॥ ॥हे विभावरि विभावत्युषः त्वं
आपप्रुषी आपूरयंती तेजसा जगत् ज्योतिषा तेजसा तमोंधकारं व्यावः व्यावृणोः। किं च स्वधां हविर्लक्षणं अन्नं अवरक्ष॥ ॥अथ स
प्तमी॥ ॥आ द्यां तनोषि रश्मिभिरांतरिक्षमुरु प्रियं॥ उषः शुक्रेण शोचिषा॥ ॥हे उषो रश्मिभिर्दिवं आतनोषि। उरु विस्तीर्णं प्रियमंतरि
क्षं रश्मिभिरातनोषि शुक्रेण दीप्तेन शोचिषा प्रकाशेन युक्तासत्येवं करोषि॥ ॥इति तृतीयस्याष्टमे तृतीयो वर्गः॥ ॥तद्देवस्येति सप्तर्चमष्ट
मं सूक्तं वामदेवस्यार्षं जागतं सावित्रं तथा चानुक्रम्यते। तद्देवस्य सावित्रं जागतमिति। आभिप्लविके तृतीयेहनि वैश्वदेवशस्त्रे सा नि
विद्धाने। तथा च सूत्रितं। तद्देवस्य घृतेन द्यावापृथिवी इति तिस्र इति॥ ॥तत्र प्रथमा॥ ॥तद्देवस्य सवितुर्वार्यं महद्वृणीमहे असुरस्य प्र
चेतसः॥ छर्दिर्येन दाशुषे यच्छति त्मना तन्नो महाँ उदयान्देवो अक्तुभिः॥ ॥सवितुः प्रेरकस्य देवस्य वार्यं वरणीयं महन्महत्त्वं तद्धनं

वरिमन्त्रा आकारश्चार्थे भूम्या उरुं त्वा च स्तुवति। तथा दिवोच्छुलोकस्य वरिमन्तु उरुत्वे च स्तुवति। अस्य देवस्य तद्दुक्तं कर्म सत्यमबाध्य
मिति॥ ॥ अथ पंचमी॥ ॥ इंद्रज्येष्ठान् बृहद्भ्यः पर्वतेभ्यः क्षयां एभ्यः सुवसि पस्त्यावतः। यथा यथा पतयंतो वियेमिर एवैव तस्थुः सवि
तः सवाय ते॥ ॥ हे सवितः इंद्रज्येष्ठान् इंद्रः परमैश्वर्ययुक्तं स्वयमेवो द्रा वा ज्येष्ठो ज्यायान् प्रज्यो येषां ते तादृशाः तान् अस्मान् बृहद्भ्यो
महद्भ्यः पर्वतेभ्यो ऽप्यधिकान् सुवसि प्रेरयसि। किं च एभ्यो यजमानेभ्यः पस्त्यावतो गृहवतः क्षयान् निवासान् संग्रामान् गरादीन् वसि प्रे
रयसि यथा यथा पतयंतो गच्छंतस्त्वां वियेमिरे वियेमिरे विनियम्य तेत्व यांतेतव सवाय अनुज्ञाये एवैव एवमेव नियमनमनतिक्रम्य तस्थुः
तिष्ठंति॥ ॥ अथ षष्ठी॥ ॥ ये ते त्रिरहं त्सवितः सवासो दिवे दिवे सौभगमासुवंति। इंद्रो द्यावापृथिवी सिंधुरद्भिरादित्यैर्नो अदितिः
शर्म यंसत्॥ ॥ हे त्रिरहन् अमानाः हे सवितास्त्वदर्थे सवासः सवाः समाः द्वितीयार्थे प्रथमा सोमान् यद्वा सवासः सवनानि प्रातरादीनि
प्रति त्रिहरन् अभिषुण्वंति। न वो वलमेकस्मिन् अहनि सवनत्रयेषु अपि तु दिवे दिवे प्रतिदिनं सौभगं सौभाग्यजनकमासुवंति अ
भिषुण्वंति ते भ्यो नोऽस्मभ्यं इंद्रः शर्म यंसन् यच्छतु। द्यावापृथिव्यो व अद्भिर्विशिष्टा सिंधुर्भिनानि देवता च आदित्यैः सहिता दितिश्च राम
शर्म यंसत सात्रे सू क्तं इंद्रादीनां निपात भुक्ता तेषां प्रार्थनान्न विरुध्येते॥ ॥ इति तृतीयस्याष्टमे पंचमो वर्गः॥ ॥ को वस्त्राता इति दशर्चं द २२६
शमं सूक्तं वामदेवस्यार्षं विश्वे देवा देवता कं अद्यस्या द्यास्तिस्रो गायत्र्यः शिष्टा अनादेश परिभाषया त्रिष्टुभः। तथा चानुक्रम्यते॥
को वा दश वैश्वदेवं त्रिगायत्र्यं त्विति विनियोगो लैंगिकः॥ ॥ तत्र प्रथमा॥ ॥ को वस्त्राता वसवः को वरूता द्यावाभूमी अदिते त्रासीथां नः।

महीयसो वरुण मित्र मर्त्यात् को वो ऽध्वरे वरिवो धाति देवाः॥ ॥ हे वसवः सर्वस्य वासयितारो देवाः वो युष्मान् वस्त्राता स्त्रियतो यूयं वसवः
अनद्र इत्यभिप्रायः। वश्च वरूता संवरयिता दुःखानो वरणीयो वा भवति। हे द्यावाभूमी। नोऽस्मान् त्रासीतां रक्षतं हे अदिते अखंडनीये
एतदपि द्यावाभूम्योर्विशेषणं संख्याव्यत्ययः। यदिदं पृथग्दोत्तता मंत्रणं स्यात् तर्हि निघातो न स्यात्। आमंत्रितं पूर्वमविद्यमानव
दिति पूर्वस्याविद्यमानत्वे नास्येव पादादित्वात् अदिते मित्रावरुणोत मृळेत्यादिना रुद्र वसवः सुदानवत तस्येवं विशेषणत्वे समाना
धिकरण इति समानाधिकरण्यात् अग्ने पावक रोचिषेति वत् अस्य निघातः सिध्यति तस्मात् द्यावाभूमी इत्येतस्य विशेषणं हे वरुण
हे मित्र युवां सहीयसो मर्त्यात् अभिभवतु मनुष्यात् त्रासीथां। हे देवा वो युष्माकं अध्वरे यागे को वरिवो धनं धाति ददाति। यद्वा यो वो
युष्माकं मध्ये वो वरिवो धाति धारयति॥ ॥ अथ द्वितीया॥ ॥ प्र ये धामानि पूर्व्याण्यर्चान् वि यदुच्छान् वियोतारो अमूराः। विधातारो वि ते द
धुरजस्रा ऋतधीतयो रुरुचंत दस्माः॥ ॥ ये देवाः पूर्व्याणि पुरातनानि धामानि स्थानानि वा प्रार्चान् अर्चंति प्रयच्छंति स्तोतृभ्यः य
त् ये च वियोतारो दुःखानाम अमिश्रयितारो मूरा अमूढाः उच्छान् व्युच्छंति तमो विवासयंति देवा ते विधातारः फलानां कर्तारं अजस्राः नि
त्याः विदधुः कुर्वंत्यभिमतं। किं च ऋतधीतयः सत्यकर्माणो दस्मदर्शनीयास्ते रुरुचंत रोचंते॥ ॥ अथ तृतीया॥ ॥ आ परस्त्यां मदितिं सिं
धुमर्कैः स्वस्तिमीळे सख्याय देवीं। उभे यथा नो अहनी निपात उषासानक्ता करतामदब्धे॥ ॥ पस्त्यां सर्वैर्गंतव्यां मदि अदीनां नामात
रं ता देवीं सिंधुं स्यंदनशीलां नद्यभिमानि देवीं च स्वस्तिं सुखे नियामेत त्रामिकां देवी सख्याय अकूलि या वर्मी ते रालेस्तौति। उभे अहनी द्या

तृ·सं·भा·८

वापृथिवीनोस्मान्निपातः। हन्तथास्तोमि। उषासानक्ता अहोरात्राभिमानिदेवते अदब्धे अदंभनीये कुरुतं। अभिमतमितिशेषः॥ ॥ अथचतु
र्थी॥ ॥ अर्यमावरुणश्चेति पंथामिषस्पतिः सुवितं गातुमग्निः॥ इंद्राविष्णू नृवदु षुस्तवाना शर्म नो यंतममवद्वरूथं॥ ॥ अर्यमादेवोस्मा
कं पंथां यज्ञादिमार्गं विचेतिज्ञापयति। तथा वरुणोविचेति। इषोन्नस्य हविर्लक्षणस्य पतिः पालकोग्निः सुवितं सुखकरं गातुं गमनमा
र्गं वा स्वर्गादेविचेति। इंद्राविष्णू सुष्टु स्तवाना स्तूयमानौ नृवन्मनुष्यवत मनुष्योपेतं वरूथं वरणीयं। अमवतं बलोपेतं शर्म गृहं सुखं वा
नोस्माकं यंतंगच्छतं॥ ॥ अथपंचमी॥ ॥ आपर्वतस्य मरुतामवांसि देवस्य त्रातुरव्रि भगस्य॥ पात्पतिर्जन्यादंहसोनोमित्रोमित्रिया
दुत न उरुष्येत्॥ ॥ पर्वतस्य अद्देसरवस्येतन्नामकस्य देवस्य मतां च त्रातुः रक्षकस्य भगस्य देवस्य वावोसि रक्षणानि आवृ आवृणे
किं च पतिर्वरुणो देवः जन्यात् जनसंबंधादंहसः पापात् उतापि च मित्रश्च मित्रियात् मित्रभावत उरुष्येत्॥ ॥ इति तृतीयस्याष्टमेष
ष्ठोवर्गः॥६॥ ॥ अथषष्ठी॥ ॥ नूरोदसी अहिना बुध्न्येन स्तुवीत देवी अप्येभिरिष्टैः॥ समुद्रं न संचरणे सनिष्यवो घर्मस्वरसो नद्यो३ अप
व्रन्॥ ॥ हे रोदसी द्यावापृथिव्यौ युवां अहिना बुध्न्येन अहिर्बुध्न्यनामकेन देवेन सह नु क्षिप्रं अप्येभिरापनीयैरिष्टैः कामैर्निमित्तभूतैः राम
स्तुवीत स्तुवे सतिषा। बोधनानांसंभक्तुमिच्छंतः संवरणे संवरणीये समुद्रमध्यगमनाय समुद्रमिव तं यथा स्तुवंति तद्वत्। यस्मादेते देवा २३१
घर्मस्वरवो दीप्तध्वनयो नद्यो रपव्रन् अपवृणीतीतिपरोक्षइव। अयं वा ते देवा नदी रपवृण्वेत्यार्षी। तस्मात् स्तुवा इति संबंधः॥ ॥ अथ
सप्तमी॥ ॥ देवैर्नो देव्यदितिर्नि पातु देवस्त्राता त्रायतामप्रयुच्छन्॥ नहि मित्रस्य वरुणस्य धासिमर्हामसि प्रमियं सान्वग्नेः॥ ॥ अदिति

७२

द्यादित्यर्थः। तथा वंद्य उपवाच्य आभूदिति॥ ॥ अथ द्वितीया॥ ॥ देवेभ्यो हि प्रथमं यज्ञियेभ्योमृतत्वं सुवसि भागमुत्तमं। आदिद्दामानं स
वितर्व्यूर्णुषेनूचीना जीविता मानुषेभ्यः॥ ॥ प्रथमं देवेभ्यो हि हिशब्दः प्रसिद्धौ देवेभ्यो यज्ञियेभ्यो यज्ञार्हेभ्यः अमृतत्वं तत्साधनं उत्तमं
उत्कृष्टतमं भागं सोमादिलक्षणं सुवसि। अनुजानासि। आदित्। अनंतरमेव दामानं हविषां दातारं हे सवितः व्यूर्णुषे। प्रकाशयसि। मा
नुषेभ्यो यजमानेभ्यो जीविता जीवितानि। अनूचीना अनुक्रमयुक्तानि पितृपुत्रपौत्राद्युत्पत्त्यनुक्रमः ईदृशानि जीवितानि पश्चाद्व्यूर्णुषे वा॥ ॥
अथ तृतीया॥ ॥ अचित्तीयच्चकृमा दैव्ये जने दीनैर्दक्षैः प्रभूती पूरुषत्वता॥ देवेषु च सवितर्मानुषेषु च त्वं नो अत्र सुवतादनागसः॥ ॥
हे सवितः वयं अचित्ती अप्रज्ञया दैव्ये जने देवजने यद्दीनैः दुर्बलैः पुत्रादिभिर्बलैर्वा यथा तथा दक्षैः दक्षैः प्रवृद्धैर्वा तैः प्रभूती प्रभूत्या
णश्रयमी दानतिथा व मत् पुरुषत्वता पुरुषवत्तया च यदागश्चकृम। न केवलं त्वाश्यवत्कृतं। अपि तु देवेषु अन्येषु मानुषेषु वाज्ञाविदिभिर्य
दुरुमनः कृत वतोस्मान् त्वमात्रास्मिन्कर्मणि अनागसः सुवतात्। अनुजानीहि। देवेषु चाह विष्णु सवितुः सत्यः प्रसवस्य न प्रमियइति
या ज्या। सत्त्रिर्तं च। न प्रमिये सवितुर्दैव्यस्य तद्यदृहस्यंतः प्रथममिति॥ ॥ सैषा चतुर्थी॥ ॥ न प्रमिये सवितुर्दैव्यस्य तद्यथा विश्वं भुवनं धा
रयिष्यति॥ यत्पृथिव्या वरिमन्ना स्वंगुरिर्वर्ष्मन्दिवः सुवति सत्यमस्य तत्॥ ॥ सवितुर्दैव्यस्य देवस्य तत्कर्म न प्रमिये न प्रमियेत न प्रहिंस्येत।
हिंसार्हं न भवतीत्यर्थः। कृत्यगर्थके प्रत्ययः। यद्वा दैव्यस्येति व्यधिकरणे षष्ठी। सोच कर्मार्थं दिव्यमित्यर्थः। कथमहिंस्यमित्यत आह।
यथा विश्वं भुवनं धारयिष्यति निधायति विश्वधारणरूपं यत्कर्मास्ति तत्र प्रमिये तथा स्वंगुरिः शोभनांगुल्युपलक्षितो हस्तो यस्य पृथिव्याः।

ऋ·सं·भा·८

परिछिंदन् स्थापयन् उक्षा सेक्ता पर्जन्यः पप्रथानेभिः प्रथमानैरेवैर्गमनशीलैः मरुद्भिः मधेर्वांसि हस्रवत् निशाद्वं करोति। हेति पूरणः। तस्मा
दुत्राभवतामिति संबंधः॥ ॥अथ द्वितीया॥ ॥देवी देवेभिर्यजते यजत्रैरमिनती तस्थतुरुक्षमाणे॥ ऋतावरी अद्रुहा देवपुत्रे यज्ञस्य ने
त्री शुचयद्भिरर्कैः॥ ॥देव्यौ यजते यष्टव्यौ अमिनती प्रजा अहिंसत्यौ उक्षमाणे सिंचत्यौ ऋतावरीति ऋतवत्यौ अद्रुहा अद्रोग्ध्यौ द्रा
महत्युर्वी त्यादेवपुत्रे देवौ त्यादिक्यौ यज्ञस्य नेत्री निर्वाहयित्र्यौ द्यावापृथिव्यौ देवेभिर्देवैर्यजत्रैर्यष्टव्यैः सहिते शुचयद्भिः शोचयद्भि
रर्कैर्मंत्रैर्हविर्भिर्वा युक्ते तस्थतुस्तिष्ठतः स्थातामित्यर्थः॥ ॥अथ तृतीया॥ ॥स इत्स्वपा भुवनेष्वास य इमे द्यावापृथिवी जजान॥ उर्वी गभी
रे रजसी सुमेके अवंशे धीरः शच्या समैरत्॥ ॥स इत् स एव स्वपाः शोभनकर्मा सन् भुवनेष्वास आसीत् य इमे द्यावापृथिव्यौ जजानो
त्पादितवान्। यश्च प्रजापतिः उर्वी उर्व्यौ विस्तीर्णे गंभीरे अविचले सुमेके शोभनरूपे अवंशे उत्पत्तिरहिते अनाधारे वांतरिक्षे धीरो
धीमान् शच्या कुशलकर्मणा समैरत् सम्यक् प्रेरितवान् स एव स्वपा इति॥ ॥अथ चतुर्थी॥ ॥नू रोदसी बृहद्भिर्नो वरूथैः पत्नीवद्भिरि
षयंती सजोषाः॥ उरूची विश्वे यजते नि पातं धिया स्याम रथ्यः सदासाः॥ ॥हे रोदसी द्यावापृथिव्यौ नु क्षिप्रं पत्नीवद्भिः पत्नीसहितैः बृ
हद्भिर्महद्भिर्वरूथैर्गृहैर्धनैर्वा सह इषयंती अस्माकमन्नमिच्छंत्यौ सजोषाः परस्परं संगत उरूची उर्वंचते विश्वे व्याप्ते यजते यष्टव्ये
सत्यौ नोऽस्मान् निपातं नितरां रक्षतं। धियेत्यादि गतं प्र वामित्यादि गायत्र्यस्तृचोऽष्टादशरात्रे वैश्वदेवशस्त्रे द्यावापृथिव्यनिविद्धा
नीयत्वेन प्रक्षेप्यः। तथा च सूत्रितं। प्र वां महि द्यवी इति तृचाविति॥ ॥तत्र प्रथमा सूक्ते पंचमी॥ ॥प्र वां महि द्यवी अभ्युपस्तुतिं भरा

राम
२२८

२५

महे॥ शुची उप प्रशस्तये॥ ॥हे द्यावापृथिव्यौ द्यवी द्योतमाने वां युवाभ्यां मुपस्तुतिं स्तोत्रं महि महत् प्रभूतमभि प्र भरामहे प्रकर्षेण संपा
दयामः। शुची शुचौ युवां प्रशस्तये प्रशंसितुं उप उपसर्गश्रुतेरुचितक्रियाध्याहारः। उपगच्छाम इति शेषः॥ ॥अथ षष्ठी॥ ॥पुनाने त
न्वा मिथः स्वेन दक्षेण राजथः॥ ऊह्याथे सनादृतं॥ ॥हे देव्यौ तन्वा स्वकीयया तन्वा मूर्त्या दक्षेण बलेन च मिथः प्रत्येकं पुनाने शोध
यंत्यौ यज्ञं यजमानं वां युवां राजथः। यद्वा तन्वा स्वस्वशरीरेकादेन मिथः परस्परं पुनाने शोधयंत्यौ द्यौः स्वीयेनासारणेन भुवं स्वस्व
कीयेन काष्ठ्येन चंद्रमसि स्थितेन दिवमिति विवेकः। सनात् सदा कालं ऋतं यज्ञमूह्याथे वहथः॥ ॥अथ सप्तमी॥ ॥मही मित्रस्य सा
धथस्तरंती पिप्रती ऋतं॥ परि यज्ञं नि षेदथुः॥ ॥मही महत्यौ द्यावापृथिव्यौ मित्रस्य मित्रभूतस्य स्तोतुरभिमतं साधथः ऋतमन्नं तरंती
तारयंत्यौ पिप्रती सारयंत्यौ यज्ञं परितो निषेदथुः आश्रयतः॥ ॥इति तृतीयस्याष्टमे ऽष्टमो वर्गः॥ ॥क्षेत्रस्य पतिनेत्यष्टर्चं द्वादशं सूक्तं
वामदेवस्यार्षं आद्या चतुर्थी षष्ठी सप्तम्यौ अनुष्टुभः पंचमी पुरउष्णिक् आद्य श्चेत्पुर उष्णिगिति हि तल्लक्षणं। शिष्टास्तिस्रस्त्रिष्टुभः आ
द्यास्तिस्रः क्षेत्रपतिदेवताकाः चतुर्थी शुनाख्यदेवताका पंचम्यष्टम्यौ शुनासीरदेवताके षष्ठी सप्तम्यौ सीतादेवताके। तथा चानुक्रमणि
का। क्षेत्रस्याष्टौ तिस्रः क्षेत्रपत्याः शुनायैका परा पुर उष्णिक् सा त्या च शुनासीरा त्यान्त्ये सीतायै ते अनुष्टुभावाद्य चतुर्थी चेति क्षे
त्रस्य वर्षणे अनेन सूक्तेन प्रत्यृचं जुहुयाज्जयेद्वा। तथा च सूत्रितं। क्षेत्रस्य पतिना वयमिति प्रत्यृचं जुहुयाज्जयेद्वेति आग्निमारुतमहोतु
रतिरिक्तो वक्ष्ये आश्विनशस्त्रादूर्ध्वं चत्वार्यतिरिक्तोक्थानि। तत्राद्या परिधानीया। सूत्रितं च। क्षेत्रस्य पतिना वयमिति परिधानीयेति॥

तृ॰सं॰भा॰८

तत्र प्रथमा॥ क्षेत्रस्य पतिना वयं हितेनेव जयामसि। गामश्वं पोषयित्न्वा स नो मृळातीदृशे॥ वयं यजमानाः क्षेत्रस्य पतिना देवेन रुद्र
क्षेत्रस्य पतिः प्राकृतः के चिदग्निं अथापरे स्वेतं तत्र एव वा कश्चित्क्षेत्रस्य पतिरुच्यते। हितेनेव। इव शब्द एवार्थे। सर्वप्राणिहितेनैवतेन अथ
वा मित्रेणेव वा यथा सखा सख्युः सहाय्ये सन् स्वकार्यं साधयति तद्वत्। जयामसि जयामः। क्षेत्रं स देवो गामश्वं पोषयित्नु पोषयितृ गवाश्वल
क्षणं धनं आहरे त्विति शेषः। उपसर्गश्रुतेर्योग्यक्रियाध्याहारः। स एव देवो नोस्मान् ईदृशे उक्तलक्षणे धनदाने सति मृळाति सुखय
ति। क्षेत्रस्य पतिनेत्यादि निरुक्तं जानीयात्। आशीर्यग्मे त्रावरुणस्यातिरिक्तोक्थ्ये परिधानीया सूत्रितं च। क्षेत्रपते मधुमंतमूर्मिमिति
परिधानीयेति। तत्या वक्त्रैषा द्वितीया॥ क्षेत्रस्य पते मधुमंतमूर्मिं धेनुरिव पयो अस्मासु धुक्ष्व॥ क्षेत्रस्य पते त्वं मधुमंतं माधुर्यो
पेतं ऊर्मिं प्रवृद्धमुदकं धेनुः पय इव सा यथा दुग्धे तथा अस्मासु धुक्ष्व। मधुश्चुतं मधुस्रावि घृतमिव सुपूतमा तादृशमुदकमित्यर्थः। ऋत
स्य यज्ञस्योदकस्य वा पतयः स्वामिनो नोस्मान्मृळयंति सुखयंतु। यद्वा ऋतस्येति तत्कर्मणि षष्ठी। ऋतं मृळयंतु प्रयच्छंतु। मृळतिर्त्र
दानकर्मा। आब्राह्मणाच्छंसिनो तिरिक्तोक्थ्ये परिधानीयैषा। मधुमतीरोषधीर्द्याव आप इति ध्यारिधानीयेति सूत्रितत्वात्॥ सैषा तृतीया॥
मधुमतीरोषधीर्द्याव आपो मधुमन्नो अस्त्वंतरिक्षं॥ क्षेत्रस्य पतिर्मधुमान्नो अस्त्वरिष्यंतो अन्वेनं चरेम॥ ओषधीरोषध्यः व्रीहि
प्रियंग्वाद्यो नोस्मभ्यं मधुमती मधुमत्यो भवंतु। तथा द्यावः तिस्रो दिव इत्युक्तत्वात् बहुवचनयुक्तं। तथा आपः अंतरिक्षं च नो मधुम
द्भवतु। किं च क्षेत्रस्य पतिरपि मधुमान्नो अस्तु। अरिष्यंतो न्यैरहिंस्यंतो वयं एनं क्षेत्रपतिमनु स्तुत्य चरेम मुखेन॥ अथ चतुर्थी॥ शु

मधुश्चुतं घृतमिव सुपूतमृतस्य नः पतयो मृळयंतु।७

राम
२२१

देवी अदीना देवमाना देवैरन्यैर्मित्रादिभिः सह नोस्मान् निपातु पालयतु। तथा पालको देवः इंद्र इत्यर्थः। सोप्यप्रयुच्छन्न प्रमाद्यन् त्रायतां वयं च
मित्रस्य वरुणस्याग्नेश्च सानुसमुच्छ्रितं धाम सिमत्र सोमादिलक्षणं प्रमिर्यहिंसितुं न द्यह मिसि अर्हामः समर्था भवामः किंत्वनुष्ठातेन
संवर्धितुमर्हामेत्यर्थः॥ अथाष्टमी॥ अग्निरीशे वसव्यस्याग्निर्महः सौभगस्य॥ तान्यस्मभ्यं रासते॥ अग्निर्देवो वसव्यस्य धनस
मूहस्येशे ईष्टे दातुं तथाग्निर्महो महतः सौभगस्य सुभगत्वस्यापीशे अतस्तानि धनानि सौभाग्यं वास्मभ्यं रासते ददातु॥ अथ न
वमी॥ उषो मघोन्या वह सूनृते वार्या पुरु॥ अस्मभ्यं वाजिनीवति॥ हे उषः हे मघोनि धनवति हे सूनृते प्रियसत्यरूपवागभिमानि
नि हे वाजिनीवति अन्नवति देवि अस्मभ्यं वार्या वरणीयानि पुरु बहूनि धनानि आवह प्रापय॥ अथ दशमी॥ तत्सु नः सविता
भगो वरुणो मित्रो अर्यमा॥ इंद्रो नो राधसा गमत्॥ येन राधा धनेन सह सविता भगो वरुणो मित्रो अर्यमेंद्रः प्रत्येकमागमदागच्छ
ति। यद्वा। तद्राधो धनं। ते देवा नोस्मभ्यं सुसु प्रयच्छंत्विति शेषः॥ इति तृतीयस्याष्टमे सप्तमो वर्गः॥ मही द्यावापृथिवी इति स
प्तमेकादशं सूक्तं वामदेवस्यार्षं द्यावापृथिव्यं। वित्यनुक्रमणिका। व्यूढे दशरात्रे पंचमेहनि वैश्वदेवशस्त्रे आदित एतत्सूक्तं द्यावापृथि
वीनिविद्धानीयं। तथा च सूत्रितं। मही द्यावापृथिवी च तस्य नः उर्वि स्वेति॥ तत्र प्रथमा॥ मही द्यावापृथिवी इह ज्येष्ठे रुचा भवतां शु
चयद्भिरर्कैः॥ यत्सीं वरिष्ठे बृहती विमिन्वन् रुवद्धोक्षा पप्रथानेभिरेवैः॥ मही महत्यौ ज्येष्ठे प्रशस्ये द्यावापृथिव्यौ उरु वादीह्या युक्ते शु
चयद्भिर्दीपयद्भिरर्कैः मंत्रैः सोमादिहविर्भिर्वा युक्ते भवतां यत् यस्मात्सीं सर्वतो वरिष्ठे उरुतरे बृहती महत्यौ द्यावापृथिव्यौ विमिन्वन्

ऋ॰सं॰भा॰८

दारकं कार्षां । शुनं विकृषंतु शुनं यथा भवति तथा कीनाशाः बलीवर्दरक्षकाः वाहैर्बलीवर्दैरभियंतु शुनं यथा भवति तथा पर्जन्यो मधु
नाम धुरैः पयोभिरुदकैः सिंचतु । हे शुनासीरा इंद्रवायू वा सूर्यादित्यौ वा शुनं सुखमस्मासु धत्तं धारयतं ॥ ॥ इति तृतीयस्याष्टमे नवमो
वर्गः ॥ ॥ समुद्रादूर्मिरित्येकादशर्चं त्रयोदशं सूक्तं अंत्या जगती शिष्टास्त्रिष्टुभः । अग्निः सूर्योऽपो गावो घृतं वा नाम एतन्मोदेवता । अत्रानुक्र
मणिका । समुद्रादूर्मिरेकादशाग्नेयं जगत्यंतं सौर्यं वापं वा गव्यं वा घृतस्तुतिर्वेति । विषुवतीदं सूक्तमाज्यं । तथा च सूत्रं । समुद्रादूर्मिरि
त्याज्यं त्येंसु मेषमिति । व्यूढे दशरात्रे सप्तमेऽहनीदमेव सूक्तमाज्यं सूत्रितं च । अथ छंदोमाः समुद्रादूर्मिरित्याज्यमिति ॥ ॥ तत्र प्रथ
मा ॥ ॥ समुद्रादूर्मिर्मधुमाँ उदारदुपांशुना सममृतत्वमानट् ॥ घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिः ॥ १ ॥ सोमोदं
ते स्मिन् यजमाना इति वा पार्थिवः अथवा समुद्रावत्यायोस्मादिति व्युत्पत्त्या वैद्युतोग्निस्तस्मादूर्मिः ऊर्मिवदुपर्युपर्युत्क्रु नाम धुमा
न्मधुरोपेतफलसमूहः उदारत् उद्गच्छति । अथवा वैद्युताद्भूर्मेस्त्यातकोरस उदारत् उद्गतः । अथ वा समुद्रात्समुद्रवणसा
धनादादित्यादूर्मी रस उदकलक्षण उदारत् । आदित्याज्जायते वृष्टिरिति श्रुतेः । यद्वा समुद्राद्युक्तव्युत्पत्तेरंतरिक्षादूर्मिरुदकमुदा
रत् । अथ वा समुद्रादुक्तलक्षणाद्गवामूधसः सकाशात् । ऊर्मिरुज्ज्वलक्षीररसः एत[illegible]त पक्षेपि समानं यद्यपि घृतं क्षीराज्जायते
तथापि तस्याधर उदृत्पत्तेरेव मुपचर्यते । शिष्टं व्याख्यमग्न्यादिपंचसु पक्षेष्वपि समानं । अंशुना दीप्त्यो शेन वा अमृतत्वं मोक्षमुपसमानट्
उपैति पूरणः प्राप्नोति नरः । घृतस्य दीप्तस्य क्षरद्व्यरूपस्य वगुह्यं नाम गोपनीयं नमनसाधनं यदस्ति तद्ब्रवीमि तद्देवानां जिह्वा आस्वा राम २४०

७६

दजिह्वास्थानीयं भवति अमृतस्य नाभिर्बंधकं भवति । तदुभयं घृतस्य नामेत्यर्थः । एवं सर्वमंत्रेष्वनंतपक्षानुसारेणयोज्यं ॥ ॥ अथ द्वि
तीया ॥ ॥ वयं नाम प्रब्रवामा घृतेनास्मिन् यज्ञे धारयामा नमोभिः ॥ उप ब्रह्मा शृणवच्छस्यमानं चतुःशृंगोऽवमीद्गौर एतत् ॥ ॥ वयं य
जमानाः घृतस्य नाम प्रब्रवाम स्तुमो स्मिन् यज्ञे नमोभिर्नमस्कारैर्हविर्भिर्वा धारयाम च । ब्रह्मा परिवृढो देवः शस्यमानं स्तूयमानमिदं
मस्मदीयं स्तोत्रं उपशृणुयात् । चतुःशृंगः चत्वारि शृंगाणि वेदचतुष्टयरूपाणि यस्य सः आदित्याग्निपक्षद्वयांतरेष्वपि यास्कोक्तव्युत्पत्त्या शृंग
शब्दो व्याख्येयः । गौरो रुणवर्णः । महान् देवः एतत्कर्मजगद्वा अवमीत् उद्गिरति निर्वहतीत्यर्थः ॥ ॥ अथ तृतीया ॥ ॥ चत्वारि शृंगा त्रयो अस्य पा
दा द्वे शीर्षे सप्त हस्तासो अस्य ॥ त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आ विवेश ॥ ॥ यद्यपि सूक्तस्याग्निसूर्यादिपंचदेवताकत्वात्पंचधा
यं मंत्रो व्याख्येयः । अथापि निरुक्ते यदुक्तं न्याय्यसाम्यकाग्नेः सूर्यस्य च प्रकाशकत्वेन तत्परतया व्याख्यायते । अस्य यज्ञात्मकस्याग्नेः
चत्वारि शृंगा चत्वारो वेदाः शृंगस्थानीयाः । यद्यथापस्तंबेन । यज्ञं व्याख्यास्यामः स त्रिभिर्वेदैर्विधीयते इत्युक्तं तथाप्याथर्वणस्येतरा
नपेक्षाय्वेकाग्निसाध्यानां कृत्स्नकर्मणामभिधायकत्वात्तद्रूपेक्षया चत्वारि शृंगेत्युक्तं । त्रयो अस्य पादाः सवनानि त्रीण्यस्य पादाः प्र
वृत्तिसाधनत्वात्पादा इत्युच्यंते । द्वे शीर्षे ब्रह्मौदनं प्रवर्ग्यश्च द्वे हविः सामशा धान्येनेदमुक्तं । सप्त हस्तासः सप्तछंदांसि हस्ता अनुष्ठानं नस्य
मुख्यसाधनं छंदस्यपि देवताप्रीणनस्य मुख्यसाधनमिति हस्तत्वव्यवहारः त्रिधा बद्धः मंत्रकल्पब्राह्मणैस्त्रिप्रकारं बद्धः । धनमस्य त
त्रिः पाद्यत्वं । वृषभः फलानां वर्षिता रोरवीति भृशं शब्दायते । ऋग्यजुः सामोक्थैः शस्त्रयागस्तुति रूपैः होत्राद्युत्पादिते ध्वनिभिः आसीतोति ।

तै॰सं॰भा॰८

एवं महोदेवः मर्त्यानाविवेश। मर्त्येषु यजमानेषु निःश्रेयसहेतुत्वात् प्रवेशउपचर्यते। अत्र यास्क श्चत्वारि शृंगेति वेदा वा एत उक्ता इत्यादिना निरवोचत्
तदत्रानुसंधेयं। अथ सूर्यपक्षे व्याख्यायते। अस्यादित्यस्य चत्वारि शृंगाणि चतस्रो दिशः एव श्रयणार्थत्वाच्छृंगाणि इत्युपचर्यंते। त्रयो अ
स्य पादाः त्रयो वेदाः पादस्थानीया भवंति। गमनसाधनत्वात् तथाहि ऋग्भिः पूर्वाह्णे दिवि देव ईयते इत्युपक्रम्य वेदैरशून्यस्त्रिभिरेति सू
र्य इति हि वेदत्रयेण गतिराम्नाता। द्वे शीर्षे अहश्च रात्रिश्चेति द्वे शिरसी सप्त हस्तासो अस्य सप्तरश्मयः षड्गुलक्षणा ऋतवः एकः साधार
ण इति वा सप्त हस्ता भवंति। त्रिधा बद्धः त्रिषु स्थानेषु क्षित्यादिषु अन्योन्यात्मकत्वेन संबंधः ग्रीष्मवर्षहेमंतारव्यैस्त्रिभिस्त्रेधा बद्धो वा वृष
भो वर्षिता रोरवीति शब्दं करोति वृष्ट्यादिद्वारा स महो महान् देवो मर्त्यानाविवेश। तन्नियंतृत्वेन यास्क सूर्य आत्मा जगतस्तस्थुषश्चेति हि श्रुतेः।
एवं त्वष्टादिपक्षेपि योज्यं। शाब्दिकास्तु शब्दब्रह्मपरतया चत्वारि शृंगेति चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्चेत्यादिना या
चक्षते। अपरेत्वपरथा तत्सर्वमत्र द्रष्टव्यं॥ ॥ अथ चतुर्थी॥ ॥ त्रिधाहितं पणिभिर्गुह्यमानं गवि देवासो घृतमन्वविंदन्॥ इंद्र एकं सूर्य
एकं जजान वेनादेकं स्वधया निष्टतक्षुः॥ ॥ पणिभिरसुरैर्गवि गोषु त्रिधा क्षीरदध्याज्यभेदेन त्रिप्रकारं हितं निहितं गुह्यमानं गोपितं
घृतं दीप्तं रसरूपं वा द्रव्यं देवासो देवा अन्वविंदन् अलभंत। तत्रेंद्र एकं क्षीरं जजानोदपादयत सूर्य एकं जजान वेनात् एकांतिमतो अग्नेर्गमनव
तो वायोर्वैकं। घृतस्य धयान्नेन निमित्तेन द्रव्येण वा साधनेन निष्टतक्षुः निरपादयन् देवाः॥ अथ पंचमी॥ ॥ एता अर्षंति हृद्यात्समुद्राच्छतव्र
जा रिपुणा नावचक्षे॥ घृतस्य धारा अभिचाकशीमि हिरण्ययो वेतसो मध्य आसां॥ ॥ एता आपो घृतधारा वा अर्षंत्यधः पतंति शतव्रजा अ

नं वाहाः शुनं नरः शुनं कृषतु लांगलं॥ शुनं वरत्रा बध्यंतां शुनमष्ट्रामुदिंगय॥ ॥ वाहा बलीवर्दाः शुनं सुखं नामैतत् सुखं यथा
भवति तथा वहंत्विति शेषः। नरो नेतारो मनुष्याः कर्षकाः शुनं कुर्वंतु। तथा लांगलमपि शुनं कृषतु। वरत्राः वरणेन त्रायमाणाः
प्रग्रहाः शुनं बध्यंतां अष्ट्रां तोदं शुनं उदिंगय प्रेरय। शुनासीरयोराधि द्वयोरन्यतमः सुखकृद्देवः तदनुग्रहादेतत्सर्वं भवत्विति तस्य
श्रुतिसामान्येन स्तुतिः शुनासीरीयपर्वणि शुनासीरदेवताकस्य हविषोनुवाक्यैषा। अंत्यऋक् याज्या॥ सूत्रितं च। शुनासीरो शुनं नः फा
ला इति॥ ॥ सेषा पंचमी॥ ॥ शुनासीराविमां वाचं जुषेथां यद्दिवि चक्रथुः पयः॥ तेनेमामुपसिंचतं॥ ॥ द्वौ देवौ शुनश्च सीरश्चेति। शौनकः।
हे शुनासीरा अत्र शुन इंद्रः सीरो वायुः शुन इत्यंतरिक्षे सीर आदित्यः संख्यादिति यास्कः। तौ युवां इमां वक्ष्यमाणां मदीयां वाचं जुषे
थां। पत्ययोदिवि चक्रथुः वनेमां भूमिमुपसिंचतं॥ ॥ अथ षष्ठी॥ ॥ अर्वाची सुभगे भव सीते वंदामहे त्वा॥ यथा नः सुभगाससि यथा
नः सुफलाससि॥ ॥ हे सुभगे सीते त्वमर्वाची अर्वागंचना भव त्वा त्वां वंदामहे स्तुवीमहि। यथा नः सुभगाससि शोभनधना भवसि
यथा नः सुफला ससि तथा वंदामहे॥ ॥ अथ सप्तमी॥ ॥ इंद्रः सीतां निगृह्णातु तां पूषानु यच्छतु॥ सा नः पयस्वती दुहामुत्तरामुत्तरां स
मां॥ ॥ इंद्रो देवः सीतां सीतां धारकाष्ठां निगृह्णातु तां सीतां पूषा देवोनुगच्छतु नियमतु सा द्यौः पयस्वती उदकवती दुहां दुह्यात्। कदे
ति न दुह्यते। उत्तरां उत्तरां समां उत्तरमुत्तरं संवत्सरं। अस्या अष्टम्या विनियोगः शुनासीराविमामित्यत्रोक्तः॥ ॥ अथाष्टमी॥ ॥ शुनं नः
फाला विकृषंतु भूमिं शुनं कीनाशा अभियंतु वाहैः॥ शुनं पर्जन्यो मधुना पयोभिः शुनासीरा शुनमस्मासु धत्तं॥ ॥ ता भूमिं फालाः वि

सेकाष्ठाः क्रोशात्मिकाः। दिक्षुभिदन्नूर्मिभिः स्तरंगैः पिन्वमानो भवति। तत्र दृष्टांतः। अरुषो न वाजी आरोहमानो गर्वेण गमनशीलोश्व इव
स यथा भिदन् पिन्वमानश्च भवति। तद्वत्॥ ॥अथाष्टमी॥ ॥अभि प्रवंत समनेव योषाः कल्याण्यः स्मयमानासो अग्निं॥ घृतस्य धाराः समि
धो नसंत ता जुषाणो हर्यति जातवेदाः॥ ॥घृतस्य धाराः अमुमग्निं समनेव समानमनस्का योषा योषितः पतिमिवाभि प्रवंत आ तिनमयंति
निमग्नं कुर्वंति। कीदृश्यस्ताः कल्याण्यः भद्ररूपाः स्मयमानासो हसंत्यः। किं च ताः समिधः सम्यग्दीप्यमानाः सत्यो नसंत व्याप्नुवंति। ता
एव धाराः जुषाणः प्रीयमाणः सेवमानो वायं जातवेदा हर्यति। कामयते। घृतशब्दो सोदकमिति पक्षे अग्निर्जातवेदः शब्दाभ्यां वैद्युतोग्नि
रादित्यो वा गृह्यते। तं देवं उदकधारा अभिप्रवंत नमंते तव सता वहर्यति॥ ॥अथ नवमी॥ ॥कन्या इव वहतुमेतवा उ अंज्यंजाना अभि चा
कशीमि॥ यत्र सोमः सूयते यत्र यज्ञो घृतस्य धारा अभि तत्पवंते॥ ॥कन्या इव अनूढा बालिका यथा वहतुं। उद्वाहं तु। उद्वाहं प्राप्नु
एतवा उ एतुं पतिं गंतु अंज्यं जनकं आभरणं। तेजो वा अंजीनाः व्यंजयंतः एवं कुर्वत्यः कन्या इव स्वभर्तृभूतं आ अध्वरवैद्युतं वाग्निं सावादित्यं
वादहतुं मनं अंजिशब्देन जनकं तदीयं रूपं अंजानाः व्यंजयंत्यो घृतस्य धारा अभि चाकशीमि अभिपश्यामि घृतेनोदकेन च भो मास्या वैद्य
तस्य वाग्नेः प्रज्वलनं प्रसिद्धं। किं च ता धाराः सोमः सूयते यत्र अवतारायज्ञः स्तायात्। तन्नयज्ञमभिलक्ष्य पवंते गच्छंति खलु॥ ॥अथ द
शमी॥ ॥अभ्यर्षत सुष्टुतिं गव्यमाजिमस्मासु भद्रा द्रविणानि धत्त॥ इमं यज्ञं नयत देवता नो घृतस्य धारा मधुमत्पवंते॥ ॥हे मदीया ऋ
त्विजः गव्यं गोसमूहरूपं। गोसंबंधिनं वा आसंवातं। अभ्यर्षत अभिगच्छत अभिगमयत च। सुष्टुतिं शोभनां स्तुतिं अत्रं गो शब्देन उ

दकानि गावो वोच्यंते। तत्संधातो प्रेतः। अस्मासु यजमानेषु भद्राः कल्याणानि द्रविणानि धनानि धारया स्तुत्या खलु फलं लभ्यते। किं च नोस्मदी
यमिमं यज्ञं देवता अत्र यष्टव्या न देवान्नयत प्रापयत। घृतस्य मधुमत्पवंते॥ धामंत इत्येषा उत्तरस्य सूक्तस्याद्याधाय्या। सा जीर्णोपा
करणयोर्विनियुक्ता। धामं ते विश्वमिति। प्रतीत्कालदंत इति च्यावनेति सूत्रितत्वात्॥ ॥सेषा एकादशी॥ ॥धामं ते विश्वं भुवनमधिश्रि
तमंतः समुद्रे हृद्यंतरायुषि॥ अपामनीके समिथे य आभृतस्तमश्याम मधुमंतं त ऊर्मिं॥ ॥ते त्वदीये धामन्धामनि तेजः स्थाने विश्वं
हृद्यंतः सर्वप्राणिनां हृदये वैश्वानरात्वना युष्यान्न सर्वप्राण्याहारत्वेन। यद्वा। आयुषीत्यत्र तत् हृदि शोपलं जठराग्निना खल्वायुधायते। अ
पामनीके उदकासस्त्याये वैद्युताग्निवेन समिथे संग्रामे व शौर्याग्निरूपेण एवं सर्वेषु स्थानेषु वर्तमाने धाम मस्मिन्धामनि य ऊर्मिर्घृत
रूप उदकरूपोत्वा रस आभृतस्थापितः। ते त्वदीयं तं रसं मधुमंतं माधुर्योपेतमश्याम व्याप्नुयाम॥ ॥इति तृतीयस्याष्टमे एकादशो वर्गः।
॥इति श्रीवीरबुक्कभूपालसाम्राज्यैकधुरंधरः विद्यातीर्थगुरुदृष्ट्या प्राप्तसर्वज्ञवैभवः। श्रीमत्सायणमंत्रीशः सकलागमत्यादिव
दाशत स्थां माधवीये वेदार्थस्य प्रकाशने चतुर्थमंडलं स वामदेवेन वीक्षितं। अष्टौ त्ररेक्तपंचाशत्सूक्तेऽपि च। ज्ञातेरपि एकोन्यात
वत्या च युक्तेऽ मंत्रैश्च सम्मितां व्याकाषीत्स्फ पवोध्यर्थं पश्यत द्रीमराः॥ ॥इति चतुर्थमंडलं समाप्तं॥ छ॥ ॥यस्य निश्वसितं वेदा
यो वेदेभ्योखिलं जगत्॥ निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं॥ ॥आत्रेये पंचमे मंडले षडनुवाकाः। तत्र प्रथमेनुवाके चतुर्दश सूक्ता
नि। तत्राबोध्यग्निरिति द्वादशर्चं प्रथमं सूक्तं अत्रेयमनुक्रमणिका॥ अबोधि द्वादश बुधगविष्ठिरावितिपंचमे मंडले तु सूक्तं गोत्रमात्रे

ऋ.सं.भा.४ ऋषिश्चान्यदिति परिभाषितत्वादात्रेयो बुधगविष्ठिरावृषी। अनादिपरिभाषया त्रिष्टुप्। मंडलादिपरिभाषयाग्निर्देवता। आग्नेये क्रतौ त्रैष्टुभे छं
दसि आश्विनशस्त्रे चेतरादि चत्वारि सूक्तानि तथा सूत्रितं च। अबोध्यग्निः समिधेति चत्वारीत्यध्यायोत्सर्जनाकरणयोर्धामंते वि
श्वमिति द्वृचत्वेन विनियोगः॥ तत्र प्रथमा॥ अबोध्यग्निः समिधा जनानां प्रति धेनुमिवायतीमुषासं। यह्वा इव प्र वयामुज्जिहानाः
प्र भानवः सिस्रते नाकमच्छ॥१॥ अयमग्निर्जनानां ऋत्विगादीनां समिधा समिद्भिरबोधि प्रबुद्धो भूत्। धेनुमिवाग्निहोत्रार्थं धेनुं प्रतिय
थाप्रातर्बुध्यते तद्वदायतीमागच्छंतीमुषसं प्रति उषःकाल इत्यर्थः। अथवास्य समिद्धस्याग्नेर्भानवो ज्वालाः यह्वाः महांतो वयो शाखा प्र
ज्जिहानाः प्रोद्गमयीना वृक्षा इव प्रोज्जिहानाः स्वाधिष्ठानं त्यजंतो नाकमंतरिक्षमच्छाभिमुख्येन प्र सिस्रते प्रसरंति॥१॥ अथ द्वितीया॥
अबोधि होता यजथाय देवानूर्ध्वो अग्निः सुमनाः प्रातरस्थात्। समिद्धस्य रुशदद्दर्शि पाजो महान्देवस्तमसो निरमोचि॥ अयं होता हो
मनिष्पादकोग्निः देवान्यष्टुं यजथाय यष्टुं अबोधि बुध्यते। सोग्निः प्रातःकाले सुमनाः शोभनमनस्कः यजमानानुग्रहबुद्धिः ऊर्ध्वो
स्थात् उत्तिष्ठति समिद्धस्यास्य रुशद्दीप्यमानं पाजो बलं ज्वाललक्षणमदर्शि दृश्यते। अथ अथाभूतो महान्देवस्तमसोंधकारं निरमो राम
निमुक्तो भूत्॥ अथ तृतीया॥ यदीं गणस्य रशनामजीगः शुचिरंक्ते शुचिभिर्गोभिरग्निः। आद्दक्षिणा युज्यते वाजयंत्युत्तानामूर्ध्वो २८२
अधयज्जुहूभिः॥ यद्यदा ईमयं गणस्य संघात्मकस्य जगतः रशनां रज्जुरिव व्यापारप्रतिबंधकं तमः अजीगः गिरति गृह्णाति वा समि
द्धो भवतीत्यर्थः। पश्चाच्छुचिर्दीप्तोग्निः शुचिभिर्गोभिर्दीप्तै रश्मिभिः अंक्ते व्यनक्ति। विश्वं जगत् आत् अनंतरमेव दक्षिणा प्रवृद्धा वा

३०

परिमितगतयः सत्यः हृद्यात् हृदयगमात् समुद्रात् अंतरिपुणा जलमोक्षप्रतिबंधकारिणा शत्रुणा वृत्रेणानावचक्षेन अवदर्शनाय यथा
अदृष्टं भवति। तथा अर्षति। नाघृतस्य धारा अभिचाकशीमि अभिपश्यामि। कुत्रेति तदुच्यते। हिरण्ययो हिरण्यायो वेतसः अपः संभवोग्नि
र्वै घृतः आसमपां मध्ये वर्तत इति शेषः। अत्र घृतस्य धारा अभिचाकशीमीति अनेन चरमपादेन होमाधारोग्निर्वै घृतोग्निरादित्यो
वोक्तः॥ इति तृतीयस्याष्टमे दशमो वर्गः॥ अथ षष्ठी॥ सम्यक्स्रवंति सरितो न धेना अंतर्हृदा मनसा पूयमानाः। एते अर्षंत्यूर्मयो
घृतस्य मृगा इव क्षिपणोरीषमाणाः॥ अस्याग्नेः सम्यक्स्रवंतीति। अस्याग्नेः सम्यक्स्रवंति रक्षंति घृतस्य धाराः किमिव सरितो न धे
नाः प्रीणयित्र्यो नद्यः इव अंतर्हृदा मनसा हृदयमध्यगतेन चित्तेन भावनां सविवेन यावत्तेन पूयमानाः शुद्धीकृताः तदेवोच्यते घृतस्यो
र्मयो रसा वर्षति गच्छंति। जुह्वाः सकाशात् अग्ने रूप रिपतंति किमिव क्षिपणोः क्षेपकात् व्याधात् ईषमाणाः पलायमानाः मृगा इव तेय
थाकक्षं प्रविशंति तद्वदनेन शीघ्रमुक्तं भवति॥ अथ सप्तमी॥ सिंधोरिव प्राध्वने शूघनासो वातप्रमियः पतयंति यह्वाः। घृतस्य धारा
अरुषो न वाजी काष्ठा भिंदन्नूर्मिभिः पिन्वमानः॥ सिंधोः स्यंदमानायाः नद्याः सकाशात् दिव उदकानीव प्राध्वने प्रवणे बाति देशे शूघ
नासः आशुगंत्र्यः आशु इति च शु इति च क्षिप्रनामनी भवत इति निरुक्तं। वातप्रमियः वायुवत्प्रकृष्टवेगाः यह्वाः महत्यो घृतस्य धाराः प
तंति गच्छंति। अग्नेरुपरि घृतमुदकमिति पक्षे सिंधोरिवेत्यत्रेव शब्दो नर्थकः। स्यंदनसाधनादंतरिक्षाद् इत्युक्तलक्षणा घृतस्य धारा उदकधा
राः पतयंति गच्छंति। भूमौ। किंच घृतसंस्नायः। काष्ठाः मर्यादाः भूतान् परिधीन् भिंदन्नूर्मिभिः तरंगैः पिन्वमानो वर्धमानो भवति। उदकमिति प

त्.सं.भा.८

आस्याभिसोरभ्ययुक्तेलोकेसार्वेईष्टव्येस्थानेवेदिलक्षणेउतापिचयुवानित्यतरुणः सर्वत्रमिश्रितोवाकविर्मेधावीपुरुनिष्ठः बहुस्था
नः स्तावायज्ञवान् धर्त्तासर्वस्यधारकः एवंभूतःसन्कृष्टीनां ऋत्विग्यजमानानांसमिधःसन्नुवर्त्ततइतिशेषः॥ ॥ इतितृतीयस्या
ष्टमेद्वादशोवर्गः॥ ॥ अथसप्तमी॥ ॥ प्रणुत्यंविप्रमध्वरेषुसाधुमग्निंहोतारमीळतेनमोभिः॥ आयस्ततानरोदसीऋतेननित्यंमृजं
तिवाजिनंघृतेन॥ ॥ प्रणुत्यंतमग्निंनमोभिःस्तुतिभिःनुक्षिप्रंईळतेस्तुवंतिकीदृशंतंविप्रंमेधाविनंअध्वरेषुसाधकंहोतारंहोमनिष्पादकंयो
देवोरोदसीद्यावापृथिव्योऋतेनोदकेनततानविस्तारितवान्।अग्नेःप्रास्ताहुतेरादित्यद्वारावृष्ट्युत्पादकत्वात्।अथवाऋतेनसत्यभूतेन
हविषादिवंतथाभूतेनवृष्ट्यादिफलेन ~ वंचाततान।वाजिनमंत्रवंतंदेवंयजमानानित्यंघृतेनोदकेनाज्येनवामृजंतिपरिचरंति॥ ॥ अ
थाष्टमी॥ ॥ मार्जाल्योमृज्यतेस्वेदमूनाःकविप्रशस्तोअतिथिःशिवोनः॥ सहस्रशृंगोवृषभस्तदोजाविश्वांअग्नेसहसाप्रास्यन्यान्॥ ॥
मार्जाल्यःसमर्जनीयायमग्निर्मृज्यतेपरिचर्यते।स्वस्वकीयेस्थानेकीदृशोयंदमूनादानमनावाकविःप्रशस्तःकविभिर्मेधाविभिःप्रश
स्तःप्रकर्षेणस्तुत्यःनोस्माकमतिथिःअतिथिवत्पूज्यःशिवःसुखकरश्चसहस्रशृंगोपरिमितज्वालःवृषभोवर्षिताफलानांतदोजाः
तत्प्रसिद्धंबलंतेजोवास्मिन्नस्तीतितद्वोजोयस्यतादृशःसर्वबलस्वरूपइत्यर्थः।अथप्रत्यक्षवादः।हेअग्नेविश्वानन्यानृत्विग्यतिरिक्तान् राम २४४
सर्वान्सहसाबलेनप्रास्सिप्रतिपरेत्यर्थःपराभवसि।व्याप्नुवावाभवाभवसि॥ ॥ अथनवमी॥ ॥ प्रसद्योअग्नेअत्येष्यन्यानाविर्यस्मैचा
रुतमोबभूथ।ईळेन्योवपुष्योविभावाप्रियोविशामतिथिर्मानुषीणां॥ ॥ हेअग्नेत्वंयज्ञमासाद्यसद्यस्तदानीमेवान्यान्स्वसमानानत्येष

८०

अतिक्रामसि।यस्मैचारुतमःअप्याविर्बभूथाकिंचत्वमीळेन्यः स्तुत्यःवपुष्योवपुष्करोदीप्तिकरोवाविभावा।विशिष्टदीप्तिमान्प्रियः
प्रियभूतोविशांसर्वेषांप्राणिनांतथाअतिथिःपूज्योमानुषीणांप्रजानांभवसि॥ ॥ अथदशमी॥ ॥ तुभ्यंभरंतिक्षितयोयविष्ठबलिमग्ने
अंतितओतदूरात्॥ आभंदिष्ठस्यसुमतिंचिकिद्धिबृहत्तेअग्नेमहिशर्मभद्रं॥ ॥ हेयविष्ठयुवतमाग्नेतुभ्यंभरंतिसंपादयंतिकिंबलि
पूजांहविर्लक्षणामंतितोंतिकात्उतापिचदूरात्आइतिचार्थःकिंचभंदिष्ठस्यअतिशयेनस्तोतुःसुमतिंस्तुतिंआचिकिद्धिआजानी
हिहेअग्नेतेतवशर्मसुखंअस्मभ्यंदातव्यंबृहन्महद्भवंस्तुत्यंच॥ ॥ अथैकादशी॥ ॥ आद्यरथंभानुमोभानुमंतमग्नेतिष्ठयजतेभिः
समंतं॥ विद्वान्पथीनामुर्वंतरिक्षमेहदेवान्हविरद्यायवक्षि॥ ॥ हेभानुमोदीप्तिमन्नग्नेअद्यास्मिन्नुयागदिनेभानुमंतंसमीचीनंप्रांतो
पेतंरथंयजतेभिर्यष्टव्यैर्देवैःसहातिष्ठारोहविद्वान्यष्टव्यादेवपरिज्ञानवांस्त्वंपथीनांदेवयजनमार्गान्प्रतिहितायैषी।उर्वंतरि
क्षंप्रभूतंतरिक्षेदेवानयष्टव्यान्हविरद्यायहविर्भक्षणायहावक्षिआवहसि॥ ॥ अथद्वादशी॥ ॥ अवोचामकवयेमेध्यायवचोवं
दारुवृषभायवृष्णे॥ गविष्ठिरोनमसास्तोममग्नौदिवीवरुक्ममुरुव्यंचमश्रेत्॥ वयमात्रेयाःकवयेमेधाविनेमेध्यायमेधार्हायवृषभा
यवर्षकायफलीनोरक्षसेक्ष्णेवंदारुवंदशीलंवचःस्तोत्रंअवोचाम।अथऋषिरात्मानंपरोक्षेणनिर्दिश्यस्तुतिमुपसंहरति।ग
विष्ठिरोयमृषिर्नमसानमस्कारेणहविषावायुक्तंस्तोमंस्तोत्रमग्नौअश्रेत्श्रयतिस्म।दिविरुक्मंरोचमानंउरुव्यचंउरुगमनमादि
त्यमिव॥ ॥ इतितृतीयस्याष्टमेत्रयोदशोवर्गः॥ ॥ कुमारंमातेतिद्वादशर्चंद्वितीयंसूक्तंअत्रेःपुत्रःकुमारऋषिर्जरन्नाम्नःपुत्रो

ऋ·सं·भा·८ वृशो वा भौमो वा जऋषी कमेतत्त्वं विज्योतिषेत्यनयोरुक्त आत्रेयो वा भौमः कुमारः आत्रेयो वा पद्यं शदक्षरा शाक्वरी शिष्टास्त्रिष्टुभः अग्निर्देवता । अत्रा
नुक्रमणिका । कुमारं कुमारो वृशो वा जारो वा भौमो वा द्वादश्यं तं कवी तिह्वृचो वृश आत्रेयेति । प्रातरनुवाके आश्विनशस्त्रयोरस्यापि । सूक्तस्य विनियोगः
उक्तः पूर्वसूक्तेन सहात्र प्रथमा ॥ ॥ कुमारं माता युवतिः समुब्धं गुहा बिभर्ति न ददाति पित्रे । अनीकमस्य न मिनज्जनासः पुरः पश्य
ति निहितमरतौ ॥ १ ॥ शाट्यायन ब्राह्मणोक्त इतिहास उच्यते । राजा त्रैवृष्ण इक्ष्वाकुकुलप्रभवो बभूव तस्य च पुरोहितो वृशो जान ऋषिरासी
त् तदा खलु । संग्रहर्तृ तिरथे राज्ञां रक्षणाय पुरोहिताः । अरुणस्य वृशो रश्मिसंजग्राह पुरोहितः । कुमारो वर्त्मनि क्रीडन्नथ चक्रेणाघातितः । द्वित्रैः कुमा
रश्चक्रेणैव ममाराथ पुरोहितश त्वं हंता स्येति राजानं राजवापि पुरोहितं त्वं हंतास्य कुमारस्य नाहमित्यब्रवीत्तदा । यतस्त्वं रथवेगास्य नियं
ता तस्त्वया हतः । रथस्वामी यतो राजन् तस्मात्त्वं तस्य घातकः । एवं विवदमानौ तौ इक्ष्वाकून्प्रष्टुमागतौ । तावपप्रच्छतुरिक्ष्वाकूंस्तैः केनासौ ह
तो द्विजाः । ते ब्रुवन्रथयंतारं हंतारं वृशसंज्ञकं । स वृशो वाश्री साम्नातं कुमारं समजीवयत् । एवमाख्यायत त्रैवा पुनरपृच्छदीरितं । यतद्
क्ष्वाकवो वेगाद्धंतारमृषिमब्रुवन् । तस्मात्तेषां गृहेष्वग्नेस्तेजो निर्गतमेषु च ॥ गृहे पाकादयो नासन्तत्कारणमचिंतयन् । वृशः कुमारहंतारं य राम
दवोचाम तेन नः । अपाकमेदूरोवह्वेराह्वयाम वृशं वयं । इति संचिंत्य तमृषिमाह्वयामासुरादरात् । समागत्य ततः शीघ्रं तेषां मध्ये वरो भवेत् । २४५
इति वा वृशेनि साम्ना सार्वकामयत्पूर्ववत् । एवं गायन् । ऋषिर्ब्रह्महत्यां भाय जातां च त्रसदस्योर्नृपस्य पिशाचवेषां हरं आदाय चाग्नेर्गृहान्नी
त्वा कशिपौ स्थापयंती दृष्ट्वा स्वकर्त्तरेत्तो पविताम्नायस्थाग्नो जयामास चाग्निं । ततः स तेजाः संजातो भवत्याकादि पूर्ववत् । एवं शाट्यायनेनो

८

जयंती अनल्पमिच्छंती आज्यधाराः युज्यते युक्ता भवति अथवा दक्षिणा प्रदक्षाज्यधारा युज्यते तां च धारां उन्नाना उर्ध्वज्ञाना उपरि क्षिप्त
तं ऊर्ध्व उन्नतः सन् जुह्वूभिरधयत् पिबति ॥ ३ ॥ अथ चतुर्थी ॥ ॥ अग्निमच्छा देवयतां मनांसि चक्षूंषीव सूर्ये सं चरंति ॥ यदीं सुवाते उ
षसा विरूपे श्वेतो वाजी जायते अग्रे अह्नां ॥ ४ ॥ अग्निं देवं आभिमुख्येन देवयतां दानवान् आत्मन इच्छतां यजमानानां मनांसि संचरंति
देवाय हव्यान्यस्मदर्थं कदायं वर्धिष्यतीति ध्यायंतीत्यर्थः । चक्षूंषि सर्वेषां प्राणिनां यथा सूर्ये संचरंति तद्वत् यत् यदा इमनमग्निमुषसा
सह विरूपे द्यावापृथिव्यौ सुवाते जनयतः तदानीं श्वेतः प्रकृष्टवर्णोपेतो वाजी वेजनवानग्निः अग्राम् अग्रे उदयकाले जायते प्रदृष्टक्षय इत्यर्थः
॥ अथ पंचमी ॥ ॥ जनिष्ट हि जेन्यो अग्रे अह्नां हितो हितेष्वरुषो वनेषु । दमेदमे सप्त रत्ना दधानोऽग्निर्होता नि षसादा यजीयान् ॥ ५ ॥ अ
यमग्निः जन्यः उत्पादनीयः अह्नामग्रे उदयकाले जनिष्ट प्रादुरभूत् । पश्चात् हितेषु वनेषु वनोक्षु पुरुष आरोचमानः सन्हितः स्थापि
तः पश्चाद्दामतत्र यागगृहे सप्त रत्ना रमणीयाः सप्त ज्वालाः दधानो धारयमाणः अथवा यजमानेभ्यः सप्तविधानि रत्नानि दधानोऽग्निर्हो
ता होमनिष्पादकन् अजीयान् यष्टव्यः सन् निषसाद निषण्णो भवति । जीवति यजमाने मृत इति शब्दो यदि स्यात् तदानीं सुरभिमभीष्टिः
कार्यते त्रेयमुपवाक्या । सृजते च । अग्निर्होता न्यसीदद्यजीयान् साधौ मकर्देवी तिं नो अग्रेति ॥ ५ ॥ सेयं षष्ठी ॥ ॥ अग्निर्होता न्यसी
दद्यजीयानुपस्थे मातुः सुरभाउलोके । युवा कविः पुरुनिष्ठ ऋतावा धर्त्ता कृष्टीनामुत मध्य इद्धः ॥ ६ ॥ अयमग्निर्होता होमनिष्पा
दकः सन्यजीयान् यष्टव्यश्च सन् न्यसीदत् निषसाद । कुत्रेति तदुच्यते मातुः सर्वस्य निर्मातृभूम्याः उपस्थे उत्संगे तत्रापि सुरभौ

नं॥ ददानो अस्मा अमृतं विपृक्वत् किं मामनिंद्राः कृणवन्ननुक्थाः॥ ॥हिरण्यदंतं हिरण्यसदृश दंत स्थानीय ज्वालोपेतं शुचिवर्णं प्रदीप्त वर्णं आ
युधा आयुधानि आयुधस्थानीयान् स्फुलिंगान् ज्वाला वा मिमानं निर्मिमाणं। अग्निं आरात् समीपे क्षेत्रात् क्षेत्रे देशे अपश्यं पश्येयं एवं दृश्य
मानयते। अहं अस्मा अस्मै अग्नये। अमृतं अनाम्नमतसा धनं वा विपृक्वत्। सवीतो यास्य हविः स्तोत्रं वा ददानो दाता स्मि। मां अनिंद्रा
इंद्रः परमैश्वर्योग्निः तद्रहिताः अनिंद्रा इंद्रमयजंत इत्यर्थः। अनुक्थाः अनुक्तयः इंद्रमस्तुवंतश्च किं कृणवन्। किं कुर्युः॥ ॥ अथच
तुर्थी॥ ॥ क्षेत्रादपश्यं सनुतश्चरंतं सुमद्यूथं न पुरु शोभमानं॥ नता अगृभ्रंन्नजनिष्ट हि षः पलिक्नीरिद्युवतयो भवंति॥ ॥ अहं क्षेत्रात् इदा
नी क्षेत्रात् क्षेत्रे अनुतः अंतर्हितं नामैतत्॥ [illegible] सुमत स्वयमेव पुरु बहु शोभमानमपश्यं
पश्यामि। पुरा हरसः पिशाचस्य कर्मणा कालेताः ज्वाला निवीर्यमाग्रभ्रंत नराः इदानीं सोऽग्निरजनिष्ट हि हरसा प्रादुरभूत् खलु। अत
एव हेतोः पलिक्नीरिति। पलिक्न्यः पलिताः ज्वाला एवेदानीं युवतयो भवंति॥ ॥ अथ पंचमी॥ ॥ के मे मर्यकं वियवंत गोभिर्न येषां गोपा
अरणश्चिदास॥ य ईं जगृभुरव ते सृजंत्वाजाति पश्व उप नश्चिकित्वान्॥ ॥ के मे मदीयमर्यकं मर्त्यसत्वं राष्ट्रं गोभिः सह वियवंत वियु
क्तमकुर्वन्। गोभृत्याश्च वियोजयन्। येषां गोपाः अस्मा कं गोपयिता अरणश्चिदभिगंतावासा बभूव। सोयमग्निः यद्वेषेण ईमिनं जनसंघं
राष्ट्रं जगृह्युः गृह्णंतिते अवसृजंतु नश्यंतु। किं चिकित्वान् चेतनवान् अस्मद्विषयज्ञानवानग्निर्नोस्माकं पश्वः पशून् उप आजाति उपाग
छति॥ ॥ अथ षष्ठी॥ ॥ वसां राजानं वसतिं जनानामरातयो नि दधुर्मर्त्येषु॥ ब्रह्माण्यत्रेरव तं सृजंतु निंदितारो निंद्यासो भवंतु॥ ॥ वसां

राम
२४६

८२

वसतीं प्राणिनां राजानं स्वामिनं जनानां प्राणिनां वसंति आवासभूतं त्यरुणं उक्तलक्षणमग्निं वा अरातयो निदधुर गोपयन् मर्त्येषु लोके
षु मध्ये अत्रेरात्रिगोत्रस्य वृशस्य ब्रह्माणि मंत्राः स्तोत्राणि वा तं कुमारमग्निं वावसृजंतु। अथवा त्रेरंगिरस्य कुमार ब्रह्माणि यद्वा वृशस्य ब्र
ह्माणि अत्रेरत्रिमत्रिगोत्रे कर्मणि षष्ठी तं कुमारं अवसृजंतु विसृज्यंतु निंदितारोस्मन्निंदिका निंद्यासोस्माभिः निंद्या भवंतु। अत्र ब्राह्मणा
त्यतेरुपजीव्य दशमप्यात्रेयं वदंति। आत्रेयः कुमार इति पक्षे स एव ब्राह्मणो मे गमान्मान भवसृजंत्वित्याद्याशास्ते॥ ॥ इति तृतीयस्याष्टमे च
तुर्दशो वर्गः॥ ॥ अंजः सव आहवनीयो यस्थाने शुनश्शेपमित्येषा। अग्निमाहवनीयमुपस्थापयां चकार शुनश्शेपं निदितं सहस्रादि
ति ब्राह्मणं॥ ॥ सैषा सप्तमी॥ ॥ शुनश्चिच्छेपं निदितं सहस्राद्यूपादमुंचो अशमिष्ट हि षः॥ एवास्मदग्ने वि मुमुग्धि पाशान्होतश्चिकित्व इ
ह तू निषद्य॥ ॥ हे अग्ने निदितं नितरां बद्धं शुनःशेपमृषिं सहस्रादनेकयूपादमुंचः अमोचयः विदितिपूरणः शुनःशेपमिति। पदस्य मध्ये
पदांतरस्य संहितायां व्यत्ययेनावस्थितिः स ऋषिरशमिष्ट हि शांतवान् खलु। विद्वान् सह्वियामान् अशमिष्ट स्तुतिकर्मत्वात् अस्मावि
तस्मादमुंच इति संबंधः। एवं एवमस्मदस्मत्तः पाशान्विमोचय। हे होतर्हे चिकित्वः वत्तनावनग्ने इह तु वेद्यां निषद्यादस्थाय॥ ॥ अथाष्ट
मी॥ ॥ हृणीयमानो अप हि मदैयेः प्र मे देवानां व्रतपा उवाच॥ इंद्रो विद्वाँ अनु हि त्वा चचक्ष तेनाहमग्ने अनुशिष्ट आगां॥ ॥ हे अग्ने हृणीय
मानः क्रुध्यंस्त्वं मत्तमत्तः अपाय हि अपागाः खलु। ईगताविन्यस्मात् श्यन् विकरणश्छंदसि मध्ये छंदसे परस्मैपदे आगमेद्धो व्यत्य
येन श्यनोकारस्य एकारे च। ऋतेन रूपं। मेमह्यं देवानां व्रतपाः कर्मणः पालकः प्रोवाच हि। स एव विद्वान् त्वा च चक्ष त्वा ददर्श। तेनानुशिष्टः

ऋ॰सं॰भा॰८ ह्वहे। अग्ने त्वामागामिति एवं रूपा आह॥ ॥अथ नवमी॥ ॥वि ज्योतिषा बृहता भात्यग्निराविर्विश्वानि कृणुते महित्वा॥ प्रादेवीर्मायाः सहते
दुरेवाः शिशीते शृंगे रक्षसे विनिक्षे॥ ॥अयमग्निर्ज्योतिषा तेजसा बृहता विभाति विशेषेण दीप्यते। अथ तथाभूतः सन् महित्वा स्वमहत्वे
न विश्वानि सर्वाणि पदार्थजातानि आविष्कृणुते प्रकटीकरोति। एवं प्रवृद्धोऽग्निरदेवीः अदेवन[illegible]लाः आसुरीर्मायाः दुरेवाः दुःखगमनाः
प्रसहते अभिभवति। किंच शिशीते तीक्ष्णीकरोति शृंगे शृंगाणि शृंगसदृशीः हिंसकाः ज्वालाः शिशीते तीक्ष्णीकरोति। किमर्थं रक्षसे
विनिक्षे रक्षसो नाशाय निक्ष्यति शृंगे रक्षसो विनक्षणनायेति यास्कः॥ ॥अथ दशमी॥ ॥उत स्वानासो दिवि षंत्वग्नेस्तिग्मायुधा रक्षसे हं
तवा उ॥ मदे चिदस्य प्ररुजंति भामा न वरंते परिबाधो अदेवीः॥ ॥उत अपि च अग्नेः स्वानासः शब्दं कुर्वाणाः ज्वालाः दिवि षंतु द्युलोके प्रादुर्भ
वंतु। किमर्थं तिग्मायुधा तीक्ष्णायुधस्थानीया ज्वालाः रक्षसे हंतवा उ रक्षसो हननाय उ इति पूरणः मदे चित् हर्षे सति अस्याग्नेर्भामाः
क्रोधा दीप्तयो वा प्ररुजंति प्रकर्षेणायाबीगच्छंति पीडयंति वा। रक्षांसि परिबाधः परितो बाधिकाः अदेवीः अदेवताः आसुर्यः सेना न वरंते न
वरंते न वारयंत्येतं॥ ॥अथैकादशी॥ ॥एतं ते स्तोमं तुविजात विप्रो रथं न धीरः स्वपा अतक्षं॥ यदीदग्ने प्रति त्वं देव हर्याः स्वर्वतीरप एना ज राम
येम॥ ॥हे तुविजात बहुभावनाय त्वाग्ने ते त्वदर्थं एतं स्तोमं एतत्स्तोत्रं विप्रो मेधावी स्तोता रथं न रथमिव धीरः स्वपाः शोभनकर्मा अहं अत २४७
क्षं सम्पादये। हे अग्ने देव त्वं यदीत् यदि इदं स्तोमं प्रति हर्याः प्रतिकामयथाः तर्हि स्वर्वतीः स्वरणवतीः अपः [illegible]मतीः एना एनेन जयेम प्राप्नुयाम॥
॥अथ द्वादशी॥ ॥तुविग्रीवो वृषभो वावृधानो शत्र्वर्यः समजाति वेदः॥ इतीममग्निममृता अवोचन्बर्हिष्मते मनवे शर्म यंसद्धविष्मते मन

८२

के तोडको कमथोच्यते। इत्थं पुरोधा अभवन्नु असदस्यो महीयते। स रथं धावयन् राजा ब्राह्मणस्य कुमारकं। चिच्छेद रथचक्रेण प्रमादात्सोऽब्रवी
द्वृशं। पुरोहिते वर्त्तमाने त्वयि मांहिं तिरागता। एषा त्वयापनेतव्या ऋषिमित्यब्रवीन्नृपः। स जैष यज्ञी साम्ना तं कुमारमुदजीवयत्। माता कुमा
रस्योत्पादयित्री युवतिर्यौवनोपेता कुमारं पर्षिसं वरं समुब्धं सम्यग्निगूढं गुहा बिभर्त्ति न ददाति पित्रे अस्यानीकं रूपं न मिनत् हिंसितं ज
नासो जनाः न पश्यंति किंतु अरतौ अरमणे देशे पश्यंति। अथवायं वृशो नः पुनरुज्जीवितः कुमार आत्मानमपरोक्षतया वक्ति कथयति जारो
वा तेजीवयित्वा वक्ति। अथवास्मिन्सूक्ते कुमार इत्यग्निरुच्यते। तं माता अरणिर्युवतिर्निश्चयेन समुब्धं निगूढं गुहायां बिभर्त्ति पि
त्रे उत्पादकाय यजमानाय न ददाति। अस्याग्नेरमिनत् हिंसत् वाहकमनीकं तेजो जना न पश्यंति किंतु अरतौ नरत्वो हितं पश्यंति॥ ॥अथ
द्वितीया॥ ॥कमेतं त्वं युवते कुमारं पेषी बिभर्षि महिषी जजान॥ पूर्वीर्हि गर्भः शरदो ववर्धातं [illegible] कृ[illegible] भामनिंद्राः कृणवं नन्नुक्थाः॥ ॥
अत्र अग्नेरुत्पाद्यमानत्वात् कुमारशब्देन व्यवहारः। हे युवते त्वं कुमारं पेषी हिंसका पिशाचिका सती बिभर्षि। एवं द्व्यक्षरव्योमहर्षिका शिपु
नाछिन्नं अग्नेर्हरो ब्रूते। नचा अनुत्पादितत्वात् धारकाणमनुचितमित्यर्थः। महिषी महती पूज्या नी याऽरणिरेनं जजान अजनयत्। तदेव हि ग
र्भः शिशुर्ग्रहकारणायाः संबंधी गर्भो क्षिय स्मात् पूर्वीः शरदः गताननेकान्संवत्सरान्ववर्ध वृद्धः। अहं ववतो जातं अपश्यं। यदसूत
माता रणिरसूत। उदयादयत्। राजकुमारपक्षे हे युवते भूदेवि कमेतं कुमारं पेषी सती बिभर्षि [illegible] शिशुं कुमारजननपरतया योज्यं।
एवमुत्तरत्रापि कुमाराग्निरहसोः परत्वेन यथोचितं व्याख्येयं॥ ॥अथ तृतीया॥ ॥हिरण्यदंतं शुचिवर्णमारात्क्षेत्रादपश्यमायुधा मिमा

ता जाया पती समनसा समानमनस्कौ कृणोषि करोषि॥ ॥अथ तृतीया॥ ॥तव श्रिये मरुतो मर्जयंत रुद्र यत्ते जनिम चारु चित्रं॥ पदं य
द्विष्णोरुपमं निधायि तेन पासि गुह्यं नाम गोनां॥ ॥अनयाग्नेर्माध्यमिकी मूर्तिरुच्यते। हे अग्ने तव श्रिये श्रवणाय मरुतोंतरिक्षस्थं मर्ज
यंत मार्जयंति॥ हे रुद्र ध्वस्याः रुद्राव ध्वितिर ग्ने तेतव यत् जनिम जन्म वैद्युतलक्षणं चारु चरणीयं चित्रं चायनीयं च। तत्कथमिति
चेत् उच्यते। विष्णोर्व्यापनशीलस्य देवस्योपमं गुह्यमगम्यं यत्पदं निधायि अनेनांतरिक्षमुक्तं। उपमेयमिव विष्णोर्मध्यमं पदं त
स्मादंतरिक्षे पश्यंतीति ब्राह्मणं। तेन गोनामुदकानां गुह्यं नाम नामानि पासि रक्षसि॥ ॥अथ चतुर्थी॥ ॥तव श्रिया सुदृशो देव दे
वाः पुरू दधाना अमृतं सपंत॥ होतारमग्निं मनुषो नि षेदुर्दशस्यंत उशिजः शंसमायोः॥४॥ ॥हे देवाग्ने सुदृशस्तव श्रिया संभृध्य देवा
इंद्रादयः पुरु अत्यधिकं दधानास्त्वयि प्रीतिं धारयंतो अमृतं सपंत स्पृशंति। होतारं होमनिष्पादकमग्निं मनुषो मनुष्या नि षेदुः प
रिचरंति ऋत्विजः किं कुर्वंतः दशस्यंतः हविर्वितरंतः शंसे फलं उशिजः कामयमानस्यायोर्मनुष्यस्य यजमानस्यार्थे॥ ॥अथ पंचमी॥
॥न त्वद्धोता पूर्वो अग्ने यजीयांन काव्यैः परो अस्ति स्वधावः॥ विशश्च यस्या अतिथिर्भवासि स यज्ञेन वनवद्देव मर्तान्॥ ॥हे अग्ने त्वत् — राम २४८
त्वत्तोन्यो नास्ति होता पूर्वः पूरकः पुराणो वा यजीयान् यष्टा वा काव्यैः स्तोत्रैः स्तुत्यः परः परस्तात् परस्मिन्नपि काले नास्ति। हे स्वधावः अ
न्नवन् यस्या विशः प्रजाया ऋत्विग्रूपाया अतिथिर्भवासि। स यज्ञेन मर्तानस्मद्द्रुहन् वनवद् वृश्चसि हिंसति। यद्वा मर्तान् परिचारकान् वन
वत् संभजत॥ ॥अथ षष्ठी॥ ॥वयमग्ने वनुयाम त्वोता वसूयवो हविषा बुध्यमानाः॥ वयं समर्ये विदथेष्वह्नां वयं राया सहसस्पुत्र मर्तान्॥

हे अग्ने वयं यजमानाः। त्वोताः त्वया रक्षिताः संतो वयं वनुयाम शत्रून् याचयाम संभजेम हिंसाधनं कीदृशा वयं वसूयवो वसुकामाः हवि
षा त्वां बुध्यमाना बोधयंतः वयं समर्ये समरणे जयेम शत्रूनिति शेषः। विदथेषु यागेषु प्रोन्नुयाम बलं यद्वा वनुयामेत्येतदनुषज्यते।
अह्नां सर्वेषु हस्सु किं च वयं हे सहसस्पुत्र बलस्य पालक वाग्ने राया धनेन सह मर्त्यान् पुत्रभृत्यादीन् लभेमहि॥ ॥इति तृतीयस्याष्ट
मषोडशो वर्गः॥ ॥अथ सप्तमी॥ ॥यो न आगो अभ्येनो भरात्यधीदघमघशंसे दधात॥ जही चिकित्वो अभिशस्तिमेतामग्ने यो
नो मर्चयति द्वयेन॥ ॥यो मर्त्यः आगः अपराधमेनः पापं च नोस्मभ्यं अभि भरति तस्मिन्नघशंसे अयं पाप्यं। अधि दधात ददात्वग्निः
इति पूरणं। आगोपराधाय मह्यमिदं करोति तस्मा एवाग्निस्तत् करोत्वित्यर्थः। अथ प्रत्यक्षेणोच्यते। हे अग्ने एतामभिशस्तिं जहि
उत्तरत्र यच्छब्दश्रवणात् तदानुगुण्येन नमभिशंसकमिति व्याख्येयं। याभिशस्ता नोस्मान् द्वयेनोत्के नागसेन सा चार्चयति बाधेते
नमिति॥ ॥अथाष्टमी॥ ॥त्वामस्या व्युषि देव पूर्वे दूतं कृण्वाना अयजंत हव्यैः॥ संस्थे यदग्न ईयसे रयीणां देवो मर्तैर्वसुभिरिध्यमा
नः॥८॥ ॥हे अग्ने त्वां अस्या रात्रेः व्युषि व्युष्टायां उषसीत्यर्थः पूर्वे पुरातना यजमानाः दूतं देवानां प्रेरकं कृण्वानाः कुर्वाणाः अयजं
त हव्यैर्हविर्भिः साधनैः रयीणां हविर्लक्षणानां संस्थे संस्थाने आसादने सति हे अग्ने यद्यदा ईयसे गच्छसि देवो द्योतमानो मर्तैर्मनु
ष्यैः ऋत्विग्भिर्वसुभिर्वासके रिध्यमानः समिध्यमानः सन्॥ ॥अथ नवमी॥ ॥अव स्पृधि पितरं योधि विद्वान् पुत्रो यस्ते सहसः सून ऊ
हे॥ कदा चिकित्वो अभि चक्षसे नोग्ने कदाँ ऋतचिद्यातयासे॥ ॥हे सहसः सूनो बलस्य पुत्राग्ने त्वमवस्पृधि पारय योधि पृथक्कुरु पा

ऋ॰सं॰भा॰४

यातायः पुत्रस्थानीयः न चयोजयमानस्तेत्वांपितरंपालकं पितृभूतं विद्वान् जानन् कृहेवहतिहविः तमेवं कुर्वंति ऋषिरात्मानं परोक्षेण
हव्यवाळग्निरजरःपितानइति हि वक्ष्यति। यद्वा पितृपुत्रभावो व्यत्यस्तः पितरं पितृवद्रक्षकं यजमानमवस्पृधि यो धित्वं। यस्त्वं पुत्रः पुत्र
वत्सदा रक्षणीयस्त्वं पुत्रो भवसि यस्ते विधात्दिति श्रुतिः। हे चिकित्वः चेतनावान्नग्ने कदास्मानभिवक्षसे अभिपश्यसि। कदा च ऋतेनविदत्
यज्ञस्योदकस्य वा वेनपितायातयासे प्रेरयसि सन्मार्गेण॥ ॥अथ दशमी॥ ॥भूरि नाम वंदमानो दधाति पिता वसो यदि तज्जोषयासे॥
कुविद्देवस्य सहसा चकानः सुम्नमग्निर्वनते वावृधानः॥१॥ ॥भूरि प्रभूतं नाम कल्वदीयं नाम वंदमानः सन् दधाति धारयति सामर्थ्याद्ध
विः अथवा नामकं। हविः प्रभूतं धारयति दातुं। पिता पालकस्त्वं। हे वसो वासक अग्ने यदत्व द्धविः जोषयासे सेवसे देवस्य द्योवहन्नुर्यजमा
नस्य कुवित् बहु हविः सहसा बलेन युक्तः सन् चकानः कामयमानः यद्वा कर्मणि षष्ठी देवं यजमानं कामयमानोग्निर्वावृधानो व
र्धमानो यजमानं वर्धयन्वा सुम्नं वनते प्रयच्छति॥ ॥अथैकादशी॥ ॥त्वमंग जरितारं यविष्ठ विश्वान्यग्ने दुरिताति पर्षि॥ स्तेना अदृ
श्रन्रिपवो जनासो ज्ञातकेता वृजिना अभूवन्॥ ॥हे अंग स्त्वामिनूयविष्ठ युवतमाग्ने जरितारं अनुग्रहीतुं विश्वानि दुरितादुरिता
नि अतिपर्षि अतिपारयसि स्तेनास्तस्कराः अदृश्रन्नदृश्यंते रिपवो जनासः शत्रुभूता मनुष्याः अज्ञातकेताः अप्रज्ञाना चिह्ना वृजि
ना अस्माभिर्वर्जिता अभूवन् भवंति॥ ॥अथ द्वादशी॥ ॥इमे यामासस्त्वद्रिगभूवन्वसवे वा तदिदागो अवाचि॥ नाहायमग्निरभि
शस्तये नो नरीषते वावृधानः परादात्॥ ॥इमे यामासो गंतारः स्तोमास्त्वद्रिक् त्वदभिमुखाः अभूवन्भवंति वा च्यवा वसवे वासकाय दा

राम
२४९

८५

वे शर्म यंसत्॥ ॥तुविग्रीवो वक्रज्वालः प्रभूतग्रीवो वा वृषभो वर्षिता कामानां वावृधानो वर्धमानोग्निरर्यः अरेर्वेदः धनं अवानु अ
कं टकं समजाति सोपाजयति। इतीममर्थमग्निं अमृता अन्ये देवा अवोचन् यस्माद्देवैस्तस्मात् बर्हिष्मते यागवते मनवे मनुष्याय यजमा
नाय शर्म सुखं यंसत् यच्छतु। हविष्मते शर्म यंसत्॥ ॥इति तृतीयस्याष्टमे पंचदशो वर्गः॥१५॥ ॥त्वमग्ने वरुण इति द्वादशर्चं तृतीयं सू
क्तं अत्रेयस्य वसुश्रुतस्यार्षं त्रैष्टुभमाग्नेयं त्वमग्ने वसुश्रुत इत्यनुक्रांतं। प्रातरनुवाकाश्विनशस्त्रयो विनियोगो बोध्यग्निरित्युक्तः॥
॥तत्र प्रथमा॥ ॥त्वमग्ने वरुणो जायसे यत्त्वं मित्रो भवसि यत्समिद्धः॥ त्वे विश्वे सहसस्पुत्र देवास्त्वमिंद्रो दाशुषे मर्त्याय॥ ॥हे अग्ने
त्वं वरुणस्तमसां वारको रात्र्यभिमानि देवोपि त्वमेवो ग्नय मानि यद्यदा जायसे। किं च त्वं मित्रोहरभिमानी देवः प्रमितस्त्राता यद्यदा समिद्ध
स्तेउत्पन्नमात्रः सन् तमो निवारयसि। प्रवृद्धः सन् हितकारी भवसि। त्वयर्थः। त्वे त्वयि विश्वे सर्वेपि देवा वर्तंते। यदग्ने न हविषा तेषां जीवनात्
ते देवा बिभ्यतो ग्निं प्राविशन्निति हि श्रुतेः। हे सहसस्पुत्र बलेन मथ्यमानत्वात् किंच त्वं इंद्रः स्वामी दाशुषे हविर्दात्रे मर्त्याय यजमा
नाय। विवाहे चतुर्थ्यामित्याद्युक्तो त्वमर्यमा इत्येषास्तुतिर्वा। त्वमर्यमा भवसि यत्कनीनामिति विवाहे चतुर्थीमिति॥ ॥सैषा द्वि
तीया॥ ॥त्वमर्यमा भवसि यत्कनीनां नाम स्वधावन्गुह्यं बिभर्षि॥ अंजंति मित्रं सुधितं न गोभिर्यद्दंपती समनसा कृणोषि॥ ॥हे अग्ने
त्वं अर्यमा भवसि सर्वेषां नियमितासि। यद्यदा कनीनां कन्यकानां सेवं ध्यसि। किं च हे स्वधावन् हविर्लक्षणवन् गुह्यं गोपनीयं ना
म बिभर्षि वैश्वानर इति। तत्नाम सुधितं मित्रं न मित्रमिव त्वां गोभिः विकारे प्रकृतिः शब्दः गोविकारैः क्षीरादिभिः अंजंति। यद्यस्माद्दंप

गोपराधमाश्रासानुरूपमुक्तं वानमग्निमिदं देहीति याचनमेवापराधः इदिति पूरणः ॥ यद्वा तदिदं वक्ष्यमाणं शत्रुभिः क्रि चायमग्निव
वृधानः स्तुत्या वर्धमानः ॥ स नूनाहं नैवाभिशस्तये निंदकाय नो स्मान् परादात् प्रादद्यात् । तथा रिषते हिंसकाय नैव परादात् ॥ ।
। इति तृतीयस्याष्टमे सप्तदशो वर्गः ॥ १७ ॥ ॥ त्वामग्न इत्येकादशर्चं चतुर्थं सूक्तं । आत्रेयस्य वसुश्रुतस्यार्षं त्रैष्टुभमाग्नेयं । अनुक्रांतं
च । त्वामग्न एकादशेति । प्रातरनुवाकाश्विनशस्त्रयोर्विनियोगो बोधाग्निरित्युक्तः ॥ ॥ तत्र प्रथमा ॥ ॥ त्वामग्ने वसुपतिं वसूनाम
भि प्र मंदे अध्वरेषु राजन् ॥ त्वया वाजं वाजयंतो जयेमाभि ष्याम पृत्सुतीर्मर्त्यानां ॥ ॥ हे अग्ने वसूनां वसुपतिं वृत्यवृत्तिभ्यां वसूनां वा
ऊल्यंतं त्वामिलक्ष्योक्तं । वह्नधिनानो स्वामिनं त्वा अध्वरेषु यागेषु अभि प्र मंदे आभिमुख्येन स्तौमि । हे राजन् किं च त्वया अनुकूलेन वा
जयंतो न्नमिच्छंतो न्नयं वाजं जयेम । किं च मर्त्यानां मरणधर्मकाणां पृत्सुतीः सेना अभिष्याम अभिभवेम । दर्शपूर्णमासे पत्नीसंयाजे
गृहपतेर्याज्या । सूत्रितं च । हव्यवाळग्निरजरः पिता न इत्वं वसो मनोवद्रा इति ॥ ॥ सैषा द्वितीया ॥ ॥ हव्यवाळग्निरजरः पिता नो विभुर्वि
भावा सुदृशीको अस्मे ॥ सुगार्हपत्याः समिषो दिदीह्यस्मद्र्यक्सं मिमीहि श्रवांसि ॥ ॥ अहं हव्यवाळग्निः अजरः अजीर्णः स नूनः
पिता भवत्विति शेषः । किं च विभुर्व्याप्तः विभावा दीप्तिमान् सुदृशीकः । शोभनदर्शनो स्मे अस्माकं भवतु अथ प्रत्यक्षवादः सुगार्हप
त्याः शोभनगार्हपत्ययुक्तानि इषो न्नानि संदिदीहि सम्यक् प्रकाशय ददस्व वा अस्मद्र्यक् अस्मदभिमुखे श्रवांसि अन्नानि संमि
मीहि सम्यक् प्रयच्छ ॥ ॥ अथ तृतीया ॥ ॥ विशां कविं विश्पतिं मानुषीणां शुचिं पावकं घृतपृष्ठमग्निं ॥ नि होतारं विश्वविदं दधिध्वे

ऋ·सं·भा·८

सदेवेषु वनते वार्याणि॥३॥ इमा मानुषीणां विशां विशां पतिं सर्वासां मनुष्यरूपाणां प्रजानां पालकं स्वामिनं वा कविं मेधाविनं शुचिं विशुद्धं दीप्तं वा
पवेकमन्येषां शोधकं — रापृष्ठं प्रदीप्तपृष्ठोपलक्षितशरीरं अथवा उपरितभाग आज्योपेतं। होतारं होमनिष्पादकं विश्वविदं विश्वस्य वेत्ता
रमग्निं निदधिध्वे धारयथ। हे ऋत्विजः स देवो देवेषु मध्ये वार्याणि वरणीयानि धनानि वनते संभजते। अस्मदर्थं स्वयं वा वार्याणि हवींषि
वनते॥३॥ अथ चतुर्थी॥ जुषस्वाग्न इळया सजोषा यतमानो रश्मिभिः सूर्यस्य॥ जुषस्व नः समिधं जातवेद आ च देवान्हविरद्या र
य वक्षि॥ हे अग्ने जुषस्व सेवस्व स्तुतिं इळया वेदिलक्षणया भूम्या वाचा वा सजोषाः समानप्रीतिः तथा सूर्यस्य रश्मिभिर्यतमानः प्र
पन्नं उषःकाले कुर्वन् किं च हे जातवेदः जातस्य वेदितरग्ने नोस्मदीयां समिधं जुषस्व सेवस्व आ वह च देवान् हविरद्याय अदनाय आ
वाह्य वक्षि वह सितहविः। अथ पवित्रेष्ट्यां स्विष्टकृतोऽनुवाक्येषा। सूत्रितं च। जुष्टो दमूना अग्ने शर्धमहते सौभगायेति संयाज्ये इति। सदु
ग्धः पुरोडाशमष्टाकपालमित्यत्रापि स्विष्टकृतोऽनुवाक्या। अत्यासानये मरुतः स्वैवो जुष्टो दमूना इति॥ इति सैषा पंचमी॥ जुष्टो
दमूना अतिथिर्दुरोण इमं नो यज्ञमुपयाहि विद्वान्॥ विश्वा अग्ने अभियुजो विहत्या शत्रूयतामाभरा भोजनानि॥ जुष्टः पर्याप्त राम
हृदमूनाः दानमनाः दांतमना वा अतिथिरतिथिवत् दुरोणे सन् इमं नोस्मदीयं यज्ञं उपयाहि उपागच्छ विद्वान् जानन् हे अग्ने विश्वा अभियुजो अभि २५०
युक्तो विहत्य शत्रूयतां तेषां भोजनानि अन्नानि धनानि आभर आहर। अतिथिरभ्यतितो महान् भवतीत्यादि निरुक्तं द्रष्टव्यं॥ इति द्वि
तीयस्याष्टमे द्वादशो वर्गः४१॥ ॥अथ षष्ठी॥ वधेन दस्युं प्र हि चातयस्व वयः कृण्वानस्तन्वे३ स्वायै॥ पिपर्षि यत्सहसस्पुत्र देवांत्सो अग्ने

मभिति ॥ ॥ सैषा दशमी ॥ ॥ यस्त्वा हृदा कीरिणा मन्यमानोमर्त्यं मर्त्यो जोहवीमि ॥ जातवेदो यशो अस्मासु धेहि प्रजाभिरग्ने अमृतत्वम
श्यां ॥ ॥ यो मर्त्यो मरणधर्मा अमर्त्यमनाशिनं त्वां कीरिणा स्तुत्यादिषु विक्षिप्तेन हृदा हृदयेन युक्तो मन्यमानः स्तुवन् जोहवीमि अत्य
र्थमाह्वयामि । यद्वा स्तोत्रवाचकेन कीरिणा शब्देन स्तुतिरूपेण लक्ष्यते । स्तुतियुक्तेन मनसा त्वां मन्यमानो जोहवीमि । हे जातवेदो यशो
धनं प्रजां वा अस्मासु धेहि सप्रजाभिस्त्वद्दत्ताभिर्हे अग्नेहममृतत्वं संतत्यविच्छेदलक्षणं अश्यां प्राप्नुयां । प्रजामनु प्रजायसे तदु ते मर्त्या
मृतममिति हि श्रुतिः । तस्यामेव पुत्रकामेष्ट्यां यस्मै त्वमित्येषाग्नेः पुत्रवतो नुवाक्या । यस्मै त्वं सुकृते जातवेदो यस्त्वा हृदा कीरिणा मन्यमान इ
ति हि सूत्रितं ॥ ॥ सैषा दशमी ॥ ॥ यस्मै त्वं सुकृते जातवेद उ लोकमग्ने कृणवः स्योनं ॥ अश्विनं स पुत्रिणं वीरवंतं गोमंतं रयिं नशते स्वस्ति
॥ हे जातवेदः अग्ने त्वं यस्मै सुकृते सुकर्मणे यजमानाय उ इति पूरणः । लोकं स्योनं सुखकरं कृणवः अकरोः । यद्वा लोकमालोकेन स्थानं
कृणवः अनुग्रहेण कुर्वित्यर्थः । स यजमानोश्विनं बह्वश्वोपेतं पुत्रिणं बहुपुत्रोपेतं वीरवंतं वीरैर्वीर्येण वोपेतं गोमंतं । रयिं धनं नशते
प्राप्नोति । स्वस्त्यविनश्वरं ॥ ॥ इति तृतीयस्याष्टमे एकोनविंशो वर्गः ॥ ॥ सुसमिद्धायेत्येकादशर्चं पंचमं सूक्तं । आत्रेयस्य वसुश्रुत
स्यार्षं । गायत्रं इध्माद्युक्तदेवताकं । आप्रमित्युक्तत्वात् तनूनपाद्वर्जितं सुसमिद्धाय प्रगायत्रमित्यनुक्रमणिका । आत्रीणामिदमाप्री
सूक्तं । समिद्धो अद्येति वा सर्वेषां यथर्षि वित्युक्तत्वात् ॥ ॥ तत्र प्रथमा ॥ ॥ सुसमिद्धाय शोचिषे घृतं तीव्रं जुहोतन ॥ अग्नये जातवेद
से ॥ ॥ सुसमिद्धाय सुष्ठु समिद्धाय सुष्ठु समिद्धाय तंनामकायाग्नये शोचिषे दीप्तिमते घृतं आज्यं । तीव्रं प्रभूतं जुहोतन अग्नये गनादि

गुणयुक्ताय जातवेदसे जातधनाय ॥ ॥ अथ द्वितीया ॥ ॥ नराशंसः सुषूदतीमं यज्ञमदाभ्यः ॥ कविर्हि मधुहस्त्यः ॥ ॥ नराशंसः नरैः
शंसनीयोयमग्निरिमं यज्ञमिदं हविर्वा सुषूदति सुष्ठु प्रेरयति । स वेदः अदाभ्यः हअहिंस्यः केनापि कविर्मेधावी मधुहस्त्यः मधुरहस्तः
॥ ॥ अथ तृतीया ॥ ॥ ईळितो अग्न आवहेंद्रं चित्रमिह प्रियं ॥ सुखै रथेभिरूतये ॥ ॥ अग्ने ईळितः स्तुतः सन्नावहेंद्रं चित्रं चायनीयं
प्रियमिहास्मिन् यज्ञे सुखै रथेभी रथैरूतये स्मद्रक्षणाय ॥ ॥ अथ चतुर्थी ॥ ॥ ऊर्णम्रदा विप्रथस्वाभ्यर्का अनूषत ॥ भवा नः शुभ्र
सातये ॥ ॥ हे ऊर्णम्रदः ऊर्णकंबलवन्मृदु हे बर्हिः विप्रथस्व प्रथय अर्काः स्तोतारोभ्यनूषत स्तुवंति । हे शुभ्र दीप्त सातये धनप्राप्त
ये यथा भव ॥ ॥ अथ पंचमी ॥ ॥ देवीर्द्वारो विश्रयध्वं सुप्रायणा न ऊतये ॥ प्रप्र यज्ञं पृणीतन ॥ ॥ हे द्वारो यज्ञस्य द्वाराभिमानिन्यो
हे देव्यः यूयं विश्रयध्वं विवृता भवत । सुप्रायणाः शोभनगमनसाधनाः नोस्माकमूतये रक्षायै यज्ञं यजमानं प्रप्र पृणीतन प्रपूरयत । का
मैः यज्ञमेव वा फलैः ॥ ॥ इति तृतीयस्याष्टमे विंशो वर्गः ॥ ॥ अथ षष्ठी ॥ ॥ सुप्रतीके वयोवृधा यह्वी ऋतस्य मातरा ॥ दोषामुषासमी
महे ॥ ॥ हे अहोरात्रे अभिमानिदेव्यौ सुप्रतीके सुरूपे शोभनांगे वयोवृधा अन्नस्य वर्धयित्र्यौ यह्वी महत्यौ ऋतस्य यज्ञस्योदकस्य वा
मातरा निर्मात्र्यौ तयोर्मध्ये प्रत्येकं दोषां रात्रिदेवीमुषसं अहर्देवीं ईमहे स्तुमः ॥ ॥ अथ सप्तमी ॥ ॥ वातस्य पत्मन्नीळिता दैव्या होतारा म
नुषः ॥ इमं नो यज्ञमागतं ॥ ॥ वातस्य पत्मन् लुप्तोपमैषा वायुगमनसदृशगमनार्थमीळिता अस्माभिः स्तुतौ यद्वा वातस्य पतनसाधने अं
तरिक्षे गच्छंतौ दैव्या देवौ अग्निरादित्यश्च समुद्रं तौ होतारा देवनामानौ ह्वातारौ युवां मनुषो मनुष्यस्य इमं नो अस्माकं यज्ञमागतमागच्छतं ।

ऋ॰सं॰भा॰८

नोमनुषो यज्ञमिति व्यधिकरणे षष्ठ्यौ अस्माकं यजमानस्य यज्ञमित्यर्थः ॥ अथाष्टमी ॥ इळा सरस्वती मही तिस्रो देवीर्मयोभुवः ॥ बर्हिः सी
दंत्वस्रिधः ॥ इळाष्टधी सर उदकं तस्मात्सरस्वती वायुः तस्य स्त्री सरस्वती मही महती भरतस्यादित्यस्य पत्नी अत्रय द्यग्यपानोक्ता तथापि
सर्वत्र सहदृष्टत्वात् त्रिसंख्याश्रवणाच्च सा गृह्यते अथ वेताः क्षित्यंतरिक्षद्युस्थाना वाग्देव्यः एता मयोभुवः सुखस्य भावयित्र्यः अस्त्रि
धो हिंसिका सत्यो बर्हिर्बर्हिषि सीदंतु उपविशंतु ॥ अथ नवमी ॥ शिवस्त्वष्टरिहागहि विभुः पोष उत त्मना ॥ यज्ञेयज्ञे न उदव ॥
हे त्वष्टर्देव शिवः सुखकरः सन्निहागहि अस्मद्यज्ञमागच्छ विभुर्व्याप्तस्त्वं पोषकरणे उत आगत्य कमना स्वयमेव यज्ञा सर्वेषु यज्ञेषु नो
स्मानुदवो अष्टं रक्ष ॥ अग्निहोत्र उन्नरा द्रुतिस्कंदने यत्र वेत्थेत्यनया । समिधमादध्यात् सूत्रितं च यत्र वेत्थ वनस्पत इत्युत्तरस्या अ
स्व द्रुत्याः स्कंदन इति ॥ सैषा दशमी ॥ यत्र वेत्थ वनस्पते देवानां गुह्या नामानि ॥ तत्र हव्यानि गामय ॥ हे वनस्पते यूपाभिमानि देवय
त्र यस्मिन्स्थाने वेत्थ देवानां गुह्यानामानि नामकानि रूपाणि तत्र हव्यानि गामय ॥ अथैकादशी ॥ स्वाहाग्नये वरुणाय स्वाहेंद्राय म
रुद्भ्यः ॥ स्वाहा देवेभ्यो हविः ॥ अग्न्यादि विश्वेदेवाः देवेभ्यः इदं हविः स्वाहा करोमीति शेषः स्वाहाकृतं करोमीत्यर्थः एवं स्वाहाकृते स्तुतिः ॥ राम
॥ इति तृतीयस्याष्टमे एकविंशो वर्गः ॥ ॥ अग्निं तं मन्य इति दशर्चं षष्ठं सूक्तं वसुश्रुतस्यार्षमाग्नेयं पांक्तं अग्निं तं दश पांक्तमित्यनुक्रमणि २५२
का। प्रातरनुवाक आग्नेये क्रतौ पांक्ते छंदस्याश्विनशस्त्रे च इदं सूक्तं । अग्निं तं मन्य इति पांक्तमिति हि सूत्रितं । आश्वमेधिके मध्यमे अहनि इदमेवा
न्वशस्त्रे सूत्रितं च । अग्निं तं मन्ये यो वसुरग्ने स्तूर रयिं भरेति ॥ तत्र प्रथमा ॥ ॥ अग्निं तं मन्ये यो वसुरस्तं यं यंति धेनवः ॥ अस्तमर्वंत आश

८८

पाहि नृतम वाजे अस्मान् ॥ ॥ हे अग्ने वधेन दस्युमुपक्षपयितारं अहिंसातय स्वा प्रणाशाय हीति पूरणतः वयः कृणवानः त्वं ब्रे शरीराय स्वायेस्मी
याय अथवा स्वायेत्ता त्वे यजमानारूपाय पुत्राय वयो अन्नं कुर्वाणः तन्वे शरीराय वायो अन्नं कुर्वाणः यद्यस्मात् सहसस्पुत्र अग्ने देवान् विप्र ब्रितर्प
यसि पाहि हे नृतम नेतृतमाग्ने सत्वं वाजे संग्रामे अस्मान् पाहि रक्ष ॥ ॥ अथ सप्तमी ॥ ॥ वयं ते अग्न उक्थैर्विधेम वयं हव्यैः पावक भद्रशोचे ॥
अस्मे रयिं विश्ववारं समिन्वास्मे विश्वानि द्रविणानि धेहि ॥ ॥ हे अग्ने त्वां वयं उक्थैः शस्त्रैर्विधेम परिचरेम वयं हव्यैर्हविर्भिर्विधेम । पावक
भद्रशोचे कल्याणदीप्ते अस्मे अस्मभ्यं विश्ववारं विश्वैर्वरणीयं रयिं धनं समिन्व प्रापय । अस्मे अस्मभ्यं विश्वानि द्रविणानि धेहि स्थापय ॥
॥ अथाष्टमी ॥ ॥ हे अग्ने अस्माकमध्वरं जुषस्व हे सहसः सूनो हे बलस्य पुत्र त्रिषधस्थ त्रिषु दिव्यादिषु स्थानेषु स्थितं हव्यं हविर्जुषस्व ॥
×२ अस्माकमग्ने अध्वरं जुषस्व सहसः ४ सेवस्व १ सूनो त्रिषधस्थ हव्यं ॥ वयं देवेषु सुकृतः स्याम शर्मणा नस्त्रिवरूथेन पाहि ॥ ॥×२ म
यद्वा अध्वरं हविरिति योज्यं । अहिंसितं हविरित्यर्थः ॥ वयं यजमानाः देवेषु मध्ये सुकृतः शोभनापूर्वकर्तारः स्याम भवेम । त्रिवरूथेन
वा त्रिकादिभेदेन त्रिधा वरणीयेन शर्मणा सुखेन त्रिच्छदिष्केण गृहेण वा नः पाहि रक्ष ॥ ॥ अथ नवमी ॥ ॥ विश्वानि नो दुर्गहा जातवेदः सिंधुं न
नावा दुरितातिपर्षि ॥ अग्ने अत्रिवन्नमसा गृणानो ऽस्माकं बोध्यविता तनूनां ॥ ॥ हे जातवेदः नो ऽस्माकं दुर्गहा दुःखेन भोग्यानि विश्वानि दु
रितान्यतिपर्षि पारय । सिंधुं न नाविको यथा । तद्वत् अग्ने अत्रिवत् अत्रेर्यथा तथा नो ऽस्माकं नमसा स्तोत्रेण गृणानः स्तूयमानः सन् अस्माकं त
नूनां अविता रक्षको बोधि बुध्यस्व । पुत्रकामेष्ट्यां यस्त्वेषा प्रधानस्य याज्या । सूत्रितं च । यस्त्वा हृदा कीरिणा मन्यमानो ऽग्निं त्रिस्त्रे विश्ववस्त

ऋ॰सं॰भा॰८

हे शोचिष्ठो दीप्तैः पते स्वामिन्नग्ने शुक्रस्य दीप्तस्य तेतुभ्यं रिवामा त्रणसहहविर्क्रयंते। हे सुश्चंद्र सुष्ठु आह्लादक शोभन हिरण्यवा हे दस्म शत्रू
णामुपक्षपयितः विश्पते विशां प्रजानां पालक हव्यवाट् हविषो वोढ इषमिति। तं॥ ॥ इति तृतीयस्याष्टमे द्वाविंशो वर्गः॥ ॥ अथ षष्ठी॥ ॥
प्रो त्ये अग्नयो ग्निषु विश्वं पुष्यंति वार्यं॥ ते हिन्विरे त इन्विरे त इषण्यंत्यानुषगिषं स्तोतृभ्य आ भर॥ ॥ प्रो त्ये अग्नयो ग्निषु वेदिके षु विश्वं
सर्वं वार्यं वरणीयं अपेक्षितं धनं पुष्यंति ते अग्नयो हिन्विरे प्रीणयंति इन्विरे प्रीणयंति इन्विरे व्याप्नुवंति च। त इषण्यंति अन्नमिच्छंति
आनुषक् सर्वत्रानुषक्तं तत्राग्निसामान्यापि प्राये लोकवचनं॥ ॥ अथ सप्तमी॥ ॥ तव त्ये अग्ने अर्चयो महि व्राधंत वाजिनः॥ ये पत्व
भिः शफानां व्रजा भुरंत गोनामिषं स्तोतृभ्य आ भर॥ ॥ हे अग्ने तव त्वदीयाः त्ये ते अर्चयो रश्मयो महि महदत्यधिकं वाजिनो न्नवंतो व्रा
धंत वर्धंते। यद्वा लुप्तोपमं। वाजिनोश्वा इव ये रश्मयः पत्वभिः पतनैः शफानां गोनां व्रजायूथानि भुरंत इच्छंति आयता ज्वाला होमाय कांक्षंत इ
त्यर्थः। ते वर्धंता॥ ॥ अथाष्टमी॥ ॥ नवा नो अग्न आ भर स्तोतृभ्यः सुक्षितीरिषः॥ ते स्याम य आनृचुस्त्वा दूतासो दमेदम इषं स्तोतृभ्य आ राम
भर॥ ॥ हे अग्ने स्तोतृभ्यो नोस्मभ्यं नवा स्तुत्या नूतना वा सुक्षितीः सुनिवासाः सुप्रजा वा इषः उक्तलक्षणान्यन्नानि आ भर प्रयच्छ। ये वयं २५३
दमेदमे स्यामेति वा योज्यं। आभिप्लविके पृष्ठ्ये षु तृतीयसवने चैकाहिकस्तोत्रिय तृचे उभे सुश्चंद्रेत्येषा तृतीया। सूत्रमुक्तं॥ ॥ सैषा नव
मी॥ ॥ उभे सुश्चंद्र सर्पिषो दर्वी श्रीणीष आसनि॥ उतो न उत्पुपूर्या उक्थेषु शवसस्पत इषं स्तोतृभ्य आ भर॥ ॥ सुश्चंद्र शोभनाह्लादन
शोभन हिरण्य वाग्ने उभे सर्पिषः पूर्णे दर्वी जुहूभृता वा सन्यासन्यास्ये श्रीणीषे आश्रयसि वसि वा। उतो अपि च नोस्माननु क्थेषु यागेषु सुपूर्याः
८९

उत्पूरय फाले हे शवसस्पते बलस्य पालयितः॥ ॥ अथ दशमी॥ ॥ एवाँ अग्निमजुर्यमुर्गीर्भिर्यज्ञेभिरानुषक्॥ दधदस्मे सुवीर्यमुत त्य
दाश्वश्व्य मिषं स्तोतृभ्य आ भर॥ ॥ एवं उक्तरीत्या अग्निं गीर्भिः स्तुतिभिर्यज्ञेभिर्यज्ञैर्वा तत्साधनैर्हविर्भिर्वा आनुषगनुषक्तं अजुः गच्छं
ति तथा त्वीयमुः यमयंति स्थापयंति। हविर्भिर्यजंतीत्यर्थः। एवमात्रेयाः स्वान्परोक्षतया निर्दिशंति अजुर्यं वा अश्वाय स्य भवति स अ
श्व्यः तस्य भावः आश्वश्व्यं तदपि दधत धारयंति॥ ॥ इति तृतीयस्याष्टमे त्रयोविंशो वर्गः॥ ॥ सखायः सं वइति दश वैसप्तमं सूक्तं
आत्रय इषऋषिः अंत्यापंक्तिः शिष्टाः पंक्त्यंतपरिभाषया नुष्टुभः। तथा चानुक्रांतं। सखाय इषः पंक्त्यंतमिति। प्रातरनुवाकाग्नेयेक्रतावाना
वानुष्टुभेछंदस्याश्विनशस्त्रे चोक्तमा वर्जमिदं सूक्तं। सूत्रितं च। सखायः सं वस्त्वामग्ने हविष्मंत इति सूक्ते इति॥ ॥ तत्र प्रथमा॥ ॥ स
खायः सं वः सम्यंचमिषं स्तोमं चाग्नये॥ वर्षिष्ठाय क्षितीनामूर्जो नप्त्रे सहस्वते॥ ॥ हे सखायः सखिभूता ऋत्विजः वो यूयं संस्कुरुत उप
सर्गश्रुतेर्योग्यक्रियाध्याहारः। किं च सम्यंचमिषमन्नं स्तोत्रं च अग्नये वर्षिष्ठाय अतिशयेन प्रवृद्धाय क्षितीनां यजमानानां अर्था
य वर्षिष्ठाय प्रवृद्धतमाय ऊर्जो नप्त्रे बलस्य नपातयित्रे न तु त्रायवासहस्वते। बलवते संस्कुरुतेति॥ ॥ अथ द्वितीया॥ ॥ कुत्रा चिद्य
स्य समृतौ रण्वा नरो नृषदने॥ अर्हंतश्चिद्यमिंधते संजनयंति जंतवः॥ ॥ सो ग्निः कुत्र वर्त्तत इति शेषः। कुत्रास्ते यस्याग्नेः समृतौ
संप्राप्तौ रण्वाः रमणा नरो नेतार ऋत्विजः नृषदने नृगृहे अर्हंतश्चित् चिदिति पूजायां अर्हंतः पूज्याः पूजयंतो वा संतः समिंधते
दीपयंति तदर्थं संजनयंति वा रण्यो जंतवः प्राणिनः संकुत्रेति संबंधः॥ ॥ अथ तृतीया॥ ॥ सं यदिषो वनामहे सं हव्या मानुषाणां॥ उत

द्युम्नस्य शवस ऋतस्य रश्मिमाददे ॥ ॥ यद्यदा इषो अग्निं संवनामहे संभजामहे यदा च मानुषाणामस्माकं हव्यवाहं वीषि अग्निः संसेच
ऋ·सं·भा·८ ने। उतनदानीं द्युम्नस्य द्योतमानस्यान्नस्य शवसा बलेन सामर्थ्येन ऋतस्योदकस्य ग्राहकं हर रश्मिं आददे। आदत्तोग्निः फलजनकं तेस्वी
कृतवानित्यर्थः। यद्वा ऋतस्य यज्ञस्य रश्मिं रश्मिवद्ग्राहकं स्तवं आददे स्वीकरोमि ॥ ॥ अथ चतुर्थी ॥ ॥ स स्मा कृणोति केतुमा नक्तं
चिद्दूर आसते। पावको यद्वनस्पतीन्प्र स्मा मिनात्यजरः ॥ ॥ स स्म स खल्वग्निः कृणोति करोति करोति केतुं प्रज्ञानं आ सर्वतः कस्येति
उच्यते। विदत्यर्थेन कंचिद् ज्ञात्र वपि दूरे आसते आ इति चार्थे दूरे पिवर्तमानाय मनुष्याय कदा यद्यदायाचके यमग्निरजरोजीर्णो निभि
भावः सन् वनस्पतीन् धांसि प्रस्म मिनाति। प्रकर्षेण दहति स्मेति पूरणः ॥ ॥ अथ पंचमी ॥ ॥ अव स्म यस्य वेषणे स्वेदं पथिषु जुह्वति ॥
अभीमह स्वजेन्यं भूमा पृष्ठेव रुरुहुः ॥ ॥ अस्याग्नेर्वेषणे परिचर्यायां पथिषु होमार्गेषु रश्मिवत् स्वेदं स्रुवदाज्यं अव अधो मुखं जुह्व
ति अध्वर्युवः। तदानीमनमग्निं रभिरुरुहुः रुहः अभ्यारोहंते वा ज्यधाराः अह इति विनिग्रहार्थीयः। स्वजेन्यं स्वत्वेनं भूमह भवती
ति भूमा पत्यं तत् पितुः पृष्ठदेशानि पुत्रा यथा पितुरंकमारोहंति तद्वत् ॥ ॥ इति तृतीयस्याष्टमे चतुर्विंशो वर्गः ॥ ॥ अथ षष्ठी ॥ ॥ यं मर्त्यः राम २५८
प पुरुस्पृहं विदद्विश्वस्य धायसे ॥ प्रस्वादनं पितूनामस्ततातिं चिदायवे ॥ ॥ यमग्निं पुरुस्पृहं बहुभिः स्पृहणीयमग्निं विदत् लभते म
र्त्यो यजमानो विश्वधायसे सर्वस्य धारणार्थं पितूनामन्नानां प्रस्वादनं प्रकर्षेणास्वादयितारं अस्ततातिं अस्ते गृहे निवासकर्तारं आ
यवे अन्नार्थं यजमानार्थं च ॥ ॥ अथ सप्तमी ॥ ॥ स हि ष्मा धन्वाक्षितं दाता न दात्या पशुः ॥ हिरिश्मश्रुः शुचिदन्नृभुरनिभृष्टतविषिः ॥

८०

वोस्तं नित्यासो वाजिन इषं स्तोतृभ्य आ भर ॥ ॥ तमग्निं मन्ये स्तोमि यो अग्निर्वसुर्वासकः यमस्तं सर्वेषां गृहरूपाश्रयभूतं धेनवो यंति गच्छंति प्रीण
यंतु ॥ यस्तमुस्त लक्षणमर्वंतो आशवः शीघ्रगामिनो यंति। तथा नित्यासो नित्यप्रवृत्ता हविर्लक्षणान्नवंतो यजमानाय म
स्तं यंति तमन्ये इषमन्नं स्तोतृभ्यो स्मभ्यमाभराग्ने ॥ ॥ अथ द्वितीया ॥ ॥ सो अग्निर्यो वसुर्गृणे संयमायंति धेनवः ॥ समर्वंतो रघुद्रुवः
सं सुजातासः सूरय इषं स्तोतृभ्य आ भर ॥ ॥ सो अग्निः स खल्वग्निः यो वसुर्वासको गृणे स्तूयते यं धेनवः समायांति होमार्थं अर्वंतो अश्वा र
घुद्रुवो लघुगमनाः समायांति। सुजातासः सूरयो मेधाविनश्च समायंति स खल्वग्निरिति ॥ ॥ अथ तृतीया ॥ ॥ अग्निर्हि वाजिनं विशे दद
ति विश्वचर्षणिः ॥ अग्नी राये स्वाभुवं स प्रीतो याति वार्यमिषं स्तोतृभ्य आ भर ॥ ॥ अग्निर्हि अयमग्निः खलु विशे यजमानाय वाजि
नमन्नवंतं पुत्रमश्वमन्नं वा ददाति विश्वचर्षणिः विश्वचर्षणो यो मनुष्यान् रक्षणीया अर्वका वा यस्य स तथोक्तः यद्वा पश्यति कर्मेतत् सर्व
स्य द्रष्टा अग्नी राये धनार्थिने अथवा द्वितीयार्थे चतुर्थी ॥ धनं स्वाभुवं सुष्ठु सर्वत्र व्याप्तं वार्यं सर्वैर्वरणीयं प्रीतः सन् याति यमेष्यति दातुं वाग
च्छति इषमित्यादि गतं। आभिप्लविके षडहे तृतीयसवने स्तोत्रियस्तृचस्याते अग्न इधीमहीभे सुश्चंद्र सर्पिष इति द्वे एका चेति ॥ ॥ तत्र द्वि
ते प्रथमा सूक्ते चतुर्थी ॥ ॥ आ ते अग्न इधीमहि द्युमंतं देवाजरं ॥ यद्ध स्या ते पनीयसी समिद्दीदयति द्यवीषं स्तोतृभ्य आ भर ॥ ॥ हे अग्ने
देव द्युमंतं दीप्तिमंतमजीर्णं तत्त्वा आ समंतत इधीमहि दीपयामः। यद्ध खलु स्या सा खलु ते तव स्या सा पनीयसी स्तुत्या समिद्दीप्तिः दीदयति
दीप्यते द्यवि द्युलोके ॥ ॥ अथ पंचमी ॥ ॥ आ ते अग्न ऋचा हविः शुक्रस्य शोचिषस्पते ॥ सुश्चंद्र दस्म विश्पते हव्यवाट् तुभ्यं हूयत इषं ॥ ॥

ऋ॰सं॰भा॰८

तदनुवाक आग्नेयेऽक्रतौ जागते छंदस्याश्विनशस्त्रे चेदं सूक्तं। तथा च सूत्रं। जनस्य गोपास्त्वामग्न ऋतायव इति॥ ॥तत्र प्रथमा॥ ॥त्वाम
ग्न ऋतायव इति॥ ॥हे सहसस्कृत बलस्य कर्तरग्ने। प्रत्नं पुरातनं त्वां प्रत्नासः पुरातनाः ऋतायवो यज्ञकामा ऋषय ऊतये स्वरक्ष
णाय समीधिरे सम्यग्दीपितवंतः कीदृशं त्वां पुरुश्चंद्रं बहु धनमतिशयेनाह्लादकं वा यजतं यष्टव्यं विश्वधायसं बहून्नं दमूनसं
दानमनसं गृहपतिं यजमानगृहस्य पालकं वरेण्यं वरणीयं॥ ॥अथ द्वितीया॥ ॥त्वामग्ने अतिथिमिति॥ ॥हे अग्ने त्वां विशो य
जमानाः गृहपतिं गृहस्वामिनं निषेदिरे गार्हपत्यरूपेण स्थापितवंत इत्यर्थः। कीदृशं त्वां अतिथिं अतिथिवत्पूज्यं पूर्व्यं पुरातनं
शोचिष्केशं दीप्तज्वालं बृहत्केतुं प्रभूतप्रज्ञानं पुरुरूपं आहवनीयादिरूपेण धनानांस्य। तुरिं सुशर्माणं शोभनसुखं स्ववसं सुरक्षणं
जरद्विषं जरतां रक्षसां व्यापकं जीर्णादिकं वा। अग्नीनां परस्परं संसर्गे विविचयेऽग्नये काविद्विष्टिः। तत्र त्वामग्ने मानुषीरिति याज्या सू
त्रितं च। त्वामग्ने मानुषीरीळते विशोऽग्न आयाहि वीतय इति॥ ॥सेषा तृतीया॥ ॥त्वामग्ने मानुषीरीळते विश इति॥ ॥हे अग्ने सुभग
शोभनधन त्वां मानुषीर्विशः मानुषसंबंधिन्यः सर्वाः प्रजाः ईळते स्तुवंति। कीदृशं त्वां होत्राविदं होमानां सप्तकाणां वा वेत्तारं विवि
चिं विवेचकं सदसतोः रत्नधातमं रमणीयानां धनानां दातृतमं गुहा गुहायां अरण्ये हृदये सुवासं तं सर्वदा वर्तमानं विश्वदर्शतं द्र
ष्टव्यं तुविष्वणसं प्रभूतध्वनिं सुयजं सुष्टु यष्टारं घृतश्रियं घृतश्रयण॥ ॥अथ चतुर्थी॥ ॥त्वामग्ने धर्णसिमिति॥ ॥हे अग्ने धर्णसिं
सर्वस्य धारकं त्वां वयमात्रेया वा विश्वधा बहुप्रकारेण गीर्भिः स्तुतिभिः स्तुवंतो नमस्कारेणोपसेदिम उपसन्ना भवेम। स त्वं नोऽस्मान् जुषस्व।

राम
२५५

सहिष्णुःसवत्वग्निः धन्वनि उदकप्रदेशे आक्षितं तृणकाष्ठादिभिराक्षिप्तं आदाति सर्वतः खंडयति ददातीत्यर्थः शात्तृणादिखंडयिता
पशुर्न पशुरिव।
॥ ॥ अथाष्टमी ॥ ॥ शुचिःष्म यस्मा अत्रिवत्प्रस्वधितीव रीयते ॥ सुषूरसूत माता क्राणा यदानशे भगं ॥ ॥
सुषूः सुप्रसवा माता अरणिरसूत कां कुर्वाणं जगदुपकारकं यद्यस्मात् य इति वायो गर्भगमनमानशे अश्नुते ॥ ॥ अथ नवमी ॥
॥ आ यस्ते सर्पिरासुतेऽग्ने शमस्ति धायसे ॥ ऐषु द्युम्नमुत श्रव आ चित्तं मर्त्येषु धाः ॥ ॥ हे सर्पिरासुत घृतारव्याप्त अग्ने त्वं आ सर्वतो
भवसि। तदेव धायसे सर्वस्य धात्रे तेतुभ्यं शमस्ति सुखमस्ति। स्तुतेः सकाशात् तथा चेत् एषु मर्त्येषु स्तोतृष्वात्रेयेषु द्युम्नं यशः
आधाः आधेहि उतापि श्रवो अन्नमाधाः चित्तं त्वदीयामनुग्रहबुद्धिं मय्याधाः ॥ ॥ अथ दशमी ॥ ॥ इति चिन्मन्युमध्रिजस्त्वादात
मा पशुं ददे ॥ आदग्ने अपृणतोऽत्रिः सासह्याद्दस्यून् इषः सासह्यान्नॄन् ॥ ॥ इति चित् इत्थं उक्तप्रकारेण मन्युमननसाधनं स्तोत्रं अध्रिजः अ
धृत अन्यैरग्निव्यतिरिक्तैरध्रिजः अधृष्यो जनयिता ऋषिस्त्वादातं त्वया दातव्यं। पशुमाददे आदत्ते आददीत वा। आदनंतरमेवाग्ने र
पृणतो अददतः दस्यून् अत्रिर्विजेता इषः सासह्यात् भृशमभिभवेत् इष एतत् नॄंश्च वैरिणः सासह्यात् पुनरुक्तिरादरार्था ॥ ॥ इति तृती
यस्याष्टमे पंचविंशो वर्गः ॥ ॥ वामम्न इति सप्तर्चमष्टमं सूक्तं आत्रेयस्यार्षं जागतमाग्नेयं ॥ वाममग्ने सप्त जागतमित्यनुक्रमणिका ॥ प्र

स यस्त्वस्य धनादिभिः समिधानः सप्यर्यन् दीप्यमानः स्मर्षिः हे अंगिरः सर्वत्र गंत रंगिरसः पुत्र देवो दीप्यमान त्वं मर्त्यस्य यजमानस्य
यशसा सुदीतिभिः ज्वालाभिः सह कुषस्व॥ ॥अथ पंचमी॥ ॥त्वमग्ने पुरुरूपो विशेविशे वयो दधासि प्रत्नथा पुरुष्टुत॥ पुरूण्यन्ना स
हसा वि राजसि त्विषिः सा ते तित्विषाणस्य नाधृषे॥ ॥हे अग्ने त्वं पुरुरूपः स न्विशे विशे सर्वस्मै यजमानाय प्रत्नथा पुराण इव वयोऽन्नं दधा
सि धारयसि। हे पुरुष्टुत बहुभिः स्तुत्य रूपाणि बहून्यन्नानि च पुरोडाशादीन् सहसा बलेन विराजसि ईश्वरो भवसि। स्वीकर्तुं तित्विषाणस्य दी
प्तस्य सा प्रसिद्धा त्विषिर्दीप्तिर्नाधृषे अन्यैरधृष्या भवति॥ ॥अथ षष्ठी॥ ॥त्वामग्ने समिधानं यविष्ठ्य देवा दूतं चक्रिरे हव्यवाहनं॥ उरुज्रय
सं घृतयोनिमाहुतं त्वेषं चक्षुर्दधिरे चोदयन्मतिः॥ ॥हे यविष्ठ्य युवतमाग्ने समिधानं सम्यगिध्यमानं त्वां देवा हव्यवाहनं हविषां वोढारं दू
तं चक्रिरे। कृतवंतो देवाः त्रयाणामग्नीनां मध्ये हव्यवाहनः खलु पूर्वं देवैर्हविर्वहनाय दूतः कृतः हव्यवाहनो देवानामिति हि श्रुतिः। किंच उ
रुज्रयसं प्रभूतवेगं घृतयोनिं घृतयोनिः कारणं यस्य तं आहुतं त्वेषं चोदयन्मति वा दयंती मतिर्यस्य तत्त्वोदयन्मति त्वेषं दीप्तं चक्षुः उक्तल
क्षणं सर्वप्रकाशकं चक्षुःस्थानीयं कृत्वा दधिरे देवा मनुष्याश्च। मत्या हि चक्षुष्यो घृते॥ ॥अथ सप्तमी॥ ॥त्वामग्न प्रदिवः आहुतं घृतैः सु
म्नायवः सुषमिधा समीधिरे॥ स वावृधान ओषधीभिरुक्षितोऽभि ज्रयांसि पार्थिवा वि तिष्ठसे॥ ॥हे अग्ने घृतैराहुतं त्वां प्रदिवः पुरातनाः
सुम्नायवः सुखमिच्छंतो यजमानाः सुसमिधा शोभनेनेध्मेन समीधिरे सम्यक् दीपितवंतः। स त्वं वावृधानः वर्धमानः ओषधीभिरुक्षि
तः सिक्तः ज्रयांसि अन्नानि पार्थिवा पार्थिवानि वृक्षान्नपक्वां पार्थिवानि ज्रयो विशेषण। पार्थिवा जिवस पुरोडाशादिकान्यभि वितिष्ठसे अभियज
व्रजसि॥ ॥इति तृतीयस्याष्टमे षड्विंशो वर्गः॥ ॥वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्। पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥ ॥छ॥

॥ छ ॥ इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माध
वीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये तृतीयाष्टके ष्टमोऽध्यायः ८ ॥ छ ॥ ॥ इति तृतीयाष्टकः ॥ ॥ शाके १९०७ प्रवर्त्तमाने क्रोधनना
मसंवत्सरे कार्त्तिकवदि द्वादश्यां भार्गववासरे तृतीयाष्टकवेदभाष्यं याज्ञिकी भीमण भट्टस्य लिखितं समाप्तोयम् ॥ कल्याणमस्तु ॥

ग्रंथसंख्य १९५००

83/1

83/1

राम
२५६